
विष्णुपुराणम् ।

श्रीधरस्वामिकृत-स्वप्रकाशाख्यटीकासहितम् ।

बि, ए, उपाधिधारिणा ।

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतम् प्रकाशितञ्च ।



कलिकातानगर्य्याम् ।

सरस्वतीयन्त्रे मुद्रितम् ।

सं १८८२

প্রিন্টার শ্রীক্ষেত্রমোহন মুখোপাধ্যায়।

২০ নম্বর ঝামাপুকুর লেন।

विष्णुपुराणस्य सूचीपत्रम् ।

प्रथमोंऽशः ।

प्रथमोऽध्यायः ।

तृतीयोंऽशः ।

प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

नवमोऽध्यायः ।

दशमोऽध्यायः ।

एकादशोऽध्यायः ।

———

चतुर्थांशस्य ।

प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

नवमोऽध्यायः ।

दशमोऽध्यायः ।

एकादशोऽध्यायः ।

द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः ।

चतुर्दशोऽध्यायः ।

पञ्चदशोऽध्यायः ।

षोडशोऽध्यायः ।

सप्तदशोऽध्यायः ।

अष्टादशोऽध्यायः ।

एकोनविंशोऽध्यायः ।

विंशोऽध्यायः ।

द्वात्रिंशोऽध्यायः ।

त्रयस्त्रिंशोऽध्यायः ।

चतुस्त्रिंशोऽध्यायः ।

पञ्चत्रिंशोऽध्यायः ।

षट्त्रिंशोऽध्यायः ।

सप्तत्रिंशोऽध्यायः ।

अष्टत्रिंशोऽध्यायः ।

षष्ठोऽंशः ।

प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

विष्णुपुराणसमाप्तिः ।

विष्णुपुराणम् ।

प्रथमोऽंशः ।

जितं ते पुण्डरीकाक्ष ! नमस्ते विश्वभावन ! ।
नमस्तेऽस्तु हृषीकेश ! महापुरुषपूर्वज ! ॥ १ ॥

श्रीबिन्दुमाधवं वन्दे परमानन्दविग्रहम् ।
वाचं विश्वेश्वरं गङ्गां पराशरमुखान् मुनीन् ॥ १ ॥
श्रीमच्चित्सुखयोगिमुख्यरचितव्याख्यां निरीक्ष्य स्फुटं
तन्मार्गेण सुबोधसंग्रहवतीमात्मप्रकाशाभिधाम् ।
श्रीमद्विष्णुपुराणसारविवृतिं कर्त्ता यतिः श्रीधर-
स्वामी सद्गुरुपादपद्ममधुपः साधु समुद्युङ्क्ते ॥ २ ॥
श्रीमद्विष्णुपुराणस्य व्याख्यां सन्त्यतिविस्तराम् ।
प्राचामालोक्य तद्व्याख्या मध्यमेयं विधीयते ॥ ३ ॥
यस्मिन् विश्वमिदं यत्र वस्तु तत्त्वमनात्मकम् ।
सुविमर्शोपनिषदा ज्ञातं बध्नाति मङ्गलम् ॥ ४ ॥

जितं त इति । तस्मिन्ने प्रथमेऽध्याये मैत्रेयेण पराशरे ।
महत्त्वार्थं पुराणस्य प्रश्ना द्वाविंशतिः कृताः ॥

इह खलु पुराणानां ईश्वरनिश्वसितरूपत्वेन वेदमूलत्वेन इदानीन्तनानां व्यासवसिष्ठपराशरादीनां स्मृतिरूपत्वेन च प्रमाणत्वं प्रयोजनत्वं च दुरपह्नवमेव । तद्व्याख्यानानां च तत्तदर्थाभावनिरासतत्त्वप्रकाशकत्वपरत्वेन प्रयोजनवत्त्वं पुराणत्वाविशेषेऽपि व्याख्यानत्वेन जगज्जीवात्मपरमात्मनामैकात्म्यप्रतिपादनाध्यायप्राधान्यादत्रैव पुराणे भूयां प्रसिद्धिरधिगतमस्येतदेव व्याख्यायते । तत्र च सर्गप्रतिसर्ग-

तदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्मि-सृष्टि-स्थिति काल-संलयः।

वंशमन्वन्तरवंशानुचरितानां तदुपवादेन सङ्क्षेपेण प्रतिपादनम्। यथा-चारम्भगोत्रभरतोपाख्यानादिनिरूपणस्य प्रासङ्गिकपरम्परया वा प्रक्षा-वेशोपयोगो द्रष्टव्यः। पुण्डरीकाक्षेति। हृदयाख्यं पुण्डरीकं अश्नुते व्याप्नोतीति तथा। यद्वा पुण्डरीके इव अक्षिणी यस्येति। अत्र च तत्त्वमविवक्षितं, शोभितत्वेनैव नयनोपमानम्। विश्वाराधनार्थं पुण्डरीकाक्षनमर्यादेनेति वा. "पुण्डरीकं परं धाम नित्यमक्षयमव्ययम्" इत्यादिवाक्योक्तस्वरूपस्य वा, पुण्डरीकाक्षेति सम्बोधनमिति वा। ते इति सम्बन्धो भवेत्। तत्र स्थितं अर्थान्तरमर्थः। यद्वा, ते त्वया स्थित सर्वोत्कर्षेण स्थितमिति। एतेन नमस्कार आक्षिप्तः। विश्व-भावन! विश्वोत्पादक! हृषीकाणामिन्द्रियाणामीश! तत्प्रवर्तक-त्वेनेन्द्रियसिद्धेतुत्वात्, "प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो ये मनो विदु" इति श्रुतेः। महापुरुषेति जीवव्यवच्छेदाय। महत्त्वं च "द्वा सुपर्णा सयुजा सखाया" इत्यादिश्रुतेः। नित्यशुद्धमुक्तभाव-त्वात्। पुरि शरीरे शयनात्तु पुरुषत्वम्। विश्वोत्पादकत्वे हेतुः। पूर्वजेति सृष्टेः पूर्वमेव जातः प्रादुर्भूतत्वेनानन्यथासिद्धत्वेन सर्वेषां तदधीनत्वात्। नन्वेवमादेः नमस्कारात्मकत्वसिद्धौ कृतं वस्तुनिर्देश-नमस्कारैरिति चेन्न। अस्य शास्त्रस्यातिश्रेयःसाधनत्वेन बहुविघ्नसंभाव-नया बहुमङ्गलानुष्ठानापेक्षकत्वात्। अथवा पुण्डरीकाक्षेत्यादि पञ्च-विशेषणैः "भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान्। आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः इति पञ्चमांशोक्तः।" पञ्चात्मा हरिरीरितः इति। तत्र पुण्डरीकाक्षेति भूतात्मा, विश्वभावनेति प्रधानात्मा, हृषीकेशेति इन्द्रियात्मा महापुरुषेति परमात्मा पूर्वजेत्या-त्माभिहितः॥१॥

श्रोतृप्रवृत्त्यङ्गं सम्बन्धं प्रयोजनं च प्रतिपादयितुमाह, तदक्षर-मिति। योऽतिप्रसिद्धो विश्वव्यापकत्वेनोक्तो देवताकालस्वरूपतो सृष्ट-

प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः
स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥ २ ॥
प्रणम्य विष्णुं विश्वेशं ब्रह्मादीन् प्रणिपत्य च ।
गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसम्मितम् ॥ ३ ॥

...टाभावात् । विष्णुः सर्वशो विष्णुः प्रवेशनशीलः "तत् सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः । मतिभूतिमुक्तिदोऽस्तु मतिभूत्या तत्त्वज्ञानाद्युक्तेन मुक्तिदः । यद्वा चतुर्विधपुरुषार्थभेदात् । मतिम् धर्मे बुद्धिं, भूतिम् ऐश्वर्यं मुक्तिञ्च ददातीति तथा । विष्णुपदस्य प्रवेशनशीलार्थत्वे कूटस्थत्वं प्राप्तं निराकरोति । सर्वज्ञेति पूर्वेणान्वयः । ननु कुत इत्यत आह, सर्वज्ञानम् । इदं यदिदं यदिति सर्वत्र प्रतीयमानत्वात् कार्यमिति यावत् । अक्षरमिति विकारं निराकरोति, पुमान् पुरुषः कार्यार्थं मत्वादिपदमत आह ईश्वरः कर्तुमकर्तुमन्यथा कर्तुं समर्थः । ननु कुत इत्यत आह गुणेति गुणाः सत्त्वरजस्तमांसि तेषामर्थः कामभक्तिताः सृष्टिस्थितिकारणाः कालः संहारः तेषां संश्रयः संश्लेषोऽध्यासो यस्मिन् स तथा सर्वाधिष्ठानत्वेनेश्वरत्वमव्याहतमित्यर्थः । ननु प्रधानादेव सृष्ट्यादि इति चेदत आह, प्रधानबुद्ध्यादीनां जगत्प्रपञ्चानां सूः सविता प्रधानबुद्ध्यादितया कथं तज्जनकत्वमिति चेन्न । प्रधाने तज्ज्ञानाधिष्ठातृत्वेन तत्कार्यद्वारा जनकोपचारात् । यद्वा प्रधानद्वारा बुद्ध्यादिसूरित्यर्थः । यद्वा यो विष्णुर्वैष्णवीनां सहचरं ब्रह्म, पापपुण्यानां क्लेशकर्मविपाकाशयैरपरामृष्ट ईश्वरः । सर्वज्ञानां पुमान् पुरुषः । तदुक्तं कापिलैः "न प्रकृतिर्न विकृतिः पुरुषः" इति । स मतिभूतिमुक्तिदोऽस्त्वित्यन्वयः । शेषं समानम् ॥ २ ॥ अथ पराशरो मुनिः गुर्वादिभक्तिं पुरुषार्थसाधनं दर्शयन् मैत्रेयं निजशिष्यं विष्णुतत्त्वप्रतिपादकं विष्णुपुराणमारभते । प्रणम्येति प्रशब्देन भक्तिश्रद्धातिशयो द्योत्यते । विश्वेशं ब्रह्मादितत्त्वमूर्तीनामधीशं प्रवृत्तिनिवृत्तिकारणम् । प्रणिपत्येति सम्प्रदायप्रवर्त-

इतिहासपुराणज्ञं वेदवेदाङ्गपारगम् ।
धर्म्मशास्त्रादितत्त्वज्ञं वशिष्ठतनयात्मजम् ॥ ४ ॥
पराशरं मुनिवरं कृतपूर्व्वाह्णिकक्रियम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥ ५ ॥
त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो ! ।
धर्म्मशास्त्राणि सर्व्वाणि वेदाङ्गानि यथाक्रमम् ॥ ६ ॥
त्वत्प्रसादान्, मुनिश्रेष्ठ ! मामन्ये नाकृतश्रमम् ।
वक्ष्यन्ति सर्वशास्त्रेषु प्रायशो येऽपि विद्विषः ॥ ७ ॥

कान् प्रश्नमति, सृष्ट्यादीनिति । सृष्ट्यभ्युदयपुरुषार्थकारण-न्वस्तीन् । पुरु अपिवं वारवतं वा । पुराणं सर्गप्रतिसर्गवंशमन्वन्तर-वंशानुचरितमिति पञ्चाङ्गम् । तत्र यथाक्रमं प्रथमेंऽशे सर्गप्रतिसर्गौ । द्वितीये प्रसङ्गागतं भूगोलज्योतिश्चक्रम् । तृतीये मन्वन्तरम् । चतुर्थे वंशः । पञ्चमे वंशानुचरितम् । षष्ठे वैराग्योपयोगि प्रलयादिकमभि-धाय आत्यन्तिकप्रलयहेतुर्मोक्षः कथ्यते । श्रौति, वेदेन संमितं तुल्य-मिति ॥ इतिहासेत्यस्य विशेषणत्वेन पुराणप्रशंसैवेति भावः । इतिहासमयम् पारम्पर्योपदेशाभिधायि, तत्स्वरूपम् आह: अपस्मान-मिति । इतिहासा पुरातनानि "धर्मार्थकाममोक्षाणामुपदेशसम-न्वितम् । पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते" इति स्मृतेः । वेद-वेदाङ्गपारगं वेदस्य तदङ्गानां शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योति-षाञ्च पारगम् । धर्मशास्त्रं स्मृतिः, आदिशब्दो न्यायमीमांसादि-संग्रहार्थः । धर्मशास्त्रादीति वा पाठः । वसिष्ठतनयः शक्तिः तत्सुतं तत्त्वम् ॥ ४ ॥ पराशरमिति मुनिवरं परोक्षमिदं यो योग्यत्वा देशाटावधश्छारव्योजनार्थः । प्रणिपत्य दण्डवत् प्रणम्य पादस्पर्शादि-विधिना अभिवाद्य च ॥ ५ ॥ गुरुशुश्रूषणं पदु तत्कृतमनुवच-मनुवदति त्वत्त इति द्वाभ्याम् । त्वत्तो वेदाध्ययनमधीतं कृतमित्यर्थः । श्लोकपाठं पपतीतिवत् । अन्ये विद्वांसो वा सर्वशास्त्रेषु अकृतश्रमं

सोऽहमिच्छामि धर्मज्ञ! श्रोतुं त्वत्तो यथा जगत्।
बभूव, भूयश्च यथा महाभाग! भविष्यति॥ ८॥
यन्मयञ्च जगत् ब्रह्मन्! यतश्चैतच्चराचरम्।
लीनमासीत् तथा यत्र, लयमेष्यति यत्र च॥ ९॥
यत्प्रमाणानि भूतानि, देवादीनाञ्च सम्भवम्।
समुद्रपर्वतानाञ्च संस्थानञ्च तथा भुवः॥ १०॥
सूर्य्यादीनाञ्च संस्थानं प्रमाणं मुनिसत्तम!।
देवादीनां तथा वंशान् मनून्, मन्वन्तराणि च॥ ११॥
कल्पान्, कल्पविकल्पांश्च चतुर्युगविकल्पितान्।
कल्पान्तस्य स्वरूपञ्च युगधर्मांश्च कृत्स्नशः॥ १२॥
देवर्षिपार्थिवानाञ्च चरितं यन्महामुने!।
वेदशाखाप्रणयनं यथाव्यासकर्त्तृकम्॥ १३॥
धर्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनाम्।
श्रोतुमिच्छाम्यहं सर्वं त्वत्तो वासिष्ठनन्दन!॥ १४॥
ब्रह्मन्! प्रसादप्रवणं कुरुष्व मयि मानसम्।

न वक्ष्यसि अपि तु विदितोऽपि सताम्भावमेव वक्ष्यसीत्यर्थः। ६। ७।
पूर्वं यथा जगत् बभूव, पुनश्च यथा भविष्यतीति उत्पत्तो जन्मप्रकारप्रश्नः। ८। यन्मयमिति उपादानप्रश्नः। यतश्चेति निमित्तप्रश्नः। लीनमासीत् यत्रेति लयाधारप्रश्नः॥ ९॥ प्रमाणमियत्ताप्रकारकं वा। यत्प्रमाणानि महाभूतानि यत्प्रमाणानि चेत्यर्थः। देवादीनां च सम्भवमित्युत्पत्तिप्रश्नः॥ १०॥ वंशान् मन्वादिपरिमितान् मन्वन्तरान्, कल्पविकल्पान् ब्रह्मणः संख्यान्। विभागानिति पाठेऽपि स एवार्थः। चतुर्युगैरादिकल्पैर्विकल्पितान् विभक्तान्॥ ११॥ कल्पितः संक्षयः। [illegible] मन्वन्तर ऊन हे परापर!॥ १३॥ प्रसादप्रवणं प्रसादाभिमुखं

येनाहमेतज्जानीयां त्वत्प्रसादान्महामुने ! ॥ १५ ॥

पराशर उवाच ।

साधु मैत्रेय ! धर्मज्ञ ! स्मारितोऽस्मि पुरातनम् ।
पितुः पिता मे भगवान् वसिष्ठो यदुवाच ह ॥ १६ ॥
विश्वामित्र-प्रयुक्तेन रक्षसा भक्षितो मया ।
श्रुतस्तातस्ततः क्रोधो मैत्रेयासीन्ममातुलः ॥ १७ ॥
ततोऽहं रक्षसां सत्रं विनाशाय समारभम् ।
भस्मीकृताश्च शतशस्तस्मिन् सत्रे निशाचराः ॥ १८ ॥
ततः संक्षीयमाणेषु तेषु रक्षःस्वशेषतः ।
मामुवाच महाभागो वसिष्ठो मत्पितामहः ॥ १९ ॥
अलमत्यन्तकोपेन, तात ! मन्युमिमं जहि ।
राक्षसा नापराध्यन्ते पितुस्ते विहितं तथा ॥ २० ॥
मूढानामेव भवति क्रोधो ज्ञानवतां कुतः ? ।
हन्यते तात ! कः केन, यतः स्वकृतभुक् पुमान् ॥ २१ ॥
सञ्चितस्यापि महता वत्स ! क्लेशेन मानवैः ।
यशसस्तपसश्चैव क्रोधो नाशकरः परः ॥ २२ ॥
स्वर्गापवर्गव्यासेधकारणं परमर्षयः ।
वर्जयन्ति सदा क्रोधं तात ! मा तद्वशो भव ॥ २३ ॥
अलं निशाचरैर्दग्धैर्दीनैरनपकारिभिः ।

येन प्रकारेणानेन विधिना ज्ञातात् त्वत्प्रसादादहमेतत् सर्वं जानी-याम् ॥ १५ ॥ ... यथा विश्वामित्रप्रेरितया ... तदुक्तं वसिष्ठोपाख्यान-कथामाह, विश्वामित्रप्रयुक्तेनेत्यादिना ॥ १८ ॥ २० ॥ २१ ॥ २२ ॥
स्वर्गापवर्गयोर्व्यासेधस्य प्रतिषेधस्य कारणं

सत्रं ते विरमत्वेतत्, क्षमासारा हि साधवः ॥ २४ ॥
एवं तातेन तेनाहमनुनीतो महात्मना।
उपसंहृतवान् सत्रं सद्यस्तद्वाक्यगौरवात् ॥ २५ ॥
ततः प्रीतः स भगवान् वसिष्ठो मुनिसत्तमः।
संप्राप्तश्च तदा तत्र पुलस्त्यो ब्रह्मणः सुतः ॥ २६ ॥
पितामहेन दत्तार्घ्यः कृतासनपरिग्रहः।
मामुवाच महाभागो मैत्रेय ! पुलहाग्रजः ॥ २७ ॥
वैरे महति यद्वाक्याद् गुरोरस्याश्रिता क्षमा।
त्वया, तस्मात् समस्तानि भवान् शास्त्राणि वेत्स्यति ॥ २८ ॥
सन्ततेर्न मम च्छेदः क्रुद्धेनापि यतः कृतः।
त्वया तस्मान्महाभाग ! ददाम्यन्यं महावरम् ॥ २९ ॥
पुराणसंहिताकर्त्ता भवान् वत्स ! भविष्यति।
देवतापारमार्थ्यञ्च यथावद्वेत्स्यते भवान् ॥ ३० ॥
प्रवृत्ते च निवृत्ते च कर्मण्यस्तमला मतिः।
मत्प्रसादादसन्दिग्धा तव वत्स ! भविष्यति ॥ ३१ ॥
ततश्च भगवान् प्राह वसिष्ठो मत्पितामहः।
पुलस्त्येन यदुक्तं ते सर्वमेतद् भविष्यति ॥ ३२ ॥
इति पूर्वं वसिष्ठेन पुलस्त्येन च धीमता।
यदुक्तं, तत् स्मृतिं यातं त्वत्प्रश्नादखिलं मम ॥ ३३ ॥

क्रोधः। हे तात ! क्रुद्धो मा भव ॥२४॥ गुर्वाज्ञाकारिणां यत्र पक्षरैया अपि अनुकूला भवन्ति इति दर्शयन्नाह। सम्प्राप्तश्चेत्यादिना ॥ २६ ॥ यद् यस्मात् अस्य गुरोर्वाक्यात् क्षमा आश्रिता तस्मात् ॥ २७ ॥ प्रवृत्ते च निवृत्ते च कर्मणि अस्तमला अज्ञानविपर्ययशून्या मतिर्भविष्यति। ते च कर्मणी श्रुतिप्रसिद्धे। "इह चामुत्र काम्यं च प्रवृत्तमभिधीयते।

सोऽहं वदाम्यशेषं ते मैत्रेय! परिपृच्छते।
पुराणसंहितां सम्यक् तां निबोध यथायथम् ॥ ३४ ॥
विष्णोः सकाशात् सम्भूतं जगत् तत्रैव संस्थितम्।
स्थितिसंयमकर्त्ताऽसौ जगतोऽस्य जगच्च सः ॥ ३५ ॥

इति श्रीविष्णुपुराणे प्रथमांशे प्रथमोऽध्यायः।

वैराग्यज्ञानपूर्वन्तु निवृत्तमुपदिश्यते" इति ॥ ३३ ॥ यथायथं यथार्थम् ॥ ३४ ॥ श्रोतुः सुखप्रतिपत्तये संक्षेपतस्तावत् सर्वप्रश्नोत्तरतया पुराणार्थं संग्रह्णाति विष्णोरिति श्लोकेन। सकाशात् भासः प्रकाशः ईक्षणमिति यावत्। तत्पूर्वकत्वात् विष्णोर्जगदुद्भूतम्। "स ईक्षत लोकान् नु सृजा" इति "सोऽकामयत बहु स्यां प्रजायेय" इत्यादि श्रुतिभिरभिध्यादि-शब्दापरपर्यायं यदीक्षणमालोचनात्मकं तेन प्रकारेण जगदुद्भूतम्। अनेन यथा बभूवेत्यस्य जन्मप्रकारप्रश्नस्योत्तरं तत्रैव स्थितम्। प्रलय-काले इति लयाधारप्रश्नस्योत्तरम्। चशब्दात् जगतः स्थितिरपि तत्रैवेत्युक्तम्। अस्य जगतः स्थितिसंयमयोरसावेव कर्त्ता। संयमोऽप्युपलक्षणम्। अनेन यतश्चैतच्चराचरात्मकम्। जगदित्यस्य निमित्त-प्रश्नस्योत्तरम्। जगच्च स इत्युपादानप्रश्नस्योत्तरम्। उपादानकारणरूपत्वात् कार्य्यस्य। अनेनैव विष्णोर्जगदुपादानरूपत्वादिवचनेन विष्णो-रेवोद्भविष्यति तत्रैव स्थास्यतीत्यादि सर्वप्रश्नोत्तरमर्थादूह्यम्। तत्र च यथा जगद् बभूव, यथा च पुनर्भविष्यति, यन्मयं च जगत्, यतश्च, यत्र पूर्वं लीनम्, पुनश्च यत्र लयमेष्यति। यत्प्रमाणानि भूतानि देवादीनां च संभवमित्यष्टप्रश्नोत्तरं प्रथमांशे। समुद्रपर्वतानाञ्च संस्थानं, भुवः संस्थानं, सूर्य्यादीनाञ्च संस्थानं तेषां परिमाणं चेति चतुःप्रश्नोत्तरं द्वितीयांशे। "देवादीनां तथा वंशान् मनून् मन्वन्तराणि च। वेदव्यास-प्रणयनं यथावद् व्याख्यातुमर्हसि। वर्णधर्म्मान् ब्राह्मणादीनां तथा चाश्रम-वासिनाम्।" इति षट्प्रश्नोत्तरं तृतीयांशे। देवर्षिपार्थिवानाञ्च चरित-मिति प्रश्नोत्तरं तद्वंशविस्तारोक्तिपूर्व्वकं चतुर्थांशे। तत्र च यदुवंशे

द्वितीयोऽध्यायः ।

पराशर उवाच ।

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ १ ॥
नमो हिरण्यगर्भाय हरये शङ्कराय च ।
वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥ २ ॥
एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः ।

भूभारहरणायावतीर्णस्य हरेश्चरितं विस्तरेण पञ्चमांशे । कल्पान् कल्पविकल्पांश्च कल्पान्तस्य स्वरूपं चेति प्रश्नत्रयस्य प्रथमांशेन संक्षेपेण इतरोत्तरस्य युगधर्मांश्च कार्त्स्न्येन इत्यस्य चोत्तरं षष्ठांशे इति विवेकः ॥ ३१ ॥

—:o:—

अथैतत्पुराणप्रतिपाद्यं विष्णोः स्वरूपं परापररूपेण प्रणमन् विस्तरेण पुराणार्थं वक्तुमाह, अविकारायेति नवभिः श्लोकैः । तत्र तावत्पूर्वाध्यायान्ते पुराणार्थं संक्षेपश्लोकेन जगदुपादानकर्तृत्वाद्युक्त्या प्राप्तं विकारादिप्रसङ्गं वारयन् प्रणमति । लोके हि क्रियाश्रयत्वात् कर्ता, विकारी दृष्टः । रागादिमांश्चानित्यश्चाशुद्धश्च । एतद्व्यावर्त्तयति । अविकारायेति चतुर्भिः पदैः । उपादानकारणमपि मृत्सुवर्णादि घटकटकादिनानापरिणामैरनेकरूपं दृष्टं, तद्व्यावर्त्तयति एकरूपमेव रूपं यस्य तस्मै सदेति सर्वत्रान्वयः । तत्र हेतुः । सर्वजिष्णवे अचिन्त्यैश्वर्येण सर्वान् कर्मकारणादीन् जेतुम् अतिशयितं शीलं यस्य तस्मै प्रभूताय विष्णवे नम इत्युत्तरेणान्वयः ॥ १ ॥ ब्रह्मादित्रिमूर्त्तिरूपेण प्रणमति, हिरण्यगर्भादिरूपाय, तैः रूपैः सर्गस्थित्यन्तकारिणे वासुदेवाय नमः । तदेवं संसारप्रवर्त्तकत्वमुक्त्वा तन्निवर्त्तकत्वेन प्रणमति । ताराय भक्तानां तारकाय च ॥ २ ॥ किञ्च एकमनेकं स्वरूपं यस्य स्थूलः

अव्यक्तव्यक्तभूताय विष्णवे मुक्तिहेतवे ॥ ३ ॥
सर्गस्थितिविनाशानां जगतोऽस्य जगन्मयः ।
मूलभूतो नमस्तस्मै विष्णवे परमात्मने ॥ ४ ॥
आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्य सर्वभूतस्थमच्युतं पुरुषोत्तमम् ॥ ५ ॥
ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ ६ ॥
विष्णुं ग्रसिष्णुं विश्वस्य स्थितिसर्गे तथा प्रभुम् ।
प्रणम्य जगतामीशमजमक्षरमव्ययम् ॥ ७ ॥
कथयामि यथा पूर्वं दक्षाद्यैर्मुनिसत्तमैः ।
पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥ ८ ॥
तैश्चोक्तं पुरुकुत्साय भूभुजे नर्मदातटे ।
सारस्वताय तेनापि मम सारस्वतेन च ॥ ९ ॥

स्वच्छन्दवात्मा स्वरूपं यस्य । विरुद्धरूपद्वयं कथमित्यत आह । अव्यक्तव्यक्तरूपाय अव्यक्तं कारणं, व्यक्तं कार्यं तदुभयरूपाय । यतोऽव्यक्तरूपत्वात् एकरूपाय च । व्यक्तरूपत्वादनेकरूपाय स्थूलात्मने चेत्यर्थः । एवं सर्वात्मत्वेनोपास्यानां मुक्तिहेतवे नम ॥ ३ ॥ कार्यकारणत्वम् अभिनयन् प्रणमति, सर्गेति । जगतः सर्गादीनां यो मूलभूतः जगन्मयश्च तस्मै विष्णवे सर्वव्यापिने, तथा परमात्मने कार्यकारणाभ्यां परम उत्कृष्टं आत्मा स्वरूपं यस्य तदुभयरहितायेत्यर्थः ॥ ४ ॥ आधारभूतमित्यादीनां प्रणम्य कथयामीति चतुर्णामन्वयः । अणीयसामपि अणीयांसम् अतिसूक्ष्मतमं सर्वभूतेषु नियन्तृत्वेन स्थितम् । कूटस्थत्वादच्युतं भेदपरिच्छेदशून्यम् ॥ ५ ॥ अर्थस्वरूपेण दृश्यरूपेण दृष्टजीवभ्रान्तिदर्शनेन स्थितं प्रतीतम् ॥ ६ ॥ विष्णुं ग्रसिष्णुं विनाशेन व्यापकं देव प्रभावः । यतः सर्गस्थितिसंहारेषु प्रभुमेनामीशमपरम्, अत एव

परः पराणां परमः परमात्मात्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्ज्जितः ॥ १० ॥
अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ।
वर्ज्जितः शक्यते वक्तुं यः सदास्तीति केवलम् ॥ ११ ॥
सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥ १२ ॥
तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् ।
एकस्वरूपञ्च सदा हेयाभावाच्च निर्म्मलम् ॥ १३ ॥

समस्तस्वरूपभेदद्योतनार्थं चतस्रस्तस्यावृत्तिः । अक्षरमचलम् ॥ ७ । ८ ॥ पितामहेन दक्षादिभ्यः प्रोक्तं त्वया कथं कथ्यते । तत्राह, तैश्चोक्तमिति ॥ ९ ॥ अव्यक्तादिस्वरूपात् परमात्मनो जगदुत्पत्त्यादि वक्तुं ततः प्राचीनं तत्स्वरूपमाह । पर इति चतुर्भिः "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" इत्यादि श्रुतिस्मृतिभ्यः परत्वेन प्रतिपादितानामिन्द्रियादीनां परः प्रकृष्टः, अत एव परमः उत्कृष्टः परमात्मा आत्मसंस्थितः अनन्याधारः । रूपवर्णादिभिः यो निर्देशः तदेव विशेषणं तेन विवर्ज्जितः । रूपं शुक्लादि, वर्णो ब्राह्मणादिः । आदिपदाज्जातिक्रिये । शुक्लो ब्राह्मणः, गौः पाचक इत्यादिनिर्देशेन विशेष्यमशक्यः । यद्वा रूपादिनिर्देशविवर्ज्जितः । रूपाद्यभावात् । अत एव विशेषणैरपि विवर्ज्जित इत्यर्थः ॥ १० ॥ षड्भावविकारवर्ज्जितश्चेत्याह, अपक्षयेति । ननु च "असन्नेव स भवति असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः" इति । अस्तीत्येवोपलब्धव्य इत्यादि-श्रुतेरस्तित्वं तावदङ्गीकर्त्तव्यम् । तथा च द्वितीयो भावविकारः प्राप्त इत्याशङ्क्याह, शक्यते वक्तुं यः सदास्तीति । सर्वदा अस्तित्वं च न भावविकारः । किन्तु जन्मानन्तरास्तित्वमेव । कादाचित्कत्वात् । अतो नायं दोष इत्यर्थः ॥ ११ ॥ परमात्मैव च शास्त्रतत्त्वविद्भिर्वासुदेव इत्युच्यत इत्याह । सर्वत्रेति, सर्वत्रासौ वसति, समस्तञ्चास्मिन् वसति

तदेतत् सर्वमेवासीद् व्यक्ताव्यक्तस्वरूपवत् ।
तथापुरुषरूपेण कालरूपेण च स्थितम् ॥ १४ ॥
परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ! ।
व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरम् ॥ १५ ॥

इति, वै प्रसिद्धौ, ततः स वासुदेव इति विद्भिरुच्यते इत्यर्थः । वसनात् वासनाद्वा वासु, द्योतनाद् देवः । वासुश्चासौ देवश्चेति वासुदेवः । "वासनाद् द्योतनाच्चैव वासुदेवं ततो विदुः" इति मोक्षधर्मे निरुक्तेः ॥ १२ ॥ स एवोपनिषदेकगम्य इत्याह । तद् ब्रह्मेति । यः परमात्मा रूपवर्णादिराहित्येन जन्मादिराहित्येन च कथितः स एव वासुदेव इति ब्रह्मेति चोच्यते । न चास्यान्तरं स्वगतभेदाभावादित्या-शयेन तदेव स्पष्टमनुवदति । परमं निरतिशयमित्यादि । ज्ञेयमविद्या-तत्कार्येषु तदभावादित्यर्थम् । तदुक्तं भागवते "वदन्ति तत् तत्त्व-विदस्तत्त्वं यद् ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" ॥ १३ ॥ तदेवं परं ब्रह्मस्वरूपं निरूप्य इदानीं तस्यैव मायाविभूत-व्यक्तादिचतूरूपस्य सर्वप्रपञ्चोपादाननिमित्ततामाह । तदेवेति । तदेव ब्रह्म एतत् सर्वं प्रपञ्चजातम् । कथम्भूतम् । व्यक्ताव्यक्त-स्वरूपवत्, व्यक्तं घटादि, अव्यक्तं प्रधानं तत्स्वरूपवत् । तेन रूपेण स्थितं सत् । तथा पुरुषरूपेण कालरूपेण च स्थितं सत् ॥ १४ ॥ चतुः-रूपोक्तप्रकारमाह । परस्येति । "स ऐक्षत सोऽकामयत" इत्यादि-श्रुतिक्षेत्रज्ञादिकर्त्ता पुरुषः परस्य ब्रह्मणः प्रथमं रूपम् । तथा च पुराणान्तरे वक्ष्यते । "तस्यैव योऽनुगुणभुग् बहुधैक एव शुद्धोऽप्यशुद्ध इव मूर्तिविभागभेदैः । ज्ञानान्वितः सकलसत्त्वविभूतिकर्त्ता तस्मै नमोऽस्तु पुरुषाय सदा व्ययाय" इति । तस्यैव पुरुषस्य ब्रह्मणो योऽयं सनन्तर पुरुष इति हि तत्त्वार्थः । तथा च नारदीये तन्त्रे "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ, द्वितीयन्त्वण्ड-संस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते" इति । भाग-

प्रधानपुरुषव्यक्तकालानां परमं हि यत्।
पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम्॥ १६॥
प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः।
रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतवः॥ १७॥
व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव च।
क्रीडतो बालकस्येव चेष्टां तस्य निशामय॥ १८॥
अव्यक्तं कारणं यत् तत् प्रधानमृषिसत्तमैः।
प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम्॥ १९॥

यतः च, "कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्। ततोऽभवत् महत्तत्त्वम्" इत्यादि। व्यक्ताव्यक्ते तथैवान्ये रूपे पुरुषेणक्षोभ्यमव्यक्तं ततो जातं व्यक्तं चेति द्वे चान्ये विलक्षणे रूपे। अन्यत्तत् कालस्तथापरं रूपं सर्वेषां क्षोभकत्वादन्ते निर्देशः॥ १५॥ परस्य ब्रह्मणो रूपाण्युक्त्वा प्राप्यं तेषामुपादेयत्वं वारयन्नाह। प्रधानेति। सूरयो यत् पश्यन्ति तदेव विष्णोः परमं रूपमित्यर्थः॥ १६॥ तर्हि प्रधानादिरूपैः किं कार्यमत आह। प्रधानेति। प्रधानादिरूपाणि तु जगतः स्थितिसर्गनाशानां व्यक्तिसद्भावहेतवः। व्यक्तिरभिव्यक्तिः प्रकाशः, सद्भाव उत्पत्तिः तस्य हेतवः कारणानि। कथं प्रविभागशः। "चतुर्विभाग संसृष्टौ चतुर्धा संस्थितः स्थितौ। प्रलयं च करोत्यन्ते चतुर्भेदो जनार्दनः। ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः। विष्णुर्मन्वादयः कालः" इत्यादिना वक्ष्यमाणविभागप्रकारेण॥ १७॥ नन्वेवं चतूरूपो भूत्वा विष्णुः सर्गादौ किमर्थं प्रवर्तते तत्राह। व्यक्तं विष्णुरिति विष्णुर्व्यक्तादिरूपो भवतीति यत् तत् क्रीडतो बालकस्य चेष्टामिव जानीहि। तदुक्तं "लोकवत्तु लीलाकैवल्यम्" इति॥ १८॥ अथेदानीं तदेव रूपचतुष्टयं प्रपञ्चयिष्यन् प्रथमं प्रधानं प्रपञ्चयति अव्यक्तमिति सप्तभिः। यदव्यक्तं तदृषिसत्तमैः कारणं प्रधानं प्रकृतिरिति च प्रोच्यते। नित्यं सदैकरूपं

अक्षयं नान्यदाधारममेयमजरं ध्रुवम् ।
शब्दस्पर्शविहीनं तद्रूपादिभिरसंहतम् ॥ २० ॥
त्रिगुणं तज् जगद्योनिरनादिप्रभवाप्ययम् ।
तेनाग्रे सर्वमेवासीद् व्याप्तं वै प्रलयादनु ॥ २१ ॥
वेदवादविदो विद्वन् ! नियता ब्रह्मवादिनः ।
पठन्ति वै तमेवार्थं प्रधानप्रतिपादकम् ॥ २२ ॥

नाहो न रात्रिर्न नभो न भूमि-
र्नासीत् तमो ज्योतिरभूच्च नान्यत् ।
श्रोत्रादिबुद्ध्यानुपलभ्यमेकं
प्राधानिकं ब्रह्म पुमांस्तदासीत् ॥ २३ ॥

शब्दादिहीनमित्यर्थः । सदसदात्मकं कार्यं कारणञ्चेत्युक्तम् ॥ १९ ॥ अक्षयम् अविनाशि । पाठान्तरे अयामत्वं नान्यदाधारं अनन्याश्रयम्, मूलकारणत्वात् । नान्याधारमिति वक्तव्ये अन्यदन्ते पदत्वविभक्त्यलोपाभावौ । अमेयम् इयत्ताशून्यं, ध्रुवं नित्यम् ॥ २० ॥ गुणत्रयसाम्यरूपम् अनादि जन्मशून्यं प्रधानं प्रभवाप्ययम् । प्रभवन्तीति प्रभवाः कार्याणि अपियन्ति लीयन्तेऽस्मिन् इति अप्ययं कार्याणां लयस्थानमित्यर्थः । अग्रे सृष्टेः पूर्वम् अतीतप्रलयानन्तरम् । सर्वमेव कार्यजातं तेन व्याप्तम् अन्तर्निहितमासीदित्यर्थः । "तम आसीत् तमसा गूढमग्रे प्रकेतम्" इति श्रुतेः ॥ २१ ॥ अत्रार्थे विद्वत्सम्मतिमाह । वेदवादाः विधायकपराणि वाक्यानि तद्विदः । नियताः तदर्थनिष्ठाः ब्रह्मवादिनः वेदे प्रवचनशीलाः एतमेवार्थमुद्दिश्य सृष्ट्यर्थं सूचनपरं प्रधानप्रतिपादकं नाहो रात्रिरित्यादि श्लोकं पठन्ति ॥ २२ ॥ तदा नाहो न रात्रिरासीत् सूर्याद्यभावात् रात्रेरभावाच्च तमः अस्योऽभावाच्च ज्योतिः । नचान्यत् किञ्चिदपि महदाद्यभावात् श्रोत्रादिजन्यज्ञानाभावात् अप्राप्यं प्राधानिकं प्रधानमेव प्राधानिकं ब्रह्म च पुमांश्चेति त्रयमेव तदा

विष्णोः स्वरूपात् परतो हि तेऽन्ये
रूपे प्रधानं पुरुषश्च विप्र ! ।
तस्यैव तेऽन्येन धृते वियुक्ते
रूपेण यत् तद् द्विज ! कालसंज्ञम् ॥ २४ ॥
प्रकृतौ संस्थितं व्यक्तमतीतप्रलये तु यत् ।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः ॥ २५ ॥
अनादिर्भगवान् कालो नान्तोऽस्य द्विज ! विद्यते ।
अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ॥ २६ ॥
गुणसाम्ये ततस्तस्मिन् पृथक् पुंसि व्यवस्थिते ।

प्रलये आसीत् । तथा च श्रुतिः "नासदासीन्नो सदासीत् तदानीम्" इत्यादि ॥ २३ ॥ कालस्वरूपं विवृणोति । विष्णोरिति चतुर्भिः । परतो निरुपाधेः विष्णोः स्वरूपात् ते प्रागुक्ते प्रधानं पुरुषश्चेति द्वे रूपे अन्ये निरुपाधे मायाकृते । तेऽन्ये इत्यत्र सन्धिः । तस्य विष्णोरन्येन रूपेण ते द्वे रूपे धृते अन्यकाले संयोजिते वियुक्ते च प्रलयकाले । यद्वा वियुक्ते यथा स्थितस्तथा प्रलयकाले धृते स्थापिते तयोरवियोगे प्रलयाभावप्रसङ्गात् । तदेवत् कालसंज्ञं रूपान्तरम् ॥ २४ ॥ कालस्वरूपेण प्रकृतिपुरुषयोर्वियोजनं प्रतिसञ्चरशब्देनोपपादयति । प्रकृताविति । अतीतप्रलयं सर्वप्रलयोपलक्षणार्थं अतीतप्रलये यद् यस्मात् प्रकृतौ संस्थितं लीनं व्यक्तमासीत् । तस्माद् विश्वस्य प्रकृतौ सञ्चरणात् प्राकृतोऽयं प्रतिसञ्चर उच्यते । एतच्च प्रकृतिपुरुषयोरवियोगेन घटत इति भावः ॥ २५ ॥ कालश्च प्रलये आसीदिति यदुक्तं तस्यानादिनिधनत्वमाह । अनादिरिति । अस्य कालस्यानुपरतिं प्रमाणयति अव्युच्छिन्ना इति । ततः कारणादेते सर्गस्थित्यन्तसंयमाः । सर्गः स्थितिश्च तदन्तो संयमश्च अव्युच्छिन्नाः प्रवाहरूपेणाविरताः ॥२६॥ ततः कारणात् तस्मिन् प्रलये गुणसाम्ये प्रधाने पुरुषे च पृथक् वियुक्त-

कालस्वरूपरूपं तद्विष्णोर्मैत्रेय ! वर्त्तते ॥ २७ ॥
ततस्तत् परमं ब्रह्म परमात्मा जगन्मयः ।
सर्वगः सर्वभूतेशः सर्वात्मा परमेश्वरः ॥ २८ ॥
प्रधानं पुरुषञ्चापि प्रविश्यात्मेच्छया हरिः ।
क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ ॥ २९ ॥
यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते ।
मनसो नोपकर्त्तृत्वात् तथासौ परमेश्वरः ॥ ३० ॥
स एव क्षोभको ब्रह्मन् ! क्षोभ्यश्च पुरुषोत्तमः ।

तथा व्यवस्थिते सति । तदैव तयोर्धारणार्थं कालाख्यं रूपं वर्त्तते । अन्यथा सद्यएव निर्वाणं स्यादिति भावः । नाहो न रात्रिरित्यत्र सृष्ट्यादिगम्य उपलक्षितः स्थूलः कालो नासीदित्युक्तम् । अत्र तु यावत् प्रलयं प्रकृतिपुरुषवियोगधारको विष्णोः स्वरूपभूतः कालो वर्त्तते इत्युच्यते इत्यविरोधः । अनेनैव प्रलये प्रकृत्यादियुक्तात्मा बीज इव तिष्ठन् सर्गकाले च प्रकृतिमधिष्ठाय सृष्ट्यादिकर्त्ता पुरुष इति पुरुषस्वरूपमपि विवृतं द्रष्टव्यम् ॥ २७ ॥ इदानीं व्यक्तस्वरूपं प्रपञ्चयिष्यन् परमेश्वरात् प्रकृतिपुरुषयोः क्षोभप्रकारमाह । तत इति पञ्चभिः । ततः सर्गकाले सम्प्राप्ते परमेश्वरो हरिः स्वेच्छया प्रधानं पुरुषञ्च प्रविश्य क्षोभयामासेति द्वयोरन्वयः । कथंभूतो हरिः, तदाह । तद्ब्रह्मेत्यादि । अव्यक्तादिवत् । रूपविशेषणः ॥ २८ ॥ कथम्भूतौ प्रधानपुरुषौ व्ययाव्ययौ परिणाम्यपरिणामिनौ, उपादाननिमित्तभूताविति यावत् । प्रलयकाले वियुक्ततयाऽपि तूष्णीं स्थितौ स्वांशभूतौ प्रधानपुरुषौ स्वकार्यप्रवृत्त्युद्बुद्धेच्छामात्रा संयोज्य स्वतन्त्रतया चचारेत्यर्थः ॥ २९ ॥ प्रविश्य क्षोभयामासेत्युक्त्या प्राप्तं सक्रियत्वं वारयति । यथेति । सन्निधिमात्रेण गन्धो मनसः क्षोभाय जायते । मनउपकर्त्तृत्वात् तदनुकूलक्रियाकारित्वात् ॥ ३० ॥ ननु प्रधानादीनामपि तत्स्वरूपाव्यतिरेकात् क्षोभ्यत्वाभावस्तद्व्यापार्याभावात् कथं क्षोभकत्वं तत्राह । स

स सङ्कोचविकासाभ्यां प्रधानत्वेऽपि च स्थितः ॥ ३१ ॥
विकाराणुस्वरूपैश्च ब्रह्मरूपादिभिस्तथा ।
व्यक्तस्वरूपश्च तथा विष्णुः सर्वेश्वरेश्वरः ॥ ३२ ॥
गुणसाम्यात् ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने ! ।
गुणव्यञ्जनसम्भूतिः सर्गकाले द्विजोत्तम ! ॥ ३३ ॥
प्रधानतत्त्वमुद्भूतं महान्तं तत् समावृणोत् ।
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ।
प्रधानतत्त्वेन समं त्वचा बीजमिवावृतम् ॥ ३४ ॥

स इति द्वाभ्यां संकोचः साम्यं विकासो गुणक्षोभः ताभ्यामुपलक्षितः । प्रधानत्वेऽपि स एव स्थितः । तदवस्थाद्वयोपेतं प्रधानमपि विष्णुरेवेत्यर्थः ॥ ३१ ॥ विकाराणुस्वरूपैर्महाभूतमहदादिरूपैर्ब्रह्मरूपादिभिर्जीवभेदरूपैरुपलक्षितः । व्यक्तस्वरूपश्च समष्टिव्यष्टिदेहात्मकश्च विष्णुरेवेत्यर्थः ॥ ३२ ॥ इदानीं महदादिक्रमेण व्यक्ताव्यक्तरूपं सर्गमाह । गुणसाम्यादित्यादि । बीजं वावृतमित्यन्तेन । ततः क्षोभानन्तरम् । तस्माद् गुणसाम्यात् । क्षेत्रज्ञेन पुरुषेणाधिष्ठितात् गुणानां व्यञ्जनं महत्तत्त्वम् । व्यज्यतेऽनेनेति व्यञ्जनं तस्य सम्भूतिः उद्भवोऽभूत् ॥ ३३ ॥ अत्र च यथा मृदेव पिण्डाद्यवान्तरकार्यावस्थामापाद्यमाना घटादेरुपादानं दण्डादिकन्तु निमित्तमात्रम् । घटादावननुगमात् विनापि दण्डमनागमत्वाद्वा तथेश्वराधिष्ठितं प्रधानमेव महदाद्यवान्तरकार्य्याण्युपादानतया व्याप्नुवत् चरमकार्य्यस्याप्युपादानमिति दर्शयितुं पूर्वकार्य्यस्यापरापरकार्य्यस्य व्याप्तिमाह । प्रधानतत्त्वमित्यादिना उद्भूतं महान्तं समभूतं तदुपादानभूतं प्रधानतत्त्वं कर्त्तृभूतं समावृणोत् व्याप्नोत् । एतदेव विवृणोति । सात्त्विक इति समसङ्ख्यानातिरेकं यथा भवत्येवं त्वचा बीजं यथा आवृतं तथा सात्त्विकादित्रिधोद्भूतो महान् प्रधान-

वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ।
त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायत ॥ ३५ ॥
भूतेन्द्रियाणां हेतुः स त्रिगुणत्वान्महामुने ! ।
यथा प्रधानेन महान् महता स तथावृतः ॥ ३६ ॥
भूतादिस्तु विकुर्वाणः शब्दतन्मात्रिकं ततः ।
ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ।
शब्दमात्रं तथाकाशं भूतादिः स समावृणोत् ॥ ३७ ॥
आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह ।
बलवानभवद् वायुस्तस्य स्पर्शो गुणो मतः ॥ ३८ ॥
आकाशं शब्दमात्रन्तु स्पर्शमात्रं समावृणोत् ।
ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ।
ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते ।
स्पर्शमात्रन्तु वै वायू रूपमात्रं समावृणोत् ॥ ३९ ॥
ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह ।
सम्भवन्ति ततोऽम्भांसि रसाधाराणि तानि च ।
रसमात्राणि चाम्भांसि रूपमात्रं समावृणोत् ।
विकुर्वाणानि चाम्भांसि गन्धमात्रं ससर्जिरे ।
संघातो जायते तस्मात् तस्य गन्धो गुणो मतः ॥ ४० ॥
तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता ॥ ४१ ॥

तत्त्वेन बन्धनादावृत इत्यर्थः ॥ ३४ ॥ वैकारिकः सात्त्विकः । तैजसो राजसः । भूतादिस्तामस इति स्वयमेव व्याख्यातम् ॥ ३५ ॥ स च भूतानामिन्द्रियाणाञ्च हेतुः । देवानामप्युपलक्षणम् ॥ ३६ ॥ तामसाहङ्कारस्य कार्यं प्रपञ्चयति भूतादिरिति नवभिः । विकुर्वाणः क्षुभ्यन्नित्यर्थः

तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते ।
न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः ॥ ४२ ॥
भूततन्मात्रसर्गोऽयमहङ्कारात् तु तामसात् ।
तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ॥ ४३ ॥
एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः ।
त्वक् चक्षुर्नासिका जिह्वा श्रोत्रमत्र च पञ्चमम् ।
शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वै द्विज ! ॥ ४४ ॥
पायूपस्थौ करौ पादौ वाक् च मैत्रेय ! पञ्चमी ।
विसर्गशिल्पगत्युक्तिः कर्म्म तेषाञ्च कथ्यते ॥ ४५ ॥
आकाशवायुतेजांसि सलिलं पृथिवी तथा ।
शब्दादिभिर्गुणैर्ब्रह्मन् ! संयुक्तान्युत्तरोत्तरैः ॥ ४६ ॥
शान्ता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः ॥ ४७ ॥
नानावीर्य्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥ ४८ ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
एकसङ्घातलक्ष्याश्च संप्राप्यैक्यमशेषतः ॥ ४९ ॥
पुरुषाधिष्ठितत्वाच्च प्रधानानुग्रहेण च ।
महदाद्या विशेषान्ता अण्डमुत्पादयन्ति ते ॥ ५० ॥
तत्क्रमेण विवृद्धन्तु जलबुद्बुदवत्समम् ।
भूतेभ्योऽण्डं महाबुद्धे ! वृहत् तदुदकेशयम् ।
प्राकृतं ब्रह्मरूपस्य विष्णोः स्थानमुत्तमम् ॥ ५१ ॥
तत्राव्यक्तस्वरूपोऽसौ व्यक्तरूपी जगत्पतिः ।
विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः ॥ ५२ ॥
मेरुरुल्वमभूत् तस्य जरायुश्च महीधराः ।

गर्भोदकं समुद्राश्च तस्यासन् सुमहात्मनः ॥ ५३ ॥
साद्रिद्वीपसमुद्रास्तु सज्योतिर्लोकसंग्रहः ।
तस्मिन्नण्डेऽभवद् विप्र ! सदेवासुरमानुषः ॥ ५४ ॥
वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः ।
वृतं दशगुणैरण्डं भूतादिर्महता तथा ॥ ५५ ॥
अव्यक्तेनावृतो ब्रह्मंस्तैः सर्वैः सहितो महान् ।
एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम् ।
नारिकेलफलस्यान्तर्बीजं बाह्यदलैरिव ॥ ५६ ॥
जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ।
ब्रह्मा भूत्वास्य जगतो विसृष्टौ सम्प्रवर्त्तते ॥ ५७ ॥
सृष्टञ्च पात्यनुयुगं यावत् कल्पविकल्पना ।
सत्त्वभुग् भगवान् विष्णुरप्रमेयपराक्रमः ॥ ५८ ॥
तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः ।

॥ ५३ ॥ अभवत् । बाह्या द्वीपाः समुद्राश्च अभवन्नित्यर्थः ॥ ५४ ॥ अण्डस्यान्तःस्थितिमुक्त्वा तद्बाह्यस्थितिमाह । वारीति । ततः अण्डाद्बहिः पृथिव्यावरणानन्तरं तद्बहिः प्रत्येकं वारिवह्न्यादिभिर्दशगुणमुत्तरैर-भिवैरावृतम् । पृथिव्यावरणात् कोटियोजनप्रमाणाद्दशगुणं तोयावरणं ततो दशगुणं वह्न्यावरणमित्येवं दशगुणोत्तराणि पृथिव्याद्यावरणानि सप्त । प्रकृत्यावरणं त्वनन्तमपरिमितम् । “महदादिभिरावरणैरष्टभि-र्बहिरावृतम्” इति श्रुत्युक्तेः । अत एव प्रकृतिं पृथक्कृत्य प्राकृतैः सप्तभि-रित्युक्तम् ॥ ५५ ॥ ५६ ॥ तदेवं ब्रह्माण्डं सृष्ट्वा तस्मिन् लीलया प्रविष्टस्य परमेश्वरस्य गुणावतारैर्जगत्सृष्ट्यादिलीलामाह । जुषन्निति यावदध्यायसमाप्तिः । विसृष्टौ विविधचराचरादिसृष्टौ सम्प्रवर्त्तते ॥ ५७ ॥ यावत् कल्पविकल्पना मन्वादिनाशपर्यन्तं यावत् । सत्त्वभुक् सत्त्वगुणः

मैत्रेयाखिलभूतानि भक्षयत्यतिभीषणः ॥ ५८ ॥
स भक्षयित्वा भूतानि जगत्येकार्णवीकृते।
नागपर्य्यङ्कशयने शेते च परमेश्वरः ॥ ६० ॥
प्रबुद्धश्च पुनः सृष्टिं करोति ब्रह्मरूपधृक ॥ ६१ ॥
सृष्टिस्थित्यन्तकरणाद् ब्रह्मविष्णुशिवात्मिकाम्।
स संज्ञां याति भगवान् एक एव जनार्द्दनः ॥ ६२ ॥
स्रष्टा सृजति चात्मानं विष्णुः पाल्यञ्च पाति च।
उपसंह्रियते चान्ते संहर्त्ता च स्वयं प्रभुः ॥ ६३ ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च।
सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् ॥ ६४ ॥
स एव सर्वभूतेशो विश्वरूपो यतोऽव्ययः।
सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम ॥ ६५ ॥

पिहितः ॥ ५८ ॥ तमोद्रेकोऽत्रार्थं वक्ति। तमउद्रेकपर्यन्तमित्यर्थः ॥५९॥ परमेश्वरः शेते ब्रह्मप्रलयावसानमूर्च्छारूपेण ॥ ६० ॥ ब्रह्मादिरूपाणि च तद्वृत्तिविशेषाणि न भवन्तीत्याह। सृष्टिस्थित्यन्तकरणादिति। करणानीति पाठे सृष्ट्यादिकरणं निमित्तं यस्याः सा तां यातीत्यर्थः ॥ ६२ ॥ सृष्ट्यादिभेदश्च न तात्त्विक इत्याह। स्रष्टेति विष्णुरेव स्रष्टा आत्मानमेव सृजति। पाल्यश्च पालकश्च उपसंहार्य्यश्च संहर्त्ता च स्वयमेव ॥ ६३ ॥ कुत इत्यत आह। पृथिवीति। यद् यस्मात् पृथिव्याप इत्यादि सर्वं जगत् पुरुषाख्यं हि पुरुष संज्ञमेव। "पुरुष एवेदं सर्वम्" इति श्रुतेः। ॥ ६४ ॥ ननु कथं स एव सर्गादिकर्त्तेत्युच्यते पित्रादीनां कर्तृ पालकादीनां प्रतीयमानत्वात् तत्राह। स एवेति। यतः स हरिरेव सर्वभूतानामीशः प्रवर्त्तको विश्वरूपश्च ततो हेतोर्भूतस्थं पित्रादिषु स्थितं सर्गादिकम् अस्य हरेरेवोपकारकम्। तदुपकुर्वे

स एव सृज्यः स च सर्गकर्त्ता स एव पात्यत्ति च पाल्यते च।
ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः ॥६६॥

तृतीयोऽध्यायः।

मैत्रेय उवाच।

निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते ॥१॥

पराशर उवाच।

शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः।
भवन्ति तपतां श्रेष्ठ! पावकस्य यथोष्णता ॥२॥

र्त्तिभूतैरेव विस्तारात् यथा ऋत्विग्भिः कृतं यजमानस्यैवोपकारकं तद्वद्भूतैर्व्याप्तिभूतैरेव विस्तारात् तद् द्रष्टव्यः ॥६५॥ उक्त-मर्थं सृष्ट्यादिकर्तृत्वं विवक्षितमर्थमाह। स एवेति। अत्ति चेति संहारादुच्यते च। ब्रह्माद्यवस्थाभिः सर्गादिकर्ता अशेषमूर्तिः सृष्ट्यादिरूपः। अतो विष्णुरेव वरिष्ठः श्रेष्ठतमः श्रेष्ठः परमार्थ इति यावत्। वरदश्च परेभ्यो वरणीयः, परमानन्दरूपत्वात् ॥६६॥

तदेवं ब्रह्मणः सृष्ट्यादिकर्तृत्वमुक्तं तत्र शङ्कते। निर्गुणस्येति। सत्त्वादिगुणरहितस्य। अप्रमेयस्य देशकालाद्यनवच्छिन्नस्य, शुद्धस्य शरीरस्य सहकारिशून्यस्येति वा, अमलात्मनः पुण्यपापसंस्कारशून्यस्य रागादिशून्यस्येति वा। एवंभूतस्य ब्रह्मणः कथं सर्गादिकर्तृत्वमिष्यते। सर्गादिकर्तृत्वस्यैव लोके घटादिषु कर्तृत्वादिदर्शनादित्यर्थः ॥१॥ परिहरति। शक्तय इति सार्द्धेन। लोके हि सर्वेषां भावानां मणि-मन्त्रादीनां शक्तयः। अचिन्त्यज्ञानगोचराः अचिन्त्यं तर्कासहं यद् ज्ञानं

तन्निबोध यथा सर्गे भगवान् सम्प्रवर्त्तते ॥ ३ ॥

नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः ।
उत्पन्नः प्रोच्यते विद्वन् ! नित्य एवोपचारतः ॥ ४ ॥

निजेन तस्य मानेन आयुर्वर्षशतं स्मृतम् ।
तत्पराख्यं तदर्द्धं च परार्द्धमभिधीयते ॥ ५ ॥

कार्यान्यथानुपपत्तिप्रमाणकं तस्य गोचराः सन्ति । यद्वा । अचिन्त्या भिन्नाभिन्नत्वादिविकल्पैश्चिन्तयितुमशक्याः । केवलमर्थापत्तिज्ञानगोचराः सन्ति । यत एवम् अतो ब्रह्मणोऽपि तास्तथाविधाः सर्गादिहेतुभूताः भावशक्तयः स्वाभाविक्यः शक्तयः सन्त्येव । पावकस्य दाहकत्वादिशक्तिवत् । अतो गुणादिहीनस्याप्यचिन्त्यशक्तिमत्त्वात् ब्रह्मणः सर्गादिकर्तृत्वं घटत इत्यर्थः । श्रुतिश्च "न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" इत्यादि । यद्वा एवं योजना, सर्वेषां भावानां पावकस्योष्णताशक्तिवदचिन्त्यज्ञानगोचराः शक्तयः सन्त्येव । ब्रह्मणः पुनस्ताः स्वभावभूताः स्वरूपादभिन्नाः शक्तयः । "परास्य शक्तिर्विविधैव श्रूयते" इत्यादि श्रुतेः । अतो मणिमन्त्रादिभिरग्न्यौष्ण्यवत् न केनचित् विहन्तुं शक्यते । अत एव तस्य निरङ्कुशमैश्वर्यम् । तथा च श्रुतिः "स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः" इत्यादि । तपतां श्रेष्ठ इति सम्बोधयन् त्वं चापि तपःशक्तिः सर्ववेत्सीति सूचयति । यत एवम् अतो ब्रह्मणो हेतोः सर्गाद्या भवन्ति नास्ति काचिदनुपपत्तिरित्यर्थः ॥ २ ॥ तदेवं ब्रह्मणः सर्गादिकर्तृत्वमुपपाद्य प्रस्तुतं ब्राह्मं सर्गमनुवर्णयितुमाह । तन्निबोधेति ॥ ३ ॥ ननु नारायणाख्य एव चेद् ब्रह्मा कथं तर्हि "हिरण्यगर्भः समवर्त्तताग्रे" इत्यादि श्रुतिभिरस्योत्पत्तिरुच्यते । तत्राह उत्पन्न इति । उपचारतः स्वेच्छया-विर्भावस्याभ्युपगमात् ॥ ४ ॥ औपचारिकमेव तस्यायुर्मानमाह ।

कालस्वरूपं विष्णोश्च यन्मयोक्तं तवानघ ।
तेन तस्य निबोध त्वं परिमाणोपपादनम् ।
अन्येषां चैव जन्तूनां चराणामचराश्च ये ।
भूभूभृत्सागरादीनामशेषाणाञ्च सत्तम ॥ ६ ॥
काष्ठा पञ्चदश ख्याता निमेषा मुनिसत्तम ।
काष्ठास्त्रिंशत् कला तास्तु त्रिंशत् मौहूर्त्तिको विधिः ७
तावत्संख्यैरहोरात्रं मुहूर्त्तैर्मानुषं स्मृतम् ।
अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः ॥ ८ ॥
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे ।
अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनम् ॥ ९ ॥

निजेन स्वकीयेन प्रमाणेन वर्षशतं तस्यायुः स्मृतम् । तदायुः पराख्यं सर्वातिशायित्वात् ॥ ५ ॥ तेन कालेन तस्य ब्रह्मणः अन्येषां च परिमाणस्य जीवनकालस्योपपादनं सम्पादनं निबोध । पाठान्तरे परिमाणस्य स्वस्थानस्य उपपादनमित्यर्थः । अचराश्च ये तेषामपीति शेषः ॥ ६ ॥ तदेव निमेषादिक्रमेण निरूपयति काष्ठेत्यादिना । अक्षिपक्ष्मनिक्षेपोपलक्षितः कालो निमेषः । पञ्चदश निमेषाः एका काष्ठोक्ता त्रिंशत् काष्ठा एका कला । त्रिंशत् कलाः एका घटिका । ते द्वे मौहूर्त्तिको विधिः, मुहूर्त्तमानप्रकारः ॥ ७ ॥ तावत्संख्यैः त्रिंशत्संख्यकैर्मुहूर्त्तैः । स्वाशन्ति त्रिंशदहोरात्राणीति यौगिकः सावनो मास उक्तः । पक्षद्वयात्मक इति चान्द्रो मासः । "दर्शावधिं मासमुशन्ति चान्द्रम्" इति स्मृतेः ॥ ८ ॥ सौरैर्मासैरयनप्रकारमाह । तैरिति । तथाप्येन चान्द्रैरद्रुरविषमत्वात् सौरा मासा उच्यन्ते । सूर्यस्य मेषाद्यैकराशियोगः सौरो मास । तैः षड्भिरयनम् । द्वेऽयने इत्यर्थः स्पष्टः । अत परं दिव्यमानमाह । अयनमित्यादिना । दक्षिणायनं देवानां रात्रिः, उत्तरायणं दिनम् । एवञ्च तैः षष्ट्युत्तरत्रिंशताहोरात्रैर्देवानां

दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् ।
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे ॥ १० ॥
चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः ॥ ११ ॥
तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि सः ॥ १२ ॥
सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम ! ।
युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञितः ॥ १३ ॥
कृतं त्रेता द्वापरश्च कलिश्चैव चतुर्युगम् ।
प्रोच्यते तत्सहस्रञ्च ब्रह्मणो दिवसं मुने ! ॥ १४ ॥
ब्रह्मणो दिवसे ब्रह्मन् ! मनवश्च चतुर्दश ।
भवन्ति परिमाणञ्च तेषां कालकृतं शृणु ॥ १५ ॥
सप्तर्षयः सुराः शक्रो मनुस्तत्सूनवो नृपाः ।
एककाले हि सृज्यन्ते संह्रियन्ते च पूर्ववत् ॥ १६ ॥

वर्षमिति स्पष्टम् ॥ ९ ॥ तैर्वर्षैश्चतुर्युगमानमाह । दिव्यैरिति । दिव्यैर्द्वादशभिर्वर्षसहस्रैश्चतुर्युगमित्यन्वयः ॥ १० ॥ यथाक्रमं कृतयुगे चत्वारि सहस्राणि, त्रेतायां त्रीणि, द्वापरे द्वे सहस्रे, कलावेकसहस्रमिति ॥ ११ ॥ तत्प्रमाणैस्तेषां सहस्राणां यत्प्रमाणं चत्वारि त्रीणि द्वे चैकमित्युक्तम् । तत्प्रमाणैस्तत्संख्यैः शतैः परिमिता युगस्य पूर्व-भागोऽभिधी सन्ध्योच्यते । तावानेव युगानन्तरवर्ती सन्ध्यांशः । एतच्च युगधर्मव्यवस्थायामुक्तम् । तथाच स्मृतिः "सन्ध्यांशयोरन्तरेण यः कालः शतसङ्ख्यकः तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते" इति ॥ १२ ॥ तदेवं युगानां दशसहस्राणि वर्षाणि तत्पूर्वोत्तरभाविनाञ्च सन्ध्यासन्ध्यांशकानां शतैर्द्वे सहस्रे एवं द्वादशभिर्वर्षसहस्रैश्चतुर्युगमिति सिद्धम् ॥ १३ ॥ मन्वन्तराणां मानमाह । ब्रह्मण इति ॥ १५ ॥ तदेवाह सप्तर्षय इति ।

चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः ।
मन्वन्तरं मनोः कालः सुरादीनाञ्च सत्तम ! ॥ १७ ॥
अष्टौ शतसहस्राणि दिव्यया संख्यया गतिः ।
द्वापञ्चाशत् तथान्यानि सहस्राण्यधिकानि च ॥ १८ ॥
त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः संख्यया द्विज ! ।
सप्तषष्टिस्तथान्यानि नियुतानि महामते ! ।
विंशतिश्च सहस्राणि कालोऽयमधिकं विना ।
मन्वन्तरस्य संख्येयं मानुषैर्वत्सरैर्द्विज ! ॥ १९ ॥
चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतः ।
ब्राह्मो नैमित्तिको नाम तस्यान्ते प्रतिसञ्चरः ॥ २० ॥

यज्ञभागं हि भुञ्जन्ते । अधिकारिणः क्रियन्ते, संह्रियन्ते निरधिकाराः क्रियन्त इत्यर्थः ॥ १७ ॥ साधिकेत्यत्र श्लोकाः, "द्विचत्वारिंशता युक्तशतेनाभ्यधिकास्तथा । दिव्याब्दाः पञ्चसाहस्रा मासा दश दिना एकम् ! चतुर्थांशा मुहूर्तौ द्वादशापि कलास्तथा । काष्ठाः सप्तदश द्वौ च निमेषौ तदनन्तरम् । देवस्यैकनिमेषस्य सप्तमो भाग इष्यते । मानुषाब्दास्तु लक्षाणि चत्वारि द्वात्रिंशत् परम् । सहस्रपञ्चविंशत्या युता चाब्दचतुःशती । चतुर्विंशत्कोटियुता मासाश्च षट् तथा । नाड्यो द्वादश तावन्त्यः काष्ठाश्च तदनन्तरम् । पञ्चविंशतिकाष्ठाश्च निमेषा दश साधिकाः" इति चतुर्युगसहस्रमानस्य ब्रह्मदिनस्य चतुर्दशधा विभागे प्रतिभागमेवमधिकचतुर्युगानि भवन्ति । अवशिष्यते चतुर्युगषट्कान्तरस्य चतुर्दशांशो यथार्थ्यतः प्रतिमन्वन्तरमेकसप्ततेरधिक इत्यर्थः । सुरादीनां च । सप्तर्षयः सुराः शक्र इति पूर्वोक्तानां मन्वन्तराधिकारिणाम् ॥ १७ ॥ तमेव मन्वन्तरकालं दिव्याब्दैर्दर्शयति । अष्टाविति ॥ १८ ॥ तमेव मानुषाब्दैर्दर्शयति । त्रिंशत् कोट्य इति द्वाभ्याम् । नियुतानि लक्षाणि, पूर्वोक्तमधिकम् कालं विना ॥ १९ ॥ ब्राह्मो नैमित्तिकः

तदा हि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकम् ।
जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिनः ॥ २१ ॥
एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः ॥ २२ ॥
जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भवः ।
तत्प्रमाणां हि तां रात्रिं तदन्ते सृज्यते पुनः ॥ २३ ॥
एवं तु ब्रह्मणो वर्षमेवं वर्षशतञ्च तत् ।
शतं हि तस्य वर्षाणां परमायुर्महात्मनः ॥ २४ ॥
एकमस्य व्यतीतन्तु परार्द्धं ब्रह्मणोऽनघ ! ।
तस्यान्तेऽभून्महाकल्पः पाद्म इत्यभिधीयते ।
द्वितीयस्य परार्द्धस्य वर्त्तमानस्य वै द्विज ! ।
वाराह इति कल्पोऽयं प्रथमः परिकीर्त्तितः ॥ २५ ॥

ब्रह्मणो निद्रानिमित्तः प्रतिसञ्चरः प्रलयः ॥ २० ॥ भूर्भुवादिकमित्यर्थः ॥ २१ ॥ भोगी शेषः स एव शय्या तद्गतः सन् शेते । त्रैलोक्यग्रासबृंहित इति पाठे त्रैलोक्यग्रासमयैर्जीवैर्बृंहितः । त्रैलोक्यग्रासबृंहित इति पाठे प्रपञ्चपदेन समस्तब्रह्मानन्द इत्यर्थः ॥ २२ ॥ जनस्थैश्चिन्त्यमानः । महर्लोकस्थानामपि तदा तत्रैव गतत्वात् । तत्प्रमाणां ब्रह्माहःपरिमितां तां रात्रिं नैरन्तर्येण शेते ॥ २३ ॥ एवंविधैः । एवम्भूतैरहोरात्रैः पक्षमासादिकल्पनया वर्षम् ॥ २४ ॥ महाकल्प इति अयमपि कल्प एव पुष्करप्रादुर्भावादिगुणैर्महत्त्वान्महाकल्प इत्युच्यते ॥ २५ ॥

चतुर्थोऽध्यायः ।

मैत्रेय उवाच ।

ब्रह्मा नारायणाख्योऽसौ कल्पादौ भगवान् यथा ।
ससर्ज सर्वभूतानि तदाचक्ष्व महामुने ! ॥ १ ॥

पराशर उवाच ।

प्रजाः ससर्ज भगवान् ब्रह्मा नारायणात्मकः ।
प्रजापति-पतिर्देवो यथा तन्मे निशामय ॥ २ ॥
अतीतकल्पावसाने निशासुप्तोत्थितः प्रभुः ।
सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत ॥ ३ ॥
नारायणः परोऽचिन्त्यः परेषामपि स प्रभुः ।
ब्रह्मस्वरूपी भगवाननादिः सर्वसम्भवः ॥ ४ ॥
इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ।
ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम् ॥ ५ ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ ६ ॥

पूर्वोपक्षिप्तमेव ब्राह्मसर्गं सप्रपञ्चं श्रोतुकामो मैत्रेयः पृच्छति । ब्रह्मेति ॥ १ ॥ २ ॥ प्रतिज्ञातं प्रजासर्गं निरूपयिष्यन् प्रथमं तदाधारभूताया भूमेरुद्धारं वक्तुमाह । अतीतकल्पेत्यादिना । निशायां सुप्त प्रबोधः, तस्मादुत्थितः । अत एव तदा सत्त्वोद्रिक्तः । उच्यते हि निद्रावसाने प्रबुद्धानां प्रसन्नमनसां सत्त्वातिशयः ॥ ३ ॥ सर्वसम्भवः निमित्तम् ॥ ४ ॥ ब्रह्मणो नारायणत्वं श्रुत्या दर्शयति । इमं चेति ब्रह्मस्वरूपिणं नारायणं प्रति ब्रह्मस्वरूपो नारायण इत्येतस्मिन्नर्थे ॥ ५ ॥ "नरतीति नरः प्रोक्तः परमात्मा सनातनः" इति वचनात् । नरः पुरुषोत्तमस्तस्मादुत्पन्ना नाराः । तदुक्तम् । "आका-

तोयान्तः स महीं ज्ञात्वा जगत्येकार्णवे प्रभुः ।
अनुमानात् तदुद्धारं कर्तुकामः प्रजापतिः ॥ ७ ॥
अकरोत् स तनूमन्यां कल्पादिषु यथा पुरा ।
मत्स्यकूर्मादिकां तद्वत् वाराहं वपुरास्थितः ॥ ८ ॥
वेदयज्ञमयं रूपमशेषजगतः स्थितौ ।
स्थितः स्थिरात्मा सर्वात्मा परमात्मा प्रजापतिः ॥ ९ ॥
जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः ।
प्रविवेश तदा तोयमात्माधारो धराधरः ॥ १० ॥
निरीक्ष्य तं तदा देवी पातालतलमागतम् ।
तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा ॥ ११ ॥

पृथिव्युवाच ।

नमस्ते सर्वभूताय तुभ्यं शङ्खगदाधर ! ।
मामुद्धरास्मादद्य त्वं त्वत्तोऽहं पूर्वमुत्थिता ॥ १२ ॥

तानृषीन् [illegible] सहस्रपरिवत्सरान् । तेन नारायणो नाम यदापः पूर्वाङ्कुराः" इति ॥ ६ ॥ ततः किमत आह । तोयान्तरिति पादोनद्वाभ्याम् । तोयस्योपरि पुष्करपर्णं दृष्ट्वा तदधिष्ठानानुमानात् तोयान्तर्महीं ज्ञात्वा तदुद्धारं कर्तुमिच्छन् नारायणोऽन्यां तनुं तदुद्धारयोग्यामकरोदित्यन्वयः ॥ ७ ॥ पुरा यथा मत्स्यकूर्मादिकां तनुं कल्पादिषु तत्तदनुरूपामकरोत् तद्वत् । तथा च श्रुतिः । "सोऽपश्यत् पुष्करपर्णं तिष्ठत् सोऽमन्यत अस्ति वै तत् यस्मिन्निदमधितिष्ठति" इति । "स च वाराहं रूपं कृत्वा उपन्यमज्जत्, स पृथिवीमध आर्च्छत्" इत्यादि । तदा च वाराहं वपुरास्थितः सन् तोयं प्रविवेश इत्युत्तरेणान्वयः ॥ ८ ॥ वेदयज्ञमयरूपमास्थितः सन्नशेषजगतः स्थितौ स्थितः वेदयज्ञाधीनत्वाज्जगत्स्थितेः ॥ ९ ॥ १० ॥ तदा वसुन्धरा तदधिष्ठात्री देवी तं ददर्श ॥ ११ ॥ अस्मात् पातालतलात् मामुद्धर त्वत्तो हेतोरहं-

त्वत्तोऽहमुद्भूता पूर्वं त्वन्मयाहं जनार्दन ! ।
तथान्यानि च भूतानि गगनादीन्यशेषतः ॥ १३ ॥
नमस्ते परमात्मात्मन् ! पुरुषात्मन् ! नमोऽस्तु ते ।
प्रधानव्यक्तभूताय कालभूताय ते नमः ॥ १४ ॥
त्वं कर्त्ता सर्वभूतानां त्वं पाता त्वं विनाशकृत् ।
सर्गादिषु प्रभो ! ब्रह्मविष्णुरुद्रात्मरूपधृक् ॥ १५ ॥
संभक्षयित्वा सकलं जगत्येकार्णवीकृते ।
शेषे त्वमेव गोविन्द ! चिन्त्यमानो मनीषिभिः ॥ १६ ॥
भवतो यत् परं तत्त्वं तन्न जानाति कश्चन ।
अवतारेषु यद्रूपं तदर्च्चन्ति दिवौकसः ॥ १७ ॥
त्वामाराध्य परं ब्रह्म याता मुक्तिं मुमुक्षवः ।
वासुदेवमनाराध्य को मोक्षं समवाप्स्यति ॥ १८ ॥
यत् किञ्चिन्मनसा ग्राह्यं यद् ग्राह्यं चक्षुरादिभिः ।
बुद्ध्या च यत् परिच्छेद्यं तद्रूपमखिलं तव ॥ १९ ॥
त्वन्मयाऽहं त्वदाधारा त्वत्सृष्टा त्वामुपाश्रिता ।

स्तुतिमा उत्पन्ना उद्भूता उद्भूता वा ॥ १२ ॥ उपादानकारणमपि मम च गगनादीनां च त्वमेवेत्याह त्वत्तोऽहमिति त्वन्मयी ॥ १३ ॥ उपादान-निमित्तत्वादिकं दर्शयन्ती परब्रह्मस्वरूपेण पुरुषप्रधानादिरूपेण च प्रणमति नमस्त इति ॥ १४ ॥ ब्रह्मादिरूपेण सृष्ट्यादिकर्त्ता च त्वमेवेत्याह त्वमिति । पाता पालकः ॥ १५ ॥ शेषे शयनं करोषि ॥ १६ ॥ दिवौकसोऽपि ॥ १७ ॥ मुमुक्षवोऽपि तदेव भगवतोऽवतारमित्याह त्वामिति परं ब्रह्मरूपं त्वामेवाराध्य मुक्तिं प्राप्ताः ॥ १८ ॥ मनसा ग्राह्यं संकल्प्यम् । बुद्ध्या च यत् परिच्छेद्यमध्यवसेयम् ॥ १९ ॥ मम तु त्वदीयत्वं लोकमयित्वमेवेत्याह त्वन्मयेति । त्वद्रूपतया त्वन्मयत्वा

माधवीमिति लोकोऽयमभिधत्ते ततो हि माम्॥२०॥
जयाखिलज्ञानमय! जय स्थूलमयाव्यय!।
जयानन्त! जयाव्यक्त! जय व्यक्तमय! प्रभो! ॥२१॥
परापरात्मन्! विश्वात्मन् जय! यज्ञपतेऽनघ!।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वमग्नयः॥२२॥
त्वं वेदास्त्वं तदङ्गानि त्वं यज्ञपुरुषो हरे!।
सूर्य्यादयो ग्रहास्तारा नक्षत्राण्यखिलं जगत्॥२३॥
मूर्त्तामूर्त्तमदृश्यञ्च कठिनं पुरुषोत्तम!।
यच्चोक्तं यच्च नैवोक्तं मयात्र परमेश्वर!।
तत् सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः॥२४॥

पराशर उवाच।

एवं संस्तूयमानस्तु पृथिव्या पृथिवीधरः।
सामस्वरध्वनिः श्रीमान् जगर्ज्ज परिघर्घरम्॥२५॥
ततः समुत्क्षिप्य धरां स्वदंष्ट्रया महावराहः स्फुटपद्मलोचनः।
रसातलादुत्पलपत्रसन्निभः समुत्थितो नील इवाचलो महान्॥२६

इत्येतेष्वर्थेष्वभिज्ञात आरभ्य मामयं लोको माधवीं त्वदीयामभिधत्ते ॥२०॥ ॥२१॥ परापरं कार्य्यं कारणञ्च। उच्चनीचं वा। तदात्मन्! तद्रूप यज्ञपते! यज्ञपालक! वषट्कारः वषट् इति मन्त्रः तद्वाच्यो वा ॥२२॥ यज्ञपुरुषो यज्ञमूर्त्तिर्यज्ञाराध्यो वा। तारा अश्विन्याद्याः। नक्षत्राणि नक्षत्राणि, विपरीतं वा। उभयथापि तयोरदर्शनात् ॥२३॥ मूर्त्तम् अवयवगतं द्रव्यं कठिनं वा। अदृश्यम् अप्रत्यक्षम्। भूयो भूय इत्यादरार्थम् ॥२४॥ सामस्वर एव ध्वनिर्यस्य स इदानीं वाराहं रूपमनुभूय परिघर्घरं गम्भीरस्वनन्त जगर्ज्ज अगमत् ॥२५॥ समुत्क्षिप्य उद्धृत्य। स्फुटे विकसिते पद्मे इव लोचने यस्य सः। उत्पलपत्रसन्निभः

उत्तिष्ठता तेन मुखानिलाहतं
तत्संभवाम्भो जनलोकसंश्रयान् ।
प्रक्षालयामास हि तान् महाद्युतीन्
सनन्दनादीनपकल्मषान् मुनीन् ॥ २७ ॥
प्रयान्ति तोयानि खुराग्रविक्षते
रसातलेऽधः कृतशब्दसन्तति ।
श्वासानिलास्ताः परतः प्रयान्ति ।
सिद्धा जने ये नियतं वसन्ति ॥ २८ ॥

उत्तिष्ठतस्तस्य जलार्द्रकुक्षेर्महावराहस्य महीं विधृत्य ।
विधुन्वतो वेदमयं शरीरं रोमान्तरस्था मुनयो जपन्ति ॥२९
तं तुष्टुवुस्तोषपरीतचेतसो लोके जने ये निवसन्ति योगिनः ।
सनन्दनाद्या नतिनम्रकन्धरा धराधरं धीरतरोद्धतेक्षणम् ॥३०॥
जयेश्वराणां परमेश ! केशव ! प्रभो ! गदाशङ्खधरासिचक्रधृक् !
प्रसूतिनाशस्थितिहेतुरीश्वरस्त्वमेव नान्यत् परमञ्च यत् पदम् ॥३१

श्रयान्ते ॥२६॥ निष्कल्मषानपि तान् मुनीन् प्रकर्षेण क्षालयामास अतिनिर्मलाम्बरात् । पाठान्तरेऽप्येवमेवार्थः ॥ २७ ॥ वराहस्य खुराग्रेण विक्षते विदीर्णे रसातले सति, तेन द्वारेणाधस्तात् तोयानि प्रयान्ति । कथं कृतशब्दसन्तति अविच्छिन्नं यथा भवति तथा, कृतशब्दसन्ततिपाठे कृता शब्दसन्ततिर्यस्मिन् रसातले तस्मिन्नधः प्रयान्तीत्यर्थः । श्वासानिलेन अस्ताः क्षिप्ताः । जने जनलोके ॥ २८ ॥ विधुन्वतः (इति पाठे) विशेषेण कम्पयतः रोमान्तरस्था मुनय इति जनलोकं यावद् रोमप्रसरणादिति भावः ॥ २९ ॥ तोषेण परीतं व्याप्तं चेतो येषां ते । धाराधरः भूभृत् च धाराप्लुतेक्षणम् उद्धतदृष्टिः तम् । धीरतरोद्धतेक्षणमिति पाठे निर्भयत्वोद्धारेक्षणमित्यर्थः ॥ ३० ॥ ईश्वराणां ब्रह्मादीनां परमेश ! अतो अन्यतः ब्रह्मादीनां त्वमेव श्रेयः ईश्वरश्च नियन्ता ।

पादेषु वेदास्तव यूपदंष्ट्र ! दन्तेषु यज्ञाश्चितयश्च वक्त्रे ।
हुताशजिह्वोऽसि तनूरुहाणि दर्भाः प्रभो ! यज्ञपुमांस्त्वमेव ॥ ३२
विलोचने रात्र्यहनी महात्मन् ! सर्वाश्रयं ब्रह्मपदं शिरस्ते ।
सूक्तान्यशेषाणि सटाकलापो घ्राणं समस्तानि हवींषि देव ! ३३
स्रुक्तुण्ड ! सामस्वरधीरनाद ! प्राग्वंशकायाखिलसत्रसन्धे ! ।
पूर्त्तेष्टधर्मश्रवणोऽसि देव ! सनातनात्मन् ! भगवन् ! प्रसीद ३४

यच्च परमं पदं तदपि त्वत्तो नान्यत् । त्वमेव परं ब्रह्मेत्यर्थः । पाठान्तरं सुगमम् ॥ ३१ ॥ परमत्वेन स्तुत्वा प्रस्तुतावतारस्वरूपं यज्ञरूपत्वेन स्तुवन्ति पादेष्विति त्रिभिः । यज्ञपुमांस्त्वमेवेति प्रतिज्ञा । तत्सम्पादनं पादेष्वित्यादिभिः । चतुःसंख्यत्वात् यज्ञाङ्गत्वाच्च वेदा यज्ञमयस्य तव पादत्वेन रूप्यन्ते । यूपा वृत्तत्वात् दंष्ट्रा यस्य, हे यूपदंष्ट्र ! दन्तेषु यज्ञाः पुरोडाशादिभक्षणार्थत्वात् दन्तत्वेन रूप्यन्ते । चितयः "श्येनचितं चिन्वीत कङ्कचितं चिन्वीत" इत्यादिश्रुत्युक्तान्यग्निस्थानानि, ताश्चितयो वक्त्रस्थानीयाः हविर्निक्षेपस्थानत्वात् । एवं सर्वत्र किञ्चित् साम्यमूहनीयम् । हुताशोऽग्निर्जिह्वा यस्य च । दर्भास्तव तनूरुहाणि रोमाणि ॥ ३२ ॥ रात्र्यहनी तमःप्रकाशधर्मके यज्ञकालात्मके तव विलोचने निमेषोन्मेषाभ्यां तयोरपि तत्प्रकाशधर्मकत्वात् । परं ब्रह्म तव शिरः उत्तमाङ्गम् । सूक्तानि वैश्वदेवादीनि सटाकलापः स्कन्धकेशरसन्दर्भः स्कन्धसन्दर्भरूपत्वात् सूक्तानाम् । हवींषि घ्राणेन्द्रियं गन्धवत्त्वात् ॥ ३३ ॥ स्रुक्तुण्डेत्यादि चत्वारि सम्बोधनानि । स्रुक् स्रुवश्च तुण्डं यस्य, वराहतुण्डाकारत्वात् स्रुचः । सामस्वर एव धीरो गम्भीरो नादो यस्य प्राग्वंशः पत्नीशालायाः पूर्वभागः । "पूर्वभागोऽग्निशालायाः प्राग्वंशः परिकीर्त्तितः" इति वचनात् प्राग्वंशः कायो मध्यभागो यस्य । अखिलानि सत्राणि द्वादशाहादीनि सन्धयो यस्य, तेषां त्रिकालस्य इत्यायतःसंहतिरूपत्वात् । पूर्त्तं खातो धर्मः, इष्टं श्रौतो धर्मः, तौ श्रवणौ यस्य स त्वमसि ।

पदक्रमक्रान्तभुवं भवन्तम् आदिस्थितिस्थावर! विश्वमूर्त्ते!।
विश्वस्य विष्णुः परमेश्वरोऽसि प्रसीद नाथोऽसि चराचरस्य २५
दंष्ट्राग्रविन्यस्तमशेषमेतद् भूमण्डलं नाथ! विभाव्यते ते।
विगाहतः पद्मवनं विलग्नं सरोजिनीपत्रमिवोढ़पङ्कम् ॥२६॥

द्यावापृथिव्योरतुलप्रभाव!
यदन्तरं तद् वपुषा तवैव।
व्याप्तं जगद्व्याप्तिसमर्थदीप्ते!
हिताय विश्वस्य विभो! भव त्वम् ॥ २७ ॥

परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते!।
तवैष महिमा येन व्याप्तमेतच्चराचरम् ॥ २८ ॥

सनातनात्मन्! विश्वमूर्त्ते! ॥ २४ ॥ तदुपपादयन्नाह पदक्रमेति। पदक्रमैः पादविक्षेपैराक्रान्ता व्याप्ता भूर्येन तथाभूतं भवन्तं विश्वस्यादिस्थितिषु जनकं पालकञ्च विष्णुरित्यन्वयः। अतः परमेश्वरोऽसि नाथश्च त्वमेवासि नाथ्यते प्रार्थ्यत इति नाथः। अभिप्रेतमर्थं याचनीयश्चासीत्यर्थः। पादक्रमाक्रान्तमनन्तमादिस्थितं त्वमेवेति पाठे—भो स्थावर! भो विश्वमूर्त्ते! त्वया पादक्रमैराक्रान्तमनन्तं विश्वं तस्मात् त्वमेव विश्वस्यादिस्थितं कारणं परमेश्वरश्च नाथश्चासीति अयं विष्णुः अतः प्रसीदेत्यन्वयः ॥ २५ ॥ किञ्च ते तव दंष्ट्राग्रे विन्यस्तं स्थितमेतद् भूमण्डलम् ऊढ़पङ्कं धृतपङ्कं सरोजपत्रमिव विभाव्यते प्रतीयते कथम्भूतं सरोजपत्रमिव। पद्मवनं विगाहतः प्रविश्य विहरतः क्वचिद् गजेन्द्रस्य इव तव दंष्ट्राग्रे विलग्नमित्यन्वयः ॥ २६ ॥ किञ्च द्यावापृथिव्योर्यदन्तरमन्तरीक्षं तद् तवैव वपुषा व्याप्तम्। जगद्व्याप्तौ समर्था दीप्तयो यस्य भो तथाभूत! पाठान्तरं सुगमम् ॥ २७ ॥ तव वपुषा व्याप्तमित्युक्तेः प्रतीयमानमाधारत्वेन परमार्थत्वमाह। परमार्थ इति। अन्यस्त्वेन नास्ति यतः सर्वं त्वया व्याप्तमित्युक्तं तस्मात्। तवैष महिमा आधारभावः। कोऽसौ

यदेतद् दृश्यते मूर्त्तमेतद् ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥ ३९ ॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥ ४० ॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ! ॥ ४१ ॥
प्रसीद सर्व ! सर्वात्मन् ! भवाय जगतामिमाम् ।
उद्धरोर्वीममेयात्मन् ! शं नो देह्यब्जलोचन ! ॥ ४२ ॥
सत्त्वोद्रिक्तोऽसि भगवन् ! गोविन्द ! पृथिवीमिमाम् ।
समुद्धर भवायेश ! शं नो देह्यब्जलोचन ! ॥ ४३ ॥
सर्गप्रवृत्तिर्भवतो जगतामुपकारिणी ।

तेन भक्तिरूपा व्याप्तम् एतच्चराचरं जगत् स पद ॥ ३८ ॥ व्याप्तः जगत-स्तत्र वैलक्षण्यमाहुः । यदेतदिति । तव यदेतत् मूर्त्तं भूतात्मकं तद्रूपं दृश्यते एतद् ज्ञानात्मनो ज्ञानघनस्य तव ज्ञानमयमेव रूपम् । ज्ञानात्मकं तवेति वा पाठः । अयोगिनस्तथा भ्रान्तिज्ञानेन जगद्रूपं भूतमय पश्यन्तीत्यर्थः ॥ ३९ ॥ इदं वाराहं रूपं त्वया लीलया धृतं ज्ञानात्मकमिति किं वक्तव्यम् । यतो वस्तुतस्तद्रूपात्मतिरेकाद् जगदपि ज्ञानमयमेवेत्याहुः ज्ञानस्वरूपमिति मोहमये संप्लवे संसारसागरे ॥ ४० ॥ ज्ञानात्मकमेव सर्वमिदमात्म विहस्तुभवं प्रमाणयन्ति ये त्विति । ज्ञायते अनेनेति ज्ञानं वेदान्तपुराणादि, तद्विदः । श्रुतिश्च "सर्वं खल्विदं ब्रह्म एतदात्म्यमिदं सर्वम्" इत्यादिः ॥ ४१ ॥ सर्व ! सर्वात्मन् ! जडाजडस्वरूप ! भवन्त्यस्मिन्निति भवो निवासः तदर्थमुर्वीमुद्धर एवं कृत्वा शं सुखं नोऽस्मभ्यं देहि । भो अब्जलोचन ! अब्जवत् सुन्दरे लोचने यस्य तव ॥ ४२ सात्त्विकस्य तवैतदेव युक्तमित्याहुः सत्त्वोद्रिक्तोऽसीति द्वाभ्याम् । भवाय उद्भवाय । अब्जलोचन ! श्रीनिवासभूते लोचने यस्य ॥ ४३ ॥ जगदुप-

भवत्वेषा नमस्तेऽस्तु शं नो देह्यब्जलोचन ।॥ ४४ ॥

पराशर उवाच ।

एवं संस्तूयमानोऽथ परमात्मा महीधरः ।
उज्जहार क्षितिं क्षिप्रं न्यस्तवांश्च महार्णवे ॥ ४५ ॥
तस्योपरि समुद्रस्य महती नौरिव स्थिता ।
विततत्वाच्च देहस्य न मही याति संप्लवम् ॥ ४६ ॥
ततः क्षितिं समां कृत्वा पृथिव्यां सोऽचिनोद्गिरीन् ।
यथाविभागं भगवाननादिः परमेश्वरः ॥ ४७ ॥
प्राक्सर्गदग्धानखिलान् पर्वतान् पृथिवीतले ।
अमोघेन प्रभावेण ससर्जामोघवाञ्छितः ॥ ४८ ॥
भूविभागं ततः कृत्वा सप्तद्वीपं यथातथम् ।
भुवाद्यांश्चतुरो लोकान् पूर्ववत् समकल्पयत् ॥ ४९ ॥
ब्रह्मरूपधरो देवस्ततोऽसौ रजसा वृतः ।
चकार सृष्टिं भगवांश्चतुर्वक्त्रधरो हरिः ॥ ५० ॥

त्वर एवास्मत्सुखं तदेवास्माभिः प्रार्थ्यत इति त्वमेव जानासीति पुनः संबोधयन्ति । अस्मे हृत्पुण्डरीके शोभनं दर्शनं यस्य भो हृदयवासिन् ! सुखदर्शन ॥ ४४ ॥ ४५ ॥ विततत्वात् विस्तृतत्वात् संप्लवं निमज्जनं न याति ॥ ४६ ॥ यथाविभागं यथास्थानम् ॥ ४७ ॥ अमोघवाञ्छितः सत्यसङ्कल्पः ॥ ४८ ॥ यथातथं यथावत् । भुवाद्यांश्चतुरो लोकान् यथापूर्वं समकल्पयत् । संकल्पेनैव सृष्टवान् । पातालेन सह भुवादीनां चतुष्टयम् । यद्वा महर्लोकस्यापि कल्पान्तदाहाभावात् शून्यतया निर्दग्धप्रायत्वात् चतुरो लोकानित्युक्तम् । तथा च श्रुतिः । "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः" इति दिवः पृथगुपादानात् स्वःशब्देन महर्लोको लक्ष्यते ॥ ४९ ॥ तदेवं सृष्ट्याहारादिलीलारचनात्मका वाराहमूर्तिर्दर्शिता । अथ सैव

निमित्तमात्रमेवासीत् सृज्यानां सर्गकर्मणि।
प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥ ५१ ॥
निमित्तमात्रं मुक्त्वैकं नान्यत् किञ्चिदवेक्ष्यते।
नीयते तपतां श्रेष्ठ ! स्वशक्त्या वस्तु वस्तुताम् ॥ ५२ ॥

पञ्चमोऽध्यायः।

मैत्रेय उवाच।

यथा ससर्ज देवोऽसौ देवर्षिपितृदानवान्।
मनुष्यतिर्य्यग्वृक्षादीन् भूव्योमसलिलौकसः ॥ १ ॥

ब्रह्मरूपेण कृतां देवादिसृष्टिमाह ब्रह्मरूपेति ॥५०॥ रजसावृतः सृष्टिं चकार इत्युक्तं, तत्र रजोगुणस्य कर्तृत्वादिदं सर्वादिहेतुत्वाद् ब्रह्मणो नित्यं कर्तृत्वमत्यादिप्रसङ्गमाशङ्क्याह निमित्तमात्रमिति। अथो हरिर्ब्रह्मरूपधरः। अयमर्थः: सृज्यानां सर्गे ब्रह्मा निमित्तमात्रं पर्जन्यवत् सन्निधिमात्रेण बाधकरणमेव न तु परिणन्तृत्वं स्वयं व्याप्रियते। तदुक्तम्। "यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते" इत्यत्र तर्हि मुख्यं कारणं किमित्यत आह प्रधानकारणीभूता इति। प्रधानं मुख्यमसाधारणं कारणं तथा भूताः। यतः कारणात् सृज्यशक्तयः ॥५१॥ एतद् विवृणोति। निमित्तमात्रमिति निमित्तमात्रमप्रधानं इति कारणात्मना स्थितं सृज्यं स्वशक्तिपरिणामशक्त्यैव वस्तुतां स्वरूपतां नीयते निमित्ताद् यदन्यत् तत् स्वरूपपरिणामार्थं नापेक्षते। यथा धान्यादिबीजेषु सूक्ष्मात्मना स्थितमङ्कुरादि पर्जन्ये सति स्वपरिणामशक्त्यैव तथा परिणमते तद्वत्। अतो नोक्तदोषप्रसङ्ग इत्यर्थः ॥ ५२ ॥

ब्रह्मरूपधरो देवः सर्गं चकारेत्युक्तम्। तत्प्रकारं जिज्ञासुः पृच्छति, यथेति द्वाभ्याम्। भूव्योमसलिलौकसो भूम्यादीनि स्थानानि येषां

यद्गुणं यत्स्वरूपञ्च यत्स्वभावं जगद् द्विज ! ।
सर्गादौ सृष्टवान् ब्रह्मा तन् ममाचक्ष्व तत्त्वतः ॥ २ ॥

पराशर उवाच ।

मैत्रेय ! कथयाम्येष, शृणुष्व सुसमाहितः ।
यथा ससर्ज देवोऽसौ देवादीनखिलान् प्रभुः ॥ ३ ॥
सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा ।
अबुद्धिपूर्वकः सर्गः प्रादुर्भूतस्तमोमयः ॥ ४ ॥
तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।
अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः ॥ ५ ॥
पञ्चधावस्थितः सर्गो ध्यायतोऽप्रतिबोधवान् ।
बहिरन्तोऽप्रकाशश्च संवृतात्मा नगात्मकः ॥ ६ ॥

तान् ॥ १ ॥ यद्गुणमित्यादि । गुणाः सत्त्वादयः । स्वभावः शान्तत्व-घोरत्वादिः । रूपं द्विपाच्चतुष्पादित्वाद्याकारः । यावद्गुणमेवाकार-विस्तरः ॥ २ ॥ ३ ॥ अविद्यां विना सृष्टेषु देवेषु जीवानां कर्तृत्व-भोक्तृत्वाद्यसम्भवात् प्रथममविद्याविर्भावमाह सृष्टिमिति । अबुद्धिपूर्वकः अनवधानरूपः तमोमयः अविद्यादिरूप ॥ ४ ॥ तदेवाह तम इति । अन्धसंज्ञितः अन्धतामिस्रः । पञ्चपर्वाणि वृत्तिविशेषा यस्याः सा । तम अनात्मदेहादावात्माभिमानः । मोहस्तद्रूपसम्बन्धिषु पुत्रादिषु ममत्वाभिमानः । महामोहः भोगादिभोगस्पृहा । तामिस्रस्तत्प्रतिघाते क्रोधः । अन्धतामिस्रो विनाशे'हमेव मृत' इति तद्दुःखाद्यभिनिवेशः । एते च पञ्चविपर्ययाः पातञ्जले क्लेशशब्देनोक्ताः "अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" इति ॥ ५ ॥ तदेवमविद्यायामुद्भूतायां सर्वां प्रथमस्थावरजङ्गमात्मकं स्थावरसर्गमाह, पञ्चधेति सार्द्धेन । तस्य सृष्टिं ध्यायतः सतो नगात्मकः स्थावररूपः सर्गः पञ्च-धावस्थितः । "वृक्षगुल्मलतावीरुत्तृणजात्यास्तथापराः" इति पञ्चधा

मुख्या नगा यतः प्रोक्ता मुख्यसर्गस्ततस्त्वयम् ।
तं दृष्ट्वाऽसाधकं सर्गममन्यदपरं पुनः ॥ ७ ॥
तस्याभिध्यायतः सर्गं तिर्य्यक्स्रोतोऽभ्यवर्त्तत ।
यस्मात् तिर्य्यक् प्रवृत्तः स तिर्य्यक्स्रोतास्ततः स्मृतः ॥ ८ ॥
पश्वादयस्ते विख्यातास्तमःप्राया ह्यवेदिनः ।
उत्पथग्राहिणश्चैव तेऽज्ञाने ज्ञानमानिनः ॥ ९ ॥
अहङ्कृता अहम्माना अष्टाविंशद्वधात्मकाः ।
अन्तःप्रकाशास्ते सर्वे आवृताश्च परस्परम् ॥ १० ॥

पञ्चधावस्थितः पञ्चप्रकारो जात इत्यर्थः । तत्र सामान्यलक्षणम् अप्रतिबोधवान् कोऽहमिति परामर्शशून्यः बहिःगन्धादिविषये अन्तःसुखादौ च अप्रकाशः ज्ञानशून्यः । संवृतात्मा जड़स्वभावः ॥ ६ ॥ मुखमिव प्रथमं ब्रह्मणः सर्गो भवतीति मुख्या नगाः स्थावराः । अत एव पर्वतानां स्थावरत्वेऽपि मांसलत्वात् प्राणेन वराहेण सृष्टत्वाच्चानुप्रवृत्त इति पक्षोपेत्यक्रम् । यद्वा पर्वतानां पक्षच्छेदनिमित्तमागन्तुकं स्थावरत्वं न स्वाभाविकमिति नाम्नानुपपत्तिः । मुख्यसर्गपरितोषेण समीक्ष्य ध्यायतस्तस्मात् किञ्चिदुत्कर्षवान् सर्गो जात इत्याह । त इति सार्द्धैस्त्रिभिः । असाधकं पुरुषार्थप्रवृत्तिशून्यं दृष्ट्वाऽपरं सर्गममन्यदचिन्तयत् ध्यातवानित्यर्थः । अमन्यत परं पुनरिति पाठः साधुः ॥ ७ ॥ तिर्य्यक्स्रोताः अभ्यवर्त्तत बभूवेत्यर्थः । यस्मात् तिर्य्यक् प्रवृत्तः तिर्य्यगाहारसञ्चारेण प्रवृत्तं वृत्तं वृत्तिस्रोतो यस्य सः ॥ ८ ॥ पश्वादय इति आदिशब्देन पक्ष्यादिः तेषां लक्षणं तमःप्रायास्तमोऽधिकाः । अवेदिनः अनुसन्धानशून्याः तथा च श्रुतिः "अथेतरेषां पशूनामशनापिपासे एवाभिज्ञानं, न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकौ इति" । उत्पथग्राहिणः उन्मार्गवर्त्तिनः भक्ष्याभक्ष्यगम्यागम्यादिविवेकरहिता इत्यर्थः । अज्ञाने विपर्य्यज्ञाने सम्यग्ज्ञानाभिमानिनः ॥ ९ ॥ अहङ्कृताः अहङ्कारेणैव कृतं कर्म येषां ते

अहंमानाः अहङ्कार एव मानोऽवबोधो येषां ते । अष्टाविंशद्वधात्मकाः अष्टाविंशतिवधस्वभावाः । अन्तःप्रकाशादेव प्रकाशः प्रकटं ज्ञानं येषां ते । आवृताश्च परस्परम् अन्योन्याभिजात्यस्वभावाद्यनभिज्ञाः । अष्टाविंशतिवधाः सांख्योक्ताः "एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा सप्तदशधा च बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम् । आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः । बाह्या विषयोपरमात् पञ्चतुष्टयोऽभिहिताः ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः । दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ।" अयमर्थः, इन्द्रियवधा एकादश अन्धबधिरत्वादिरूपात् वैकल्यात् सांख्यप्रसिद्धाशक्तिरूपाः । तुष्टीनां नवानां सिद्धीनाञ्चाष्टानां वैकल्यात् सप्तदशधा बुद्धेर्वधः । तदेवमष्टाविंशतिवधात्मका पश्वादयः । यद्यपि मनुष्यादीनामपीन्द्रियाद्युपघातः सम्भवन्ति तथापि तिरश्चां तदाधिक्यादेवमुक्तम । तत्र नवतुष्टीराह । आध्यात्मिकाः प्रकृत्युपादानकालभाग्याख्याश्चतस्रस्तुष्टयः । तत्रात्मविधप्रकृत्यां चिन्तनयात् सर्वोऽस्तीति प्रकृत्याख्या तुष्टिः । प्रव्रज्यारूपोपादानमात्रात् सर्वोऽस्तीति तुष्टिरुपादानाख्या । काल एव सेत्स्यति, किं ध्यानक्लेशेनेति तुष्टिः कालाख्या । भाग्योदयादेव सेत्स्यतीति तुष्टिर्भाग्याख्या । एताश्चात्मानमधिकृत्य भवन्तीत्याध्यात्मिकाश्चतस्रः । अर्जनारक्षणक्षयभोगहिंसादोषदर्शनेन शब्दादिपञ्चविषयोपरमात् पञ्च तुष्टयो बाह्यविषयत्वाद् बाह्याः । एवं नव तुष्टयोऽभिहिताः । अष्टौ सिद्धीराह । ऊह इति । उपदेशानपेक्षमेवार्थोहनमूहसिद्धिः । प्रासङ्गिकाच्छब्दश्रवणादर्थज्ञानं शब्दसिद्धिः । गुरूपदेशादेव ततो विवेकाधिगमोऽध्ययनसिद्धिः । दुःखत्रयविघातात् तिस्रः सिद्धयः । सुहृत्प्राप्तोऽर्थसिद्धिः । विद्वत्सम्पर्कपूर्वकाभ्यासात् सर्वसंसिद्धिरित्येता अष्टौ सिद्धयः । अधर्मेन्द्रियार्थासक्त्यादिविविधरूपोऽङ्कुशः । सिद्धेः पूर्वोऽङ्कुशः प्रतिघातक इति श्लोकस्यार्थः । आवृताश्च तुष्टिसिद्धीनामभावश्चाप्रकाशाद्यपि परिभाविनश्चाप्यान्तरं तत्तदवान्तरभेदश्च विस्तरभयात् न लिख्यते । अष्टाविंशद्वधात्मका इति वा पाठः । तदा च भागवतोक्ता नव द्विशफाः, षडेकशफाः, त्रयोदश पञ्चनखा इत्यष्टाविंशतिभेदा

तमप्यसाधकं मत्वा ध्यायतोऽन्यस्ततोऽभवत् ।
ऊर्ध्वस्रोतास्तृतीयस्तु सात्त्विकोर्ध्वमवर्त्तत ॥ ११ ॥
ते सुखप्रीतिबहुला बहिरन्तस्त्वनावृताः ।
प्रकाशा बहिरन्तश्च ऊर्ध्वस्रोतोभवाः स्मृताः ॥ १२ ॥
तुष्टात्मनस्तृतीयस्तु देवसर्गस्तु स स्मृतः ।
तस्मिन् सर्गेऽभवत् प्रीतिर्निष्पन्ने ब्रह्मणस्तदा ॥ १३ ॥
ततोऽन्यं स तदा दध्यौ साधकं सर्गमुत्तमम् ।
असाधकांस्तु तान् ज्ञात्वा मुख्यसर्गादिसम्भवान् ॥ १४ ॥
तथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः ।
प्रादुर्बभूव चाव्यक्तादर्वाक्स्रोतस्तु साधकम् ॥ १५ ॥

ग्राम्याः । तदुक्तं "गौरजो महिषः कृष्णः शूकरो गवयो रुरुः । द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सप्तमः ॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा । एते चैकशफाः क्षत्र शृणु पञ्चनखान् पशून् ॥ श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ । सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ॥" ॥ १० ॥ तिर्यक्सर्गादितोऽपि पुनर्ध्यायतो देवसर्गोऽभूदित्याह, तमपीति त्रिभिः । ऊर्ध्वम् उपरि देहाद् बहिरेव स्रोत आहारस्य प्रवृत्तं यस्य सः । अमृतदर्शनादेव तृप्तेः । तथा च श्रुतिः । "न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति" इति । सात्त्विकोर्ध्वं सात्त्विकं सुखप्रकाशादिकमूर्ध्वम् अधिकं यथा भवत्येवमवर्त्तत ॥ ११ ॥ तदेवाह । ते इति सुखं विषयेन्द्रिययोगजम् । प्रीतिर्मानसो हर्षः । सत्त्वाधिक्यात् सुखप्रीतिबहुला येषां ते तथा ॥१२।१४ सत्याभिध्यायिनः सत्यसङ्कल्पस्य भगवद्ध्याननिष्ठस्येति वा । अव्यक्तादिति प्रधानादिसर्गेष्वपि समानं तेष्वपि आरम्भकत्वानुगमात् । तथा च वायुः "अव्यक्ताज्जायते चास्य मनसा यद् यदिच्छति । वशीकृतत्वात्

यस्मादर्वाक् प्रवर्त्तन्ते ततोऽर्वाक्स्रोतसस्तु ते ।
ते च प्रकाशबहुलास्तमोद्रिक्ता रजोऽधिकाः ॥ १६ ॥
तस्मात् ते दुःखबहुला भूयोभूयश्च कारिणः ।
प्रकाशा बहिरन्तश्च मनुष्याः साधकाश्च ते ॥ १७ ॥
इत्येते कथिताः सर्गाः षडत्र मुनिसत्तम ! ।
प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ॥ १८ ॥
तन्मात्राणां द्वितीयश्च भूतसर्गस्तु स स्मृतः ।
वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः ॥ १९ ॥
इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्वकः ।
मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ॥ २० ॥

तमोगुणत्वात् बाधितत्वात् स्वभावतः इति ॥ १५ ॥ यस्मादर्वागधः प्रवृ-
त्ताहारेण प्रवर्त्तन्ते ॥ १६ ॥ तम उद्रेकात् दुःखबहुला रजोऽधिक-
त्वात् भूयोभूयः कर्मशीलाः । प्रकाशबहुलत्वात् बहिरन्तश्च प्रकाशाः
सकलार्थानां साधकाः कर्मज्ञानाधिकारित्वात् ॥ १७ ॥ षडत्रेति द्विती-
याध्यायोक्ताः षट् षडेते सर्गाः । तथा हि इन्द्रियदेवतासर्गस्य बाह्य-
देवतासर्गस्य च देवतासर्गत्वेनैक्यं इन्द्रियसर्गस्य ग्रहाभेदेन सप्तमे
चानुग्रहाख्यविद्यासर्गस्याच बुद्धिभेदत्वात् कुमाराख्यमनुष्यसर्गान्तर्भावः ।
भौतिकब्रह्माण्डसर्गस्य भूतसर्गान्तर्भावः । एवञ्च सति षष्ठसप्तमभूते-
न्द्रियसर्गाख्यानः मुख्यतिर्यक्मनुष्यदेवानाम् अत्र एकत्वं षडेते सर्गाः
कथिता इत्यर्थः । नामैव त्रिविधत्वात्परमेष्ठिविवक्षया यथा विवक्षयाच,
प्रथमो महत इत्यादिना । विराट् समष्टिशरीराभिमानिनो ब्रह्मणो
महत्तत्त्वं लिङ्गशरीरम् सर्गोऽसौ ब्रह्मणः सर्गो विज्ञेय इत्यर्थः ।
यद्वा ब्रह्म परमात्मा तत्कर्तृकः सर्गो विज्ञेय इत्यर्थः ॥ १८ ॥ देवता-
सर्गभेदं सत्त्वजेन्द्रियसर्गं एव वैकारिक इत्युच्यते ॥ १९ ॥ इत्येष
प्राकृतः प्रकृतीनां महदाद्यष्टानां सर्ग इत्यर्थः । चतुर्विधविद्यात्मक-

तिर्यक्स्रोतास्तु यः प्रोक्तस्तैर्यग्योन्यः स उच्यते ।
ऊर्ध्वस्रोतास्ततः षष्ठो देवसर्गस्तु स स्मृतः ॥ २१ ॥
ततोऽर्वाक्स्रोतसः सर्गः सप्तमः स तु मानुषः ।
अष्टमोऽनुग्रहः सर्गः सात्त्विकस्तामसश्च सः ॥ २२ ॥
पञ्चैते वैकृताः सर्गाः, प्राकृतास्तु त्रयः स्मृताः ।
प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः ॥ २३ ॥

प्रकृतितत्त्वपूर्वकः संभूतः । षट् वा [illegible] तापिकादिरित्यर्थः
॥ २० ॥ तिर्यगेव योनिर्यस्य स तिर्यग्योनिः स एव तैर्यग्योन्यः
स्वार्थे ष्यञ् स पञ्चमः सर्ग उच्यते इत्यर्थः ॥ २१ ॥ तत्र सात्त्विको
देवसर्गः पूर्वस्मात् इदानीं सात्त्विकत्वादूर्ध्वस्रोतस्त्वादपरः देवसर्गः षष्ठ
इति । स च वायुप्रोक्तो द्विधा: "अष्टमोऽनुग्रहः सर्गः स
चतुर्धा व्यवस्थितः । विपर्ययेण चाशक्त्या सिद्ध्या तुष्ट्या तथैव च ।
स्थावरेषु विपर्यासात् तिर्यग्योनिष्वशक्तितः । सिद्ध्यात्मना मनुष्येषु
तुष्ट्या देवेषु कृत्स्नशः" इति । विपर्यासाः पञ्च तमोमोह इत्यादयः ।
अशक्तिरष्टाविंशतिभेदा [illegible] । सिद्धिरष्टविधा, तुष्टिश्च नवविधा
प्रागेव प्रपञ्चिता । स्थावरादिष्व [illegible] तत्तत्स्वभावानु-
ग्रहका देवतानां हि [illegible] । स च स्थावरेषु तिर्यक्षु च
च तमसः प्रबलत्वात् तामसः । मनुष्येषु देवेषु च सिद्धितुष्ट्युप-
लम्भोत्कर्षत्वात् सात्त्विक इत्यर्थः ॥ २२ ॥ पञ्चैते मुख्यसर्गादयो
वैकृताः । विकृतीनां सर्गाः महदादयः प्राकृताः । देवतासर्गत्रयोपाय,
प्राकृता इति कौमारः सनकसनन्दनसनत्कुमारादीनां सर्गः । तत्र
सनत्कुमारादीनां वैकृतः, [illegible] ब्रह्मणा कृतत्वात् । रुद्रसर्गस्तु
प्राकृतः, प्रकृतितः [illegible] इति केचित् । तथा च वक्ष्यति
"प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः" इति । अन्ये त्वाहुः
रुद्रसर्गो [illegible] प्राकृतः, सनत्कुमारादीनां वैकृतः

इत्येते वै समाख्याता नव सर्गाः प्रजापतेः ।
प्राकृता वैकृताश्चैव जगतो मूलहेतवः ।
सृजतो जगदीशस्य किमन्यत् श्रोतुमिच्छसि ? ॥ २४ ॥

मैत्रेय उवाच ।

संक्षेपात् कथितः सर्गो देवादीनां मुने ! त्वया ।
विस्तरात् श्रोतुमिच्छामि त्वत्तो मुनिवरोत्तम ! ॥२५॥

पराशर उवाच ।

कर्मभिर्भाविताः पूर्वैः कुशलाकुशलैस्तु ताः ।
ख्यात्या तया ह्यनिर्मुक्ताः संहारे ह्युपसंहृताः ॥ २६ ॥
स्थावरान्ताः सुराद्यास्तु प्रजा ब्रह्मंश्चतुर्विधाः ।
ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानसास्तु ताः ॥ २७ ॥
ततो देवासुरपितॄन् मानुषांश्च चतुष्टयम् ।
सिसृक्षुरम्भांस्येतानि स्वमात्मानमयूयुजत् ॥ २८ ॥
युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत् प्रजापतेः ।
सिसृक्षोर्जघनात् पूर्वमसुरा जज्ञिरे ततः । २९ ॥

सर्गो विकृत्यन्तरानुत्पादकत्वात् वैकृत एवेति ॥ २३ ॥ जगत् सृजत ईश्वरस्य जगतो मूलहेतवः एते नव सर्गाः समाख्याता इत्यर्थः ॥ २४ ॥ ब्रह्मणः शरीरात् विस्तरेण सृष्टिं वक्तुं कुमारादौ तावत् सनिमित्तां मानसीं सुरादिसृष्टिं पूर्वश्लोकमनुवदन्ति कर्मभिरिति द्वाभ्याम् । पूर्वैः कर्मभिर्भाविता अधिवासिताः । अतस्ताः प्रजाः संहारे उपसंहृता अपि तया ख्यात्या तत्तत्कर्मानुसारिण्या बुद्ध्या अनिर्मुक्ताः न नितरां विमुक्ताः, संस्कारद्वारेण स्थितयैव जज्ञिरे इत्युत्तरेणान्वयः ॥ २६ ॥ सुराद्याः सुरनरतिर्यक्स्थावरा एवं चतुर्विधाः ॥ २७ ॥ इदानीं शरीरात् सृष्टिमाह तत इत्यादि यावदध्यायसमाप्तेः । देवादी-

उत्ससर्ज ततस्तान्तु तमोमात्रात्मिकां तनुम् ।
सा तु त्यक्ता ततस्तेन मैत्रेयाभूद् विभावरी ॥ ३० ॥
सिसृक्षुरन्यदेहस्थः प्रीतिमापततः सुराः ।
सत्त्वोद्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज ! ॥ ३१ ॥
त्यक्ता सा तु तनुस्तेन सत्त्वप्रायमभूद् दिनम् ।
ततो हि बलिनो रात्रावसुरा देवता दिवा ॥ ३२ ॥
सत्त्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ॥ ३३ ॥
उत्ससर्ज पितॄन् सृष्ट्वा ततस्तामपि स प्रभुः ।
सा चोत्सृष्टाऽभवत् सन्ध्या दिननक्तान्तरस्थितिः ॥ ३४ ॥
रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः ।
रजोमात्रोत्कटा जाता मनुष्या द्विजसत्तम ! ॥ ३५ ॥

चतुष्टयं चतुःसंख्यान् अम्भांसि अम्भःसंज्ञान् सिसृक्षुरात्मानं समोऽयुयुजत् समाधिनेत्यध्याहारः । "तानि वा एतानि चत्वार्यम्भांसि देवा मनुष्याः पितरोऽसुराः" इति श्रुतेर्देवादीनामम्भःसंज्ञा ॥ २८ ॥ तमसो मात्रा लेशः सुतरामुद्रिक्ता अभूत् ॥ २९ ॥ तमोमात्रात्मिकां तनुमिति विशेषणात् तमोमयं भावमुत्सृष्टवान् इत्यर्थः । एवमुत्तरत्रापि । विभावरी रात्रिः । श्रुतिश्च "सा तमिस्राभवत्" इति ॥ ३० ॥ अन्यदेहस्थः सात्त्विके भावे स्थितः सन् सिसृक्षुः प्रीतिं सुखमवाप । सुखतः । "स मुखात् देवान् असृजत" इति श्रुतेः ॥ ३१ ॥ सत्त्वप्रायं प्रकाशात्मकम् । रात्रिरभूदित्यादिवचनस्योपयोगमाह, ततो हीति । यतस्तमोमया रात्रिभूतायास्तनोर्निर्गता अतोऽसुरा रात्रौ बलिनः, सत्त्वतनूद्भवा रात्रौ चार्थ्यर्थः । एवं दिवादिष्वपि द्रष्टव्यम् ॥ ३२ ॥ अन्यां तनुं जगृहे, स्वीकृत्य आत्मानं जगत् पितृवन्मन्यमानस्य पार्श्वाभ्यां पितरो जाताः । यथाह वायुः, "पितृवन् मन्यमानस्य पुत्रान् प्रध्यायतः

तामप्याशु स तत्याज तनुं सद्यः प्रजापतिः ।
ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याभिधीयते ॥ ३६ ॥
ज्योत्स्नायामेव बलिनो मनुष्याः पितरस्तथा ।
मैत्रेय ! सन्ध्यासमये तस्मादेते भवन्ति वै ॥ ३७ ॥
ज्योत्स्ना रात्र्यहनी सन्ध्या चत्वार्येतानि वै प्रभोः ।
ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्रयाणि तु ॥ ३८ ॥
रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
ततः क्षुद् ब्रह्मणो जाता जज्ञे कोपस्तया ततः ॥ ३९ ॥
क्षुत्क्षामानन्धकारेऽथ सोऽसृजद् भगवांस्ततः ।
विरूपाः श्मश्रुला जातास्तेऽभ्यधावंस्ततः प्रभुम् ॥ ४० ॥
मैवं भो ! रक्ष्यतामेष यैरुक्तम् राक्षसास्तु ते ।
ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात् ॥ ४१ ॥
अप्रियानथ तान् दृष्ट्वा केशाः शीर्यन्त वेधसः ।
हीनाश्च शिरसो भूयः समारोहन्त तच्छिरः ॥ ४२ ॥

प्रभुः । स पितृनुपपक्षाभ्यां रात्र्यहोरन्तरेऽसृजत् इति ॥३३॥३४॥३५॥ अत्र इत्यनेन तत्तद्वपुर्विसर्जनस्य तत्तनुत्यागो नास्तीति दर्शितम् । ज्योत्स्ना प्रभातम् ॥ ३६ ॥ सन्ध्यासमये सन्ध्योपलक्षिते अपराह्णे इत्यर्थः । "अपराह्णः पितृणाम्" इति श्रुतेः ॥ ३७ ॥ तस्मात् ज्योत्स्ना रात्र्यहसन्ध्यात्मकानि ब्रह्मणस्तु शरीराणीत्युपाश्रयणार्थमुक्तम् ॥ ३८ ॥ तया क्षुधा ॥ ३९ ॥ ततो क्षुधाक्षामान् अन्धकारे स्थिता असृजत् । यथुः अभ्यधावन् भक्षयितुमिति शेषः ॥ ४० ॥ तेषामेव मध्ये ये येऽन्ये खादामो भक्षयाम इत्यूचुः, ते यक्षणात् भक्षणाभिप्रायात् यक्षाः जक्ष भक्षहसनयोः । जक्ष इति वक्तव्ये यकारः परोक्षतार्थः "परोक्षप्रिया इव हि देवाः" इति श्रुतेः ॥ ४१ ॥ शीर्यन्त अशीर्यन्त अदृश्यन्त इत्यर्थः । शिरोहीनाः

सर्पणात् तेऽभवन् सर्पा हीनत्वादहयः स्मृताः ।
ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मानो विनिर्ममे ॥ ४३ ॥
वर्णेन कपिशेनोग्रा भूतास्ते पिशिताशनाः ।
ध्यायतो गां समुत्पन्ना गन्धर्वास्तस्य तत्क्षणात् ॥ ४४ ॥
पिबन्तो जज्ञिरे वाचं गन्धर्वास्तेन ते द्विज ! ।
एतानि सृष्ट्वा भगवान् ब्रह्मा तच्छक्तिनोदितः ॥ ४५ ॥
ततः स्वच्छन्दतोऽन्यानि वयांसि वयसोऽसृजत् ।
अवयो वक्षसश्चक्रे मुखतोऽजाः स सृष्टवान् ॥ ४६ ॥
सृष्टवानुदराद् गाश्च पार्श्वाभ्याञ्च प्रजापतिः ।
पद्भ्यामश्वान् स मातङ्गान् शरभान् गवयान् मृगान्४७
उष्ट्रानश्वतरांश्चैव न्यङ्कूनन्याश्च जातयः ।
ओषध्यः फलमूलिन्यो रोमभ्यस्तस्य जज्ञिरे ॥ ४८ ॥
त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्विजोत्तम ! ।
सृष्ट्वा पश्वोषधीः सम्यग् युयोज स तदाध्वरे ॥ ४९ ॥

ततः पुनस्तस्य शिर सर्पणाच्च्युताः ॥ ४२ ॥ सर्पणात् शिरःसर्पणादेवाहयः । क्रोधात्मनः क्रोधात्मकान् ॥ ४३ ॥ गां वाचं ध्यायतः पिबतः गायन्त इत्यर्थः ॥ ४४ ॥ गां पिबन्तो गायन्तो जज्ञिरे तेन ते गन्धर्वाः । तच्छक्तिचोदित तेषां सृष्टानां शक्तिभिः प्राक्कर्मसंस्काररूपाभिः प्रयुक्तः सन् ॥ ४५ ॥ ततस्तु शक्तिभिरेतानि सृष्ट्वा स्वच्छन्दतः तत्तत्कर्मवशादेवोत्पन्नया स्वेच्छया वयसः देहावस्थाविशेषात् वयांसि पक्षिणः, अवयः मेषाः ॥ ४६ ॥ ४७ ॥ अश्वतरान् वेसरान् । न्यङ्कून् लम्बकर्णादिपशुविशेषान् । अन्याश्च जातयः निकृष्टजातीयाः ॥ ४८ ॥ तदैव कल्पस्यादावेव पश्वोषधीः सृष्ट्वा अनन्तरं त्रेतायुगमुखे प्राप्ते सति यज्ञारम्भसमयतया तदाध्वरे साधनतया युयोज । त्रेतायुगे यज्ञारम्भप्रवृत्तेः ॥ ४९ ॥ ग्राम्यारण्य-

गौरजः पुरुषा मेषा अश्वा अश्वतरा खराः ।
एतान् ग्राम्यान् पशून् प्राहुरारण्यांश्च निबोध मे ॥५०॥
श्वापदा द्विखुरा हस्ती वानरः पक्षिपञ्चमः ।
औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः ॥ ५१ ॥
गायत्रञ्च ऋचश्चैव त्रिवृत्स्तोमं रथन्तरम् ।
अग्निष्टोमञ्च यज्ञानां निर्ममे प्रथमान् मुखात् ॥ ५२ ॥
यजूंषि त्रैष्टुभं छन्दस्तोमं पञ्चदशं तथा ।
बृहत् साम तथोक्थञ्च दक्षिणादसृजन् मुखात् ॥५३॥
सामानि जगतीच्छन्दः स्तोमं सप्तदशं तथा ।
वैरूपमतिरात्रञ्च पश्चिमादसृजन् मुखात् ॥ ५४ ॥
एकविंशमथर्वाणमाप्तोर्यामाणमेव च ।
अनुष्टुभं स वैराजम् उत्तरादसृजन् मुखात् ॥ ५५ ॥
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ।
देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च प्रजापतिः ॥ ५६ ॥

उष्ट्रमेषाश्च गौरिति द्वाभ्याम् ॥ ५० ॥ श्वापदो व्याघ्रादिः, द्विखुरो गवयादिः, औदका कूर्मादयः, सरीसृपाः सर्पगोधादयः ॥५१॥ पूर्वादिमुखेभ्यः सृष्टिमाह चतुर्भिः । गायत्रं छन्दः, ऋचं ऋग्वेदम्, त्रिवृत्स्तोमं स्तोत्रसाधनभूतानामृचां समुदायम् । रथन्तरं साम । यज्ञानां मध्ये अग्निष्टोमं सोमयागसंस्थाविशेषम् ॥ ५२ ॥ यजूंषि यजुर्वेदम् उक्थं सोमसंस्थाम् ॥ ५३ ॥ सामानि सामवेदं साम वैरूपम् । अतिरात्रं सोमसंस्थाम् ॥ ५४ ॥ एकविंशं स्तोमम्, अथर्वाणमथर्ववेदम् । आप्तोर्यामाणं सोमसंस्थाम् । अनुष्टुभं छन्दः । वैराजं साम ॥ ५५ ॥ कर्तृता सर्वेषां भूतानां सर्गक्रमाभावादि यद्यपि पूर्वमेव सृष्टिप्रपञ्चमवदति, अनुक्तवानीति वाह त्रिभिः । उच्चावचानि उत्कृष्टनिकृष्टानि देवासुरा-

ततः पुनः ससर्जादौ स कल्पस्य पितामहः ।
यक्षान् पिशाचान् गन्धर्वांस्तथैवाप्सरसां गणान् ॥ ५७ ॥
नरकिन्नररक्षांसि वयःपशुमृगोरगान् ।
अव्ययञ्च व्ययञ्चैव यदिदं स्थाणुजङ्गमम् ॥ ५८ ॥
तत् ससर्ज तदा ब्रह्मा भगवानादिकृद् विभुः ।
तेषां ये यानि कर्माणि प्राक् सृष्ट्यां प्रतिपेदिरे ॥ ५९ ॥
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः ।
हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात् तत् तस्य रोचते ॥ ६० ॥
इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः ।
नानात्वं विनियोगञ्च धातैव व्यसृजत् स्वयम् ॥ ६१ ॥

टीका ॥ ५६ ॥ ५७ ॥ नरकिन्नरभेदश्च "नरोऽश्वजघनोऽपि स्यात् किन्नरोऽश्ववक्त्रो नरः" इत्यभिधानोक्तेः । अव्ययं चिरकालावस्थायि महार्णवादि व्ययं वा तद्विपरीतम् ॥ ५८ ॥ एवं सृष्टानां तेषां भूतानां मध्ये ॥ ५९ ॥ तान्येव च कर्माण्याह । हिंस्रं मारकम्, अहिंस्रं तद्विपरीतं शारीरं कर्म मृदुकरम् । क्रूरञ्च तद्विपरीतं मानसं कर्म सत्यानृतञ्च वाचिकं कर्म । हिंस्रमपि किञ्चित् धर्म एव यथाग्नीषोमीयादि पश्वालम्भनम् । अहिंस्रमपि परस्त्रीगमनादिकमधर्मः । मृदुकर्मापि किञ्चिदधर्मः । यथा राज्ञां चौरादिरक्षणम् । क्रूरमपि किञ्चित् धर्मः यथा राज्ञां दुष्टशासनम् । सत्यमपि किञ्चिदधर्मः यथा ब्राह्मणादेर्वधप्राप्तौ तदुद्घाटनम् । अनृतमपि ब्राह्मणादिरक्षणं धर्म एव । अतो धर्माधर्माविति तयोः पृथग् ग्रहणम् । तद्भाविताः तैर्हिंस्रादिकर्मभिर्वासिताः तस्मादद्यापि यो यद्वासनावासितस्तस्य तदेव रोचते ॥ ६० ॥ एवं तत्तद्वासनानुसारेणैव इन्द्रियार्थेषु नानात्वम् अवान्तरभेदं सर्वं शब्दस्पर्शादिभोग्यविषयविभागम् ।

नामरूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥ ६२ ॥
ऋषीणां नामधेयानि यथा वेदश्रुतानि वै ।
यथा नियोगयोग्यानि सर्वेषामपि सोऽकरोत् ॥ ६३ ॥
यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ ६४ ॥
करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः ।
सिसृक्षाशक्तियुक्तोऽसौ सृज्यशक्तिप्रचोदितः ॥ ६५ ॥

भूतेषु नानात्वं जङ्गमस्थावरादिविभागम् । शरीरेषु नानात्वं द्विपा-च्चतुष्पादादिविभागं विनियोगञ्च । अनेन जीवभेदं कार्य्यभिन्नादि तत्तत्कर्मानुसारेण स्वयमेवासृजत् ॥ ६१ ॥ नाम इन्द्रोऽग्निर्यम इत्यादि रूपञ्च । वज्रहस्तत्वादि कृत्यानाञ्च वर्षणदहनसंयमनादीनाम्, प्रपञ्चनं तत्तद्व्यापारभेदः ॥ ६२ ॥ किञ्च ऋषीणां वशिष्ठादीनां नामानि । तथा द्-वाशिष्ठो ब्रह्मा कार्य्यं इत्यादिनियोगे योग्यानि तत्तत्सूक्तमन्त्रादिदर्शन-योग्यानि च वेदे यथाश्रुतानि तथैव कृतवान् ॥ ६३ ॥ ननु देवादीनाम-नित्यानां कथं नित्येन वेदेनाभिधानमित्याशङ्क्य प्रवाहनित्यत्वं दृष्टान्तेन दर्शयति, यथेति । यस्मिन् वसन्तादौ ऋतौ यानि ऋतुलिङ्गानि पुष्प-फलादीनि पर्य्याये तस्य ऋतोः पुनरावृत्तौ तानि तानि तज्जातीयान्येव दृश्यन्ते, तथैव युगमन्वन्तरकल्पादिषु भावा देवादयः ॥ ६४ ॥ उपसं-हरति, करोतीति सिसृक्षा च शक्तिश्च सर्गविषया ताभ्यां युक्तः ॥ ६५ ॥

षष्ठोऽध्यायः ।

मैत्रेय उवाच ।

अर्वाक्स्रोतस्तु कथितो भवता यस्तु मानुषः ।
ब्रह्मन् ! विस्तरतो ब्रूहि ब्रह्मा तमसृजद् यथा ॥ १ ॥
यथा च वर्णानसृजद् यद्गुणांश्च महामुने ! ।
यच्च तेषां स्मृतं कर्म्म विप्रादीनां तदुच्यताम् ॥ २ ॥

पराशर उवाच ।

सत्याभिध्यायिनः पूर्वं सिसृक्षोर्ब्रह्मणो जगत् ।
अजायन्त द्विजश्रेष्ठ ! सत्त्वोद्रिक्ता मुखात् प्रजाः ॥ ३ ॥
वक्षसो रजसोद्रिक्तास्तथा वै ब्रह्मणोऽभवन् ।
रजसा तमसा चैव समुद्रिक्तास्तथोरुजाः ॥ ४ ॥
पद्भ्यामन्याः प्रजा ब्रह्मा ससर्ज्ज द्विजसत्तम ! ।
तमःप्रधानास्ताः सर्वाश्चातुर्वर्ण्यमिदं ततः ॥ ५ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ! ।
पादोरुवक्षःस्थलतो मुखतश्च समुद्गताः ॥ ६ ॥
यज्ञनिष्पत्तये सर्वमेतद् ब्रह्मा चकार वै ।
चातुर्वर्ण्यं महाभाग ! यज्ञसाधनमुत्तमम् ॥ ७ ॥

विस्तरतो ब्रूहि । यद् यच्च तदेव विवृणोति यथा चेति ॥ २ ॥ चातुर्विधा मुखादिभ्यः सृष्टाः प्रजाः । इदं प्रसिद्धं चातुर्वर्ण्यं चत्वारो वर्णाः ॥ ५ ॥ एतदेव विभागेन दर्शयति, ब्राह्मणा इति । पादोरुवक्षःस्थलतो मुखतश्चेति ब्राह्मणादिभिः प्रातिलोम्येन सम्बन्धः ॥ ६ ॥ तदुत्पत्तेः प्रयोजनमाह । यज्ञनिष्पत्तये सर्वमेतद् यज्ञसाधनमुत्तमम् उत्तमं चातुर्वर्ण्यं चकार इत्यन्वयः । [illegible]

यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः ।
आप्याययन्ते धर्मज्ञ ! यज्ञाः कल्याणहेतवः ॥ ८ ॥
निष्पाद्यन्ते नरैस्तैस्तु स्वधर्माभिरतैस्ततः ।
विशुद्धाचरणोपेतैः सद्भिः सन्मार्गगामिभिः ॥ ९ ॥
स्वर्गापवर्गौ मानुष्यात् प्राप्नुवन्ति नरा मुने ! ।
यच्चाभिरुचितं स्थानं तद् यान्ति मनुजा द्विज ! ॥ १० ॥
प्रजास्ता ब्रह्मणा सृष्टाश्चातुर्वर्ण्यव्यवस्थितौ ।
सम्यक्श्रद्धासमाचारप्रवणा मुनिसत्तम ! ॥ ११ ॥
यथेच्छावासनिरताः सर्वबाधाविवर्जिताः ।
शुद्धान्तःकरणाः शुद्धाः सर्वानुष्ठाननिर्मलाः ॥ १२ ॥

न कर्मणि स्यात् इति सूत्रे जैमिनिः शूद्रस्य अध्ययनाद्यभावात् यज्ञाधिकारं न मन्यते, तथापि द्विजशुश्रूषाद्वारेण तत्साधनत्वात् । "नमस्कारेण मन्त्रेण पञ्च यज्ञान् न हापयेत्, इत्यादि स्मृतेः पाकयज्ञादिषु साक्षादप्यधिकारात् न विरोधः ॥ ७ ॥ यज्ञनिष्पादनस्य उपयोगमाह, यज्ञैरिति । आप्यायितास्तर्पिता देवा वृष्ट्युत्सर्गेण ताः यज्ञकर्त्रीः प्रजाः तर्पयन्ति । "अग्नौ प्रास्ताहुतिः सम्यक् आदित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः" इति स्मृतेः । अतो यज्ञाः कल्याणहेतवः ॥ ८ ॥ तेषु येषामधिकारस्तान् दर्शयति निष्पाद्यन्त इति । स्वधर्मेषु प्रीतेषु अभिरतैः विशुद्धाचरणं स्नानादि-विहितं तदुपेतैः । पाठान्तरे विशुद्धाचरणात् अपेतैः निवृत्तैः सद्भि-र्भिः सन्मार्गगामिभिः विधिकर्म्यादिधर्माचारानुवर्तिभिः ॥ ९ ॥ अतो धर्माधिकारत्वात् मानुष्यं स्तौति, स्वर्गापवर्गौ इति । यच्चाभिरुचितं स्थानं ब्रह्मलोकादि ॥ १० ॥ तदेवं चातुर्वर्ण्यव्यवस्थितये ताः प्रजाः सृष्टाः सम्यक् श्रद्धा यः समाचारस्तस्मिन् प्रवणाः ॥ ११ ॥ चातु-र्वर्ण्यं व्यवस्थाप्यमाह यथेच्छेति द्वाभ्याम् । यथेच्छया आवासः निरि-

युगे च तासां मनसि शुद्धेऽन्तःसंस्थिते हरौ ।
शुद्धं ज्ञानं प्रपश्यन्ति विष्ण्वाख्यं येन तत्पदम् ॥ १३ ॥
ततः कालात्मको योऽसौ स चांशः कथितो हरेः ।
स पातयत्यघं घोरमल्पमल्पाल्पसारवत् ॥ १४ ॥
अधर्मबीजसम्भूतं तमोलोभसमुद्भवम् ।
प्रजासु तासु मैत्रेय ! रागादिकमसाधकम् ॥ १५ ॥
ततः सा सहजा सिद्धिस्तासां नातीव जायते ।
रसोल्लासादयश्चान्याः सिद्धयोऽष्टौ भवन्ति याः ॥ १६ ॥

अन्त्यादिस्थानं, तस्मिन् निरताः । यतः सर्वबाधाभिः शीतोष्णादि-द्वन्द्वाभिर्विवर्जिताः । शुद्धाः सत्कुलीनाः ॥ ११ ॥ तासां शुद्धं ज्ञानं भवति येन ज्ञानेन तत्पदं प्रपश्यन्ति ॥ १२ ॥ तदेवं धर्मानुष्ठानफलम् उक्तम् । इदानीं कालवशेन तद्वैषम्यात् प्राणिनामनिष्टप्राप्तिमाह, तत इत्यादिना । ततः त्रेतायुगे किञ्चिदतिक्रान्ते सति स प्रसिद्धः कालात्मको योऽसौ हरेरंशः कथितः स अघं पापं रागादिकं विषयाभिलाषद्वेषमात्सर्यादिकम् असाधकं पुरुषार्थप्रतिबन्धकं तासु प्रजासु पातयति प्रतिक्षिपति इति द्वयोरन्वयः । कथंभूतं, घोरं बहुदुःखदम् अल्पाल्पसारवत् अल्पाल्पशः यद्वा अल्पाल्पबलम् उत्पत्तिसमय एव धृतिमता पुंसा जेतुं शक्यम् ॥ १४ ॥ अनन्तरं तु अधर्मस्य बीजभूतं तस्य हेतुस्तमोऽभिनिवेशः लोभस्तृष्णा तयोः समुद्भवो यस्मात् तत् ॥ १५ ॥ अतः किम् इत्यत आह तत इति । सहजा स्वाभाविकी या सिद्धिः सर्वबाधाविवर्जिता इति उक्ता क्षुत्पिपासादिद्वन्द्वजयलक्षणा नातीव जायते । रसोल्लासादयः सिद्धयः स्कान्दादिप्रोक्ताः "रसस्य स्वत उल्लासश्च स्यात् कृते युगे । रसोल्लासाख्या सा सिद्धिः तया हन्ति क्षुधं नरः । स्त्र्यादिनिरपेक्षेण सदा तृप्ताः प्रजास्तथा । द्वितीया सिद्धिरुद्दिष्टा सा सिद्धिर्नित्यकर्मणः । धर्मोत्तमत्वमाख्याता सा तृतीयाभिधीयते । चतुर्थी तुल्यता तासामायुषः सुखरूपयोः । ऐकान्त्यबल-

तासु क्षीणास्वशेषासु वर्द्धमाने च पातके ।
द्वन्द्वाभिभवदुःखार्त्तास्ता भवन्ति ततः प्रजाः ॥ १७ ॥
ततो दुर्गाणि ताश्चक्रुर्धान्वं पार्वतमौदकम् ।
कृत्रिमञ्च तथा दुर्गं पुरं खर्वटकादिकम् ॥ १८ ॥
गृहाणि च यथान्यायं तेषु चक्रुः पुरादिषु ।
शीतातपादिबाधानां प्रशमाय महामुने ! ॥ १९ ॥
प्रतीकारमिदं कृत्वा शीतादेस्ताः प्रजाः पुनः ।
वार्त्तोपायं ततश्चक्रुर्हस्तसिद्धिञ्च कर्म्मजाम् ॥ २० ॥
व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिलाः ।

साक्षात्त्वं विशोका नाम पञ्चमी । परमात्मपरत्वेन तपोध्यानादिनिष्ठता । षष्ठी निष्कामचारित्वं स्वधर्म्मैः सिद्धिरुच्यते । अष्टमी च तथा प्रोक्ता यत्र क्वचन शायिता" इति ॥ १६ ॥ शीतोष्णादिद्वन्द्वैरभिभवात् दुःखैः आर्त्ताः पीडिताः ॥ १७ ॥ ततः चौरादिभयपरिहारार्थं दुर्गाणि शीतादिप्रतीकारार्थञ्च गृहाणि जीविकार्थञ्च कृषिवाणिज्यादीनि चक्रुरित्याह । ततो दुर्गाणि इत्यादिना । कृत्रिमं परिखाद्यावृत प्राकारादि । पुरादीनां लक्षणं भृगुणोक्तम् "सपादक्रोशः पुरी प्रोक्ता त्रिशां पुरमथोच्यते । एकतो यत्र तु ग्रामो नगरञ्चैकतः स्थितम् । मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयम् । विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति ते । स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च । पण्यक्रयादिनिपुणैर्वास्तुभिर्वणिजैर्युतम् । अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम् । सर्वदैवतसम्बद्धं नगरन्त्वभिधीयते" इति ॥ १८ ॥ गृहाणि च विश्वकर्म्मोक्तानि "ध्रुवं धन्यं जयं कान्तं विपुलं विजयं तथा । सुमुखं दुर्मुखं सिद्धमथ मनोरमम्" इत्यादीनि यथान्यायं स्वधर्म्मविभागानुसारेण यथा वास्तुलक्षणम् ॥ १९ ॥ वार्त्तोपायं जीविकासाधनं कृष्यादि, हस्तसिद्धिं हस्ताभ्यां साध्यां सिद्धिं शिल्पम् । तांश्च एवाह वार्त्तेयां यद् यत् कर्म्मनिष्पाद्यम् ॥ २० ॥ तत्र कृषिफलं प्रपञ्चयति, व्री-

प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीनकाः ॥ २१ ॥

माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढक्यश्चणकाश्चैव शणाः सप्तदश स्मृताः ॥ २२ ॥

इत्येताश्चौषधीनान्तु ग्राम्याणां जातयो मुने ! ।
ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ॥ २३ ॥

व्रीहयः सयवा माषा गोधूमा अणवस्तिलाः ।
प्रियङ्गुसप्तमा ह्येता अष्टमास्तु कुलत्थकाः ॥ २४ ॥

श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ।
तथा वेणुयवाः प्रोक्तास्तद्वन् मर्कटका मुने ! ॥ २५ ॥

ग्राम्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्दश ।
यज्ञनिष्पत्तये यज्ञस्तथासां हेतुरुत्तमः ॥ २६ ॥

एताश्च सह यज्ञेन प्रजानां कारणं परम् ।
परापरविदः प्राज्ञास्ततो यज्ञान् वितन्वते ॥ २७ ॥

ह्युदाराश्चेति सार्द्धाध्यायम् । धान्याः षड्जातयः । प्रियङ्गुसहितं सप्त-धान्यम् । प्रियङ्गवः कङ्गवः । उदारा दीर्घनाला । कोरदूषाः कोद्रवाः । चीनकाः कङ्गुतुल्याः ॥ २१ ॥ निष्पावाः शिम्बाः । आढक्यस्तु वर्य्यः शणाः गोणसूत्रोपादानत्वचः । इत्येता ग्राम्याणां ओषधीनां जातयः सप्तदश ॥ २२ ॥ तासु व्रीह्याद्याः श्यामाकान्ता एकोनदश यज्ञियाः यज्ञसाधनभूताः । आरण्याः नीवाराद्याः पञ्च यज्ञसाधन-भूताः । अथवा श्यामाका ग्राम्यारण्या एव तद्धान्यरूपत्वात् ॥२३॥२४॥ नीवारा आरण्या व्रीहयः । जर्त्तिलाः आरण्यास्तिलाः । गवेधुका कुरुण्डवरबीजाः । वेणुयवाः वेणुबीजानि, मर्कटकाः आरण्याः प्रियङ्गवः ॥ २५ ॥ एतासामुद्भवो यज्ञनिष्पत्तये सृष्टा इत्यन्वयः । यज्ञश्च आसाम् ओषधीनां हेतुः वृष्टिद्वारेण ॥ २६ ॥ प्रजानां परं कारणं स्थितिहेतुत्वात् । परापरविदो, यज्ञाः कारणं प्रजास्तु कार्य्यम् इत्येवं-

अहन्यहन्यनुष्ठानं यज्ञानां मुनिसत्तम ! ।
उपकारकरं पुंसां क्रियमाणस्य शान्तिदम् ॥ २८ ॥
येषान्तु कालरूपोऽसौ पापविन्दुर्महामते ! ।
चेतःसु ववृधे, चक्रुस्ते न यज्ञेषु मानसम् ॥ २९ ॥
वेदवादांस्तथा वेदान् यज्ञनिष्पादकञ्च यत् ।
तत् सर्वं निन्दमानास्ते यज्ञव्यासेधकारिणः ॥ ३० ॥
प्रवृत्तिमार्गव्युच्छित्तिकारिणो वेदनिन्दकाः ।
दुरात्मानो दुराचारा बभूवुः कुटिलाशयाः ॥ ३१ ॥
समिद्धायान्तु वार्त्तायां प्रजाः सृष्ट्वा प्रजापतिः ।
मर्य्यादां स्थापयामास यथास्थानं यथागुणम् ॥ ३२ ॥
वर्णानामाश्रमाणाञ्च धर्म्मान् धर्म्मभृतां वर ! ।
लोकांश्च सर्ववर्णानां सम्यग् धर्म्मानुपालिनाम् ॥ ३३ ॥
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ।

दिवः ॥ २७ ॥ अहन्यहनि पञ्चमहायज्ञानाम् अनुष्ठानं मनुष्याणां क्रियमाणस्य पञ्चसूनाजन्यस्य पापस्य शान्तिदं नाशकम् ॥ २८ ॥ तदेवं अकृष्टपच्यानां ग्राम्यारण्यानां ओषधीनां कृष्यादिप्रवृत्त्या प्रवाहनित्यत्वमुक्तम् । यज्ञानाञ्च दृष्टादृष्टफलत्वं महत् फलम् उक्तम् । तथापि तेषां केषाञ्चिदननुष्ठाने पूर्वोक्तपापमेव रागादिकं कारणमाह, येषां त्विति । ते यज्ञेषु मानसं न चक्रुः ॥ २९ ॥ यज्ञानां व्यासेधकारिणः प्रतिबन्धकाः ॥ ३० ॥ अत एव प्रवृत्तिमार्गोच्छेदकारिणः । यज्ञाननुष्ठाने देवैश्वर्य्याद्यभावेन प्रजापतेरपि विरोधिनः ॥ ३१ ॥ तदेवं प्रजाः सृष्ट्वा तासां वार्त्तायां कृष्यादिना सिद्धायां सत्यां यथागुणं सत्त्वोद्रेकाद्यनुसारेण ब्राह्मणादीनां वर्णानां ब्रह्मचर्य्याद्याश्रमाणाञ्च मर्य्यादां धर्म्मव्यवस्थां यथास्थानं तत् तत् स्वधर्म्मस्थानानुसारेण लोकव्यवस्थाञ्च कृतवान् इत्यर्थः ॥ ३२ ॥ तदेवाह वर्णानाम् इति यावत् समाप्तिः ॥ ३३ ॥ क्रियावतां

स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वनिवर्त्तिनाम् ॥ ३४ ॥
वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तिनाम् ।
गान्धर्वं शूद्रजातीनां परिचर्य्यानुवर्त्तिनाम् ॥ ३५ ॥
अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् ।
स्मृतं तेषां महत्स्थानं तदेव गुरुवासिनाम् ॥ ३६ ॥
सप्तर्षीणान्तु यत् स्थानं स्मृतं तद् वै वनौकसाम् ।
प्राजापत्यं गृहस्थानां न्यासिनां ब्रह्मसंज्ञितम् ॥ ३७ ॥
योगिनाममृतं स्थानं यद् विष्णोः परमं पदम् ।
एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये ॥ ३८ ॥
तेषां तत् परमं स्थानं यत् तु पश्यन्ति सूरयः ।
गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्य्यादयो ग्रहाः ॥ ३९ ॥
अद्यापि न निवर्त्तन्ते द्वादशाक्षरचिन्तकाः ।
तामिस्रमन्धतामिस्रं महारौरवरौरवौ ॥ ४० ॥
असिपत्रवनं घोरं कालसूत्रमवीचिमत् ।
विनिन्दकानां वेदस्य यज्ञव्याघातकारिणाम् ।
स्थानमेतत् समाख्यातं स्वधर्मत्यागिनश्च ये ॥ ४१ ॥

नित्यनैमित्तिकाग्निहोत्रादि कुर्वतां प्राजापत्यं स्थानं पितृलोकः । "कर्मणा पितृलोकः" इति श्रुतेः ॥ ३४ ॥ मारुतं स्थानं देवलोकः ॥ ३५ ॥ गुरुवासिनां नैष्ठिकब्रह्मचारिणां जनलोकम् ॥ ३६ ॥ वनौकसां वानप्रस्थानां तपोलोकम् । ब्राह्मणादीनां विशेषं वक्तुं गृहस्थानां पूर्वोक्तमेव स्थानं अनुवदति प्राजापत्यम् इति । न्यासिनां ब्रह्मसंज्ञितं ब्रह्मलोकाख्यम् । "ब्रह्मत्वाद् ब्राह्मणः स्थानम्" इति वचनात् ॥ ३७ ॥ योगिनां ध्यानिनाम् । तदेव स्पष्टयति एकान्तिन इति ॥ ३८ ॥ भगवदुपासकानामपि क्रममुक्त्या तदेव स्थानम् इत्याशयेनाह गत्वा गत्वेति ॥ ३९ ॥ ४० ॥ स्वधर्मत्यागिनश्च ये तेषामपि वा ॥ ४१ ॥

सप्तमोऽध्यायः ।

पराशर उवाच ।

ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ।
तच्छरीरसमुत्पन्नैः कार्य्यैस्तैः कारणैः सह ॥ १ ॥
क्षेत्रज्ञाः समवर्त्तन्त गात्रेभ्यस्तस्य धीमतः ।
ते सर्वे समवर्त्तन्त ये मया प्रागुदीरिताः ॥ २ ॥
देवाद्याः स्थावरान्ताश्च त्रैगुण्यविषये स्थिताः ।
एवम्भूतानि सृष्टानि चराणि स्थावराणि च ॥ ३ ॥
यदास्य ताः प्रजाः सर्वा न व्यवर्द्धन्त धीमतः ।
अथान्यान् मानसान् पुत्रान् सदृशानात्मनोऽसृजत् ॥ ४ ॥
भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा ।
मरीचिं दक्षमत्रिञ्च वशिष्ठञ्चैव मानसम् ॥ ५ ॥

अथ मौनसृष्टं वक्ष्यन् पूर्वोक्तायां मानसशरीरसृष्टौ कञ्चिद् विशेषं वक्तुमाह तत इति त्रिभिः । प्रागनुक्तविशेषोक्तेः तत इति अपूर्वसृष्टिवत् प्रस्तावः । ननु एवं यद्युच्यते, ननु मनसा संकल्पमात्रेण भूतोपादानं विना भौतिकानां देहानां कथं जन्म कथं वा तस्मात् शरीरात् चेतनानां जन्म इति तत्राह, तच्छरीरेति तस्य ब्रह्मणः शरीरात् समुत्पन्नैः कार्य्यैर्देहैः कारणैः इन्द्रियैश्च सह मनसा निमित्तभूतेन मानस्यः प्रजा जज्ञिरे ब्रह्मशरीरसम्भूतानि एव तद्देहानाम् उपादानकारणम् इत्यर्थः ॥ १ ॥ तस्य धीमतः चेतनस्य समष्टिजीवस्य तस्य ब्रह्मणो गात्रेभ्योऽपि मानसैस्तैरुत्पद्यमानैर्देहैः सह संकल्पमात्रादुद्बुद्धसंस्कारा व्यष्टिक्षेत्रज्ञाः समवर्त्तन्त आविर्भूता इत्यर्थः । तान् दर्शयन् ते सर्वे इति ॥ २ ॥ ३ ॥ मौनसृष्टेः प्रयोजनमाह यदास्येति । न व्यवर्द्धन्त पुत्रपौत्रादिक्रमेण वृद्धिं न प्राप्ताः । अथ अन्यान् मौनसृष्टिप्रवर्त्तकान्

नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ।
सनन्दनादयो ये च पूर्वं सृष्टास्तु वेधसा ॥ ६ ॥
न ते लोकेष्वसज्जन्त निरपेक्षाः प्रजासु ते ।
सर्वे ते चागतज्ञाना वीतरागा विमत्सराः ॥ ७ ॥
तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः ।
ब्रह्मणोऽभून्महाक्रोधस्त्रैलोक्यदहनक्षमः ॥ ८ ॥
तस्य क्रोधात् समुद्भूतज्वालामालाविदीपितम् ।
ब्रह्मणोऽभूत् तदा सर्वं त्रैलोक्यमखिलं मुने ! ॥ ९ ॥
भ्रुकुटीकुटिलात् तस्य ललाटात् क्रोधदीपितात् ।
समुत्पन्नस्तदा रुद्रो मध्याह्नार्कसमप्रभः ॥ १० ॥
अर्द्धनारीनरवपुः प्रचण्डोऽतिशरीरवान् ।
विभजात्मानमित्युक्त्वा तं ब्रह्मान्तर्दधे ततः ॥ ११ ॥
तथोक्तोऽसौ द्विधा स्त्रीत्वं पुरुषत्वं तथाकरोत् ।
बिभेद पुरुषत्वञ्च दशधा चैकधा च सः ॥ १२ ॥

भृग्वादीन् सृष्टवान् ॥ ४ ॥ ५ ॥ आत्मनः सदृशान् इति बहुवचनं नादेव ब्रह्मणमात्मत्वया दर्शयति । नव ब्रह्माण इति क्रोधात् रुद्रसृष्टिं तत्रैव वक्तुसृष्टिं वक्तुं ब्रह्मणः क्रोधे कारणं दर्शयन्नाह सनन्दनादय इति ॥ ६ ॥ आगतज्ञानाः प्राप्तज्ञानाः पाठान्तरे अनागतेऽपि सर्वे ज्ञानं येषाम् ॥ ७ ॥ एवं तेषु प्रजास्रष्टौ निरपेक्षेषु महात्मनः सृष्टिविस्तारं महत्तया ब्रह्मण क्रोधोऽभूत् ॥ ८ ॥ तस्य ब्रह्मणः क्रोधसमुद्भूतानां ज्वालानां मालाभिरभितो दीपितं त्रैलोक्यम् अभूत् इत्यन्वय ॥ ९ ॥ १० ॥ अर्द्धमर्धं नारी च नरश्च वपुर्यस्य सः । प्रचण्डः अतिक्रोधनः । आत्मानं स्त्रीपुरुषाकारदेहं विभज, पृथक् कुरु इति तम् उक्त्वा अन्तर्दधे ततः ॥ ११ ॥ १२ ॥ सौम्यासौम्यैः इत्यस्यैव विवरणं

सौम्यासौम्यैस्तथा शान्ताशान्तैः स्त्रीत्वञ्च स प्रभुः ।
बिभेद बहुधा देवः स्वरूपैरसितैः सितैः ॥ १३ ॥
ततो ब्रह्मात्मसम्भूतं पूर्वं स्वायम्भुवं प्रभुः ।
आत्मानमेव कृतवान् प्रजापाल्ये मनुं द्विज ! ॥ १४ ॥
शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे विभुः ॥ १५ ॥
तस्माच्च पुरुषाद्देवी शतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ प्रसूत्याकूतिसंज्ञितम् ॥ १६ ॥
कन्याद्वयञ्च धर्म्मज्ञ ! रूपौदार्य्यगुणान्वितम् ।
ददौ प्रसूतिं दक्षाय तथाकूतिं रुचेः पुरा ॥ १७ ॥
प्रजापतिः स जग्राह तयोर्ज्जज्ञे सदक्षिणः ।
पुत्रो यज्ञो महाभाग ! दाम्पत्यं मिथुनं ततः ॥ १८ ॥
यज्ञस्य दक्षिणायान्तु पुत्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवे मनौ ॥ १९ ॥
प्रसूत्याञ्च तथा दक्षश्चतस्रो विंशतिस्तथा ।
ससर्ज्ज कन्यास्तासान्तु सम्यङ्नामानि मे शृणु ॥ २० ॥

शान्ताशान्तैरूपैरिति ॥ १३ ॥ तत एवाद्य विभागतः स्त्रीपुंसे निर्मिते सति वाच्यवाचकभावं पूर्वम् आत्मनः स्वदेहात् सम्भूतम् अतएव "आत्मा वै पुत्रनामासि" इति श्रुतेः, आत्मानम् एव तं मनुं प्रजापालनार्थम् अकरोत् इत्यर्थः ॥ १४ ॥ तां स्वदेहार्द्धभूतां नारीं पत्नीत्वे जगृहे तपसा निर्धूतकल्मषाम् इति च देव इति च विभुरिति च वाचिकत्रय-दोषपरिहारार्थमुक्तम् ॥ १५ ॥ व्यजायत प्रसूता ॥ १६ ॥ १७ ॥ स च रुचिः तां जग्राह । तयोर्दक्षिणायज्ञौ यज्ञो मिथुनम् एव पुत्रौ जज्ञाते ॥ १८ ॥ स्वायम्भुवे मनौ तन्मन्वन्तरे यामा इति देवाः ख्याता·

श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदश ॥२१॥
पत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः ।
ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ॥ २२ ॥
ख्यातिः सत्यथ सम्भूतिः स्मृतिः प्रीतिः क्षमा तथा ।
सन्नतिश्चानसूया च ऊर्ज्जा स्वाहा स्वधा तथा ॥ २३ ॥
भृगुर्भवो मरीचिश्च तथा चैवाङ्गिरा मुनिः ।
पुलस्त्यः पुलहश्चैव क्रतुश्चर्षिवरस्तथा ॥ २४ ॥
अत्रिर्वशिष्ठो वह्निश्च पितरश्च यथाक्रमम् ।
ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तम ! ॥ २५ ॥
श्रद्धा कामं चला दर्पं नियमं धृतिरात्मजम् ।
सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरसूयत ॥ २६ ॥
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ॥ २७ ॥
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ।
सुखं सिद्धिर्यशः कीर्त्तिरित्येते धर्मसूनवः ॥ २८ ॥
कामान्नन्दा सुतं हर्षं धर्मपौत्रमसूयत ।

ख्याताः ॥ १९ ॥ २० ॥ तासां नामानि वक्ष्यन् एव तिस्राश्चानाह श्रद्धा इत्यादि षड्भिः ॥ २१ ॥ २२ ॥ २५ ॥ धर्मपत्नीनां त्रयोदशानां सुतानाह, श्रद्धा इति त्रिभिः । चला लक्ष्मीः ॥ २६ ॥ क्रिया त्रिगुणा अतः तमोऽंशेन दण्डं रजोऽंशेन नयं सत्त्वांशेन विनयम् धर्मोल्लङ्घनम् असूयत । लज्जा शारीरं विनयं, वपुः संस्काराव- धानात्मकं प्रजज्ञे ॥ २७ ॥ कीर्त्तिर्यशःसंज्ञं सुतम् असूयत ॥ २८ ॥ नन्दा कामस्य भार्य्या । तदेवं धर्मभार्य्याणां वंशा उक्ताः । अन्यासां

हिंसा भार्या त्वधर्मस्य तस्यां जज्ञे तथानृतम्।
कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥ २९ ॥
माया च वेदना चैव मिथुनं त्विदमेतयोः।
तयोर्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥ ३० ॥
वेदना स्वसुतं चापि दुःखं जज्ञेऽथ रौरवात्।
मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे ॥ ३१ ॥
दुःखोत्तराः स्मृता ह्येते सर्वे चाधर्मलक्षणाः।
नैषां भार्यास्ति पुत्रो वा ते सर्वे ह्यूर्ध्वरेतसः ॥ ३२ ॥
रौद्राण्येतानि रूपाणि विष्णोर्मुनिवरात्मज।
नित्यप्रलयहेतुत्वं जगतोऽस्य प्रयान्ति वै ॥ ३३ ॥

दक्षकन्यानां पुत्रान् 'देवौ धातृविधातारौ भृगोः ख्यातिरसूयत' इत्यादिना उत्तराध्याये वक्ष्यति। तत्र तावद् धर्मवंशोक्त्या तद्विपरीतयोनितया च बुद्धिस्थस्य अधर्मस्य वंशं प्रसङ्गात् प्रसङ्गेन च नित्यप्रलयात्मकम् आह हिंसा इत्यादिना। धर्माधर्मौ च ब्रह्मणः पुत्रौ। "धर्मः स्तनाद् दक्षिणतो यत्र नारायणः स्वयम्। अधर्मः पृष्ठतो यस्माद् मृत्युर्लोकभयङ्करः" इति श्रुतोक्तेः। निकृतिश्चानृतं ताभ्याम् अनृतनिकृतिभ्यां भयनरकाख्यं पुत्रद्वयं जज्ञे ॥ २९ ॥ एतयोस्तु भयनरकयोर्यथाक्रमं माया च वेदना च इति मिथुनमपत्यादिकं भार्यादिकञ्च ताभ्यामेव जज्ञे इत्यर्थः। तयोर्मायावेदनयोर्मध्ये माया मृत्युं जज्ञे जनयामास भयात् इति अर्थविवरम् ॥ ३० ॥ वेदना च दुःखं स्वसुतं स्वकीयं सुतं रौरवात् नरकात् जनयामास इत्यर्थः ॥ ३१ ॥ दुःखोत्तरा दुःखोदर्का यतोऽधर्मलक्षणाः पापरूपाः। यद्वा प्राचीनाधर्मलक्षणाः तत्फलत्वात् एषां व्याध्यादीनाम्। ऊर्ध्वरेतसः भार्यापुत्रादिरहिताः परमदुःखभोगात्मकत्वात् ॥ ३२ ॥ रौद्राणि तामसानि यतो जगतो

दक्षो मरीचिरत्रिश्च भृग्वाद्याश्च प्रजेश्वराः ।
जगत्यत्र महाभाग ! नित्यसर्गस्य हेतवः ॥ ३४ ॥
मनवो मनुपुत्राश्च भूपा वीर्यधनाश्च ये ।
सन्मार्गाभिरताः शूरास्ते नित्यस्थितिकारिणः ॥ ३५ ॥

मैत्रेय उवाच ।

येयं नित्या स्थितिर्ब्रह्मन् ! नित्यसर्गस्तथेरितः ।
नित्याभावाश्च तेषां वै स्वरूपं मम कथ्यताम् ॥ ३६ ॥

पराशर उवाच ।

सर्गस्थितिविनाशांश्च भगवान् मधुसूदनः ।
तैस्तै रूपैरचिन्त्यात्मा करोत्यव्याहतान् विभुः ॥ ३७ ॥
नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज !
नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः ॥ ३८ ॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः ।
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥ ३९ ॥
ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि ।
नित्यः सदैव जातानां यो विनाशो दिवानिशम् ॥ ४० ॥

निन्दधनवेहत्वं प्रयाति ॥ ३३ ॥ नित्यप्रलयहेतुत्वप्रकरणात् नित्यसर्ग-नित्यस्थितिहेतुत्वमाह दक्ष इति द्वाभ्याम् ॥ ३४ ॥ ३५ ॥ ननु मन्वादीनां कार्यचतुर्णां कथं नित्यस्थित्यादिहेतुत्वम् इत्याशयेन पृच्छति, येयमिति । नित्या भावाः नित्यप्रलयाः ॥ ३६ ॥ तैस्तैः दक्षादिमन्वादिरूपैर्भगवान् एव सर्गादीन् करोति, अतो न कश्चिदोषप्रसङ्ग इत्यर्थः । अव्याहतान् अप्रतिहतान् ॥ ३७ ॥ तत्र प्रलयचतुष्टये प्रथमं भवति नैमित्तिक इति विधिः ॥ ३८ ॥ यच्छेते यदा शेते ब्रह्मदिवावसाननिमित्तो नैमित्तिकः । ब्रह्माण्डं यदा प्रकृतौ लयं प्रयाति स प्राकृतिक इत्यर्थः ॥ ३९ ॥ ज्ञानात्

प्रसूतिः प्रकृतेर्या तु सा सृष्टिः प्राकृती स्मृता ।
दैनन्दिनी तथा प्रोक्ता यान्तरप्रलयादनु ॥ ४१ ॥
भूतान्यनुदिनं यत्र जायन्ते मुनिसत्तम ! ।
नित्यः सर्गः स तु प्रोक्तः पुराणार्थविचक्षणैः ॥ ४२ ॥
एवं सर्वशरीरेषु भगवान् भूतभावनः ।
संस्थितः कुरुते विष्णुरुत्पत्तिस्थितिसंयमान् ॥ ४३ ॥
सृष्टिस्थितिविनाशानां शक्तयः सर्वदेहिषु ।
वैष्णव्यः परिवर्त्तन्ते मैत्रेयाहर्निशं सदा ॥ ४४ ॥
गुणत्रयमयं ह्येतद् ब्रह्मन् ! शक्तित्रयं महत् ।
योऽतियाति स यात्येव परं नावर्त्तते पुनः ॥ ४५ ॥

परमात्मनि योगिनो यत्र आत्यन्तिकः सदैव दीपस्येवाभावात् शान्तत्वेन जातानां दिवानिशं यो विनाशः स नित्यः ॥ ४० ॥ त्रिविधां सृष्टिम् आह, प्रसूतिरिति । महाप्रलयावसाने प्रकृतेः सकाशाद् या महदादि-प्रसूतिः सा प्राकृती सृष्टिः । अवान्तरप्रलयाद् अनन्तरं या चराचर-सृष्टिः सा दैनन्दिनी ॥ ४१ ॥ भूतानीति । अहरहर्दृष्टिप्रकाशो नित्य-सर्ग इत्यर्थः आत्यन्तिकप्रलयवत् आत्यन्तिकसृष्टेरभावात् सृष्टिस्त्रिविधैव ॥ ४२ ॥ उपसंहरति एवमिति ॥ ४३ ॥ ननु विष्णोः सर्वशरीरेषु सर्वदा स्थितत्वात् कालभेदेन उत्पत्त्यादयो न स्युः तत्राह सृष्टीति । तथापि विष्णुशक्तीनां सत्त्वादीनां तत्र तत्र कालभेदेन समुदाचारात् नायं दोष इति भावः ॥ ४४ ॥ यस्मात् त्रिगुणात्मकविष्णुशक्तित्रयपरिवृत्त्या सृष्ट्यादिप्रवाहो भवति अतो गुणातीतस्य न पुनरावृत्तिप्रवाहपात इत्याह, गुणत्रयेति योऽतियाति अतिक्रामति स परं पदं याति एव "न पुनरावर्त्तते" इति श्रुतेः ॥ ४५ ॥

अष्टमोऽध्यायः ।

पराशर उवाच ।

कथितस्तामसः सर्गो ब्रह्मणस्ते महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥ १ ॥
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः ।
प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः ॥ २ ॥
रुदन् वै सुस्वरं सोऽथ द्रवंश्च द्विजसत्तम ! ।
किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच ह ॥ ३ ॥
नाम देहीति तं सोऽथ प्रत्युवाच प्रजापतिम् ।
रुद्रस्त्वं देव ! नाम्नासि मा रोदीर्धैर्यमावह ॥ ४ ॥
एवमुक्तः पुनः सोऽथ सप्तकृत्वो रुरोद वै ।
ततोऽन्यानि ददौ तस्मै सप्त नामानि वै प्रभुः ।
स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च वै प्रभुः ॥ ५ ॥

देवतामानुषमिश्रसर्गौ तत्प्रतियोगितया बुद्धिस्थत्वात् प्रसङ्गाच्च निरूपयन्नेव तामसं ब्रह्मसर्गमुक्त्वा इदानीं तदनुषङ्गेणैव प्रस्तुतं दक्षकन्यान्वयमनुवर्णयितुं तत्कन्यापरिणेतुर्नीललोहितरुद्रस्य सर्गमाह, कथित इति । यद्यपि "ख्यातिः सत्यथ सम्भूतिः" इत्यत्र परेषामेव स्थितेरन्वयः प्रथमं वक्तुं युक्तः तथापि तत्कथा अतिविततत्वात् अनन्तरं वक्ष्यते । यद्वा पौर्वापर्यात् तामसत्वाद् रुद्रसर्गात् अनन्तरं सोऽयं कुमारसर्गान्तर्भूतः सात्त्विको रुद्रसर्गः, तमपि इमं शृणु इति सम्बन्धः ॥ १ ॥ रुदन् द्रवंश्च प्रादुरासीद् इति रुद्रनामनिरुक्तिः । "रोदनात् द्रवणाच्चैव रुद्रो नाम्नेति विश्रुतः" इति वायूक्तेः ॥ २ ॥ ३ ॥ हे देव ! त्वं रुद्रोऽसि रोदनाद् द्रावणाच्च इत्यर्थः ॥ ४ ॥ परमेश्वरस्यापि सतो रोदनादि—विप्रलम्भनार्थं लीलयैवं प्रकाश विभूपारतन्त्र्यद्योतनार्थम् ।

भवं शर्व्वं महेशानं तथा पशुपतिं द्विज ! ।
भीममुग्रं महादेवम् उवाच स पितामहः ॥ ६ ॥
चक्रे नामान्यथैतानि स्थानान्येषां चकार सः ।
सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥ ७ ॥
सुवर्च्चला तथैवोमा सुकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ॥ ८ ॥
सूर्य्यादीनां नरश्रेष्ठ ! रुद्राद्यैर्नामभिः सह ।
पत्न्यः स्मृता महाभाग ! तदपत्यानि मे शृणु ।
येषां सूतिप्रसूतैर्वा इदमापूरितं जगत् ॥ ९ ॥
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः स्वर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुताः ॥ १० ॥

अत एव आचार्य्यत्वात् रोदनादिनिमित्तत्वात् रोदनादिनामो-पाधिभेदात् अष्टनाम इत्युच्यते ॥ ५ ॥ अन्यानि सप्त नामानि ददौ इत्युक्तं, तानि एवाह, भवमिति । तं भवादिनामानम् उवाच तस्य भवादिनामानि कृतवान् इत्यर्थः ॥ ६ ॥ तदेवाह चक्रे नामानीति । रुद्रभवादीनां सूर्य्यादीनि अष्टस्थानानि । तान्येव अभिव्यक्तिस्थानत्वात् तनवो मूर्त्तय उच्यन्ते । दीक्षितो ब्राह्मण इति स्वधर्मानुष्ठानादि क्षेत्रज्ञो यजमानाभिव्यक्तमात्मस्थितत्वम् । "स्वात्मा तस्याष्टमी मूर्त्तिः शिवस्य परमात्मनः । व्यापिकेतरमूर्त्तीनां विश्वं तस्मात् शिवात्मकम् । स्वात्मेत्येतेषु ये रुद्रं ध्यायन्ति प्रणमन्ति च । तेषामष्टतनुर्देवो ददाति परमं पदम्" इति वायूक्तेः । सूर्य्यो जलं मही वायुर्वह्निरिति क्रमो द्रष्टव्यः । तथा सति सुवर्च्चलादीनां पत्नीनां यथाक्रमं सम्बन्धः । वायोः शिवा पत्नी, वह्नेः स्वाहेति विख्याता, वक्ष्यमाणेऽपि पुत्रक्रमे पञ्चमः स्कन्दः पुत्र इति सम्प्रदायवित्, अतो वह्निर्वायुरिति पाठक्रमो न विवक्षितः ॥ ७ ॥ ८ ॥

एवम्प्रकारो रुद्रोऽसौ सतीं भार्य्यामविन्दत ।
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ॥ ११ ॥
हिमवद्दुहिता साभूत् मेनायां द्विजसत्तम ! ।
उपयेमे पुनश्चोमाम् अनन्यां भगवान् भवः ॥ १२ ॥
देवौ धाताविधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥ १३ ॥

मैत्रेय उवाच ।

क्षीराब्धौ श्री समुत्पन्ना श्रूयतेऽमृतमन्थने ।
भृगोः ख्यातां समुत्पन्नेत्येतदाह कथं भवान् ? ॥१४॥

पराशर उवाच ।

नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ! ॥ १५ ॥
अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः ।
बोधो विष्णुरियं बुद्धिर्धर्मोऽसौ सत्क्रिया त्वियम् ॥१६॥


सन्तप्तैः पुंभिः पीत्वादिभिः ॥९॥ १० ॥ उक्तस्य रुद्रसर्गस्य प्रस्तुतोप-योगमाह, एवम्प्रकार इति सतीं नाम दक्षस्य कन्यां दक्षकोपात् पित्रा दक्षेण स्वयज्ञे रुद्रस्यानाह्वानात् अवमानात् मनःसन्तापादिति भावः ॥ ११ ॥ अनन्यां भर्त्रन्तरविमुखाम् ॥ १२ ॥ श्रीः नारायणस्य पत्नी या तां श्रियं चासूयत ॥ १३ ॥ प्रश्नः स्पष्टार्थः ॥ १४ ॥ उत्तरश्लोके भावः । तस्या उत्पत्तिमत्त्वे भवेदयं विरोधः । नित्याया एव सर्वगतायाः सत्या स-हायाश्च विष्णुवल्लभायाः कार्यवशेन विष्णोरिव आविर्भावमात्रम्, अतः पूर्वं भृगुसुतात्वेन आविर्भूताया दुर्वासःशापेन च तिरोभूतायाः पुनः क्षीराब्धौ आविर्भावो न विरुध्यत इति यद् एतदाह, नित्यैव इत्या-दिना सार्द्धश्लोकत्रयेणापि ॥ १५ ॥ लक्ष्मीनारायणयोः सर्वात्म-कत्वं तथा तयोरुपासनार्थं प्रपञ्चयति । अर्थो विष्णुरित्यादि सार्द्ध-

स्रष्टा विष्णुरियं सृष्टिः श्रीर्भूमिर्भूधरो हरिः ।
सन्तोषो भगवान् लक्ष्मीस्तुष्टिर्मैत्रेय ! शाश्वती ॥ १७ ॥
इच्छा श्रीर्भगवान् कामो यज्ञोऽसौ दक्षिणा तु सा ।
आज्याहुतिरसौ देवी पुरोडाशो जनार्द्दनः ॥ १८ ॥
पत्नीशाला मुने ! लक्ष्मीः प्राग्वंशो मधुसूदनः ।
चितिर्लक्ष्मीर्हरिर्यूपः इध्मा श्रीर्भगवान् कुशः ॥ १९ ॥
सामस्वरूपो भगवान् उद्गीतिः कमलालया ।
स्वाहा लक्ष्मीर्जगन्नाथो वासुदेवो हुताशनः ॥ २० ॥
शङ्करो भगवान् शौरिर्भूतिर्गौरी द्विजोत्तम ! ।
मैत्रेय ! केशवः सूर्य्यस्तत्प्रभा कमलालया ॥ २१ ॥
विष्णुः पितृगणः पद्मा स्वधा शाश्वततुष्टिदा ।
द्यौः श्रीः सर्वात्मको विष्णुरवकाशोऽतिविस्तरः ॥ २१ ॥
शशाङ्कः श्रीधरः कान्तिः श्रीस्तस्यैवानपायिनी ।
धृतिर्लक्ष्मीर्जगच्चेष्टा वायुः सर्वत्रगो हरिः ॥ २३ ॥
जलधिर्द्विज ! गोविन्दस्तद्वेला श्रीर्महामते ! ।
लक्ष्मीस्वरूपमिन्द्राणी देवेन्द्रो मधुसूदनः ॥ २४ ॥

ध्यानवर्णाप्ति । वाणी अर्थाभिधायिका वाक् इयं श्रीः । नीतिर्दण्ड-नीतिरपि, श्रीः, नयः सामाद्युपायः । बोधः आत्मप्रकाशः, बुद्धिस्तद-भिव्यञ्जिका धीवृत्तिः । धर्मोऽपूर्वं, सत्क्रिया तद्गतिः ॥ १६ ॥ भूधरो गिरिर्भूपतिर्वा । यज्ञस्याङ्गभेदः यज्ञ प्रस्तवः । सन्तोषः तृष्णानि-वृत्तिः ॥ १७ ॥ इच्छा धर्मादिकामना, कामस्तद्भोगाभिलाषः ॥ १८ ॥ चितिश्चित्तिर्देवाध्ययनम् ॥ १९ ॥ सामस्वरूपो रथन्तरादिगानरूपः । उद्-गीतिस्तद्गानव्यापारः । हुताशनो वासुदेवः, स्वाहा च लक्ष्मीः ॥२०॥ ॥ २१ ॥ द्यौः श्रीः, अवकाशो विष्णुः ॥ २२ ॥ धृतिः सर्वधारणादिधारणं, अमन्दं च लक्ष्मीः, तन्मूलो वायुर्हरिः ॥ २३ ॥ २४ ॥ भूयोभी

यमश्चक्रधरः साक्षाद् धूमोर्णा कमलालया ।
ऋद्धिः श्रीः श्रीधरो देवः स्वयमेव धनेश्वरः ॥ २५ ॥
गौरी लक्ष्मीर्महाभागा केशवो वरुणः स्वयम् ।
श्रीर्देवसेना विप्रेन्द्र ! देवसेनापतिर्हरिः ॥ २६ ॥
अवष्टम्भो गदापाणिः शक्तिर्लक्ष्मीर्द्विजोत्तम ! ।
काष्ठा लक्ष्मीर्निमेषोऽसौ मुहूर्त्तोऽसौ कला तु सा ॥ २७ ॥
ज्योत्स्ना लक्ष्मीः प्रदीपोऽसौ सर्वः सर्वेश्वरो हरिः ।
लताभूता जगन्माता श्रीर्विष्णुर्द्रुमसंस्थितः ॥ २८ ॥
विभावरी श्रीर्दिवसो देवश्चक्रगदाधरः ।
वरप्रदो वरो विष्णुर्वधूः पद्मवनालया ॥ २९ ॥
नदस्वरूपी भगवान् श्रीर्नदीरूपसंस्थितिः ।
ध्वजश्च पुण्डरीकाक्षः पताका कमलालया ॥ ३० ॥
तृष्णा लक्ष्मीर्जगत्स्वामी लोभो नारायणः परः ।
रतिरागौ च धर्मज्ञ ! लक्ष्मीर्गोविन्द एव च ॥ ३१ ॥
किञ्चातिबहुनोक्तेन संक्षेपेणेदमुच्यते ।
देवतिर्य्यङ्मनुष्यादौ पुन्नाम्नि भगवान् हरिः ।
स्त्रीनाम्नि लक्ष्मीर्मैत्रेय ! नानयोर्विद्यते परम् ॥ ३२ ॥

यमस्य भार्य्या । धनेश्वरः कुवेरः, ऋद्धिस्तस्य पत्नी ॥ २५ ॥ वरुणस्य भार्य्यापि गौरीसंज्ञा ॥ २६ ॥ अवष्टम्भः पुरुषकारः, शक्तिस्तत्सामर्थ्यम् ॥ २७ ॥ ज्योत्स्ना प्रभा, दीपो हरिः हरेर्विशेषणं सर्वः सर्वेश्वरश्चेति । द्रुमरूपः संस्थितः, लताया आश्रयः ॥ २८ ॥ वधूर्भार्य्या, वरः पतिः ॥ २९ ॥ ३० ॥ रतस्ततः पुरुषपादिरूपा तृष्णा, तत्प्राप्त्यर्थं-प्रयत्नोऽपि लोभः । रागः कामः, रतिस्तत्सुखम् ॥ ३१ ॥ अनयोरन्यां परमन्यत् न विद्यते ॥ ३२ ॥



नवमोऽध्यायः।

परापर उवाच।

इदञ्च शृणु मैत्रेय! यत्पृष्टोऽहमिह त्वया।
श्रीसम्बद्धं मयाप्येतत् श्रुतमासीत् मरीचितः॥ १॥
दुर्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम्।
स ददर्श स्रजं दिव्याम् ऋषिर्विद्याधरीकरे॥ २॥
सन्तानकानामखिलं यस्या गन्धेन वासितम्।
अतिसेव्यमभूद् ब्रह्मन्! तद्वनं वनचारिणाम्॥ ३॥
उन्मत्तव्रतधृग्विप्रस्तां दृष्ट्वा शोभनां स्रजम्।
तां ययाचे वरारोहां विद्याधरवधूं ततः॥ ४॥
याचिता तेन तन्वङ्गी मालां विद्याधराङ्गना।
ददौ तस्मै विशालाक्षी सादरं प्रणिपत्य च॥ ५॥

तदेवं मैत्रेयकृताक्षेपपरिहारार्थं सर्वोत्कर्षप्रपञ्चनेन विष्णोरिव लक्ष्म्या अपि नित्यत्वमुक्तम्, इदानीम् आविर्भावतिरोभावाभ्यां तदुक्तं विरोधं परिहर्तुमाह इदञ्चेत्यादिना। पूर्वं भृगुसुता सतीत्वेन ग्रन्थेन। भृगुसुतापि श्रीरियं क्षीराब्धौ जाता इत्युच्यते इदञ्च शृणु। मयापि एवमेव वसिष्ठद्वारेण मरीचेः सकाशात् एतत् श्रुतमासीत्॥ १॥ तत्र प्रथमं भृगुसुतायाः लक्ष्म्यास्तिरोधाने कारणं वक्तुमाह दुर्वासा इति। शङ्करस्यांश इत्यनेन तस्य शापदाने सामर्थ्यं च अपराधासहिष्णुत्वञ्चोक्तम्। सन्तानो देवतरुः, तदीयानां पुष्पाणां स्रजं मालाम्। यस्याः गन्धेन वासितं तद् वनं वनचारिणाम् अतिसेव्यम् अभूत्॥ २॥
॥ ३॥ उन्मत्तव्रतधृग्योगिनो हि जडोन्मत्तपिशाचा इव वर्तन्ते।

तामादायात्मनो मूर्ध्नि स्रजमुन्मत्तरूपधृक् ।
कृत्वा स विप्रो मैत्रेय ! परिबभ्राम मेदिनीम् ॥ ६ ॥
स ददर्श समायान्तम् उन्मत्तैरावतस्थितम् ।
त्रैलोक्याधिपतिं देवं सह देवैः शचीपतिम् ॥ ७ ॥
तामात्मनः स शिरसः स्रजमुन्मत्तषट्पदाम् ।
आदायामरराजाय चिक्षेपोन्मत्तवन्मुनिः ॥ ८ ॥
गृहीत्वामरराजेन स्रगैरावतमूर्द्धनि ।
न्यस्ता रराज कैलासशिखरे जाह्नवी यथा ॥ ९ ॥
मदान्धकारिताक्षोऽसौ गन्धाकृष्टेन वारणः ।
करेणाघ्राय चिक्षेप तां स्रजं धरणीतले ॥ १० ॥
ततश्चुक्रोध भगवान् दुर्वासा मुनिसत्तमः ।
मैत्रेय ! देवराजं तं क्रुद्धश्चैतदुवाच ह ॥ ११ ॥
ऐश्वर्यमत्त ! दुष्टात्मन् ! अतिस्तब्धोऽसि वासव ।
श्रियो धामस्रजं यस्त्वं मद्दत्तां नाभिनन्दसि ॥ १२ ॥
प्रसाद इति नोक्तं ते प्रणिपातपुरःसरम् ।
हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता ॥ १३ ॥
मया दत्तामिमां मालां यस्मान्न बहु मन्यसे ।
त्रैलोक्य श्रीरतो मूढ़ ! विनाशमुपयास्यति ॥ १४ ॥

तां स्रजं मूर्ध्नि कृत्वा मेदिनीं परिबभ्राम इत्यन्वयः ॥६।७॥ ऐरावतमूर्द्धनि न्यस्ता सा च कैलासशिखरे जाह्नवी इव रराज ॥ ९ ॥ मदेन अन्धकारिते ज्ञानाच्छादिते अक्षिणी यस्य सः करेण आघ्राय इति करिणः करस्यैव घ्राणत्वात् ॥ १० ॥ ११ ॥ अतिस्तब्धोऽसि गर्वितोऽसि श्रियो धाम श्रीनिवासभूताम् ॥ १२ ॥ ते त्वया हर्षेण उत्फुल्लौ विकसितौ कपोलौ यस्य तथाभूतेन सता त्वया ॥ १३ ॥ त्रैलोक्यश्रीरत

मां मन्यसेऽन्यैः सदृशं नूनं शक्र ! भवान् द्विजैः ।
अतोऽवमानमस्माकं मानिना भवता कृतम् ॥ १५ ॥
मद्दत्ता भवता यस्मात् क्षिप्ता माला महीतले ।
तस्मात् प्रनष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति ॥ १६ ॥
यस्य संजातकोपस्य भयमेति चराचरम् ।
स त्वं मामतिगर्वेण देवराजावमन्यसे ॥ १७ ॥

पराशर उवाच ।

महेन्द्रो वारणस्कन्धादवतीर्य्य त्वरान्वितः ।
प्रसादयामास तदा दुर्वाससमकल्मषम् ॥ १८ ॥
प्रसाद्यमानः स तदा प्रणिपातपुरःसरम् ।
प्रत्युवाच सहस्राक्षं दुर्वासा मुनिसत्तमः ॥ १९ ॥
नाहं कृपालुहृदयो न च मां भजते क्षमा ।
अन्ये ते मुनयः शक्र ! दुर्वाससमवेहि माम् ॥ २० ॥
गौतमादिभिरन्यैस्त्वं गर्वमापादितो मुधा ।
अक्षान्तिसारसर्वस्वं दुर्वाससमवेहि माम् ॥ २१ ॥

त्रैलोक्यैश्वर्यं विनाशय, अतो मालावज्ञमानाकरणदोषात् ॥१४॥१५॥ मत्तेन क्षिप्तायाः उपेक्षितत्वात् भवता एव क्षिप्ता इत्युक्तम् । तस्मात् मालायाः धरणीतले प्रक्षेपदोषात् । त्वदीयं त्रैलोक्यं प्रनष्टलक्ष्मीकं दारिद्र्याभिभूतं भविष्यति इति द्वितीयः शापः ॥ १६ ॥ १७ ॥ अननुनयं शापरोधनाभिः दोषाभावात् ॥ १८ ॥ १९ ॥ अन्ये ते मुनयः ये दयालवः । अहं तु न तथा ॥२०॥ तदेवाह, गौतमादिभिः अगम्यापराधेऽपि त्वयि दाक्षिण्येन अनुनयपरैः मुधा वृथैव गर्वं प्रापितोऽसि, अक्षान्तौ यः सारः क्षेपोपनयं, तदेव सर्वस्वं यस्य तं माम्॥२१॥

वसिष्ठाद्यैर्दयासारैः स्तोत्रं कुर्वद्भिरुच्चकैः ।
गर्वं गतोऽसि येनैवं मामप्यत्रावमन्यसे ॥ २२ ॥
ज्वलज्जटाकलापस्य भ्रुकुटीकुटिलं मुखम् ।
निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयम् ॥ २३ ॥
नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो ! ।
विडम्बनामिमां भूयः करोष्यनुनयात्मिकाम् ॥ २४ ॥

पराशर उवाच ।

इत्युक्त्वा प्रययौ विप्रा देवराजोऽपि तं पुनः ।
आरुह्यैरावतं ब्रह्मन् ! प्रययावमरावतीम् ॥ २५ ॥
ततः प्रभृति निःश्रीकं सशक्रं भुवनत्रयम् ।
मैत्रेयासीदपध्वस्तं संक्षीणौषधिवीरुधम् ॥ २६ ॥
न यज्ञाः संप्रवर्त्तन्ते न तपस्यन्ति तापसाः ।
न च दानादिधर्मेषु मनश्चक्रे तदा जनः ॥ २७ ॥
निःसत्त्वाः सकला लोका लोभाद्युपहतेन्द्रियाः ।
स्वल्पेऽपि हि बभूवुस्ते साभिलाषा द्विजोत्तम ! ॥ २८ ॥
यतः सत्त्वं ततो लक्ष्मीः सत्त्वं भूत्यनुसारि च ।
निःश्रीकाणां कुतः सत्त्वं विना तेन गुणाः कुतः ॥ २९ ॥

॥ २१ ॥ उच्चैरुच्चकैः स्तुवद्भिः, यद्वा उच्चकैरुन्नतैः शिरोभिरुच्चासनोपविष्टा मम स्तोत्रं कुर्वद्भिरित्यर्थः ॥ २२ ॥ एवं सति । ज्वलज्जटेति, मम मुखं निरीक्ष्य यो भयं न गतः स कः न कोऽपीत्यर्थः ॥ २३ ॥ विडम्बनाम् अवज्ञाम् ॥ २४ ॥२५॥ अपध्वस्तं नष्टप्रायम् ॥२६॥२७॥ निःसत्त्वाः धैर्यशून्याः । अतो लोभादिभिः उपहतेन्द्रियाः अतः स्वल्पेऽप्यर्थे साभिलाषाः ॥ २८ ॥ एतदेव उपपादयति यत इति । यतो यत्र यत्र धैर्यं तत्र लक्ष्मीः । सत्त्वं भूत्यनुसारि लक्ष्म्याः ऐश्वर्यानुसारि

बलशौर्य्याद्यभावश्च पुरुषाणां गुणैर्विना ।
लङ्घनीयः समस्तस्य बलशौर्य्यविवर्जितः ॥ १० ॥
भवत्यपध्वस्तमतिर्लङ्घितः प्रथितः पुमान् ।
एवमत्यन्तनिःश्रीके त्रैलोक्ये सत्त्ववर्जिते ॥ ११ ॥
देवान् प्रति बलोद्योगं चक्रुर्दैतेयदानवाः ।
लोभाभिभूता निःश्रीका दैत्याः सत्त्वविवर्जिताः ॥ १२ ॥
श्रिया विहीनैर्निःसत्त्वैर्देवैश्चक्रुस्ततो रणम् ।
विजितास्त्रिदशा दैत्यैरिन्द्राद्याः शरणं ययुः ॥ १३ ॥
पितामहं महाभागं हुताशनपुरोगमाः ।
यथावत् कथितो देवैर्ब्रह्मा प्राह ततः सुरान् ॥ १४ ॥

ब्रह्मोवाच ।

परापरेशं शरणं व्रजध्वमसुरार्दनम् ।
उत्पत्तिस्थितिनाशानामहेतुं हेतुमीश्वरम् ॥ १५ ॥
प्रजापतिपतिं विष्णुमनन्तमपराजितम् ।
प्रधानपुंसोरजयोः कारणं कार्य्यभूतयोः ॥ १६ ॥

लक्ष्म्याः यथानुवर्त्तित्वं एवं धैर्य्यलक्ष्म्योः परस्पराविनाभूतत्वात् श्रीविरहात् सत्त्वविरहितत्वाच्च, निःश्रीकत्वादिति । तेन सत्त्वेन विना गुणाः शौर्य्यादयः लक्ष्म्यभावाच्छौर्य्यादयः कुतः ॥ ९ ॥ ततोऽसमर्थपरपराभवाच्च भवेदिति । लङ्घनीयः अभिभाव्यः ॥ १० ॥ प्रथितः प्रख्यातः पुमान् परिलङ्घितः अपध्वस्तः सन् अपध्वस्तमतिः नष्टप्रज्ञो भवति ॥ ११ ॥ १२ ॥ रणं युद्धम् दुर्वासोऽपराधेन त्रैलोक्यस्य निःश्रीकत्वं प्राप्तम् अतस्त्रैलोक्यानुवर्त्तितया प्राप्तवदपि सह विपक्षेषु दैत्येषु देवेषु इव नातिप्रभूतम् इति दैत्यानां जय पराभूते ॥ १३ ॥ हुताशनपुरोगमा इति अग्नेर्दूतत्वात् पुरोगमत्वम् "अग्निर्देवानां दूत आसीत्" इति श्रुतेः ॥ १४ ॥ असदुत्पत्त्या-दीनां हेतुम् । अजयत् अजेयं अत एव निरतिशयम् ॥ १५ ॥ अजयोः

प्रवृत्तार्त्तिहरं विष्णुं स वः श्रेयो विधास्यति ।

एवमुक्त्वा सुरान् सर्वान् ब्रह्मा लोकपितामहः ।

क्षीरोदस्योत्तरं तीरं तैरेव सहितो ययौ ॥ ३७ ॥

स गत्वा त्रिदशैः सर्वैः समवेतः पितामहः ।

तुष्टाव वाग्भिरिष्टाभिः परावरपतिं हरिम् ॥ ३८ ॥

ब्रह्मोवाच ।

नमाम सर्वं सर्वेशमनन्तमजमव्ययम् ।

लोकधामधराधारमप्रकाशमभेदिनम् ॥ ३९ ॥

नारायणमणीयांसमशेषाणामणीयसाम् ।

समस्तानां गरिष्ठं यद् भूरादीनां गरीयसाम् ॥ ४० ॥

यत्र सर्वं यतः सर्वमुत्पन्नं मत्पुरःसरम् ।

सर्वभूतश्च यो देवः पराणामपि यः परः ॥ ४१ ॥

परः परस्मात् पुरुषात् परमात्मस्वरूपधृक् ।

कार्य्यभूतयोरिति अक्षरक्षितयोरपि तयोः सर्वाभिमुख्योदयत्वेन कार्य्यत्वम् ॥ ३६ ॥ उत्तरदिक्पार्श्वस्थं तीरं पर कूलमिति वा ॥ ३७ ॥ इष्टाभिः पूजिताभिः अपेक्षितार्थद्योतिकाभिरिति वा । परावराणाम् उत्कृष्टनिकृष्टानां सर्वजीवानां पतिम् ॥ ३८ ॥ नमाम इत्यत्र परस्मैपदोऽपि छान्दसः । सर्वं सर्वात्मकं सर्वेश्वरम् । लोके ये धामपराः प्रभाववन्तस्तेषाम् आधारम् इन्द्रादीनां प्रभावो यदायत्त इत्यर्थः । अभेदिनं निर्भेदम् अप्रकाशं अन्यैरिन्द्रियैरप्रकाश्यम् इत्यर्थः ॥ ३९ ॥ ४० ॥ यत्र सर्वं लीयते यत् अस्माकं च आद्यः पुमान् प्रभवति इति तृतीयेन अन्वयः । पराणाम् अपि अधिकोऽपि यः परः पुरुषः । तथा च श्रुतिः, "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः । अव्यक्त परमव्यक्तम् अव्यक्तात् पुरुषः परः" इति ॥ ४१ ॥ तस्मात् परस्मात् अव्यक्तमिति इतोऽपि कारणात्मकः पुरुषादपि यः परस्तस्मै

योगिभिश्चिन्त्यते योऽसौ मुक्तिहेतोर्मुमुक्षुभिः ॥ ४२ ॥
सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ।
स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥ ४३ ॥
कलाकाष्ठानिमेषादिकालसूत्रस्य गोचरे ।
यस्य शक्तिर्न शुद्धस्य प्रसीदतु स नो हरिः ॥ ४४ ॥
प्रोच्यते परमेशो हि यः शुद्धोऽप्युपचारतः ।
प्रसीदतु स नो विष्णुरात्मा यः सर्वदेहिनाम् ॥ ४५ ॥
यः कारणञ्च कार्य्यञ्च कारणस्यापि कारणम् ।
कार्य्यस्यापि च यः कार्य्यं प्रसीदतु स नो हरिः ॥ ४६ ॥
कार्य्यकार्य्यस्य यः कार्य्यं तत्कार्य्यस्यापि यः स्वयम् ।
तत्कार्य्यकार्य्यभूतो यस्ततश्च प्रणताः स्म तम् ॥ ४७ ॥
कारणं कारणस्यापि तस्य कारणकारणम् ।
तत्कारणानां हेतुं त्वां प्रणताः स्म सुरेश्वरम् ॥ ४८ ॥

अरूपस्य मूर्त्तिधारी अत एव योगिभिश्चिन्त्यते योऽसौ ॥ ४२ ॥ ४३ ॥ कलाकाष्ठानिमेषादिकाल एव सूत्रवत् सूत्रं, जगच्चेष्टानियामकत्वात् तस्य गोचरे विषये यस्य शक्तिर्महिमा न वर्त्तते स्वरूपाभिन्नत्वात् नित्यैव सा कालाधीना न भवतीत्यर्थः । अत एव तस्याः स्वरूपाभेदात् शुद्धस्य इत्युक्तम् ॥ ४४ ॥ ननु यदि परमेश्वरस्वरूपाभिन्ना कथं तर्हि ब्रह्माद्याः प्रतिपद्यन्ते, तत्राह, प्रोच्यत इति । परा प्राणो मा च लक्ष्मीः तयो ईशः परमेशो यः शुद्धः केवलोऽपि उपचारतो भेदविवक्षया प्रोच्यते । द्वितीयो यत् शब्दः प्रसिद्धौ ॥ ४५ ॥ ४६ ॥ पूर्वश्लोकार्थं प्रपञ्चयन्नि कार्य्यकार्य्यस्येति द्वाभ्याम् । प्रकृतिकार्य्यस्य महतो यत् कार्य्यमहङ्काराख्यं, तस्य कार्य्यं भूतसूक्ष्मवर्गः । तस्यापि कार्य्यं महाभूतवर्गः । तत्कार्य्यं ब्रह्माण्डम् । तस्य कार्य्यभूतो ब्रह्मदक्षादिवर्गः तत्र तत्पुत्रपौत्रादि-प्रपञ्चभूतो यः स्वयमेव, तं प्रणताः स्मेत्यर्थः ॥ ४७ ॥ तथा कारणम्

भोक्तारं भोज्यभूतञ्च स्रष्टारं सृज्यमेव च।
कार्यं कर्मस्वरूपं तं प्रणताः स्म परं पदम्॥ ४९ ॥
विशुद्धं बोधनं नित्यमजमक्षयमव्ययम्।
अव्यक्तमविकारं यत् तद्विष्णोः परमं पदम्॥ ५० ॥
न स्थूलं न च सूक्ष्मं यत् न विशेषणगोचरम्।
तत्पदं परमं विष्णोः प्रणमामः सदामलम्॥ ५१ ॥
यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता।
परं ब्रह्मस्वरूपं यत् प्रणमामस्तमव्ययम्॥ ५२ ॥
यन्न देवा न मुनयो न चाहं न च शङ्करः।
जानन्ति परमेशस्य तद्विष्णोः परमं पदम्॥ ५३ ॥

अव्याकृतादहङ्कारः, तस्य कारणं ब्रह्माण्डम्, तस्य कारणं महाभूतानि, तत्कारणं भूतसूक्ष्माणि, तत्कारणानाम् अहङ्कारमहत्तत्त्वानां हेतुं प्रधानभूतं प्रणताः स्म इत्यन्वयः। तदनन्तरमाभावात् प्रथमं क्रियाशक्तिरूपम् अनुपपन्नं। ततो ज्ञानशक्तिर्महत्तत्त्वं ततोऽहङ्कार इति प्रक्रियायां तत्कारणानाम् इत्यनेन बहुवचनान्तेन अहङ्कारमहत्तत्त्वयोर्ग्रहणम्। तदुक्तं "सत्त्वं रजस्तम इति निर्गुणस्य गुणाः" महाभूतानि प्रपद्यन्ते जीवम्" इति। यद्वा महत्त्वात् तत्कारणानाम् इति बहुवचनमाश्रित्य प्रकृतिपुरुषयोर् ईश्वर प्रणताः स्म इति योजनीयम् ॥ ४८ ॥ ४९ ॥ विशुद्धं बोधनं शुद्धं ज्ञानं ज्ञानस्वरूपं यत् शुद्धत्वं दर्शयति, अव्यक्तं यस्य विषयः तद् रूपतम् अविकारत्वमिति। तदुपपादयति, नित्यम् इत्यादिना। अव्यक्तमनाधारं तद् विष्णोः परमं पदं प्रणमाम इत्युत्तरेण अन्वयः ॥ ५० ॥ ५१ ॥ यस्य अविनश्वरस्य आयुतांशांशो मायाशक्तिलेशः तस्यांशो रजोगुणवर्तिनम् इयं विश्वरचनाशक्तिः स्थिता तं प्रणमाम इत्यत्र अपरस्तोत्रेऽपि अनुषङ्गः ॥ ५२ ॥

यद्योगिनः सदोद्युक्ताः पुण्यपापक्षयेऽक्षयम् ।
पश्यन्ति प्रणवे चिन्त्यं तद्विष्णोः परमं पदम् ॥ ५४ ॥
शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवादिकाः ।
भवन्त्यभूतपूर्वस्य तद्विष्णोः परमं पदम् ॥ ५५ ॥
सर्वेश ! सर्वभूतात्मन् ! सर्व ! सर्वाश्रयाच्युत ! ।
प्रसीद विष्णो ! भक्तानां व्रज नो दृष्टिगोचरम् ॥ ५६ ॥
इत्युदीरितमाकर्ण्य ब्रह्मणस्त्रिदशास्ततः ।
प्रणम्योचुः प्रसीदेति व्रज नो दृष्टिगोचरम् ॥ ५७ ॥
यन्नायं भगवान् ब्रह्मा जानाति परमं पदम् ।
तन्नताः स्म जगद्धाम तव सर्वगताच्युत ! ॥ ५८ ॥
इत्यन्ते वचसस्तेषां देवानां ब्रह्मणस्तथा ।
ऊचुर्देवर्षयः सर्वे बृहस्पतिपुरोगमाः ॥ ५९ ॥
आद्यो यज्ञपुमानीड्यो यः सर्वेषाञ्च पूर्वजः ।
तं नताः स्म जगत्स्रष्टुः स्रष्टारमविशेषणम् ॥ ६० ॥
भगवन् ! भूतभव्येश ! जगन्मूर्त्तिधराव्यय ! ।
प्रसीद प्रणतानां त्वं सर्वेषां देहि दर्शनम् ॥ ६१ ॥
एष ब्रह्मा तथैवायं सह रुद्रैस्त्रिलोचनः ।
सर्वादित्यैः समं पूषा पावकोऽयं सहाग्निभिः ॥ ६२ ॥

॥ ५४ ॥ पुण्यपापक्षये तदुपरतिलक्षणापगमे प्रणवे स्थितं [illegible]-विषयत्वात् [illegible] ॥ ५५ ॥ अभूतपूर्वस्य न भूतः कश्चिदपि पूर्वो यस्मात् । अनादेरित्यर्थः । "यस्मिञ्जातः परोऽन्योऽस्ति य आविवेश भुवनानि विश्वा" इति श्रुतेः ॥ ५६ ॥ मद्दर्वं स्तुत्वा प्रार्थयते सर्वेशेति ॥५६।५७॥ [illegible] [illegible] [illegible] [illegible] ॥ ५८ ॥ ६१ ॥ [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] ॥ ६२ ॥

अश्विनौ वसवश्चेमे सर्वे चैते मरुद्गणाः।
साध्या विश्वे तथा देवा देवेन्द्रश्चायमीश्वरः। ॥ ६३ ॥
प्रणामप्रवणा नाथ ! दैत्यसैन्यपराजिताः।
शरणं त्वामनुप्राप्ताः समस्ता देवतागणाः ॥ ६४ ॥

पराशर उवाच।

एवं संस्तूयमानस्तु भगवान् शङ्खचक्रधृक्।
जगाम दर्शनं तेषां मैत्रेय ! परमेश्वरः ॥ ६५ ॥
तं दृष्ट्वा ते तदा देवाः शङ्खचक्रगदाधरम्।
अपूर्वरूपसंस्थानं तेजसां राशिमूर्जितम् ॥ ६६ ॥
प्रणम्य प्रणताः पूर्वं संक्षोभस्तिमितेक्षणाः।
तुष्टुवुः पुण्डरीकाक्षं पितामहपुरोगमाः ॥ ६७ ॥

देवा ऊचुः।

नमो नमोऽविशेषस्त्वं त्वं ब्रह्मा त्वं पिनाकधृक्।
इन्द्रस्त्वमग्निः पवनो वरुणः सविता यमः ॥ ६८ ॥
वसवो मरुतः साध्या विश्वे देवगणा भवान्।
योऽयं तवागतो देव ! समीपं देवतागणः ॥ ६९ ॥
स त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान्।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः प्रजापतिः ॥ ७० ॥
विद्याविद्ये च सर्वात्मन् ! त्वन्मयञ्चाखिलं जगत्।
त्वामत्र शरणं विष्णो ! प्रयाता दैत्यनिर्जिताः ॥ ७१ ॥

॥ ६५ ॥ अपूर्वं रूपसंस्थानं देहिभ्यः अधिकमन्यो यस्य तम् ॥ ६६ ॥ पूर्वं प्रणता अपि भक्त्या पुनः प्रणम्य तुष्टुवुः ॥ ६७ ॥ अविशेषः शुद्धः परमात्मा। त्वं ब्रह्मादिरूपश्च त्वमेव ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

वयं, प्रसीद सर्वात्मन्! तेजसाप्याययस्व नः।
तावदार्त्तिस्तथा वाञ्छा तावन्मोहस्तथासुखम् ॥ ७२ ॥
यावन्नायाति शरणं त्वामशेषाघनाशनम्।
तत्प्रसादं प्रसन्नात्मन्! प्रपन्नानां कुरुष्व नः ॥ ७३ ॥
तेजसां नाथ! सर्वेषां स्वशक्त्याप्यायनं कुरु ॥ ७४ ॥

पराशर उवाच।

एवं संस्तूयमानस्त प्रणतैरमरैर्हरिः।
प्रसन्नदृष्टिर्भगवानिदमाह स विश्वकृत् ॥ ७५ ॥

श्रीभगवानुवाच।

तेजसो भवतां देवाः! करिष्याम्युपबृंहणम्।
वदाम्यहं यत् क्रियतां भवद्भिस्तदिदं सुराः! ॥ ७६ ॥
आनीय सहिता दैत्यैः क्षीराब्धौ सकलौषधीः।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ ७७ ॥
मथ्यताममृतं देवाः! सहाये मय्यवस्थिते।
सामपूर्वञ्च दैतेयास्तत्र साहाय्यकर्मणि ॥ ७८ ॥
सामान्यफलभोक्तारो यूयं वाच्या भविष्यथ।
मथ्यमाने च तत्राब्धौ यत् समुत्पद्यतेऽमृतम् ॥ ७९ ॥

तेजसा प्रभावादिना नोऽस्मान् आप्याययस्व वर्द्धय। आर्त्तिः पशुपीड़ा, असुखं दुःखम् ॥ ७२ ॥ ७३ ॥ आयत्त्या शक्त्या ॥ ७४ ॥ भगवान् इदमाह इत्यादिभिरन्वयतात्पर्योऽभिप्रायः। तदुक्तम् "एवं सर्वेश्वरः श्रीमान् सुरेशार्थं सुरेश्वरः। विष्णुर्नारायणानाम् पश्यन्नोक्तवानादिभिः" इति ॥ ७५ ॥ ७६ ॥ क्षीराब्धौ क्षिपन्तीति शेषः। नेत्रं मन्थनरज्जुम् ॥ ७७ ॥ अमृतं मथ्यतां मथनेन उद्धृतम् अनुपायसाधितमर्थः ॥ ७८ ॥ साम-पूर्वम् उपायविशेषपूर्वकं सामान्यं समानं यत् फलं तस्य भोक्तारो यूयम्

तत्प्रसादाद् बलिनो यूयममराश्च भविष्यथ ।
तथा चाहं करिष्यामि यथा त्रिदशविद्विषः ।
न प्राप्स्यन्त्यमृतं देवाः ! केवलं क्लेशभागिनः ॥ ८० ॥

पराशर उवाच ।

इत्युक्ता देवदेवेन सर्व एव ततः सुराः ।
सन्धानमसुरैः कृत्वा यत्नवन्तोऽमृतेऽभवन् ॥ ८१ ॥
नानौषधीः समानीय देवदैतेयदानवाः ।
क्षिप्त्वा क्षीराब्धिपयसि शरदभ्रामलत्विषि ॥ ८२ ॥
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा च वासुकिम् ।
ततो मथितुमारब्धा मैत्रेय ! तरसामृतम् ॥ ८३ ॥
विबुधाः सहिताः सर्वे यतः पुच्छं ततः कृताः ।
कृष्णेन वासुकेर्दैत्याः पूर्वकाये निवेशिताः ॥ ८४ ॥
ते तस्य फणनिःश्वासवह्निनापहृतत्विषः ।
निस्तेजसोऽसुराः सर्वे बभूवुरमितद्युते ! ॥ ८५ ॥
तेनैव मुखनिश्वासवायुनास्तबलाहकैः ।
पुच्छप्रदेशे वर्षद्भिस्तथा चाप्यायिताः सुराः ॥ ८६ ॥
क्षीरोदमध्ये भगवान् कूर्मरूपी स्वयं हरिः ।

भविष्यथ इति वाच्याः ॥ ७९ ॥ तर्हि तेऽपि तथा भविष्यन्तीति शङ्क-मानान् प्रत्याह तथा चेति । भो देवाः ! ते त्रिदशद्विषः केवलं क्लेशभागिनो यथा भविष्यन्ति तथा करिष्यामि ॥ ८० ॥ यत्नवन्तोऽमृतार्थम् ॥८१॥ शरदभ्रस्येव अमला त्विट् दीप्तिर्यस्य तस्मिन् ॥ ८२ ॥ तरसा वेगेन मथितुम् आरब्धाः । कर्मणि क्तः आरब्धवन्त इत्यर्थः ॥ ८३।८५ ॥ येन असुराणां दुःसहा वह्निरूपादिनः, तेनैव वासुकेर्मुखनिःश्वासवायुना अस्तबलाहकैः क्षिप्तमेघैः ॥८६॥ कूर्मात्मके अपि अवस्थित इति वक्ष्यमाणं तत्प्रसादाच्च

मन्थानाद्रेरधिष्ठानं भ्रमतोऽभून्महामुने ! ॥ ८७ ॥

रूपेणान्येन देवानां मध्ये चक्रगदाधरः ।

चकर्ष नागराजानं दैत्यमध्ये परेण च ॥ ८८ ॥

उपर्याक्रान्तवान् शैलं बृहद्रूपेण केशवः ।

तथापरेण मैत्रेय ! यन्न दृष्टं सुरासुरैः ॥ ८९ ॥

तेजसा नागराजानं तथाप्यायितवान् हरिः ।

अन्येन तेजसा देवान् उपबृंहितवान् विभुः ॥ ९० ॥

मथ्यमाने ततस्तस्मिन् क्षीराब्धौ देवदानवैः ।

हविर्धामाभवत् पूर्वं सुरभिः सुरपूजिता ॥ ९१ ॥

जग्मुर्मुदं ततो देवा दानवाश्च महामुने ! ।

व्याक्षिप्तचेतसश्चैव बभूवुस्तिमितेक्षणाः ॥ ९२ ॥

किमेतदिति सिद्धानां दिवि चिन्तयतां ततः ।

बभूव वारुणी देवी मदाघूर्णितलोचना ॥ ९३ ॥

कृतावर्तात् ततस्तस्मात् क्षीरोदाद् वासयन् जगत् ।

गन्धेन पारिजातोऽभूद् देवस्त्रीनन्दनस्तरुः ॥ ९४ ॥

रूपौदार्यगुणोपेतस्ततश्चाप्सरसां गणः ।

क्षीरोदधेः समुत्पन्नो मैत्रेय ! परमाद्भुतः ॥ ९५ ॥

ततः शीतांशुरभवद् जगृहे तं महेश्वरः ।

जगृहुश्च विषं नागाः क्षीरोदाच्च समुत्थितम् ॥ ९६ ॥

क्षीरोदमध्ये इति पाठान्तरम् ॥ ८७ ॥ ९० ॥ हविः क्षीरदध्यादिधर्मी आश्रयभूता ॥ ९१ ॥ व्याक्षिप्तचेतसः सङ्क्षोभादाकुलचेतसः ॥ ९२ ॥ वारुणी मदिराधिष्ठात्री देवी ॥ ९३ ॥ गन्धेनैव ... वासयन् ... ॥ ९४ ९५ ॥ विषञ्च ... नागा जगृहुः । ... "...मुत्थितम्" ... पाठेऽपि ...

ततो धन्वन्तरिर्देवः श्वेताम्बरधरः स्वयम् ।
बिभ्रत् कमण्डलुं पूर्णममृतस्य समुत्थितः ॥ ९७ ॥
ततः स्वस्थमनस्कास्ते सर्वे दैतेयदानवाः ।
बभूवुर्मुदिताः सर्वे मैत्रेय ! मुनिभिः सह ॥ ९८ ॥
ततः स्फुरत्कान्तिमती विकासिकमले स्थिता ।
श्रीर्देवी पयसस्तस्मादुत्थिता धृतपङ्कजा ॥ ९९ ॥
तां तुष्टुवुर्मुदा युक्ताः श्रीसूक्तेन महर्षयः ।
विश्वावसुमुखास्तस्या गन्धर्वाः पुरतो जगुः ॥ १०० ॥
घृताचीप्रमुखा ब्रह्मन् ! ननृतुश्चाप्सरोगणाः ।
गङ्गाद्याः सरितस्तोयैः स्नानार्थमुपतस्थिरे ॥ १०१ ॥
दिग्गजा हेमपात्रस्थम् आदाय विमलं जलम् ।
स्नापयाञ्चक्रिरे देवीं सर्वलोकमहेश्वरीम् ॥ १०२ ॥
क्षीरोदो रूपधृक् तस्यै मालामम्लानपङ्कजाम् ।
ददौ, विभूषणान्यङ्गे विश्वकर्मा चकार च ॥ १०३ ॥
दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेः ॥ १०४ ॥
तयावलोकिता देवा हरिवक्षःस्थलस्थया ।
लक्ष्म्या मैत्रेय ! सहसा परां निर्वृतिमागताः ॥ १०५ ॥
उद्वेगं परमं जग्मुर्दैत्या विष्णुपराङ्मुखाः ।
त्यक्ता लक्ष्म्या महाभाग ! विप्रचित्तिपुरोगमाः ॥ १०६ ॥

[illegible] मह। [illegible] इति ॥९६॥
[illegible] कमण्डलुं तेनैव पूर्णं बिभ्रत् समुत्थितः ॥ ९७ ॥ [illegible]
बभूवुः ॥९८।९९॥ श्रीसूक्तेन "हिरण्यवर्णाम्" इति बह्वृचपठितेन ॥१००॥

ततस्ते जगृहुर्दैत्या धन्वन्तरिकरे स्थितम् ।
कमण्डलुं महावीर्य्या यत्रास्ते तद् द्विजामृतम् ॥ १०७ ॥
मायया लोभयित्वा तान् विष्णुः स्त्रीरूपमास्थितः ।
दानवेभ्यस्तदादाय देवेभ्यः प्रददौ विभुः ॥ १०८ ॥
ततः पपुः सुरगणाः शक्राद्यास्तत् तदामृतम् ।
उद्यतायुधनिस्त्रिंशा दैत्यास्तांश्च समभ्ययुः ॥ १०९ ॥
पीतेऽमृते च बलिभिर्देवैर्दैत्यचमूस्तदा ।
वध्यमाना दिशो भेजे पातालं तु विवेश वै ॥ ११० ॥
ततो देवा मुदा युक्ताः शङ्खचक्रगदाभृतम् ।
प्रणिपत्य यथापूर्वम् अशासत त्रिविष्टपम् ॥ १११ ॥
ततः प्रसन्नभाः सूर्य्यः प्रययौ स्वेन वर्त्मना ।
ज्योतींषि च यथामार्गं प्रययुर्मुनिसत्तम ॥ ११२ ॥
जज्वाल भगवांश्चोच्चैश्चारुदीप्तिर्विभावसुः ।
धर्मे च सर्वभूतानां तदा मतिरजायत ॥ ११३ ॥
त्रैलोक्यञ्च श्रिया जुष्टं बभूव मुनिसत्तम ।
शक्रश्च त्रिदशश्रेष्ठः पुनः श्रीमानजायत ॥ ११४ ॥
सिंहासनगतः शक्रः सम्प्राप्य त्रिदिवं पुनः ।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः ॥ ११५ ॥

इन्द्र उवाच ।

नमस्ये सर्वभूतानां जननीमब्जसम्भवाम् ।

पश्यतां सर्वदेवानां तामूर्ध्वं धन्वन्तरेः ॥१०७॥ प्रसन्नभाः स्वच्छदीप्तिः सन् स्वेन वर्त्मना दक्षिणोत्तरायणनियमेन । ज्योतींषि तारागण-ग्रहादयो यथामार्गं वक्रातिचारं विना ॥ ११२ ॥ "दुर्वासःशाप-प्रभावेण सुमनोभिर्दत्तं यथा । इन्द्रसिंहासनः शक्रस्तुष्टाव श्रियमाब्जा

श्रियमुन्निद्रपद्माक्षीं विष्णोर्वक्षःस्थलस्थिताम् ॥ ११६ ॥
त्वं सिद्धिस्त्वं सुधा स्वाहा स्वधा त्वं लोकपावनि ।
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥ ११७ ॥
यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि ! त्वं विमुक्तिफलदायिनी ॥ ११८ ॥
आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्त्वमेव च ।
सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि ! पूरितम् ॥ ११९ ॥
का त्वन्या त्वामृते देवि ! सर्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥ १२० ॥
त्वया देवि ! परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥ १२१ ॥
दाराः पुत्रास्तथागारं सुहृद् धान्यधनादिकम् ।
भवत्येतन्महाभागे ! नित्यं त्वद्वीक्षणान्नृणाम् ॥ १२२ ॥

॥११५॥ नमस्ये नमामि सर्वभूतानां जननीं त्वाम् ॥ ११६ ॥ त्वं सिद्धिरणिमादिः। प्रभा दीप्तिः ॥११७॥ यज्ञविद्या कर्मविद्या। महाविद्या विश्वरूपासना। गुह्यविद्या तदुपायभूतदहराद्युपासनविद्या। आत्मविद्या ब्रह्मविद्या। एवं कर्मविद्यादिरूपेण विमुक्तिफलदायिनी त्वमेव ॥ ११८ ॥ किञ्च आन्वीक्षिकी तर्कविद्या त्वमेव। त्रयी वेदत्रयम्। वार्त्ता शिल्पवाणिज्यायुर्वेदादिः। दण्डनीतिः सामाद्युपायप्रतिपादकराजनीतिः। एवम् अन्यैरपि सौम्यासौम्यै रूपैस्त्वयैव एतत् जगत् पूरितम् ॥११९॥ अनन्तरं सौभाग्यं सर्वोत्कर्षं च दर्शयन्, का त्वित्ति। का पुनस्त्वदन्या गदाभृतो वपुरध्यास्ते ? तदङ्कमपि भजतीत्यर्थः ॥१२०॥ जगत्सृष्ट्यादिरूपेणोत्कर्षं तव दर्शयित्वाह, त्वयेति। समेधितं संवर्द्धितम् ॥१२१॥ सम्पत्तिं विभजित्वाह, दारा इति त्रिभिः ॥१२२॥

शरीरारोग्यमैश्वर्य्यमरिपक्षक्षयः सुखम् ।
देवि ! त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ १२३ ॥
त्वं माता सर्वभूतानां देवदेवो हरिः पिता ।
त्वयैतद् विष्णुना चाम्ब जगद् व्याप्तं चराचरम् ॥ १२४ ॥
मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम् ।
मा शरीरं कलत्रञ्च त्यजेथाः सर्वपावनि ! ॥ १२५ ॥
मा पुत्रान् मा सुहृद्वर्गं मा पशून् मा विभूषणम् ।
त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ! ॥ १२६ ॥
सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले ! ॥ १२७ ॥
त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
कुलैश्वर्य्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ १२८ ॥
स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रान्तो यस्त्वया देवि ! वीक्षितः ॥ १२९ ॥
सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ।
पराङ्मुखी जगद्धात्रि ! यस्य त्वं विष्णुवल्लभे ! ॥ १३० ॥
न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ।
प्रसीद देवि ! पद्माक्षि ! मास्मांस्त्याक्षीः कदाचन ॥ १३१ ॥

पराशर उवाच ।

एवं श्रीः संस्तुता सम्यक् प्राह देवी शतक्रतुम् ।

॥ १२५ ॥ कोशं धनं गोष्ठं गोस्थानं कोशादिकं त्यजेथाः । परिच्छदं परिच्छदम् ॥ १२६ ॥ १२८ ॥ त्वया च परित्यक्तानाम् अचिरं धनी- भाव, बहु इति । वैगुण्यं दोषत्वम् ॥ १३० ॥ [illegible] च योऽपि यस्य, [illegible] सर्वेश्वरेति [illegible] च न इति वेधसोऽपि

पश्यतां सर्वदेवानां सर्वभूतस्थिता द्विज ! ॥ १३२ ॥

श्रीरुवाच ।

परितुष्टास्मि देवेश ! स्तोत्रेणानेन ते हरे ! ।
वरं वृणीष्व यस्त्विष्टो वरदाहं तवागता ॥ १३३ ॥

इन्द्र उवाच ।

वरदा यदि मे देवि ! वरार्हो यदि वाप्यहम् ।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥ १३४ ॥
स्तोत्रेण यस्तथैतेन त्वां स्तोष्यत्यब्धिसम्भवे ! ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ १३५ ॥

श्रीरुवाच ।

त्रैलोक्यं त्रिदशश्रेष्ठ ! न सन्त्यक्ष्यामि वासव ! ।
दत्तो वरो मया यस्ते स्तोत्राराधनतुष्टया ॥ १३६ ॥
यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः ।
मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥ १३७ ॥

पराशर उवाच ।

एवं वरं ददौ देवी देवराजाय वै पुरा ।
मैत्रेय ! श्रीर्महाभागा स्तोत्राराधनतोषिता ॥ १३८ ॥
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः ।
देवदानवयत्नेन प्रसूतामृतमन्थने ॥ १३९ ॥
एवं यथा जगत्स्वामी देवदेवो जनार्दनः ।
अवतारं करोत्येष तथा श्रीस्तत्सहायिनी ॥ १४० ॥

स्थिता न यज्ञोऽन्यतः ॥ १३१ ॥ हरे ! इन्द्र ! ॥ १३३ ॥ मन्थन इत्यत्रोऽ-
प्यादरं निमथनम् प्रवक्ष्याम्यनपि तदुभयाराधनाय, अनोदियादि-
वादप्यावश्यकाप्ति ॥ १३९ ॥ तत्सहायिनी तदनुवर्तनशीला ॥ १४० ॥

पुनश्च पद्मादुद्भूता आदित्योऽभूद् यदा हरिः ।
यदा तु भार्गवो रामस्तदाभूद् धरणी त्वियम् ॥ १४१ ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥ १४२ ॥
देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम् ॥ १४३ ॥
यश्चैतत् शृणुयाद् जन्म लक्ष्म्या यश्च पठेन्नरः ।
श्रियो न विच्युतिस्तस्य गृहे यावत् कुलत्रयम् ॥ १४४ ॥
पठ्यते येषु चैवेह गृहेषु श्रीस्तवो मुने ।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ १४५ ॥
एतत् ते कथितं ब्रह्मन्! यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥ १४६ ॥

इति सकलविभूत्यवाप्तिहेतुः
स्तुतिरियमिन्द्रमुखोद्गता हि लक्ष्म्याः ।
अनुदिनमिह पठ्यते नृभिर्यै-
र्वसति न तेषु कदाचिदप्यलक्ष्मीः ॥ १४७ ॥

यदा हरिरादित्यो वामनोऽभूत् । भार्गवो जामदग्न्यः ॥१४१॥ कलहा-धारा कलह आधारो यस्याः सा कलहोऽपि तेषु न भवतीत्यर्थः ॥१४५॥

दशमोऽध्यायः ।

मैत्रेय उवाच ।

कथितं मे त्वया सर्वं यत् पृष्टोऽसि महामुने ! ।
भृगुसर्गात् प्रभृत्येष सर्गो मे कथ्यतां पुनः ॥ १ ॥

पराशर उवाच ।

भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीर्विष्णुपरिग्रहः ।
तथा धातृविधातारौ ख्यात्यां जातौ सुतौ भृगोः ॥ २ ॥
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ।
धातृविधात्रोस्ते भार्य्ये तयोर्जातौ सुतावुभौ ॥ ३ ॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः ।
ततो वेदशिरा जज्ञे प्राणस्यापि सुतं शृणु ॥ ४ ॥
प्राणस्य द्युतिमान् पुत्रो राजवांश्च ततोऽभवत् ।
ततो वंशो महाभाग ! विस्तारं भार्गवो गतः ॥ ५ ॥
पत्नी मरीचेः सम्भूतिः पौर्णमासमसूयत ।
विरजाः सर्वगश्चैव तस्य पुत्रौ महात्मनः ॥ ६ ॥

पुनश्च सुसर्गात् प्रभृति भृगुसुतादुपादपूर्वकमेव भृगोर्वंश वक्त-माह, अन्यथा पूर्वापरवंशाव्यवस्थाप्रतीतेरित्यर्थः ॥ १ ॥ ख्यातौ धातोः सुतावनुवदति धातोरिति । विष्णोः परिग्रहः पत्नी ॥ २ ॥ तयोर्धातृविधात्रोः प्राणो मृकण्डुश्चेति क्रमेण उभौ सुतौ जाता-वित्यन्वयः । प्राणस्य वेदशिरा जज्ञे इत्यन्वयः ॥ ३ ॥ ४ ॥ तस्यैव पुत्रान्तर-माह प्राणस्येति ॥ ५ ॥ तत्रैवं चतुर्विंशतितत्त्वसंख्यानां मध्ये महा-दीनां तत्त्वोद्भवानां धर्मभार्याणां वंशः कथितः । अथ मन्वन्तरेषु ख्यातिः सम्भूतिरित्यादीनां नवानां प्रजापतिभार्याणां मध्ये ख्याता भृगोर्वंशो निरूपितः । सम्भूत्यादिभार्याणां दक्षकोपात् वक्ष्यमाणा

वंशसंकीर्त्तने पुत्रान् वदिष्येऽहं तथोद्दिंश ! ।
स्मृतिश्चाङ्गिरसः पत्नी प्रसूता: कन्यकास्तथा ॥ ७ ॥
सिनीवाली कुहूश्चैव राका चानुमतिस्तथा ।
अनुसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् ॥ ८ ॥
सोमं दुर्वाससञ्चैव दत्तात्रेयञ्च योगिनम् ।
प्रीत्यां पुलस्त्यभार्य्यायां दत्तोलिस्तत्सुतोऽभवत् ॥ ९ ॥
पूर्वजन्मनि योऽगस्त्य: स्मृत: स्वायम्भुवेऽन्तरे ।
कर्दमश्चार्वरीयांश्च सहिष्णुश्च सुतत्रयम् ॥ १० ॥
क्षमा तु सुषुवे भार्य्या पुलहस्य प्रजापते: ।
क्रतोश्च सन्नतिर्भार्य्या बालखिल्यानसूयत ॥ ११ ॥
षष्टिर्यानि सहस्राणि यतीनामूर्ध्वरेतसाम् ।
अङ्गुष्ठपर्वमात्राणां ज्वलद्भास्करतेजसाम् ॥ १२ ॥
ऊर्ज्जायाञ्च वसिष्ठस्य सप्ताजायन्त वै सुता: ।
रजोगात्रोर्ध्वबाहुश्च सवनश्चानघस्तथा ॥ १३ ॥
सुतपा: शुक्र इत्येते सर्वे सप्तर्षयोऽमला: ।
योऽसावग्निरभिमानी ब्रह्मणस्तनयोऽग्रज: ॥ १४ ॥

यत्र देवत्वामीश्वरा मत्वा वंशो नाभूदित्याह उक्तम् । अत्र कश्यपादि मरीचिः संभूतां जातं वंशमाह पत्नी मरीचेरिति ॥ ६ ॥ वंशसंकीर्त्तन इति । मरीचेरेव कश्यपोऽन्यः पुत्रः, तत्पुत्रा विवस्वदादय इत्यभिप्र- यांशे चान्ते वंशकीर्त्तने वक्ष्ये । विवस्वतः वासुदेवादयः । वासुदेवस्य दक्षः प्रचेतसां दक्षादि तत्तत्पुत्राणां विस्तरतो वंशकीर्त्तने चतुर्थांशे वक्ष्ये । अत्र तु अत्रस्मात् पौर्वकालान्वयनामन्वयम् इत्यर्थः ॥ ७ ॥ ताः कन्या निर्दिशति सिनीवालीति ॥ ८ ॥ अग्न्यंशजात्तोये जन्मादे । अभिमानी अग्न्यभिमानी देवः, तस्य स्वरूपमाह ''ब्रह्मण-

तस्मात् स्वाहा सुतान् लेभे त्रीनुदारौजसो द्विज ।
पावकं पवमानञ्च शुचिञ्चापि जलाशिनम् ॥ १५ ॥
तेषान्तु सन्ततावन्ये चत्वारिंशच्च पञ्च च ।
एवमेकोनपञ्चाशद् वह्नयः परिकीर्त्तिताः ॥ १६ ॥
कथ्यन्ते वह्नयश्चैते पिता पुत्रत्रयञ्च यत् ।
पितरो ब्रह्मणा सृष्टा व्याख्याता ये मया तव ॥ १७ ॥
अग्निष्वात्ता बर्हिषदोऽनग्नयः साग्नयश्च ये ।
तेभ्यः स्वधा सुते जज्ञे मेनां वैधारिणीं तथा ॥ १८ ॥
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ।
उत्तमज्ञानसम्पन्ने सर्व्वैः समुदितैर्गुणैः ॥ १९ ॥
इत्येषा दक्षकन्यानां कथितापत्यसन्ततिः ।
श्रद्धावान् संस्मरन्नेताम् अनपत्यो न जायते ॥ २० ॥

तनयोऽग्रजः मुखादग्निरजायत" इति श्रुतेः ॥ १४ ॥ उदारौजसः अतितेजस्विनः । जलाशिनं सूर्य्यमस्मात् । तथा च श्रौतं "निर्मथ्यः पवमानः स्याद् वैद्युतः पावकः स्मृतः । यश्चासौ तपते सूर्य्यः शुचिरग्निरसौ स्मृतः" इति ॥ १५ ॥ तेषां सन्ततावन्ये प्रत्येकं पञ्चदश, एवं पञ्चचत्वारिंशद् वह्नयः । पिता ब्रह्मपुत्र एव तत्पुत्रत्रयं पावकादि । एवमेकोनपञ्चाशद् ॥ १७ ॥ अग्निष्वात्ता अनग्नयो जाताः । बर्हिषदः साग्नयो यज्वानः । "ये वा अयज्वानो गृहमेधिनः ते पितरोऽग्निष्वात्ताः, ये वै यज्वानस्ते पितरो बर्हिषदः" इति श्रुतेः ॥ १८ ॥ तयोर्विवाहादिकं न अभूद् ब्रह्मचर्य्येण स्थानात्, ते उभे इति ॥ १९ ॥ २० ॥

एकादशोऽध्यायः ।

पराशर उवाच ।

प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्रौ सुमहावीर्यौ धर्मज्ञौ कथितौ तव ॥ १ ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
अभीष्टायामभूद् ब्रह्मन् ! पितुरत्यन्तवल्लभः ॥ २ ॥
सुनीतिर्नाम या राज्ञस्तस्याभून् महिषी द्विज ! ।
स नातिप्रीतिमांस्तस्यां तस्यायाभूद् ध्रुवः सुतः ॥ ३ ॥
राजासनस्थितस्याङ्के पितुर्भ्रातरमाश्रितम् ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥ ४ ॥
प्रत्यक्षं भूपतिस्तस्याः सुरुच्या नाभ्यनन्दत ।
प्रणयेनागतं पुत्रमुत्सङ्गारोहणोत्सुकम् ॥ ५ ॥
सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पितुः पुत्रं तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥ ६ ॥

मनोः स्वायम्भुवः प्रोक्तः पुत्रवंशोऽधुनोच्यते । तत्राभ्यावधुवेनाथ ध्रुवस्य चरितं भवत् । मनोर्द्वौ पुत्रौ द्वे च कन्ये । तत्र कन्ययोर्वंश उक्तः । इदानीं पुत्रद्वयानुवादपूर्वकम् उत्तानपादवंशमाह, प्रियव्रतेत्यादिना ॥ १ ॥ तत्र सुरुचिः सुनीतिश्चेति द्वे भार्ये । तत्र सुरुच्याम् अभीष्टायां प्रेयस्याम् उत्तमो नाम सुतोऽभूत् ॥ २ ॥ राजासनस्थितस्य पितुरङ्कम् उत्सङ्गम् आश्रितं भ्रातरम् उत्तमं दृष्ट्वा तदङ्कम् आरोढुं ध्रुवो मनोरथं चक्रे इत्यन्वयः ॥ ४ ॥ सुरुच्याः प्रेयस्याः प्रत्यक्षं समक्षं तत्प्रत्ययभयात् ध्रुवं न अभ्यनन्दत् ॥ ५ ॥ तं ध्रुवं पितुरङ्का-रोहणोत्सुकं दृष्ट्वा तथा अङ्कमेव तदङ्कारूढं दृष्ट्वा सुरुचिरब्रवीत् इत्यन्वयः

क्रियते किं वृथा वत्स! महानेष मनोरथः।
अन्यस्त्रीगर्भजातेन असम्भूय ममोदरे ॥ ७ ॥
उत्तमोत्तममप्राप्यम् अविवेकोऽभिवाञ्छसि।
सत्यं सुतस्त्वमप्यस्य किन्तु न त्वं मया धृतः। ८ ॥
एतद् राजासनं सर्वभूभृत्संश्रयकेतनम्।
योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया ॥ ९ ॥
उच्चैर्मनोरथस्तेऽयं मत्पुत्रस्येव किं वृथा।
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते ॥ १० ॥

पराशर उवाच।

उत्सृज्य पितरं बालस्तत् श्रुत्वा मातृभाषितम्।
जगाम कुपितो मातुर्निजाया द्विज! मन्दिरम् ॥ ११ ॥
तं दृष्ट्वा कुपितं पुत्रम् ईषत्प्रस्फुरिताधरम्।
सुनीतिरङ्कमारोप्य मैत्रेयैतदभाषत ॥ १२ ॥
वत्स! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति।
कोऽवजानाति पितरं तव यस्तेऽपराध्यते ॥ १३ ॥

॥ ६ ॥ सुरुच्या दुर्वचनम् आकर्णयन्तो ध्रुवः क्रोधितं पितरं विहाय मातुः समीपं गत्वा दुःखिततयास्तस्या अनुमत्या पुरात् निर्गत्य सप्तर्षीणाम् उपदेशेन मधुवने भगवन्तम् आराध्य सर्वोत्तमं पदं प्राप्त इति क्रमेण कथयितुम् सुरुच्या गर्वोक्तिमाह, क्रियते किमिति चतुर्भिः ॥ ७ ॥ अविवेको मन्दमतिः ॥ ८ ॥ एतद् राजासनं सर्वभूभृतां संश्रयस्य चक्रवर्त्तिनः केतनं स्थानं मत्पुत्रस्यैव योग्यं, न हि राजपुत्रतामात्रेण लभ्यम् एतत् किन्तु मद्गर्भसम्भवत्वेनैव लभ्यम् ॥ ९ ॥ अतस्तव अस्मदुच्चैः मत्पुत्रस्येवोच्चैर्मनोरथो वृथैव, सुनीतिगर्भोत्थत्वात् ॥ १० ॥ यस्ते अपराध्यति अपराधं करोति, स तव पितरमेव अवजानाति। स एवंभूतः कः?

पराशर उवाच ।

इत्युक्तः सकलं मात्रे कथयामास तद् यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमपि गर्विता ॥ १४ ॥
विनिःश्वस्येति कथिते तस्मिन् पुत्रेण दुर्मनाः ।
श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत् ॥ १५ ॥

सुनीतिरुवाच ।

सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्रक ! ।
न हि पुण्यवतां वत्स ! सपत्नैरेवमुच्यते ॥ १६ ॥
नोद्वेगस्तात ! कर्त्तव्यः कृतं यद् भवता पुरा ।
तत् कोऽपहर्त्तुं शक्नोति दातुं कश्चाकृतं त्वया ॥ १७ ॥
राजासनं तथा छत्रं वराश्वा वरवारणाः ।
यस्य पुण्यानि तस्यैते मत्वैतत् शाम्य पुत्रक ! ॥ १८ ॥
अन्यजन्मकृतैः पुण्यैः सुरुच्या सुरुचिर्नृपः ।
भार्य्येति प्रोच्यते चान्या मद्विधा भाग्यवर्ज्जिता ॥१९॥
पुण्योपचयसम्पन्नस्तस्याः पुत्रस्तथोत्तमः ।
मम पुत्रस्तथा जातः स्वल्पपुण्यो ध्रुवो भवान् ॥ २० ॥
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक ! ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥ २१ ॥
यदि वा दुःखमत्यर्थं सुरुच्या वचसा तव ।
तत्पुण्योपचये यत्नं कुरु सर्वफलप्रदे ॥ २२ ॥

इत्यर्थः ॥ १४ ॥ तस्मिन् सुरुच्या वचसि कथिते सति पाठेन वाक्पुष्पेण घाते क्षते ऽपि दुःखे मेत्रे बभूवुः ॥ १५ ॥ उद्वेगः क्षोभः ॥ १७ ॥ एतत् सर्वं अपपुण्य प्राप्य उपशमं भज ॥ १८ ॥ सुरुच्याः वचः सुरुचिः अतिप्रीतिमत्त्वात् । अतिशया कारवी तु विपक्षं भार्य्येति प्रोच्यते ॥ १९ ॥

सुशीलो भव धर्मात्मा मैत्रः प्राणिहिते रतः।
निम्नं यथापः प्रवणा पात्रमायान्ति सम्पदः॥ २३॥

ध्रुव उवाच।

अम्ब! यत् त्वमिदं प्राह प्रशमाय वचो मम।
नैतद् दुर्वचसा भिन्ने हृदये मम तिष्ठति॥ २४॥
सोऽहं तथा यतिष्यामि यथा सर्वोत्तमोत्तमम्।
स्थानं प्राप्स्याम्यशेषाणां जगतामपि पूजितम्॥ २५॥
सुरुचिर्दयिता राज्ञस्तस्या जातोऽस्मि नोदरात्।
प्रभावं पश्य मेऽम्ब! त्वं वृद्धस्यापि तवोदरे॥ २६॥
उत्तमः स मम भ्राता यो गर्भे न धृतस्त्वया।
स राजासनमाप्नोतु पित्रा दत्तं तथास्तु तत्॥ २७॥
नान्यदत्तमभीप्सामि स्थानमम्ब! स्वकर्मणा।
इच्छामि तदहं स्थानं यन्न प्राप पिता मम॥ २८॥

पराशर उवाच।

निर्जगाम गृहात् मातुरित्युक्त्वा मातरं ध्रुवः।
पुराच्च निष्क्रम्य ततस्तद्बाह्योपवनं ययौ॥ २९॥
स ददर्श मुनींस्तत्र सप्त पूर्वागतान् ध्रुवः।
कृष्णाजिनोत्तरीयेषु विष्टरेषु समास्थितान्॥ ३०॥

यच्च यावदेव प्राप्तं च तेन भुज्यते॥ २१॥ मैत्रो मित्रभावः। प्रवणाः निम्नदेशाभिमुख्यः यथा पात्रं वर्तुलं नरम्॥२२॥ अम्ब! हे मातः! मम प्रशमाय क्रोधनाशाय! यत्त्वं इत्यादि समस्तोक्तरूपं यद् वचः प्राह ब्रवीषि, तद् भिन्ने भग्ने पत्र इव मम हृदये न तिष्ठति॥२४॥ तदर्थं हरिं प्राप्स्यामि॥ २५॥ किन्तु स्वकर्मणा प्राप्तुमेव इच्छामि॥ २८॥ पूर्वागतान् आत्मपराप्त ततः पूर्वमेव समागतान् कृष्णाजिनम् उत्तरीयम्

स राजपुत्रस्तान् सर्वान् प्रणिपत्याभ्यभाषत ।
प्रश्रयावनतः सम्यगभिवादनपूर्वकम् ॥ ३१ ॥

ध्रुव उवाच ।

उत्तानपादतनयं मां निबोधत सत्तमाः ।
जातं सुनीत्यां निर्वेदाद् युष्माकं प्राप्तमन्तिकम् ॥ ३२ ॥

ऋषय ऊचुः ।

चतुःपञ्चाब्दसम्भूतो बालस्त्वं नृपनन्दन ।
निर्वेदकारणं किञ्चित् तव नाद्यापि विद्यते ॥ ३३ ॥
न चिन्त्यं भवतः किञ्चिद् ध्रियते भूपतिः पिता ।
न चैवेष्टवियोगादि तव पश्यामि बालक ॥ ३४ ॥
शरीरे न च ते व्याधिरस्माभिरुपलक्ष्यते ।
निर्वेदः किंनिमित्तं ते कथ्यतां यदि विद्यते ॥ ३५ ॥

पराशर उवाच ।

ततः स कथयामास सुरुच्या यदुदाहृतम् ।
तन्निशम्य ततः प्रोचुर्मुनयस्ते परस्परम् ॥ ३६ ॥
अहो क्षात्रं परं तेजो बालस्यापि यदक्षमा ।
सपत्न्या मातुरुक्तस्य हृदयान्नापसर्पति ॥ ३७ ॥
भो भोः क्षत्रियदायाद ! निर्वेदाद् यत् त्वयाधुना ।
कर्त्तुं व्यवसितं, तन्नः कथ्यतां यदि रोचते ॥ ३८ ॥

उपरि आच्छादनं येषां तेषु विष्टरेषु कुशासनेषु उपविष्टान् ॥ ३० ॥ निर्वेदात् दुःखात् प्राप्तं आनीतं युष्माकं ॥ ३२ ॥ चत्वारः पञ्च वा अब्दा यस्य, स चासौ सम्भूतश्च [illegible] सोऽस्माभिश्च ज्ञातः । [illegible] ॥ ३३ ॥ चिन्त्यं कुटुम्बादिविषयं भवतः किञ्चित् नास्ति, यतः पिता ध्रियते जीवति । स च भूपतिः ॥ ३४ ॥ [illegible]

यच्च कार्यं तवास्माभिः साहाय्यममितद्युते ।
तदुच्यतां विवक्षुस्त्वम् अस्माभिरुपलक्ष्यसे ॥ ३८ ॥

ध्रुव उवाच ।

नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः ।
तत् स्थानमेकमिच्छामि भुक्तं नान्येन यत् पुरा ॥ ४० ॥
एतन्मे क्रियतां सम्यक् कथ्यतां प्राप्यते यथा ।
स्थानमग्र्यं समस्तेभ्यः स्थानेभ्यो मुनिसत्तमाः ॥ ४१ ॥

मरीचिरुवाच ।

अनाराधितगोविन्दैः नरैः स्थानं नृपात्मज ।
न हि सम्प्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम् ॥ ४२ ॥

अत्रिरुवाच ।

परः पराणां पुरुषो यस्य तुष्टो जनार्दनः ।
स प्राप्नोत्यक्षयस्थानम् एतत् सत्यं मयोदितम् ॥ ४३ ॥

अङ्गिरा उवाच ।

यस्यान्तः सर्वमेवेदम् अच्युतस्याव्ययात्मनः ।
तमाराधय गोविन्दं स्थानमग्र्यं यदीच्छसि ॥ ४४ ॥

पुलस्त्य उवाच ।

परं ब्रह्म परं धाम योऽसौ ब्रह्म तथा परम् ।
तमाराध्य हरिं याति मुक्तिमप्यतिदुर्लभाम् ॥ ४५ ॥

क्रतुरुवाच ।

यो यज्ञपुरुषो यज्ञे योगे यः परमः पुमान् ।

मानमङ्गं कथमपि ॥ ३७ ॥ [illegible] ! [illegible] । ॥ ३८ ॥
[illegible] ॥ ३९ ॥ ४० ॥ [illegible] ।

तस्मिंस्तुष्टे यदप्राप्यं किं तदस्ति जनार्दने । ४६ ॥

पुलह उवाच ।

ऐन्द्रमिन्द्रः परं स्थानं यमाराध्य जगत्पतिम् ।
प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत ! ॥ ४७ ॥

वसिष्ठ उवाच ।

प्राप्नोष्याराधिते विष्णौ मनसा यद् यदिच्छति ।
त्रैलोक्यान्तर्गतं स्थानं किमु वत्सोत्तमोत्तमम् ॥ ४८ ॥

ध्रुव उवाच ।

आराध्यः कथितो देवो भवद्भिः प्रणतस्य मे ।
मया तत्परितोषाय यद् जप्यं, तदुच्यताम् ॥ ४९ ॥
यथा चाराधनं तस्य मया कार्य्यं महात्मनः ।
प्रसादसुमुखास्तन्मे कथयन्तु महर्षयः ॥ ५० ॥

ऋषय ऊचुः ।

राजपुत्र ! यथा विष्णोराराधनपरैर्नरैः ।
कार्य्यमाराधनं तन्नो यथावत् श्रोतुमर्हसि ॥ ५१ ॥
बाह्यार्थादखिलाच्चित्तं त्याजयेत् प्रथमं नरः ।
तस्मिन्नेव जगद्धाम्नि ततः कुर्वीत निश्चलम् ॥ ५२ ॥

स्वाराध्यमपरमेवास्य अस्माकं कथ्यतामिति ॥ ४७ ॥ मनसा यद्यद् यदिच्छति, तत्सर्वमपि तदपि प्राप्नोति । त्रैलोक्यान्तर्गतम् उत्तमं प्राप्नोतीति किमु वक्तव्यम् ॥ ४८ ॥ तस्याराधनमेवैकं पुंसां सर्वफलप्रदम् । यद्वैरप्यनेकोऽस्य तदुपायं पृच्छति । आराध्यः कथित इति द्वाभ्याम् ॥ ४९ ॥ ५० ॥ बाह्यार्थादित्यादिना [illegible] आराधनप्रकारं सत्सङ्गम् उपदिशन्ति । तत्र प्रथमं बाह्यार्थात् चित्तं व्यावर्त्तयेत् इति [illegible] विधानेन यथार्हं [illegible]

एवमेकाग्रचित्तेन तन्मयेन धृतात्मना ।
जप्यं यन् निगदितमेतत् त्वं नः पार्थिवनन्दन ! ॥ ५३ ॥
हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ।
ओं नमो वासुदेवाय शुद्धज्ञानस्वभाविने ॥ ५४ ॥
एतद् जजाप भगवान् जप्यं स्वायम्भुवो मनुः ।
पितामहस्तव पुरा तस्य तुष्टो जनार्दनः ॥ ५५ ॥
ददौ यथाभिलषिताम् ऋद्धिं त्रैलोक्यदुर्लभाम् ।
तथा त्वमपि गोविन्दं तोषयैतत् सदा जपन् ॥ ५६ ॥

द्वादशोऽध्यायः ।

पराशर उवाच ।

निशम्य तदशेषेण मैत्रेय ! नृपतेः सुतः ।
निर्जगाम वनात् तस्मात् प्रणिपत्य स तानृषीन् ॥ १ ॥

जप्यार्थं मन्त्रोद्धार उक्तः । तच्चैवं नियमं कुर्वीतेति भावेनोक्तः ॥५२॥
एवमनेन प्रकारेण एकाग्रचित्तेन इति पूर्वोक्तषडङ्गयोगाख्यं ध्यानमुक्तम् । तथा च वक्ष्यति "तद्रूपप्रत्ययैकाग्रा सन्ततिश्चान्यनिःस्पृहा । तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ! ॥" इति । तन्मयेनेति समाधिरुक्तः । धृतात्मनेति पुनर्विषयविक्षेपप्राप्तौ तत्परिहाराय चित्तस्थैर्ये प्रयत्न उक्तः । तदुक्तं गीतासु "यतो यतो निःसरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥" इति ॥ ५३ ॥ हिरण्यगर्भो ब्रह्मा, पुरुषो विष्णुः, प्रधीयते प्रक्षिप्यते प्रलयो विश्वमनेनेति प्रधानहेतुः शिवः प्रधानसंज्ञः अव्यक्तरूपाणां मूर्त्तीनां त्रिगुणमायाशक्तिकारणात्मा । पाठान्तरे अव्यक्तं विश्वम् । एतानि रूपाणि सन्ति यस्य तस्मै । एवमौपाधिकेषु रूपेषु सत्स्वपि शुद्धज्ञानात्मकः स्वभावोऽप्यस्य इत्यस्ति यस्य तस्मै । ओंकारमभिधायाथ वासुदेवाय नम इति मन्त्रार्थः ॥ ५४ ॥

कृतकृत्यमिवात्मानं मन्यमानस्ततो द्विज ।
मधुसंज्ञं महापुण्यं जगाम यमुनातटम् ॥ २ ॥
पुनश्च मधुसंज्ञेन दैत्येनाधिष्ठितं यतः ।
ततो मधुवनं नाम्ना ख्यातमत्र महीतले ॥ ३ ॥
हत्वा च लवणं रक्षो मधुपुत्रं महाबलम् ।
शत्रुघ्नो मथुरां नाम पुरीं यत्र चकार वै ॥ ४ ॥
यत्र वै देवदेवस्य सान्निध्यं हरिमेधसः ।
सर्वपापहरे तस्मिन् तपस्तीर्थे चकार सः ॥ ५ ॥
मरीचिमुख्यैर्मुनिभिर्यथोद्दिष्टमभूत् तथा ।
आत्मन्यशेषदेवेशं स्थितं विष्णुममन्यत ॥ ६ ॥
अनन्यचेतसस्तस्य ध्यायतो भगवान् हरिः ।
सर्वभूतगतो विप्र सर्वभावगतोऽभवत् ॥ ७ ॥
मनस्यवस्थिते तस्य विष्णौ मैत्रेय योगिनः ।
न शशाक धरा भारमुद्वोढुं भूतधारिणी ॥ ८ ॥
वामपादस्थिते तस्मिन् ननामार्द्धेन मेदिनी ।
द्वितीयञ्च ननामार्द्धं क्षितेर्दक्षिणसंस्थिते ॥ ९ ॥

तस्मात् पुरोपवनात् निर्जगाम ॥ १ ॥ २ ॥ हरतीति हरिः । सर्वदुःखहारिणी यद्विषया मेधा स हरिमेधा । नित्यमसिच् प्रजा-मेधयोरिति साधुत्वम् ॥ ५ ॥ मरीचिमुख्यैर्मरीचिप्रमुखैः । यथा चोद्दिष्टम् । अमन्यत दध्यौ ॥ ६ ॥ सर्वभावगतः सर्वभावेन विश्वरूपेण तद्भु-तत्त्वं गतः प्राप्तोऽभवत् ॥ ७ ॥ ततश्च तस्य भारमुद्वोढुं भूमिरशक्तेत्याह, मनस्यवस्थित इति त्रिभिः ॥ ८ ॥ वामेन पादेन स्थिते तस्मिन् अर्द्धेन अर्द्धं वामभागतो मेदिनी ननाम अवनताभूत् । दक्षिणेन पादेन स्थिते तस्मिन् क्षितेर्द्वितीयं दक्षिणमर्द्धं ननाम ॥ ९ ॥ यथा च

पादाङ्गुष्ठेन संपीड्य यदा स वसुधां स्थितः ।
तदा सा वसुधा विप्र ! चचाल सह पर्वतैः ॥ १० ॥
नद्यो नदाः समुद्राश्च संक्षोभं परमं ययुः ।
तत्क्षोभादमराः क्षोभं परं जग्मुर्महामुने ! ॥ ११ ॥
यामा नाम तदा देवा मैत्रेय ! परमाकुलाः ।
इन्द्रेण सह संमन्त्र्य ध्यानभङ्गं प्रचक्रमुः ॥ १२ ॥
कुष्माण्डा विविधै रूपैः सहेन्द्रेण महामुने ! ।
समाधिभङ्गमत्यन्तम् आरब्धाः कर्त्तुमातुराः ॥ १३ ॥
सुनीतिर्नाम तन्माता सास्रा तत्पुरतः स्थिता ।
पुत्रेति करुणं वाचमाह मायामयी तदा ॥ १४ ॥
पुत्रकास्मान् निवर्त्तस्व शरीरव्ययदारुणात् ।
निर्बन्धतो मया लब्धा बहुभिस्त्वं मनोरथैः ॥ १५ ॥
दीनामेकां परित्यक्तुम् अनाथां न त्वमर्हसि ।
सपत्नीवचनाद् वत्स ! अगतेस्त्वं गतिर्मम ॥ १६ ॥
क्व च त्वं पञ्चवर्षीयः क्व चैतद् दारुणं तपः ।
निवर्त्यतां मनः कष्टान् निर्बन्धात् फलवर्जितात् ॥ १७ ॥
कालः क्रीडनकानां ते तदन्तेऽध्ययनस्य च ।

पादाङ्गुष्ठेन वसुधां मध्यतः संपीड्य आक्रम्य स्थितः, तदा समस्ता वसुधा चचाल ॥ १० ॥ नद्यादयश्च क्षोभं ययुः ॥ ११ ॥ ततो ध्रुवस्यैकधा भिन्ने क्वचनादेऽपि तत्समाधेर्भङ्गाय मनसश्च मातृदार्यम् आह, यामा नामेत्यादिना । एवं सर्वेषु मायास्वन्यतः प्राक्क्रमेण यत्नेन ॥ १२ ॥ कुष्माण्डाः क्षेत्रिकुपदेवाः ॥ १३ ॥ वाच्या अस्तुतणी ततो ॥ १४ । शरीरस्य व्ययेन दारुणात् तीव्रादकात् तपोनिर्बन्धात् निवर्त्तस्व ॥ १५ ॥ सपत्नीवचनात् क्रुद्धः सन् मां त्यक्तुं न अर्हसीत्यर्थः ॥ १६ ॥ ततो

ततः समस्तभोगानां तदन्ते चेष्यते तपः ॥ १८ ॥
कालः क्रीडनकानां यस्तव बालस्य पुत्रक ! ।
तस्मिंस्त्वमित्थं तपसि किं नाशायात्मनो रतः ॥ १९ ॥
मत्प्रीतिः परमो धर्म्मो वयोऽवस्थाक्रियाक्रमम् ।
अनुवर्त्तस्व मा मोहं निवर्त्तास्मादधर्म्मतः ॥ २० ॥
परित्यजति वत्साद्य यद्येतन्न भवांस्तपः ।
त्यक्ष्याम्यहमपि प्राणान् ततो वै पश्यतस्तव ॥ २१ ॥

पराशर उवाच ।

तां विलापवतीमेवं बाष्पाविलविलोचनाम् ।
समाहितमना विष्णौ पश्यन्नपि न दृष्टवान् ॥ २२ ॥
वत्स ! वत्स ! सुघोराणि रक्षांस्येतानि भीषणे ।
वनेऽभ्युद्यतशस्त्राणि समायान्त्यपगम्यताम् ॥ २३ ॥
इत्युक्त्वा प्रययौ साथ रक्षांस्याविर्बभुस्ततः ।
अभ्युद्यतोग्रशस्त्राणि ज्वालामालाकुलैर्मुखैः ॥ २४ ॥
ततो नादानतीवोग्रान् राजपुत्रस्य ते पुरः ।
मुमुचुर्दीप्तशस्त्राणि भ्रामयन्तो निशाचराः ॥ २५ ॥
शिवाश्च शतशो नेदुः सज्वालाकवलैर्मुखैः ।

मत्प्रीतिर्मत्सन्तोषणं मम परो धर्मः, अतः बाल क्रीडनकानां ते इत्यादि उद्दिष्टं वयोऽवस्थानुरूपं क्रियाणां क्रमम् अनुवर्त्तस्व, मोहं दुराग्रहं मा अनुवर्त्तस्व। भाविमद्दुःखहेतुत्वात् अस्मादधर्म्मात् तपोनिर्बन्धलक्षणात् अधर्म्मात् निवर्त्तस्व। मत्प्रीतिपरमम् इति पाठे मत्प्रीत्या परम उत्कृष्टो यो भवेत् तं वयोऽवस्थाक्रियाक्रमयुक्तं धर्म्ममनुवर्त्तस्वेत्यर्थः ॥ २० ॥ बाष्पैरश्रुभिराविले क्लिन्ने विलोचने यस्यास्तां पश्यन्नपि अश्रोविलयेनातोऽपि ॥ २२ ॥ शिवाः, ज्वाला एव कवलं ग्रासस्तद्-

त्रासाय तस्य बालस्य योगयुक्तस्य सर्वशः ॥ २६ ॥
हन्यतां हन्यतामेष छिद्यतां छिद्यतामयम् ।
भक्ष्यतां भक्ष्यताञ्चायम् इत्यूचुस्ते निशाचराः ॥ २७ ॥
ततो नानाविधान् नादान् सिंहोष्ट्रमकराननाः ।
त्रासाय राजपुत्रस्य नेदुस्ते रजनीचराः ॥ २८ ॥
रक्षांसि तानि ते नादाः शिवास्तान्यायुधानि च ।
गोविन्दासक्तचित्तस्य ययुर्नेन्द्रियगोचरम् ॥ २९ ॥
एकाग्रचेताः सततं विष्णुमेवात्मसंश्रयम् ।
दृष्टवान् पृथिवीनाथपुत्रो नान्यत् कथञ्चन ॥ ३० ॥
ततः सर्वासु मायासु विलीनासु पुनः सुराः ।
संक्षोभं परमं जग्मुस्तत्पराभवशङ्किताः ॥ ३१ ॥
ते समेत्य जगद्योनिम् अनादिनिधनं हरिम् ।
शरण्यं शरणं यातास्तपसा तस्य तापिताः ॥ ३२ ॥

देवा ऊचुः ।

देवदेव ! जगन्नाथ ! परेश ! पुरुषोत्तम ! ।
ध्रुवस्य तपसा तप्तास्त्वां वयं शरणं गताः ॥ ३३ ॥
दिने दिने कलालेशैः शशाङ्कः पूर्य्यते यथा ।
तथायं तपसा देव ! प्रयात्यृद्धिमहर्निशम् ॥ ३४ ॥
औत्तानपादितपसा वयमित्थं जनार्द्दन ! ।
भीतास्त्वां शरणं यातास्तपसस्तं निवर्त्तय ॥ ३५ ॥

विवृतैर्मुखैर्नदन्तः ॥ २६ ॥ सिंहोष्ट्रमकराणामिव आननानि येषां ते ॥ २८ ॥ ३० ॥ तस्मात् यः पराभवः अपदापहारलक्षणस्तस्मात् शङ्किताः ॥ ३१ ॥ कलालेशैः सूक्ष्माभिः कलाभिः ॥ ३४ ॥

न विद्मः किं स शक्रत्वं किं सूर्य्यत्वमभीप्सति।
वित्तपाम्बुपसोमानां साभिलाषः पदे नु किम् ॥ ३६ ॥
तदस्माकं प्रसीदेश ! हृदयात् शल्यमुद्धर।
उत्तानपादतनयं तपसः संनिवर्त्तय ॥ ३७ ॥

भगवानुवाच।

नेन्द्रत्वं न च सूर्य्यत्वं नैवाम्बुपधनेशताम्।
प्रार्थयत्येष यं कामं तं करोम्यखिलं सुराः ॥ ३८ ॥
यात देवा यथाकामं स्वस्थानं विगतज्वराः।
निवर्त्तयाम्यहं बालं तपस्यासक्तमानसम् ॥ ३९ ॥

पराशर उवाच।

इत्युक्ता देवदेवेन प्रणम्य त्रिदशास्ततः।
प्रययुः स्वानि धिष्ण्यानि शतक्रतुपुरोगमाः ॥ ४० ॥
भगवानपि सर्व्वात्मा तन्मयत्वेन तोषितः।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥ ४१ ॥

श्रीभगवानुवाच

औत्तानपादे ! भद्रं ते तपसा परितोषितः।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ॥ ४२ ॥
बाह्यार्थनिरपेक्षं ते मयि चित्तं यदाहितम्।
तुष्टोऽहं भवतस्तेन तद् वृणीष्व वरं परम् ॥ ४३ ॥

पराशर उवाच।

श्रुत्वा तद् गदितं तस्य देवदेवस्य बालकः।

हृदयात् शल्यं पराभवशङ्काजदुःखम् उद्धर उत्पाटय ॥ ३७ ॥ काममभीप्सितमर्थम् ॥ ३८ ॥ विगतज्वराः निःशङ्काः ॥३९॥ स्वानि धिष्ण्यानि स्थानानि ॥ ४० ॥ यद् यस्मादाहितं समाहितम् ॥ ४१ ॥ चतुर्

उन्मीलिताक्षो ददृशे ध्यानदृष्टं हरिं पुरः ॥ ४४ ॥
शङ्खचक्रगदाशार्ङ्गवरासिधरमच्युतम् ।
किरीटिनं समालोक्य जगाम शिरसा महीम् ॥ ४५ ॥
रोमाञ्चिताङ्गः सहसा साध्वसं परमं गतः ।
स्तवाय देवदेवस्य स चक्रे मानसं ध्रुवः ॥ ४६ ॥
किं वदामि स्तुतावस्य केनोक्तेनास्य संस्तुतिः ।
इत्याकुलमतिर्देवं तमेव शरणं ययौ ॥ ४७ ॥

ध्रुव उवाच ।

भगवन् ! यदि मे तोषं तपसा परमं गतः ।
स्तोतुं तदहमिच्छामि वरमेतं प्रयच्छ मे ॥ ४८ ॥
ब्रह्माद्यैर्वेद वेदज्ञैर्ज्ञायते यस्य नो गतिः ।
त त्वां कथमहं देव ! स्तोतुं शक्नोमि बालकः ॥ ४९ ॥
त्वद्भक्तिप्रवणं ह्येतत् परमेश्वर ! मे मनः ।
स्तोतुं प्रवृत्तं त्वत्पादौ तत्र प्रज्ञां प्रयच्छ मे ॥ ५० ॥

पराशर उवाच ।

शङ्खप्रान्तेन गोविन्दस्तं पस्पर्श कृताञ्जलिम् ।
उत्तानपादतनयं द्विजवर्य्य ! जगत्पतिः ॥ ५१ ॥
अथ प्रसन्नवदनस्तत्क्षणात् नृपनन्दनः ।

भुजेषु शङ्खादिधरं शार्ङ्गादौ च वरासिधरं चेत्यच्युतमधरम् । शिरसा महीं जगाम दण्डवत् प्रणतो बभूव ॥ ४५ ॥ स्तवाय मानसं चक्रे ॥ ४६ ॥ ततश्च ब्रह्मादिभिरविज्ञाततत्त्वेरस्य स्तुतौ विषये बालोऽहं किं वदामि, केन वा उपाख्यानेन वेदवाक्येनोक्तेन वाऽस्य स्तुतिर्भवेदिति व्याकुलमतिस्तमेव शरणं ययौ ॥ ४७ ॥ सर्ववेदमयस्य शङ्खस्य प्रान्तेन वेदात्मभावेन परमेश्वरतत्त्वप्रतिपादकेन पस्पर्श "ब्रह्ममयेन वपुषा पस्पर्श"

तुष्टाव प्रणतो भूत्वा भूतधातारमच्युतम् ॥ ५२ ॥

ध्रुव उवाच ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
भूतादिरादिप्रकृतिर्यस्य रूपं नतोऽस्मि तम् ॥ ५३ ॥
शुद्धः सूक्ष्मोऽखिलव्यापी प्रधानात् परतः पुमान् ।
यस्य रूपं नमस्तस्मै पुरुषाय गुणाशिने ॥ ५४ ॥
भूरादीनां समस्तानां गन्धादीनाञ्च शाश्वतः ।
बुद्ध्यादीनां प्रधानस्य पुरुषस्य च यः परः ॥ ५५ ॥
तं ब्रह्मभूतमात्मानमशेषजगतः परम् ।
प्रपद्ये शरणं शुद्धं त्वद्रूपं परमेश्वरम् ॥ ५६ ॥
बृहत्त्वाद् बृंहणत्वाच्च यद्रूपं ब्रह्मसंज्ञितम् ।
तस्मै नमस्ते सर्वात्मन् ! योगिचिन्त्याविकारवत् ॥ ५७ ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्
सर्वव्यापी भुवः स्पर्शादत्यतिष्ठद् दशाङ्गुलम् ॥ ५८ ॥

इति गुरूक्तेः ॥ ५१ ॥ प्रसन्नवदनः प्रसन्नात्मत्वात् "योमा तस्य मुखे य एवं वेदेति । ब्रह्मविद इव ते सोम्य ! मुखमाभाति" इति श्रुतेः । भूतानां धातारमच्युतं तुष्टाव सर्वोपायभूतस्वरूपस्यावधारितत्वात् ॥ ५२ ॥ भूम्यादीनि स्थूलसूक्ष्मरूपाणि भूतानि दश, मन इत्येकादशेन्द्रियोपलक्षणम् । बुद्धिर्महत्तत्त्वं, भूतादिरहङ्कारः, आदिप्रकृतिरित्येवं चतुर्विंशतितत्त्वानि यस्य रूपं तं नतोऽस्मि ॥ ५३ ॥ प्रधानात् परतः परः प्रधानात्मा तद्भिन्नः । गुणाशिने गुणभोक्त्रे ॥ ५४ ॥ बृहत्त्वात् सर्वगतत्वात् कारणतया बृंहकत्वात् । विकारवत् न विभाति अविकारवत् । योगिचिन्त्यश्च तदविकारवच्च । हे योगिचिन्त्य ! इति पृथक् पदं वा ॥ ५७ ॥ सहस्रत्वं बहुत्वमत्र विवक्षितम् पुरुषसूक्तार्थं दर्शयति । भूम्यादीन्स्पृष्ट्वा । दशाङ्गुलमितमपरिमितं नाम । अपरि-

यद्भूतं यच्च वै भाव्यं पुरुषोत्तम ! तद्भवान् ।
त्वत्तो विराट् स्वराट् सम्राट् त्वत्तश्चाप्यधिपूरुषः ॥ ५९ ॥
अत्यरिच्यत सोऽधश्च तिर्यक् चोर्ध्वञ्च वै भुवः ।
त्वत्तो विश्वमिदं जातं त्वत्तो भूतभविष्यती ॥ ६० ॥
त्वद्रूपधारिणश्चान्तर्भूतं सर्वमिदं जगत् ।
त्वत्तो यज्ञः सर्वहुतः पृषदाज्यं दध्याद्विधा ॥ ६१ ॥

भूतानि शीर्षाणि यस्य विश्वरूपस्य सः । सहस्रमक्षीणि यस्य सः । सहस्रं पादा यस्य । स भुवः सर्वतो भूमण्डलेन ब्रह्माण्डं तस्य सर्वतोऽपि इति ल्यब्लोपे पञ्चमी । दशाङ्गुलमित्याधिक्यमात्रपरम् । अतोऽयमर्थः । आवरणं ब्रह्माण्डं स्पृष्ट्वा अभिव्याप्य तदतिक्रम्य निरवधिरेव भवान् स्थित इति ॥ ५८ ॥ भगवान् न संयोगमात्रं किन्तु कारणत्वेन तद्व्याप्तः । अतः कार्यात् कारणस्याधिक्यं युक्तमिति पूर्वोक्तं समर्थयते यद्भूतमित्यादिना । विराट् ब्रह्माण्डं, स्वराट् ब्रह्मा, सम्राट् मनुः । अधिपूरुषः एषामधिष्ठाता महापुरुषः ॥ ५९ ॥ अत्यरिच्यत त्वत्तो जाताज्जातात् स भवान् भुवोऽधश्च तिर्यक् चोर्ध्वञ्च परितश्च अतिरिक्तोऽभूत् । भूतत्वोक्तस्य विश्वस्य तत्कार्यत्वेन तदन्तर्वर्त्तित्वात् ततो स्थूलत्वमाह त्वत्तो विश्वमिति । भूतञ्च भविष्यच्च भूतभविष्यती ॥ ६० ॥ त्वद्रूपधारिणश्चेति । चकारोऽप्यर्थे । तवैव कारणभूतस्य रूपं स्वरूपं धारयति न तु पृथक्रूपं वक्ति तत् त्वद्रूपधारि ब्रह्माण्डं तस्यान्तः सर्वमिदं जगदन्तर्भूतं किं पुनर्वक्तव्यं तवान्तर्भूतमिति । सर्वभूतमिति पाठे सर्वाणि भूतानि यस्मिन् तत् जगद्ब्रह्माण्डस्यान्तर्भूतमित्यर्थः । सर्वभूतादिति पाठे सर्वभूतानाम् त्वद्रूपधारिणो ब्रह्माण्डस्यान्तरिदं जगत् स्थितमित्यर्थः । किञ्च त्वत्तो यज्ञः सर्वेषां चरुपुरोडाशादीनां हुतं हवनमस्मिन् इति सर्वहुतः नानाहुतीक इत्यर्थः । सर्वादिति पाठे सर्वं हूयतेऽस्मिन् इति सर्वहुतं तस्मात् सर्वादिति ल्यब्लोपे पञ्चमी । सर्वहुतं यज्ञमुद्दिश्य तत्साधनं पृषदाज्यादि त्वत्तो जातमित्यर्थः । पृषदाज्यं दधिमिश्रं घृतं

त्वत्तो ऋचोऽथ सामानि त्वत्तश्छन्दांसि जज्ञिरे ।
त्वत्तो यजूंष्यजायन्त त्वत्तोऽश्वाश्चैकतोदतः ॥ ६२ ॥
गावस्त्वत्तः समुद्भूतास्त्वत्तोऽजा अवयो मृगाः ।
त्वन्मुखाद्ब्राह्मणास्त्वत्तो बाहोः क्षत्रमजायत ॥ ६३ ॥
वैश्यास्तवोरुजाः शूद्रास्तव पद्भ्यां समुद्गताः ।
अक्ष्णोः सूर्य्योऽनिलः श्रोत्राच्चन्द्रमा मनसस्तव ॥ ६४ ॥
प्राणोऽन्तः सुषिराज्जातो मुखादग्निरजायत ।
नाभितो गगनं द्यौश्च शिरसः समवर्त्तत ॥ ६५ ॥
दिशः श्रोत्रात् क्षितिः पद्भ्यां त्वत्तः सर्वमभूदिदम् ।
न्यग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः ॥ ६६ ॥
संयमे विश्वमखिलं बीजभूते तथा त्वयि ।
बीजादङ्कुरसम्भूतो न्यग्रोधः स समुत्थितः ॥ ६७ ॥
विस्तारञ्च यथा याति त्वत्तः सृष्टौ तथा जगत् ।
यथा हि कदली नान्या त्वक्पत्रान्नापि दृश्यते ॥ ६८ ॥
एवं विश्वस्य नान्यत्वं त्वत्स्थायीश्वर दृश्यते ।
ह्लादिनी सन्धिनी संवित् त्वय्येका सर्वसंस्थितौ ॥ ६९ ॥

चतुर्विधा शाखाभेदेन ॥ ६१ ॥ छन्दांसि गायत्र्यादीनि । एकतो-दता उभयतो दन्ता एकदन्ताश्च ॥ ६२ ॥ तामेवाह नाम इति ॥ ६४ ॥ ६७ ॥ त्वत्तो जातं विश्वं त्वत्तो भिन्नं न भवतीति दृष्टान्तेनाह । यथा त्वचः पत्राद्वा अन्या पृथग्भूता कदली न दृश्यते । एवं त्वत्प्रतिष्ठा-नीयात् त्वत्तो विश्वस्य नान्यत्वम् ॥ ६८ ॥ सत्त्वतमोगुणात्मिका त्वय्येव स्थाप्य मायावच्छिन्ने त्वत्स्थापि तथाभूतमेव यथा घटः यथा घट इत्येवं दृश्यते न तु पृथक् । भो ईश्वर ! सर्वजीवनिवासत्व । पाठान्तरेऽपि स एवार्थः । ईश्वरत्वमेव जीवमुद्रेकविलक्षणेन दर्शयन्नाह, ह्लादिनीति ह्लादिनी

ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ।
पृथग्भूतैकभूताय भूतभूताय ते नमः ॥ ७० ॥
प्रभूतभूतभूताय तुभ्यं भूतात्मने नमः ।
व्यक्तप्रधानपुरुषविराट् सम्राट् स्वराट् तथा ॥ ७१ ॥
विभाव्यतेऽन्तःकरणे पुरुषेष्वक्षयो भवान् ।
सर्वस्मिन् सर्वभूतस्त्वं सर्वः सर्वस्वरूपधृक् ॥ ७२ ॥
सर्वं त्वत्तस्ततश्च त्वं नमः सर्वात्मनेऽस्तु ते ।

ह्लादकरी, सन्धिनी सन्तता, संवित् विद्याशक्तिः, एका मुख्या अव्यभिचारिणी स्वरूपभूतेति यावत् । सा सर्वसंस्थितौ सर्वस्य सम्यक् स्थितिर्यस्मात् तस्मिन् सर्वाधिष्ठानभूते त्वय्येव, न तु जीवेषु । या गुणमयी त्रिविधा सा च सा त्वयि नास्ति ॥ ६९ ॥ तामेवाह, ह्लादतापकरी मिश्रेति । ह्लादकरी मनसः प्रसादात् सात्त्विकी । तापकरी विषयवियोगादिषु दुःखकरी तामसी । तदुभयमिश्रा च विषयजन्या राजसी । तत्र हेतुः गुणवर्जिते इति । तदुक्तं सर्वज्ञसूक्तौ 'ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः । स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः" इति ऐश्वर्यमेव विभूतिभिः प्रपञ्चयति । पृथग्भूतैकभूताय कार्यात्मना पृथग्रूपाय, कारणात्मना चैकरूपाय । भूतभूताय भूतस्वरूपाय ॥ ७० ॥ प्रभूतानि भूतानि बहुविधानि तद्रूपाय भूतात्मने चराचरात्मस्वरूपाय च तुभ्यं नमः । किञ्च पूर्वोक्तव्यक्तप्रधानादिविभूतिरूपतयात्मा बहिर्योगिभिर्भवान् विभाव्यते चिन्त्यते ॥ ७१ ॥ तथा पुरुषेषु क्षेत्रज्ञेषु व्याप्यतयैव जीवरूपेणापि भवान् परमात्मा अक्षयो विभाव्यते । किञ्च सर्वस्मिन् देवादिशरीरे सर्वभूतः तत्र क्षेत्रक्षेत्रस्वरूपत्वं चैव सर्वः सर्वस्वरूपश्च त्वमेव । क्षेत्रक्षेत्रज्ञरूपत्वमेवाह विश्वव्यापित्वाद्यङ्गीकृत्य, सर्वस्वरूपधृक् । चेतनाचेतनस्वरूपं त्वमेव धत्से । 'सर्वं खल्विदं ब्रह्म' इति श्रुतेरित्यर्थः ॥ ७२ ॥ तदेवोपपादयति सर्वं त्वत्तः । यतो हि सर्वं त्वय्यास्ते । अतः सर्वस्वरूपस्त्वं त्वमेव । यस्य

सर्वात्मकोऽसि सर्वेश ! सर्वभूतस्थितो यतः ॥ ७३ ॥
कथयामि ततः किं ते सर्वं वेत्सि हृदि स्थितम् ।
सर्वात्मन् ! सर्वभूतेश ! सर्वसत्त्वसमुद्भव ! ॥ ७४ ॥
सर्वभूतो भवान् वेत्ति सर्वभूतमनोरथम् ।
यो मे मनोरथो नाथ ! सफलः स त्वया कृतः ।
तपश्च तप्तं सफलं यद् दृष्टोऽसि जगत्पते ! ॥ ७५ ॥

श्रीभगवानुवाच ।

तपसस्तु फलं प्राप्तं यद् दृष्टोऽहं त्वया ध्रुव ! ।
मद्दर्शनं हि विफलं राजपुत्र ! न जायते ॥ ७६ ॥
वरं वरय तस्मात् त्वं यथाभिमतमात्मनः ।
सर्वं संपद्यते पुंसां मयि दृष्टिपथं गते ॥ ७७ ॥

प्रथमं चार्थं हिरण्यगर्भादिकं यस्मो जायताम् । तत्पुत्रादिद्वारा यदन्यज्जायते तत् कथं यस्मो जातं स्यात्, तस्माच्च. ततश्च त्वम् । त्वत्तो जाताद् हिरण्यगर्भादेस्तत्पुत्रादिरूपेण त्वमेव जायसे । अतस्तद्द्वारा जायमानं सर्वं त्वत्त एवेत्यर्थः । स्तुतिं निगमयति, एवं सर्वात्मने नमोऽस्त्विति । स्वमनोरथं सूचयंश्चाह, सर्वात्मकोऽसीति ॥ ७३ ॥ एतदेव विवृण्वन्नाह, सर्वात्मन् ! सर्वभूतात्मभूत ! अन्तर्यामिन् ! सर्वेषां सत्त्वानां समुद्भवो यस्मात् सर्वप्राणिसम्भव ! ॥ ७४ ॥ सर्वभूतश्च भवान् अतः सर्वेषां सत्त्वानां मनोरथं वेत्ति । न केवलं मदीयमेवेत्यर्थः । यो मे मनोरथः त्वत्स्तुतिविषयः स स्तुतिसामर्थ्यदानेन त्वया सफलः कृतः । अतो मया यद्दुश्चरं तपस्तप्तं तदपि सफलं जातमेवेति विभावये यतस्त्वं दृष्टोऽसि ॥ ७५ ॥ यत् त्वया आकाङ्क्षितं तपसः फलं तत् त्वया प्राप्तमेव । किं तत्प्रार्थनेन ? यतो मद्दर्शनं विफलं न जायते ॥ ७६ ॥ अपि च तस्मात् प्राप्तादन्यदपि वरं मत्प्राप्तोऽवाप्यादिकं यथेच्छं वृणी-

ध्रुव उवाच।

भगवन्! सर्वभूतेश! सर्वस्यास्ते भवान् हृदि।
किमज्ञातं तव स्वामिन्! मनसा यन्मयेप्सितम्॥७८॥
तथापि तुभ्यं देवेश! कथयिष्यामि यन्मया।
प्रार्थ्यते दुर्विनीतेन हृदयेनातिदुर्लभम्॥७९॥
किं वा सर्वजगत्स्रष्टः! प्रसन्ने त्वयि दुर्लभम्।
त्वत्प्रसादफलं भुङ्क्ते त्रैलोक्यं मघवानपि॥८०॥
नैतद्राजासनं योग्यमजातस्य ममोदरात्।
इति गर्वादवोचन्मां सपत्नी मातुरुच्चकैः॥८१॥
आधारभूतं जगतः सर्वेषामुत्तमोत्तमम्।
प्रार्थयामि प्रभो! स्थानं त्वत्प्रसादादतोऽव्ययम्॥८२॥

श्रीभगवानुवाच।

यत् त्वया प्रार्थितं स्थानम् एतत् प्राप्स्यति वै भवान्।
त्वयाहं तोषितः पूर्वम् अन्यजन्मनि बालक!॥८३॥

मोक्षं ॥ ७७ ॥ प्रार्थ्याह भगवन्! ममाद्यापि त्वत्साक्षात्कारेऽप्य-देच्छा नास्ति किन्तु अन्तर्देवेऽपि वर्तमस्ति, तत्तु भवानन्तर्यामी जानात्येव ॥ ७८ ॥ तथापि दुर्विनीतेन मया हृदयेन यत् प्रार्थ्यते तत् कथयिष्यामि। कथम्भूतं नातिदुर्लभम् अनतिदुर्लभं सुलभमपि ॥ ७९ ॥ सुलभत्वमेवाह किम्वेति ॥ ८० ॥ ममातिदुर्लभं तत्प्रार्थ्योक्त्यादि विज्ञाय त्रैलोक्यान्त-र्वर्तिस्थानं समार्प्य वक्तुमिच्छन्नाह नैतदिति द्वाभ्याम् ॥ ८१ ॥ भगवद्-वाक्यन्तु एवंविधं स्थानं पूर्वजन्मतपसैव त्वया प्राप्तुं शक्यम्, अन्तरा चैव तु केनचित् त्वं राजपुत्रोऽपि तत्राप्यत्र तथापरितोषो जातस्तोषप्रभावा-देवाभूत्। अतः स्थित्वा वाहं राज्यभोगान् भुक्त्वा ततश्चास्मात् ध्रुवे पदे आगत्य बहु स्थित्वा पश्चात् मोक्षं प्राप्स्यसीति तदाह, यत्

त्वमासीर्ब्राह्मणः पूर्वं मय्येकाग्रमतिः सदा ।
मातापित्रोश्च शुश्रूषुर्निजधर्मानुपालकः ॥ ८४ ॥
कालेन गच्छता मित्रं राजपुत्रस्तवाभवत् ।
यौवनेऽखिलभोगाढ्यो दर्शनीयोज्ज्वलाकृतिः ॥ ८५ ॥
तत्सङ्गात् तस्य तामृद्धिम् अवलोक्यातिदुर्लभाम् ।
भवेयं राजपुत्रोऽहम् इति वाञ्छा त्वया कृता ॥ ८६ ॥
ततो यथाभिलषिता प्राप्ता ते राजपुत्रता ।
उत्तानपादस्य गृहे जातोऽसि ध्रुव ! दुर्लभे ॥ ८७ ॥
अन्येषां तद् वरं स्थानं कुले स्वायम्भुवस्य यत् ।
तस्यैतदवरं बाल ! येनाहं परितोषितः ॥ ८८ ॥
मामाराध्य नरो मुक्तिम् अवाप्नोत्यविलम्बिताम् ।
मय्यर्पितमना बाल ! किमु स्वर्गादिकं पदम् ॥ ८९ ॥
त्रैलोक्यादधिके स्थाने सर्वताराग्रहाश्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद् भवान् ध्रुव ! ॥९०॥
सूर्यात् सोमात् तथा भौमात् सोमपुत्राद् बृहस्पतेः ।
सिताऽर्कतनयादीनां सर्वर्क्षाणां तथा ध्रुवम् ॥ ९१ ॥
सप्तर्षीणामशेषाणां ये तु वैमानिकाः सुराः ।
सर्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ! ॥ ९२ ॥
केचिच्चतुर्युगं यावत् केचिन् मन्वन्तरं सुराः ।
तिष्ठन्ति, भवतो दत्ता मया वै कल्पसंस्थितिः ॥ ९३ ॥

स्यामिति पुत्रत्वं प्रविवक्षितोऽन्यत्वेन ॥ ८६ ॥ स्वायम्भुवस्य कुले तद् अन्य
अन्येषां सावयानां तद् वरं श्रेष्ठमेव स्थानम् । येन त्वया पूर्वभवे
परितोषित । तस्य तव अवरमेतदवरं तुच्छं स्थानम् ॥ ८८ ॥ ९० ॥
सोमपुत्राद् बुधात् । सित: शुक्र: । सर्वर्क्षाणां सर्वेषां ॥ ९१ ॥ ९२ ॥

सुनीतिरपि ते माता त्वदासन्नातिनिर्मला ।
विमाने तारका भूत्वा तावत्कालं निवत्स्यति ॥ ९४॥
ये च त्वां मानवाः प्रातः सायञ्च सुसमाहिताः ।
कीर्त्तयिष्यन्ति तेषाञ्च महत् पुण्यं भविष्यति ॥ ९५ ॥

पराशर उवाच ।

एवं पूर्वं जगन्नाथाद् देवदेवाज्जनार्द्दनात् ।
वरं प्राप्य ध्रुवः स्थानम् अध्यास्ते स महामते ! ॥ ९६ ॥
तस्यापि मानसंवृद्धिं महिमानं निरीक्ष्य च ।
देवासुराणामाचार्य्यः श्लोकमत्रोशना जगौ ॥ ९७ ॥
अहोऽस्य तपसो वीर्य्यम् अहोऽस्य तपसः फलम् ! ।
यदेनं पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ॥ ९८ ॥
ध्रुवस्य जननी चेयं सुनीतिर्नाम सूनृता ।
अस्याश्च महिमानं कः शक्तो वर्णयितुं भुवि ॥ ९९ ॥
त्रैलोक्याश्रयतां प्राप्तं परं स्थानं स्थिरायति ।
स्थानं प्राप्ता परं कृत्वा या कुक्षिविवरे ध्रुवम् ॥ १०० ॥

॥ ९३ ॥ सुनीतिरपि ते मातेति । त्वत्समासन्नत्वादेव तत्र निवत्स्यतीत्यर्थः ॥ ९४ ॥ ९५ ॥ ९६ ॥ कपहारा देवनःपार्श्वत्वम् ॥ ९७ ॥ सूनृता तत् पुण्योपचये श्रेष्ठे कुह्मन्या उत्तानपादस्यादिमी । "धर्मस्य कन्या सुश्रोणी सूनृता नाम विश्रुता । अनृजया वाजिमेधेन ध्रुवस्य जननी शुभा" इति हरिवंशोक्तेः । पूर्वनाम वा ॥ ९९ ॥ त्रैलोक्याश्रयतां प्राप्तं यत् परं विष्णुपदाख्यं स्थानम् । स्थिरायति । स्थिरा उच्छ्रितरूपा आयतिरुत्तरकाले भावि फलं यस्मिंस्तथाभूतं स्थानं निवासं प्राप । "आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः" इत्यभिधानात् । प्राप्तेति वा पाठः । कथं प्राप्ता ? वरं श्रेष्ठं विष्णुभक्तं

यश्चैतत् कीर्त्तयेन्नित्यं ध्रुवस्यारोहणं दिवि।
स सर्वपापनिर्मुक्तः स्वर्गलोके महीयते॥ १०१॥
स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि।
सर्वकल्याणसंयुक्तो दीर्घकालञ्च जीवति॥ १०२॥

त्रयोदशोऽध्यायः।

पराशर उवाच।

ध्रुवाच्छिष्टिञ्च भव्यञ्च भव्याच्छम्भुर्व्यजायत।
शिष्टेराधत्त सुच्छाया पञ्च पुत्रानकल्मषान्॥ १॥
रिपुं रिपुञ्जयं विप्रं वृकलं वृकतेजसम्।
रिपोराधत्त बृहती चाक्षुषं सर्वतेजसम्॥ २॥
अजीजनत् पुष्करिण्यां वारुण्यां चाक्षुषो मनुम्।
प्रजापतेरात्मजायाम् अरण्यस्य महात्मनः॥ ३॥
मनोरजायन्त दश नड्वलायां महौजसः।
कन्यायां जगतां श्रेष्ठ! वैराजस्य प्रजापतेः॥ ४॥
ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवाक् कविः।
अग्निष्टोमोऽतिरात्रश्च सुद्युम्नश्चेति ते नव॥ ५॥

ध्रुवं कुक्षिविवरे गर्भे धृत्वा या परं स्थानं प्राप्ता तस्या नक्षत्रमालां सर्वविदः कः शक्तः वर्णयेत्॥ १००॥

भव्याच्छम्भुरभूत्। ध्रुवात् शम्भुरेव तद्भार्यायां शिष्टिं भव्यञ्च अजनयदित्यन्वयः। भार्या शम्भुरिति केचित् पठन्ति॥ १॥ चाक्षुषो वीरणस्य प्रजापतेरात्मजायां पुष्करिण्यां चाक्षुषो मनुं प्रजापतिं अजनयदित्यन्वयः॥ ३॥ वैराजस्य प्रजापतेः

अभिमन्युश्च दशमो नड्वलायां महौजसः ।
ऊरोरजनयत् पुत्रान् षडाग्नेयी महाप्रभान् ॥ ६ ॥
अङ्गं सुमनसं ख्यातिं क्रतुमङ्गिरसं शिवम् ।
अङ्गात् सुनीथापत्यं वै वेणमेकमजायत ॥ ७ ॥
प्रजार्थमृषयस्तस्य ममन्थुर्दक्षिणं करम् ।
वेणस्य पाणौ मथिते सम्बभूव महामुने ! ॥ ८ ॥
वैण्यो नाम महीपालो यः पृथुः परिकीर्त्तितः ।
येन दुग्धा मही पूर्वं प्रजानां हितकारणात् ॥ ९ ॥

मैत्रेय उवाच ।

किमर्थं मथितः पाणिर्वेणस्य परमर्षिभिः ।
यत्र जज्ञे महावीर्य्यः स पृथुर्मुनिसत्तम ! ॥ १० ॥

पराशर उवाच ।

सुनीथा नाम या कन्या मृत्योः प्रथमतोऽभवत ।
अङ्गस्य भार्य्या सा दत्ता तस्यां वेणो व्यजायत ॥ ११ ॥
स मातामहदोषेण तेन मृत्योः सुतात्मजः ।
निसर्गादेव मैत्रेय ! दुष्ट एव व्यजायत ॥ १२ ॥
अभिषिक्तो यदा राज्ये स वेणः परमर्षिभिः ।
घोषयामास स तदा पृथिव्यां पृथिवीपतिः ॥ १३ ॥
न यष्टव्यं न होतव्यं न दातव्यं कदाचन ।
भोक्ता यज्ञस्य कस्त्वन्यो ह्यहं यज्ञपतिः प्रभुः ॥ १४ ॥
ततस्तमृषयः पूर्वं संपूज्य जगतीपतिम् ।

कन्यायां नड्वलायां चक्षोर्महौजसो दश पुत्रा अजायन्तेत्यन्वयः ॥ ४ ॥
७ ॥ नड्वलायां महौजस इति पूर्वस्मिंस्तु नड्वलायां महौजसो दे
इत्येतमनुषङ्गेण न दृष्टे इति विधानार्थः ॥ १० ॥ वामपदं नाम्ना चक्षं

ऊचुः सामकलं सम्यङ् मैत्रेय! समुपस्थिताः ॥ १५ ॥

ऋषय ऊचुः ।

भो भो! राजन्! शृणुष्व त्वं यद् वदामस्तव प्रभो! ।
राज्यदेहोपकाराय प्रजानाञ्च हितं परम् ॥ १६ ॥
दीर्घसत्रेण देवेशं सर्वयज्ञेश्वरं हरिम् ।
पूजयिष्याम, भद्रं ते, तत्रांशस्ते भविष्यति ॥ १७ ॥
यज्ञेन यज्ञपुरुषो हरिः संप्रीणितो नृप! ।
अस्माभिर्भवतः कामान् सर्वानेव प्रदास्यति ॥ १८ ॥
यज्ञैर्यज्ञेश्वरो येषां राष्ट्रे संपूज्यते हरिः ।
तेषां सर्वेप्सितावाप्तिं ददाति नृप! भूभुजाम् ॥ १९ ॥

वेण उवाच ।

मत्तः कोऽभ्यधिकोऽन्योऽस्ति यश्चाराध्यो ममापरः ।
कोऽयं हरिरिति ख्यातो योऽयं यज्ञेश्वरो मतः ॥ २० ॥
ब्रह्मा जनार्दनः शम्भुरिन्द्रो वायुर्यमो रविः ।
हुतभुग् वरुणो धाता पूषा भूमिर्निशाकरः ॥ २१ ॥
एते चान्ये च ये देवाः शापानुग्रहकारिणः ।
नृपस्यैते शरीरस्थाः सर्वदेवमयो नृपः ॥ २२ ॥
एतज्ज्ञात्वा मयाज्ञप्तं यथावत् क्रियतां तथा ।
न दातव्यं न होतव्यं न यष्टव्यञ्च वो द्विजाः! ॥ २३ ॥
भर्तृशुश्रूषणं धर्मो यथा स्त्रीणां परो मतः ।

मधुरं साममेव ॥ १५ ॥ राज्यदेहयोरुपकाराय क्षेमाय ॥ १६ ॥
दीर्घसत्रेण बहुकालसंवत्सरेण । अंशः षष्ठो भागः । "हुताद्धर्मषड्भाग-
मादत्ते स्म येन परिरक्षणम्" इति स्मृतेः ॥ १७ ॥ यथा यथा यदृच्छया

ममाज्ञापालनं धर्मो भवताञ्च तथा द्विजाः ! ॥ २४ ॥

ऋषय ऊचुः ।

देह्यनुज्ञां महाराज ! मा धर्मो यातु संक्षयम् ।
हविषां परिणामोऽयं यदेतदखिलं जगत् ॥ २५ ॥

पराशर उवाच ।

इति विज्ञाप्यमानोऽपि स वेणः परमर्षिभिः ।
यदा ददाति नानुज्ञां प्रोक्तः प्रोक्तः पुनः पुनः ॥ २६ ॥
ततस्तु मुनयः सर्वे कोपामर्षसमन्विताः ।
हन्यतां हन्यतां पाप इत्यूचुस्ते परस्परम् ॥ २७ ॥
यो यज्ञपुरुषं देवम् अनादिनिधनं प्रभुम् ।
विनिन्दत्यधमाचारो न स योग्यो भुवः पतिः ॥ २८ ॥
इत्युक्त्वा मन्त्रपूतैस्तैः कुशैर्मुनिगणा नृपम् ।
निजघ्नुर्निहतं पूर्वं भगवन्निन्दनादिना ॥ २९ ॥
ततश्च मुनयो रेणुं ददृशुः सर्वतो द्विज ! ।
किमेतदिति चासन्नं पप्रच्छुस्ते जनं तदा ॥ ३० ॥
आख्यातञ्च जनैस्तेषां चौरीभूतैरराजके ।
राष्ट्रे तु लोकैरारब्धं परस्वादानमातुरैः ॥ ३१ ॥
तेषामुदीर्णवेगानां चौराणां मुनिसत्तमाः ! ।
सुमहान् दृश्यते रेणुः परवित्तापहारिणाम् ॥ ३२ ॥
ततः संमन्त्र्य ते सर्वे मुनयस्तस्य भूभृतः ।
ममन्थुरूरुं पुत्रार्थम् अनपत्यस्य यत्नतः ॥ ३३ ॥

मत् तथैव क्रियतां भद्रैरस्य, न ह्यन्यथेति ॥ २३ ॥ २४ ॥ हविषां परिणामो वृष्ट्यादिद्वारा ॥ २५ ॥ २६ ॥ कोपश्च अमर्षश्च भगवन्नि-न्दाश्रवणरूपं ताभ्यां समन्विताः ॥ २७ ॥ ३० ॥ ३१ ॥ ममन्थ इति

मथ्यतश्च समुत्तस्थौ तस्योरोः पुरुषः किल ।
दग्धस्थूणाप्रतीकाशः खर्वटास्योऽतिह्रस्वकः ॥ ३४ ॥
किं करोमीति तान् सर्वान् विप्रान् प्राह त्वरान्वितः ।
निषीदेति तमूचुस्ते निषादस्तेन सोऽभवत् ॥ ३५ ॥
ततस्तत्सम्भवा जाता विन्ध्यशैलनिवासिनः ।
निषादा मुनिशार्दूल पापकर्मोपलक्षणाः ॥ ३६ ॥
तेन द्वारेण तत् पापं निष्क्रान्तं तस्य भूपतेः ।
निषादास्ते ततो जाता वेनकल्मषनाशनाः ॥ ३७ ॥
ततोऽस्य दक्षिणं हस्तं ममन्थुस्तस्य ते द्विजाः ।
मथ्यमाने च तत्राभूत् पृथुर्वैन्यः प्रतापवान् ॥ ३८ ॥
दीप्यमानः स वपुषा साक्षादग्निरिव ज्वलन् ।
आद्यमाजगवं नाम खात् पपात ततो धनुः ॥ ३९ ॥
शराश्च दिव्या नभसः कवचञ्च पपात ह ।
तस्मिन् जाते तु भूतानि संप्रहृष्टानि सर्वशः ॥ ४० ॥
सत्पुत्रेण च जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नो नरकात् त्रातः स तेन सुमहात्मना ॥ ४१ ॥

पाठे मथ्यमानादित्यर्थः । दग्धस्थूणाप्रतीकाशः दग्धकाष्ठवत् कृष्णवर्णं इत्यर्थः । खर्वटास्यः कुब्जमुखः चिपिटनासिकश्च इत्यर्थः । खर्वटाक्ष इति वा पाठः । केचित्तु खर्वटाश इति पठित्वा नराणां एव खादको भक्षक इति व्याचक्षते ॥ ३४ ॥ वाक्यन्यायभयेन तथाभूतमसमर्थमिवेक्ष्य निषीदेति तमूचुः ॥ ३५ ॥ पापकर्मोपलक्षणं चिह्नं येषां ते ॥ ३६ ॥ तेन द्वारेण निषादरूपेण ॥ ३७ ॥ अग्निरिवेति यथा काष्ठे मथ्यमाने धूमरूपेण तत्र नष्टं निष्क्रम्य पश्चादग्निरुत्पद्यते तथा निषादरूपेण वेनकल्मषे निष्क्रान्ते पश्चादग्निरिव देदीप्यमानः पृथुरुत्पन्न इत्यर्थः ।

तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्वशः ।
तोयानि चाभिषेकार्थं सर्वाण्येवोपतस्थिरे ॥ ४१ ॥
पितामहश्च भगवान् देवैराङ्गिरसैः सह ।
स्थावराणि च भूतानि जङ्गमानि च सर्वशः ॥ ४३ ॥
समागम्य तदा वैन्यम् अभ्यषिञ्चन् नराधिपम् ।
हस्ते तु दक्षिणे चक्रं दृष्ट्वा तस्य पितामहः ॥ ४४ ॥
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ ।
विष्णुचिह्नं करे चक्रं सर्वेषां चक्रवर्त्तिनाम् ॥ ४५ ॥
भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि ।
महता राजराज्येन पृथुर्वैन्यः प्रतापवान् ॥ ४६ ॥
सोऽभिषिक्तो महातेजा विधिवद्धर्मकोविदैः ।
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः ॥ ४७ ॥
अनुरागात् ततस्तस्य नाम राजेत्यजायत ।
आपस्तस्तम्भिरे चास्य समुद्रमभियास्यतः ॥ ४८ ॥
पर्वताश्च ददुर्मार्गं ध्वजभङ्गश्च नाभवत् ।
अकृष्टपच्या पृथिवी सिध्यन्त्यन्नानि चिन्तया ॥ ४९ ॥

चाद्यं यार्थं पितामहवंशं धनुः ॥ ३८ ॥ पुन्नाम्न इति "पुन्नाम्नो नरकाद् यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा" इति वचनात् ॥ ४१ ॥ ४२ ॥ स्थावराणि चेति तदभिमानिदेवताः ॥४३ ॥ चक्रादीनि रेखाकारेणाङ्कुश रेखामयं चक्रं हस्ते यस्य । तदुक्तं "यस्याः प्रतिदृशं चक्रमंशः स परमेश्वरः" इति ॥ ४४ ॥ राजराज्येन चक्रवर्त्तित्वेन ॥ ४६ ॥ अपरं जिताः अरञ्जिताः ॥ ४७ ॥ ४८ ॥ ध्वजभङ्गश्च रथेषु ध्वजानां नाभवत् । अकृष्टपच्या कृषिं विनैव पच्यमाना ॥४९॥

सर्वकामदुघा गावः पुटके पुटके मधु ।
तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे ॥ ५० ॥
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामतिः ।
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥ ५१ ॥
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ ।
स्तूयतामेष नृपतिः पृथुर्वैन्यः प्रतापवान् ॥ ५२ ॥
कर्मैतदनुरूपं वां पात्रं स्तोत्रस्य चाप्ययम् ।
ततस्तावूचतुर्विप्रान् सर्वानेव कृताञ्जली ॥ ५३ ॥
अद्य जातस्य नो कर्म ज्ञायतेऽस्य महीपतेः ।
गुणा नचास्य ज्ञायन्ते नचास्य प्रथितं यशः ।
स्तोत्रं किमाश्रयञ्चास्य कार्य्यमस्माभिरुच्यताम् ॥ ५४ ॥

ऋषय ऊचुः ।

करिष्यत्येष यत् कर्म चक्रवर्त्ती महाबलः ।
गुणा भविष्या ये चास्य तैरयं स्तूयतां नृपः ॥ ५५ ॥

पुटके पत्रादिरचितपात्रविशेषे । यत्र एव पृथोर्जातस्य जातमात्रस्य यज्ञ इत्युच्यते । "पृथुर्वाभवत् तस्मात् तत्र पृथुरजायत" इति मनूक्तेः । पैतामहे पितामहदैवत्ये पृथोरेव यज्ञे न तु पितामहकर्तृके । तथाह वायुः "वैन्यस्य हि पृथोर्यज्ञे वर्त्तमाने महात्मनः । सूतः सूत्यां समुत्पन्नः" इति ॥ ५० ॥ सूत्यामिति सुतिरभिषवः अभिषवे यस्यां सौत्योऽहनीति श्रुतिः । सोमाभिषवभूमिः, तस्याम् । सौत्येऽहनि तस्मिन्नेव दिने ॥ ५१ ॥ ५२ ॥ वां युवयोः ॥ ५३ ॥ ज्ञापकाभावेऽतोऽवलम्बनम् ॥ ५४ ॥ चक्रवर्त्ती दक्षिणहस्ते तद्विह्नं चक्रचिह्नवत्त्वात् । महाबलत्व विष्णुबलात् । अतः कर्म्मण्यस्य गुणाः भवन्त्येव च भविष्यत्येव अतो भविष्यैरेव गुणकर्म्मभिरेव स्तूयताम् इत्यं भावः । "वैन्यो विष्णुरिति इत्येवमस्तु विष्णोर्ज्ञानिभिः" इति

पराशर उवाच ।

ततः स नृपतिस्तोषं तत् श्रुत्वा परमं ययौ ।
सद्गुणैः श्लाघ्यतामेति श्लाघ्यावाभ्यां गुणा मम ॥५६॥
तस्माद् यदद्य स्तोत्रेण गुणनिर्वर्णनं त्विमौ ।
करिष्येते, करिष्यामि तदेवाहं समाहितः ॥ ५७ ॥
यदिमौ वर्जनीयञ्च किञ्चिदत्र वदिष्यतः ।
तदहं वर्जयिष्यामीत्येवञ्चक्रे मतिं नृपः ॥ ५८ ॥
अथ तौ चक्रतुः स्तोत्रं पृथोर्वैण्यस्य धीमतः ।
भविष्यैः कर्मभिः सम्यक् सुस्वरौ सूतमागधौ ॥ ५९ ॥
सत्यवाग् दानशीलोऽयं सत्यसन्धो नरेश्वरः ।
ह्रीमान् मैत्रः क्षमाशीलो विक्रान्तो दुष्टशासनः ॥६०॥
धर्मज्ञश्च कृतज्ञश्च दयावान् प्रियभाषकः ।
मान्यमानयिता यज्वा ब्रह्मण्यः साधुसम्मतः ॥ ६१ ॥
समः शत्रौ च मित्रे च व्यवहारे स्थितो नृपः ।
सूतेनोक्तान् गुणानित्थं स तदा मागधेन च ॥ ६२ ॥
चकार हृदि, तादृक् च कर्मणा कृतवानसौ ।
ततः स पृथिवीपालः पालयन् वसुधामिमाम् ॥ ६३ ॥
इयाज विविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः ।
तं प्रजाः पृथिवीनाथम् उपतस्थुः क्षुधार्दिताः ॥ ६४ ॥

स्याम इदं गुणवर्णनमस्मत्त्वेव यथार्थं विधास्यामीव इति ॥ ५५ ॥ पुनरपि स्तुवन् अनेन स्तुतिविषयेण ममात्मगुणाभिव्यञ्जनेन एव स्थितम् इति मत्वा तथैव यद् अवर्जनीयमनभिमतं च, तत्र च इति स्थितः ॥ ५६ ॥ वश-वर्त्यः वशमनिशः वशवर्त्तो वा । श्रीमान् यथार्थं गुणयुक्तान्

ओषधीषु प्रनष्टासु तस्मिन् काले ह्यराजके ।
तमूचुस्तेन ताः पृष्टास्तत्रागमनकारणम् ॥ ६५ ॥

प्रजा ऊचुः ।

अराजके नृपश्रेष्ठ ! धरित्र्या सकलौषधीः ।
ग्रस्तास्ततः क्षयं यान्ति प्रजाः सर्वाः प्रजेश्वर ! ॥ ६६ ॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्परीतानां प्रजानां जीवनौषधीः ॥ ६७ ॥

पराशर उवाच ।

ततोऽथ नृपतिर्दिव्यम् आदायाजगवं धनुः ।
शरांश्च दिव्यान् कुपितः सोऽन्वधावद् वसुन्धराम् ॥ ६८ ॥
ततो ननाश त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादीन् संत्रासादगमन् मही ॥ ६९ ॥
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैण्यं ददर्शाभ्युद्यतायुधम् ॥ ७० ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्बाणपरित्राणपरायणा ॥ ७१ ॥

पृथिव्युवाच ।

स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥ ७२ ॥

पृथुरुवाच ।

एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ! ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥ ७३ ॥

॥६५॥ तस्मिन् काले वेणपृथुराज्ययोः मध्ये ॥ ६६ ॥ धरण्या ओषधीः

पृथिव्युवाच ।

प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानां ते नृपश्रेष्ठ ! भविष्यति ? ॥७४॥

पृथुरुवाच ।

त्वां हत्वा वसुधे ! बाणैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥ ७५ ॥

पराशर उवाच ।

ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥ ७६ ॥

पृथिव्युवाच ।

उपायतः समारब्धाः सर्वे सिध्यन्त्युपक्रमाः ।
तस्माद् वदाम्युपायं ते तत् कुरुष्व यदिच्छसि ॥७७॥
समस्तास्ता मया जीर्णा नरनाथ ! महौषधीः ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥७८॥
तस्मात् प्रजाहितार्थाय मम धर्मभृतां वर ! ।
तं तु वत्सं प्रयच्छ त्वं क्षरेयं येन वत्सला ॥ ७९ ॥
समाञ्च कुरु सर्वत्र येन शोर समन्ततः ।
वरौषधीवीजभूत वीर ! सर्वत्र भावये ॥ ८० ॥

पराशर उवाच ।

तत उत्सारयामास शैलान् शतसहस्रशः ।

ओषध्यो प्रजाः ॥ ६७ ॥ ६८ ॥ नताय प्रणामं ॥ ६९ ॥ ७० ॥ आत्मनो योगबलेन पृथ्वीभावं प्राप्य धारयिष्यामि । तथा च हरिवंशे "आत्मानं प्रथयित्वेमा धारयिष्याम्यहं प्रजाः" इति ॥ ७७ ॥७८॥ वत्सं क्षीरस्रवेच्छोपधी यथेष्टम् ॥ ७९ ॥ नाथ वर्षेन समां कुरु ।

धनुःकोट्या तदा वैन्यस्ततः शैला विवर्द्धिताः ॥ ८१ ॥
न हि पूर्वविसर्गे वै विषमे पृथिवीतले ।
प्रविभागः पुराणां वा ग्रामाणां वा तदाभवत् ॥ ८२ ॥
न शस्यानि न गोरक्ष्यं न कृषिर्न वणिक्पथः ।
वैन्यात् प्रभृति मैत्रेय ! सर्वस्यैतस्य सम्भवः ॥ ८३ ॥
यत्र यत्र समं तस्या भूमेरासीन् नराधिपः ।
तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥ ८४ ॥
आहारः फलमूलानि प्रजानामभवत् तदा ।
कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै ॥ ८५ ॥
स कल्पयित्वा वत्सं तु मनुं स्वायम्भुवं प्रभुः ।
स्वे पाणौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥ ८६ ॥
शस्यजातानि सर्वाणि प्रजानां हितकाम्यया ।
तेनान्नेन प्रजास्तात ! वर्त्तन्तेऽद्यापि नित्यशः ॥ ८७ ॥
प्राणप्रदानात् स पृथुर्यस्माद् भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञाम् अवापाखिलधारिणी ॥ ८८ ॥
ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ।
गन्धर्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥ ८९ ॥

येन मम स्ववत्सेन क्षीरं सर्वत्र भाजने धारयामि ॥ ८० ॥ विवर्द्धिताः एकैकशोऽधिकतराः कृताः ॥ ८१ ॥ पूर्वे विसर्गे पृथुजन्मनः पूर्वसृष्टौ ॥ ८२ ॥ तदा पृथोः पूर्वमराजके काले योऽपि फलाद्याहारः कृच्छ्रेण सम्पाद्यो-ऽभवत् ॥ ८५ ॥ स पृथुः प्रजाकामः समस्तवत्सं मनुं वत्सं कृत्वा स्व-पाणिरूपे पात्रे शस्यजातानि पृथिवीं दुदोहेत्यन्वयः ॥ ८६ ॥ ८७ ॥ प्राणप्रदानादन्नप्रदानाद्वा भूमेः पिताभूत् । यथाहुः "जनकश्चोपनेता च यश्च विद्यां प्रयच्छति । अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः"

तत् तत् पात्रमुपादाय तत् तद् दुग्धा मुने ! पयः ।
वत्सदोग्धृविशेषाश्च तेषां तद्योनयोऽभवन् ॥ ९०
सैषा धात्री विधात्री च धारिणी पोषणी तथा ।
सर्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥ ९१ ॥

इति ॥ ८८ ॥ देवादिभिर्देवमर्त्यादिभिर्वर्गैर्यत् तत् स्वाभिमतं पात्रमुपादाय तत् तत् स्वाभिमतं पयो भूमिर्दुग्धा । तदेषां देवादीनां तद्योगवत्त्वात् तज्जातीया एव वत्सविशेषा दोग्धृविशेषाश्चाभवन् । तमेव देवादिषु दोग्धृवत्सादिक्रमं हरिवंशमत्स्याद्युक्तं संक्षेपेण वक्ष्यामः । देवाना-मिन्द्रो वत्सः, मित्रो दोग्धा, सौवर्णं पात्रं, ऊर्जं क्षीरम् । मुनीनां सोमो वत्सः, बृहस्पतिर्दोग्धा, छन्दांसि पात्रं, तपो ब्रह्म च क्षीरम् । दैत्यानां विरोचनो वत्सः, द्विमूर्द्धा दोग्धा, आयसं पात्रं, माया क्षीरम् । राक्षसानां सुमाली वत्सः, रजतनाभो दोग्धा, कपालं पात्रं, रुधिरं क्षीरम् । पर्वतानां हिमवान् वत्सः, मेरुर्दोग्धा, शिलामयं पात्रम्, ओषधीरत्नं क्षीरम् । गन्धर्वाणां चित्ररथो वत्सः, विश्वावसु-र्दोग्धा, पद्मं पात्रं, गन्धः क्षीरम् । उरगाणां तक्षको वत्सः, धृतराष्ट्रो दोग्धा, अलाबुः पात्रं, विषं क्षीरम् । यक्षाणां कुबेरो वत्सः, सुकर्णी दोग्धा, आमं सुवर्णमयं पात्रम्, अन्तर्धानं क्षीरम् । पितॄणां यमो वत्सः, अन्तको दोग्धा, राजतं पात्रं, स्वधा क्षीरम् । वृक्षाणां प्लक्षो वत्सः, शालवृक्षो दोग्धा, पालाशं पात्रं, छिन्नसंरोहणं क्षीरम् । तदुक्तं हरिवंशे “देवा मित्रेन्द्रसौवर्णैरूर्जं तु, मुनयस्तथा । बृहस्पतीन्दुच्छन्दोभि-स्तपो, दैत्या द्विमूर्द्धतः ॥ विरोचनायसाभ्यां तु मायां रक्षोगणा अपि । रजतनाभसुमालिभ्यामस्या रक्तं, ततोऽद्रयः । मेरुहिमाद्रिशैलैस्तु रत्न, सर्वौषजातयः । सुवर्णचित्ररथाभ्यां गन्धांस्तु, भुजगास्ततः । धृतराष्ट्र-तक्षकालाबुभिश्च विषद्रवम् । यक्षाः सुवर्णधनदाऽऽमैरन्तर्हितं, पितृगणाः । यमान्तकाभ्यां राजतैः स्वधाममृत, महीरुहाः । शालप्लक्ष-पलाशैश्च छिन्नसंरोहणं ददुः । यद्दोग्धृवत्सपात्रैस्ते तत् तद् ददु-

एवं प्रभाव: स पृथु: पुत्रो वेणस्य वीर्य्यवान्।
जज्ञे महीपति: पूर्व्वं राजाभूत् जनरञ्जनात् ॥ ९२ ॥
य इदं जन्म वेणस्य पृथो: कीर्त्तयते नर:।
न तस्य दुष्कृतं किञ्चित् फलदायि प्रजायते ॥ ९३ ॥
दु:स्वप्नोपशमं नृणां शृण्वतां चैतदुत्तमम्।
पृथोर्जन्म प्रभावश्च करोति सततं नृणाम् ॥ ९४ ॥

चतुर्दशोऽध्याय:।

पृथो: पुत्रौ महावीर्य्यौ जज्ञातेऽन्तर्द्धिपालितौ।
शिखण्डिनी हविर्द्धानम् अन्तर्द्धानाद् व्यजायत ॥ १ ॥
हविर्द्धानात् षडाग्नेयी धिषणाजनयत् सुतान्।
प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ ॥ २ ॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापति:।
हविर्द्धानान् महाराज येन संवर्द्धिता: प्रजा: ॥ ३ ॥
प्राचीनाग्रा: कुशास्तस्य पृथिव्यामभवन् मुने।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबल: ॥ ४ ॥

वसुंधराम्" इति ॥ ९० ॥ धाता धाता, विधाता धर्त्ता, धारिता आधार:। पोषका पोषणकर्त्ता, "वसुधा भूमि:" इति श्रुते: ॥ ९१ ॥

अन्तर्द्धिरन्तर्धानं तस्मात् भार्य्या शिखण्डिनी हविर्धानं पुत्रमजनयत ॥ १ ॥ आग्नेयी अग्निवंशजा धिषणा नाम्नी ॥ २ ॥ प्राचीनाग्रा: कुशा: वर्त्तन्ते यस्य तस्मात्। तदुक्तं "यज्ञेन देवयजनम् अनुयज्ञं वितन्वत:। प्राचीनाग्रै: कुशैरासीदास्तृतं वसुधातलम्"

समुद्रतनयायां तु कृतदारो महीपतिः ।
महतस्तपसः पारे, सवर्णायां महीपतेः ॥ ५ ॥
सवर्णाधत्त सामुद्री दश प्राचीनबर्हिषः ।
सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ॥ ६ ॥
अपृथग्धर्मचरणास्तेऽतप्यन्त महातपः ।
दशवर्षसहस्राणि समुद्रसलिलेशयाः ॥ ७ ॥

मैत्रेय उवाच ।

यदर्थं ते महात्मानस्तपस्तेपुर्महामुने ! ।
प्रचेतसः समुद्राम्भस्येतदाख्यातुमर्हसि ॥ ८ ॥

पराशर उवाच ।

पित्रा प्रचेतसः प्रोक्ताः प्रजार्थममितात्मना ।
प्रजापतिनियुक्तेन बहुमानपुरःसरम् ॥ ९ ॥
ब्रह्मणा देवदेवेन समादिष्टोऽस्म्यहं सुताः ! ।
प्रजाः संवर्द्धनायास्ते मया चोक्तं तथेति तत् ॥ १० ॥
तत् मम प्रीतये पुत्राः ! प्रजावृद्धिमतन्द्रिताः ।
कुरुध्वं माननीया वः सम्यगाज्ञा च प्रजापतेः ॥ ११ ॥

पराशर उवाच ।

ततस्ते तत् पितुः श्रुत्वा वचनं नृपनन्दनाः ।

इति ॥ ४ ॥ तपसः पारे अवसानसमये कृतदारः । तपसश्चानन्तरं तां परिणीतवानित्यर्थः । तमस इति पाठे तमसो नरकस्य पारे निमित्ते पुत्रोत्पत्त्या नरकसन्तारणार्थमित्यर्थः ॥ ५ ॥ सवर्णा दश प्रचेतसोऽजनयत ॥ ६ ॥ अपृथग्धर्मचरणाः समानधर्मचारिणः । एतच्च तेषां पञ्चानामेव भार्यात्वं स्पष्टमभिप्रायम् । समुद्रसलिलेशयाः तत्र निमग्नाः सन्तः ॥ ७ ॥ ८ ॥ ९ ॥ ते त्वया प्रजाः संवर्द्धनीया इत्यादि

तथेत्युक्त्वा तु तं भूयः पप्रच्छुः पितरं मुने ! ॥ १२ ॥

प्रचेतस ऊचुः ।

येन तात ! प्रजावृद्धौ समर्थाः कर्मणा वयम् ।
भवामस्तत् समस्तं नः कर्म व्याख्यातुमर्हसि ॥ १३ ॥

पितोवाच ।

आराध्य वरदं विष्णुम् इष्टप्राप्तिमसंशयम् ।
समेति नान्यथा मर्त्त्यः किमन्यत् कथयामि वः ॥ १४ ॥
तस्मात् प्रजाविवृद्ध्यर्थं सर्वभूतप्रभुं हरिम् ।
आराधयत गोविन्दं यदि सिद्धिमभीप्सथ ॥ १५ ॥
धर्ममर्थञ्च कामञ्च मोक्षञ्चान्विच्छता सदा ।
आराधनीयो भगवान् अनादिः पुरुषोत्तमः ॥ १६ ॥
यस्मिन्नाराधिते सर्गं चकारादौ प्रजापतिः ।
तमाराध्याच्युतं वृद्धिः प्रजानां वो भविष्यति ॥ १७ ॥

पराशर उवाच ।

इत्येवमुक्तास्ते पित्रा पुत्राः प्रचेतसो दश ।
मग्नाः पयोधिसलिले तपस्तेपुः समाहिताः ॥ १८ ॥
दशवर्षसहस्राणि न्यस्तचित्ता जगत्पतौ ।
नारायणे मुनिश्रेष्ठ ! सर्वलोकपरायणे ॥ १९ ॥
तत्रैव ते स्थिता देवम् एकाग्रमनसो हरिम् ।
तुष्टुवुर्यः स्तुतः कामान् स्तोतुरिष्टान् प्रयच्छति ॥ २० ॥

च्छोऽपि ॥ १० ॥ अर्थमिच्छता धर्मादनन्तरं मोक्षमपीच्छता पुंसा ॥ १६ ॥ यस्मिन् आराधिते सर्गमारब्धवान् । तमाराध्य तस्मिन्नाराधिते इत्यर्थः ॥ १७ ॥ प्रचेतस एव प्राचेतसाः ॥ १८ ॥ २० ॥ यं यं

मैत्रेय उवाच ।

स्तवं प्रचेतसो विष्णोः समुद्राम्भसि संस्थिताः ।
चक्रुस्तन्मे मुनिश्रेष्ठ ! सुपुण्यं वक्तुमर्हसि ॥ २१ ॥

पराशर उवाच ।

शृणु मैत्रेय ! गोविन्दं यथा पूर्वं प्रचेतसः ।
तुष्टुवुस्तन्मयीभूताः समुद्रसलिलेशयाः ॥ २२ ॥

प्रचेतस ऊचुः ।

नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती ।
तमाद्यन्तमशेषस्य जगतः परमं प्रभुम् ॥ २३ ॥
ज्योतिराद्यमनौपम्यम् अनन्तरमपारवत् ।
योनिभूतमशेषस्य स्थावरस्य चरस्य च ॥ २४ ॥
यस्याहः प्रथमं रूपम् अरूपस्य तथा निशा ।
सन्ध्या च परमेशस्य तस्मै कालात्मने नमः ॥ २५ ॥
भुज्यतेऽनुदिनं देवैः पितृभिश्च सुधात्मकः ।
जीवभूतः समस्तस्य तस्मै सोमात्मने नमः ॥ २६ ॥
यस्तमो हन्ति तीव्रात्मा प्रभाभिर्भासयन् नभः ।
घर्मशीताम्भसां योनिस्तस्मै सूर्यात्मने नमः ॥ २७ ॥

चक्रुः स्तवं वक्तुमर्हसि ॥ २१ ॥ २२ ॥ “जगद्योनितया नत्वा चतूरूप विभागतः । पुरुषरूपप्रधानेन तुष्टो विष्णुः प्रचेतसाम् ।” तत्र प्रथमं जगत्कारणतया प्रणमन्ति, नताः स्म इति द्वाभ्याम् ॥ २३ ॥ अनौपम्यं स्वस्योपमानशून्यं चिद्रूपत्वात् । अनन्तरं निर्भेदम् । अपारवत् अवधिशून्यम् ॥ २४ ॥ कालरूपेण प्रणमन्ति, यस्याहरिति ॥ २५ ॥ चन्द्ररूपेण प्रणमन्ति, भुज्यत इत्यादि द्वाभ्याम् । जीवभूतः जीवनहेतुः ॥ २६ ॥ घर्मस्तापः । शीतञ्च अम्भश्च तेषां योनिः कारणम् ॥ २७ ॥

काठिन्यवान् यो बिभर्त्ति जगदेतदशेषतः।
शब्दादिसंश्रयो व्यापी तस्मै भूम्यात्मने नमः॥ २८॥
यद् योनिभूतं जगतो बीजं यत् सर्वदेहिनाम्।
तत् तोयरूपमीशस्य नमामो हरिमेधसः॥ २९॥
यो मुखं सर्वदेवानां हव्यभुक् कव्यभुक् तथा।
पितृणाञ्च नमस्तस्मै विष्णवे पावकात्मने॥ ३०॥
पञ्चधावस्थितो देहे यश्चेष्टां कुरुतेऽनिशम्।
आकाशयोनिर्भगवान् तस्मै वाय्वात्मने नमः॥ ३१॥
अवकाशमशेषाणां भूतानां यः प्रयच्छति।
अनन्तमूर्त्तिमान् शुद्धस्तस्मै व्योमात्मने नमः॥ ३२॥
समस्तेन्द्रियवर्गस्य यः सदा स्थानमुत्तमम्।
तस्मै शब्दादिरूपाय नमः कृष्णाय वेधसे॥ ३३॥
गृह्णाति विषयान् नित्यम् इन्द्रियात्मा क्षराक्षरः।
यस्तस्मै ज्ञानमूलाय नताः स्मो हरिमेधसे॥ ३४॥
गृहीतानिन्द्रियैरर्थान् आत्मने यः प्रयच्छति।
अन्तःकरणभूताय तस्मै विश्वात्मने नमः॥ ३५॥
यस्मिन्ननन्ते सकलं विश्वं यस्मात् तथोद्गतम्।

शब्दादीनां पञ्चानामपि गुणानां संश्रयः॥ २८॥ योनिभूतं कारण-
रूपेण, बीजञ्च शुक्ररूपेण॥ २९॥ यो हव्यभुग्देवानां मुखं, कव्यभुक्
पितृणाञ्च मुखम्॥ ३०॥ पञ्चधा प्राणादिरूपेण॥ ३१॥ अनन्त
मूर्त्तिषु अनन्तमूर्त्ती, तद्वान् न भवतीति अनन्तमूर्त्तिमान्॥ ३२॥ स्थानम्
आलम्बनं विषय इत्यर्थः॥ ३३॥ क्षर स्थूलदेहावच्छेदेन। अक्षरो
लिङ्गदेहावच्छेदेन। ज्ञानमूलाय शब्दादिज्ञानकारणाय॥ ३४॥ ३५॥
प्रधानरूपेण समवस्थित, यस्मिन्निति। यस्मिन् अनन्ते विश्वं तिष्ठति।

लयस्थानञ्च यस्तस्मै नमः प्रकृतिधर्मिणे ॥ ३६ ॥
शुद्धः संलक्ष्यते भ्रान्त्या गुणवानिव योऽगुणः ।
तमात्मरूपिणं देवं नताः स्म पुरुषोत्तमम् ॥ ३७ ॥
अविकारमजं शुद्धं निर्गुणं यन्निरञ्जनम् ।
नताः स्म तत्परं ब्रह्म यद् विष्णोः परमं पदम् ॥ ३८ ॥
अदीर्घह्रस्वमस्थूलम् अनण्वश्याममलोहितम् ।
अस्नेहच्छायमतनुम् असक्तमशरीरिणम् ॥ ३९ ॥
अनाकाशमसंस्पर्शम् अगन्धमरसञ्च यत् ।
अचक्षुःश्रोत्रमचलम् अवाक्प्राणममानसम् ॥ ४० ॥
अनामगोत्रमसुखम् अतेजस्कमहेतुकम् ।
अभयं भ्रान्तिरहितम् अनिद्रमजरामरम् ॥ ४१ ॥
अरजोऽशब्दममृतम् अप्लुतं यदसंवृतम् ।
पूर्वापरे न वै यस्मिन् तद् विष्णोः परमं पदम् ॥ ४२ ॥
परमेशित्वगुणवत् सर्वभूतमसंश्रयम् ।
नताः स्म तत् पदं विष्णोर्जिह्वादृग्गोचरं न यत् ॥ ४३ ॥

प्रकृतिधर्माः सत्त्वादयो गुणाः सन्त्यस्येति प्रकृतिधर्मी, तस्मै ॥ ३६ ॥ शुद्धस्वरूपेण प्रत्यगात्मा शुद्ध इति । गुणवानिव गुणाद्यैक्यत्वेन तेषामज्ञत्व। आत्मरूपिणं प्रत्यग्रूपम् ॥ ३७ ॥ शुद्धं रूपं प्रपद्यामः. अविकार-मिति चतुर्भिः । शुद्धं स्वभावत एव निर्मलं, निरञ्जनम् आगन्तुक-मलशून्यम् ॥ ३८ ॥ ४० ॥ भ्रान्त्या निरपायम् ॥ ४१ ॥ अप्लुतं मतिशून्यम् । पूर्वापरे दिक्कालौ ॥ ४२ ॥ परं मिथ्यापिधानम् ईशित्व-गुणवत् अणिमादिकषड्गुणैश्वर्यं युक्तम् । मायया सर्वभूतमपि असंश्रयं निराधारम् । अत एव जिह्वादृग्भ्यां इयत्तया गोचरं न भवति तं नताः

पराशर उवाच ।

एवं प्रचेतसो विष्णुं स्तुवन्तस्तत्समाधयः ।
दशवर्षसहस्राणि तपश्चेरुर्महार्णवे ॥ ४४ ॥
ततः प्रसन्नो भगवांस्तेषामन्तर्जले हरिः ।
ददौ दर्शनमुन्निद्रनीलोत्पलदलच्छविः ॥ ४५ ॥
पतत्रिराजमारूढमवलोक्य प्रचेतसः
प्रणिपेतुः शिरोभिस्तं भक्तिभारावनामितैः ॥ ४६ ॥
ततस्तानाह भगवान् व्रियतामीप्सितो वरः ।
प्रसादसुमुखोऽहं वो वरदः समुपस्थितः ॥ ४७ ॥
ततस्तमूचुर्वरदं प्रणिपत्य प्रचेतसः ।
यथा पित्रा समादिष्टं प्रजानां वृद्धिकारणम् ॥ ४८ ॥
स चापि देवस्तं दत्त्वा यथाभिलषितं वरम् ।
अन्तर्धानं जगामाशु ते च निश्चक्रमुर्जलात् ॥ ४९ ॥

पञ्चदशोऽध्यायः ।

पराशर उवाच ।

तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥ १ ॥

यः ॥ ४३ ॥ तांस्तद्वि [illegible] समाधिविशेषात् [illegible] येषां ते तत्समाधयः ॥४४॥

प्रचेतःसु तपश्चरत्सु सत्सु पितरि च नारदात् सत्त्वज्ञानं प्राप्य राज्यं त्यक्त्वा वनं गते पृथ्वीति पूर्वेणान्वयः । तदुक्तम् । "प्राचीनबर्हिषं कर्मकाण्डप्रवृत्तम् । नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत्" इत्यादिना पुरञ्जनाख्यानेन । अरक्ष्यमाणां पृथिवीं कर्षणाद्यभावात् महीरुहा

नाशकन्मारुतो वातुं वृतं खमभवद्द्रुमैः ।
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः ॥ २ ॥
तद्दृष्ट्वा जलनिष्क्रान्ताः सर्वे क्रुद्धाः प्रचेतसः ।
मुखेभ्यो वायुमग्निञ्च तेऽसृजन् जातमन्यवः ॥ ३ ॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ।
तानग्निरदहद्घोरस्तत्राभूद्द्रुमसंक्षयः ॥ ४ ॥
द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन् ॥ ५ ॥
कोपं यच्छत राजानः ! शृणुध्वञ्च वचो मम ।
सन्धानं वः करिष्यामि सह क्षितिरुहैरहम् ॥ ६ ॥
रत्नभूता च कन्येयं वार्क्षेयी वरवर्णिनी ।
भविष्यं जानता पूर्वं मया गोभिर्विवर्द्धिता ॥ ७ ॥
मारिषा नाम नाम्नैषा वृक्षाणामिति निर्मिता ।
भार्या वोऽस्तु महाभागा ध्रुवं वंशविवर्द्धिनी ॥ ८ ॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।

आवृतमभूत् ॥ १ ॥ २ ॥ शाखोऽस्त्रे स्तम्भैः प्रचोदनयात् समच्छन्ना-
दिति ॥ ३ ॥ सोमो वृक्षाणां राजा । प्रजापतीन् रक्षणेन कल्पम-
पवादिभिः प्रजाहितकारिणो वृक्षाणां दाहः प्रजानाशकानां युष्माकम्
अनुचित इति भावोऽवाशः सूचितः ॥ ५ ॥ कोपं यच्छत नियच्छत ॥६॥
तपःप्रदानेन सन्धानं करोति, रत्नभूतेति । वार्क्षेयी वृक्षजा । भविष्यम्,
एवं युष्माकं पत्नी भविष्यति, यस्यां दक्षो जनिष्यते तद्वंशेन च त्रिलोकी
पूरयिष्यत इत्यादि जानता मया गोभिः सुधामयैः रश्मिभिः संवर्धिता ॥७॥
नाम्ना मारिषा वृक्षाणामेषा कन्या इति नाम । एवं हि पत्नीत्वे
निर्मिता निष्पादिता ॥ ८ ॥ युष्माकं तपोबलस्य सोमस्य तेजसोऽर्द्धेन

अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥ ९ ॥
मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ।
अग्निनाग्निसमो भूयः प्रजाः संवर्धयिष्यति ॥ १० ॥
कण्डुर्नाम मुनिः पूर्वमासीद् वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥ ११ ॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥ १२ ॥
क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम् ।
अतिष्ठन् मन्दरद्रोण्यां विषयासक्तमानसः ॥ १३ ॥
सा तं प्राह महात्मानं गन्तुमिच्छाम्यहं दिवम् ।
प्रसादसुमुखो ब्रह्मन् ! अनुज्ञां दातुमर्हसि ॥ १४ ॥
तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः ।
दिनानि कतिचिद् भद्रे ! स्थीयतामित्यभाषत ॥ १५ ॥
एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना ॥ १६ ॥
अनुज्ञां देहि भगवन् ! व्रजामि त्रिदिवालयम् ।

प्राचेतसैर्दशभिः वृक्षसकाशात्तथा मम च तेजसोऽंशेन संयुक्तोऽस्यामुत्पत्स्यते ॥ ९ ॥ एतदेव सौम्येन ममांशेन युष्मत्तेजोमयेन चाग्निना संयुक्तोऽग्निवत्तेजस्वी अग्निवत् अप्रतिहतो भूत्वा प्रजाः संवर्धयिष्यतीत्यर्थः ॥ १० ॥ अथैवं प्रष्टव्यं तेषां कथमेषा मारिषा कण्डोरिति, तथा हि कण्डोस्तपःक्षोभेन वीर्येण अप्सरोगर्भसंभूता अतः कथमेषा च अयोनिजा च देवी, न तु मानुषी । न तु मनुष्यादेवापत्यसंभोगो विरुद्धमिति, विष्णोः प्रसादात् मारिषा मनुष्यः पतिर्न दुष्यतीति दर्शयितुं कथा कण्ड्वादिवं तत्र प्राह, कण्डुर्नाम इत्यादिना सुरम्ये गोमतीतीरे तपस्

उक्तस्तयेति स मुनिः स्थीयतामित्यभाषत ॥ १७ ॥
पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् ! प्रणयस्मितशोभनम् ॥ १८ ॥
उक्तस्तयैवं स मुनिरुपगुह्यायतेक्षणाम् ।
प्राहास्यतां क्षणं सुभ्रु ! चिरं कालं गमिष्यसि ॥ १९ ॥
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किञ्चिदूनं वर्षाणामन्वतिष्ठत ॥ २० ॥
गमनाय महाभागो देवराजनिवेशनम् ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥ २१ ॥
तं सा शापभयाद्भीता दाक्षिण्येन च दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्तिवेदनी न जहौ मुनिम् ॥ २२ ॥
तया च रमतस्तस्य महर्षेस्तदहर्निशम् ।
नवं नवमभूत् प्रेम मन्मथाविष्टचेतसः ॥ २३ ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रामन्तञ्च कुत्रेति गम्यते प्राह सा शुभा ॥ २४ ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
सन्ध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत् ॥ २५

रम्भेण ॥ १६ ॥ तस्य क्षोभाय चित्तविकारेण तपोनाशाय ॥१७।१८॥ उपगुह्य प्राह, रम्भेन संभोगातिरेकाद्दनुरागातिरेकं दर्शयति । चिर-कालं गमिष्यसि, गता यतो योऽपि नागमिष्यतीत्यर्थः ॥ १९ ॥ अन्व-तिष्ठत् अनुवर्तमानातिष्ठदित्यर्थः ॥ २० ॥ देवराजनिवेशनम् । प्रतिगमनाय ॥ २१ ॥ दाक्षिण्येति । "या गौरवं भयं प्रेम सद्भावं पूर्वनायके । न मुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैः ॥" तद्भावो दाक्षिण्यं तेन ॥ २२ ॥ २३ ॥ उटजात् पर्णशालातः ॥ २४ ॥ परिहसन् उपहा-

ततः प्रहस्य मुदिता तं सा प्राह महामुनिम् ।
किमद्य सर्वधर्मज्ञ ! परिवृत्तमहस्तव ? ॥ २६ ॥
बहूनां विप्र ! वर्षाणां परिणाममहस्तव ।
गतमेतन् न कुरुते विस्मयं कस्य कथ्यताम् ॥ २७ ॥

मुनिरुवाच ।

प्रातस्त्वमागता भद्रे ! नदीतीरमिदं शुभम् ।
मया दृष्टासि तन्वङ्गि ! प्रविष्टा च ममाश्रमम् ॥ २८ ॥
इयञ्च वर्त्तते सन्ध्या परिणाममहर्गतम् ।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥ २९ ॥

प्रम्लोचोवाच ।

प्रत्यूषस्यागता ब्रह्मन् ! सत्यमेतन् न तं मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥ ३० ॥

सोम उवाच ।

ततः ससाध्वसो विप्रस्तां पप्रच्छायतेक्षणाम् ।
कथ्यतां भीरु ! कः कालस्त्वया मे रमतः सह ॥ ३१ ॥

प्रम्लोचोवाच ।

सप्तोत्तराण्यतीतानि नववर्षशतानि ते ।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम् ॥ ३२ ॥

तव आश्रमम् ॥ २५ ॥ विस्मयेन प्रहस्य सर्वधर्मज्ञेति चोपालम्भ संबोध्य । विवृत्तं गतप्रायः परिवृत्तम्, इत्याह ॥ २६ ॥ विस्मयहेतुं स्वयमेव स्फुटयति, बहूनामिति एतद् बहुभिर्वर्षैः परिणामं गतं तथापि दोर्घमहः कस्य विस्मयं न कुरुते तदिदं कथ्यताम् ॥ २७ ॥ २८ ॥ सद्भावः परमार्थः ॥ २९ ॥ किन्तु प्रत्यूषःकालोऽद्यागता तस्य कालस्य ॥ ३० ॥ सर्वदोषापराधेन ससाध्वसो विप्रस्तां पप्रच्छ, कः कालः कियान् मतः

ऋषिरुवाच ।

सत्यं भीरु ! वदस्येतत् परिहासोऽथवा शुभे ! ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥ २३ ॥

प्रम्लोचोवाच ।

वदिष्याम्यनृतं ब्रह्मन् ! कथमत्र तवान्तिके ।
विशेषेणाद्य भवता पृष्टा मार्गानुवर्त्तिना ॥ २४ ॥

सोम उवाच ।

निशम्य तद् वचः सत्यं स मुनिर्नृपनन्दनाः ! ।
धिङ् मां धिङ् मामतीवेत्थं निनिन्दात्मानमात्मना ॥ २५ ॥

मुनिरुवाच ।

तपांसि मम नष्टानि, हृतं ब्रह्मविदां धनम् ।
हृतो विवेकः, केनापि योषिन्मोहाय निर्मिता ॥ २६ ॥
ऊर्म्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
मतिरेषा हृता येन, धिक् तं काममहाग्रहम् ॥ २७ ॥
व्रतानि वेदविद्याप्तिकारणान्यखिलानि च ।
नरकग्राममार्गेण सङ्गेनापहृतानि मे ॥ २८ ॥
विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना ।

भावः ॥ २१ ॥ २२ ॥ इहासितम् स्थितम् ॥ २३ ॥ एतावन्तं कालमतिवाह्यापि यतो वदस्यात्म वदिष्यामि । धर्मोपदेष्टा-व्याकुर्वन च पुनः मार्गानुवर्त्तिना पृष्टा सती ॥ २४ ॥ धिग् धिक् आवृत्ति त्वर्थायाम् । धिनिन्द्यत्वं. तद्योगे च द्वितीया ॥ २५ ॥ ब्रह्म-विदां वेदानां ब्रह्म धन हृतं नष्टम् ॥ २६ ॥ "क्षुत्तृष्णे शोकमोहौ च जरामृत्यू षडूर्मयः" इत्येवं शोक षडूर्मिषट्कं तदतिक्रम्य स्थितम् । ब्रह्म यदा मनोजयेन ज्ञेयमित्येवं ज्ञातव्या मतिर्येन हृता तम् ॥ २७ ॥

तामप्सरसमासीनामिदं वचनमब्रवीत् ॥ ३९ ॥
गच्छ पापे ! यथाकामं यत् कार्य्यं तत् कृतं त्वया ।
देवराजस्य मत्क्षोभं कुर्वन्त्या भावचेष्टितैः ॥ ४० ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
सतां साप्तपदं मैत्रमुषितोऽहं त्वया सह ॥ ४१ ॥
अथवा तव को दोषः, किं वा कुप्याम्यहं तव ।
ममैव दोषो नितरां, येनाहमजितेन्द्रियः ॥ ४२ ॥
यया शक्रप्रियार्थिन्या कृतो मे तपसो व्ययः ।
त्वया, धिक् त्वां महामोहमञ्जूषां सुजुगुप्सिताम् ॥४३॥

सोम उवाच ।

यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद् गलत्स्वेदजला सा बभूवातिवेपथुः ॥ ४४ ॥
प्रवेपमानां सततं खिन्नगात्रलतां सतीम्
गच्छ गच्छेति सक्रोधम् उवाच मुनिसत्तमः ॥ ४५ ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।

॥ ३९ ॥ भावः प्रेमभावस्तदनुगमैश्चेष्टितैः, सस्मितैर्भ्रूभङ्गादिभिर्मम क्षोभं कुर्वन्त्या त्वया देवराजस्य यत् कार्य्यं तत् कृतमित्यन्वयः ॥ ४० ॥ मार्ग-सप्तपदानि सहगमनात् मैत्र्यं प्रसिद्धम् । अहं पुनस्त्वया बहुकालम् उषितः स्थितः । अतस्त्वां शापाग्निना नाहं भस्मीकरिष्यामि ॥ ४१ ॥ ४२ ॥ अजितेन्द्रियस्यापि अविचलक्षोभे तदागमनं निमित्तम्, अतस्तामेव पुनः-निमित्तं भवति, वदति, यया त्वया सम्भोगादिभिर्मे तपसो व्ययः कृतः, तां त्वां महामोहस्य मञ्जूषां पेटिकाभूतां धिगित्यन्वयः ॥ ४३ ॥ गलन्ति स्वेदजलानि यस्याः सा, अतिशयेन वेपथुः कम्पो यस्याः सा तथा-भूता च बभूव ॥ ४४ ॥ नानात्वेव गता क्षोभणत्वादिगुणैः, खिन्ना स्वेद-

आकाशगामिनी स्वेदं ममार्ज तरुपल्लवैः ॥ ४६ ॥
वृक्षाद् वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्मार्जमाना गात्राणि गलत्स्वेदजलानि वै ॥ ४७ ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्जगाम स रोमाञ्चस्वेदरूपी तदङ्गतः ॥ ४८ ॥
तं वृक्षा जगृहुर्गर्भम् एकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥ ४९ ॥
वृक्षाग्रगर्भसंभूता मारिषाख्या वरानना ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम् ॥५०॥
कण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचातनया च सा ॥ ५१ ॥
स चापि भगवान् कण्डुः क्षीणे तपसि सत्तमः ।
पुरुषोत्तमाख्यं मैत्रेय ! विष्णोरायतनं ययौ ॥ ५२ ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
ब्रह्मपारमयं कुर्वन् जपमेकाग्रमानसः ।
ऊर्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दनाः ! ॥ ५३ ॥

युक्ता गतवता यथाक्रमम् ॥ ४५ ॥ तदेवं तया गर्भसम्भवहेतुं कण्डुना सम्भोगं तद्गर्भस्य च योनिद्वारं विनैव निःसरणमार्गं स्वेदोद्गमस्य तत्कन्यायाः वृक्षादिकन्यात्वहेतुं वक्तुमाह, सा तु निर्मृष्टिवतीति शब्दैः ॥ ४६ ॥ ४७ ॥ समाहितः सम्यगाहितो निहितः ॥ ४८ ॥ ४९ ॥ तर्हि यागभङ्गस्य कन्येयमित्यनादरं वारयित्वा पुनः प्रम्लोचोत्पन्नभावमाह, स चापीति सार्द्धद्वाभ्याम् ॥ ५१ ॥ ब्रह्मपरः पारमार्थ्य विनिश्चयपरः प्रचुरो यस्मिन् तद् ब्रह्मपारमयम् । यद्वा ब्रह्मणो वेदस्य पारो वेदान्तास्तत्त्वं तद्रूपरिणामभूतम् ॥ ५२ ॥ आरा-

प्रचेतस ऊचुः ।

ब्रह्मपारं मुनेः श्रोतुम् इच्छामः परमं स्तवम् ।
जपता कण्डुना देवो येनाराध्यत केशवः ॥ ५४ ॥

सोम उवाच ।

पारं परं विष्णुरपारपारः परः परेभ्यः परमार्थरूपी ।
स ब्रह्मपारः परपारभूतः परः पराणामपि पारपारः ॥ ५५ ॥

ध्यत आराधितः ॥ ५४ ॥ "संक्षेपतः तत्त्वं विष्णोस्तथा प्रार्थना च वर्ण्यते । ब्रह्मपारस्तवेनैवं कण्डुस्तुष्टोऽभिवाद्य इति ॥" पारं पर-मित्यादि त्रिभिः श्लोकैर्विष्णोस्तत्त्वं संक्षेपेण वर्ण्यते रागादिदोषशमः प्रार्थ्यते । परं निरतिशयम् [illegible], संसाराध्वनः पारमवधि-र्विष्णुः । "सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम्" इति श्रुतेः । अतः अपारपारो दुरन्तस्य संसाराध्वनः पारत्वात् अपारो दुष्प्रापः पारो यस्य स वा । पारतीरमप्राप्नोतीति भावः । तर्हि दीर्घेण कालेन प्राप्यः स्यात् ? तत्राह, परः परेभ्य इति परेभ्य आकाशादिभ्योऽपि परः अनन्त इत्यर्थः । "महतो महीयान्" इति श्रुतेः । अत एव परमार्थरूपी सत्यस्वरूप । यद्वा अर्थः प्रयोजनं परमपुरुषार्थः परमानन्दः स एव । ननु तस्य दुष्प्रापत्वे कथं परमपुरुषता कथं वा "सोऽध्वन पारमाप्नोति" इति श्रुतिः तत्राह स ब्रह्म वेदः तपो वा तत्सहितास्तपस्विनः ब्रह्मपाराः तेषां पारं प्राप्तुं शक्यः । तत् कुतः ? इत्यत्राह, परपारभूतः, परस्मा-त्सूक्ष्मभूतप्रपञ्चस्य पारभूतः अवधिरूपः । तत्र हेतुः । परः पराणाम-पीति आकाशाद्यपेक्षया आत्मत्वेन प्रतीतानामिन्द्रियादीनां परः निरु-पाधिः । परमात्मा "इन्द्रियेभ्यः परा ह्यर्थाः" इत्युपक्रम्य "पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इति श्रुतेः । अयं भावः । न हि आकाशादिवत् महत्ता तत्प्राप्तिः, येन दुरन्तसंसाराध्वपारत्वादनन्तत्वाच्च न प्राप्येत । किन्तु अयं ततोऽतिदूरीभूतोऽपि तपोविशुद्धचित्तैर्वेदोक्तध्या-नेन अन्तर्यामितयाऽऽत्मत्वप्रत्यगात्मत्वादयं प्राप्तुं शक्य इति अत एवोपाधि-

स कारणं कारणतस्ततोऽपि तस्यापि हेतुः परहेतुहेतुः।
कार्य्येषु चैवं सह कर्मकर्त्तृरूपैरशेषैरवतीह सर्वम्॥ ५६॥

परिच्छेदाभावात् निरस्तुयाचिन्त्यपरमैश्वर्य्येण पारपारः। पारश्चासौ पारश्चेति समासः। पृपालनपूरणयोरिति धातोः पार इति रूपम्। अभक्तानां पालनात् पारः। अपेक्षितैर्वरैः पूरणाच्च पार इति द्वितीयपार-शब्दस्यार्थः। यद्वा पाराः पालकाः पूरकाश्च ये इन्द्रब्रह्मादयस्तेषामपि पालकः पूरकश्चायं॥ ५५॥ तदेवं विभूतिरूपेण स्तुत्वा सार्वात्म्येन स्तौति, स कारणमिति। कारणत इति पञ्चम्यर्थे तसिल्। स विष्णुः कारणस्यापि कारणं तस्यापि कारणमित्येवं परापरकारणं ब्रह्मादि-मारभ्य मूलकारणपर्य्यन्तं कारणमात्रात्मकः। यथोक्तं ब्रह्मस्तुतौ "कारणं कारणस्यापि तस्य कारणम्" इत्यादि। कार्य्येषु चैवमित्यनेन प्रकृतिकार्य्यं महत्तत्त्वमारभ्य चरमकार्य्यपर्य्यन्तं कार्य्यमात्रात्मको विष्णुरेवेत्युक्तम्। तदेवं स्तुतिक्रियायाम् उपादानकारणत्वेन तत्-कार्य्यत्वेन च सार्वात्म्यमुक्त्वा पालनक्रियायां पाल्यरूपकर्मतया तत्-कर्त्तृतया वा सार्वात्म्यमाह, स इति। निपातोऽवधारणार्थः। स विष्णुरेव एभिरुक्तरूपैः पालनीयैरनुपालकैश्च कर्म्मकर्त्तृरूपैरशेषैः स्वीयैरुप-लक्षितः सन् सर्वमवतीति। यद्वा कर्मरूपैः कर्मकर्त्तृरूपैश्च। सर्व-मिति कर्मकर्त्तृरूपवाच्यान्तरात्मकत्वातिदेशः। तत्र "कर्त्तुरीप्सिततमं कर्म" इति सूत्रे। कर्त्तुः क्रियया पाचनगमनादिचरलिक्षया भावनाख्यया यदीप्सिततमं तत् तदेव मुख्यं कर्म अत्र लक्ष्यते। पाचादेस्तु धात्वर्थकर्मतैव न भावनाकर्मता। अत एवास्ते शेते इत्यादिषु अकर्मकेष्वपि धात्वर्थे भावनाप्रतीतेर्भाव्यं विना भावनाभावात्। उक्तञ्च वार्त्तिक-काम्यतां प्रतीतिस्तथार्थद्वयोगेऽन्वयेन सुखं भावयेदित्येवमादि-वचनसामर्थ्यात् सुखादेर्भावनाकर्मत्वम् अभ्युपगम्यते। तदुक्तं भट्टैः। "अकर्मकादपि धातोर्भाव्यमस्त्येव भावना। अन्यस्यापि च नाशादेः न तथा सा प्रकाशते" इति। अतोऽकर्मकेभ्योऽपि भाव्यं स्यात्। कर्त्तृ-त्वकर्मत्वयोर्नेह एतावदिष्ट परिहारयोग्यः। "साध्यादव्यभिचारेण

ब्रह्म प्रभुर्ब्रह्म स सर्वभूतो ब्रह्म प्रजानां पतिरच्युतोऽसौ ।
ब्रह्माक्षरं नित्यमजं स विष्णुः अपक्षयाद्यैरखिलैरसङ्गि ॥ ५७ ॥

ब्रह्माक्षरमजं नित्यं यथासौ पुरुषोत्तमः ।
तथा रागादयो दोषाः प्रयान्तु प्रशमं मम ॥ ५८ ॥

सोम उवाच ।

एतद् ब्रह्मपराख्यं वै संस्तवं परमं जपन् ।
अवाप परमां सिद्धिं समाराध्य स केशवम् ॥ ५९ ॥

पारवर्ती यत्र सर्वमाक् । यद्वर्णेव च धातुः स्यात् पारम्येव तद्वर्णतः" इति । अतोऽक्षवर्णवर्त्तेन देवं ततव्यवस्थाविना ब्रह्मणाम्नायात्म ब्रह्मानन्दरूपं नत्वव्याक्षरापरोऽपि विष्णुरेवैष इत्यम् । तदेवं चारच श्चाखं वर्णैकरूपैः पुंडरीकाक्षशब्दात्मनीमिवत्मकसर्वात्मा वाचोऽक्षर-शुक्लम् । पवतेव रूपैः पावनक्रियात्मतयोनिमित्तमत्संबन्धिपापोद्भवमाच-क्षयेषैरनेकरूपैः स विष्णुः सर्वं भवतीति ॥ ५६ ॥ ननु यदि एवं ब्रह्म-वादी विष्णुरपि स्वयमेवैकरूपैरवतीर्यन्ते ? अथ सर्वात्मकत्वेऽपि सर्वभावविकारप्राप्तेः कथमस्य विशुद्धता ? इत्याशङ्क्याह, ब्रह्मेति । स विष्णुः एव ब्रह्मैव यत् प्रभुः सर्वनियन्ता । ब्रह्मैव यत् सर्वभूतः । ब्रह्मैव यत् प्रजानां पतिश्च पालकः । ननु ब्रह्मरूपापच्युता । यतोऽसा-वच्युतः प्रसिद्धः, अतः स विष्णुः व्यापकश्चेत्यः । सर्वात्मकोऽपि यत् अक्षरं ध्रुवं नित्यमजम् अपक्षयाद्यैरखिलैः अपरिणामविपरिणामवृद्धि-बद्धरहितम् ब्रह्मैव अविद्यमानाधीनमायया सर्वात्मतया न विपद्यते अतो नास्य विरोध इति भावः ॥ ५७ ॥ अक्षरं तत्त्वम् अनुस्मरन्-दोषोपशमं प्रार्थयते ब्रह्माक्षरमिति । यथा निर्विकारं ब्रह्मैवासौ पुरुषोत्तम तथा तदनुस्मरणेन तत्प्रसादात्सत्वात् अरूपाविभावात् यत राग इव: राग आदि यस्य तेषां क्रियाक्षोपयोगमप्याधिदोषाणां, ते सर्वे दोषाः प्रशमेव समूलं प्रशमं नाशं प्रयान्तु ॥ ५८ ॥ ५९ ॥

इयञ्च मारिषा पूर्वम् आसीद् या तां ब्रवीमि वः ।
कार्यगौरवमेतस्याः कथने फलदायि वः ॥ ६० ॥
अपुत्रा प्रागियं विष्णुं मृते भर्त्तरि सत्तमाः ! ।
भूपपत्नी महाभागा तोषयामास भक्तितः ॥ ६१ ॥
आराधितस्तया विष्णुः प्राह प्रत्यक्षतां गतः ।
वरं वृणीष्वेति शुभा सा च प्राहात्मवाञ्छितम् ॥ ६२ ॥
भगवन् ! बालवैधव्याद् वृथाजन्माहमीदृशी ।
मन्दभाग्या समुत्पन्ना विफला च जगत्पते ! ॥ ६३ ॥
भवन्तु पतयः श्लाघ्या मम जन्मनि जन्मनि ।
त्वत्प्रसादात् तथा पुत्रः प्रजापतिसमोऽस्तु मे ॥ ६४ ॥
रूपसम्पत्समायुक्ता सर्वस्य प्रियदर्शना ।
अयोनिजा च जायेयं त्वत्प्रसादादधोक्षज ! ॥ ६५ ॥

सोम उवाच ।

तयैवमुक्तो देवेशो हृषीकेश उवाच ताम् ।
प्रणामनम्रामुत्थाप्य वरदः परमेश्वरः ॥ ६६ ॥

देवदेव उवाच ।

भविष्यन्ति महावीर्या एकस्मिन्नेव जन्मनि ।

इदानीमस्या अनुवर्णितत्वं भवद्भिः प्रसादोऽस्माकम् इति वाच्यो युष्माकं वा किमिदं देव इति यत्राह, इयञ्चेत्यादिना । कार्यगौरवं बहुप्रजत्वाभावम् । एतस्याः कथने सति वो युष्माकं वंशविस्तारोऽल्पफलवद् भविष्यतीत्यर्थः ॥ ६० ॥ प्रागन्यजन्मनि भूपस्य पत्नीयम् । तस्मिन् मृते भर्त्तरि सति, विष्णुं तोषयामास हे सत्तमाः ॥ ६१ । ६२ ॥ वृथैव जन्म यस्याः सा वृथाजन्मा । विफला च अपुत्रा ॥ ६३ ॥ श्लाघ्याः प्रख्यातवंशाः ॥ ६४ ॥ रूपेण सम्पदा च समायुक्ता ॥ ६५ ॥ प्रणा-

प्रख्यातोदारकर्माणो भवत्याः पतयो दश ॥ ६७ ॥
पुत्रञ्च सुमहात्मानम् अतिवीर्य्यपराक्रमम् ।
प्रजापतिगुणैर्युक्तं त्वमवाप्स्यसि शोभने ॥ ६८ ॥
वंशानां तस्य कर्त्तृत्वं जगत्यस्मिन् भविष्यति ।
त्रैलोक्यमखिलं सूतिस्तस्य चापूरयिष्यति ॥ ६९ ॥
त्वञ्चाप्ययोनिजा साध्वी रूपौदार्य्यगुणान्विता ।
मनःप्रीतिकरी नृणां मत्प्रसादाद् भविष्यसि ॥ ७० ॥
इत्युक्त्वान्तर्दधे देवस्तां विशालविलोचनाम् ।
सा चेयं मारिषा जाता युष्मत्पत्नी नृपात्मजाः ॥ ७१ ॥

पराशर उवाच ।

ततः सोमस्य वचनात् जगृहुस्ते प्रचेतसः ।
संहृत्य कोपं वृक्षेभ्यः पत्नीं धर्म्मेण मारिषाम् ॥ ७२ ॥
दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः ।
जज्ञे दक्षो महाभागो यः पूर्वं ब्रह्मणोऽभवत् ॥ ७३ ॥
स तु दक्षो महाभागः सृष्ट्यर्थं सुमहामते ।
पुत्रान् उत्पादयामास प्रजासृष्ट्यर्थमात्मनः ॥ ७४ ॥
अवरांश्च वरांश्चैव द्विपदोऽथ चतुष्पदान् ।
आदेशं ब्रह्मणः कुर्वन् सृष्ट्यर्थं समुपस्थितः ॥ ७५ ॥

येन नष्टाम् ॥ ६६ ॥ जन्मभेदेन तथा बहुपतिप्रार्थने कृतेऽपि धर्म-स्मृत्या पुनर्जन्मान्तरमपेक्षमाणो विष्णुरेकस्मिन्नेव जन्मनि तं वरं ददौ, तदाह, एकस्मिन्नेव जन्मनीति ॥ ६७ ॥ ॥ ६८ ॥ सूतिः सन्ततिः ॥ ६९ ॥ साध्वी पतिव्रता ॥ ७० ॥ ॥ ७१ ॥ ॥ ७२ ॥ यः पूर्वं ब्रह्मणः पुत्रो बभूव, स दक्षो मारिषायां जज्ञे ॥ ७३ ॥ सृष्ट्यर्थं प्रजापत्यधिकारनिर्वहणार्थम्, आत्मनश्च प्रजासृष्ट्यर्थं सन्तानार्थम् ॥ ७४ ॥ अवरान् नीचान्, वरान्

स सृष्ट्वा मनसा दक्षः पश्चादसृजत स्त्रियः ।
ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ ७६ ॥
कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे ।
तासु देवास्तथा दैत्या नागा गावस्तथा खगाः ॥ ७७ ॥
गन्धर्वाप्सरसश्चैव दानवाद्याश्च जज्ञिरे ।
ततः प्रभृति मैत्रेय ! प्रजा मैथुनसम्भवाः ॥ ७८ ॥
सङ्कल्पाद् दर्शनात् स्पर्शात् पूर्वेषामभवन् प्रजाः ।
तपोविशेषैः सिद्धानां तदात्यन्ततपस्विनाम् ॥ ७९ ॥

मैत्रेय उवाच ।

अङ्गुष्ठाद् दक्षिणाद् दक्षः पूर्वं जातः श्रुतं मया ।
कथं प्राचेतसो भूयः स सम्भूतो महामुने ! ॥ ८० ॥
एष मे संशयो ब्रह्मन् ! सुमहान् हृदि वर्त्तते ।
यद् दौहित्रः स सोमस्य पुनः श्वशुरतां गतः ॥ ८१ ॥

स्थैर्याम् । स्वचरांश्च चरांश्चेति वा पाठः ॥ ७५ ॥ पश्चात् स्वयंसृष्टि-पुत्रनाशानन्तरं स्त्रियः कन्याः असृजत् । तासां मध्ये पश्चादनु-कन्यानां विवाहान् वंशांश्च प्रदर्शनार्थमुपक्षिपति, ददाविति द्वाभ्याम् ॥ ७६ ॥ कालस्य नयने परिवर्त्तने युक्ता नियुक्ताः अश्विन्याद्याः । तदुक्तम् । "अश्विन्यादीनि नक्षत्राणि इन्दोः पत्न्यस्तु भारत !" इति ॥ ७७ ॥ ततो दक्षात् प्रभृति ॥ ७८ ॥ दक्षात् पूर्वेषान्तु सङ्कल्पादिमात्रात् प्रजा अभवन् । यद्यपि प्राचेतसात् दक्षात् पूर्वमपि मैथुनधर्मोऽस्त्येव, तथापि बाहुल्याभि-प्रायेणैतदुक्तम्, इत्यविरोधः ॥ ७९ ॥ ८० ॥ सोमदुहितृमारिषायाः पुत्रत्वात् सोमस्य दौहित्रः । पुनश्च सप्तविंशतिमिन्दवे ददाविति वचनैः श्वशुरतां गत इति यत्, एषोऽत्र संशय इत्यर्थः । दौहित्रश्चेति पाठे दक्षकन्यायामवस्थानात् चन्द्रः सोमस्योपपत्तेर्दक्षस्य दौहित्रः ।

पराशर उवाच ।

उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु सत्तम ! ।
ऋषयोऽत्र न मुह्यन्ति ये चान्ये दिव्यचक्षुषः ॥ ८२ ॥
युगे युगे भवन्त्येते दक्षाद्या मुनिसत्तमाः ।
पुनश्चैवं निरुध्यन्ते विद्वांस्तत्र न मुह्यति ॥ ८३ ॥
कानिष्ठ्यं ज्यैष्ठ्यमप्येषां पूर्वं नाभूद् द्विजोत्तम ! ।
तप एव गरीयोऽभूत् प्रभावश्चैव कारणम् ॥ ८४ ॥

मैत्रेय उवाच ।

देवानां दानवानाञ्च गन्धर्वोरगरक्षसाम् ।
उत्पत्तिं विस्तरेणेह मम ब्रह्मन् ! प्रकीर्त्तय ॥ ८५ ॥

पराशर उवाच ।

प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयम्भुवा ।
यथा ससर्ज भूतानि तथा शृणु महामते ! ॥ ८६ ॥

सोमस्य पुनर्दक्षः श्वशुरतां कथं गतः ? इति ॥ ८१ ॥ नित्यौ प्रवाह-रूपेणाविच्छिन्नौ ॥ ८२ ॥ दक्षाद्या इत्यादिग्रन्थेन शोको लक्ष्यते । एते युगे युगे भवन्ति सर्व्वातिशयवन्तु भवन्ति । निरुध्यन्ते कुत्रचित् तिष्ठन्ति इत्यर्थः । युगे युग इति युगान्तेऽपि तु यथा एवं स्थानं यान्तीति, युगपद कल्पमन्वन्तरादिः कालः । स्वायम्भुवमन्वन्तरे ब्रह्म दक्षस्य पुनश्चाक्षुषमन्वन्तरे प्रचेतोभ्यो जन्मप्रसिद्धेः । एवमेषामेः ब्रह्मा-याद् जातस्य सोमस्य पुनः सोमाद्यैः ब्रह्मायाद् जन्मप्रसिद्धेर्न विरोधः ॥ ८३ ॥ न चास्मत्कल्पनिष्ठे श्वशुरे पूज्यपूज्यातिक्रमायशङ्काय ज्यानिष्ठं त्वि । गरीयो गुरुतरं तपश्च प्रभावश्च ज्यैष्ठ्यकारणमभूत्, न तु वयोजातम् इत्यर्थः ॥ ८४ ॥ देवादीनां विस्तरेण विस्तारः श्रूयत इति, देवानामिति । इह व्यस्तम् प्राचेतसे दक्षे या देव.दानव.उत्-

मानसानि तु भूतानि पूर्वं दक्षोऽसृजत् तदा ।
देवानृषीन् सगन्धर्वान् असुरान् पन्नगांस्तथा ॥ ८७ ॥
यदास्य द्विज ! मानस्यो नाभ्यवर्द्धन्त ताः प्रजाः ।
ततः सञ्चिन्त्य स पुनः सृष्टिहेतोः प्रजापतिः ॥ ८८ ॥
मैथुनेनैव धर्मेण सिसृक्षुर्विविधाः प्रजाः ।
असिक्नीमावहत् कन्यां वीरणस्य प्रजापतेः ॥ ८९ ॥
सुतां सुतपसा युक्तां महतीं लोकधारिणीम् ।
अथ पुत्रसहस्राणि वैरिण्यां पञ्च वीर्य्यवान् ॥ ९० ॥
असिक्न्यां जनयामास सर्गहेतोः प्रजापतिः ।
तान् दृष्ट्वा नारदो विप्रः संविवर्द्धयिषून् प्रजाः ।
सङ्गम्य प्रियसंवादो देवर्षिरिदमब्रवीत् ॥ ९१ ॥

नारद उवाच ।

हे हर्य्यश्वाः ! महावीर्य्याः प्रजा यूयं करिष्यथ ।
ईदृशो लक्ष्यते यत्नो भवतां श्रूयतामिदम् ॥ ९२ ॥
बालिशा बत यूयं वै नास्या जानीत वै भुवः ।
अन्तरूर्द्ध्वमधश्चैव कथं स्रक्ष्यथ वै प्रजाः ? ॥ ९३ ॥
ऊर्द्ध्वं तिर्य्यगधश्चैव यदाप्रतिहता गतिः ।

असिक्नीं वीरणस्य दुहितरमित्यर्थः ॥ ८९ ॥ ९० ॥ प्रजाः स्रष्टुम् विवर्द्धयिषून् तान् देवर्षिर्नारदः अब्रवीत् ॥ ९१ ॥ ९२ ॥ बालिशा बलिष्ठावादेवं बालबोऽन्तः । बतेति खेदे । तेषां तत्त्वविमर्शं विना प्रजासृष्ट्यादिकं यत्न इ॰ । अहो ! यूयं बालिशाः अज्ञाः । यतोऽस्या भुवः संसारात् स्वस्वरूपेणाच विस्तृतरीत्याऽथ उपक्रमम्, अधश्चावसानम्, अन्तः मध्यञ्च न जानीत । अतो पौर्वापर्यम् अज्ञात्वा कथं प्रजाः स्रक्ष्यथ ? अर्थं संसारोपपादकं प्रजावर्गं किमिति करिष्यथ ? ॥ ९३ ॥

तदा कस्माद् भुवो मानं सर्वे द्रक्ष्यथ बालिशाः ! ॥९४॥

पराशर उवाच ।

ते तु तद् वचनं श्रुत्वा प्रयाताः सर्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥ ९५ ॥
हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः ।
वैरिण्यामथ पुत्राणां सहस्रमसृजत् प्रभुः ॥ ९६ ॥
विवर्द्धयिषवस्ते तु शवलाश्वाः प्रजाः पुनः ।
पूर्वोक्तं वचनं ब्रह्मन् ! नारदेन प्रचोदिताः ॥ ९७ ॥
अन्योऽन्यमूचुस्ते सर्वे सम्यगाह महामुनिः ।
भ्रातॄणां पदवी चैव गन्तव्या नात्र संशयः ॥ ९८ ॥
ज्ञात्वा प्रमाणं पृथ्व्याश्च प्रजाः स्रक्ष्यामहे ततः ।
तेऽपि तेनैव मार्गेण प्रयाताः सर्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥ ९९ ॥

एवञ्च पितृवचनोल्लङ्घनात् तत्त्वज्ञानाधिकारिण एवेत्याह अधश्चेति । अधश्च तिर्य्यगधश्च सर्वतस्तत्त्वविचारे यदा इदानीमज्ञानानि युष्माकं गतिर्बुद्धिरप्रतिहता वर्त्तते, तदा कस्माद् भुवो लिङ्गशरीरस्यान्तं न द्रक्ष्यथ? लिङ्गभङ्गपर्य्यन्तं तत्त्वज्ञाने क्रियेति यत्र न परिच्छेदार्थः । तदुक्तं भागवते हर्य्यश्वान् प्रति नारदोक्तिविवरणे । "भूः क्षेत्रं जीवसंज्ञं यद् अनादिनिजबन्धनम् अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ?" इत्यादि ॥ ९४ ॥ सर्वतो दिशं प्रयाता अधऊर्द्धतया सर्वासु दिक्षु चेरुः अचरन् । ततश्च मुक्तत्वात् नाद्यापि निवर्त्तन्ते ॥ ९५ ॥ नष्टेषु क्वापि गतेषु ॥ ९६ ॥ पूर्वोक्तं, बालिशा भवतेत्यादिवचनं प्रचोदिताः प्रेरिताः तत्र अन्यु भ्रातॄणां ज्येष्ठानां गुरूणां पदवी मोक्षमार्गः ॥ ९८ ॥ पृथ्व्याः प्रमाणं लिङ्गशरीरावसानं ज्ञात्वा ततः पश्चात् पितुराज्ञापालनेन लोकसंग्रहार्थं प्रजाः स्रक्ष्यामहे इति वाक्यशेषोऽर्थः । यथाश्रुतोऽर्थः ।

ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज ! ।
प्रयातो नश्यति तथा तन्न कार्यं विजानता ॥ १०० ॥
तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः ।
क्रोधं चक्रे महाभागो नारदं स शशाप च ॥ १०१ ॥
सर्गकामस्ततो विद्वान् स मैत्रेय ! प्रजापतिः ।
षष्टिं दक्षोऽसृजत् कन्या वैरिण्यामिति नः श्रुतम् ॥ १०२ ॥
ददौ स दश धर्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमिने ॥ १०३ ॥
द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा ।
द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु ॥ १०४ ॥
अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च ता दश ॥ १०५ ॥
धर्मपत्न्यो दश त्वेतास्तासामपत्यानि मे शृणु ।
विश्वेदेवास्तु विश्वायाः साध्या साध्यान् व्यजायत ॥ १०६ ॥
मरुत्वत्यां मरुत्वन्तो वसोस्तु वसवः स्मृताः ॥ १०७ ॥
भानोस्तु भानवः पुत्रा मुहूर्त्तायां मुहूर्त्तजाः ।
लम्बायाश्चैव घोषोऽथ नागवीथी तु यामिजा ॥ १०८ ॥

भ्रातृ पथ ॥ ९९ ॥ महर्षिप्रश्नेचैवाह, ततः प्रभृतीति । मार्गं न यद्येवं यातीति ॥ १०० ॥ नारदशापश्च भागवतोक्तः 'तस्मात् लोकेषु ते मूढ ! न भवेद् भ्रमतः पदम्' इति ॥ १०१ ॥ कन्यानां वंशान् वक्तुमाह, दक्षोऽसृजदित्यादिना । सप्तविंशति इति द्वितीयार्थे षष्ठी ॥ १०२ ॥ १०३ ॥ पूर्वोक्ताः [illegible] धर्मस्य पत्न्यः [illegible] दश कन्याः । [illegible] ॥ १०५ ॥ १०७ ॥ मुहूर्तं [illegible] मुहूर्ताभिमानिनो देवाः, [illegible] देवाः, नाम

पृथिवीविषयं सर्वम् अरुन्धत्यां व्यजायत ।
सङ्कल्पायान्तु सर्वात्मा जज्ञे सङ्कल्प एव तु ॥ १०९ ॥
ये त्वनेकवसुप्राणा देवा ज्योतिःपुरोगमाः ।
वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरम् ॥ ११० ॥
आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः ॥ १११ ॥
आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तो ध्वनिस्तथा ।
ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः ॥ ११२ ॥
सोमस्य भगवान् वर्चा वर्चस्वी येन जायते ।
धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ॥ ११३ ॥
मनोहरायाः शिशिरः प्राणोऽथ वरुणस्तथा ।
अनिलस्य शिवा भार्य्या तस्याः पुत्रो मनोजवः ॥ ११४ ॥
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य च ।
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत ॥ ११५ ॥
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः ।

योऽसौ देवयानोऽसरणीत्यभिधानिनी देवता ॥ १०८ ॥ पृथिव्येव विषयः स्थानं यस्य चराचरप्राणिजातस्य तत् सर्वम् । सर्वात्मा सर्ववस्तुविषयः ॥ १०९ ॥ वसूनामष्टानां नामपूर्वकं वंशानु वक्तुमाह, विश्वरूपो यथा-यथा इत्यन्तेन । अनेकं नानाविधं वसु तेजएव प्राणो बलं येषां ते अनेकवसुप्राणा इति वसुनामनिरुक्त्यर्थमुक्तम् । ज्योतिः पुरोगमा अग्निमुख्याः "वसूनां पावकश्चास्मि" इति स्मृतेः ॥ ११० ॥ १११ ॥ आपस्य वैतण्ड्यादयश्चत्वारः पुत्राः । लोकप्रकालनः कालः ॥ ११२ ॥ येन वर्चसा वर्चस्वी कान्तिमान् पुरुषो जायते सः । धरस्य भार्य्या मनोहरा । पुत्राश्च द्रविणादयः पञ्च । हुतं हव्यं वहतीति तथा ॥ ११३ ॥ ११४ ॥ शरा उशीराख्य तृणं ॥ ११५ ॥ पृष्ठजाः अनुजाः कुमारस्य पृष्ठजाः

अपत्यं कृत्तिकानान्तु कार्त्तिकेय इति स्मृतः ॥ ११६ ॥
प्रत्यूषस्य विदुः पुत्रम् ऋषिं नाम्नाथ देवलम् ।
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ ॥ ११७ ॥
बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ।
योगसिद्धा जगत्कृत्स्नमसक्ता विचरत्युत ॥ ११८ ॥
प्रभासस्य तु सा भार्य्या वसूनाम् अष्टमस्य च ।
विश्वकर्मा महाभागस्तस्यां जज्ञे प्रजापतिः ॥ ११९ ॥
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः ।
भूषणानाञ्च सर्व्वेषां कर्त्ता शिल्पवतां वरः ॥ १२० ॥
यः सर्व्वेषां विमानानि देवतानां चकार ह ।
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः ॥ १२१ ॥
तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ।
त्वष्टुश्चाप्यात्मजः पुत्रो विश्वरूपो महायशाः ॥ १२२ ॥
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥ १२३ ॥
मृगव्याधश्च शर्व्वश्च कपाली च महामुने ।
एकादशैते प्रथिता रुद्रास्त्रिभुवनेश्वराः ॥ १२४ ॥

तदुक्तं महाभारते "ततोऽभवत् चतुर्मूर्त्तिः क्षणेन भगवान् गुहः" इति कुमार एव कार्त्तिकेय इति ख्यातः ॥ ११६ ॥ ११७ ॥ बृहस्पते- र्भगिनी प्रभासस्य भार्य्या । वरस्त्री ब्रह्मचारिणी ॥ ११८ ॥ तस्यां विश्व- कर्म्मा ॥ ११९ ॥ १२० ॥ १२१ ॥ अजैकपादादयश्चत्वारो जज्ञिरे ॥१२२॥ [illegible] रुद्रस्य बहुरूपादयश्च विभागभाग्, हरश्चेति द्वाभ्याम् ॥ १२४ ॥

शतं त्वेवं समाख्यातं रुद्राणाममितौजसाम् ।
अदितिर्दितिर्दनुः काला अरिष्टा सुरसा तथा ॥१२५॥
सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा ।
कद्रुर्मुनिश्च धर्मज्ञ ! तदपत्यानि मे शृणु ॥ १२६ ॥
पूर्वमन्वन्तरे श्रेष्ठा द्वादशासन् सुरोत्तमाः ।
तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे ॥ १२७ ॥
उपस्थितेऽतियशसश्चाक्षुषस्यान्तरे मनोः ।
समवायीकृताः सर्वे समागम्य परस्परम् ॥ १२८ ॥
आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै ।
मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति ॥ १२९ ॥
एवमुक्त्वा तु ते सर्वे चाक्षुषस्यान्तरे मनोः ।
मारीचात् कश्यपात् जातास्ते ऽदित्या दक्षकन्यया ॥१३०॥

एषामेकैकादशानां प्रत्येकं शतं भेदानाह, शतं त्वेवमिति । यद्वा एतद् विभूतिरूपाणामानन्त्यमुच्यते । शतशब्दस्य अपरिमितवचनत्वात् । असंख्याता सहस्राणि ये रुद्राः "अधिभूम्याम्" इति श्रुतेश्च । तदेवं सर्वभूतानां वंशा उक्ताः । इदानीं कश्यपाद् त्रयोदशस्य कान्ता वंशान् वक्तुमाह, अदितिरित्यादिना ॥ १२५ ॥ १२६ ॥ तत्र तुषिता एवादितेः पुत्रा जाता इति कथाप्रसङ्गमाह । पूर्वमन्वन्तरे चाक्षुषे ये तुषिता नाम देवा आसन्, ते चाक्षुषस्य मनोरन्तरे वर्तमाने वैवस्वतमन्वन्तरे उपस्थिते आसन्ने सति परस्परं समागम्य अन्योऽन्यं पार्श्वं गत्वा समवायीकृता मिलिताः सन्तोऽन्योन्यमूचुरिति द्वयोरन्वयः ॥ १२७ ॥ अतियशसः प्रख्यातकीर्तेः ॥ १२८ ॥ किमूचुस्तदाह, आगच्छतेति । वैवस्वतमन्वन्तरे प्रसूयाम उत्पद्येमहि । किमर्थमित्यत्राहुः, तत् ततः पुनरपि देवाधिकार-प्राप्त्या नः श्रेयो भद्रं भविष्यतीति ॥ १२९ ॥ चाक्षुषस्य मनोरन्तरे

तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च ।
अर्य्यमा चैव धाता च त्वष्टा पूषा तथैव च ॥ १३१ ॥
विवस्वान् सविता चैव मित्रो वरुण एव च ।
अंशो भगश्चादितिजा आदित्या द्वादश स्मृताः ॥१३२॥
चाक्षुषस्यान्तरे पूर्वम् आसन् ये तुषिताः सुराः ।
वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः ॥ १३३ ॥
सप्तविंशतिः याः प्रोक्ताः सोमपत्न्योऽथ सुव्रताः ।
सर्वा नक्षत्रयोगिन्यस्तन्नाम्न्यश्चैव ताः स्मृताः ॥ १३४ ॥
तासामपत्यान्यभवन् दीप्तान्यमिततेजसाम् ।
अरिष्टनेमिपत्नीनाम् अपत्यानीह षोडश ॥ १३५ ॥
बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ।
प्रत्यङ्गिरसजाः श्रेष्ठा ऋचो ब्रह्मर्षिसत्कृताः ॥ १३६ ॥

पुनश्च वैवस्वतमन्वन्तरे अदित्या निमित्तभूतया कश्यपात् जाता इत्यर्थः ॥ १३० ॥ १३१ ॥ चाक्षुषे तुषिता ये द्वादशादित्याः ख्याता इत्युपसंहरति ॥ १३३ ॥ एवं तावद्दत्ता धर्माय दशाद्य ददौ द्वादशादित्या इत्यादि श्रुतिश्च भेवादित्यानामुत्पत्त्यादित्या वंश उक्तः । इदानीं अदितिरिति कश्यपभार्य्याद्विचारेण दित्या वंशं क्रमप्राप्तमपि दनुः इत्यादिना बहुवक्तव्यत्वेन पश्चाद् वक्ष्यन् आदौ तावदल्पत्वात् अन्यासां दक्षकन्यानां वंशमाह, याः सप्तविंशतिः प्रोक्ता इत्यादि सार्द्धैः पञ्चभिः ॥ १३४ ॥ तासाममिततेजसां दीप्तान्यपत्यान्यभवन् । पाठान्तरे अमिततेजसो ऽपत्यानि दीप्तान्यभवन् इत्यर्थः । तनयोऽरिष्टनेमेश्च इत्युक्तानां वंशमाह, अरिष्टनेमीति ॥ १३५ ॥ द्वे चैव बहुपुत्रस्य इत्युक्तयोर्वंशमाह, बहुपुत्रस्येति । चतस्रो विद्युतस्तु "वाताय कपिला विद्युद् आतपायातिलोहिता । पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्" इति ज्योतिःशास्त्रे प्रसिद्धा । द्वे चैवाङ्गिरस इत्युक्तयोर्वंशमाह, प्रत्यङ्गि-

कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः स्मृताः ।
एते युगसहस्रान्ते जायन्ते पुनरेव हि ॥ १३७ ॥
सर्वे देवगणास्तात ! त्रयस्त्रिंशत् तु छन्दजाः ।
तेषामपीह सततं निरोधोत्पत्तिरुच्यते ॥ १३८ ॥
यथा सूर्य्यस्य मैत्रेय ! उदयास्तमयाविह ।
एवं देवनिकायास्ते संभवन्ति युगे युगे ॥ १३९ ॥
दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम् ।
हिरण्यकशिपुश्चैव हिरण्याक्षश्च दुर्जयः ॥ १४० ॥
सिंहिका चाभवत् कन्या विप्रचित्तेः परिग्रहः ।
हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः ॥ १४१ ॥
अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव बुद्धिमान् ।
संह्लादश्च महावीर्य्या दैत्यवंशविवर्धनाः ॥ १४२ ॥
तेषां मध्ये महाभाग ! सर्वत्र समदृग् वशी ।
प्रह्लादः परमां भक्तिं य उवाह जनार्दने ॥ १४३ ॥
दैत्येन्द्रदीपितो वह्निः सर्वाङ्गोपचितो द्विज ! ।

रणज्ञा इति । ऊर्ध्वरेतसामिति प्रसङ्गादूर्ध्वरेतसी ताभ्यां जाताः सनन्द-नाद्या ऋषयः । "यान् कल्पयन्ति" इत्यादि पञ्चभिश्चतुर्भिश्चाभिमानि-देवताः ॥ १३६ ॥ ते तथाप्यविनाशिनोऽपि पुनराह, तथाप्यन्येति । देवप्रहरणाः देवशस्त्रदेवताः ॥ १३७ ॥ त्रयस्त्रिंशत् अष्टौ वसवः, एका-दश रुद्राः, द्वादशादित्याः, इन्द्रश्च प्रजापतिश्चेति मुख्याः । छन्दतः स्वेच्छातो जायन्त इति छन्दजाः । निरोधपूर्विका उत्पत्तिर्निरोधोत्-पत्तिः ॥ १३८ ॥ अनुत्पत्तिनिरोधयोरित्थं कथं प्रादुरित्याह, तथा सूर्यस्येति युगे युगे प्रतिकल्पं मन्वन्तरादिषु ॥ १३९ ॥ दितेर्वंशमाह, दित्या इत्यादिना यावद्देवर्षिमाध्याये दानोर्वंशोक्तिः ॥ १४० ॥ परिग्रहो

न ददाह च यं विप्र! वासुदेवे हृदि स्थिते ॥ १४४ ॥
महार्णवान्तःसलिले स्थितस्य चलतो मही।
चचाल सकला यस्य पाशबद्धस्य धीमतः ॥ १४५ ॥
न भिन्नं विविधैः शस्त्रैर्यस्य दैत्येन्द्रपातितैः।
शरीरमद्रिकठिनं सर्वत्राच्युतचेतसः ॥ १४६ ॥
विषानलोज्ज्वलमुखा यस्य दैत्यप्रचोदिताः।
नान्ताय सर्पपतयो बभूवुरुरुतेजसः ॥ १४७ ॥
शैलैराक्रान्तदेहोऽपि यः स्मरन् पुरुषोत्तमम्।
तत्याज नात्मनः प्राणान् विष्णुस्मरणदंशितः ॥ १४८ ॥
पतन्तमुच्चादवनिर्यमुपेत्य महामतिम्।
दधार दैत्यपतिना क्षिप्तं स्वर्गनिवासिना ॥ १४९ ॥
यस्य संशोषको वायुर्देहे दैत्येन्द्रयोजितः।
अवाप संक्षयं सद्यश्चित्तस्थे मधुसूदने ॥ १५० ॥
विषाणभङ्गमुन्मत्ता मदहानिञ्च दिग्गजाः।
यस्य वक्षःस्थले प्राप्ता दैत्येन्द्रपरिणामिताः ॥ १५१ ॥
यस्य चोत्पादिता कृत्या दैत्यराजपुरोहितैः।
बभूव नान्ताय पुरा गोविन्दासक्तचेतसः ॥ १५२ ॥
शम्बरस्य च मायानां सहस्रमतिमायिनः।
यस्मिन् प्रयुक्तं चक्रेण कृष्णस्य वितथीकृतम् ॥ १५३ ॥

मार्गो ॥१४१॥ "[illegible] देहिनाम्। यावत्कृ-
त्यवीर्यमुच्चैः [illegible]।" तेषां मध्ये इत्यादिना यावत्-
समाप्ति ॥ १४७ ॥ विष्णोः स्मरणेन दंशितः कवचः ॥ १४८ ॥ १५० ॥
दैत्येन्द्रेण परिणामिता दन्तैः प्रहर्तुं नमयित्वा समवोद्योजिताः

दैत्येन्द्रसूदोपहृतं यच्च हालाहलं विषम्।
जरयामास मतिमान् अविकारममत्सरी ॥ १५४ ॥
समचेता जगत्यस्मिन् यः सर्वेष्वेव जन्तुषु।
यथात्मनि तथान्यत्र परं मैत्रगुणान्वितः ॥ १५५ ॥
धर्म्मात्मा सत्यशौचादि गुणानामाकरस्तथा।
उपमानमशेषाणां साधूनां यः सदाभवत् ॥ १५६ ॥



षोडशोऽध्यायः ।

मैत्रेय उवाच ।

कथितो भवता वंशो मानवानां महामुने!।
कारणञ्चास्य जगतो विष्णुरेव सनातनः ॥ १ ॥
यच्चैतद् भगवानाह प्रह्लादं दैत्यसत्तमम्।
ददाह नाग्निर्नास्त्रैश्च क्षुण्णस्तत्याज जीवितम् ॥ २ ॥

॥ १५२-१५३ ॥ दैत्येन्द्रस्य सूदैः सूपकारैः उपहृतं दत्तं हालाहलम्। "हलाहला नाम नदी हिमवत्पर्वतदारजा। यत्र तु तत्तीरसम्भूतं विषं हालाहलं स्मृतम्" इति। अविकारं रोमाञ्चस्वेदकम्पादिविकार-शून्यं यथा भवत्येवं जरयामास ॥ १५४ ॥ १५६ ॥



आश्चर्य्यानुपादत्वेन प्रह्लादचरितं पृच्छति, कथित इत्यादिना। मानवानां स्वायम्भुवादीनाम् ॥ १ ॥ ददाह, बबाधिरे। वह्निः

जगाम वसुधा क्षोभं प्रह्लादे सलिले स्थिते ।
बन्धबद्धे विचलति विक्षिप्ताङ्गैः समाहता ॥ ३ ॥
शैलैराक्रान्तदेहोऽपि न ममार च यः पुरा ।
त्वयैवातीव माहात्म्यं कथितं यस्य धीमतः ॥ ४ ॥
तस्य प्रभावमतुलं विष्णोर्भक्तिमतो मुने ! ।
श्रोतुमिच्छामि यस्यैतत् चरितं दीप्ततेजसः ॥ ५ ॥
किं निमित्तमसौ शस्त्रैर्विक्षतो दितिजैर्मुने ! ।
किमर्थञ्चाब्धिसलिले निक्षिप्तो धर्मतत्परः ? ॥ ६ ॥
आक्रान्तः पर्वतैः कस्मात् ? कस्माद्दष्टो महोरगैः ? ।
क्षिप्तः किमद्रिशिखरात् ? किं वा पावकसञ्चये ? ॥ ७ ॥
दिग्दन्तिनां दन्तभूमिं स च कस्मान्निरूपितः ? ।
संशोषकोऽनिलश्चास्य प्रयुक्तः किं महासुरैः ? ॥ ८ ॥
कृत्याश्च दैत्यगुरवो युयुजुस्तत्र किं मुने ! ।
शंबरश्चापि मायानां सहस्रं किं प्रयुक्तवान् ? ॥ ९ ॥
हालाहलं विषमहो ! दैत्यसूदैर्महात्मनः ।
कस्माद् दत्तं विनाशाय ? यद् जीर्णं तेन धीमता ॥१०॥
एतत् सर्वं महाभाग ! प्रह्लादस्य महात्मनः ।
चरितं श्रोतुमिच्छामि महामाहात्म्यसूचकम् ॥ ११ ॥
न हि कौतूहलं तत्र यद् दैत्यैर्न हतो हि सः ।
अनन्यमनसो विष्णौ कः शक्नोति निपातने ? ॥ १२ ॥
तस्मिन् धर्मपरे नित्यं केशवाराधनोद्यते ।
स्ववंशप्रभवैर्दैत्यैः कर्त्तुं द्वेषोऽतिदुष्करः ॥ १३ ॥

पुनः पृष्टोऽपि ॥ २ ॥ यत्र यस्मिन् प्रह्लादे बन्धैर्बद्धे विचलति चलति सति विक्षिप्तैरङ्गैः समाहता सती वसुधा क्षोभं जगाम । विक्षिप्ताङ्गैः

धर्मात्मनि महाभागे विष्णुभक्ते विमत्सरे।
दैतेयैः प्रहृतं यस्मात् तन्ममाख्यातुमर्हसि ॥ १४ ॥
प्रहरन्ति महात्मानो विपक्षा अपि नेदृशे।
गुणैः समन्विते साधौ किं पुनर्यः स्वपक्षजः ॥ १५ ॥
तदेतत् कथ्यतां सर्वं विस्तरान्मुनिसत्तम!।
दैत्येश्वरस्य चरितं श्रोतुमिच्छाम्यशेषतः ॥ १६ ॥

सप्तदशोऽध्यायः।

पराशर उवाच।

मैत्रेय! श्रूयतां सम्यक् चरितं तस्य धीमतः।
प्रह्लादस्य सदोदारचरितस्य महात्मनः ॥ १ ॥
दितेः पुत्रो महावीर्यो हिरण्यकशिपुः पुरा।
त्रैलोक्यं वशमानिन्ये ब्रह्मणो वरदर्पितः ॥ २ ॥
इन्द्रत्वमकरोद्दैत्यः स चासीत् सविता स्वयम्।
वायुरग्निरपां नाथः सोमश्चाभून्महासुरः ॥ ३ ॥
धनानामधिपः सोऽभूत् स एवासीत् स्वयं यमः।
यज्ञभागानशेषांस्तु स स्वयं बुभुजेऽसुरः ॥ ४ ॥

मम: श्रुत इति पाठे तु श्रुतं ख्यातम्। यत्नवती विचरतीति पाठे पृथक् एतद् वाक्यम् ॥ ८ ॥ विद्याः प्रज्ञाः सहायाः ॥ १६ ॥

अनवद्यत्वे च एव प्रह्लादस्य महत्त्वेऽपि चारित्र्यमिति वक्तुम् हिरण्यकशिपोर्नामनाम, दितेः पुत्र इत्यादिना ॥ १ ॥ "नतोऽस्म्यनुदिवं सुहृद्भ्यो ... भव प्रभो!" इत्यादि ...

देवाः स्वर्गं परित्यज्य तत्त्रासात् मुनिसत्तम ! ।
विचेरुरवनौ सर्वे बिभ्राणा मानुषीं तनुम् ॥ ५ ॥
जित्वा त्रिभुवनं सर्वं त्रैलोक्यैश्वर्य्यदर्पितः ।
उपगीयमानो गन्धर्वैर्बुभुजे विषयान् प्रियान् ॥ ६ ॥
पानासक्तं महात्मानं हिरण्यकशिपुं तदा ।
उपासाञ्चक्रिरे सर्वे सिद्धगन्धर्वपन्नगाः ॥ ७ ॥
अवादयन् जगुश्चान्ये जयशब्दांस्तथापरे ।
दैत्यराजस्य पुरतश्चक्रुः सिद्धा मुदान्विताः ॥ ८ ॥
तत्र प्रनृत्ताप्सरसि स्फाटिकाभ्रमयेऽसुरः ।
पपौ पानं मुदा युक्तः प्रासादे सुमनोहरे ॥ ९ ॥
तस्य पुत्रो महाभागः प्रह्लादो नाम नामतः ।
पपाठ बालपाठ्यानि गुरुगेहं गतोऽर्भकः ॥ १० ॥
एकदा तु स धर्म्मात्मा जगाम गुरुणा सह ।
पानासक्तस्य पुरतः पितुर्दैत्यपतेस्तदा ॥ ११ ॥
पादप्रणामावनतं तमुत्थाप्य पिता सुतम् ।
हिरण्यकशिपुः प्राह प्रह्लादममितौजसम् ॥ १२ ॥

हिरण्यकशिपुरुवाच ।

पठ्यतां भवता वत्स ! सारभूतं सुभाषितम् ।
कालेनैतावता यत् ते सदोद्युक्तेन शिक्षितम् ॥ १३ ॥

तथैव त्रैलोक्यैश्वर्य्यैर्दर्पितः गर्वम् ॥ ४ ॥ तत्त्रासात् हिरण्यकशिपोर्भयात् ॥ ५ ॥ ६ ॥ महात्मानम् बहुतमभावम् ॥ ७ ॥ अवादयन् वाद्यादीनि, जगुर्गीतम् ॥ ८ ॥ तत्र प्रनृत्ता नृत्यन्ती अप्सरो यस्मिन् तस्मिन् प्रासादे, स्फाटिकाभ्रमये स्फटिकमणिभिः अभ्रमणिभिश्च रचिते । पीयत इति पानं मदिरादि ॥ ९ ॥ तदेवं तस्य दर्पैश्वर्य्यम्

प्रह्लाद उवाच ।

श्रूयतां तात ! वक्ष्यामि सारभूतं तवाज्ञया ।
समाहितमना भूत्वा यन्मे चेतस्यवस्थितम् ॥ १४ ॥
अनादिमध्यान्तमजम् अवृद्धिक्षयमच्युतम् ।
प्रणतोऽस्मि महात्मानं सर्वकारणकारणम् ॥ १५ ॥

पराशर उवाच ।

एवं निशम्य दैत्येन्द्रः क्रोधसंरक्तलोचनः ।
विलोक्य तद्गुरुं प्राह स्फुरिताधरपल्लवः ॥ १६ ॥

हिरण्यकशिपुरुवाच ।

ब्रह्मबन्धो ! किमेतत् ते ? विपक्षस्तुतिसंहितम् ।
असारं ग्राहितो बालो मामवज्ञाय दुर्मते ! ॥ १७ ॥

गुरुरुवाच ।

दैत्येश्वर ! न कोपस्य वशमागन्तुमर्हसि ।
ममोपदेशजनितं नायं वदति ते सुतः ॥ १८ ॥

हिरण्यकशिपुरुवाच ।

अनुशास्तोऽसि केनेदृक् ? वत्स ! प्रह्लाद ! कथ्यताम् ।
ममोपदिष्टं नेत्येष प्रब्रवीति गुरुस्तव ॥ १९ ॥

उक्ता पूर्वदेवाचार्यं वक्ष्यमाणं तत्र गुरु इत्यादिना ॥ १० ॥ १३ ॥ अनादिमध्यान्तं देशतः परिच्छेदरहितम् । अजं जन्मशून्यम् । अक्षय्यं नाशशून्यम् । तत्र हेतुः । सर्वकारणानां कारणम् । प्रणतोऽस्म्यनन्तमनन्तमिति पाठे, अक्ष्यवति पूर्वत्र: संहृती, संतत्यातेऽमेयेति क्षमा क्षितिवती, तत् । पाठान्तरं सुगमम् ॥ १६ ॥ ब्रह्मबन्धो ! ब्राह्मणाधम ! ते त्वया विपक्षस्तुत्या संहितं संयुतं किमेतत् पाठितः

प्रह्लाद उवाच।

शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः।
तमृते परमात्मानं तात ! कः केन शास्यते ॥ २० ॥

हिरण्यकशिपुरुवाच।

कोऽयं विष्णुः ? सुदुर्बुद्धे ! यं ब्रवीषि पुनः पुनः।
जगतामीश्वरस्येह पुरतः प्रसभं मम ॥ २१ ॥

प्रह्लाद उवाच।

न शब्दगोचरे यस्य योगिध्येयं परं पदम्।
यतो यश्च स्वयं विश्वं स विष्णुः परमेश्वरः ॥ २२ ॥

हिरण्यकशिपुरुवाच।

परमेश्वरसंज्ञोऽज्ञ ! किमन्यो मय्यवस्थिते।
तवास्ति ? मर्त्तुकामस्त्वं प्रब्रवीषि पुनः पुनः ॥ २३ ॥

प्रह्लाद उवाच।

न केवलं तात ! मम प्रजानां स ब्रह्मभूतो भवतश्च विष्णुः।
धाता विधाता परमेश्वरश्च प्रसीद कोपं कुरुषे किमर्थम् ॥ २४

हिरण्यकशिपुरुवाच।

प्रविष्टः कोऽस्य हृदये दुर्बुद्धेरतिपापकृत्।
येनेदृशान्यसाधूनि वदत्याविष्टमानसः ॥ २५ ॥

प्रह्लाद उवाच।

न केवलं मद्धृदयं स विष्णुराक्रम्य लोकान् सकलानवस्थितः।

स्थिता ॥ १७ ॥ २० ॥ प्रसभं निग्रहम् ॥ २१ ॥ यतो विश्वं, विश्वरूपश्च परमेश्वरो विष्णुः ॥ २२ ॥ २३ ॥ न केवलं ममैव किन्तु प्रजानां सर्वेषां भवतश्च धाता धारयिता, विधाता, कर्त्ता च परमेश्वरः स एव

स मां त्वदादींश्च पितः! समस्तान् समस्तचेष्टासु युनक्ति सर्वगः॥२६

हिरण्यकशिपुरुवाच।

निष्क्राम्यतामयं दुष्टः शास्यतां च गुरोर्गृहे।
योजितो दुर्मतिः केन विपक्षविततस्तुतौ ॥ २७ ॥

पराशर उवाच।

इत्युक्तो स तदा दैत्यैर्नीतो गुरुगृहं पुनः।
जग्राह विद्यामनिशं गुरुशुश्रूषणोद्यतः ॥ २८ ॥
कालेऽतीते च महति प्रह्लादमसुरेश्वरः।
समाहूयाब्रवीत्, पुत्र! गाथा काचित् प्रगीयताम्॥ २९॥

प्रह्लाद उवाच।

यतः प्रधानपुरुषौ यतश्चैतच्चराचरम्।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु॥ ३० ॥

हिरण्यकशिपुरुवाच।

दुरात्मा वध्यतामेष नानेनार्थोऽस्ति जीवता।
स्वपक्षहानिकर्तृत्वाद् यः कुलाङ्गारतां गतः॥ ३१ ॥

पराशर उवाच।

इत्याज्ञप्तास्ततस्तेन प्रगृहीतमहायुधाः।
उद्यतास्तस्य नाशाय दैत्याः शतसहस्रशः॥ ३२ ॥

प्रह्लाद उवाच।

विष्णुः शस्त्रेषु युष्माकं मयि चासौ यथा स्थितः।

॥ २४ ॥ २५ ॥ आक्रम्य अधिष्ठानार्थस्थितः। युनक्ति प्रवर्तयति। "अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा" इति श्रुतेः॥ २६ ॥ २७ ॥ जग्राह, विद्यां गुरोरुपचारार्थमेव। अन्यथा तद्बहिर्मुखोपदेशात् ॥ २८ ॥ गाथा गद्यपद्यादिः॥ २९ ॥ यतः प्रधानपुरुषौ आविर्भूतौ

दैतेयास्तेन सत्येन मा क्रमन्त्वायुधानि मे ॥ ३३ ॥

पराशर उवाच ।

ततस्तैः शतशो दैत्यैः शस्त्रौघैराहतोऽपि सन् ।
नावाप वेदनामल्पामभूच्चैव पुनर्नवः ॥ ३४ ॥

हिरण्यकशिपुरुवाच ।

दुर्बुद्धे ! विनिवर्त्तस्व वैरिपक्षस्तवादतः ।
अभयं ते प्रयच्छामि मातिमूढमतिर्भव ॥ ३५ ॥

प्रह्लाद उवाच ।

भयं भयानामपहारिणि स्थिते
मनस्यनन्ते मम कुत्र तिष्ठति ।
यस्मिन् स्मृते जन्मजरान्तकादि-
भयानि सर्वाण्यपयान्ति तात ! ॥ ३६ ॥

हिरण्यकशिपुरुवाच ।

भो भो सर्पाः ! दुराचारमेनमत्यन्तदुर्मतिम् ।
विषज्वालाकुलैर्वक्त्रैः सद्यो नयत संक्षयम् ॥ ३७ ॥

पराशर उवाच

इत्युक्तास्तेन ते सर्पाः कुहकास्तक्षकान्धकाः ।
अदशन्त समस्तेषु गात्रेष्वतिविषोल्बणाः ॥ ३८ ॥
स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः ।
न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसुस्थितः ॥ ३९ ॥

॥ ३० ॥ [illegible] ॥ ३१ ॥ यस्मिन् स्मृते एव जन्मादीन्यपि भयान्यपयान्ति, तस्मिन् मनसि नित्यं स्थिते सति भयं कुत्र तिष्ठति ॥ ३६ ॥ ३७ ॥ अदशन्त दष्टवन्तः ॥ ३८ ॥ ३९ ॥ [illegible] । [illegible]

सर्पा ऊचुः।

दंष्ट्रा विशीर्णा, मणयः स्फुटन्ति,
फणेषु तापो, हृदयेषु कम्पः।
नास्य त्वचः स्वल्पमपीह भिन्नं
प्रशाधि दैत्येश्वर! कार्य्यमन्यत्॥४०॥

हिरण्यकशिपुरुवाच।

हे दिग्गजाः! सङ्कटदन्तमिश्राः!
घ्नतैनमस्मद्रिपुपक्षभिन्नम्।
तज्जा विनाशाय भवन्ति तस्य
यथारणेः प्रज्वलिता हुताशाः॥४१॥

पराशर उवाच।

ततः स दिग्गजैर्बालो भूभृच्छिखरसन्निभैः।
पातितो धरणीपृष्ठे विषाणैरवपीडितः॥४२॥
स्मरतस्तस्य गोविन्दम् इभदन्ताः सहस्रशः।
शीर्णा वक्षःस्थलं प्राप्य स प्राह पितरं ततः॥४३॥
दन्ता गजानां कुलिशाग्रनिष्ठुराः शीर्णा यदेते न बलं ममैतत्
महाविपत्पापविनाशनोऽयं जनार्दनानुस्मरणानुभावः॥४४॥

कार्य्यं प्रशाधि आदिश॥४०॥ सङ्कटैः सङ्कीर्णैर्दन्तैर्मिश्रा मिलिताः घ्नतः हत मारयत। अस्मद्रिपुपक्षैर्विष्णुः सामाद्युपायेन अस्मत्तो भिन्नं पृथक्कृतम्। तस्माद् जाता अपि तस्य विनाशाय क्वचिद् भवन्ति। यथाऽरण्येर्जातो हुताशोऽरण्येर्नाशाय॥४१॥ विषाणैर्दन्तैः॥४२॥ ॥४३॥ निष्ठुरमपि भगवद्भक्तिमद् वपुरादर्शवत् तत्स्मरणप्रभावात्. दन्ता इति। कुलिशं वज्रं तदग्रमिव निष्ठुरा दृढाः तीक्ष्णा भवतीविपदस्त्वनु

हिरण्यकशिपुरुवाच ।

ज्वाल्यतामसुरा ! वह्निरपसर्पत दिग्गजाः ! ।
वायो ! समेधयाग्निं त्वं, दह्यतामेष पापकृत् ॥ ४५ ॥

पराशर उवाच ।

महाकाष्ठचयस्थमसुरेन्द्रसुतं ततः ।
प्रज्वाल्य दानवा वह्निं ददहुः स्वामिनोदिताः ॥ ४६ ॥

प्रह्लाद उवाच ।

तातैष वह्निः पवनेरितोऽपि न मां दहत्यत्र समन्ततोऽहम् ।
पश्यामि पद्मास्तरणास्तृतानि शीतानि सर्वाणि दिशां मुखानि ॥

पराशर उवाच ।

अथ दैत्येश्वरं प्रोचुर्भार्गवस्यात्मजा द्विजाः ।
पुरोहिता महात्मानः साम्ना संस्तूय वाग्मिनः ॥ ४८ ॥

पुरोहिता ऊचुः ।

राजन् ! नियम्यतां कोपो बालेऽत्र तनयेऽनुजे ।
कोपो देवनिकायेषु यत्र ते सफलो यतः ॥ ४९ ॥
तथा तथैनं बालं ते शासितारो वयं नृप ! ।
यथा विपक्षनाशाय विनीतस्ते भविष्यति ॥ ५० ॥
बालत्वं सर्वदोषाणां दैत्यराजास्पदं यतः ।
ततोऽत्र कोपमत्यर्थं योक्तुमर्हसि नार्भके ॥ ५१ ॥
न त्यक्ष्यति हरेः पक्षमस्माकं वचनाद् यदि ।
ततः कृत्यां वधायास्य करिष्यामो निवर्त्तिनीम् ॥ ५२ ॥

कुष्ठभूतानि पापानि च विनाशयतीति तथा ॥ ४४ ॥ भार्गवस्यात्मजाः षण्डामर्कादयः ॥ ४८ ॥ ५१ ॥ निवर्त्तिनीं कृत्याम् अनिवर्त्तिनीमिति

पराशर उवाच ।

एवमभ्यर्थितस्तैस्तु दैत्यराजः पुरोहितैः ।
दैत्यैर्निष्काशयामास पुत्रं पावकसञ्चयात् ॥ ५३ ॥
ततो गुरुगृहे बालः स वसन् बालदानवान् ।
अध्यापयामास मुहुरुपदेशान्तरे गुरोः ॥ ५४ ॥

प्रह्लाद उवाच ।

श्रूयतां परमार्थो मे दैतेया ! दितिजात्मजाः ! ।
न चान्यथैतन्मन्तव्यं नात्र लोभादिकारणम् ॥ ५५ ॥
जन्म बाल्यं ततः सर्वो जन्तुः प्राप्नोति यौवनम् ।
अव्याहतैव भवति ततोऽनुदिवसं जरा ॥ ५६ ॥
ततश्च मृत्युमभ्येति जन्तुर्दैत्येश्वरात्मजाः ! ।
प्रत्यक्षं दृश्यते चैतदस्माकं भवतां तथा ॥ ५७ ॥
मृतस्य च पुनर्जन्म भवत्येतच्च नान्यथा ।

वा वेद । दुष्प्रतीकारामित्यर्थः ॥ ५२ ॥ ॥ ५३ ॥ पितुर्विषयासक्तौ विष्णुभक्तिर्न भवति । एषां तु भविष्यतीति बालदानवान् गुरोरुपदेशाध्यापनकालान्तरे विच्छेदे तन्मध्ये सुप्रसन्नः स्वयमध्यापयामास, उपदेशेन ॥ ५४ ॥ "संसारे निखिलदुःखानि विष्णुभक्तौ परं सुखम् । इत्थं प्रह्लादवाक्यार्थं बुद्ध्वा विष्णुं भजेद्बुधः" ॥ हे दितिजात्मजाः ! मदुक्तात्परः दैवादन्यो । परमार्थतत्त्वं श्रूयताम् । मे मतः । अन्यथा मिथ्यैवैतत् न मन्तव्यं, यतोऽस्य गुरोरुपदेश इव मदुक्तौ लोभादिकारणं नास्ति ॥ ५५ ॥ बाल्यादारभ्य जन्मसमये विष्णुभक्तिरेव कर्त्तव्येति वक्तुं प्रवृत्तिमार्गे जन्मादिरूपवैराग्यात् नित्यं दुःखमेवेति दर्शयन्नाह, जन्मेत्यादि यतं दुःखमयं जगदित्यन्ते वदन्नाह ॥ ५६ ॥ ५७ ॥ मृतस्य पुनर्जन्म भवतीत्यत्र वेतदर्थे प्रतिपादकः प्रमाणभूतश्रुतिस्मृत्यादिरूप आगमोऽस्ति 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्ये

आगमोऽयं तथा तत्र नोपादानं विनोद्भवः ॥ ५८ ॥
गर्भवासादि यावत् तु पुनर्जन्मोपपादनम् ।
समस्तावस्थकं तावत् दुःखमेवावगम्यताम् ॥ ५९ ॥
क्षुत्तृष्णोपशमं तद्वत् शीताद्युपशमं सुखम् ।
मन्यते बालबुद्धित्वात् दुःखमेव हि तत् पुनः ॥ ६० ॥
अत्यन्तस्तिमिताङ्गानां व्यायामेन सुखैषिणाम् ।
भ्रान्तिज्ञानावृताक्षाणां प्रहारोऽपि सुखायते ॥ ६१ ॥
क्व शरीरमशेषाणां श्लेष्मादीनां महाचयः ।

यथाग्नि यथाक्रमं यथाश्रुतम्" इति "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" इत्यादि । एतदनुक्तं तर्कमप्याह । तत्र तत्रैव मन्तव्यम् । यस्माद् जीवाद्यभिव्यक्तशुक्रशोणितरूपम् उपादानकारणं विना देहस्योद्भवो न घटते इति तु पञ्चाग्न्यागमतात्पर्यः पुनर्भवश्च भवतीति । यदा जीवस्य सुख्याद्यनुभवात्, नाम । उपादीयते निःसन याऽपि क्रियते पुनर्जन्मादिकम् इत्युपादानं पुण्यपापादि । तद् विना उद्भवो जन्म नास्ति, किन्तु तत्सद्भावे पुनो जीवस्य के नास्ति प्रसक्तः ॥ ५८ ॥ ततः किमत आह, गर्भवासादीनि पुनर्जन्मन उपपादनं यावद् यावत्, तावद् दुःखमेव । यद्वा गर्भवासादि यावत्, तत् सर्वं दुःखमेवेति ॥ ५९ ॥ क्षुत्पानादिजनितसुखमप्यस्ति, कुतो दुःखमेवोच्यते ? इति चेत्, तत्राह, क्षुदिति । क्षुत्पिपासादिजनितदुःखोपशमं दा भ्रान्तः सुखं मन्यते, तद् हि पुनः क्षुत्पानादिसम्पादनप्रयासात् दुःखमेव ॥ ६० ॥ सुखत्वेन मन्यमानेऽपि व्यायामप्रहारादौ सुखत्वम् दृष्टान्तेनाह, अत्यन्तेति । वातादिदोषेण अत्यन्तं जडीभूतगात्राणां व्यायामेन मर्दनादिश्रमेण सुखमिच्छतां व्यायामोऽपि सुखमिव भवति । भ्रान्तिज्ञानावृताक्षाणां जीवविविक्तदृष्टीनां कामिनां प्रबलप्रणयिनीनुपुरचरणताडनप्रहारोऽपि सुखवत् प्रतीयते ॥ ६१ ॥ तदेव

कान्तिशोभासौरभ्यकमनीयादयो गुणाः ॥ ६२ ॥

मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ ।
देहे चेत् प्रीतिमान् मूढो नरके भवितापि सः ॥ ६३ ॥

अग्नेः शीतेन तोयस्य तृषा भक्तस्य च क्षुधा ।
क्रियते सुखकर्तृत्वं तद्विलोमस्य चेतरैः ॥ ६४ ॥

करोति हे दैत्यसुता यावन्मात्रं परिग्रहम् ।
तावन्मात्रं स एवास्य दुःखं चेतसि यच्छति ॥ ६५ ॥

यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान् ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥ ६६ ॥

यद् यद् गृहे तन्मनसि यत्र तत्रावतिष्ठतः ।

कामिनीं सुखदां चिन्तयन् कीर्तयति । मज्जादयः स्फुटसंघातः । कान्तिः गौरत्वादि, अङ्गच्छाया शोभा भूषणादिकृता, सौरभ्यं सौगन्ध्यं, कमनीयं सौन्दर्यम् एवमादयो गुणाः च ॥ ६२ ॥ देहे चेदहम् आत्मत्वे प्रीतिमान् भवेत् तर्हि नरकेऽपि प्रीतिमान् भविष्यति ? तत्रापि नारकिशरीरस्य [illegible] ॥ ६३ ॥ किञ्च न वस्तुत किञ्चित् सुखदुःखसाधनमस्ति सुखसाधनमेव कदाचित् दुःखसाधनं [illegible] इति । शीतेन परमार्थेन अग्नेः सुखकर्तृत्वं क्रियते । शीता-भावे पुनः अग्नेः दुःखकर्तृत्वम् । एवं पूर्वभाविन्या तृषा तोयस्य, क्षुधा च भक्तस्य । तयोरभावे तोयान्नयोरनिष्टत्वात् तद्विलो-मस्यासुखस्यादिरूपनिवर्तकः शीताद्यैरितरैरन्नाद्यैः, अग्निना सुखानि शीतस्य, तोयं प्रति तृषः क्षुधं प्रति क्षुधः, सुखहेतुत्वम्, अन्यथा तेषामेव दुःखहेतुत्वात् ॥ ६४ ॥ किञ्च करोतीति ॥ ६५ ॥ सम्बन्धप्र-सिद्धाविच्छेदस्यापि दुःखहेतुत्वमेवाह, यावत इति । शोकशङ्कवः शल्यानि निखन्यन्ते निखन्यन्ते । तेषाममरणेऽपि तद्वियो-गसम्भावनयाऽऽदितस्त्वात् ॥ ६६ ॥ एतत् स्पष्टयति, यद् यदिति ।

नायं दोषापहरणं तत्र तस्यैव तिष्ठति ॥ ६७ ॥
अथान्यत्र महद् दुःखं म्रियमाणस्य चापि तत् ।
यातनासु यमस्योग्रं गर्भसंक्रमणेषु च ॥ ६८ ॥
गर्भे च सुखलेशोऽपि भवद्भिरनुमीयते ।
यदि तत् कथ्यतामेवं सर्वं दुःखमयं जगत् ॥ ६९ ॥
तदेवमतिदुःखानाम् आस्पदेऽत्र भवार्णवे ।
भवतां कथ्यते सत्यं विष्णुरेकः परायणम् ॥ ७० ॥
मा जानीत वयं बाला देही देहेषु शाश्वतः ।
जरायौवनजन्माद्या धर्मा देहस्य नात्मनः ॥ ७१ ॥
बालोऽहं तावदिच्छातो यतिष्ये श्रेयसे युवा ।

यद् यद्देशेऽपि धनादि, तद् यत्र तत्र देशान्तरेऽपि अवस्थितस्यापि ममैव नित्यं चिन्तयतः उत्पति, तस्य तु धनादेर्नाशो दाशोऽपहरणं वा तत्रैव तत्र एव तिष्ठति न तु आयाति. अतः मानुषतया स्थितस्य धना-देर्नाशादि भवति । अन्यस्य स्थितस्य तु न भवतीति कुतः ? अत्रो-च्यते ! सत्ये नष्टेऽपि धनादि यत्र कुत्रचित् देशान्तर स्थितमपि परि-ग्रहणं स्ववियुक्तमेव मानवशासनात्मकेन तिष्ठति । अतस्माद् वासनापरि-त्यागे विशोको भवति, न तद्वियोगवशाद् इति भावः । पाठान्तरेऽपि अयमेव तात्पर्यार्थः ॥६७॥ एवं सर्वावस्थास्वपि दुःखमनुभवन्त्येवमित्याह, अन्यत्रेति द्वाभ्याम् ॥ ६८ ॥ ६९ ॥ तदेवं प्रदर्शितानां दोषाणां विरक्ति-मुत्पाद्य विष्णुसेवायां प्रवर्त्तयत्याह, तदेवमिति ॥ ७० ॥ तथाप्यस्माकं बालानां शास्त्राधिकार इत्याशङ्क्याह, जानीतेति । तत्त्व-परिज्ञानमात्रेण भिक्षोरपि बालयुवादिदेहेषु देहिन प्रतिपत्त्यभावात् देही शाश्वतो नित्यः । अतो जराद्या धर्मा देहस्यैव न त्वात्मनः देहाद्यभिमान-शून्यानाम् अविरक्तानामेवाश्रमाधिकारः । तद्विवेकवतां तु विरक्तानां सुखरामेवाधिकारः । "देहावस्थानवादर्श यदहरेव विरजेत् तदहरेव

युवाहं वार्धके प्राप्ते करिष्याम्यात्मनो हितम् ॥ ७२ ॥
वृद्धोऽहं मम कार्याणि समस्तानि न गोचरे ।
किं करिष्यामि मन्दात्मा समर्थेन न यत् कृतम् ॥ ७३ ॥
एवं दुराशयाक्षिप्तमानसः पुरुषः सदा ।
श्रेयसोऽभिमुखं याति न कदाचित् पिपासितः ॥ ७४ ॥
बाल्ये क्रीडनकासक्ता यौवने विषयोन्मुखाः ।
अज्ञा नयन्त्यशक्त्या च वार्धकं समुपस्थितम् ॥ ७५ ॥
तस्माद् बाल्ये विवेकात्मा यतेत श्रेयसे सदा ।
बाल्ययौवनवृद्धाद्यैर्देहभावैरसंयुतः ॥ ७६ ॥
तदेतद् वो मयाख्यातं यदि जानीत नानृतम् ।
तदस्मत्प्रीतये विष्णुः स्मर्यतां बन्धमुक्तिदः ॥ ७७ ॥
प्रयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम् ।

यत्नश्च, इत्यादिस्तुतिरिति भावः ॥ ७१ ॥ किञ्चिद्विवेकवतामपि अविरक्तात्मनां श्रेयसि प्रवृत्तौ कालप्रतीक्षया इहैव आयुः यातीत्याह, बालोऽहमिति त्रिभिः । इच्छातो विचरिष्यामीति शेषः ॥ ७२ ॥ ७३ ॥ दुराशया विषयासक्त्याक्षिप्तमानसः आकृष्टचित्तः । पिपासितः भोगतृष्णाकुलः । अनेन च रज्वादिदृष्टान्तः सूचितः । रज्जौ हि आकृष्टजलघटोऽपीदं पश्चादस्य जलं पास्यामीति तृष्णयैव पिपासया यथा म्रियते । आयुर्विषयं इयन्मात्रं परं मनुष्यं पुनः नायं पास्यामीत्येव पिपासित एव यथा म्रियते तद्वदित्यर्थः ॥ ७४ ॥ अवस्थासु पशुवदेवापवर्ती-त्याह, बाल्ये इति । समुपस्थितं प्राप्तं वार्धकं अशक्त्या नयन्ति यापयन्ति, न तु तदापि श्रेयो जिज्ञासा तेषामित्यर्थः ॥ ७५ ॥ अतः श्रेयसे विलम्बो न कर्तव्य इत्याह, तस्मादिति । विवेकात्मा विवेकयुक्तचित्तः । तथैव विवेकं आत्मनि प्राप्नोति ॥ ७६ ॥ यद्यपि युष्मास्वप्रम नेच्छा तथाप्यस्मत्प्रीतये विष्णुः स्मर्यताम् ॥ ७७ ॥ युष्माकमपि

पापक्षयश्च भवति स्मरतां तमहर्निशम् ॥ ७८ ॥
सर्वभूतस्थिते तस्मिन् मतिर्मैत्री दिवानिशम्।
भवतां जायतामेवं सर्वक्लेशान् प्रहास्यथ ॥ ७९ ॥
तापत्रयेणाभिहतं यदेतदखिलं जगत्।
तदा शोच्येषु भूतेषु द्वेषं प्राज्ञः करोति कः ॥ ८० ॥
अथ भद्राणि भूतानि हीनशक्तिरहं परम्।
मुदं तथापि कुर्वीत हानिर्द्वेषफलं यतः ॥ ८१ ॥
बद्धवैराणि भूतानि द्वेषं कुर्वन्ति चेत् ततः।
सुशोच्यान्यतिमोहेन व्याप्तानीति मनीषिणा ॥ ८२ ॥

विष्णुभक्त्यैव महासिद्धिरुक्ता सुकरत्वात् महाफलत्वाच्च इत्याह, पापक्षय इति ॥ ७८ ॥ विष्णुभक्त्यैव भवति विष्णुदृष्टिः सर्वभूतमैत्री च सर्वक्लेशनिवृत्तिश्च, सर्वेति। सर्वभूतेषु अन्तर्यामितया स्थिते तस्मिन् विष्णौ मतिर्भवतामस्तु। अत एव तदधिष्ठाने भूतमात्रे मैत्री चाहर्निशमस्तु। एवमनेन प्रकारेण रागद्वेषादिक्लेशसंघातम् प्रहास्यथेत्यर्थः ॥ ७९ ॥ ननु सर्वभूतेषु मैत्री दुष्करा, मत्सरादिभिः स्वतन्त्रमानेषु धनविद्यादिगर्वितेषु च स्वत एव बद्धवैरेषु च द्वेषस्य दुष्परिहरत्वादित्यत आह तापत्रयेणेति त्रिभिः। तापत्रयेणाध्यात्मिकादिदुःखत्रयेण मदमत्सरादिना जगदेतदभिहतमिति यदा बुद्धिः तदा शोच्येषु कृपाविषयेषु भूतेषु कः प्राज्ञो द्वेषं करोति ॥ ८० ॥ अथैव मतिर्भूतानि भद्राणि धनविद्यादिसम्पदा दृष्टानि अहमेव केवलं धनाद्यभावे हीनशक्तिरिति। तथापि तेषु मुदं प्रीतिमेव कुर्वीत, न तु द्वेषं, यतो द्वेषस्य फलं हानिरेव। तथा हि न्यायविदः—"इष्टसाधनज्ञानस्य रागस्य उपादानं फलम्। अनिष्टसाधनज्ञानस्य च द्वेषस्य हानिः फलम्" इति वर्णयन्ति। अतो हानिफलत्वात् द्वेषो न कार्य इत्यर्थः ॥ ८१ ॥ यदि चेत् स्वतैव बद्धवैराणि भूतानि द्वेषं कुर्वन्ति तदा मनीषिणा तान्यतीव शोच्यान्या-

एते भिन्नदृशां दैत्या विकल्पाः कथिता मया ।
कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम ॥ ८३ ॥
विस्तारः सर्वभूतस्य विष्णोर्विश्वमिदं जगत् ।
द्रष्टव्यमात्मवत् तस्मादभेदेन विचक्षणैः ॥ ८४ ॥
समुत्सृज्यासुरं भावं तस्माद् यूयं तथा वयम् ।
तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिम् ॥८५॥
या नाग्निना नचार्केण नेन्दुना नैव वायुना ।
पर्जन्यवरुणाभ्यां वा न सिद्धैर्न च राक्षसैः ॥ ८६ ॥
न यक्षैर्न च दैत्येन्द्रैर्नोरगैर्न च किन्नरैः ।
न मनुष्यैर्न पशुभिर्दोषैर्नैवात्मसम्भवैः ॥ ८७ ॥
ज्वराक्षिरोगातीसारप्लीहगुल्मादिकैस्तथा ।
द्वेषेर्ष्यामत्सराद्यैर्वा रागलोभादिभिः क्षयम् ॥ ८८ ॥

मीति योज्यानि चतुर्थ्यन्तानि । तेषु सर्वथा द्वेषो न युक्त इत्यर्थः ॥ ८२ ॥ एते च द्वेषोपशमप्रकारा मन्दाधिकारिणामेवोक्ताः, न तु उत्तमाधिकारिणामित्याह, एत इति । भिन्नदृशां भेददृष्टीनाम् । भिन्नदृशामिति वा पाठः । तत्र भेददृष्ट्यङ्गीकारं कृत्वा एते विकल्पाः द्वेषोपशमप्रकारभेदाः कथिताः । उत्तमानां तु परमार्थसंक्षेपो मत्तः श्रूयताम् ॥ ८३ ॥ तमेवाह, विस्तार इति ॥ ८४ ॥ आसुरं भावं रागद्वेषादिस्वभावं समुत्सृज्य यूयं वयञ्च निर्वृतिं यथा येन प्रकारेण प्राप्स्यामस्तथा यत्नं करिष्यामः ॥ ८५ ॥ तामेव निर्वृतिं सप्तपद्याख्यां विशिनष्टि, येति चतुर्भिः । या निर्वृतिर्मोक्षाख्या । अग्न्यादिभिरन्यैरपि कैश्चित् क्षयं न नीयते तां निर्वृतिं कैवल्यसुखरूपं स्वयं प्राप्नोतीति चतुर्थेनान्वयः । तत्र नाग्न्यादिभिरिति आधिदैविकोपघातः कथ्यते ॥ ८६ ॥ न मनुष्यैर्न पशुभिरित्याधिभौतिकैः । दोषैर्नैवात्मसम्भवैरिति शारीरमानसभेदेनाध्यात्मिकैः ॥८७॥ तत्र शारीरैर्ज्वरादिभिर्मानसैर्द्वेषादिभिश्च ॥८८॥

न चान्यैर्नीयते कैश्चिन्नित्या ह्यत्यन्तनिर्मला ।
तामाप्नोति मनः स्वच्छं केशवे हृदि संस्थिते ॥ ८९ ॥

असारसंसारविवर्त्तनेषु मा यात तोषं प्रसभं ब्रवीमि ।
सर्वत्र दैत्याः ! समतामुपेत समत्वमाराधनमच्युतस्य ॥ ९० ॥

तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं
धर्मार्थकामैरलमल्पकास्ते ।
समाश्रिताद् ब्रह्मतरोरनन्तात्
निःसंशयं प्राप्स्यथ वै महत् फलम् ॥ ९१ ॥

—:०:—

अष्टादशोऽध्यायः ।

पराशर उवाच ।

तस्यैवं दानवाश्चेष्टां दृष्ट्वा दैत्यपतेर्भयात् ।
आचचक्षुः स चोवाच सूदानाहूय सत्वरः ॥ १ ॥

अन्यैश्च तस्करभूपतेरविद्यालक्ष्मीदिभिर्यां ध्वंसं न प्राप्यते तां निर्वृतिं केशवं ध्यात्वा प्राप्नोतीत्यर्थः ॥ ८९ ॥ सर्वोपदेशसारमाह, असारेति । असारो यः संसारः, तत्र विवर्त्तनानि देवमनुष्यतिर्य्यगादिजन्मानि तेषु तत्प्रदर्शितैर्भोगैस्तोषं मा यात न प्राप्नुत किन्तु सर्वभूतेषु समदर्शितामेव प्राप्नुत । तदेव अच्युतस्याराधनं प्रोक्तम् ॥ ९० ॥ ततः किमत आह, तस्मिन्निति । तस्मिन् प्रसन्ने प्रीते न किञ्चिद् दुर्लभम् । तथा च स्वल्पत्वात् त्रिवर्गो न प्रार्थ्यः, मोक्षोऽपि न प्रार्थ्यः । कुतस्तत्प्रार्थना-स्तोपरि यथा तरुफलं पतति, तथैव ब्रह्मतरुस्वरूपादनन्तात् समाश्रितान् प्रति उच्चफलप्रपातस्त्वावश्यम्भावी भविष्यतीत्यर्थः ॥ ९१ ॥

हिरण्यकशिपुरुवाच ।

हे सूदा ! मम पुत्रोऽसौ अन्येषामपि दुर्मतिः ।
कुमार्गदेशको दुष्टो हन्यतामविलम्बितम् ॥ २ ॥
हालाहलं विषं तस्य सर्वभक्ष्येषु दीयताम् ।
अविज्ञातमसौ पापो हन्यतां मा विचार्य्यताम् ॥ ३ ॥

पराशर उवाच ।

ते तथैव ततश्चक्रुः प्रह्लादाय महात्मने ।
विषदानं यथाज्ञप्तं पिता तस्य महात्मनः ॥ ४ ॥
हालाहलं विषं घोरम् अनन्तोच्चारणेन सः ।
अभिमन्त्र्य सहान्नेन मैत्रेय ! बुभुजे तदा ॥ ५ ॥
अविकारं स तद् भुक्त्वा प्रह्लादः स्वस्थमानसः ।
अनन्तख्यातिनिर्वीर्य्यं जरयामास तद् विषम् ॥ ६ ॥
ततस्तदा भयत्रस्ता जीर्णं दृष्ट्वा महद् विषम् ।
दैत्येश्वरमुपागम्य प्रणिपत्येदमब्रुवन् ॥ ७ ॥

सूदा ऊचुः ।

दैत्यराज ! विषं दत्तम् अस्माभिरतिभीषणम् ।
जीर्णं तेन सहान्नेन प्रह्लादेन सुतेन ते ॥ ८ ॥

येषाम् उपदेशकानाम् ॥ १ ॥ कुमार्गस्य देशकः उपदेष्टा ॥ २ ॥ पूर्वं प्रह्लादमज्ञातीन् इदं अनेन कोऽपि मन्त्रादिः प्रतीकारः कृतः । अज्ञातविषदानं यथा भवत्येवं सर्वभक्ष्येषु अपूपलड्डुकादिषु विषं दत्त्वा हन्यतामित्यर्थः ॥ ३ ॥ अनन्तस्य नाम्ना भक्ष्यभोज्यादि सर्वम् अभिमन्त्र्य तस्मै निवेद्य तदुच्छिष्टं प्रसादरूपेण निःशङ्को भुङ्क्ते । अतस्तादृशो विषद्रव्यं तथैव बुभुजे ॥ ५ ॥ तस्मादनन्तस्य ख्याता कीर्त्त्या निर्वीर्य्यं स्वाद-विकारं यथा भवत्येवं जरयामास । ६ ॥ ८ ॥ सर्पवाद् मन्त्रपरिहार-

हिरण्यकशिपुरुवाच।

त्वर्य्यतां त्वर्य्यतां हे हे सद्यो दैत्यपुरोहिताः!।
कृत्यां तस्य विनाशाय उत्पादयत मा चिरात् ॥ ९ ॥

पराशर उवाच।

सकाशमागम्य ततः प्रह्लादस्य पुरोहिताः।
सामपूर्वमथोचुस्ते प्रह्लादं विनयान्वितम् ॥ १० ॥

पुरोहिता ऊचुः।

जातस्त्रैलोक्यविख्याते आयुष्मन्! ब्रह्मणः कुले।
दैत्यराजस्य तनयो हिरण्यकशिपोर्भवान् ॥ ११ ॥
किं देवैः किमनन्तेन किमन्येन तवाश्रयः।
पिता ते सर्वलोकानां त्वं तथैव भविष्यसि ॥ १२ ॥
तस्मात् परित्यजैनां त्वं विपक्षस्तवसंहिताम्।
श्लाघ्यः पिता समस्तानां गुरूणां परमो गुरुः ॥ १३ ॥

प्रह्लाद उवाच।

एवमेतत् महाभागाः! श्लाघ्यमेतत् महाकुलम्।
मरीचेः सकलेऽप्यस्मिन् त्रैलोक्ये कोऽन्यथा वदेत् ॥ १४ ॥
पिता च मम सर्वस्मिन् जगत्युत्कृष्टचेष्टितः।
एतदप्यवगच्छामि सत्यमत्रापि नानृतम् ॥ १५ ॥
गुरूणामपि सर्वेषां पिता परमको गुरुः।
यदुक्तं, भ्रान्तिरत्रापि स्वल्पापि हि न विद्यते ॥ १६ ॥
पिता गुरुर्न सन्देहः पूजनीयः प्रयत्नतः।

रचितेति यथा ब्राह्मणान् नियुङ्क्ते, त्वर्य्यतामिति ॥ ९ ॥ ११ ॥ ते पिता सर्वलोकानामाश्रयः ॥ १२ ॥ १३ ॥ ब्रह्मणो मरीचेः कुले ॥ १४ ॥

तत्रापि नापराध्यामीत्येवं मनसि मे स्थितम् ॥ १७ ॥
यदेतत् किमनन्तेनेत्युक्तं युष्माभिरीदृशम् ।
को ब्रवीति यथायुक्तं किन्तु नेतद् वचोऽयथवत् ॥ १८ ॥
इत्युक्त्वा सोऽभवन् मौनी तेषां गौरवयन्त्रितः ।
प्रहस्य च पुनः प्राह किमनन्तेन साध्विति ॥ १९ ॥
साधु भोः ! किमनन्तेन साधु भो गुरवो मम ।
श्रूयतां यदनन्तेन, यदि खेदं न यास्यथ ॥ २० ॥
धर्मार्थकाममोक्षाख्याः पुरुषार्था उदाहृताः ।
चतुष्टयमिदं यस्मात् तस्मात् किं किमिदं वृथा ॥ २१ ॥
मरीचिमिश्रैर्दक्षेण तथैवान्यैरनन्ततः ।
धर्मः प्राप्तस्तथैवान्यैरर्थः कामस्तथापरैः ॥ २२ ॥
तत्त्वं तत्त्ववेदिनो भूत्वा ज्ञानध्यानसमाधिभिः ।
अवापुर्मुक्तिमपरे पुरुषा ध्वस्तबन्धनाः ॥ २३ ॥
सम्पदैश्वर्य्यमाहात्म्यज्ञानसन्ततिकर्म्मणाम् ।
विमुक्तेश्चैकतोलभ्यं मूलमाराधनं हरेः ॥ २४ ॥

॥ १५ ॥ १६ ॥ नापराध्यामि नान्यथा करोमि ॥ १७ ॥ यथा यैर्यैर्दोषै-
रेतदयुक्तम्, तथा सर्वान् दोषान् को ब्रवीति दोषानन्त्यात् कोऽपि
वक्तुं न शक्नोतीत्यर्थः । तथापि किञ्चिद् वक्ष्यामीत्याह, किन्त्विति ॥ १८ ॥
किमनन्तेन साध्वितीत्यादि पुनरुक्तिः सोपालम्भाक्षेपार्था ॥ १९ ॥ २० ॥
इदं पुरुषार्थचतुष्टयं यस्मादनन्ताद् भवति, तस्मात् किं स्यादिति, इदं
निरन्तरं वाक्यं किमिति दुर्मेधसा इत्यर्थः ॥ २१ ॥ पुरुषार्थचतुष्टय-
प्राप्तिप्रभेदाश्चरन्त्याह, मरीचिमिश्रैरिति चतुर्भिः ॥ मिश्रयज्ञेन
पूर्वं प्रयोगात् मरीचिमिश्रैर्मरीचिप्रमुखैरित्यर्थः ॥ २२ ॥ २३ ॥
पद्मनाभस्य अन्तर्हितामुत्तमं हरेराराधनमेव सम्पदादीनां विमुक्तेश्च

यतो धर्मार्थकामाख्यं मुक्तिश्चापि फलं द्विजाः ! ।
तेनापि हि किमित्येवमनन्तेन किमुच्यते ? ॥ २५ ॥
किन्त्वत्र बहुनोक्तेन भवन्तो गुरवो मम ।
वदन्तु साधु वासाधु विवेकोऽस्माकमल्पकः ॥ २६ ॥

पुरोहिता ऊचुः ।

दह्यमानस्त्वमस्माभिरग्निना बाल ! रक्षितः ।
भूयो न वक्ष्यसीत्येवं नैव ज्ञातोऽस्यबुद्धिमान् ॥ २७ ॥
यदास्मद्वचनान् मोहग्राहं न त्यक्ष्यते भवान् ।
ततः कृत्यां विनाशाय तव स्रक्ष्याम दुर्मते ! ॥ २८ ॥

प्रह्लाद उवाच ।

कः केन हन्यते जन्तुर्जन्तुः कः केन रक्ष्यते ? ।
हन्ति रक्षति चैवात्मा ह्यसत् साधु समाचरन् । २९ ॥

पराशर उवाच ।

इत्युक्तास्तेन ते क्रुद्धा दैत्यराजपुरोहिताः ।
कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम् ॥ ३० ॥
अतिभीमा समागम्य पादन्यासक्षतक्षितिः ।
शूलेन सा सुसंक्रुद्धा तं जघानाशु वक्षसि ॥ ३१ ॥

भूषम् ॥ २४ ॥ यतो धर्मादिचतुर्विधं फलं तेनापि अनन्तेन । किमि-त्येवं किमिदमुच्यते ॥ २५ ॥ सोपालम्भोक्तिं निगमयति किन्त्विति ॥ २६ ॥ एवं विपक्षस्तुतियुक्तं वाक्यं भूयो न वक्ष्यसीति मत्वा पूर्वमस्माभिस्त्वं रक्षितोऽसि । अबुद्धिमान् त्वमसि तु नैव ज्ञातोऽसि ॥ २७ ॥ मोह-ग्राहम् अबुद्धिग्रहं दुराग्रहम् ॥ २८॥ असत् समाचरन् आत्मैवात्मानं हन्ति, साधु समाचरन्नात्मैवात्मानं रक्षति चेत्यन्वयः ॥ २९ ॥ ३० ॥ पादयोर्न्यासैर्विक्षेपैः क्षता क्षितिर्यया सा तथा ॥ ३१ ॥ अतिक्रुद्धा

तत् तस्य हृदयं प्राप्य शूलं बालस्य दीप्तिमत् ।
जगाम खण्डितं भूमौ तत्रापि शतधागतम् ॥ ३२ ॥
यत्रानपायी भगवान् हृद्यास्ते हरिरीश्वरः ।
भङ्गो भवति वज्रस्य तत्र शूलस्य का कथा ॥ ३३ ॥
अपापे तत्र पापैश्च पातिता दैत्ययाजकैः ।
तानेव सा जघानाशु कृत्या नाशं जगाम च ॥ ३४ ॥
कृत्यया दह्यमानांस्तान् विलोक्य स महामतिः ।
त्राहि कृष्णेत्यनन्तेति वदन्नभ्यवपद्यत ॥ ३५ ॥

प्रह्लाद उवाच ।

सर्वव्यापिन् । जगद्रूप । जगत्स्रष्टर्जनार्दन । ।
पाहि विप्रानिमानस्माद् दुःसहान् मन्त्रपावकात् ॥ ३६ ॥
यथा सर्वेषु भूतेषु सर्वव्यापी जगद्गुरुः ।
विष्णुरेव तथा सर्वे जीवन्त्वेते पुरोहिताः ॥ ३७ ॥
यथा सर्वगतं विष्णुं मन्यमानो न पावकम् ।
चिन्तयाम्यरिपक्षेऽपि जीवन्त्वेते पुरोहिताः ॥ ३८ ॥
ये हन्तुमागता दत्तं यैर्विषं यैर्हुताशनः ।
यैर्दिग्गजैरहं क्षुण्णो दष्टः सर्पैश्च यैरपि ॥ ३९ ॥
तेष्वहं मित्रभावेन समः पापोऽस्मि न क्वचित् ।
तथा तेनाद्य सत्येन जीवन्त्वसुरयाजकाः ॥ ४० ॥

पराशर उवाच ।

इत्युक्तास्तेन ते सर्वे संस्पृष्टाश्च निरामयाः ।

भग्नं तत् भूमौ जगाम पपात ॥ ३२ ॥ ३४ ॥ अभ्यवपद्यत रक्षणार्थं तदभिमुखम् अधावदित्यर्थः ॥ ३५ ॥ ३८ ॥ अहमस्मात् ॥ ४१ ॥

समुत्तस्थुर्द्विजा भूयस्तस्योचुः प्रश्रयान्वितम् ॥ ४१ ॥

पुरोहिता ऊचुः ।

दीर्घायुरप्रतिहतबलवीर्य्यसमन्वितः ।
पुत्रपौत्रधनैश्वर्य्ययुक्तो वत्स ! भवोत्तम ! ॥ ४२ ॥

पराशर उवाच ।

इत्युक्त्वा तं ततो गत्वा यथावृत्तं पुरोहिताः ।
दैत्यराजाय सकलम् आचचख्युर्महामुने ! ॥ ४३ ॥

ऊनविंशोऽध्यायः ।

पराशर उवाच ।

हिरण्यकशिपुः श्रुत्वा तां कृत्यां वितथीकृताम् ।
आहूय पुत्रं पप्रच्छ प्रभावस्यास्य कारणम् ॥ १ ॥

हिरण्यकशिपुरुवाच ।

प्रह्लाद ! सुप्रभावोऽसि किमेतत् ते विचेष्टितम् ।
एतन् मन्त्रादिजनितम्, उताहो सहजं तव ? ॥ २ ॥

पराशर उवाच ।

एवं पृष्टस्तदा पित्रा प्रह्लादोऽसुरबालकः ।
प्रणिपत्य पितुः पादाविदं वचनमब्रवीत् ॥ ३ ॥

प्रह्लाद उवाच ।

न मन्त्रादिकृतं तात ! न वा नैसर्गिकं मम ।
प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि ॥ ४ ॥

सहजं नैसर्गिकम् ॥ १ ॥ २ ॥ २ ॥ सामान्यः प्रभावः ॥ ३ ॥

अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा ।
तस्य पापागमस्तात हेत्वभावान्न विद्यते ॥ ५ ॥
कर्म्मणा मनसा वाचा परपीडां करोति यः ।
तद्बीजजन्म फलति प्रभूतं तस्य चाशुभम् ॥ ६ ॥
सोऽहं न पापमिच्छामि न करोमि वदामि वा ।
चिन्तयन् सर्वभूतस्थम् आत्मन्यपि च केशवम् ॥ ७ ॥
शारीरं मानसं दुःखं दैवं भूतभवं तथा ।
सर्वत्र शुभचित्तस्य तस्य मे जायते कुतः ॥ ८ ॥
एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्त्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥ ९ ॥

पराशर उवाच ।

इति श्रुत्वा स दैत्येन्द्रः प्रासादशिखरे स्थितः ।
क्रोधान्धकारितमुखः प्राह दैतेयकिङ्करान् ॥ १० ॥
दुरात्मा क्षिप्यतामस्मात् प्रासादात् शतयोजनात् ।
गिरिपृष्ठे पतत्वस्मिन् शिलाभिन्नाङ्गसंहतिः ॥ ११ ॥
ततस्तं चिक्षिपुः सर्व्वे बाल दैतेयदानवाः ।
पपात सोऽप्यधःक्षिप्तो हृदयेनोद्वहन् हरिम् ॥ १२ ॥
पतमानं जगद्धात्री जगद्धातरि केशवे ।

किञ्च अन्येषां यः पापानि तत्फलानि दुःखानि चिन्तयति तस्य पापगतो दुःखागमो नास्ति ॥ ५ ॥ यतस्तत् पीडाकरणमेव बीजं तस्मात् जन्म यस्य तदशुभं पापं तस्य धर्म्मः । आधिदैवं भवति दुःखमध्यात्मना च मे ॥ ६ ॥ ८ ॥ एवं सर्वभूतमयं हरिं ज्ञात्वा सर्वेषु भूतेषु तद्भक्तैः कर्त्तव्या ॥ ९ ॥ क्रोधेनान्धकारितं आस्या-

अभियुक्तं दधारैनम् उपसंगम्य मेदिनी ॥ १३ ॥
ततो विलोक्य तं स्वस्थम् अविशीर्णास्थिपञ्जरम्।
हिरण्यकशिपुः प्राह शंबरं मायिनां वरम् ॥ १४ ॥

हिरण्यकशिपुरुवाच ।

नास्माभिः शक्यते हन्तुमसौ दुर्बुद्धिबालकः।
मायां वेत्ति भवांस्तस्मात् माययैनं निषूदय ॥ १५ ॥

शंबर उवाच ।

सूदयाम्येष दैत्येन्द्र ! पश्य मायाबलं मम ।
सहस्रमात्रं मायानां पश्य कोटिशतं तथा ॥ १६ ॥

पराशर उवाच ।

ततः स ससृजे मायां प्रह्लादे शंबरोऽसुरः ।
विनाशमिच्छन् दुर्बुद्धिः सर्वत्र समदर्शिनि ॥ १७ ॥
समाहितमतिर्भूत्वा शंबरेऽपि विमत्सरः ।
मैत्रेय ! सोऽपि प्रह्लादः सस्मार मधुसूदनम् ॥ १८ ॥
ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम् ।
आजगाम समाज्ञप्तं ज्वालामालिसुदर्शनम् ॥ १९ ॥
तेन मायासहस्रं तत् शंबरस्याशुगामिना ।
बालस्य रक्षता देहम् एकैकश्येन सूदितम् ॥ २० ॥

धारयित्री पृथ्व्येव तथं यथा च ॥ १३ ॥ अस्थिविशीर्णत्वं न्यासतोऽपि मणिमन्त्रादिभिः स्तम्भनं संभवति, एतस्मै तु न किञ्चित् प्रभवति इत्यत एव दैत्यान् आदिशति, दुरात्मा शिशुतामिति ॥ १४ ॥ बालत्वेऽप्युपायैर्हन्तुम् अशक्यत्वात् तद्रूपे मायाविनं नियुङ्क्ते, नास्माभिरिति । निषूदय विनाशय ॥ १५ ॥ १८ ॥ सुदर्शनं सुखयानयम् ॥ १९ ॥ आशुगेन

संशोषकं तथा वायुं दैत्येन्द्रस्त्विदमब्रवीत् ।
शीघ्रमेष ममादेशाद् दुरात्मा नीयतां क्षयम् ॥ २१ ॥
तथेत्युक्त्वा तु सोऽप्येनं विवेश पवनो लघु ।
शीतोऽतिरूक्षः शोषाय तद्देहस्यातिदुःसहः ॥ २२ ॥
तेनाविष्टमथात्मानं स बुद्ध्वा दैत्यबालकः ।
हृदयेन महात्मानं दधार धरणीधरम् ॥ २३ ॥
हृदयस्थस्ततस्तस्य तं वायुमतिभीषणम् ।
पपौ जनार्दनः क्रुद्धः स ययौ पवनः क्षयम् ॥ २४ ॥
क्षीणासु सर्वमायासु पवने च क्षयं गते ।
जगाम सोऽपि भवनं गुरोरेव महामतिः ॥ २५ ॥
अहन्यहन्यथाचार्य्यो नीतिं राज्यफलप्रदाम् ।
ग्राहयामास तं बालं राज्ञामुशनसा कृताम् ॥ २६ ॥
गृहीतनीतिशास्त्रं तं विनीतञ्च यदा गुरुः ।
मेने, तदैनं तत्पित्रे कथयामास शिक्षितम् ॥ २७ ॥

आचार्य्य उवाच ।

गृहीतनीतिशास्त्रस्ते पुत्रो दैत्यपते ! कृतः ।
प्रह्लादस्तत्त्वतो वेत्ति भार्गवेण यदीरितम् ॥ २८ ॥

हिरण्यकशिपुरुवाच ।

मित्रेषु वर्त्तेत कथम् अरिवर्गेषु भूपतिः ।

मायाः इन्द्रजालं मन्त्रैर्विनाशितम् ॥ २० ॥ इतरेषु वधोपायेषु प्रतिघातं जठरो करोतीति जठरस्थं वायुं नियुङ्क्ते इत्याह, संशोषकमिति ॥ २१ ॥ लघु शीघ्रम् । 'लघुरिति पाठे लघुतया शीतोऽतिरूक्षश्च शीतस्पर्शोऽत्यन्तरूक्षः ॥ २२ ॥ तेनाविष्टं व्याप्तम् । धरणीधरम् । वायुभक्षं येन सर्वगतम्

प्रह्लाद! त्रिषु कालेषु मध्यस्थेषु कथं चरेत् ॥ २९ ॥
कथं मन्त्रिष्वमात्येषु बाह्येष्वभ्यन्तरेषु च ।
चारेषु पौरवर्गेषु शङ्कितेष्वितरेषु च ॥ ३० ॥
कृत्याकृत्यविधानेषु दुर्गाटविकसाधने ।
प्रह्लाद! कथ्यतां सम्यक् तथा कण्टकशोधने ॥ ३१ ॥
एतच्चान्यच्च सकलमधीतं भवता यथा ।
तथा मे कथ्यतां ज्ञातुं तवेच्छामि मनोगतम् ॥ ३२ ॥

पराशर उवाच ।

प्रणिपत्य पितुः पादौ तदा प्रश्रयभूषणः ।
प्रह्लादः प्राह दैत्येन्द्रं कृताञ्जलिपुटस्तथा ॥ ३३ ॥

प्रह्लाद उवाच ।

ममोपदिष्टं सकलं गुरुणा नात्र संशयः ।
गृहीतन्तु मया किन्तु न सदेतन्मतं मम ॥ ३४ ॥
साम चोपप्रदानञ्च भेददण्डौ तथापरौ ।
उपायाः कथिताः सर्वे मित्रादीनाञ्च साधने ॥ ३५ ॥

॥ २७ ॥ २८ ॥ त्रिषु कालेषु क्षयवृद्धिसमत्वाख्यसमयेषु ॥ २९ ॥ मन्त्रिषु बुद्धिसहायेषु । अभ्यन्तरेषु अन्तःपुरसञ्चारसाधारणाधिकृतेषु दूतेषु वा । शङ्कितेषु जित्वा वशीकृतेषु मूलेषु इतरेषु कृत्रिमेषु च ॥ ३० ॥ कृत्याकृत्यविधानं सन्धिविग्रहादिषु कृत्यं किं कार्यं कृत्यं किमकृत्यमित्येवं प्रकारः । यद्वा कृत्याः शत्रुभिर्भेद्याः तेषामकृत्यविधानम् अभेद्यत्वकरणं दुर्गपर्वतोद्धारादि । आटविकाः अरण्यनिवासिनः । पुलिन्दाः ग्रामोपद्रवकारिणस्तेषां साधनं वशीकरणम् । कण्टकाः चोरा गूढपत्तयो वा तेषां शोधनं निरसनम् ॥ ३१ ॥ अन्यच्च सामभेदादि ॥ ३२ ॥ प्रश्रय एव भूषणं यस्य सः ॥ ३३ ॥ ३४ ॥ कुपितस्य स्तुत्यादिभिः साधनं

तानेवाहं न पश्यामि मित्रादींस्तात! मा क्रुधः।
साध्याभावे महाबाहो! साधनैः किं प्रयोजनम्? ॥३६॥
सर्वभूतात्मके तात! जगन्नाथे जगन्मये।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः? ॥ ३७ ॥
त्वय्यस्ति भगवान् विष्णुर्मयि चान्यत्र चास्ति सः।
यतस्ततोऽयं मित्रं मे शत्रुश्चेति पृथक् कुतः? ॥ ३८ ॥
तदेभिरलमत्यर्थं दुष्टारम्भोक्तिविस्तरैः।
अविद्यान्तर्गतैर्यत्नः कर्त्तव्यस्तात! शोभने ॥ ३९ ॥
विद्याबुद्धिरविद्यायाम् अज्ञानात् तात! जायते।
बालोऽग्निं किं न खद्योतम् असुरेश्वर! मन्यते? ॥४०॥
तत् कर्म यन्न बन्धाय सा विद्या या विमुक्तये।
आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥ ४१ ॥

त्राण। ऐकमत्येन स्थितानां भयजननादिना पृथक् करणं भेदः। भूमिधनादिसमर्पणमुपादानम्। अर्थोपहारादिदण्ड इत्येते उपायाः ॥ ३५ ॥ मा क्रुधः क्रोधं मा कार्षीः ॥ ३६ ॥ सर्वभूतात्मके सर्वेषां भूतानामात्मनि परमात्मनि सर्वजीवनियन्तरि ॥ ३७ ॥ तदेवाह, त्वय्यस्तीति। पृथग्भेदः कुतः ॥ ३८ ॥ दुष्टा रागद्वेषादिपूर्वका ये आरम्भा उद्यमाः तेषामुक्तिविस्तरैर्भाषणविस्तरैः। दृष्टारम्भेति पाठे, दृष्टा ऐहिकभोगार्थारम्भा। शोभने निष्कामे आत्मविद्यायाम् ॥ ३९ ॥ ननु च "आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रय। अर्थशास्त्रचतुर्थास्तु विद्या ह्यष्टादशैव तु ॥" इति स्मृतेर्दण्डनीत्यादिकमपि विद्यैव कथमविद्यान्तर्गतैरित्युच्यते? तत्राह, विद्याबुद्धिरिति, बालः खद्योतमग्निं किं न मन्यते? अपि तु मन्यत एव, तद्वत् ॥ ४० ॥ शोभने यत्नः कर्तव्य इति यदुक्तं तदेव शोधयन्नकर्मादिकमाह, तत् कर्मेति। अपरम् बन्धकारणं कर्म आयासाय श्रमायैव। अन्या विद्या कर्म-

तदेतदवगम्याहम् असारं सारमुत्तमम् ।
निशामय महाभाग ! प्रणिपत्य ब्रवीमि ते ॥ ४२ ॥
न चिन्तयति को राज्यं को धनं नाभिवाञ्छति ।
तथापि भाव्यमेवैतदुभयं प्राप्यते नरैः ॥ ४३ ॥
सर्व एव महाभाग ! महत्त्वं प्रति सोद्यमाः ।
तथापि पुंसां भाग्यानि नोद्यमा भूतिहेतवः ॥ ४४ ॥
जडानामविवेकानाम् अशूराणामपि प्रभो ! ।
भाग्यभोज्यानि राज्यानि सन्त्यनीतिमतामपि ॥४५॥
तस्माद् यतेत पुण्येषु य इच्छेन्महतीं श्रियम् ।
यतितव्यं समत्वे च निर्वाणमपि चेच्छता ॥ ४६ ॥
देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम ॥ ४७ ॥
एतद् विजानता सर्वं जगत् स्थावरजङ्गमम् ।
द्रष्टव्यमात्मवद् विष्णुर्यतोऽयं विश्वरूपधृक् ॥ ४८ ॥
एवं ज्ञाते स भगवान् अनादिः परमेश्वरः ।

मायाादिः । शिल्पनैपुण्यम् ऐन्द्रजालिकादिशिल्पविद्यासु कौशलमात्रमेव । तुच्छफलत्वादित्यर्थः ॥ ४१ ॥ तदेतद् राज्यादेरसाध्यमारम्भं तुच्छं ज्ञात्वा उत्तमं साध्यं यत् तत्ते ब्रवीमि तच्छृणु इत्यन्वयः ॥ ४२ ॥ किञ्च राज्यादेः स्वोदफलत्वेऽपि तदर्थं पृथक् यत्नः कार्यः न केवलं तदर्थोद्यममात्रे । तस्य व्यभिचारित्वादित्याह, नेति त्रिभिः । भाव्यं प्राक्तनपुण्यवशाद् भवितव्यमेव । तदुभयं राज्यं धनञ्च प्राप्यते ॥ ४३ ॥ महत्त्वं राज्यधनादिविभूतिं प्रति । भाग्यान्येव भूतेः राज्यादिविभवे हेतवः । नतूद्यमाः ॥ ४४ ॥ तैर्विनापि राज्यादेर्दृश्यमानत्वादित्याह, जडानामिति चतुर्णामाम् । जडानामविवेकशून्यानां राज्यानि सन्ति ॥ ४५ ॥

प्रसीदत्वच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षयः ॥ ४९ ॥

पराशर उवाच ।

एतत् श्रुत्वा तु कोपेन समुत्थाय वरासनात् ।
हिरण्यकशिपुः पुत्रं पदा वक्षस्यताडयत् ॥ ५० ॥
उवाच च स कोपेन सामर्षः प्रज्वलन्निव ।
निष्पिष्य पाणिना पाणिं हन्तुकामो जगद् यथा ॥ ५१ ॥

हिरण्यकशिपुरुवाच ।

हे विप्रचित्ते ! हे राहो ! हे बलैष महार्णवे ।
नागपाशैर्दृढैर्बद्धा क्षिप्यतां मा विलम्ब्यताम् ॥ ५२ ॥
अन्यथा सकलो लोकस्तथा दैतेयदानवाः ।
अनुयास्यन्ति मूढस्य मतमस्य दुरात्मनः ॥ ५३ ॥
बहुशो वारितोऽस्माभिरयं पापस्तथापरैः ।
स्तुतिं करोति, दुष्टानां वध एवोपकारकः ॥ ५४ ॥

पराशर उवाच ।

ततस्ते सत्वरा दैत्या बद्धा तं नागबन्धनैः ।
भर्त्तुराज्ञां पुरस्कृत्य चिक्षिपुः सलिलालये ॥ ५५ ॥
ततश्चचाल चलता प्रह्लादेन महार्णवः ।
उद्वेलोऽभूत् परं क्षोभमुपेत्य च समन्ततः ॥ ५६ ॥
भूर्लोकमखिलं दृष्ट्वा प्लाव्यमानं महाम्भसा ।

धनलदृष्ट्या निरीक्षणात्, ईषा इति त्रिभिः ॥ ४९ ॥ ५० ॥ पार्ष्णौ आघातम् ॥ ५१ ॥ ननु मायत् सर्पपाशैर्बन्धनं कथ्यते, [illegible] [illegible] [illegible] विष्णुभक्तिं [illegible] [illegible], [illegible] नागपाशैर्बद्धा [illegible] [illegible] [illegible] । [illegible] [illegible] परिभ्रमणात्, [illegible] [illegible] [illegible] ॥ ५२ ॥ ५३ ॥ दोषोपशान्तिहेतुत्वात् वधो दुष्टानामपि

हिरण्यकशिपुर्दैत्यान् इदमाह महामते ॥ ५७ ॥

हिरण्यकशिपुरुवाच ।

दैतेयाः ! सकलैः शैलैरत्रैव वरुणालये ।
निश्छिद्रैः सर्वशः सर्वैश्चीयतामेष दुर्मतिः ॥ ५८ ॥
नाग्निर्दहति नैवायं शस्त्रैश्छिन्नो न चोरगैः ।
क्षयं नीतो न वातेन न विषेण न कृत्यया ॥ ५९ ॥
न मायाभिर्न चैवोच्चात् पातितो न च दिग्गजैः ।
बालोऽतिदुष्टचित्तोऽयं नानेनार्थोऽस्ति जीवता ॥ ६० ॥
तदेष तोयमध्ये तु समाक्रान्तो महीधरैः ।
तिष्ठत्वब्दसहस्रान्तं प्राणान् हास्यति दुर्मतिः ॥ ६१ ॥
ततो दैत्या दानवाश्च पर्वतैस्तं महोदधौ ।
आक्रम्य चयनं चक्रुर्योजनानि सहस्रशः ॥ ६२ ॥
स चितः पर्वतैरन्तः समुद्रस्य महामतिः ।
तुष्टावाह्निकवेलायाम् एकाग्रमतिरच्युतम् ॥ ६३ ॥

प्रह्लाद उवाच ।

नमस्ते पुण्डरीकाक्ष ! नमस्ते पुरुषोत्तम ! ।
नमस्ते सर्वलोकात्मन् ! नमस्ते तिग्मचक्रिणे ॥ ६४ ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ६५ ॥
ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते पुनः ।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्त्तये ॥ ६६ ॥

उपचार एव ॥ ५७ ॥ ५७ ॥ वरुणालये वरुणे निरन्तरैः पर्वतैश्चीयताम् उपर्युपरि निश्छिद्रैराक्रम्यताम् ॥ ५८ ॥ ६२ ॥ आह्निकवेलायाम् अपररात्रः सन्ध्योपासनादिवन्दने ॥ ६२ ॥ ६३ ॥ ब्रह्मण्यानां हिताय ॥

देवा यक्षासुराः सिद्धा नागा गन्धर्वकिन्नराः ।
पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा ॥ ६७ ॥
पक्षिणः स्थावराश्चैव पिपीलिकसरीसृपाः ।
भूमिरापो नभो वायुः शब्दस्पर्शस्तथा रसः ॥ ६८ ॥
रूपं गन्धो मनो बुद्धिरात्मा कालस्तथा गुणाः ।
एतेषां परमार्थश्च सर्वमेतत् त्वमच्युत ॥ ६९ ॥
विद्याविद्ये भवान् सत्यमसत्यं त्वं विषामृते ।
प्रवृत्तञ्च निवृत्तञ्च कर्म वेदोदितं भवान् ॥ ७० ॥
समस्तकर्मभोक्ता च कर्मोपकरणानि च ।
त्वमेव विष्णो सर्वाणि सर्वकर्मफलञ्च यत् ॥ ७१ ॥
मय्यन्यत्र तथान्येषु भूतेषु भुवनेषु च ।
तवैव व्याप्तिरैश्वर्यगुणसंसूचिका प्रभो ॥ ७२ ॥
त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च यज्विनः ।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ॥ ७३ ॥

रूपं महत्ते स्थितमत्र विश्वं
ततश्च सूक्ष्मं जगदेतदीश ।

॥ ६५ ॥ ६६ ॥ विश्वरूपत्वेन स्तौति, देवा इति षड्भिः । देवा यक्षादीनां सर्वेषामेवेति सर्वत्रैवान्वयः । यक्षाश्चासुराश्च ॥ ६७ ॥ आत्मा अहङ्कारः । गुणाः सत्त्वादयः । एतेषां परमार्थः तत्त्वं कारणम् ॥ ६८ ॥ ॥ ७१ ॥ ऐश्वर्यं सर्वव्यापित्वम् । गुणाश्च सर्वज्ञत्वादयः तदेतत् सूचयतीत्यैश्वर्यगुणसंसूचिका तवैव सर्वभूतेषु व्याप्तिः ॥ ७२ ॥ त्वाम् एव त्वामेव योगिनश्चिन्तयन्ति । त्वामेव च यज्वानो यजन्ति । पितृदेवस्वरूपधृक् ॥ ७३ ॥ महत् पारमार्थिकम् अत्युत्कृष्टम् पूर्णस्वरूपमात्र, स्थूलमिति सूक्ष्मम् । विश्वरूपं स्थूलरूपं सूक्ष्मरूपम् ... सि-

रूपाणि सर्वाणि च भूतभेदा-
स्तेष्वन्तरात्माख्यमतीव सूक्ष्मम् ॥ ७४ ॥
तस्माच्च सूक्ष्मादिविशेषणानाम्
अगोचरे यत् परमात्मरूपम् ।
किमप्यचिन्त्यं तव रूपमस्ति
तस्मै नमस्ते पुरुषोत्तमाय ॥ ७५ ॥
सर्वभूतेषु सर्वात्मन् ! या शक्तिरपराभव ! ।
गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वर ! ॥ ७६ ॥
यातीतगोचरा वाचां मनसाञ्चाविशेषणा ।
ज्ञानिज्ञानपरिच्छेद्या तां वन्दे चेश्वरीं पराम् ॥ ७७ ॥

विराड्रूपम् । रूपं महत् ते स्थितमत्र विश्वमिति पाठे महद्रूपं मिदं ब्रह्माण्डम् यत्र स्थितं जगदेतत्, ततश्च सूक्ष्मं रूपमित्यन्वयः । ततोऽपि सूक्ष्माणि रूपाणि भूतभेदाः जरायुजादि चतुर्विधा देहाः । तेष्वपि अन्तरात्माख्यं क्षेत्रज्ञरूपमतीव सूक्ष्मं रूपम् ॥ ७४ ॥ तस्मादपि परं सूक्ष्मादि विशेषणानाम् अविषये वर्त्तमानं तव किमप्यचिन्त्यं रूपमस्ति, तस्मै पुरुषोत्तमाख्याय ते रूपाय नमः । "यस्मात् क्षरमतीतोऽहम् अक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इति स्मृतेः ॥ ७५ ॥ नन्वेवम्भूतस्य कुतः स्थूलसूक्ष्माद्यनेकरूपत्वमित्याशङ्क्य तदुपपादकं शक्तिरूपं प्रणमति । सर्वेषु भूतेष्विति द्वाभ्याम् । अपरा अधृष्यशक्तिः प्रत्यगात्मा ॥ ७६ ॥ वाचां मनसाञ्च यातीतगोचरा अतिक्रान्तो गोचरो यया सा । अत्रादिविशेषणा जातिगुणादि विशेषणशून्या । ज्ञानिनां योगिनां यानि ब्रह्मादिविषयाणि प्रादेशिकानि ज्ञानानि तैः परिच्छेद्या वर्त्तते अपरिच्छिन्नैर्योगिभिर्ज्ञानादपरोक्षत्वेन वर्त्तमानत्वेनावगम्या । यद्वा ज्ञानी जीवः, ज्ञानं बुद्धिः, तद्द्वयस्यापि परिच्छेद्यं वाच्यवाचकादिरूपं प्रमाणं यस्याः सा तस्याः सर्वभावकत्वात् । ताभीश्वरीम् ईश्वरस्य तव स्वरूप-

ॐ नमो वासुदेवाय तस्मै भगवते सदा ।
व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः ॥७८॥
नमस्तस्मै नमस्तस्मै नमस्तस्मै महात्मने ।
नामरूपं न यस्यैको योऽस्तित्वेनोपलभ्यते ॥ ७९ ॥
यस्यावताररूपाणि समर्चन्ति दिवौकसः ।
अपश्यन्तः परं रूपं नमस्तस्मै महात्मने ॥ ८० ॥
योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभम् ।
तं सर्वसाक्षिणं विष्णुं नमस्ये परमेश्वरम् ॥ ८१ ॥
नमोऽस्तु विष्णवे तस्मै यस्याभिन्नमिदं जगत् ।
ध्येयः स जगतामाद्यः प्रसीदतु ममाव्ययः ॥ ८२ ॥
यत्रोतमेतत् प्रोतञ्च विश्वमक्षरमव्ययम् ।

मूर्त्तां परां विष्णुभक्तिं वन्दे । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च इति श्रुतेः । अत एव सर्वशक्तित्वेनाधिव्यतिरिक्ति- सर्वेश्वरत्व गुणत्वम् । ... ॥७७॥ ... प्रणमति । ओं नम इति द्वाभ्याम् ॥७८॥ नमस्तस्मा इति त्रिभिः ... रूपं ... मूर्तिविग्रहरूपजगद्व्यस्तरूपैः प्रणामः । नामरूपं न यस्य तस्मै नम ... योऽस्तित्वेनोपलभ्यते, तस्मै महात्मने नम इति ... प्रणाम इति ... ॥ ७९ ॥ नन्वेवं ... परमेश्वरस्यापि ... अतः ... नमस्तस्मै ... ॥ ८० ॥ नन्वेवं परमेश्वर एव ... ॥ ८१ ॥ ... जगतः परमेश्वरात्मन ... ॥ ८२ ॥ ...

आधारभूतः सर्वस्य स प्रसीदतु मे हरिः ॥ ८३ ॥
नमोऽस्तु विष्णवे तस्मै नमस्तस्मै पुनः पुनः ।
यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः ॥ ८४ ॥
सर्वगत्वादनन्तस्य स एवाहमवस्थितः ।
मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ॥ ८५ ॥
अहमेवाक्षयो नित्यः परमात्मात्मसंश्रयः ।
ब्रह्मसंज्ञोऽहमेवाग्रे तथान्ते च परः पुमान् ॥ ८६ ॥

विंशोऽध्यायः ।

पराशर उवाच ।

एवं सञ्चिन्तयन् विष्णुमभेदेनात्मनो द्विज ।
तन्मयत्वमवाप्याग्र्यं मेने चात्मानमच्युतम् ॥ १ ॥
विसस्मार तथात्मानं नान्यत् किञ्चिदजानत ।
अहमेवाव्ययोऽनन्तः परमात्मेत्यचिन्तयत् ॥ २ ॥

यस्मिन् प्रोतं विश्वं दीर्घतन्तुषु पटवत् प्रथितम् । प्रोतञ्च तिर्यक्तन्तुषु पटवदेवोतम् । अक्षरम् अव्ययम् प्रधानपुरुषादिरूपम् ॥८३॥ तस्मै सर्वात्मने संक्षेपतः स्तवं समापयति, नम इति । यत्र सर्वं प्रलये तस्मै नमः । यतः सर्वं सृष्टौ तस्मै नमः । यः सर्वं स्थितौ पुनस्तस्मै नमः । अत एव यः सर्वस्य संश्रय आधारः, पुनस्तस्मै नम इत्यवतारस्तवा-वस्थाभेदात् नमस्काराभ्यासः ॥ ८४ ॥ तदेवं विष्णोः सर्वात्मकतया सर्वात्मत्वं भावयन् स्वस्यापि ब्रह्मत्वाभिमानेन तदभेदं प्रत्यक्षवत्, सर्वगत्वादिति द्वाभ्याम् ॥ ८५ ॥ अग्रे सृष्टेः पूर्वम् अन्ते च प्रलयानन्तरम् ॥ ८६ ॥



तस्य तद्भावनायोगात् क्षीणपापस्य वै क्रमात्।
शुद्धेऽन्तःकरणे विष्णुस्तस्थौ ज्ञानमयोऽच्युतः ॥ ३ ॥
योगप्रभावात् प्रह्लादे जाते विष्णुमयेऽसुरे।
चलत्युरगबन्धैस्तैर्मैत्रेय त्रुटितं क्षणात् ॥ ४ ॥
भ्रान्तग्राहगणः सोर्मिर्ययौ क्षोभं महार्णवः।
चचाल च मही सर्वा सशैलवनकानना ॥ ५ ॥
स च तं शैलसङ्घातं दैत्यैर्न्यस्तमथोपरि।
प्रक्षिप्य तस्मात् सलिलान्निश्चक्राम महामतिः ॥ ६ ॥
दृष्ट्वा च स जगद्भूयो गगनाद्युपलक्षणम्।
प्रह्लादोऽस्मीति सस्मार पुनरात्मानमात्मना ॥ ७ ॥
तुष्टाव च पुनर्धीमान् अनादिं पुरुषोत्तमम्।
एकाग्रमतिरव्यग्रो यतवाक्कायमानसः ॥ ८ ॥

प्रह्लाद उवाच।

ओँ नमः परमार्थार्थ ! स्थूलसूक्ष्म क्षराक्षर !।
व्यक्ताव्यक्त ! कलातीत ! सकलेश ! निरञ्जन ! ॥ ९ ॥
गुणाञ्जन ! गुणाधार ! निर्गुणात्मन् गुणस्थिर !।
मूर्त्तामूर्त्त ! महामूर्त्ते सूक्ष्ममूर्त्ते ! स्फुटास्फुट ! ॥ १० ॥

आत्मानं प्रह्लादोऽहमिति विस्मृतवान् ॥ ? ॥ २ ॥ क्षीणपापस्य अनवच्छिन्नब्रह्मभावनावतः ॥ ३ ॥ त्रुटितं छिन्नं भावे क्तः ॥ ४ ॥ भ्रान्तो ग्राहगणो यस्मिन् सः। सोर्मिः ऊर्मिभिः सह वर्त्तमानः ॥५॥८॥ हे परमार्थज्ञानरूप ! हे अर्थस्वरूप ! "ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः। तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्" इत्युक्तत्वात्। स्थूलसूक्ष्मरूप ! कलातीत ! निरवयव ! सकल ! सावयव ! ईश ! नियामक ! निरञ्जन ! निर्लेप ! ॥ ९ ॥ गुणान् अनक्ति

करालसौम्यरूपात्मन् ! विद्याविद्यालयाच्युत ! ।
सदसद्रूपसद्भाव ! सदसद्भावभावन ! ॥ ११ ॥
नित्यानित्यप्रपञ्चात्मन् ! निष्प्रपञ्चामलाश्रित ! ।
एकानेक ! नमस्तुभ्यं वासुदेवादिकारण ! ॥ १२ ॥
यः स्थूलसूक्ष्मः प्रकटः प्रकाशो यः सर्वभूतो न च सर्वभूतः ।
विश्वं यतश्चैतदविश्वहेतोर्नमोऽस्तु तस्मै पुरुषोत्तमाय ॥१३॥

पराशर उवाच ।

तस्य तच्चेतसो देवः स्तुतिमित्थं प्रकुर्वतः ।
आविर्बभूव भगवान् पीताम्बरधरो हरिः ॥ १४ ॥
ससम्भ्रमस्तमालोक्य समुत्थायाकुलाक्षरम् ।
नमोऽस्तु विष्णवेत्येतत् व्याजहारासकृद्द्विज ! ॥ १५ ॥

प्रह्लाद उवाच ।

देव ! प्रपन्नार्त्तिहर ! प्रसादं कुरु केशव ! ।
अवलोकनदानेन भूयो मां पावयाच्युत ! ॥ १६ ॥

अवतारावस्थाभ्यामनुरञ्जयतीति वा गुणानामाधारः गुणेषु स्थिरा । परिस्थितेति पाठे परमश्चासौ तस्य स्थितेश्चार्थ । भक्तानां स्फुट ! अन्येषामस्फुट ! ॥१०॥ करालसौम्यरूपात्मात्मन् ! सदसद्रूपयोः कार्यकारणयोः सद्भाव उत्पत्तिर्यस्मात् तादृश च सदसद्भावो भावयति पालयतीति तथा ॥११॥ अनन्यैर्योगिभिराश्रित ! परमार्थत्वादिषु आदिकारणेष्वन्त्ये पदेऽपि पदेष्वन्येष्वपि तुभ्यं नम इत्यनुषङ्गेण प्रत्येकं वाक्यसमाप्तिर्द्रष्टव्या ॥ १२ ॥ सर्वेषां भूतानां यः प्रकटः प्रकाशविद्रूपत्वात् । अविश्वहेतो सर्वकारणव्यतिरिक्तत्वात् ॥ १३ ॥ तस्मिन् हरावेव चेतो यस्य ॥ १४ ॥ विष्णवेति सन्धिरार्षः ॥ १५ ॥ अवलोकनं प्रसादं

श्रीभगवानुवाच ।

कुर्वतस्ते प्रसन्नोऽहं भक्तिमव्यभिचारिणीम् ।
यथाभिलषितो मत्तः प्रह्लाद ! व्रियतां वरः ॥ १७ ॥

प्रह्लाद उवाच ।

नाथ ! योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥ १८ ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥ १९ ॥

श्रीभगवानुवाच ।

मयि भक्तिस्तवास्त्येव भूयोऽप्येवं भविष्यति ।
वरस्तु मत्तः प्रह्लाद ! व्रियतां यस्तवेप्सितः ॥ २० ॥

प्रह्लाद उवाच ।

मयि द्वेषानुबन्धोऽभूत् संस्तुतावुद्यते तव ।
मत्पितुस्तत् कृतं पापं देव ! तस्य प्रणश्यतु ॥ २१ ॥
शस्त्राणि पातितान्यङ्गे क्षिप्तो यच्चाग्निसंहतौ ।
दंशितश्चोरगैर्दत्तं यद्विषं मम भोजने ॥ २२ ॥
बद्ध्वा समुद्रे यत् क्षिप्तो यच्चितोऽस्मि शिलोच्चयैः ।
अन्यानि चाप्यसाधूनि यानि यानि कृतानि मे ॥ २३ ॥

दर्शनं तव दानेन ॥ १६ ॥ १७ ॥ हे अच्युत । त्वयि मे अच्युता ऐकान्तिकी भक्तिरस्तु एकान्तभक्तिः परमानन्दभोगेति तां प्रीतिं प्रार्थयते । येति यादृशी प्रीतिर्विषयेषु अविवेकानां सा तादृशी प्रीतिर्मे हृदयात् मापसर्पतु अपसरतु हृदये सदा तिष्ठत्वित्यर्थः । यथा हे नाथ ! अस्मज्जने ! या विषयप्रीतिस्त्वामनुस्मरतो हृदयात् मापैतु निर्गच्छतु । तद्प्रीतौ एवं तदनुस्मरणयोगादित्यर्थः ॥ १८ ॥ १९ ॥ २१ ॥ विषो॰

त्वयि भक्तिमतो द्वेषादघं तत्सम्भवञ्च यत् ।
त्वत्प्रसादात् प्रभो ! सद्यस्तेन मुच्येत मे पिता ॥ २४ ॥

श्रीभगवानुवाच ।

प्रह्लाद ! सर्व्वमेतत् ते मत्प्रसादाद् भविष्यति ।
अन्यञ्च ते वरं दद्मि व्रियतामसुरात्मज ! ॥ २५ ॥

प्रह्लाद उवाच ।

कृतकृत्योऽस्मि भगवन् ! वरेणानेन यत् त्वयि ।
भवित्री त्वत्प्रसादेन भक्तिरव्यभिचारिणी ॥ २६ ॥
धर्म्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥ २७ ॥

श्रीभगवानुवाच ।

यथा ते निश्चलं चेतो मयि भक्तिसमन्वितम् ।
तथा त्वं मत्प्रसादेन निर्व्वाणं परमाप्स्यसि ॥ २८ ॥

पराशर उवाच ।

इत्युक्त्वान्तर्दधे विष्णुस्तस्य मैत्रेय ! पश्यतः ।
स चापि पुनरागम्य ववन्दे चरणौ पितुः ॥ २९ ॥
तं पिता मूर्द्ध्न्युपाघ्राय परिष्वज्य च पीडितम् ।
जीवसीत्याह वत्सेति बाष्पार्द्रनयनो द्विज ! ॥ ३० ॥
प्रीतिमांश्चाभवत् तस्मिन्ननुतापी महासुरः ।
गुरुपित्रोश्चकारैवं शुश्रूषां सोऽपि धर्म्मवित् ॥ ३१ ॥
पितर्य्युपरतिं नीते नरसिंहस्वरूपिणा ।

यद्वे षंतोऽस्मि ॥२३॥ तेन पापेन मे पिता मुच्येत ॥२४॥२५॥
देवहाद्भावदर्शनात् प्रीतिमांश्च तथा तस्मिन् अभवत् ॥३१॥ गुरु

विष्णुना सोऽपि दैत्यानां मैत्रेयाभूत् पतिस्ततः ॥ ३२ ॥
ततो राज्यद्युतिं प्राप्य कर्मशुद्धिकरीं द्विज ।
पुत्रपौत्रांश्च सुबहून् धनान्यैश्वर्यमेव च ॥ ३३ ॥
क्षीणाधिकारः स यदा पुण्यपापविवर्जितः ।
तदासौ भगवद्ध्यानात् परं निर्वाणमाप्तवान् ॥ ३४ ॥
एवंप्रभावो दैत्योऽसौ मैत्रेयासीन्महामतिः ।
प्रह्लादो भगवद्भक्तो यं त्वं मामनुपृच्छसि ॥ ३५ ॥
यस्त्वेतच्चरितं तस्य प्रह्लादस्य महात्मनः ।
शृणोति तस्य पापानि सद्यो गच्छन्ति संक्षयम् ॥ ३६ ॥
अहोरात्रकृतं पापं प्रह्लादचरितं नरः ।
शृण्वन् पठंश्च मैत्रेय व्यपोहति न संशयः ॥ ३७ ॥
पौर्णमास्याममावास्यामष्टम्यामथवा पठन् ।
द्वादश्यां वा तदाप्नोति गोप्रदानफलं द्विज ॥ ३८ ॥

भ्रात्रन्तरे प्रह्लादादन्यात् यद्यपि विष्णुद्वेषादिदोषात् न तत्पदयोग्ये तथापि तत्प्रियत्वादेव विष्णुना पदं निर्मितमिति प्रह्लादो दैत्यानां पतिरभूत् ॥ ३२ ॥ राज्यद्युतिं राजलक्ष्मीं कर्मशुद्धिकरीं चित्तशुद्धिकरीं प्राप्य ॥ ३३ ॥ क्षीणाधिकारः भोगैः क्षीणप्रारब्धकर्मत्वात् पुनस्तैः पुण्यपापैश्च विवर्जितः पुनर्बन्धकर्मविनाशात् अश्लेषात् तत्तरणात् "तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेत" इत्यादि श्रुतेः । तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् ॥ ३४ ॥ ॥ ३६ ॥ अहोरात्रं निरन्तरं यत् कृतं पापं तत् सर्वं शृण्वन् एवं पठंश्च निमेषमात्रेणैव व्यपोहति निरस्यति, तत्र संशयं मुक्त्वा इत्यर्थः । पठनमात्रस्य पाठफलोक्तिः ॥ ३७ ॥ अमावास्यादिविशेषः । गोः प्रदानं प्रकर्षेण दानं ... सुवर्णशृङ्गादि रौप्यखुरादि कांस्यदोहादि वस्त्रालङ्कारादियुक्तेन

प्रह्लादं सकलापत्सु यथा रक्षितवान् हरिः ।
तथा रक्षति यस्तस्य शृणोति चरितं सदा ॥ ३९ ॥

एकविंशोऽध्यायः ।

पराशर उवाच ।

संह्रादपुत्र आयुष्मान् शिबिर्वाष्कल एव च ।
विरोचनस्तु प्राह्लादिर्बलिर्जज्ञे विरोचनात् ॥ १ ॥
बलेः पुत्रशतन्त्वासीद् बाणज्येष्ठं महामुने ।
हिरण्याक्षसुताश्चासन् सर्व एव महाबलाः ॥ २ ॥
तत्कुरः शकुनिश्चैव भूतसन्तापनस्तथा ।
महानाभो महाबाहुः कालनाभस्तथापरः ॥ ३ ॥
अभवन् दनुपुत्राश्च द्विमूर्द्धा शङ्करस्तथा ।
अयोमुखः शङ्कुशिराः कपिलः शम्बरस्तथा ॥ ४ ॥
एकचक्रो महाबाहुस्तारकश्च महाबलः ।
स्वर्भानुर्वृषपर्वा च पुलोमा च महाबलः ॥ ५ ॥

[illegible] ॥ ३९ ॥ [illegible]

प्राह्लादिः प्रह्लादस्य [illegible] ॥ १ ॥ [illegible] ॥ २ ॥ [illegible]

एते दनोः सुताः ख्याताः विप्रचित्तिश्च वीर्य्यवान्।
स्वर्भानोस्तु प्रभा कन्या शर्म्मिष्ठा वार्षपर्व्वणी ॥ ६ ॥
उपदानवी हयशिराः प्रख्याता वरकन्यकाः।
वैश्वानरसुते चोभे पुलोमा कालका तथा ॥ ७ ॥
उभे सुते महाभागे मारीचेस्तु परिग्रहः।
ताभ्यां पुत्रसहस्राणि षष्टिर्दानवसत्तमाः ॥ ८ ॥
पौलोमाः कालकेयाश्च मारीचतनयाः स्मृताः।
ततोऽपरे महावीर्य्या दारुणास्त्वतिनिर्घृणाः ॥ ९ ॥
सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा।
व्यंशः शल्यश्च बलवान् नभश्चैव महाबलः ॥ १० ॥
वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा।
अञ्जको नरकश्चैव कालनाभस्तथैव च ॥ ११ ॥
स्वर्भानुश्च महावीर्य्यो वक्त्रयोधी महाबलः।
एते ते दानवाः श्रेष्ठा दनुवंशविवर्धनाः ॥ १२ ॥
एतेषां पुत्रपौत्राश्च शतशोऽथ सहस्रशः।
प्रह्लादस्य तु दैत्यस्य निवातकवचाः कुले ॥ १३ ॥

॥ ४ ॥ ५ ॥ एते प्रख्याता इति विशेषणेन हरिवंशमत्स्यादिषु दनोः सुतशते गणिता वैश्वानरादयश्च सूचिताः । शर्मिष्ठा वृषपर्वणः कन्या ॥ ६ ॥ उपदानवी च हयशिराश्च तस्यैव कन्ये इति केचित् । भागवते त्वन्यथा "वैश्वानरसुताश्चतस्रश्चारुदर्शनाः । उपदानवी हयशिराः पुलोमा कालका तथा ॥" इति भागवतानुक्तेः ॥ ७ ॥ मरीचेः कश्यपस्य परिग्रहौ भार्ये ॥ ८ ॥ ९ ॥ सिंहिकायां हिरण्यकशिपोर्भगिन्यां विप्रचित्तेर्दनुसुतात् ॥ १० ॥ ११ ॥ [illegible] इति । भावितात्मनः [illegible] ॥ १२ ॥ [illegible]

समुत्पन्नाः सुमहता तपसा भावितात्मनः।
षट् सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्त्तिताः ॥१४॥
शुकी श्येनी च भासी च सुग्रीवी शुचिगृध्रिका।
शुकी शुकानजनयद् उलूकी प्रत्युलूकिकान् ॥ १५ ॥
श्येनी श्येनांस्तथा भासी भासान् गृध्रांश्च गृध्र्यपि।
शुच्यौदकान् पक्षिगणान् सुग्रीवी तु व्यजायत ॥ १६ ॥
अश्वानुष्ट्रान् गर्दभांश्च ताम्रावंशः प्रकीर्त्तितः।
विनतायास्तु पुत्रौ द्वौ विख्यातौ गरुडारुणौ ॥ १७ ॥
सुपर्णः पततां श्रेष्ठो दारुणः पन्नगाशनः।
सुरसायां सहस्रन्तु सर्पाणाममितौजसाम ॥ १८ ॥
अनेकशिरसां ब्रह्मन्! खेचराणां महात्मनाम।
काद्रवेयास्तु बलिनः सहस्रममितौजसः ॥ १९ ॥
सुपर्णवशगा ब्रह्मन्! जज्ञिरे नैकमस्तकाः।
तेषां प्रधानभूतास्तु शेषवासुकितक्षकाः ॥ २० ॥
शङ्खः श्वेतो महापद्मः कम्बलाश्वतरौ तथा।
एलापत्रस्तथा नागः कर्कोटकधनञ्जयौ ॥ २१ ॥

र्ष्ट्रेति लिपिः। सुताः कन्याः ॥ १४ ॥ ता एवाह, शुकीति। सुग्रीवी वा शुचिवर्षि उलूकान् प्रत्युलूकांश्च शेनाजनयदित्यर्थः। न पुनरुलूकी संज्ञा कन्या अनिर्दिष्टत्वात्। "शुकी शुकानजनयत् उलूकी प्रत्युलूकान्" इति मात्स्यकोशे च ॥ १५ ॥ शुच्यौदकान् शुचिरेव शुची वा औदकान् जलजान् पक्षिगणान् व्यजायत। सुग्रीवी तु अश्वादीन् व्यजायतेत्यन्वयः ॥ १६ ॥ ताम्राया वंशः प्रकीर्त्तितः इत्युपसंहरति ॥ १७ ॥ गरुडं विशिनष्टि सुपर्ण इति पततां पक्षिणां श्रेष्ठः। सुरसायां सहस्रन्तु जज्ञे इति शेषः ॥ १८ ॥ अर्द्धोर्द्धं पठन्ति, काद्रवेया इति लिपिः ॥ १९ ॥

एते चान्ये च बहवो दन्दशूका विषोल्बणाः ।
गणं क्रोधवशं विद्धि तस्याः सर्वे च दंष्ट्रिणः ॥ २२ ॥
स्थलजाः पक्षिणोऽब्जाश्च दारुणाः पिशिताशनाः ।
क्रोधा तु जनयामास पिशाचांश्च महाबलान् ।
गास्तु वै जनयामास सुरभिर्महिषांस्तथा ॥ २३ ॥
इरा वृक्षलतावल्लीस्तृणजातीश्च सर्वशः ।
खसा तु यक्षरक्षांसि मुनिरप्सरसस्तथा ॥ २४ ॥
अरिष्टा तु महासत्त्वान् गन्धर्वान् समजीजनत् ।
एते कश्यपदायादाः कीर्त्तिताः स्थाणुजङ्गमाः ॥ २५ ॥
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ।
एष मन्वन्तरे सर्गो ब्रह्मन् स्वारोचिषे स्मृतः ॥ २६ ॥
वैवस्वते च महति वारुणे वितते क्रतौ ।
जुह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते ॥ २७ ॥
पूर्वं यत्र तु सप्तर्षीन् उत्पन्नान् सप्त मानसान् ।
पुत्रत्वे कल्पयामास स्वयमेव पितामहः ॥ २८ ॥

भेदबहुलाः अनेकरूपाः ॥ २० ॥ २१ ॥ क्रोधवशाया वंशमाह, गणमिति । क्रोधवशं गणं क्रोधवशाया जातं विद्धीत्यर्थः । तद्गणस्याप्रतिनिर्वाह ते सर्वे दंष्ट्रिणः राक्षसाः सर्पाश्च । "रक्षोगणं क्रोधवशा स्वनामानमजीजनत् । दंष्ट्रिणां नियुतं तेषां भीमसेनात् क्षयं गतम् ॥" इति मनूक्तेः । रक्षोगणः क्रोधवशादर्शोक्तः भागवतोक्तेश्च ॥ २२ ॥ स्थलजाश्च जलजाश्च अबला मांसाशिनो दारुणाः पक्षिणस्तथा जाता इत्यपि तं विज्ञोऽन्वयः ॥ २३ ॥ सुरभेरिरायाः खसायाः सुमेरुप्रदत्वात् पशूनां वंशमाह, नाम्नीति द्वाभ्याम् ॥ २४ ॥ वैवस्वते च महति मन्वन्तरे वारुणे यज्ञकर्म्मणि ॥ २७ ॥ पूर्वं मन्वन्तरोत्पन्नान् देवान् सप्तर्षीन् ब्रह्मा [illegible] । तामसो ब्रह्मा पुत्रत्वे प्रजापतिसर्गादौ कल्पयामास

गन्धर्व्वभोगिदेवानां दानवानाञ्च सत्तम ।
दितिर्विनष्टपुत्रा वै तोषयामास कश्यपम् ॥ २९ ॥
तया चाराधितः सम्यक् कश्यपस्तपतां वरः ।
वरेण च्छन्दयामास सा च वव्रे ततो वरम् ॥ ३० ॥
पुत्रमिन्द्रवधार्थाय समर्थममितौजसम् ।
स च तस्यै वरं प्रादाद् भार्य्यायै मुनिसत्तमः ॥ ३१ ॥
दत्त्वा च वरमत्युग्रं कश्यपस्तामुवाच ह ।
शक्रं पुत्रो निहन्ता ते यदि गर्भं शरच्छतम् ॥ ३२ ॥
समाहितातिप्रयता शुचिनी धारयिष्यसि ।
इत्येवमुक्त्वा तां देवीं सङ्गतः कश्यपो मुनिः ॥ ३३ ॥
दधार सा च तं गर्भं सम्यक् शौचसमन्विता ।
गर्भमात्मवधार्थाय ज्ञात्वा तं मघवानपि ॥ ३४ ॥
शुश्रूषुस्तामथागच्छद् विनयादमराधिपः ।
तस्याश्चैवान्तरं प्रेप्सुरतिष्ठत् पाकशासनः ॥ ३५ ॥

सत्तमात् सत्तम । स्वर्गं गन्धर्वा व्याप्तवत् विश्वं कल्पयामासेति पाठे गन्धर्वादीनां विश्वं तद्वत्‌ ते व्याप्नुवन्ति इत्यर्थः । अतः कश्यपादेव्यो दैत्यदानवादयः पूर्वं जाताः वैवस्वतमन्वन्तरे तु कश्यपादपि जाता इत्युक्तं भवति ॥ २८ ॥ २९ ॥ एकोनपञ्चाशत् मरुतो देवा कथं दितेः पुत्रा बभूवुरिति वक्तुं पूर्वकथामाह, दितिरित्यादिना यावत् समाप्ति ॥ ३० ॥ छन्दयामास प्रलोभितवान् ॥ ३१ ॥ ३२ ॥ समाहिता श्रीविष्णु-ध्यानपरा । शुचिनी शौचवती । शरच्छतं वर्षशतं यदि गर्भं धारयिष्यसि तर्हि तव पुत्रः शक्रं हनिष्यति । शौचादिनियमवैकल्ये तु विष्णुध्यान-[illegible] देवसुहृत्तरः पुत्रो भविष्यतीति गूढोऽभिप्रायः । शौचादि-नियमाश्च पाद्मे प्रोक्ताः "सन्ध्यायामेव भोक्तव्यं गर्भिण्या वरवर्णिनि" ।

ऊने वर्षशते चास्या ददर्शान्तरमात्मना ।
अकृत्वा पादयोः शौचं दितिः शयनमाविशत् ॥ ३६ ॥
निद्रां चाहारयामास तस्याः कुक्षिं प्रविश्य सः ।
वज्रपाणिर्महागर्भं चिच्छेदाथ स सप्तधा ॥ ३७ ॥
स पाट्यमानो वज्रेण प्ररुरोदातिदारुणम् ।
मा रोदीरिति तं शक्रः पुनः पुनरभाषत ॥ ३८ ॥
सोऽभवत् सप्तधा गर्भस्तमिन्द्रः कुपितः पुनः ।
एकैकं सप्तधा चक्रे वज्रेणारिविदारिणा ॥ ३९ ॥
मरुतो नाम देवास्ते बभूवुरतिवेगिनः ।
यदुक्तं वै भगवता तेनैव मरुतोऽभवन् ।
देवा एकोनपञ्चाशत् सहाया वज्रपाणिनः ॥ ४० ॥

न स्नातव्यं न भोक्तव्यं इत्यादिप्रसङ्गे सर्वदा । वर्जयेत् ... नामङ्गलं तथैव च । नो शक्रबीजं निवेश्य नाशुचिः स्यात् कदाचन ॥" इत्याद्या । भागवते च । "न हिंस्यात् सर्वभूतानि न शपेन् नानृतं वदेः" इत्याद्याः ॥ ३२ ॥ ३५ ॥ अन्तरप्रेप्सुः शौचादिन्यूनत्वं चाव दिदृक्षुः ॥ ३६ ॥ अन्तरमाह, अकृत्वेति आहारयामास नाशयामास ॥ ३७ ॥ पाट्यमानः छिद्यमानः ॥ ३८ ॥ ३९ ॥ यदुक्तं मा रोदीरिति तेन मरुतोऽभवन् इत्युत्तरवाक्यात् निरुक्तिः । वज्रोपलक्षितः पाणिर्वज्रपाणिः, सोऽस्यास्तीति वज्रपाणी, तस्य शोभादिभ्यश्चेति छान्दसः ॥ ४० ॥

द्वाविंशोऽध्यायः।

पराशर उवाच।

यदाभिषिक्तः स पृथुः पूर्वं राज्ये महर्षिभिः।
ततः क्रमेण राज्यानि ददौ लोकपितामहः॥ १॥
नक्षत्रग्रहविप्राणां वीरुधाञ्चाप्यशेषतः।
सोमं राज्येऽदधाद् ब्रह्मा यज्ञानां तपसामपि॥ २॥
राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा।
आदित्यानां पतिं विष्णुं वसूनामथ पावकम्॥ ३॥
प्रजापतीनां दक्षन्तु वासवं मरुतामपि।
दैत्यानां दानवानाञ्च प्रह्लादमधिपं ददौ॥ ४॥
पितॄणां धर्मराजं तं यमं राज्येऽभ्यषेचयत्।
ऐरावतं गजेन्द्राणाम् अशेषाणां पतिं ददौ॥ ५॥
पतत्रिणाञ्च गरुडं देवानामपि वासवम्।
उच्चैःश्रवसमश्वानां वृषभन्तु गवामपि॥ ६॥
शेषन्तु नागराजानं मृगाणां सिंहमीश्वरम्।
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत्॥ ७॥
एवं विभज्य राज्यानि दिशां पालाननन्तरम्।

एवं तावद् देवादीनां सृष्टिरुक्ता, इदानीं तत्तदभिमानित्वेन विष्णोर्विभूतीर्वक्तुमाह, यदेत्यादिना यावत् समाप्ति॥ १॥ यज्ञादीनां तपोऽन्तानां राज्ये सोममदधात्॥ २॥ राज्ञां राज्ये वैश्रवणं कुबेरमदधादित्यनुषङ्गः॥ ३॥ मरुतां दितिपुत्राणां वासवमधिपं ददौ॥ ४॥ ५॥ अन्येषामपि देवानां वासवमेव ददौ॥ ६॥ सिंहमीश्वरं

प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्वतः ॥ ८ ॥
पूर्वस्यां दिशि राजानं वैराजस्य प्रजापतेः ।
दिशः पालं सुधन्वानं सुतं वै सोऽभ्यषेचयत् ॥ ९ ॥
दक्षिणस्यां दिशि तथा कर्दमस्य प्रजापतेः ।
पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥ १० ॥
पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतम् ।
केतुमन्तं महात्मानं राजानमभिषिक्तवान् ॥ ११ ॥
तथा हिरण्यरोमाणं पर्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्धर्षं राजानमभ्यषेचयत् ॥ १२ ॥
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्मतः परिपाल्यते ॥ १३ ॥
एते सर्वे प्रवृत्तस्य स्थितौ विष्णोर्महात्मनः ।
विभूतिभूता राजानो ये चान्ये मुनिसत्तम ! ॥ १४ ॥
ये भविष्यन्ति ये भूताः सर्वे भूतेश्वरा द्विज ! ।
ते सर्वे सर्वभूतस्य विष्णोरंशा द्विजोत्तम ! ॥ १५ ॥
ये तु देवाधिपतयो ये च दैत्याधिपास्तथा ।
दानवानाञ्च ये नाथा ये नाथाः पिशिताशिनाम् ॥ १६ ॥
पशूनां ये च पतयः पतयो ये च पक्षिणाम् ।
मनुष्याणाञ्च सर्पाणां नागानाञ्चाधिपाश्च ये ॥ १७ ॥

वर्तितम् ॥ ७ ॥ दिशां पालम् दिक्पालकम् ॥ ८ ॥ १० ॥ अच्युतम-
मिति केतुमतो विशेषणम् ॥ ११ ॥ पर्जन्यस्य प्रजापतेः पुत्रमित्यनुषङ्गः ।
॥ १२ ॥ १३ ॥ अनुवादपूर्वकमाह सम्भूतीनां भगवद्विभूतित्व-
माह, एत इति चतुर्भिः । स्थितौ प्रवृत्तस्य विष्णोर्विभूतिभूताः

वृक्षाणां पर्वतानाञ्च ग्रहाणाञ्चापि येऽधिपाः।
अतीता वर्त्तमानाश्च ये भविष्यन्ति चापरे ॥ १८ ॥
ते सर्वे सर्वभूतस्य विष्णोरंशसमुद्भवाः।
न हि पालनसामर्थ्यम् ऋते सर्वेश्वरं हरिम् ॥ १९ ॥
स्थितौ स्थितं महाप्राज्ञ भवत्यन्यस्य कस्यचित् ॥ २० ॥
सृजत्येष जगत्सृष्टौ स्थितौ पाति सनातनः।
हन्ति चैवान्तकत्वे च रजःसत्त्वादिसंश्रयः ॥ २१ ॥
चतुर्विभागः संसृष्टौ चतुर्द्धा संस्थितः स्थितौ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्द्दनः ॥ २२ ॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्त्तिमान्।
मरीचिमिश्राः पतयः प्रजानामन्यभागतः ॥ २३ ॥
कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः।
इत्थं चतुर्द्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः ॥ २४ ॥
एकांशेन स्थितो विष्णुः करोति प्रतिपालनम्।
मन्वादिरूपश्चान्येन कालरूपोऽपरेण च ॥ २५ ॥
सर्वभूतेषु चान्येन संस्थितः कुरुते स्थितिम्।
सत्त्वं गुणं समाश्रित्य जगतः पुरुषोत्तमः ॥ २६ ॥
आश्रित्य तमसो वृत्तिम् अन्तकाले तथा पुनः।
रुद्रस्वरूपो भगवान् एकांशेन भवत्यजः ॥ २७ ॥

॥ १७ ॥ १८ ॥ तत्र चेतनमचेतनं चेति ॥ १९ ॥ स्मृत एव तृष्णः सृष्ट्यादिरूपकी च एवेश्वरः, तुष्टत्वेन इति ॥ २० ॥ तदेव सृष्ट्यादिरूपेण चतुर्धा विभजते। चतुर्विभाग इत्यादिभिः। संसृष्टौ कल्पम सृष्टौ चतुर्विभागः स्थितिरिति क्वचित् पाठः ॥ २१ ॥ २२ ॥ रज एव गुणो यस्य च एव रजो-

अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते ।
कालस्वरूपो भागोऽन्यः सर्वभूतानि चापरः ॥ २८ ॥
विनाशं कुर्वतस्तस्य चतुर्धैवं महात्मनः ।
विभागकल्पना ब्रह्मन् ! कथ्यते सार्वकालिकी ॥ २९ ॥
ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः ।
विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥ ३० ॥
विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज ! ।
स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥ ३१ ॥
रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जन्तवः ।
चतुर्धा प्रलयायैता जनार्दनविभूतयः ॥ ३२ ॥
जगदादौ तथा मध्ये सृष्टिराप्रलयाद् द्विज ! ।
धात्रा मरीचिमिश्रैश्च क्रियते जन्तुभिस्तथा ॥ ३३ ॥
ब्रह्मा सृजत्यादिकाले मरीचिप्रमुखास्ततः ।
उत्पादयन्त्यपत्यानि जन्तवश्च प्रतिक्षणम् ॥ ३४ ॥
कालेन न विना ब्रह्मा सृष्टिनिष्पादको द्विज ! ।
न प्रजापतयः सर्वे न चैवाखिलजन्तवः ॥ ३५ ॥
एवमेव विभागोऽयं स्थितावप्युपदिश्यते ।
चतुर्धा देवदेवस्य मैत्रेय ! प्रलये तथा ॥ ३६ ॥

गुण ॥ २७ ॥ २८ ॥ एतं च ब्रह्मादयो हरेरेव विभूतय इत्याह, ब्रह्मेति त्रिभिः । सर्वकालिकी सर्वकल्पगता ॥ २९ ॥ ३० ॥ ब्रह्मादिमन्वादिविभूतीनां कार्यभेदेन चातुर्व्यमाह, जगदादाविति द्वाभ्याम् ॥ ३३ ॥ ३४ ॥ स्व स्व कार्यविभूतिषु ब्रह्मा सृष्टिः कालनिमित्तमित्याह, न चैवेति ॥ ३५ ॥ एवमेव स्थितिप्रलययोरप्यतिदिशति, एवमेवेति ॥ ३६ ॥ चतुर्धा प्रलयोत्पत्तिस्वरूपं सृष्ट्यादिरूपाणां सर्वत्राह, यत्किञ्चिदिति ।

यत् किञ्चित् सृज्यते येन सत्त्वजातेन वै द्विज ! ।
तस्य सृज्यस्य संभूतौ तत् सर्वं वै हरेस्तनुः ॥ ३७ ॥
हन्ति या यत् क्वचित् किञ्चित् भूतं स्थावरजङ्गमम् ।
जनार्दनस्य तद् रौद्रं मैत्रेयान्तकरं वपुः ॥ ३८ ॥
एवमेव जगत्स्रष्टा जगत्पाता तथैव च ।
जगद्भक्षयिता देवः समस्तस्य जनार्दनः ॥ ३९ ॥
सृष्टिस्थित्यन्तकालेषु त्रिधैवं संप्रवर्त्तते ।
गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् ॥ ४० ॥
तच्च ज्ञानमयं व्यापि स्वसंवेद्यमनौपमम् ।
चतुःप्रकारं तदपि स्वरूपं परमात्मनः ॥ ४१ ॥

मैत्रेय उवाच ।

चतुःप्रकारतां तस्य ब्रह्मभूतस्य वै मुने ! ।
ममाचक्ष्व यथान्यायं यदुक्तं परमं पदम् ॥ ४१ ॥

पराशर उवाच ।

मैत्रेय ! कारणं प्रोक्तं साधनं सर्ववस्तुषु ।
साध्यञ्च वस्त्वभिमतं यत् साधयितुमात्मनः ॥ ४२ ॥

सत्त्वजातेन प्राणिमात्रेण पालनेऽप्येतद् द्रष्टव्यम् ॥ ३६ ॥ ३७ ॥ अन्त-
कराणां विष्णुविभूतित्वमुपसंहरन्नाह, एवमिति द्वाभ्याम् ॥ ३८ ॥
गुणप्रवृत्त्या गुणानां क्षोभेण त्रिविधं ब्रह्मादिरूपः सन् सृष्ट्यादौ
संप्रवर्त्तते ॥३९॥ तस्य तु परमं पदमगुणम् अतो अतत् एवं तत्स्वरूप-
प्राप्तिप्रकारोपदेशार्थं चातुर्विध्यमुपदिशति, तच्चेति ॥ ४० ॥ ज्ञानमयं
स्वानन्द निर्भेदत्वात् कथं चातुर्विध्यमिति पृच्छति । चतुःप्रकारतेति
॥ ४१ ॥ निर्गुणस्य ब्रह्मणः कथं ततः प्राप्यप्रापकसाधनसाध्यलक्षण-
मनोऽवस्थाभिव्यक्त्याभिव्यक्तस्य चातुर्विध्यं न विरुध्यत इति वक्तुमाह,

योगिनो मुक्तिकामस्य प्राणायामादिसाधनम् ।
साध्यञ्च परमं ब्रह्म पुनर्नावर्त्तते यतः ॥ ४३ ॥
साधनालम्बनं ज्ञानं मुक्तये योगिनो हि यत् ।
स भेदः प्रथमस्तस्य ब्रह्मभूतस्य वै मुने ! ॥ ४४ ॥
युञ्जतः क्लेशमुक्त्यर्थं साध्यं यद्ब्रह्म योगिनः ।
तदालम्बनविज्ञानं द्वितीयोऽंशो महामुने ! ॥ ४५ ॥
उभयोस्त्वविभागेन साध्यसाधनयोर्हि यत् ।
विज्ञानमद्वैतमयं तद्भागोऽन्यो मयोदितः ॥ ४६ ॥
ज्ञानत्रयस्य चैतस्य विशेषो यो महामुने ! ।
तन्निराकरणद्वारा दर्शितात्मस्वरूपवत् ॥ ४७ ॥

भेदेनाह त्रिभिः । यदेव च वस्तु यत् कारणं तत् साधनं मोक्षं तद्व्या-
ज्ञानः साधनतया भवति वस्तु तत्साध्यं मोक्षमिच्छतः ॥ ४२ ॥
प्रस्तुते च तत्र मुक्तिकामस्य योगिनो मुक्तेः साधनं देहात्मविवेकस्वरूपं
तं पदार्थशुद्धिं विना मुक्तेरसम्भवात् । साध्यन्तु तत्पदलक्ष्यं परमं
ब्रह्मनिष्ठबुद्ध्यात्मत्वात् ॥ ४३ ॥ ततः किमत आह, साधनेति ।
साधनं देहात्मविवेकेन त्वं पदार्थशुद्धिः । तदालम्बनं युञ्जन् पदार्थ-
विषयं ज्ञानं च यत् तत् चतुर्भेदज्ञानभूतस्य ब्रह्मणः प्रथमो भेदः ॥ ४४ ॥
क्लेशमुक्त्यर्थं युञ्जतः योगमभ्यस्यतो योगिनो यत्साध्यं ब्रह्म तद्विषयं
यद्विज्ञानं ब्रह्मेति तत्पदलक्ष्यार्थस्य विवेकेन ज्ञानं द्वितीयोंऽशः ॥ ४५ ॥
उभयोरविभागेन परस्परैक्येन ब्रह्मैवाहम् अहमेव ब्रह्मेति विशिष्टं
यत् ज्ञानं सोऽन्यस्तृतीयो भागो मयोदितः ॥ ४६ ॥ एतस्य त्वं पदार्थ-
तत्पदार्थतदैक्यविषयस्य ज्ञानत्रयस्य यो विशेषः देहादिविलक्षणोऽयमिति
परिच्छिन्नस्वरूपं ब्रह्मापरमिति द्वयोस्तत्र विशेषः, तस्य निराकरणं
परित्यागः, तद्द्वारेण दर्शितं अखण्डचैतन्यात्मस्वरूपं यत्तत् । तदेवाकार-
ज्ञानाद्वयं चित्स्वरूपेणावस्थितं परब्रह्मात्मज्ञानं चतुर्थमिति

निर्व्यापारमनाख्येयं व्याप्तिमात्रमनौपमम् ।
आत्मसम्बोधविषयं सत्तामात्रमलक्षणम् ॥ ४८ ॥
प्रशान्तमभयं शुद्धमविभाव्यमसंश्रितम् ।
विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदम् ॥ ४९ ॥
तत्रात्मज्ञाननिरोधेन योगिनो यान्ति ये लयम् ।
संसारकर्षणोप्तौ ते यान्ति निर्बीजतां द्विज ॥ ५० ॥

तृतीयेनान्वयः ॥ ४७ ॥ तदेव द्वादशभिः पदैर्विशिनष्टि । निर्व्यापारं ध्यानादिसर्वव्यापारशून्यम् अत एव अनाख्येयं निर्देष्टुमशक्यं किन्तु आत्मप्रत्यक्षं मनसा तदाकारतामापन्नम् [illegible] । अनौपमं निरुपमं [illegible] । तदाह, आत्मनः सम्बोधः प्रकाशस्तद्विषयं [illegible] । तथापि सत्तामात्रम् [illegible] विशेषशून्यं तत्र हेतुः [illegible] मनोऽविषयत्वात् [illegible] । तदुक्तं [illegible] मनसा [illegible] ॥ ४८ ॥ [illegible] प्रशान्तं [illegible] । [illegible] शुद्धं [illegible] अविभाव्यम् [illegible] असंश्रितम् [illegible] । [illegible] तदुक्तं [illegible] पदं [illegible] । [illegible] पुरुषो [illegible] इति ॥ ४९ ॥ [illegible] योगिनः [illegible] तत्रेति । तत्र [illegible] लयम् [illegible] यान्ति । [illegible] । संसारकर्षणोप्तौ संसार एव कर्षणं [illegible] कर्मसंस्कारं [illegible] निर्बीजतां यान्ति [illegible]

एवंप्रकारममलं नित्यं व्यापकमक्षयम् ।
समस्तभेदरहितं विष्ण्वाख्यं परमं पदम् ॥ ५१ ॥
तद् ब्रह्म परमं योगी यतो नावर्त्तते पुनः ।
अपुण्यपुण्योपरमे क्षीणक्लेशोऽतिनिर्मलः ॥ ५२ ॥
द्वे रूपे ब्रह्मणस्तस्य मूर्त्तञ्चामूर्त्तमेव च ।
क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते ॥ ५३ ॥
अक्षरं तत् परं ब्रह्म क्षरं सर्वमिदं जगत् ।
एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ॥ ५४ ॥
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ।
तत्राप्यासन्नदूरत्वाद् बहुत्वस्वल्पतामयः ॥ ५५ ॥
ज्योत्स्नाभेदोऽस्ति तच्छक्तेस्तद्वन् मैत्रेय ! विद्यते ।
ब्रह्मविष्णुशिवा ब्रह्मन् ! प्रधाना ब्रह्मशक्तयः ॥ ५६ ॥

चाक्षीणैः कर्मभिर्योगीव न संसरतीत्यर्थः ॥ ५० ॥ तर्हि योगी किं भवतीत्यत आह, एवमिति द्वाभ्याम् । एवंप्रकारं परं ब्रह्मैव, योगी प्राप्नोतीति शेषः ॥ ५१ ॥ ५२ ॥ तत्प्राप्तिसाधनभूतोपासनार्थमाह, द्वे रूपे इति । मूर्त्तामूर्त्तं पराऽपरं चेत्यर्थः, क्षराक्षरे इति ॥ ५३ ॥ क्षराक्षरे रूपे व्याचष्टे, अक्षरमिति । क्षरं सर्वमिदम् अचेतनात्मकं जगत् । वक्ष्यति हि । 'आश्रयश्चेतसो ब्रह्मन् ! द्विधा तच्च स्वभावतः । रूपं मूर्त्तममूर्त्तञ्च परञ्चापरमेव च' । इति समस्तस्य परब्रह्मणस्तद्विभवत्वं क्षरं रूपं कथं स्यादित्याशङ्क्य दृष्टान्तेनोपपादयति, एकदेशेति । एकदेशस्थितस्याग्नेर्दीप्तस्यापि तद्विकारभूता ज्योत्स्ना प्रभा यथा तत्प्रकाशशक्तिविस्तारः ॥ ५४ ॥ तथा ब्रह्मणः शक्तितो विस्तार इदमखिलं ब्रह्मरूपं जगत् । अस्मिन् दृष्टान्तेनैव ब्रह्मादिजीवतारतम्यमपि उपपन्नमित्याह । तत्रापि दृष्टान्तभूतेऽस्मिन्नपि आसन्नत्वाद् बहुत्वम् । दूरत्वात्स्वल्पत्वमित्यन्वयो यथा ज्योत्स्नाया भेदोऽस्ति ॥ ५५ ॥

ततश्च देवा मैत्रेय ! न्यूना दक्षादयस्ततः ।
ततो मनुष्याः पशवो मृगपक्षिसरीसृपाः ।
न्यूना न्यूनतराश्चैव वृक्षगुल्मादयस्ततः ॥ ५७ ॥
तदेतदक्षरं नित्यं जगन् मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥ ५८ ॥
सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणोऽपरम् ।
मूर्त्तं यद् योगिभिः पूर्वं योगारम्भेषु चिन्त्यते ॥ ५९ ॥
सालम्बनो महायोगः सबीजो यत्र संस्थितः ।
मनस्यव्याहते सम्यग् युञ्जतां जायते मुने ! ॥ ६० ॥
स परः सर्वशक्तीनां ब्रह्मणः समनन्तरः ।

तदेवं ब्रह्मणः परं शक्तिरूपाया ब्रह्मादिस्थावरान्तेषु चेतनेष्वविद्यावरण-तारतम्यकृतमस्य तारतम्यं विभाग इत्यर्थः । उक्तञ्च "तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल ! तारतम्येन वर्त्तते" इति । तदेवाह न्यूनेत्यादिना ॥ ५६ ॥ ५७ ॥ [illegible] च तारतम्यस्योपाधिकत्वात् सर्वमिदं जगत् ब्रह्मत्वेनापारमार्थिकम् इत्याशये-नाह, तदेतदिति । आविर्भावतिरोभावौ [illegible] जन्मनाशौ च [illegible] तदेतज्जगद् वस्तुतोऽक्षरं न्यूनाधिकत्व-शून्यं नित्यञ्च ब्रह्मस्वरूपत्वात् ॥ ५८ ॥ तदेवं न्यूनाधिकत्वोपाधिकया पूर्वोक्तया [illegible] परमेश्वरोपासनं दर्शयति, सर्वशक्तिमय इति । ब्रह्मादिसर्वशक्त्यात्मको विष्णुः [illegible] ब्रह्मणः परं अपरं, न विष्णोः परं [illegible] स्वरूपम्, तदेवाह, यद् योगिभिः ध्यायिभिः पूर्वं योगारम्भेषु चिन्त्यते ॥ ५९ ॥ तच्चिन्ताप्रयो-जनमाह, सालम्बन इति । यत्र यस्मिन् [illegible] मनस्यव्याहते [illegible] वर्त्ति सालम्बनो योगः । सबीजो [illegible] संप्रज्ञातो युञ्जतां योगिनां संस्थितः संभवेत् । [illegible] जायते इत्यन्वयः

मूर्त्तं ब्रह्म महाभाग ! सर्व्वब्रह्ममयो हरिः ॥ ६१ ॥
तत्र सर्व्वमिदं प्रोतमोतञ्चैवाखिलं जगत्
ततो जगज्जगत् तस्मिन् स जगच्चाखिलं मुने ! ॥ ६२ ॥
चराचरमयो विष्णुर्बिभर्त्त्यखिलमीश्वरः ।
पुरुषाख्याकृतमयं भूषणास्त्रस्वरूपवत् ॥ ६३ ॥

मैत्रेय उवाच ।

भूषणास्त्रस्वरूपस्थं यच्चैतदखिलं जगत् ।
बिभर्त्ति भगवान् विष्णुस्तन्ममाख्यातुमर्हसि ॥ ६४ ॥

पराशर उवाच ।

नमस्कृत्याप्रमेयाय विष्णवे प्रभविष्णवे ।
कथयामि यथाख्यातं वशिष्ठेन ममाभवत् ॥ ६५ ॥
आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः ॥ ६६ ॥

॥ ६० ॥ एवमेतेन प्रकारेणोक्तस्य हरेः सर्वब्रह्ममयत्वमाह, स पर इति द्वाभ्याम् ॥ ब्रह्मणः शक्तीनां मध्ये स परः श्रेष्ठः । यतः सुमहान्तरं शक्तिनिष्ठः । यतो मूर्त्तं सर्वात्मकं ब्रह्मैव सः । तत्र हेतुः, सर्वब्रह्ममयः ब्रह्मस्वरूपः न तु ब्रह्मैकदेशः तदंशः ॥ ६१ ॥ तत्र हेतुश्च, तत्रेति । तत्र तस्मिन् अखिलं जगत् प्रोतञ्च ओतञ्च तन्तुषु पटवत् सर्वतोऽनुस्यूतम् । अत एवाह, ततो जगत्, तस्मिन्निति तत्र स्थितं स जगच्च कारणात्मकत्वात् कार्यस्य ॥ ६२ ॥ तदेवं हरेः सर्वात्मकत्वमुक्त्वा इदानीं तद्भूषणादिरूपं दर्शयति, चराचरमय इति । चराचरमयः असौ विष्णुः पुरुषाख्याकृतमयं पुरुषप्रकृत्यात्मकमिदं जगद् भूषणास्त्ररूपेण बिभर्त्ति ॥ ६३ ॥ अतिरहस्यत्वाद् विवेक्तो बुभुत्सुः पृच्छति, भूषणेति ॥ ६४ ॥ प्रभविष्णवे प्रभवनशीलाय सर्वशक्तिमते अप्रमेयाय ... । यथा मम वशिष्ठेनाख्यातमभवत् । तथा

श्रीवत्ससंस्थानधरम् अनन्ते च समाश्रितम् ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ॥ ६७ ॥
भूतादिमिन्द्रियादिञ्च द्विधाहङ्कारमीश्वरः ।
बिभर्त्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम् ॥ ६८ ॥
चलस्वरूपमत्यन्तजवेनान्तरितानिलम् ।
चक्रस्वरूपञ्च मनो धत्ते विष्णुः करे स्थितम् ॥ ६९ ॥
पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ।
सा भूतहेतुसंघाता भूतमाला च वै द्विज ॥ ७० ॥
यानीन्द्रियाण्यशेषाणि बुद्धिकर्मात्मकानि वै ।
शररूपाण्यशेषाणि तानि धत्ते जनार्दनः ॥ ७१ ॥
बिभर्त्ति यच्चासिरत्नम् अच्युतोऽत्यन्तनिर्मलम् ।
विद्यामयन्तु तज्ज्ञानम् अविद्याकोशसंस्थितम् ॥ ७२ ॥
इत्थं पुमान् प्रधानञ्च बुद्ध्यहङ्कारमेव च ।

तत् वर्णयिष्यामि ॥ ६५ ॥ [illegible] प्रथमं शुद्धं कौस्तुभम् ॥ ६६ ॥ प्रधानञ्च श्रीवत्ससंस्थानधरं सत् अनन्ते समाश्रितम् [illegible] इत्यन्वयः । श्रीवत्सस्तु [illegible] प्रोक्तः । [illegible] [illegible] । [illegible] बुद्धिरपि च प्रधानमपि गदारूपेणास्ते ॥ ६७ ॥ भूतादिं तामसम् इन्द्रियादिं राजसं द्विधा अहङ्कारं यथाक्रमं शङ्खरूपेण शार्ङ्गरूपेण च स्थितं बिभर्त्ति ॥ ६८ ॥ चलस्वरूपम् अतिचञ्चलम् अत एव जवेनान्तरितः अतिक्रान्तोऽनिलो येन तत् मनः सात्त्विकाहङ्कारात्मकं चक्ररूपं धत्ते ॥ ६९ ॥ पञ्चरूपा [illegible] वैजयन्त्याख्या माला सा भूतहेतूनां तन्मात्राणां संघातः [illegible] । भूतमाला च महाभूतपञ्चक[illegible] । पाठान्तरेऽप्ययमेवार्थः ॥ ७०, ७१ ॥ अविद्यैव [illegible] कोशः,

भूतानि च हृषीकेशे मनः सर्वेन्द्रियाणि च ।
विद्याविद्ये च मैत्रेय सर्वमेतत् समाश्रितम् ॥ ७३ ॥
अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितः ।
बिभर्त्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः ॥ ७४ ॥
सविकारं प्रधानञ्च पुमांश्चैवाखिलं जगत् ।
बिभर्त्ति पुण्डरीकाक्षस्तदेव परमेश्वरः ॥ ७५ ॥
या विद्या या तथाऽविद्या यत् सद् यच्चासदव्ययम् ।
तत् सर्वं सर्वभूतेशे मैत्रेय मधुसूदने ॥ ७६ ॥
कलाकाष्ठानिमेषादिदिनर्त्त्वयनहायनैः ।
कालस्वरूपो भगवान् अपापो हरिरव्ययः ॥ ७७ ॥
भूर्लोकोऽथ भुवर्लोकः स्वर्लोको मुनिसत्तम ।
महर्जनस्तपः सत्यं सप्त लोका इमे विभुः ॥ ७८ ॥
लोकात्ममूर्त्तिः सर्वेषां पूर्वेषामपि पूर्वजः ।
आधारः सर्वविद्यानां स्वयमेव हरिः स्थितः ॥ ७९ ॥
देवमानुषपश्वादिस्वरूपैर्बहुभिः स्थितः ।
ततः सर्वेश्वरोऽनन्तो भूतमूर्त्तिरमूर्त्तिमान् ॥ ८० ॥

तत्र संस्थितम् ॥ ७२ ॥ तदेव भूषणादिरूपमनुवदन् तत्राक्षे प्रवेशनत्वाच्, इत्यर्थमिति भाष्यात् ॥ ७३ ॥ अस्त्रभूषणसंस्थानस्वरूपं समाश्रितमेतत् सर्वं बिभर्त्तीत्यन्वय । श्रेयसे जगतां सर्वपुरुषार्थसिद्धये ॥ ७४ ॥ अस्त्रं भूषणात्मकत्वम् निगमयति, सविकारमिति द्वाभ्याम् ॥ ७५ ॥ ७६ ॥ इदानीं हरौ कालस्वरूपादीनाम् तस्याश्रयाबद्धरूपेण मनुष्यलोकरूपेण तत्त्वलोकमूर्त्तरूपेण च चतुर्धाभावनमाह, कला काष्ठेति चतुर्भिः ॥ ७७ ॥ सप्त लोकानिति पाठे व्याख्येति शेषः ॥ ७८ ॥ लोकात्मिका मूर्त्तिर्यस्य स लोकात्ममूर्त्तिः ॥७९॥

ऋचो यजूंषि सामानि तथैवाथर्वणानि वै ।
इतिहासोपवेदाश्च वेदान्तेषु तथोक्तयः ॥ ८१ ॥
वेदाङ्गानि समस्तानि मन्वादिगदितानि च ।
शास्त्राण्यशेषाण्याख्यानान्यनुवाकाश्च ये क्वचित् ॥ ८२ ॥
काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्त्तिधरस्यैतद् वपुर्विष्णोर्महात्मनः ॥ ८३ ॥
यानि मूर्त्तान्यमूर्त्तानि यान्यत्रान्यत्र वा क्वचित् ।
सन्ति वै वस्तुजातानि तानि सर्वाणि तद्वपुः ॥ ८४ ॥

अहं हरिः सर्वमिदं जनार्दनो
नान्यत् ततः कारणकार्य्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वन्द्वगदा भवन्ति ॥ ८५ ॥

इत्येष तेऽंशः प्रथमः पुराणस्यास्य वै द्विज ।
यथावत् कथितो यस्मिन् श्रुते पापैः प्रमुच्यते ॥ ८६ ॥
कार्त्तिक्यां पुष्करस्नाने द्वादशाब्देन यत् फलम् ।
तदस्य श्रवणात् सर्वं मैत्रेयाप्नोति मानवः ॥ ८७ ॥
देवर्षिपितृगन्धर्वयक्षादीनाञ्च सम्भवम् ।
भवन्ति शृण्वतः पुंसो देवाद्या वरदा मुने ॥ ८८ ॥

॥ ८० ॥ ऋगादयो वेदाः । इतिहासो भारतादिः । उपवेदाः आयुर्वेदादयः ॥ ८१ ॥ मन्वादिगदितानि धर्मशास्त्राणि । आख्यानानि पुराणानि । अनुवाकः कल्पसूत्रादय ॥ ८२ ॥ ८३ ॥ किं बहुनोक्तेन सर्वाणि वस्तुजातानि तद्रूपाणि ध्येयानि इत्याह, सन्तीति ॥ ८४ ॥ उक्तस्य सर्वस्य तत्फलञ्चाह, अहमिति । भवन्तीति भवो [illegible] भवन्तीति भवोद्भवाः द्वन्द्वगदाः रागद्वेषादयो [illegible] ॥ ८८ ॥



द्वितीयोंऽशः ।

—०—

प्रथमोऽध्यायः ।

मैत्रेय उवाच ।

भगवन् ! सम्यगाख्यातं ममैतदखिलं त्वया ।
जगतः सर्गसम्बन्धि यत् पृष्टोऽसि गुरो ! मया ॥ १ ॥
योऽयमंशो जगत्सृष्टिसम्बन्धो गदितस्त्वया ।
तत्राहं श्रोतुमिच्छामि भूयोऽपि मुनिसत्तम ! ॥ २ ॥
प्रियव्रतोत्तानपादौ सुतौ स्वायम्भुवस्य यौ ।
तयोरुत्तानपादस्य ध्रुवः पुत्रस्त्वयोदितः ॥ ३ ॥
प्रियव्रतस्य नैवोक्ता भवता द्विज ! सन्ततिः ।
तामहं श्रोतुमिच्छामि प्रसन्नो वक्तुमर्हसि ॥ ४ ॥

पराशर उवाच ।

कर्दमस्यात्मजां कन्याम् उपयेमे प्रियव्रतः ।
सम्राट् कुक्षी च तत्कन्ये, दशपुत्रास्तथापरे ॥ ५ ॥

संक्षिप्तश्रीपराशरवृत्तिः श्रीधरो यतिः ।
पुराणं वैष्णवं व्याख्यात् आत्मप्रकाशटीकया ॥ १ ॥
द्वितीयांशे ये सृष्टिशेषप्रपञ्चा निरूप्यन्ते ।
भुवनस्थं धरातलज्योतिश्चक्रादिवर्णनम् ॥ २ ॥
अप्राप्तपूर्वमंशं प्राप्तुं प्रियव्रतवंशं पृच्छति भगवन्नित्यादि चतुर्भिः ।
सर्गसम्बन्धि यथा जगत् सम्भवेत्तदादि यत् पृष्टोऽसि ॥ १ ॥ जगत्सृष्टौ
व्याख्यातः वाच्यत्वेन सम्बन्धः ॥ २ ॥ ध्रुवो वंशप्रवर्तकत्वेनोक्तः ॥३॥४॥

महाप्रज्ञा महावीर्या विनीता दयिताः पितुः ।
प्रियव्रतसुताः ख्यातास्तेषां नामानि मे शृणु ॥ ६ ॥
अग्नीध्रश्चाग्निबाहुश्च वपुष्मान् द्युतिमांस्तथा ।
मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च ॥ ७ ॥
ज्योतिष्मान् दशमस्तेषां सत्यनामा सुतोऽभवत् ।
प्रियव्रतस्य पुत्रास्ते प्रख्याता बलवीर्यतः ॥ ८ ॥
मेधाग्निबाहुपुत्रास्तु त्रयो योगपरायणाः ।
जातिस्मरा महाभागा न राज्याय मनो दधुः ॥ ९ ॥
निर्ममाः सर्वकालन्तु समस्तार्थेषु वै मुने ।
चक्रुः क्रिया यथान्यायमफलाकाङ्क्षिणो हि ते ॥१०॥
प्रियव्रतो ददौ तेषां सप्तानां मुनिसत्तम ।
विभज्य सप्त द्वीपानि मैत्रेय सुमहात्मनाम् ॥ ११ ॥
जम्बुद्वीपं महाभाग सोऽग्नीध्राय ददौ पिता ।
मेधातिथेस्तथा प्रादात् प्लक्षद्वीपमथापरम् ॥ १२ ॥
शाल्मले च वपुष्मन्तं नरेन्द्रमभिषिक्तवान् ।
ज्योतिष्मन्तं कुशद्वीपे राजानं कृतवान् प्रभुः ॥ १३ ॥
द्युतिमन्तञ्च राजानं क्रौञ्चद्वीपे समादिशत् ।
शाकद्वीपेश्वरञ्चापि भव्यञ्चक्रे स च प्रभुः ॥ १४ ॥

[illegible] पौत्रौ जातौ कन्याद्वयमिति वा ॥ ५ ॥ ६ ॥ ७ ॥
तेषां षष्ठो ज्योतिष्मान् सत्यनामा सत्यसंकल्पः । [illegible] ॥ ८ ॥
॥ १० ॥ तेषां विरक्तानामितरेषां सप्तानां विभज्य द्वीपानि ददौ एतच्च
परस्तात् परिहरिष्यते [illegible] विभज्यापि तथा ददाविति
[illegible] सुव्यक्तम् । जम्बुद्वीपादि[illegible]

सवनं पुष्करद्वीपे राजानं समकारयत् ॥ १५ ॥
जम्बूद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ! ।
तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥ १६ ॥
नाभिः किम्पुरुषश्चैव हरिवर्ष इलावृतः ।
रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च ॥ १७ ॥
केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत् ।
जम्बूद्वीपविभागांश्च तेषां विप्र ! निशामय ॥ १८ ॥
पित्रा दत्तं हिमाह्वन्तु वर्षं नाभेस्तु दक्षिणम् ।
हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः ॥ १९ ॥
तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ।
इलावृताय प्रददौ मेरुर्यत्र तु मध्यगः ॥ २० ॥
नीलाचलाश्रितं वर्षं रम्याय प्रददौ पिता ।
श्वेतं तदुत्तरं वर्षं पित्रा दत्तं हिरण्वते ॥ २१ ॥
यदुत्तरं शृङ्गवतो वर्षं तत् कुरवे ददौ ।
मेरोः पूर्वेण यद् वर्षं भद्राश्वाय प्रदत्तवान् ॥ २२ ॥
गन्धमादनवर्षन्तु केतुमालाय दत्तवान् ।
इत्येतानि ददौ तेभ्यः पुत्रेभ्यः स नरेश्वरः ॥ २३ ॥

॥ १६ । १७ ॥ हिमाह्वं हिमवतो दक्षिणं भारतं वर्षं नाम । तच्च यथाहुर्न्याय्यमाख्यातम् । यदुक्तं वायव्ये "वसन्ति पुरुषा ये तु वर्षेषु प्रजा येषु चतुर्दश भाः । वर्षविशेष इत्यादि वर्षन्त तेन तेषु च" इति ॥ १८ ॥ हेमकूटः हिमवदुत्तरम् । हेमकूटादुत्तरं नैषधं निषधगिरेर्दक्षिणम् ॥ १९ ॥ निषधादुत्तरम् इलावृतं वर्षम् इलावृताय प्रददौ । यस्य मध्ये मेरुर्व्यवस्थितः । इलावृतादुत्तरतो नीलाचलदाश्रितं मद्धमम् ॥ २० ॥ ॥ २१ ॥ श्वेतं नीलादुत्तरं वर्षम् ॥ २१ ॥ गन्धमादनवर्षं मेरोः पश्चिमम्

वर्षेष्वेतेषु तान् पुत्रान् अभिषिच्य स भूमिपः ।
शालग्रामं महापुण्यं मैत्रेय ! तपसे ययौ ॥ २४ ॥
यानि किम्पुरुषादीनि वर्षाण्यष्टौ महामुने ! ।
तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः ॥ २५ ॥
विपर्ययो न तेष्वस्ति जरामृत्युभयं न च ।
धर्माधर्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ॥ २६ ॥
न तेष्वस्ति युगावस्था क्षेत्रेष्वष्टासु सर्वदा ।
हिमाह्वं यस्य वै वर्षं नाभेरासीन् महात्मनः ॥ २७ ॥
तस्यर्षभोऽभवत् पुत्रो मेरुदेव्यां महाद्युतिः ।
ऋषभाद् भरतो जज्ञे ज्येष्ठः पुत्रशतस्य सः ॥ २८ ॥
कृत्वा राज्यं स्वधर्मेण तथेष्ट्वा विविधान् मखान् ।
अभिषिच्य सुतं ज्येष्ठं भरतं पृथिवीपतिम् ॥ २९ ॥
तपसे स महाभागः पुलहस्याश्रमं ययौ ।
वानप्रस्थविधानेन तत्रापि कृतनिश्चयः ॥ ३० ॥
तपस्तेपे यथान्यायं यष्टा च स महीपतिः
तपसा कर्षितोऽत्यर्थं कृशो धमनिसन्ततः ॥ ३१ ॥
नग्नो वीटां मुखे कृत्वा वीराध्वानं ततो गतः ।
ततश्च भारतं वर्षम् एतल्लोकेषु गीयते ॥ ३२ ॥

॥ २६ ॥ विपर्ययोऽसुखदुःखाद्यनुभवः [illegible] । तेषु धर्माधर्मौ नास्तां न स्तः, तेषां भोगभूमित्वेन धर्माद्यनधिकारात् । युगावस्था [illegible] ॥ २६ । २७ ॥ स ऋषभो राज्यं कृत्वा तपस्तप्तुं पुलहस्याश्रमं [illegible] ॥ २९ ॥ ३० ॥ धमनिभिः शिराभिः सन्ततो व्याप्तः, तपसा कृशदेहत्वात् । वीटां [illegible] । "[illegible]" इति [illegible] । वीराध्वानं महाप्रस्थानम्

भरताय यतः पित्रा दत्तं प्रातिष्ठता वनम् ।
सुमतिर्भरतस्याभूत् पुत्रः परमधार्मिकः ॥ ३३ ॥
कृत्वा सम्यग् ददौ तस्मै राज्यमिष्टमखः पिता ।
पुत्रसंक्रामितश्रीस्तु भरतः स महीपतिः ॥ ३४ ॥
योगाभ्यासरतः प्राणान् शालग्रामेऽत्यजन्मुने ।
अजायत च विप्रोऽसौ योगिनां प्रवरे कुले ॥ ३५ ॥
मैत्रेय ! तस्य चरितं कथयिष्यामि ते पुनः ।
सुमतेस्तेजसस्तस्मादिन्द्रद्युम्नो व्यजायत ॥ ३६ ॥
परमेष्ठी ततस्तस्मात् प्रतिहारस्तदन्वयः ।
प्रतिहर्त्तेति विख्यात उत्पन्नस्तस्य चात्मजः ॥ ३७ ॥
भवस्तस्मात् तथोद्गीथः प्रस्तावस्तत्सुतो विभुः ।
पृथुस्ततोऽभवत्तस्मा नक्तस्यापि गयः सुतः ॥ ३८ ॥
नरो गयस्य तनयस्तत्पुत्रोऽभूद् विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥ ३९ ॥
महान्तस्तत्सुतश्चाभून् मनस्युस्तस्य चात्मजः ।
त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत् सुतः ॥ ४० ॥

॥ ३१ ॥ ततश्च ऋषभानन्तरं भरतेन पालितत्वात् भारतमेतद् वर्षं गीयते । प्रातिष्ठता प्रस्थानं कृतवतेत्यर्थः ॥ ३२ ॥ इष्टमखः पूजितयज्ञः सम्यक् राज्यं कृत्वा पश्चात् तस्मै सुमताय सह्याय्यं ददौ ॥ ३३ ॥ पुत्रे संक्रामिता श्रीः राज्यलक्ष्मीर्येन सः ॥ ३४ ॥ पुनः कथयिष्यामि द्वितीय [illegible] अयं भावः, व्युत्क्रमेण पुनश्चरणात् प्रस्तुतभुवनकोशं प्रथमं [illegible] । ततश्च [illegible] निःशेषमाख्यानं सर्वैः श्रुत्वा शिवा भवेत् इति भागवतोक्तप्रकारेण पञ्चमांशे कृष्णाख्यानवदखिलभरतस्य चरितं पश्चात् वक्ष्यामीति ॥३५॥ तस्मात् भरतानन्तरं सुमतेस्तत्तेजसो वीर्यादिन्द्रद्युम्नो जातः ॥ ३६ ॥

ऋतजिद्ब्रह्मसत्यश्च अन्ये पुत्रशतं मुने ! ।
विश्वग्ज्योतिःप्रधानास्ते यैरिमा वर्द्धिताः प्रजाः ॥ ४१ ॥
तैरिदं भारतं वर्षं नवभागैरलङ्कृतम् ।
तेषां वंशप्रसूतैश्च भुक्तेयं भारती पुरा ॥ ४२ ॥
कृतत्रेतादिसर्गेण युगाख्या ह्येकसप्ततिः ॥ ४३ ॥
एष स्वायम्भुवः सर्गो येनेदं पूरितं जगत् ।
वाराहे तु मुने ! कल्पे पूर्वमन्वन्तराधिपः ॥ ४४ ॥

तदन्वय इति प्रतिहारस्य सुतः प्रतिहर्त्ता ॥ ३७।३८ ॥ ऋतजितः पुत्रशतम् । विश्वग्ज्योतिःप्रधाना विश्वग्ज्योतिः प्रधानो मुख्यो येषां ते ॥ ४१ ॥ नवभेदं नव भेदा यस्मिंस्तत् । भेदांस्तु तृतीयाध्याये वक्ष्यति ॥ ४२ ॥ ननु त्वया पूर्वमुत्तानपादादयोऽपि सार्वभौमाः प्रोक्ताः, इदानीं प्रियव्रतवंश्या एव सार्वभौमा इत्युच्यन्ते तच्च कथमिव न संगच्छते, अतः क्रमो [illegible] इत्याशङ्क्य तेषामिति । तेषां प्रियव्रतात्मजप्रसूतानां वंशे प्रसूतैः पुरा प्रथममिदं भारतं भुक्तम् पश्चादुत्तानपादादिभिः [illegible] सार्वभौमं भुक्तमिति भावः, कृतत्रेतादीनां सर्गेण पर्ययेण युगाख्या चतुर्युगाख्यायाः सप्ततिर्वा एकसप्ततिमन्वन्तराख्यः कालः । तावन्तं कालमित्यर्थः । कृतत्रेतादिसंज्ञेनेति पाठोऽप्येतेनैव बोद्धव्यः । युगाख्यामेकसप्ततिमिति पाठे [illegible]टोऽयमर्थः ॥ ४३ ॥ एतदेवमेव आह एष इति वाराहे [illegible]ऽस्मिन् कल्पे यदा स्वायम्भुवः पूर्वं प्रथममन्वन्तराधिपोऽभूत्, तदा एष प्रियव्रतवंश्यानां स्वायम्भुवः सर्गः, ततः स्वारोचिषादयस्तदुत्तानपादवंश्या इत्यर्थः । अत एव उत्तानपादवंश्यस्य प्राचेतसदक्षस्य दौहित्रस्य वैवस्वतमन्वन्तरे प्रोक्तम् । उत्तानपादे प्रथममन्वन्तरेऽप्यपि स्वायम्भुवः स्वायम्भुवोऽभूतात् तथापि तदीय प्रियव्रतादिवंशः प्रथम इत्यर्थः । यदा पूर्वोक्तवंशस्य एवमनन्तरम् प्रवृत्त इति ॥ ४४ ॥

द्वितीयोऽध्यायः ।

मैत्रेय उवाच ।

कथितो भवता ब्रह्मन् सर्गः स्वायम्भुवश्च मे ।
श्रोतुमिच्छाम्यहं त्वत्तः सकलं मण्डलं भुवः ॥ १ ॥
यावन्तः सागरा द्वीपास्तथा वर्षाणि पर्वताः ।
वनानि सरितः पुर्यो देवादीनां तथा मुने ! ॥ २ ॥
यत्प्रमाणमिदं सर्वं यदाधारं यदात्मकम् ।
संस्थानमस्य च मुने ! यथावद्वक्तुमर्हसि ॥ ३ ॥

पराशर उवाच ।

मैत्रेय ! श्रूयतामेतत् संक्षेपाद् गदतो मम ।
नास्य वर्षशतेनापि वक्तुं शक्यो हि विस्तरः ॥ ४ ॥
जम्बुप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज !
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः ॥ ५ ॥
एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम् ॥ ६ ॥

तत्रानुसारेण भुवनकोशं सविशेषं बुभुत्सुः पृच्छति कथित इति । स्वायम्भुवोऽनन्तरम् स्वायम्भुवः । तदीयः प्रियव्रतादिवंशः कथितः । अनुवदतेन च द्वापञ्चाशद्विभागोक्त्या कथितं भुवनकोशादिकं श्रोतुमिच्छामि ॥ १ ॥ देवादीनां पुर्यो नगर्यो यावत्यः ॥ २ ॥ इदं मण्डलं संस्थानं रचनाविशेषम् आधारमिति यावत् । एवमेते द्वादश प्रश्नाः । तेष्वादौ द्वीपसमुद्रसंख्यादिकमर्थमाह जम्बुद्वीपादि ॥ ३ ॥ ४ ॥ द्वीपा समुद्रैर्लवणादिसंज्ञैः समं यथा

जम्बुद्वीपः समस्तानाम् एतेषां मध्यसंस्थितः ।
तस्यापि मेरुर्मैत्रेय ! मध्ये कनकपर्वतः ॥ ७ ॥
चतुराशीतिसाहस्रो योजनैरस्य चोच्छ्रयः ।
प्रविष्टः षोडशाधस्ताद् द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ ८ ॥
मूले षोडशसाहस्रो विस्तारस्तस्य सर्वशः ।
भूपद्मस्यास्य शैलेशः कर्णिकाकारसंस्थितः ॥ ९ ॥
हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे ।
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥ १० ॥
लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे ।
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते ॥ ११ ॥
भारतं प्रथमं वर्षं ततः किम्पुरुषं स्मृतम् ।
हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विज ! ॥ १२ ॥

भवन्तं वदत श्रावयता ॥ ६ ॥ ७ ॥ चतुरशीतिरेव चातुराशीतिः सहस्राणि परिमाणम् । चतुरशीत्या सहस्राणि प्रमाणं यस्य स मेरोरुच्छ्रयः चतुर्योजनप्रमाणो मेरुरुच्छ्रायो यस्तु चतुराशीतियोजनसहस्रेति उच्यते। षोडशसहस्राणि अधस्तात् भूम्यां प्रविष्ट इत्यर्थः। द्वात्रिंशद्योजनसहस्राणि मूर्ध्नि विस्तृतः ॥ ८ ॥ अत एव मूर्ध्नि विस्तृतत्वादधस्ताच्च सङ्कुचितत्वात् भूपद्मस्य पद्मस्य कर्णिकाकारेण संस्थितः ॥ ९ ॥ भारतं वर्षमारभ्य मेरोर्दक्षिणतः स्थितानां त्रयाणां वर्षाणां मर्यादापर्वतास्त्रयो हिमवदादय इति। वर्षाणां व्यवच्छेदकाः पर्वताः ॥ १० ॥ लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधनीलौ। यद्यपि जम्बुद्वीपस्य मण्डलाकारस्य लक्षयोजनप्रमाणत्वात् तन्मध्ये रेखामात्रेण लक्षयोजनप्रमाणत्वं निषधनीलौ तु तन्मध्यरेखातो दक्षिणोत्तरयोः सहस्रयोजनान्तरितत्वात् दीर्घत्वेन न्यूनौ तथापि न्यूनत्वस्य अल्पत्वाल्लक्षप्रमाणावित्युक्तम् । अपरे तु हेमकूटादयो दशहीनाः दशांशन्यूनाः हेमकूट-

रम्यकञ्चोत्तरं वर्षं तस्यैवानु हिरण्मयम् ।
उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥ १३ ॥
नवसाहस्रमेकैकम् एतेषां द्विजसत्तम ! ।
इलावृतञ्च, तन्मध्ये सौवर्णो मेरुरुच्छ्रितः ॥ १४ ॥
मेरोश्चतुर्दिशं तत्तु नवसाहस्रविस्तृतम् ।
इलावृतं महाभाग ! चत्वारश्चात्र पर्वताः ॥ १५ ॥
विष्कम्भा रचिता मेरोर्योजनायुतमुच्छ्रिताः
पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः
विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥ १७ ॥
कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च ।
एकादशशतायामाः पादपा गिरिकेतवः ॥ १८ ॥
जम्बूद्वीपस्य सा जम्बूर्नामहेतुर्महामुने ! ।
महागजप्रमाणानि जम्ब्वास्तस्याः फलानि वै १९ ॥

ञ्चैतौ नवतियोजनसहस्रप्रमाणौ । हिमवद्धेमकूटौ चैकाशीतियोजन-
सहस्रप्रमाणौ । तदुक्तं वाराहे "दीर्घत्वमस्यैषाभावात् ह्रस्वत्वं परतो-
ऽपि तत्" इति ॥ ११ ॥ १२ ॥ यथा वै भारतमिति द्वीपमण्डलपार्श्ववर्ति-
त्वात् धनुराकारं कुरुवर्षमित्यर्थः ॥ १३ ॥ एतेषां हिमवदादिवर्षा-
दशानां भारतादीनां मध्ये एकैकं वर्षं विस्तारतो नवसहस्र-
योजनप्रमाणम् इलावृतञ्च नवसाहस्रम् । विस्तारमात्रेऽपि तत्र चतुर्दिक्
विशेषणात्, तन्मध्ये इति । तदाह, वायुः "चतुःसंस्थानमिदं तद्वै
वर्षं दक्षिणोत्तरे । दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम्" इति
॥ १४ ॥ किञ्च इलावृते मध्ये चत्वारः पर्वता मेरोश्चतुर्दिशम् ॥ १५ ॥
विष्कम्भा दृढत्वनिष्पादका स्तम्भा इव रचिताः । अन्यथा मृत्पात्रादुच्चु-
ङ्गमस्य तदुच्छ्रितत्वात् नोच्छ्रितं स्यात् ॥ १६ ॥ तेषां पूर्वा-
दीनां पूर्वादिक्रमेण चत्वारः पादपा एकादशशतयोजनोच्छ्रायाः । गिरेः

पतन्ति भूभृतः पृष्ठे शीर्यमाणानि सर्वतः ।
रसेन तेषां प्रख्याता तत्र जम्बूनदीति वै ॥ २० ॥
सरित् प्रवर्तते सा च पीयते तन्निवासिभिः ।
न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः ॥ २१ ॥
तत्पानात् स्वच्छमनसां जनानां तत्र जायते ।
तीरमृत तद्रसं प्राप्य सुखवायु विशोषिता ।
जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम् ॥ २२ ॥
भद्राश्वं पूर्वतो मेरोः केतुमालश्च पश्चिमे ।
वर्षे द्वे तु मुनिश्रेष्ठ तयोर्मध्ये इलावृतम् ॥ २३ ॥
वनं चैत्ररथं पूर्वे दक्षिणे गन्धमादनम् ।
वैभ्राजं पश्चिमे तद्वद् उत्तरे नन्दनं स्मृतम् ॥ २४ ॥
अरुणोदं महाभद्रम् असितोदं समानसम् ।
सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा ॥ २५ ॥
शीतान्तचक्रमुञ्जाश्च कुररो माल्यवांस्तथा ।
वैकङ्कप्रमुखा मेरोः पूर्वतः केसराचलाः ।
त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा ॥ २६ ॥
निषधाद्या दक्षिणतस्तस्य केसरपर्वताः ।

वेगतो ध्वजा इव दृश्यन्ते ॥ १८ ॥ नागवेदनवीनद्वादिभवेद्यः । अस्य-प्रमाणे विशेषश्च वायुनोक्तः "अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि तु । फलप्रमाणं संख्यातमृषिभिस्तत्त्वदर्शिभिः" इति ॥ १९ ॥ २० ॥ सुख-स्पर्शो वायुः, सुखवायुः तेन विशोषिता सती तत्तीरमृत्तिका सिद्धानां भूषणं सुवर्णं भवति ॥ २२ ॥ तयोर्मध्ये इलावृतवर्षः तत्र विष्कम्भादि-शाखु चैत्ररथादिवनानामरुणोदादिसरसाञ्च वर्णनं ॥ २६ ॥ चत्वारि

शिखिवासाः सवैदूर्य्यः कपिलो गन्धमादनः ।
जारुधिप्रमुखास्तद्वत् पश्चिमे केसराचलाः ॥ २७ ॥
मेरोरनन्तराङ्गेषु जठरादिष्ववस्थिताः ।
शङ्खकूटोऽथ ऋषभो हंसो नागस्तथापरः ।
कालञ्जराद्याश्च तथा उत्तरे केसराचलाः ॥ २८ ॥
चतुर्दशसहस्राणि योजनानां महापुरी ।
मेरोरुपरि मैत्रेय ! ब्रह्मणः प्रथिता दिवि ॥ २९ ॥
तस्याः समन्ततश्चाष्टौ दिशासु विदिशासु च ।
इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः ॥ ३० ॥
विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् ।
समन्ताद् ब्रह्मणः पुर्य्यां गङ्गा पतति वै दिवः ॥ ३१ ॥
सा तत्र पतिता दिक्षु चतुर्धा प्रतिपद्यते ।
सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात् ॥ ३२ ॥

सङ्क्षेपतः केसराचलानां स्थानान्याह, मेरोरिति । मेरोरनन्तराङ्गेषु अविच्छिन्नानि यान्यङ्गानि मूलसमीपस्थानानि तान्येव जठरादीनि पूर्वदक्षिणपश्चिमोत्तरदेशवर्त्तीनि तथा जठरादिष्ववस्थितानि पुरस्तादुक्तान्येवाश्रयात् । केसरस्थानीया मेरोः कर्णिकाया इव केसरभूताः । "भूपद्मस्य परितः अवस्थिताः" इति पूर्व्वोक्तेः ॥ २८ । २९ ॥ लोकपालानां पुरः प्राह - दिक्पालानामपि : "तावत्परितो लोकपालानाम् अष्टानां यथादिशं यथारूपं तुरीयमात्रेण पुरोऽष्टा अवस्थिताः" इति पूर्व्वोक्तेः ॥ ३० ॥ तत्र गङ्गापतनमाह, विष्णुपादेति । त्रिधा विक्रमतो विष्णोर्वामपादाङ्गुष्ठ-नखविनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तःप्रविष्टा बाह्यजलधारा हि गङ्गा-ख्याऽतः चन्द्रमण्डलं प्लावयित्वा सा च विष्णोः पादाद् विनिष्क्रान्ता सती दिवोऽन्तरीक्षाद् ब्रह्मणः पुर्य्यां पतति ॥ ३१ ॥ सा तत्र पतिता सती

पूर्वेण शैलात् सीता तु शैलं यात्यन्तरिक्षगा ।
ततश्च पूर्ववर्षेण भद्राश्वेनैति सार्णवम् ॥ ३३ ॥
तथैवालकनन्दापि दक्षिणेनैत्य भारतम् ।
प्रयाति सागरं भूत्वा सप्तभेदा महामुने ! ॥ ३४ ॥
चक्षुश्च पश्चिमगिरीन् अतीत्य सकलांस्ततः ।
पश्चिमं केतुमालाख्यं वर्षं गत्वैति सागरम् ॥ ३५ ॥
भद्रा तथोत्तरगिरीन् उत्तरांश्च तथा कुरून् ।
अतीत्योत्तरमम्भोधिं समभ्येति महामुने ! ॥ ३६ ॥
आनीलनिषधायामौ माल्यवद्गन्धमादनौ ।
तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः ॥ ३७ ॥

चतुर्धा भेदं प्राप्नोति ॥ ३२ ॥ शैवालकेन वार्तीयन्न युक्तोऽसि "सीता तु यज्ञवदनात् केसराचलादिशिखरेभ्योऽधः पतन्ती" इत्यादि । वायुनोक्तं सीता च शिखरपृष्ठात् तस्य "उत पततश्चापि दारयन्ती महानदी । निपपात तदा सीता जठरं शिखरोपरि ॥ तस्मादुपगता शैलं देवकूटं वरोकृती" इत्यादि ॥ ३३ ॥ तथैवालकनन्दापीति केसराचलादिक्रमेण निषधहेमकूटहिमवतोऽतिक्रम्य सर्वतः । सप्तभेदा भूत्वेति । ते च भेदा वायुना प्रोक्ताः "नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगाः । सीता च चक्षुः सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥ सप्तमी त्वन्वगात् गङ्गा दक्षिणेन भगीरथम्" इति ॥ ३४ ॥ एवं तावद् दक्षिणोत्तरतो हिमादिभिः चतुर्भिर्भद्रीदादिगिरिभिर्विभक्तानि भारतादीनि चत्वार्युक्तानि इलावृतमेवमुक्तं चतुर्विधवनादिकमतरालोक्ता, इदानीं तु "भद्रः पूर्वतो मेरोः केतुमालश्च पश्चिमे" इति पूर्वोक्तयोर्वर्षयोर्माल्यवद्गन्धमादनावाह, आनीलेति । उत्तरो नीलः । दक्षिणो निषधः, तत्पर्यन्त आयामो दैर्घ्यं ययोस्तौ आनीलनिषधायामौ । तत्र पश्चिमे माल्यवान् पूर्वे गन्धमादनः "तथैवावृतम् अपरेण पूर्वेण च माल्यवद्गन्धमादनाभ्यामानील-

भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा ।
पत्राणि लोकपद्मस्य मर्य्यादा शैलबाह्यतः ॥ ३८ ॥
जठरो देवकूटश्च मर्य्यादा पर्वतावुभौ ।
तौ दक्षिणोत्तरायामौ आनीलनिषधायतौ ॥ ३९ ॥
गन्धमादनकैलासौ पूर्वपश्चायतावुभौ ।
अशीतियोजनायामौ अर्णवान्तर्व्यवस्थितौ ॥ ४० ॥
निषधः पारिपात्रश्च मर्य्यादापर्वतावुभौ ।
मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ ॥ ४१ ॥
त्रिशृङ्गो जारुधिश्चैव उत्तरौ वर्षपर्वतौ ।
पूर्वपश्चायतावेतौ अर्णवान्तर्व्यवस्थितौ ॥ ४२ ॥
इत्येते मुनिवर्य्योक्ता मर्य्यादापर्वतास्तव ।

निषधायतौ" इति पूर्वोक्तेः । केचित्तु स्वमतविपरीतमाहुः "नवो-
च्छ्रयतो मेरुरष्टाशीतिं प्रविष्टः" इति द्रष्टव्यम् । "मेरोश्चतुर्दिशं तत्र
नवसाहस्रविस्तृतम् षोडशसाहस्रम्" इत्युक्तत्वात् । अनेन चतुर्णां मर्यादा-
अष्टसहस्रायामौ तावित्युक्तं भवति । तदाह वायुः "चतुर्दिशं यत्
अश्वत्थश्च गन्धमादनपर्वतः । उदग् दक्षिणतश्चैव आनीलनिषधायतः"
इत्यादि ॥ ३७ ॥ लोके जम्बूद्वीपं तदेव पद्मं तस्य पत्राणि । भारत-
कुरुवर्षयोर्भद्राश्वकेतुमालयोश्च परस्परं यथानमर्यादाभिः शैलेनान्तरिता
इत्यर्थः इष्यन्ता ॥ ३८ ॥ इदानीं मेरोश्चतुर्दिक्षु द्वौ द्वौ परिधिपर्वतौ
मर्यादापर्वतनामानौ दर्शयति, जठर इति पञ्चभिः । दक्षिणोत्तरं यथा-
वान्तरविभागेनेत्याशयः मर्यादापर्वतावित्ति चोक्तं मर्यादापर्वतावपि
तदुक्तत्वात् । अन्यत्र च वर्षान्तरावस्थानात् ॥ ३९ ॥ अशीतियोज-
नानि आयामो विस्तारो ययोस्तौ तावुभावपि गन्धमादनकैलासौ पूर्वप-
श्चायतावर्णवान्तर्व्यवस्थितौ ॥ ४० ॥ पूर्वौ जठरदेवकूटौ यथा आनीलनिषधायतौ
तथैव पश्चिमावपि स्थितौ ॥ ४१ ॥ त्रिशृङ्गो जारुधिश्चैव उत्तरौ यथा

जठराद्याः स्थिता मेरोस्तेषां द्वौ द्वौ चतुर्दिशम् ॥ ४३ ॥
मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः ।
शीतान्ताद्या मुने तेषामतीव हि मनोरमाः ॥ ४४ ॥
शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः ।
सुरम्याणि तथा तासु काननानि पुराणि च ॥ ४५ ॥
लक्ष्मीविष्ण्वग्निसूर्यादिदेवानां मुनिसत्तम ! ।
तास्वायतनवर्याणि जुष्टानि वरकिन्नरैः ॥ ४६ ॥
गन्धर्वयक्षरक्षांसि तथा दैतेयदानवाः ।
क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम् ॥ ४७ ॥
भौमा ह्येते स्मृताः स्वर्गा धर्मिणामालया मुने ! ।
नैतेषु पापकर्माणो यान्ति जन्मशतैरपि ॥ ४८ ॥
भद्राश्वे भगवान् विष्णुरास्ते हयशिरा द्विज ! ।
वराहः केतुमाले तु भारते कूर्मरूपधृक् ॥ ४९ ॥
मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते जनार्दनः ।
विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः ॥ ५० ॥
सर्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः ।
यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ महामुने ! ।
न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम् ॥ ५१ ॥
स्वस्थाः प्रजा निरातङ्काः सर्वदुःखविवर्जिताः ।
दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः ॥ ५२ ॥

द्वौ द्वौ तथा स्थितौ । तदाह, पुनः, "चतुरन्तरं परि- [illegible] इति ॥ ४२ ॥ ४३ ॥ ४४ ॥ तेषां शैलानामन्तरे मध्ये द्रोण्यः दर्योऽधित्यकाः सन्ति । सिद्धः [illegible] सेविताः ॥ ५० ॥ ५१ ॥

न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै ।
कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना ॥ ५३ ॥
सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः ।
नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम ! ॥ ५४ ॥

तृतीयोऽध्यायः ।

पराशर उवाच ।

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥ १ ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥ २ ॥

निरातङ्काः नीरोगाः वर्षाणां सहस्राणि दश वा द्वादश वा स्थिरायुष इति [illegible] ॥ ५२ ॥ तेषु देवो न वर्षति यतो भौमान्येवाम्भांसि नित्यं सन्ति ॥ ५३ ॥ कुलाचलाः कुलपर्वताः तेभ्यः प्रसूता या नद्यस्ताश्च शतशः सन्ति ॥ ५४ ॥

जम्बुद्वीपस्य संस्थानमुक्तं वर्षविभागश्च । तत्रापि भारतं श्रेष्ठत्वात् तस्य च पुंवद्भुः ॥ भारती भरतस्य सन्ततिः ॥ १ ॥ [illegible] कर्मभूमिरिति । [illegible] मुक्तिरिति । [illegible] कर्मणः फलाभावात् । [illegible] कर्म नास्त्येव । [illegible] ॥ २ ॥

महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥ ३ ॥
अतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै ।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने ॥ ४ ॥
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्त्यानां कर्म्म भूमौ विधीयते ॥ ५ ॥
भारतस्यास्य वर्षस्य नव भेदान् निशामय ।
इन्द्रद्वीपः कशेरुमान् ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः ॥ ६ ॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ॥ ७ ॥
पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ।
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ॥ ८ ॥
इज्यायुधवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः ।
शतद्रुचन्द्रभागाद्या हिमवत्पादनिर्गताः ॥ ९ ॥

कुलपर्वतादयः कुलगिरिदेशस्थनदीनां जन्मभूमयः प्रोक्ताश्चैव वक्ष्य-
माणाः, महेन्द्र इति ॥ ३ ॥ तस्मात् कर्म्म शुभाशुभमस्तीति भूमेरेव
कर्म्मणा प्राप्यत इत्याह, अत इति । अतोऽस्माद् वर्षात् स्वर्गोऽत्र
सम्प्राप्यते । मुक्तिमस्मात् प्रयान्ति ॥ ४ ॥ अनयोश्च मौख्यमित्याह इत इति ।
मोक्षश्च पञ्चमी पुष्टिः । मध्यमान्तरीक्षलोकाः । अन्तः पातालादिरित-
रः मध्यमं चान्तश्च तत्तदकर्म्मावस्थैव कुमताद् । यस्मादन्यत्र भूमौ
पतोऽन्तरादौ चाक्षुषे कर्म्म न विधीयते ॥ ५ ॥ ६ ॥ अयन्त्विति ।
अयं नवमस्तेषां द्वीपः समुद्रवेष्टितो भूतेन भारतस्य समुद्रसमीपेन संवृत
इति शेषः । योजनानाः समुद्रसमीपात्समुद्रपर्यन्तं सहस्रयोजन-

वेदस्मृतिमुखाद्याश्च पारिपात्रोद्भवा मुने ।
नर्मदा सुरसाद्याश्च नद्यो विन्ध्याद्रिनिर्गताः ॥ १० ॥
तापीपयोष्णीनिर्विन्ध्याप्रमुखा ऋक्षसम्भवाः ।
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ॥ ११ ॥
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ।
कृतमालाताम्रपर्णीप्रमुखा मलयोद्भवाः ॥ १२ ॥
त्रिसामा चार्यकुल्याद्या महेन्द्रप्रभवाः स्मृताः ।
ऋषिकुल्याकुमार्याद्याः शुक्तिमत्पादसम्भवाः ॥ १३ ॥
आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः ।
तास्विमे कुरुपाञ्चाला मध्यदेशादयो जनाः ॥ १४ ॥
पूर्वदेशादिकाश्चैव कामरूपनिवासिनः ।
पुण्ड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्वशः ॥ १५ ॥
तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्बुदाः ।
कारूषा मालवाश्चैव पारिपात्रनिवासिनः ॥ १६ ॥
सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः ।
मद्रारामास्तथाम्बष्ठाः पारसीकादयस्तथा ॥ १७ ॥
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ।
समीपतो महाभागा हृष्टपुष्टजनाकुलाः ॥ १८ ॥
चत्वारि भारते वर्षे युगान्यत्र महामुने ।

भारतः इत्येवम् [illegible] वदन्ति वायुः । भारतस्यास्य वर्षस्य नर्मदा [illegible] । [illegible] आसन्नम्' इति ॥ ७ ॥ ११ ॥ तापीविन्ध्या पुण्यतमा-दिन [illegible] नदीनां [illegible] ॥ १४ ॥ तास्विति, इमे कुरुपाञ्चालादि-मध्यदेशवर्तिनो जनास्तासु नदीषु वसन्ति आसां सलिलं पिबन्ति

कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित् ॥ १९ ॥
तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः ।
दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥ २० ॥
पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते ।
यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ॥ २१ ॥
अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ।
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः ॥ २२ ॥
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥ २३ ॥
गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥ २४ ॥
कर्माण्यसङ्कल्पिततत्फलानि संन्यस्य विष्णौ परमात्मभूते ।
अवाप्य तां कर्ममहीमनन्ते तस्मिँल्लयं ये त्वमलाः प्रयान्ति ॥ २५ ॥

[illegible] चतुर्थं [illegible] ॥ १८ ॥ चत्वारीति [illegible] [illegible] सत्येतां [illegible] ॥ [illegible] चतुर्युगव्यवस्था [illegible] ॥ १९ ॥ २० ॥ [illegible] यज्ञैर्यजते । जम्बूद्वीपे [illegible] ॥ २१ ॥ २२ ॥ [illegible] ॥ २३ ॥ [illegible] तथा भारतभूमिभागे [illegible] सुरत्वात् [illegible] ॥ २४ ॥ [illegible] कर्ममहीं [illegible] ये अमलाः [illegible] यान्ति । [illegible] यान्ति ते [illegible]

जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्राप्स्याम: धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः ॥ २६ ॥

नववर्षं तु मैत्रेय ! जम्बूद्वीपमिदं मया ।
लक्षयोजनविस्तारं संक्षेपात् कथितं तव ॥ २७ ॥
जम्बूद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय ! वलयाकारः स्थितः क्षारोदधिर्बहिः ॥ २८ ॥

चतुर्थोऽध्यायः ।

पराशर उवाच ।

क्षारोदेन यथा द्वीपो जम्बूसंज्ञोऽभिवेष्टितः ।
संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः ॥ १ ॥

पूर्वोक्तं स्पष्टयन्ति ॥ २५ ॥ पुण्यावसाने स्वर्गभोगानन्तरं भारते जन्म यदि प्राप्नोति चेत्, तत् तु न प्राकृत इत्याहुः जानीमेति । स्वर्गप्रदे कर्मणि भोगेन विलीने सति पुन देहबन्धं जन्म प्राप्स्याम इति न जानीम । ये खलु भारते मनुष्या जाताः सन्ति ते कर्मनिश्चितपथ्याः स्वर्गाद्यपि भोक्तारः । तदाहुः नेन्द्रियविप्रहीनाः कर्मप्राचुर्यात् यदि न भवन्ति इति इन्द्रियसम्पन्नत्वेन तत्र मोक्षः सुसाध्य इति भावः ॥ २६ ॥ २८ ॥

अथ प्लक्षादीनां द्वीपानां वर्षाद्रिनद्यादिविभागं । दर्शयन् द्वितीयेन

जम्बूद्वीपस्य विस्तारः शतसाहस्रसंमितः।
स एव द्विगुणो ब्रह्मन्! प्लक्षद्वीप उदाहृतः॥ २॥
सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै।
ज्येष्ठः शान्तभयो नाम शिशिरस्तदनन्तरम्॥ ३॥
सुखोदयस्तथानन्दः शिवः क्षेमक एव च।
ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा हि ते॥ ४॥
पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा।
आनन्दञ्च शिवञ्चैव क्षेमकं ध्रुवमेव च॥ ५॥
मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्वताः।
सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम!॥ ६॥
गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा।
सोमकः सुमनाश्चैव वैभ्राजश्चैव सप्तमः॥ ७॥
वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघाः।
वसन्ति देवगन्धर्वसहिताः सततं प्रजाः॥ ८॥
तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः।

[illegible] ॥ १ ॥ [illegible] ॥ २ ॥ ३ ॥ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ ४ ॥ [illegible] ॥ ५ ॥ ८ ॥

नाधयो व्याधयो वापि सर्वकालसुखं हि तत् ॥ ८ ॥
तेषां नद्यश्च सप्तैव वर्षाणान्तु समुद्रगाः ।
नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः ॥ १० ॥
अनुतप्ता शिखी चैव विपाशा त्रिदिवा क्रमुः ।
अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥ ११ ॥
एते शैलास्तथा नद्यः प्रधानाः कथितास्तव ।
क्षुद्रशैलास्तथा नद्यस्तत्र सन्ति सहस्रशः ॥ १२ ॥
ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते ।
अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी द्विज ॥ १३ ॥
न त्वेवास्ति युगावस्था तेषु स्थानेषु सप्तसु ।
त्रेतायुगसमः कालः सर्वदैव महामते ॥ १४ ॥
प्लक्षद्वीपादिषु ब्रह्मन् शाकद्वीपान्तिकेषु वै ।
पञ्चवर्षसहस्राणि जना जीवन्त्यनामयाः ॥ १५ ॥
धर्माः पञ्च स्वथैतेषु वर्णाश्रमविभागजाः ।
वर्णाश्च तत्र चत्वारस्तान् निबोध वदामि ते ॥ १६ ॥
आर्यकाः कुरवश्चैव विविंशा भाविनश्च ये ।
विप्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तम ॥ १७ ॥
जम्बूवृक्षप्रमाणस्तु तन्मध्ये सुमहांस्तरुः ।

स्थिरात् पञ्चवर्षसहस्रकालो जिवति ॥ ८ ॥ ११ ॥ अपसर्पिणी ह्रासावस्था उत्सर्पिणी वृद्ध्यवस्था । भारते हि कृतादिक्रमेणाल्पं धर्मा अल्पीभवन्ति । ततो द्वापरादिक्रमेणोन्नतिं यान्ति, तत तेषां नास्तीत्यर्थः । युगावस्थेति "कृतादीनां स्वरूपं यं ... " इति ... । त्रिपाद् धर्मः ... त्रेतायुगसमः कालः ॥ १४ ॥ १७ ॥ वृक्ष

प्लक्षस्तन्नामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तम ! ॥ १८ ॥
इज्यते तत्र भगवांस्तैर्वर्णैरार्य्यकादिभिः ।
सोमरूपी जगत्स्रष्टा सर्वः सर्वेश्वरो हरिः ॥ १९ ॥
प्लक्षद्वीपप्रमाणेन प्लक्षद्वीपः समावृतः ।
तथैवेक्षुरसोदेन परिवेषानुकारिणा ॥ २० ॥
इत्येवं तव मैत्रेय ! प्लक्षद्वीप उदाहृतः ।
संक्षेपेण मया भूयः शाल्मलं मे निशामय ॥ २१ ॥
शाल्मलस्येश्वरो वीरो वपुष्मांस्तत्सुतान् शृणु ।
तेषान्तु नामसंज्ञानि सप्त वर्षाणि तानि वै ॥ २२ ॥
श्वेतोऽथ हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव सुप्रभश्च महामुने ! ॥ २३ ॥
शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः ।
विस्ताराद्द्विगुणेनाथ सर्वतः संवृतः स्थितः ॥ २४ ॥
तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः ।
वर्षाभिव्यञ्जका ये तु तथा सप्त च निम्नगाः ॥ २५ ॥
कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः ।
द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः ॥ २६ ॥
कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा ।
ककुद्मान् पर्वतवरः सरिन्नामानि मे शृणु ॥ २७ ॥
योनी तोया वितृष्णा च चन्द्रा शुक्ला विमोचनी ।

[illegible] ॥ १८ । १९ ॥ [illegible]

निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशान्तिदाः ॥ २८ ॥
श्वेतञ्च हरितश्चैव वैद्युतं मानसं तथा ।
जीमूतरोहिते चैव सुप्रभश्चातिशोभनम् ॥ २९ ॥
सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै ।
शाल्मले ये तु वर्णाश्च वसन्त्येते महामुने ॥ ३० ॥
कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति ते ॥ ३१ ॥
भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम् ।
वायुभूतं मखैः श्रेष्ठैर्यज्विनो यज्ञसंस्थितिम् ॥ ३२ ॥
देवानामत्र सान्निध्यमतीव सुमनोहरे ।
शाल्मलिः सुमहावृक्षो नाम्ना निर्वृतिकारकः ॥ ३३ ॥
एष द्वीपः समुद्रेण सुरोदेन समावृतः ।
विस्ताराच्छाल्मलस्यैव समेन तु समन्ततः ॥ ३४ ॥
सुरोदकः परिवृतः कुशद्वीपेन सर्वतः ।
शाल्मलस्य तु विस्ताराद्द्विगुणेन समन्ततः ॥ ३५ ॥
ज्योतिष्मतः कुशद्वीपे सप्तपुत्राः शृणुष्व तान् ।
उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः ॥ ३६ ॥
प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः ।
तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः ॥ ३७ ॥
तथैव देवगन्धर्वयक्षकिम्पुरुषादयः ।
वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः ॥ ३८ ॥

[illegible] ॥ २६ ॥ [illegible] निवृत्तिम् [illegible]
॥ ३० ॥ ३१ ॥ तेषां [illegible] नामानि [illegible] वर्षपद्धति-

दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने ।
ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्चानुक्रमोदिताः ॥ ३८ ॥
यथोक्तकर्मकर्तृत्वात् स्वाधिकारक्षयाय ते ।
तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्दनम् ।
यजन्तः क्षपयन्त्युग्रमधिकारं फलप्रदम् ॥ ४० ॥
विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा ।
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः ।
वर्षाचलास्तु सप्तैते तत्र द्वीपे महामुने ॥ ४१ ॥
नद्यश्च सप्त तासान्तु शृणु नामान्यनुक्रमात् ।
धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा ॥ ४२ ॥
विद्युदम्भा मही चान्या सर्वपापहरास्त्विमाः ।
अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः ॥ ४३ ॥
कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत्स्मृतः ।
तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः ॥ ४४ ॥
घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः ।
क्रौञ्चद्वीपो महाभाग श्रूयतां चापरो महान् ॥ ४५ ॥
कुशद्वीपस्य विस्ताराद् द्विगुणो यस्य विस्तरः ।
क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः ॥ ४६ ॥
तन्नामानि च वर्षाणि तेषां चक्रे महीपतिः ॥ ४७ ॥

[illegible] ॥ ३७ ॥ ३८ ॥ [illegible]
[illegible]
[illegible]
[illegible] ॥ ४० ॥ ४१ ॥ [illegible]

कृकलो मन्दगश्चोष्णः पीवरोऽप्यन्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तैते तत्सुता मुने ॥ ४८ ॥
तत्रापि देवगन्धर्वसेविताः सुमनोहराः ।
वर्षाचला महाबुद्धे तेषां नामानि मे शृणु ॥ ४९ ॥
क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः ।
देवावृत् पञ्चनश्चात्र तथान्यः पुण्डरीकवान् ।
दुन्दुभिश्च महाशैला द्विगुणास्ते परस्परम् ॥ ५० ॥
द्वीपाद्द्वीपेषु ये शैला यथा द्वीपानि ते तथा ॥ ५१ ॥
वर्षेष्वेतेषु रम्येषु तथा शैलवरेषु च ।
निवसन्ति निरातङ्काः सह देवगणैः प्रजाः ॥ ५२ ॥
पुष्कराः पुष्कला धन्यास्तिष्याख्याश्च महामुने ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ॥ ५३ ॥
ते तत्र नदीर्मैत्रेय याः पिबन्ति शृणुष्व ताः ।
सप्त प्रधानाः शतशस्तत्रान्याः क्षुद्रनिम्नगाः ॥ ५४ ॥
गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ।
शान्तिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः ॥ ५५ ॥
तत्रापि विष्णुर्भगवान् पुष्कराद्यैर्जनार्दनः ।
यागैरुद्रस्य रूपश्च इज्यते यज्ञसन्निधौ ॥ ५६ ॥
क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च ।

पुण्डरीकवान् ॥ ४८-५० ॥ प्रथमः शैलः क्रौञ्चसंज्ञ एव द्वीपः प्रोक्त इत्यनुसन्धेयम् । अन्धोऽपरः पुण्डरीकः षष्ठः सप्तमो महाशैलः पञ्चमश्चैनरथ इति पाठे महाद्रिश इति दुन्दुभेर्विशेषणं पूर्वस्मात् परस्यद्विगुणत्वं द्वीपाद् द्विगुणाः ॥ ५० ॥ तेषु द्वीपेषु ये शैलास्तेऽपि यथा द्वीपानि

आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥ ५७ ॥
दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः ।
क्रौञ्चद्वीपस्य विस्ताराद् द्विगुणेन महामुने ! ॥ ५८ ॥
शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः ।
सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः ॥ ५९ ॥
जलदश्च कुमारश्च सुकुमारो मनीचकः ।
कुसुमोदश्च मोदाकिः सप्तमश्च महाद्रुमः ॥ ६० ॥
तत्संज्ञान्येव तत्रापि सप्त वर्षाण्यनुक्रमात् ।
तत्रापि पर्वताः सप्त वर्षविच्छेदकारिणः ॥ ६१ ॥
पूर्वस्तत्रोदयगिरिर्जलाधारस्तथापरः ।
तथा रैवतकः श्यामस्तथैवास्तो गिरिर्द्विज ! ॥ ६२ ॥
आम्बिकेयस्तथा रम्यः केसरी पर्वतोत्तमः ।
शाकस्तत्र महावृक्षः सिद्धगन्धर्वसेवितः ॥ ६३ ॥
यत्पत्रवातसंस्पर्शादाह्लादो जायते परः ।
तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः ॥ ६४ ॥
नद्यश्चात्र महापुण्याः सर्वपापभयापहाः ।
सुकुमारी कुमारी च नलिनी धेनुका च या ॥ ६५ ॥
इक्षुश्च वेणुका चैव गभस्ती सप्तमी तथा ।
अन्याश्च शतशस्तत्र क्षुद्रनद्यो महामुने ! ॥ ६६ ॥
महीधरास्तथा सन्ति शतशोऽथ सहस्रशः ।
ताः पिबन्ति सदा हृष्टा जलदादिषु ये स्थिताः ॥६७॥

[illegible] द्विगुणा इत्यर्थः ॥ ५६ ॥ ५७ ॥ दध्नो मण्डः सारभूत-
[illegible] ॥ ५८ ॥ ६० ॥ शाको वृक्षविशेषः यस्य पत्राण्यश्व-
[illegible] । [illegible]

वर्षेषु ते जनपदाः स्वर्गादभ्येत्य मेदिनीम् ।
धर्महानिर्न तेष्वस्ति न संघर्षः परस्परम् ॥ ६८ ॥
मर्य्यादाव्युत्क्रमो नास्ति तेषु देशेषु सप्तसु ।
मगाश्च मागधाश्चैव मानसा मन्दगास्तथा ॥ ६९ ॥
मगा ब्राह्मणभूयिष्ठा मागधाः क्षत्रियास्तथा ।
वैश्यास्तु मानसास्तेषां शूद्रास्तेषान्तु मन्दगाः ॥ ७० ॥
शाकद्वीपे तु तैर्विष्णुः सूर्य्यरूपधरो मुने ।
यथोक्तैरिज्यते सम्यक्कर्मभिर्नियतात्मभिः ॥ ७१ ॥
शाकद्वीपस्तु मैत्रेय क्षीरोदेन समन्ततः ।
शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः ॥ ७२ ॥
क्षीराब्धिः सर्वतो ब्रह्मन् पुष्कराख्येन वेष्टितः ।
द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः ॥ ७३ ॥
पुष्करे सवनस्यापि महावीरोऽभवत् सुतः ।
धातकिश्च तयोस्तत्र द्वे वर्षे नामचिह्निते ॥ ७४ ॥
महावीरं तथैवान्यं धातकीखण्डसंज्ञितम् ।
एकश्चात्र महाभाग प्रख्यातो वर्षपर्वतः ॥ ७५ ॥
मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः ।
योजनानां सहस्राणि ऊर्ध्वं पञ्चाशदुच्छ्रितः ॥ ७६ ॥
तावदेव च विस्तीर्णः सर्वतः परिमण्डलः ।
पुष्करद्वीपवलयं मध्येन विभजन्निव ॥ ७७ ॥
स्थितोऽसौ तेन विच्छिन्नं जातं तद्वर्षकद्वयम् ।

...बहुलोपमा" इति श्लोकाः ॥ ६५ ॥ ६६ ॥ ६७ ॥ स्वर्गादभ्ये-
त्येति स्वर्गभोगानन्तरं पुण्यशेषेण मेदिनीं प्राप्य ये जनपदा वर्षेषु

वलयाकारमेकैकं तयोर्मध्ये तथा गिरिः ॥ ७८ ॥
दश वर्षसहस्राणि तत्र जीवन्ति मानवाः ।
निरामया विशोकाश्च रागद्वेषादिवर्जिताः ॥ ७९ ॥
अधमोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विज ।
नेर्ष्यासूया भयं द्वेषो दोषो लोभादिको न च ॥ ८० ॥
महावीरं बहिर्वर्षं धातकीखण्डमन्ततः ।
मानसोत्तरशैलस्य देवदैत्यादिसेवितम् ॥ ८१ ॥
सत्यानृते न तत्रास्तां द्वीपे पुष्करसंज्ञिते ।
न तत्र नद्यः शैला वा द्वीपे वर्षद्वयान्विते ॥ ८२ ॥
तुल्यवेषास्तु मनुजा देवास्तत्रैकरूपिणः ।
वर्णाश्रमाचारहीनं धर्माहरणवर्जितम् ॥ ८३ ॥
त्रयीवार्त्तादण्डनीतिशुश्रूषारहितं च तत् ।
वर्षद्वयन्तु मैत्रेय भौमस्वर्गोऽयमुत्तमः ॥ ८४ ॥
सर्वस्य सुखदः कालो जरारोगादिवर्जितः ।
धातकीखण्डसंज्ञेऽथ महावीरे च वै मुने ॥ ८५ ॥
न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् ।
तस्मिन् निवसति ब्रह्मा पूज्यमानः सुरासुरैः ॥ ८६ ॥

[illegible] ॥ ७८ ॥ ७९ ॥ [illegible] ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७८ ॥ ८० ॥ [illegible] ॥ ८१ ॥ ८२ ॥ [illegible] ॥ ८३ ॥ ८४ ॥ [illegible]

स्वादूदकेनोदधिना पुष्करः परिवेष्टितः ।
समेन पुष्करस्यैव विस्तारान्मण्डलं तथा ॥ ८७ ॥
एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ।
द्वीपश्चैव समुद्रश्च समानौ द्विगुणौ परौ ॥ ८८ ॥
पयांसि सर्वदा सर्वसमुद्रेषु समानि वै ।
न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते ॥ ८९ ॥
स्थालीस्थमग्निसंयोगादुद्रेकि सलिलं यथा ।
तथेन्दुवृद्धौ सलिलमम्भोधौ मुनिसत्तम ॥ ९० ॥
न न्यूना नातिरिक्ताश्च वर्धन्त्यापो ह्रसन्ति च ।
उदयास्तमनेष्विन्दोः पक्षयोः शुक्लकृष्णयोः ॥ ९१ ॥
दशोत्तराणि पञ्चैव ह्यङ्गुलानां शतानि वै ।
अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने ॥ ९२ ॥

पुष्करारण्यं समभवत्" इति श्रुतेः । "न्यग्रोधः पुष्करद्वीपे पद्मवत्तेन संस्मृतः" इति मत्स्योक्तेश्च । "यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम्" इति शुकोक्तेश्च ॥ ८६ ॥ ८७ ॥ द्वीपश्चेति । अनुद्वीपश्च समुद्रश्च समानौ उभयोरन्तर्विस्तारौ ततः परौ द्वीपसमुद्रौ पूर्वस्मात् द्विगुणविस्तारौ ॥ ८८ ॥ ८९ ॥ यथा स्थालीस्थं [illegible] सलिलं तीव्राग्निसंयोगादुद्रेकि [illegible] समुद्रेकवत् भवति । अग्निसंयोगोपरमे च यथापूर्वं तिष्ठति तथेन्दुवृद्धौ पौर्णमास्याम् अम्भोधौ सलिलमुद्रेकवद्दृश्यते ; अमावास्यायां यथापूर्वं तिष्ठति ॥ ९० ॥ तथा शुक्लकृष्णयोः पक्षयोः [illegible] अन्यूनातिरिक्ता अपाः किञ्चित् किञ्चिद् वर्धन्ते । इन्दोरुदयादेव [illegible] एवं किञ्चिदुपचीयन्ते ॥ ९१ ॥ [illegible] इति [illegible] वर्धन्ते [illegible] । यदा [illegible]

भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् ।
षड्रसं भुञ्जते विप्र ! प्रजाः सर्वाः सदैव हि ॥ ८३ ॥
स्वादूदकस्य परतो दृश्यतेऽलोकसंस्थितिः ।
द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता ॥ ८४ ॥
लोकालोकस्ततः शैलो योजनायुतविस्तृतः ।
उच्छ्रायेणापि तावन्ति सहस्राण्यचलो हि सः ॥ ८५ ॥
ततस्तमः समावृत्य तं शैलं सर्वतः स्थितम् ।
तच्चाण्डकटाहेन समन्तात् परिवेष्टितम् ॥ ८६ ॥

[illegible] ॥ ८२ ॥ भुञ्जत इति भोजनं भक्ष्यभोज्यादिचतु-
र्विधमन्नं [illegible] तत्र प्रयत्नं विना स्वयमेवोपस्थितं भुञ्जते । षड्र-
[illegible] इति प्रसिद्धाः षड्रसा यस्मिन् तत् ॥ ८३ ॥
[illegible] । न विद्यते लोकस्य जननिवासभूतस्य
संस्थितिर्यस्यां सा [illegible] । [illegible]
[illegible] काञ्चनी भूमि[illegible]
॥ ८४ ॥ तावन्ति [illegible] सहस्राणि योजनायुत[illegible]
इत्यर्थः । [illegible] तावन्ति अयुत[illegible] सहस्राणीत्यर्थः । "[illegible]
[illegible]
[illegible]
[illegible]" इति पुराणे [illegible] । "[illegible]
[illegible]
[illegible]
[illegible]
[illegible] काञ्चनी भूमिः [illegible]
[illegible] । ततो लोकालोकः शैलः अयुतयोजनविस्तारः
[illegible] ॥ ८५ ॥ "ततस्तं शैलं सर्वतस्तम आवृत्य तिष्ठति तच्च
[illegible]म् । एतेन

पञ्चाशत्कोटिविस्तारा सेयमुर्वी महामुने! ।
सहैवाण्डकटाहेन सद्वीपाब्धिमहीधरा ॥ ९७ ॥
सेयं धात्री विधात्री च सर्वभूतगुणाधिका ।
आधारभूता सर्वेषां मैत्रेय! जगतामिति ॥ ९८ ॥



पञ्चमोऽध्यायः ।

पराशर उवाच ।

विस्तार एष कथितः पृथिव्या भवतो मया ।
सप्ततिस्तु सहस्राणि द्विजोच्छ्रायोऽपि कथ्यते ॥ १ ॥
दशसाहस्रमेकैकं पातालं मुनिसत्तम! ।
अतलं वितलञ्चैव नितलञ्च गभस्तिमत् ।
महाख्यं सुतलञ्चाग्र्यं पातालञ्चापि सप्तमम् ॥ २ ॥
शुक्ला कृष्णारुणा पीता शर्करा शैलकाञ्चनाः ।

धूमोऽवपरिमाणश्च अण्डस्यान्तम्" इति पुराणोक्तेः । तदेवं पञ्चाशत्कोटि-विस्तारैवमुर्वी । ततोऽण्डकटाहः [illegible] पञ्चाशत्कोटि-विस्तारः । "अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरं सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः" इति पुराणोक्तेः । क्वचित् क्वचित् पुराणेषु विरोधो यः स दृश्यते । कल्पभेदादिभिस्तत्र व्यवस्था सद्भिरिष्यते ॥ ९६ ॥ सहैवाण्डकटाहेनेति तत्पर्यन्तमित्यर्थः ॥ ९७ ॥ धात्री धारयित्री विधात्री जनयित्री इत्येतैः पावनादिभिः सर्वेभ्यो भूतेभ्य आकाशादिभ्यो गुणैरधिका चेयं ॥ ९८ ॥

[illegible] विस्तारमुक्त्वाऽधः प्रदेशमाह । [illegible] ॥ १ ॥ २ ॥ दशसाहस्रमित्येव [illegible]

भूमयो यत्र मैत्रेय ! वरप्रासादमण्डिताः ॥ ३ ॥
तेषु दानवदैतेया यक्षाश्च शतशस्तथा ।
निवसन्ति महानागजातयश्च महामुने ! ॥ ४ ॥
स्वर्लोकादपि रम्याणि पातालानीति नारदः ।
प्राह स्वर्गसदां मध्ये पातालेभ्यो गतो दिवि ॥ ५ ॥
आह्लादकारिणः शुभ्रा मणयो यत्र सुप्रभाः ।
नागैराभ्रियमाणासु पातालं केन तत् समम् ॥ ६ ॥
दैत्यदानवकन्याभिरितश्चेतश्च शोभिते ।
पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते ॥ ७ ॥
दिवार्करश्मयो यत्र प्रभां तन्वन्ति नातपम् ।
शशिनश्च न शीताय निशि द्योताय केवलम् ॥ ८ ॥
भक्ष्यभोज्यमहापानमुदितैरतिभोगिभिः ।
यत्र न ज्ञायते कालो गतोऽपि दनुजादिभिः ॥ ९ ॥
वनानि नद्यो रम्याणि सरांसि कमलाकराः ।
पुंस्कोकिलाभिलापाश्च मनोज्ञान्यम्बराणि च ॥ १० ॥
भूषणान्यतिरम्याणि गन्धाढ्यञ्चानुलेपनम् ।
वीणावेणुमृदङ्गानां स्वनास्तूर्याणि च द्विज ! ॥ ११ ॥

भूमिकाः । ततो भवद्भिर्यदुक्तमेवेदं पातालं भूविवरविस्तरम् । "सप्तद्वीपसमाख्यातं अवान्तरमेव च । पञ्चदशोऽन्तरावयवं सहस्राणि महाख्यवान्" इति विष्णुधर्मोत्तरे पद्मपुराणे महातलम् ॥ ३ ॥ ४ ॥ पातालेभ्यो दिवमागतः सन् स्वर्गसदां देवानां मध्ये प्राह ॥ ५ ॥ शुभ्राः शुद्धा मणयो नागैराभ्रियमाणासु धार्यमाणासु भूषासु यत्र तत् पातालं केन समं न केनापि विषयसमभिलाषः ॥ ६ ॥ विमुक्तस्य वीतरागस्यापि ॥ ७ ॥ ८ ॥ पुंस्कोकिलानामभिलापाः कूजितानि ॥ १० ॥

एतान्यन्यानि चोदारभाग्यभोग्यानि दानवैः ।
दैत्योरगैश्च भुज्यन्ते पातालान्तरगोचरैः ॥ १२ ॥
पातालानामधश्चास्ते विष्णोर्या तामसी तनुः ।
शेषाख्या यद्गुणान् वक्तुं न शक्ता दैत्यदानवाः ॥ १३ ॥
योऽनन्तः पठ्यते सिद्धैर्देवो देवर्षिपूजितः ।
स सहस्रशिरा व्यक्तस्वस्तिकामलभूषणः ॥ १४ ॥
फणामणिसहस्रेण यः स विद्योतयन् दिशः ।
सर्वान् करोति निर्वीर्यान् हिताय जगतोऽसुरान् ॥ १५ ॥
मदाघूर्णितनेत्रोऽसौ यः सदैवैककुण्डलः ।
किरीटी स्रग्धरो भाति साग्निः श्वेत इवाचलः ॥ १६ ॥
नीलवासा मदोत्सिक्तः श्वेतहारोपशोभितः ।
साभ्रगङ्गाप्रवाहोऽसौ कैलासाद्रिरिवापरः ॥ १७ ॥
लाङ्गलासक्तहस्ताग्रो बिभ्रन्मुशलमुत्तमम् ।
उपास्यते स्वयं कान्त्या यो वारुण्या च मूर्त्तया ॥ १८ ॥
कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः ।
सङ्कर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम् ॥ १९ ॥
स बिभ्रच्छेखरीभूतमशेषं क्षितिमण्डलम् ।
आस्ते पातालमूलस्थः शेषोऽशेषसुरार्चितः ॥ २० ॥

तृतीयं च ... ॥ ११ ॥ उदारैर्बहुलैर्भोग्यैः पुष्कलैः भोग्यानि । पातालानामन्तरं मध्यं गोचरो विषयो येषां तैः ॥ १२ ॥ १३ ॥ स्वस्तिकं कण्ठे रेखा त्रिशूलविशेषः । अन्ये स्वस्तिकमेवामलं भूषणं यस्य सः ॥ १४ ॥ १५ ॥ कान्त्या श्रिया वारुण्या च मदिराधिष्ठात्र्या देवतया ॥ १८ ॥ १९ ॥ शेखरीभूतं मुकुटवत् स्थितम् ॥ २० ॥

तस्य वीर्य्यं प्रभावश्च स्वरूपं रूपमेव च ।
न हि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि ॥ २१ ॥

यस्यैषा सकला पृथ्वी फणामणिशिखारुणा ।
आस्ते कुसुममालेव कस्तद्वीर्य्यं वदिष्यति ॥ २२ ॥

यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः ।
तदा चलति भूरेषा साद्रितोयाब्धिकानना ॥ २३ ॥

गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः
नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः ॥ २४ ॥

यस्य नागवधूहस्तैर्लेपितं हरिचन्दनम् ।
मुहुः श्वासानिलापास्तं याति दिक्षुदवासताम् ॥ २५ ॥

यमाराध्य पुराणर्षिर्गर्गो ज्योतींषि तत्त्वतः ।
ज्ञातवान् सकलञ्चैव निमित्तपठितं फलम् ॥ २६ ॥

तेनेयं नागवर्य्येण शिरसा विधृता मही ।
बिभर्त्ति मालां लोकानां सदेवासुरमानुषाम् ॥ २७ ॥

वीर्य्यं बलं प्रभावः प्रतापः स्वरूपं तत्त्वम् । रूपमाकारः ॥ २१ ॥ २४ ॥ लेपितं चर्चितम् हरिचन्दनं यस्य श्वासानिलेनापास्तं क्षिप्तं दिक्षु उद-वासतां अवगुण्ठनीकारत्वं यातीत्यर्थः । दिक्क्षोदवासतामिति पाठे दिशां क्षोदवासताम् चूर्णवासत्वम् । यद्वा क्षोदाः क्षोदा-पांशवस्तेषां वासता आवरणताम् । दिक्षु स्थानां क्षौद्राणां चर्चित्वा दि-रजःस्थानीयं भवतीत्यर्थः । दिक्षुदवासतामिति पाठः ॥ २५ ॥ ज्यो-तींषि ग्रहनक्षत्रादीनि निमित्ते उत्पातशकुनादौ पठितं शुभाशुभलक्षणं फलञ्च ज्ञातवान् ॥ २६ ॥ देवासुरमानुषैः सहितानां लोकानां पातालादीनां मालां पङ्क्तिं तेन विधृता महीयं मही बिभर्त्ति । लोकाधार-भूताया भूमेरपि स आधार इत्यर्थः ॥ २७ ॥

षष्ठोऽध्यायः ।

पराशर उवाच

ततश्च नरकान् विप्र भुवोऽधः सलिलस्य च ।
पापिनो येषु पात्यन्ते तान् शृणुष्व महामुने ॥ १ ॥
रौरवः सूकरो रोधस्तालो विशसनस्तथा ।
महाज्वालस्तप्तकुम्भो लवणोऽथ विमोहनः ॥ २ ॥
रुधिरान्धो वैतरणी कृमीशः कृमिभोजनः ।
असिपत्रवनं कृष्णो लालाभक्षश्च दारुणः ॥ ३ ॥
तथा पूयवहः पापो वह्निज्वालो ह्यधःशिराः ।
सन्दंशः कालसूत्रश्च तमश्चावीचिरेव च ॥ ४ ॥
श्वभोजनोऽथाप्रतिष्ठश्चावीचिश्च तथापरः ।
इत्येवमादयश्चान्ये नरका भृशदारुणाः ॥ ५ ॥
यमस्य विषये घोराः शस्त्राग्निभयदायिनः ।
पतन्ति तेषु पुरुषाः पापकर्मरतास्तु ये ॥ ६ ॥
कूटसाक्षी तथा सम्यक् पक्षपातेन यो वदेत् ।
यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ॥ ७ ॥
भ्रूणहा पुरहन्ता च गोघ्नश्च मुनिसत्तम ।

भारते कृतपुण्यानामुक्ता फलप्रदा भूः । तत्रैव कृतपापानां यातनाः च तत्र षष्ठे ॥ [illegible] तमोगतोऽध्यायः [illegible] दुःखं [illegible] । [illegible] ॥ १ ॥ [illegible] । अन्यथा वा वदन् कूटसाक्षी । [illegible] पक्षपातेन [illegible] वदेत् । यश्चान्यदपि [illegible]

यान्ति ते नरकं रोधं ये च कामनिरोधक ॥ ८ ॥
सुरापो ब्रह्महा स्तेयी सुवर्णस्य च शूकरे ।
प्रयाति नरके यश्च तैः संसर्गमुपैति वै ॥ ९ ॥
राजन्यवैश्यहा ताले तथैव गुरुतल्पगः ।
तप्तकुण्डे स्वसृगामी हन्ति राजभटांश्च यः ॥ १० ॥
साध्वीविक्रयकृद्बद्धपालः केसरिविक्रयी ।
तप्तलोहे पतन्त्येते यश्च भक्तं परित्यजेत ॥ ११ ॥
स्नुषां सुतां वापि गत्वा महाज्वाले निपात्यते ।
अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः ॥ १२ ॥
वेददूषयिता यश्च वेदविक्रयकश्च यः ।
अगम्यगामी यश्च स्यात ते यान्ति लवणं द्विज ॥ १३ ॥
चौरो विमोहे पतति मर्यादादूषकस्तथा ।
देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ।
स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत ॥ १४ ॥
पितृदेवातिथीन यश्च पर्यश्नाति नराधमः ।
लालाभक्षे स यात्युग्रे शरकर्ता च वेधके ॥ १५ ॥
करोति कर्णिनो यश्च यश्च खड्गादिकृन्नरः

रक्षि ॥ ७ ॥ [illegible] गर्भहन्ता [illegible] परिमुच्यते [illegible] ते
संसर्गमिति [illegible] पतति [illegible] | [illegible]-
[illegible] पतति [illegible] ॥ ९ ॥ [illegible]
[illegible] ॥ १० ॥ साध्वी भार्या [illegible] । [illegible]
[illegible] । [illegible] ॥ ११ ॥ १२ ॥
वेददूषयिता वेदनिन्दकः । [illegible] ॥ १३ ॥ मर्यादा-
दूषक [illegible] । दुरिष्टकृत् अभिचारकर्ता ॥ १४ ॥ [illegible]

प्रयान्त्येते विशसने नरके भृशदारुणे ॥ १६ ॥

असत् प्रतिगृहीता तु नरके यात्यधोमुखे ।

अयाज्ययाजकश्चैव तथा नक्षत्रसूचकः ॥ १७ ॥

कृमिपूयवहश्चैको याति मिष्टान्नभुङ् नरः ।

लाक्षामांसरसानाञ्च तिलानां लवणस्य च ।

विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! १८ ॥

मार्जारकुक्कुटच्छागश्ववराहविहङ्गमान् ।

पोषयन्नरकं याति तमेव द्विजसत्तम ! ॥ १९ ॥

रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा ।

सूची माहिषिकश्चैव पर्वकारी च यो द्विजः ॥ २० ॥

आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः ।

रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥ २१ ॥

मधुहा ग्रामहन्ता च याति वैतरणीं नरः ।

रेतःपानादिकर्त्तारो मर्य्यादाभेदिनो हि ये ।

परस्त्रक्च आदौ भुङ्क्ते ॥ १५ ॥ वर्जितो याज्यविशेषात् ॥ १६ ॥ नक्षत्रसूचकः नक्षत्रगणकः ॥ १७ ॥ पुत्रादीन् वर्जयित्वा एक एव मिष्टान्नभुक् । येन पाककारी तमेव कृमिपूयं पूयकृमेव ॥ १८ ॥ १९ ॥ रङ्गोपजीवी । नटमल्लादिवृत्तिः । कैवर्त्तः धीवरवृत्तिः । पत्यौ जीवति जाराज्जातः कुण्डः तदन्नभोजी कुण्डाशी । सूची पिशुनः । माहिषिको महिषोपजीवी । यद्वा "महिषीत्युच्यते भार्य्या भगेनोपार्जितधनम् । उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः" इति स्मृतिवचः । पर्वकारी अमादिपर्वस्वमैथुनादिनिषिद्धकर्मकर्त्ता । पर्वसु भोजीति पाठे पर्वसु श्राद्धभोजी ॥ २० ॥ शाकुनिः पक्षिजीवी शुभाशुभनिमित्तकथनोपजीवी वा । ग्रामयाजकः ग्रामार्थं यष्टा ॥ २१ ॥ मर्य्यादाभेदिन [illegible] परवधूनाम् [illegible]

ते कृमौ यान्त्यगोचाश्च कुहकाजीविनश्च ये ॥ २२ ॥
असिपत्रवनं याति वनच्छेदी वृथैव यः ।
औरभ्रिका मृगव्याधा वह्निज्वाले पतन्ति ये ॥ २३ ॥
यान्त्येते द्विज ! तत्रैव ये चापाकेषु वह्निदाः ।
व्रतानां लोपको यश्च स्वाश्रमाद् विच्युतश्च यः ॥ २४ ॥
सन्दंशयातनामध्ये पततस्तावुभावपि ।
दिवास्वप्ने च स्कन्दन्ते ये नरा ब्रह्मचारिणः ।
पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥ २५ ॥
एते चान्ये च नरकाः शतशोऽथ सहस्रशः ।
येषु दुष्कृतकर्माणः पच्यन्ते यातनागताः ॥ २६ ॥
यथैव पापान्येतानि तथान्यानि सहस्रशः ।
भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥ २७ ॥
वर्णाश्रमविरुद्धञ्च कर्म कुर्वन्ति ये नराः ।
कर्मणा मनसा वाचा निरयेषु पतन्ति ते ॥ २८ ॥
अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः ।

वा जीवो दम्भजीवा ते । कृमौ कायभवे ॥ २२ ॥ [illegible] [illegible]पादिकार्थं विना वृथैव वनच्छेदी च असिपत्रवनं याति । औरभ्रो मेषोपजीवी । मृगव्याधश्च ॥ २३ ॥ चापाकेषु वह्निदः [illegible] पतन्ति चापाका दारुमृन्मयकुम्भकारादिवधकाः । यान्त्येते इत्येते पूर्वोक्ताः [illegible] पापयोश्च [illegible] । निरयवर्तिनां दुष् पापाधिक्यात् [illegible] [illegible] ॥ २४ ॥ स्कन्दन्ते रेतो विसृजन्ति ॥ २५ ॥ २७ ॥ वर्णाश्रमविरुद्धं [illegible] कर्म । निरयेषु नरकेषु ॥ २८ ॥ नरकस्थाना दुःखातिशयं [illegible] वैराग्यार्थं

देवाश्चाधोमुखान् सर्वान् अधःपश्यन्ति नारकान् ॥२९॥
स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः ।
धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ॥ ३० ॥
सहस्रभागाः प्रथमा द्वितीयानुक्रमात् तथा ।
सर्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः ॥ ३१ ॥
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः ।
पापकृद् याति नरकं प्रायश्चित्तपराङ्मुखः ॥ ३२ ॥

नरकदर्शनमाह देवा इति ॥ २९ ॥ पापिनां नरकभोगानन्तरं स्थावरत्वादि उत्तरोत्तरमुत्कर्षेण तथा मिश्राणां योनिषु जन्मक्रममाह स्थावरा इति । अब्जाः जलचरादयः । धार्मिका नरा एव पुण्यविशेषेण ततश्च मोक्षिणश्च मुमुक्षवो यथाक्रमं भवन्तीति शेषः ॥ ३० ॥ तेषाञ्च परस्पराल्पत्वं उत्तरोत्तराल्पत्वञ्चाह, सहस्रेति । द्वितीयानुक्रमात् द्वितीयोऽनुक्रम उद्देशो येषां ते द्वितीयस्थानेऽनुक्रान्ता ये कृमयः ते सहस्रभागकृमयः प्रथमाः सहस्रभागाः सहस्रगुणाः प्रथमाः प्रथमनिर्दिष्टाः स्थावरा यथा ते कृमिभ्यः सहस्रगुणमधिकाः स्थावरास्तत्सहस्रतमभागाः कृमय इत्यर्थः । पशुस्थलपाठेऽपि द्वितीयस्थानेऽनुक्रान्तात् कृमिवर्गात् सहस्रगुणमधिकाः स्थावरा इत्यर्थः । तथा सर्वे ह्येते इति यथा स्थावरा एवं पश्वादिष्वपि द्रष्टव्यम् । मुक्तिं सम्यगाश्रयन्त इति मुक्तिसमाश्रया मुमुक्षवो धार्मिकाः । तत्पर्यन्तमेव पापादिकर्मोत्तरक्रमभवो जन्मक्रमः । ततः परं मुक्तिः । एतच्च संसारगौरवकुल्यकथनं मोक्षस्य दुर्लभताख्यापनार्थम् । अयञ्च नवधा निर्दिष्टो जन्मक्रमः प्रायिक एव । यदुक्तं ब्रह्मपुराणे "अनुक्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् । विचित्रा गतयः प्रोक्ताः कर्मणां गुरुलाघवैः" इति ॥ ३१ ॥ तदेवं नारकाः सर्वे नरकभोगानन्तरं स्थावरादिजन्मक्रमेण पापस्य क्षयात् पुण्यवशात् कदाचित् स्वर्गिणो भवन्ति । इदानीं स्वर्गिणोऽपि सर्वे पुण्यक्षयात् पापवशाच्च कदाचित् नारका भवन्तीति । वैराग्यार्थमाह, यावन्त इति । नरकौकसो भवन्तीति शेषः । इदानीं पापिनोऽपि नरकपरिहारो-

पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा ।
तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः ॥ ३३ ॥
पापे गुरूणि गुरूणि स्वल्पान्यल्पे च तद्विदः ।
प्रायश्चित्तानि मैत्रेय । जगुः स्वायम्भुवादयः ॥ ३४ ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ ३५ ॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तस्तु तस्यैकं हरिसंस्मरणं परम् । ३६ ॥
प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन् ।
नारायणमवाप्नोति सद्यः पापक्षयं नरः ॥ ३७ ॥

प्रायश्चित्तमाह, पापकृदिति । प्रायश्चित्तं यो न करोति स एव नरकं याति, न तु कृतप्रायश्चित्तः ॥ ३२ ॥ तच्च प्रायश्चित्तं कर्मभक्तिज्ञानरूपेण त्रिविधम् । तत्र पापतारतम्येन कर्मात्मकप्रायश्चित्ततारतम्यमाह, पापानामिति । यत् पापं महदल्पं वा यथा ज्ञातमज्ञातं वा तथैव तदनुरूपाणि प्रायश्चित्तानि वेदार्थं संस्मृत्य प्रोक्तानि महर्षिभिः ॥३३॥ ॥ ३४ ॥ स्वायम्भुवादिभिर्महर्षिभिः प्रायश्चित्तैर्निःशेषपापक्षयाभावात् सर्वोत्कृष्टं सकलं भक्तिरूपं प्रायश्चित्तमाह प्रायश्चित्तानीति । तपांसि कृच्छ्रादीनि । कर्माणि च दानजपादीनि, तदात्मकानि यानि प्रायश्चित्तानि तेभ्यः सर्वेभ्यः कृष्णानुस्मरणं परं श्रेष्ठम् ॥ ३५ ॥ ज्ञानरूपमाह, कृत इति । पापे कृते यस्य पुंसोऽनुतापः प्रकर्षेण जायते तस्यैव यस्मादनुतापात् तपोदानहोमा यस्य एकं किञ्चित् तदनुरूपं प्रायश्चित्तम् अनवद्यत्वम् तेषामनुपकारात् । हरिसंस्मरणं तु परमनुतापमनपेक्ष्यापि निःशेषपापक्षयहेतुत्वात् । सर्वेषामपि सर्वाणि कीर्तित इति सम्बन्धात् ॥ ३६ ॥ किञ्च देशकालादिनियममनपेक्ष्य सद्यःपापक्षयहेतुत्वाद् हरिसंस्मरणं श्रेष्ठमित्याह, प्रातरिति । प्रातर्वा निशि वा सन्ध्यायां वा मध्याह्ने वा आदिशब्दात् देशकालोऽवस्थादिनियमं

विष्णुसंस्मरणात् क्षीणसमस्तक्लेशसञ्चयः ।
मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते ॥ ३८ ॥
वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥ ३९ ॥

चारयति । नर इत्यादि । नियमस्तु देशकालादिनियमं विनैव यथा कथञ्चित् नारायणसंस्मरणं सद्यस्तत्क्षणं पापक्षयमेव प्रोति न तु संस्मरणं तथा । एतदुक्तं भवति, द्वादशाब्दादिकं हि देशकालाधिकारि-नियमापेक्षं यथावदनुष्ठितं कालान्तरे पापक्षयहेतुः, इदं तु न तथा । अत एवोक्तं भवति । अयं भावः, शास्त्रगम्यं हि फलं यथा-शास्त्रं देशकालादिनियमेन यथोक्तैरधिकारिभिरनुष्ठितात् साधना-द्भिव्यज्यते, हरिसंस्मरणादिफलं तु वस्तुसामर्थ्यप्रभवत्वात् न देशकालाधि-कारादिनियममपेक्षत इति । तथा च विष्णुधर्मादिषु वस्तुसामर्थ्यमेव दृष्टान्तेनोक्तम् । 'चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत् । नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥ अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः । अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् । संकीर्त्तितमिदं पुंसो दहेदेधो यथानलः' इत्यादि । न चैवं सति द्वादशाब्दादिविधेरानर्थक्यं शङ्कनीयं, नामादौ श्रद्धाशून्यानां तत्रैव प्रवृत्तेः । विस्तरस्त्वेतद् भागवतभावार्थदीपिकायां षष्ठस्कन्धव्याख्याने ॥ ३७ ॥ किञ्च हरिस्मरणं द्वादशाब्दादिवत् न पापक्षयमात्रहेतुः किन्तु मुक्तेरपि हेतुरित्याह, विष्णुसंस्मरणादिति । क्षीणः समस्तक्लेशानां पापकर्मणां रागादीनां सञ्चयः समूहो यस्य स नरो मुक्तिमवाप्नोति । स्वर्गप्राप्तिस्तु तदपेक्षयाल्पत्वात् विघ्नप्रायैवेत्यर्थः ॥ ३८ ॥ 'अथ अपचारादिषु गुणवादार्थमपि कृतं हरिसंस्मरणादि' तदेवं स्वर्गफलमित्याह, वासुदेवे मन इति तस्य मोक्षं प्राप्स्यतः पुंसो जपहोमादिसाध्यं देवेन्द्रत्वादि फलं तत्फलमतिविलम्बत्वादन्तरायो विघ्न एव ॥ ३९ ॥ तदेवाह, क्वेति । नाकपृष्ठगमनं स्वर्गलोकः, तदुपगमनमपि

क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् ।
क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥ ४० ॥
तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने ! ।
न याति नरकं मर्त्यः संक्षीणाखिलपातकः ॥ ४१ ॥
मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्ययः ।
नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम ! ॥ ४२ ॥
वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च ।
कोपाय च यतस्तस्माद् वस्तु वस्त्वात्मकं कुतः ॥ ४३ ॥
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय यतः प्रसादाय च जायते ॥ ४४ ॥
तस्माद् दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम् ।

पुनरावृत्तिलक्षणं तु [illegible] निरतिशयानन्द-फलस्य [illegible], किं पुनरिन्द्रत्वादिकामस्य? । अत एव [illegible]-अपवर्गोऽपि [illegible] प्रायश्चित्तं [illegible] । वक्ष्यति हि । [illegible] ॥ ३० ॥ अतो मोक्षफलं विष्णुस्मरणं कुर्वन् नरकं न यातीति किं वक्तव्यमित्युपसंहरति, तस्मादिति ॥ ४१ ॥ [illegible] सुखं [illegible]-त्मकम् । इदानीं [illegible] मिथ्यात्वात् [illegible] प्रीतिकर [illegible] स्वर्गनरकतत्साधन[illegible] मिथ्यात्वमाह, मनःप्रीतीति सार्द्धैः पञ्चभिः । तद्विपर्ययः मनोदुःखकरः । अतः स्वर्गनरक-प्रीतिदुःखकरवस्तुवत् स्वर्गनरकौ मिथ्येति भावः । मिथ्याभूतनरकस्वर्ग-हेतुत्वात् पापपुण्ये अपि मिथ्यैवेत्याशयेनाह, नरकेति । [illegible]-मिति साधने साध्यादुपचारात् पापपुण्ये एव नरकस्वर्गसंज्ञे इत्यर्थः ॥ ४२ ॥ सुखदुःखादीनां [illegible]नामस्थिरवस्तुत्वमाह, वस्त्वेकमेवेति । वस्तु [illegible] वस्त्वात्मकं नियतस्वभावम् । कुतः ? [illegible]भेदो नियतस्वभावत्वात् न परमार्थतः सुखदुःख-

मनसः परिणामोऽयं सुखदुःखादिलक्षणः ॥ ४५ ॥

ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते ।

ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परम् ।

विद्याविद्येति मैत्रेय ! ज्ञानमेवावधारय ॥ ४६ ॥

एवमेतन्मयाख्यातं भवतो मण्डलं भुवः ।

पातालानि च सर्वाणि तथैव नरका द्विज ! ॥ ४७ ॥

समुद्राः पर्वताश्चैव द्वीपवर्षाणि निम्नगाः ।

सङ्क्षेपात् सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥ ४८ ॥

साधनं किञ्चिद्दर्शयति ॥ ४३ ॥ ४४ ॥ मनसः परिणामः स्वप्नमनोरथादिवन्मनोविलासमात्रं इत्यर्थः ॥ ४५ ॥ किं तर्हि सत्यम् ? इत्यत्राह, ज्ञानमिति । ज्ञानात्मकं परं ब्रह्मैव परमार्थ इति शेषः । एवं चेत् कुतोऽस्य बन्धमोक्षौ ? तत्राह, ज्ञानमिति । अविद्या अहङ्कारादिरूपेण प्रतीतं ज्ञानमेव बन्धायेष्यते । च शब्दात् ज्ञानमेव विद्यया तन्निरासेन मोक्षाय चेष्यत इत्यर्थः । न चाध्यसनीयं निरसनीयं चाहङ्कारादि तद्व्यतिरिक्तमस्तीत्याह, ज्ञानात्मकमिति । तदध्यासापवादहेतू विद्याविद्ये अपि न ततः पृथक् विद्येते इत्याह, विद्याविद्येति । तदेवमविद्याध्यस्तकर्त्तृत्वकर्मफलादिदर्शिनामननुसन्धानं यावदपरोक्षज्ञानं परं प्रायश्चित्तम् । अपरोक्षज्ञाने तु न पापस्पर्शः न च प्रायश्चित्तम् । "यथा वै पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते । न कर्मणा लिप्यते पातकेन" इत्यादि श्रुतेः । यद्वा मनःपरिणामः स्वर्ग इत्यादेरेवं सम्बन्धः; यद्यपि स्वर्गनरकौ [illegible] सुखदुःखानुभूतिरूपौ मनोज्ञौ तथापि न प्राप्तिपरिहारमात्रेण यत्नः कार्यः तयोः [illegible] परमार्थत्वात् परं ब्रह्मैव सत्यम् । [illegible] मनोविभ्रमत्वात् एव यत्नः कार्यः इति ॥ ४६ ॥ [illegible] नरकस्वरूपं प्रायश्चित्तं समाप्य प्रकृतमेवोपसंहरत्याह, एवमिति त्रयम् ॥ ४७ ॥ ४८ ॥

सप्तमोऽध्यायः।

मैत्रेय उवाच।

कथितं भूतलं ब्रह्मन् ममैतदखिलं त्वया।
भुवर्लोकादिकाँल्लोकान् श्रोतुमिच्छाम्यहं मुने ॥ १॥
तथैव ग्रहसंस्थानं प्रमाणानि यथा तथा।
समाचक्ष्व महाभाग मह्यं त्वं परिपृच्छते ॥ २ ॥

पराशर उवाच।

रविचन्द्रमसोर्यावन्मयूखैरवभास्यते
ससमुद्रसरिच्छैला तावती पृथिवी स्मृता ॥ ३ ॥
यावत्प्रमाणा पृथिवी विस्तारपरिमण्डलात्
नभस्तावत्प्रमाणं वै व्यासमण्डलतो द्विज ॥ ४ ॥
भूमेर्योजनलक्षे तु सौरं मैत्रेय मण्डलम्।
लक्षाद्दिवाकरस्यापि मण्डलं शशिनः स्थितम् ॥ ५ ॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात्।

ग्रहाणां संस्थानं, कस्योपरि को ग्रहोऽवस्थित इत्यर्थः। प्रमाणानि तेषामन्तरान्तरयोजनसंख्याः ॥ २ ॥ भूर्लोकमानेनैव भुवर्लोक इति वक्तुं संस्थानं तावदाह रवीति। पृथिवी भवतीति भूर्लोक इत्यर्थः ॥ ३ ॥ विस्तारो लोकालोकाचलावधिः। परिमण्डलं वृत्तसमसंख्यानम्। तयोर्यत्प्रमाणं तस्माद् व्यासमण्डलतः विस्तारमण्डलाभ्यां नभो भुवर्लोकाख्यं द्यावापृथिव्योर्लोकालोकपरिच्छिन्नयोरन्तरालवर्ती भुवर्लोकोऽपि तावानित्यर्थः। यदाह श्रुतः। 'एतावानेव भूवलयस्य संनिवेशः। एतेनैव हि दिवो मानं तद्विद उपदिशन्ति। यथा द्विदलयोर्निष्पावादीनां ते अन्तरेणान्तरिक्षं तदुभयसन्धितम्' इति ॥ ४ ॥ ग्रहस्थितिमाह, भूमेरित्यादि सार्धेन ॥ ५ ॥ शतसहस्रे लक्षे पूर्णे

नक्षत्रमण्डलं कृत्स्नम् उपरिष्टात् प्रकाशते ॥ ६ ॥
द्वे लक्षे चोपरि ब्रह्मन् बुधो नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशनाः स्थितः ॥ ७ ॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः ।
लक्षद्वयेन भौमस्य स्थितो देवपुरोहितः ॥ ८ ॥
सौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे समवस्थितः ।
सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तम ॥ ९ ॥
ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः ।
मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः ॥ १० ॥
त्रैलोक्यमेतत् कथितम् उत्सेधेन महामुने ।
इज्याफलस्य भूरेषा इज्या चात्र व्यवस्थिता ॥ ११ ॥
ध्रुवादूर्ध्वं महर्लोको यत्र ते कल्पवासिनः ।
एकयोजनकोटिस्तु यत्र ते कल्पवासिनः ॥ १२ ॥

॥ ६ । ८ ॥ सौरिः शनैश्चरः ॥ ९ ॥ मेढीभूत इति धान्या-क्रमणस्तम्भूतमाश्रयः । धनमध्यनिखातमेढीवत् तद्वत् स्थितः ॥ १० ॥

पृथिव्या उच्छ्रायपरिमाणेन । इज्याफलस्य भोगस्य भूमिरेषा त्रैलोक्यलक्षणा, स्वर्गः एकः । इज्या तत्र भारतवर्ष एव प्रतिष्ठिता समाप्ता । उक्तं हि "अत्रापि हि कर्मभूरेषा अतोऽन्या भोगभूमयः" इति । अतोऽत्र, [illegible] निर्यं धर्मं प्रतितिष्ठतीति भावः ॥ ११ ॥ कल्पं ब्रह्मदिनपर्यन्तमेव महर्लोके वसन्ति । कल्पान्ते तु जनलोकं यान्ति कल्पवासिनो भृग्वादयः । "त्रैलोक्ये दह्यमानायां शक्त्या सह्यास्तुना । यान्त्यूष्मणा महर्लोकात् जनं भृग्वादयोऽर्दिताः" इति पुराणोक्तेः । तस्माद्ध्रुवादारभ्य, एकेन । यत्र ध्रुवादिपादात् ध्रुव-कल्पा ध्रुवतश्चतुर्दशधाप्यार्थो । पाठान्तरं सुगमम् ॥ १२ ॥

द्वे कोटी तु जनो लोको यत्र ते ब्रह्मणः सुताः ।
सनन्दनाद्याः कथिता मैत्रेयामलचेतसः ॥ १३ ॥
चतुर्गुणोत्तरे चोर्ध्वं जनलोकात् तपः स्मृतम् ।
वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः ॥ १४ ॥
षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥ १५ ॥
पादगम्यन्तु यत्किञ्चित् वस्त्वस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः ॥ १६ ॥
भूमिसूर्यान्तरं यत्तु सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ॥ १७ ॥
ध्रुवसूर्यान्तरं यच्च नियुतानि चतुर्दश ।

महर्लोकानन्तरमूर्ध्वमेव भूपादेन द्वे कोटी जनलोकः । यत्र ते कथिता ब्रह्मणः सनन्दनाद्याः सन्ति ॥ १३ ॥ जनलोकाच्चतुर्गुणं तपः अष्टकोट्युच्छ्रये आकाशे तपोलोकः स्मृतः ॥ १४ ॥ जनलोकापेक्षया षड्गुणेन द्वादशकोट्युच्छ्रयेण तपोलोकादनन्तरं सत्यलोकः । न तु तपोलोकापेक्षयेति मन्तव्यम् । तथा सति चतुर्विंशतिकोट्युच्छ्रयेण ब्रह्माण्डे तदवकाशाभावात् । अपुनर्मारकाः पुनर्मृत्युशून्याः । ब्रह्मलोक एव क्रमभेदेन ब्रह्मपदत्वात् परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च भूतलादूर्ध्वं चतुर्दशलक्षोत्तरं त्रयोविंशतिकोट्यो भवन्ति । ब्रह्मलोकादूर्ध्वं लोकस्थया न कोटिद्वयात् अण्डकटाह इति ज्ञेयम् । 'ऊर्ध्वाधःसप्तलोकानामौर्ध्वे कोट्यः स्युः चतुर्विंशतिः' इत्युक्तेः ॥ १५ ॥ भूर्लोकादीनामवधिप्रकारमाह । भूरादिलोकत्रयस्य सप्तद्वीपसमुद्रात्मकत्वात्, पादगम्यमिति सिद्धिः । चरणचारगोचरं गिरिशिखरादि यावत् तावत्सर्वोऽपि भूर्लोक इत्यर्थः । विस्तारोऽस्य मयोदितः सर्वलोकालोकावधिः पञ्चाशत्कोटिप्रमाणः ॥ १६ ॥ १७ ॥ नियुतानि

स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः ॥ १८ ॥
त्रैलोक्यमेतत् कृतकं मैत्रेय ! परिपठ्यते ।
जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् ॥ १९ ॥
कृतकाकृतयोर्मध्ये महर्लोक इति स्मृतः ।
शून्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति ॥ २० ॥
एते सप्त मया लोका मैत्रेय ! कथितास्तव ।
पातालानि च सप्तैव ब्रह्माण्डस्यैष विस्तरः ॥ २१ ॥
एतदण्डकटाहेन तिर्य्यक् चोर्द्ध्वमधस्तथा ।
कपित्थस्य यथा बीजं सर्वतो वै समावृतम् ॥ २२ ॥
दशोत्तरेण पयसा मैत्रेयाण्डञ्च तद्वृतम् ।
सर्वोऽम्बुपरिधानोऽसौ वह्निना वेष्टितो बहिः ॥ २३ ॥
वह्निश्च वायुना वायुर्मैत्रेय ! नभसा वृतः ।
भूतादिना नभः सोऽपि महता परिवेष्टितः ॥ २४ ॥
दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै ।
महान्तञ्च समावृत्य प्रधानं समवस्थितम् ॥ २५ ॥

चिन्तकैः ॥ १८ ॥ त्रैलोक्यं कृतकं प्रतिकल्पं नाश्यत्वात् । जनलोका-दित्रयमकृतकं प्रतिकल्पमनाश्यत्वात् ॥ १९ ॥ महर्लोकस्य कृतका-कृतकत्वं वेदयन्नाह, शून्य इति । जनैः शून्यः ॥ २० ॥ एतद्ब्रह्माण्ड-भुवनात्मकं जगत् अण्डकटाहेन समावृतं, तदेव च पृथिव्यावरणम् । स च कटाहः कोटियोजनविस्तारः । "सप्तद्वीपसमुद्रान्तं महीन्द्र-मण्डलमानतः । कोटियोजनमानस्तु कटाहः स प्रकीर्त्तितः" इति ब्रह्माण्डमेतत्सकलं ॥ २२ ॥ कटाहात् दशोत्तरेण दशगुणेन । सर्वस्य परिधानः पयोवेष्टितः ॥ २३ ॥ २४ ॥ दशोत्तराणि सप्तेति वर्त्तमानानन्तरोक्तम् । पृथिव्यावरणस्य दशोत्तरत्वाभावात् । "दशगुणपयो [illegible]"

अनन्तस्य न तस्यान्तः संख्यानञ्चापि विद्यते ।
तदनन्तमसंख्यातप्रमाणं व्यापि वै यतः ॥ २६ ॥
हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ।
अण्डानान्तु सहस्राणां सहस्राण्ययुतानि च ।
ईदृशानां तथा तत्र कोटिकोटिशतानि च ॥ २७ ॥
दारुण्यग्निर्यथा तैलं तिले तद्वत् पुमानपि ।
प्रधानेऽवस्थितो व्यापी चेतनात्मात्मवेदनः ॥ २८ ॥
प्रधानञ्च पुमांश्चैव सर्वभूतात्मभूतया ।
विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ ॥ २९ ॥
तयोः सैव पृथग्भावकारणं संश्रयस्य च ।
क्षोभकारणभूता च सर्गकाले महामते ॥ ३० ॥
यथा सक्तं जले वातो बिभर्ति कणिकाशतम् ।

इति पुष्करद्वीपः ॥ २५ ॥ अण्डमध्यमिदं प्रकृतम् । अण्डपालनमतीत्य परितोऽवस्थानि च पृथिव्यादीन्यावरणानि । प्रधानन्तु न तथेत्याह, अनन्तस्येति । अनन्तस्य तस्यान्तो नाशो नास्ति । संख्यानञ्च इयत्तया गणनं अनन्तत्वादेव नित्यम् असंख्यातप्रमाणत्वात् न विद्यते संख्यातं प्रमाणं यस्य तदसंख्यातं वै प्रसिद्धम् । परा शक्तिः इत्यादि श्रुतिप्रसिद्धेः ॥ २६ ॥ अत कार्यस्य समस्तस्य हेतुभूतम् । अण्डाद्बहिर्भावात् अनन्तत्वं स्पष्टयति, अण्डानामिति ॥ २७ ॥ ननु पुरुषाधिष्ठितमेव जगतो हेतुरित्याह, दार्वग्नीति । काष्ठे यथा तद्व्यापकतया वह्निरवस्थितः, तैले च तैलं यथा । आत्मवेदनः स्वप्रकाशः ॥ २८ ॥ तयोरपि परमेश्वराधिष्ठितत्वमाह, प्रधानञ्चेति द्वाभ्याम् । विष्णोः स्वरूपभूतया विष्णुशक्त्या वृतौ व्याप्तौ संश्रयधर्मिणौ नियम्यनियामकभावेन स्थितौ ॥ २९ ॥ सैव शक्त्यात्मना स्थिता सती तयोः प्रलयकाले पृथग्भावे कारणम् । स्थितिकाले संश्रयस्य च कारणम् । सर्गकाले क्षोभकारणभूता चेत्यर्थः ॥ ३० ॥ एवं प्रधानपुरुषद्वारा तत्-

जगच्छक्तिस्तथा विष्णोः प्रधानपुरुषात्मिका । ३१ ॥

यथा च पादपो मूलस्कन्धशाखादिसंयुतः ।

आदिबीजात् प्रभवति बीजान्यन्यानि वै ततः ॥ ३२ ॥

प्रभवन्ति ततस्तेभ्यः सम्भवन्त्यपरे द्रुमाः ।

तेऽपि तल्लक्षणद्रव्यकारणानुगता मुने ॥ ३३ ॥

एवमव्याकृतात् पूर्वं जायन्ते महदादयः ।

विशेषान्तास्ततस्तेभ्यः सम्भवन्त्यसुरादयः ॥ ३४ ॥

तेभ्यश्च पुत्रास्तेषाञ्च पुत्राणामपरे सुताः ।

बीजाद् वृक्षप्ररोहेण यथा नापचयस्तरोः ।

भूतानां भूतसर्गेण नैवास्त्यपचयस्तथा ॥ ३५ ॥

सन्निधानाद् यथाकाशकालाद्याः कारणं तरोः ।

कार्यभूतजगदाधारत्वेऽपि विष्णोर्निर्लेपत्वं दृष्टान्तेनाह, यथेति । अन्तःस्थित [illegible] परमाणुमात्रम् [illegible] यथा [illegible] वातो यथा [illegible] तथा प्रधानपुरुषात्मकं जगत् । तत्र स्थितत्वाद् [illegible] [illegible] परिकीर्तिता । पाठान्तरे तु [illegible] [illegible] यथा वातो [illegible] तथा [illegible] जगत् [illegible] [illegible] विष्णोः शक्तिर्विमर्शनीयेयं ॥ ३१ ॥ एतदेव दृष्टान्तेन प्रपञ्चयन् सर्वेषां कार्याणां मूलकारणानुगतत्वमाह, यथा चेति [illegible] । [illegible] बीजानि । ततः पादपात् प्रभवन्ति ॥ ३२ ॥ तेभ्यो बीजेभ्योऽन्ये द्रुमाः प्रभवन्ति, तद् बीजेभ्योऽपरे द्रुमाः तल्लक्षणं [illegible] तदेव कारणं तेनानुगता व्याप्ताः ॥ ३३ ॥ [illegible] पूर्वं [illegible] ॥ ३४ ॥ [illegible] देवादीनाम- [illegible] दृष्टान्तेनाह, बीजाद् वृक्षेति ॥ ३५ ॥ [illegible] [illegible] दृष्टान्तेनाह, [illegible] । उपादानत्वमपि [illegible]

तथैव परिणामेन विश्वस्य भगवान् हरिः ॥ ३६ ॥
व्रीहिबीजे यथा मूलं नालं पत्राङ्कुरौ तथा ।
काण्डं कोषस्तथा पुष्पं क्षीरं तद्वच्च तण्डुलाः ॥ ३७ ॥
तुषाः कणाश्च सन्तो वै यान्त्याविर्भावमात्मनः ।
प्ररोहहेतुसामग्रीमासाद्य मुनिसत्तम ! ॥ ३८ ॥
तथा कर्मस्वनेकेषु देवाद्याः समवस्थिताः ।
विष्णुशक्तिं समासाद्य प्ररोहमुपयान्ति वै ॥ ३९ ॥
स च विष्णुः परं ब्रह्म यतः सर्वमिदं जगत् ।
जगच्च यो यत्र चेदं यस्मिंश्च लयमेष्यति ॥ ४० ॥
तद् ब्रह्म तत् परं धाम सदसत् परमं पदम् ।
यस्य सर्वमभेदेन यतश्चैतच्चराचरम् ॥ ४१ ॥
स एव मूलप्रकृतिर्व्यक्तरूपी जगच्च सः ।

पर्जन्यद्वारेण न स्वरूपेणेति भावः ॥ ३६ ॥ [illegible] जायन्ते इत्यादिवाक्यात् न ग्रामवत्कार्यं वादयन्तुं दृष्टान्तेन वारयन्नाह, व्रीहीति त्रिभिः ॥ ३७ ॥ व्रीहिबीजे सन्त एव मूलनालादय आत्मनः स्वस्य प्ररोहहेतुसामग्रीम् अभिव्यञ्जकारणीभूतमृज्जलादिसामग्रीं प्राप्य आविर्भावं यान्ति । न पुनरत्यन्तमसन्त एव जायन्ते । "सदेव सोम्येदमग्र आसीत्" इत्यादिश्रुतेरित्यर्थः ॥ ३८ ॥ ननु सर्वकारणं ब्रह्मैव श्रुतिप्रसिद्धं न तु विष्णुरत आह, स चेति । स विष्णुः परं ब्रह्मैव सत् । कुत इत्यपेक्षायां विष्णोः सकाशाद् उद्भूतं तज्जगत् तस्य स्थितिविलयाविना [illegible] विष्णौ स्वरूपतन्त्वादयमिति, अतः पूर्वमिति ॥ ४० ॥ ब्रह्म च विष्णोरेव स्वरूपान्तरम्, तद् ब्रह्मेति । तद् प्रसिद्धं ब्रह्म तत्त्वं विष्णोः । परं धाम स्वरूपं यतः सदसतोः परमं पदं यत् यस्य अभेदेन सर्वमेतत् जगद् भाति तद् ब्रह्म । अतो विष्णुब्रह्मणोरभेदाद् ब्रह्मैव विष्णुः ॥ ४१ ॥ अतः स एव सर्वकारण-

तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति ॥ ४२ ॥
कर्त्ता क्रियाणां स च इज्यते क्रतुः
स एव तत्कर्मफलञ्च तस्य तत् ।
स्रुगादि यत् साधनमप्यशेषतो
हरेर्न किञ्चिद् व्यतिरिक्तमस्ति वै ॥ ४३ ॥

अष्टमोऽध्यायः ।

पराशर उवाच ।

व्याख्यातमेतद् ब्रह्माण्डसंस्थानं तव सुव्रत ।
ततः प्रमाणसंस्थानं सूर्य्यादीनां शृणुष्व मे ॥ १ ॥
योजनानां सहस्राणि भास्करस्य रथो नव ।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ॥ २ ॥
सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि वै ।
योजनानान्तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् ॥ ३ ॥

भिन्नं तत् किं तत्राह, स एवेति ॥ ४२ ॥ सर्वकर्मफलं तत्साधना-
दिकञ्च स एवेति दर्शयन् उक्तं सर्वात्मत्वं निगमयति, कर्त्तेति ॥४३॥

विवृतं विस्तारेणेदं ज्योतिश्चक्रं विवक्षुः । यथा तु ज्योतिश्चक्रम्
सह प्रमाणैर्वक्ष्यति ॥ १ ॥ ईषादण्डः अक्षयुगयोः सम्बन्धार्थो दण्डः ।
द्विगुणः अष्टादशयोजनसहस्रः ॥ २ ॥ सार्द्धकोटिरिति । मेरुमानसो-
त्तरयोर्मध्यान्तरं मानसोत्तरपर्यन्तं मानम् । "तस्याक्षो मेरुमूर्द्धनि
कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रचक्रवन्मे-
रुं मानसोत्तरे परिभ्रमति" इति श्रुत्युक्तेः ॥ ३ ॥ चक्रस्य पञ्चारत्वं

त्रिनाभिमति पञ्चारे षण्नेमिन्यक्षयात्मके ।
संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम् ॥ ४ ॥
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो विवस्वतः ।
पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य महामते ॥ ५ ॥
अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः ।
ह्रस्वोऽक्षस्तद्युगार्द्धेन ध्रुवाधारो रथस्य वै ।
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले ॥ ६ ॥

विवृणोति, त्रिनाभिमतीति । नाभिः ध्रुवः । यत्राक्षः प्रोतः स च त्रिनिम्नकः । अत्र तथात्र नाभित्वेनोपात्तत्वात् मेघनाभ्यादयस्त्रयो नाभयः पूर्वाह्नमध्याह्नापराह्नाख्यत्रयात्मके पञ्चारे पञ्च संवत्सरपरिवत्सरादय अराः शलाका यस्मिन् । षण्नेमिनि, षट् ऋतवो नेमयः प्रान्तवलयानि, तद्वति । कालात्मकत्वात् अक्षयात्मके संवत्सरमये संवत्सरविकारत्वात् संवत्सरस्य नेमित्वाच्च तन्मयत्वम् । तदुक्तं मात्स्ये । "चक्रस्त्रिनाभिमत्त्वस्य पञ्चचक्रस्य वै स्मृतम् । अराः संवत्सराः पञ्च नेम्यः षट् ऋतवः स्मृताः" इति । तत्र कालचक्रं कालोपमानभूतं कृत्स्नं ज्योतिश्चक्रं प्रतिष्ठितम् आश्रितम् । ध्रुवसंबन्धित्वात् कालचक्रपदबद्ध ॥४॥ अक्षप्रमाणमाह, चत्वारिंशदिति । सार्द्धपञ्चचत्वारिंशत्सहस्रयोजनप्रमाण इत्यर्थः ॥५॥ अक्षप्रमाणं युगेऽप्यतिदिशति, अक्षेति । ईषायां नियुक्तमवधीयमानायां दण्डो युगम् । अक्षस्य यत् प्रमाणं तदेव युगार्द्धयोः संहत्यप्रमाणम् । युगस्य प्रमाणमिति च वक्तव्ये युगार्द्धयो रथयुक्तम् । तत्राय भावः, यस्मिन् उभयतोऽश्वा बध्यन्ते तद् युगमीषाप्रयुक्तमध्यस्थानादुभयतः समं भवति । अत एवोक्तं गर्ग संहितायां न तूभयतः "अक्षेक्षुरगैर्युक्तो यच्चक्रं ततः स्थितः" इति मैत्रेयोक्तेः । अतोऽक्षयुक्ते भागे युगस्य दैर्घ्यम् अन्यतो न्यूनत्वमिति तत्रापि प्रादेशमात्रं युगार्द्धयोः उभयोः संहत्य तत्प्रमाणमभ्युक्तम् । युक्ताक्षयुगयोरेकप्रमाणत्वमिति । युक्ताक्षयोपयोगं दर्शयन्,

हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिक् जगती त्रिष्टुबेव च ।
अनुष्टुप् पङ्क्तिरित्युक्ताश्छन्दांसि हरयो रवेः ॥ ७ ॥
मानसोत्तरशैले तु पूर्वतो वासवी पुरी ।

ध्रुवोऽस्य इति । सार्द्धसप्तचत्वारिंशल्लक्षयोजनो ध्रुवोऽस्य रथस्य युगार्द्धेन सह वायुरश्मिनिबद्धो ध्रुवाधारोऽस्ति । तथा चोक्तः "तस्मिन् रथे ततस्तो द्वितीयोऽक्षस्तस्यान्तःस्थ ध्रुवे तदोपरिभागः" इति । मातृके चोक्तम्, "युगाक्षकोटिस्थौ तस्य दक्षिणे स्यन्दनस्य तु । ध्रुवेण च संगृहीतौ तौ रश्मी यौ भ्रमतो रविम् ।" इति निरन्तरोक्तध्रुवसम्बन्धापेक्षया 'दक्षिणे तु मण्डले' तथा चात्र रश्मिकल्पना । भूतलाद् योजनलक्षे सूर्यः, पञ्चदशलक्षे ध्रुवः, चतुरशीतियोजनसहस्रोच्छ्रायो मेरुः, अयुतयोजनोच्छ्रायो मानसोत्तरश्च । तदूर्ध्वं तु लक्षोच्छ्राये मेरोश्चोपरि चतुर्दशयोजनसहस्रोच्छ्रये वायुचक्रे सार्द्धसप्तचत्वारिंशल्लक्षकोटिपरिमितो रविरथस्याक्षो मानसोत्तरपर्यन्तं तत्र चक्रस्थितश्च विततोऽस्ति । तस्मिन्नेव चक्रप्रान्ते निबद्धमूलो ध्रुवोऽक्षो वायुरश्मियुक्तो ध्रुवाधारोऽस्ति। युगस्य दक्षिणार्द्धं वायुरश्मिनिबद्धं ध्रुवाधारं तथैवास्ति । प्रवहादिवायुस्थानं राशिचक्रात्मकं ज्योतिश्चक्रं प्रत्यहं मेरुं प्रदक्षिणीकुर्वत् परिभ्रमति । तद्वेगवशात् सूर्यः प्रत्यहं मेरुं प्रदक्षिणीकुर्वन्नपि स्वगत्या राशिचक्रमपि किञ्चित् किञ्चित् प्रचलति । तत्र दक्षिणायनादिषु ध्रुवसंगृहीतवायुपाशप्रसारणाकर्षणाभ्यां रश्मिविकर्षणाद् बाह्याभ्यन्तराणि चतुरशीतिशतमण्डलानि भवन्ति एवं चन्द्रादीनामपि ज्योतिश्चक्रवशात् प्रत्यहं मेरुं प्रदक्षिणीकुर्वतामपि स्वगत्याभिमुखो गतिर्वा नित्यमेव, पृथिव्यां तेषामुदयास्तादिदर्शनात् । एतच्च तत्र तत्र व्याख्याने स्फुटीभविष्यति ॥६॥ तत्र हयानाह सूर्यस्य गायत्र्यादिच्छन्दोऽधिष्ठातृदेवाः हयाश्च, हयाश्चेति । पङ्क्तिरित्येतानि छन्दांसि हरयो हया रवेः इत्यन्वयः ॥ ७ ॥ मेरोश्चतुर्दिक्षुवा-

दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य च ।
उत्तरेण च सोमस्य तासां नामानि मे शृणु ॥ ८ ॥
वस्वौकसारा शक्रस्य याम्या संयमनी तथा ।
पुरी सुखा जलेशस्य सोमस्य च विभावरी ॥ ९ ॥
काष्ठां गतो दक्षिणतः क्षिप्तेषुरिव सर्पति ।
मैत्रेय ! भगवान् भानुर्ज्योतिषां चक्रसंयुतः ॥ १० ॥
अहोरात्रव्यवस्थानकारणं भगवान् रविः ।
देवयानः परः पन्था योगिनां क्लेशसंक्षये ॥ ११ ॥
दिवसस्य रविर्मध्ये सर्वकालं व्यवस्थितः ।

समयान्तराण्यपि प्रकारान्तरेणाह, मानसेति । पूर्वत इत्यादि भारतवर्षस्थानामपेक्षयोक्तम् । पूर्वादिविभागस्य सूर्योदयाद्यपेक्षत्वेन नानियमस्य वक्ष्यमाणत्वात् । याम्या यमस्य पुरी ॥ ८ ॥ ९ ॥ तत्र तावदैन्द्रीमारभ्य क्रमात् सूर्यस्य उदयास्तमनादिकं वक्ष्यन् उत्तरायणान्ते दक्षिण-सूत्तरां दिशं गतस्य दक्षिणतः परावर्तनमाह, काष्ठामिति । दक्षिणतो या काष्ठा तां गतः दक्षिणायनं प्रविष्टः सन् क्षिप्त इषुरिव तथा शीघ्रं गच्छति ॥ १० ॥ ततश्चेन्द्रादिषु तासु पुरीषु सञ्चरन् अहोरात्रव्यवस्थानकारणं रविर्भवति । क्लेशानां रागादीनां सङ्क्षये सति योगिनां क्रमेण मुमुक्षूणां देवयानः परः पन्थाः, अपुनरावृत्तिलक्षणः पन्थाश्च स एव भवति "सूर्यद्वारेण ते विरजाः प्रयान्ति च यातादृक्षेत्रम् अमृतावह दिव गच्छन्ति" इत्यादिश्रुतेः ॥ ११ ॥ येन प्रकारेण अहोरात्रा-दिव्यवस्थाकारणं रविस्तदाह, दिवसस्येति पञ्चभिः । यस्मिन् द्वीपे भारतवर्षे मध्याह्ने वर्त्तमानोऽपि अन्यत्र तीव्रस्फुटप्रकाशेन दृश्यमानः वर्तते, तथा सर्वकालम् उदयास्तमयादिष्वपि सर्वद्वीपेष्वपि नीचै-र्भूमण्डलस्य सङ्कोचात्वादीनाम् दूरत्वादर्शनमात्रत्वात् । तथाच वायु: "विदूरभावादर्कस्य भोऽग्नस्य विरश्मिता । रक्तता च विरश्मित्वाद् रक्तत्वाच्चाप्यनुष्णता" इति । यथा यस्मिन् द्वीपवर्षादौ मध्याह्ने वर्त्तते

सर्वद्वीपेषु मैत्रेय निशार्द्धस्य च सम्मुखः ॥ १२ ॥

उदयास्तमने चैव सर्वकालन्तु सम्मुखे ।

विदिशासु त्वशेषासु तथा ब्रह्मन् दिशासु च ॥ १३ ॥

यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ।

तिरोभावञ्च यत्रैति तत्रैवास्तमनं रवेः ॥ १४ ॥

नैवास्तमनमर्कस्य नोदयः सर्वदा सतः ।

उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥ १५ ॥

तदा तदुद्गमानद्वीपस्य द्वीपान्तरादिषु भ्रमतः निशार्द्धस्य अर्द्धरात्रस्य सम्मुखो भवति ॥ १२ ॥ उदयास्तमने सर्वकालं भवतः । ते च परस्परं सम्मुखे रवेः समानसूत्रस्थे भवतः ॥ १३ ॥ तत्र हेतुमाह यैर्यत्रेति । वस्तुतस्तु उदयास्तमयौ सर्वदा मध्याह्न एव सतोऽर्कस्य नाप्त एव ॥ १४॥ अतो रवेरुदयास्तमनाख्यं दर्शनं दर्शनमात्रमेव ॥ १५ ॥ दर्शनादर्शनयोरवधिमाह शक्रादीनामिति । इन्द्रादिपुरस्थस्य पुरे मध्याह्ने तिष्ठन् तदैकं पुरम् अभितः पुरद्वयं पुरत्रयं तदन्तरालस्थौ द्वौ च विकर्णौ कोणौ उदयाद्यवस्थाभिः स्पृशति स्वरश्मिभिर्भासयति । तथा विकर्णस्थः अग्न्यादिपुरस्थस्य कोणे मध्याह्ने स्थितस्तत्कोणमभितः स्थितं कोणद्वयमन्त्यं त्रीन् कोणान् तन्मध्यवर्त्तिनी द्वे च पुरे तदैवोदयाद्यवस्थाभिः स्पृशति । भवत्रयस्थाने यतपन् दृश्यते तावद्दाह । अर्द्धं तु न दृश्यते तावती रात्रिरित्यर्थः । तथाहि ऐन्द्रे पुरे मध्याह्ने यदा तिष्ठति, तदा सौम्यपुरस्थानामस्तमयः, ईशानकोणस्थानां तृतीयो यामः । अग्निकोणस्थानां प्रथमो यामः । याम्यस्थानामुदयः । एवं यदा याम्ये मध्याह्ने तिष्ठति तदा ऐन्द्रेऽस्तमयः आग्नेयकोणे तृतीयो यामः, नैर्ऋतकोणे प्रथमो यामः, वारुणे उदयः, यदा च वारुणे मध्याह्नस्तदा याम्येऽस्तमयः, नैर्ऋतकोणे तृतीयो यामः, वायव्ये प्रथमः सौम्ये उदयः । यदा च सौम्ये मध्याह्नस्तदा वारुणेऽस्तमय, वायव्ये तृतीयो यामः, ईशकोणे प्रथमो यामः, ऐन्द्रे उदयः । एव-

शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ।
विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा ॥ १६ ॥
उदितो वर्धमानाभिरामध्याह्नात् तपन् रविः ।
ततः परं ह्रसन्तीभिर्गोभिरस्तं नियच्छति ॥ १७ ॥
उदयास्तमनाभ्याञ्च स्मृते पूर्वापरे दिशौ ।
यावत् पुरस्तात् तपति तावत् पृष्ठे च पार्श्वयोः ॥ १८ ॥
ऋतेऽमरगिरेर्मेरोरुपरि ब्रह्मणः सभाम् ।
ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभाम् ।
ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै ॥ १९ ॥

अग्निकोणे यदा मध्याह्नः [illegible] ईशानकोणे चास्तमयः, इन्द्रपुरे तृतीयो यामः, यमपुरे प्रथमः, निऋतिकोणे उदय इत्यादि [illegible] । एवं मेरोः सर्वतः परिभ्रमन् सूर्योऽर्द्धं [illegible] दिशं दिशं [illegible] पेक्षया [illegible] भवति ॥ १६ ॥ [illegible] क्रमेण रश्मीनां [illegible] भवतीति । गोभिः रश्मिभिः ॥ १७ ॥ [illegible] उदयास्तमयनियम-सम्बन्धाच्च, [illegible] यत्र यस्योदेति, सा तस्य प्राची दिक् । यत्रास्तमेति, सा परा प्रतीची । तदुक्तं श्रुतौ "तस्मादिमा दैवीः [illegible] प्रजाः प्रत्यङ्गुर्वेति । तस्मात् [illegible]" इति पुरस्तादुद्यन् सूर्यः पश्चात् च दक्षिणोत्तरपार्श्वभागौ दक्षिणोत्तरदिशाविति यावत् रश्मिभिः प्रकाशयतीत्याह, [illegible] तपतीत्यर्थः ॥ १८ ॥ मेरौ तु [illegible] इति । ब्रह्मसभायां मेरोरुपर्यपि वर्तमानापि न तु ब्रह्मसभां भासयति । तत्र हेतुमाह, ये ये मरीचय इति ॥ १९ ॥ मेरोः

तस्माद् दिश्युत्तरस्यां वै दिवारात्रिः सदैव हि ।
सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः ॥ २० ॥
प्रभा विवस्वतो रात्रावस्तं गच्छति भास्करे ।
विशत्यग्निमतो रात्रौ वह्निर्दूरात् प्रकाशते ॥ २१ ॥
वह्निपादस्तथा भानुं दिनेष्वाविशति द्विज ।
अतीव वह्निसंयोगादतः सूर्यः प्रकाशते ॥ २२ ॥
तेजसी भास्कराग्नेये प्रकाशोष्णस्वरूपिणी ।
परस्परानुप्रवेशादाप्यायेते दिवानिशम् ॥ २३ ॥

सर्वतोऽपि विशेषान्तरमाह, तस्मादिति । यतो यस्मात् सर्वेषां द्वीपानां वर्षाणां च मेरुरुत्तरत एव स्थितः । तस्मात् मेरोरुत्तरस्यां दिशि सदा दिवस । अन्येषां दिनेऽपि नित्यं रात्रिरेवेत्यर्थ भाव । सव प्रदक्षिणावर्तिनं सूर्यं ये यत्र पश्यन्ति, सा च तेषां प्राची, तस्मात् वामभाग एव मेरुः । अतः सर्वेषां सर्वदा मेरुरुत्तर एव । दक्षिणभागे च लोकालोकाचलः । तस्मादुत्तरस्यां दिशि सदा रात्रिः । दक्षिणस्यां सदा दिनमिति । यदा भारतादिवर्षस्थाना मनुष्ये सूर्यं पश्यन्ति पश्य-न्ति उत्तरस्यां दिशि वामभागे मेरोरुत्तर सदा दिनम्, अन्यत्र सदा रात्रि । दक्षिणभागे तु सदा दिनमित्येतदपि उक्तं भवति ॥ २० ॥
सूर्यस्यास्तमयोदयवर्णनप्रसङ्गात् तदुक्तमानुषङ्गिकमेतं मिथः प्रभा-दिप्रवेशाद्वह्निसूर्ययोः परस्परानुप्रवेशमुपपादनार्थमाह, प्रभेति द्वाभ्याम् २१ ॥ वह्नेः पादश्चतुर्थांशो दिनेषु भानुं विशति । अतएवाग्ने-र्दिवसात् भानोरिवाग्नेरप्यौष्ण्यं दाहकत्वमविकलम् । तथा च "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेत्यग्नये सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः" इत्येतद् विधिवेदे श्रूयते । "अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं ददृशे । उद्यन्तं वावादित्यम-ग्निरनुसमारोहति तस्माद् धूम एवाग्नेर्दिवा ददृशे" इति ॥२२॥ ॥२३॥

दक्षिणोत्तरभूम्यर्द्धे समुत्तिष्ठति भास्करे ।
अहोरात्रं विशत्यम्भस्तमःप्राकाश्यशीलवत् ॥ २४ ॥
आताम्रा हि भवन्त्यापो दिवानक्तप्रवेशनात् ।
दिनं विशति चैवाम्भो भास्करेऽस्तमुपेयुषि ।
तस्माच्छुक्लीभवन्त्यापो नक्तमह्नः प्रवेशनात् ॥ २५ ॥
एवं पुष्करमध्ये तु यदा याति दिवाकरः ।

अहोरात्रप्रसङ्गात् तयोरप्सु प्रवेशमुपासनार्थमाह, दक्षिणेति । मेरोर्दक्षिणभूम्यर्द्धे भास्करे समुत्तिष्ठति सति । दिने तमःशीला रात्रिः अम्भः प्रविशति, मेरोरुत्तरभूम्यर्द्धे च भास्करे तिष्ठति रात्रौ प्राकाश्यशीलम् अहः अम्भो विशतीत्यर्थः । प्राकाश्यं प्रकाशकत्वम् ॥ २४ ॥ एतदेवोपपादयति, आताम्रा इति सार्द्धेन । आ ईषत् ताम्राः दिवा दिने । नक्तप्रवेशनात् रात्रेः प्रवेशादित्यर्थः । अस्तमुपेयुषि अस्तं गते सति । नक्तं रात्रौ । तथा च श्रुतिः "यद्वै दिवा भवत्यपो रात्रिः प्रविशति तस्मात् ताम्रा आपो दिवा ददृशे, यन्नक्तं भवत्यपोऽहः प्रविशति तस्मात् शुक्ला आपो नक्तं ददृशे" इति ॥ २५ ॥ एवं मेरुं प्रदक्षिणीकुर्वतो रवेस्त्रिंशत्तमं भागं गच्छतः ... कालेनाहोरात्राणां दैर्घ्यं ह्रस्वत्वं च निरूपयति, एवमित्यादिना । एवं रात्रिरित्यतः प्राक्तनेन ग्रन्थेन । पुष्करद्वीपमध्ये ... मानसोत्तरपरिमण्डलीभूतायाः मेरुप्रदक्षिणभ्रमणे भागं रविर्यदा याति तदा मुहूर्तमात्रेण गतिः । तदाह वायुः "नव कोट्यः प्रसंख्याता योजनैः परिमण्डलम् । तथा शतसहस्राणि चत्वारिंशच्च पञ्च च । अहोरात्रात् पतङ्गस्य गतिरेषा विधीयते ।" चत्वारिंशत् पञ्च चेति चत्वारिंशत् सहस्राणि पञ्चाधिकानि । अन्यथा परिमण्डलापूर्तेः । किञ्च "पूर्वाः शतसहस्राणाम् एकत्रिंशत्तु ताः स्मृताः । पञ्चाशच्च तथान्यानि सहस्राण्यधिकानि च । मौहूर्तिकी गतिर्ह्येषा सूर्यस्य

त्रिंशद्भागान्तु मेदिन्यास्तदा मौहूर्त्तिकी गतिः ॥ २६ ॥
कुलालचक्रपर्य्यन्तो भ्रमन्नेष दिवाकरः ।
करोत्यहस्तथा रात्रिं विमुञ्चन्मेदिनीं द्विज ! ॥ २७ ॥
अयनस्योत्तरस्यादौ मकरं याति भास्करः ।
ततः कुम्भञ्च मीनञ्च राशे राश्यन्तरं द्विज ! ॥ २८ ॥
त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् ।
प्रयाति सविता कुर्वन् अहोरात्रं ततः समम् ।
ततो रात्रिः क्षयं याति वर्द्धतेऽनुदिनं दिनम् ॥ २९ ॥
ततश्च मिथुनस्यान्ते परां काष्ठामुपागतः ।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम् ॥ ३० ॥
कुलालचक्रपर्य्यन्तो यथा शीघ्रं प्रवर्त्तते ।
दक्षिणे प्रक्रमे सूर्य्यस्तथा शीघ्रं प्रवर्त्तते ॥ ३१ ॥
अतिवेगितया कालं वायुवेगबलाच्चरन् ।
तस्मात् प्रकृष्टां भूमिन्तु कालेनाल्पेन गच्छति ॥ ३२ ॥

त्वभिधीयते ।" इति । अधिकानि चेति विंशतिप्रश्नात्योरिति शेषः ॥ २६ ॥ अन्तोः कुलालचक्रसंवृत्तत्वात् कुलालचक्रपर्य्यन्ते स्थितो भ्रमन्नुवर्त्तमानः । तद्वत् दक्षिणायनारम्भे ज्योतिश्चक्रावसाने भ्रमंश्च केव-लमल्पेन मेदिन्याः स्वल्पभागं विमुञ्चन् क्रम उत्तरायणमारभ्याल्प-रात्रिषु पूर्वैर्वर्णितेन करोति ॥ २७ ॥ तदेव प्रत्यक्षमत्र द्वा-दशिकत्वेन च वर्णयन्नाह, अयनस्येति सार्द्धाभ्याम् ॥ २८ ॥ उत्तरायण-मध्य एव मेषराशिं विषुवत्समयं वैषुवतीं गतिं ततो विषुवदनन्तरम् ॥ २९ ॥ दक्षिणायने तु अल्पो मुहूर्तं रात्रेश्च वृद्धिं दर्शयितुमाह, तत इति सार्द्धेन । परां काष्ठाम् उत्तरावधिकाष्ठाम् ॥ ३० ॥ कुलालचक्र-मध्ये स्थितो मन्दमनुवर्त्तमानः ॥ ३१ ॥ कालं कालोपलक्षितं मार्गम्

सूर्यो द्वादशभिः शैघ्र्यान् मुहूर्त्तैर्दक्षिणायने ।
त्रयोदशार्द्धमृक्षाणामह्ना तु चरति द्विज ॥
मुहूर्त्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन् ॥ ३३ ॥
कुलालचक्रमध्यस्थो यथा मन्दं प्रसर्पति ।
तथोदगयने सूर्यः सर्पते मन्दविक्रमः ॥ ३४ ॥
तस्माद्दीर्घेण कालेन भूमिमल्पान्तु गच्छति ।
अष्टादशमुहूर्त्तं यदुत्तरायणपश्चिमम् ।
अहर्भवति तच्चापि चरते मन्दविक्रमः ॥ ३५ ॥
त्रयोदशार्द्धमह्ना तु ऋक्षाणां चरते रविः ।
मुहूर्त्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् ॥ ३६ ॥
यथा मन्दतर नाभ्या चक्र भ्रमति वै यथा ।
मृत्पिण्ड इव मध्यस्थो ध्रुवो भ्रमति वै तथा ॥ ३७ ॥
कुलालचक्रनाभिस्तु यथा तत्रैव वर्त्तते ।
ध्रुवस्तथा हि मैत्रेय तत्रैव परिवर्त्तते ॥ ३८ ॥

॥ ३३ ॥ [illegible] त्रयोदशनक्षत्राण्यर्द्ध [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ ३३ ॥ उत्तरायणे [illegible] कुलालचक्रमध्यस्थ इति [illegible] ॥ ३४ ॥ उत्तरायणे पश्चिममन्त्यदिनम् ॥ ३५।३६ ॥ ध्रुवस्तु तथा [illegible] यथा इति [illegible] । कुलाल-चक्रं नाभ्यां मन्दतरं यथा भ्रमति तत्रस्थमृत्पिण्डोऽपि तथा मन्दतरमेव भ्रमति तथा ज्योतिश्चक्रनाभिस्थो ध्रुवः ॥ ३७ ॥ यथा च नाभिस्तत्रैव परिवर्त्तते [illegible] । तत्रैव ध्रुवः परिभ्रमन्नपि [illegible] ॥ ३८ ॥ [illegible]

उभयोः काष्ठयोर्मध्ये भ्रमतो मण्डलानि तु ।
दिवा नक्तञ्च सूर्य्यस्य मन्दा शीघ्रा च वै गतिः ॥ ३९ ॥
मन्दाह्नि यस्मिन्नयने शीघ्रा नक्तं तदा गतिः ।
शीघ्रा निशि यदा चास्य तदा मन्दा दिवा गतिः ॥ ४० ॥
एकप्रमाणमेवैष मार्गं याति दिवाकरः ।
अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज ॥ ४१ ॥
षडेव राशयो भुङ्क्ते रात्रावन्यांश्च षड् दिवा ।
राशिप्रमाणजनिता दीर्घह्रस्वात्मता दिने ।
तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता ॥ ४२ ॥
दिनादेर्दीर्घह्रस्वत्वं तद्भोगेनैव जायते ।
उत्तरे प्रक्रमे शीघ्रा निशि मन्दा गतिर्दिवा ।
दक्षिणे त्वयने चैव विपरीता विवस्वतः ॥ ४३ ॥

[illegible]वैचित्र्यमुक्तम् । इदानीं तदेव राशिभोगवशात् प्रपञ्चयन्नाह, उभयोरिति षड्भिः ॥ ३९ ॥ अहोरात्रगम्यमार्गस्य समानत्वेऽपि राशिप्रमाणभेदात् तद्वैचित्र्यं घटत इत्याह, एकप्रमाणमेवेति । राशयः राशीनित्यर्थः ॥ ४१ ॥ ४२ ॥ राशिप्रमाणभेदादहोरात्रवैचित्र्यं स्पष्टमाह, दिनादेरिति । तद्भोगेनैव राशिभोगेनैव ज्योतिःशास्त्र[illegible] यः [illegible] एकैको राशिः । तत्र च प्रथमौ मीनमेषौ ह्रस्वौ । वृषकुम्भौ ततः किञ्चिद्दीर्घौ । मकरमिथुने ततः किञ्चित् दीर्घे । सिंहवृश्चिकौ दीर्घतरौ । कर्कटचापे दीर्घतमे । एवं कन्या तुले । तथाचोक्तं [illegible] एकैको राशिः । तदा च राशिप्रमाणभेदेन दिनरात्रिवृद्धिह्रासौ [illegible] पुराण[illegible] चानुसन्धेयमिति ॥ ४० ॥ मन्दाह्नि यस्मिन्नयन इत्यनेनोक्तं गतिवैचित्र्यं विशेषतो दर्शयति, उत्तर इति ॥ ४३ ॥ अहोरात्र-

उषा रात्रिः समाख्याता व्युष्टिश्चाप्युच्यते दिनम् ।
प्रोच्यते च तथा सन्ध्या उषाव्युष्ट्योर्यदन्तरम् ॥ ४४ ॥
सन्ध्याकाले तु संप्राप्ते रौद्रे परमदारुणे ।
मन्देहा राक्षसा घोराः सूर्य्यमिच्छन्ति खादितुम् ॥ ४५ ॥
प्रजापतिकृतः शापस्तेषां मैत्रेय ! रक्षसाम् ।
अक्षयत्वं शरीराणां मरणञ्च दिने दिने ॥ ४६ ॥
ततः सूर्य्यस्य तैर्युद्धं भवत्यत्यन्तदारुणम् ।
ततो द्विजोत्तमास्तोयं यत् क्षिपन्ति महामुने ! ॥ ४७ ॥
ओङ्कारब्रह्मसंयुक्तं गायत्र्या चाभिमन्त्रितम् ।
तेन दह्यन्ति ते पापा वज्रभूतेन वारिणा ॥ ४८ ॥
अग्निहोत्रे हूयते या समन्त्रा प्रथमाहुतिः ।
सूर्य्यो ज्योतिःसहस्रांशुस्तया दीप्यति भास्करः ॥ ४९ ॥
ओङ्कारो भगवान् विष्णुस्त्रिधामा वचसां पतिः ।

प्रसङ्गात् तयोः सन्धौ कार्य्यं सन्ध्योपास्त्यादिकं वक्तुमाह, उषा रात्रि-रित्यादिना । पाश्चात्त्येन ग्रन्थेन । अत्र श्रुतिप्रयुक्तौ उषाव्युष्टिशब्दौ प्रस्तुतरात्रिदिनपरावित्याह, उषा इति । "रात्रिर्वा उषा अहर्व्युष्टिः" इति श्रुतेः ॥ ४४ ॥ तत्र सन्ध्योपास्तिमकुर्वतः । पूर्वकृतात् दोषः स्यादिति विवक्षयैवं सन्ध्योपास्तिप्रकारमाह, सन्ध्याकाले त्विति चतुर्भिः ॥ ४५ ॥ प्रजापतिदत्तो वरोऽपि दुःखफलत्वात् शाप उच्यते । तथा च श्रुतिः, "रक्षांसि ह वा पुरोऽनुवाके तपोग्रमतिष्ठन्त, तान् प्रजापतिर्वरेणोपामन्त्रयत तानि वरं वृणीतादित्यो नो योद्धा इति तान् प्रजापतिरब्रवीद् योधयध्वम्" इत्यादि ॥ ४६ ॥ ४७ ॥ दह्यन्ति दह्यन्ते । द्विजैः प्रक्षिप्तेन वारिणा ॥ ४८ ॥ [illegible] होमाद्युपक्रम [illegible] इति । सूर्यो ज्योतिरिति प्रातरग्नि-होत्रमन्त्रमतीयो [illegible] त्रिधामा त्रीणि ऋग्यजुःसामरूपा च

तदुच्चारणतस्ते तु विनाशं यान्ति राक्षसाः ॥ ५० ॥
वैष्णवोऽंशः परः सूर्य्यो योऽन्तर्ज्योतिरसंप्लवम् ।
अभिधायक ओंकारस्तस्य तत् प्रेरकः परः ॥ ५१ ॥
तेन सम्प्रेरितं ज्योतिरोङ्कारेणाथ दीप्तिमत् ।
दहत्यशेषरक्षांसि मन्देहाख्यानि तानि वै ॥ ५२ ॥
तस्मान्नोल्लङ्घनं कार्य्यं सन्ध्योपासनकर्म्मणः ।
स हन्ति सूर्य्यं सन्ध्यायां नोपास्तिं कुरुते तु यः ॥ ५३ ॥
ततः प्रयाति भगवान् ब्राह्मणैरभिरक्षितः ।
बालखिल्यादिभिश्चैव जगतः पालनोद्यतः ॥ ५४ ॥
काष्ठा निमेषा दश पञ्च चैव त्रिंशच्च काष्ठा गणयेत् कलाञ्च ।
त्रिंशत् कलाश्चैव भवेन्मुहूर्त्तस्तैस्त्रिंशता रात्र्यहनी समेते ॥ ५५ ॥
ह्रासवृद्धी त्वहर्भागैर्दिवसानां यथाक्रमम् ।
सन्ध्या मुहूर्त्तमात्रा वै ह्रासवृद्धौ समा स्मृता ॥ ५६ ॥
लेखात् प्रभृत्यथादित्ये त्रिमुहूर्त्तगते तु वै ।

त्रयाणि तेजांसि ऋक्सामयजूंषि त्रयी सा सर्वं यः स एव वषट्कर्ता जगतां पतिः । तथा च श्रुतिः, "एषा त्रय्येव विद्या तपति य एष आदित्यो ऽन्तरमण्डले पुरुषः" इति ॥ ५० ॥ ओङ्कारोच्चारणाद् राक्षसानां नाशे हेतुमाह, वैष्णवोऽंश इति द्वाभ्याम् । असंप्लवं निर्विकारम् । तत्प्रेरकस्तस्य ज्योतिषो रक्षोवधे प्रवर्त्तकः । तत्प्रेरकमिति पाठे च ओङ्कारप्रेरको यस्तदन्तर्ज्योतिषः तत्तत्प्रेरकम् ॥ ५१ ॥ तेन प्रेरिता अपांसीति पाठे पापात्मकानीत्यर्थः । रक्षो वधे उपकारित्वात् ॥ ५२ ॥ ५३ ॥ अथ कालकलनापूर्वकं सन्ध्याकालनिर्वचनाय, काष्ठेति द्वाभ्याम् ॥ ५५ ॥ अहर्भागैः प्रातरादिभिः सह दिवसानां ह्रासे वृद्धौ च तत्तन्मानानामपि ह्रासवृद्ध्यावश्यकत्वात् । सन्ध्या तु मुहूर्त्तमात्रा सूर्योदयात् पूर्वं प्रातःसन्ध्या नाडीद्वयमात्रा । सूर्यास्तमयानन्तरं सायंसन्ध्या नाडीद्वयरूपैवेत्यर्थः ॥ ५६ ॥ प्रातरादिभागानां विभागो पञ्च तेषु

प्रातः स्मृतस्ततः कालो भागश्चाह्नः स पञ्चमः ॥ ५७ ॥
ततः प्रातस्तनात् कालात् त्रिमुहूर्त्तस्तु सङ्गवः ।
मध्याह्नस्त्रिमुहूर्त्तस्तु तस्मात् कालात् तु सङ्गवात् ॥ ५८ ॥
तस्मान्माध्याह्निकात् कालादपराह्ण इति स्मृतः ।
त्रय एव मुहूर्त्तास्तु कालभागः स्मृतो बुधैः ।
अपराह्णे व्यतीते तु कालः सायाह्न एव च ॥ ५९ ॥
दशपञ्चमुहूर्त्ताहे मुहूर्त्तास्त्रय एव च ।
दशपञ्चमुहूर्त्तं वै अहर्वैषुवतं स्मृतम् ॥ ६० ॥
वर्धतेऽह्नो ह्रसेच्चैवाप्ययने दक्षिणोत्तरे ।
अहस्तु ग्रसते रात्रिं रात्रिर्ग्रसति वासरम् ॥ ६१ ॥
शरद्वसन्तयोर्मध्ये विषुवन्तु विभाव्यते ।
तुलामेषगते भानौ समरात्रिदिनन्तु तत् ॥ ६२ ॥
कर्कटावस्थिते भानौ दक्षिणायनमुच्यते ।
उत्तरायणमप्युक्तं मकरस्थे दिवाकरे ॥ ६३ ॥

[illegible] । [illegible] शिखा तामारभ्य प्रत्येकं त्रिमुहूर्त्तमेव प्रातरादिरेव कालः । तथा च स्मृतिः, "मुहूर्त्तत्रितयं प्रातस्तावानेव तु सङ्गवः । मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः । सायाह्नस्त्रिमुहूर्त्तश्च सर्व्वकर्म्मसु गर्हितः" इति ॥ ५७ ॥ ५८ ॥ एते च मुहूर्त्ताः पञ्चभागाः दशपञ्चमुहूर्त्ताहे त्रिसन्ध्यादिभेदेऽपि भवन्ति । अन्यदा तु मुहूर्त्तास्त्रय एव हि क्रमेण वर्द्धमाना भवन्तीति शेषः ॥ ६० ॥ एतत् स्पष्टयति, दशपञ्चमुहूर्त्तमिति सार्द्धैः श्लोकैः ॥ ६१ ॥ शरद्वसन्तयोर्मध्य इति । आश्विन-कार्त्तिकौ शरत् । तयोर्मध्ये तुलासंक्रमणं भवति । चैत्रवैशाखौ वसन्तः । तयोर्मध्ये मेषसंक्रमणम् ॥ ६२ ॥ ६३ ॥ अथ सूर्यगति-

त्रिंशन्मुहूर्तं कथितमहोरात्रन्तु यन्मया ।
तानि पञ्चदश ब्रह्मन् ! पक्ष इत्यभिधीयते ॥ ६४ ॥
मासः पक्षद्वयेनोक्तो द्वौ मासौ चार्कजावृतुः ।
ऋतुत्रयञ्चाप्ययनं द्वेऽयने वर्षसंज्ञितम् ॥ ६५ ॥
संवत्सरादयः पञ्च चतुर्मासविकल्पिताः ।
निश्चयः सर्वकालस्य युगमित्यभिधीयते ॥ ६६ ॥
संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इद्वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ।
वत्सरः पञ्चमश्चात्र कालोऽयं युगसंज्ञितः ॥ ६७ ॥
यः श्वेतस्योत्तरः शैलः शृङ्गवानिति विश्रुतः ।

प्रसङ्गात् तत्रत्य संवत्सरादिलक्षणं चाह, त्रिंशदिति सार्द्धैश्चतुर्भिः । सौरमासैः सावनचान्द्रनाक्षत्रैर्वा ऋतुरयनवर्षादयश्च एव दिनादयो वक्ष्यन्ते, सर्वमन्यच्च ज्योतिषशास्त्रादभिधानात् ॥ ६४ ॥ ६५ ॥ चतुर्मासविकल्पिता इति । "दर्शादर्शश्चान्द्रः त्रिंशद्दिवसस्तु सावनो मासः । सौरोऽर्कराशिभिः नाक्षत्रेन्दुभचक्रतः ॥" इत्येवंविधचान्द्रसावनसौरनाक्षत्रचतुर्विधैर्मासैर्विकल्पनया कल्पिताः पञ्च वत्सरादयः एव युगम् । "सावनाख्यानि सौरञ्च चान्द्रं नाक्षत्रमेव च । चत्वार्येतानि मानानि यैर्युगं प्रविभज्यते ॥" इति ज्योतिर्विदः । सर्वेषामपि मलमासादिनिर्णय निश्चयहेतुः । तथा हि । यदा शुक्ले प्रतिपद्यभिषिच्य-मुखे चन्द्रश्च एक स्थितौ कुम्भराशिमभ्येति, तदा चतुर्विधा मासा युगपत् प्रवर्त्तन्ते । तथा च सौरमासे गतवर्षे षट् दिनानि वर्द्धन्ते, क्षीयन्ते चान्द्रमासेन षट् दिनानि । एवं चन्द्रार्कयोर्यथावस्थानात् पञ्चवर्षात्मके युगे सौराः षष्टिमासाः, सावना एकषष्टिः, चान्द्रा द्विषष्टिः, नाक्षत्राः सप्तषष्टिः । तन्मध्ये च मलमासद्वयं भवतीत्येवं सर्वमासनिश्चयो भवति । ततश्च पञ्च वर्षे तत्रैव चन्द्रार्कयोर्योगात् युगमित्यभिधीयत इत्यर्थः ॥ ६६ ॥ ६७ ॥ श्वेत शृङ्गवतः सर्वाग्रवत-

वीथि तस्य तु मध्यानि येष्वसौ भगवान् स्मृतः ॥ ६८ ॥
दक्षिणोत्तरयोश्चैव मध्ये वैषुवतं तथा ।
शरद्वसन्तयोर्मध्ये तद्भानुः प्रतिपद्यते ॥ ६९ ॥
मेषादौ च तुलादौ च मैत्रेय ! विषुवत् स्थितः ।
तदा तुल्यमहोरात्रं करोति तिमिरापहः ।
दशपञ्चमुहूर्त्तं वै तदेतदुभयं स्मृतम् ॥ ७० ॥
प्रथमे कृत्तिकाभागे यदा भास्वांस्तथा शशी ।
विशाखानां चतुर्थेऽंशे मुने ! तिष्ठत्यसंशयम् ॥ ७१ ॥
विशाखानां यदा सूर्य्यश्चरत्यंशं तृतीयकम् ।
तदा चन्द्रं विजानीयात् कृत्तिकाशिरसि स्थितम् ॥ ७२ ॥
तदैव विषुवाख्यो वै कालः पुण्योऽभिधीयते ।
तदा दानानि देयानि देवेभ्यः प्रयतात्मभिः ॥ ७३ ॥
ब्राह्मणेभ्यः पितृभ्यश्च मुखमेतत्तु दानजम् ।
दत्तदानस्तु विषुवे कृतकृत्योऽभिजायते ॥ ७४ ॥

पूर्वं विषुवत् स्थानं यदुक्तं [illegible] तच्चेति [illegible] ॥ ६८।६९ ॥ तदेति मेषतुलयोः प्रथमे दिने । उभयं चाहश्च रात्रिश्च ॥ ७० ॥ इदानीं मेषादौ विषुवाख्यं कालं नाक्षत्रमानेनाह । प्रथम इति चतुर्भिः । प्रथमे कृत्तिकाभागे मेषान्ते विशाखानां चतुर्थेऽंशे सूर्यश्च यदि तदा शशी चरेद्यदि तिष्ठति ॥ ७१ ॥ यदा चन्द्रार्कयोर[illegible] [illegible] विशाखानां तृतीयमंशमनु [illegible] । कृत्तिकाशिरसि मेषान्ते चन्द्रं तदा विजानीयात् ॥ ७२ ॥ [illegible] तदैव [illegible] पुण्यकालः । यस्तु [illegible] भवति स [illegible] ॥ ७३ ॥ [illegible] दानजं मुखं [illegible] देवादीनां [illegible] । [illegible] ॥ ७४ ॥ [illegible]

अहोरात्राभिधानौ तु कलाकाष्ठाक्षणास्तथा ।
पौर्णमासी तथा ज्ञेया अमावास्या तथैव च ।
सिनीवाली कुहूश्चैव राका चानुमतिस्तथा ॥ ७५ ॥
तपस्तपस्यौ मधुमाधवौ च शुक्रः शुचिश्चायनमुत्तरं स्यात् ।
नभो नभस्योऽथ इषस्तथोर्जः सहःसहस्याविति दक्षिणं स्यात् ॥ ७६ ॥
लोकालोकश्च यः शैलः प्रागुक्तो भवतो मया ।
लोकपालास्तु चत्वारस्तत्र तिष्ठन्ति सुव्रताः ॥ ७७ ॥
सुधामा शङ्खपाच्चैव कर्दमस्यात्मजा द्विज ।
हिरण्यरोमा चैवान्यश्चतुर्थः केतुमानपि ॥ ७८ ॥
निर्द्वन्द्वा निरभिमाना निस्तन्द्रा निष्परिग्रहाः ।
लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशम् ॥ ७९ ॥

मासादिपुण्यकालज्ञापनार्थम् अहोरात्रादिविभागः सम्यक् ज्ञातव्य इत्याह । अहोरात्रेति सार्द्धेन । दृष्टचन्द्रा सिनीवाली, नष्टचन्द्रा कुहूः इत्यमावास्याभेदौ । पूर्णचन्द्रा राका, कलाहीनचन्द्रानुमतिरिति पौर्णमासीभेदौ ॥ ७५ ॥ ऋतुत्रयं चायनमित्यनेनोक्तमयनद्वयं विभजते । तप इति । माघादिद्विमासैर्ऋतुत्रयम् [illegible] । श्रावणादिद्विमासैस्त्रयं दक्षिणायनमित्यर्थः । एतच्च [illegible] ॥ ७६ ॥ लोकालोकोऽन्तर्ज्योतिर्गणसंस्थानात् पितृयानादिकं कथयिष्यन् प्रथमं तावद्वर्णयन् लोकालोकस्थलोकपालानाह, लोकालोक इति त्रिभिः । तदुक्तं मात्स्ये 'लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशम् । उत्तरं यदगस्त्यस्य शृङ्गं देवर्षिपूजितम्' इति ॥ ७७ ॥ ७८ ॥ तत्र पितृयानमाह । उत्तरमिति [illegible] । तत्र ज्योतिश्चक्रे [illegible] । [illegible] आरोहणं [illegible] । [illegible] तत्रैव [illegible] लोकालोकस्य [illegible] ॥

उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयानः स वै पन्था वैश्वानरपथाद् बहिः ॥ ८० ॥
तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः ।
भूतारम्भकृतं ब्रह्म शंसन्त ऋत्विगुद्यताः ॥ ८१ ॥
प्रारभन्ते तु ये लोकास्तेषां पन्थाः स दक्षिणः ।
चलितं ते पुनर्ब्रह्म स्थापयन्ति युगे युगे ॥ ८२ ॥

तथा हि । त्रिषु त्रिष्वश्विन्यादिनक्षत्रेषु नागवीथी गजवीथी ऐरावती इत्युत्तरमार्गे वीथीत्रयम् । आर्षभी गोवीथी जारद्गवी इति मध्यममार्गे वीथीत्रयम । अजवीथी मृगवीथी वैश्वानरी इति । दक्षिणमार्गे वीथीत्रयम् । तदुक्तं तत्रैव । "अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता । रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते । पुष्याश्लेषा तथादित्या वीथी ऐरावती स्मृता । एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते । तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता । हस्ता चित्रा तथा स्वाती गोवीथीति तु शब्दिता । ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥ मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता । श्रवणश्च धनिष्ठा च मार्गी शतभिषक् तथा । वैश्वानरी भाद्रपदे रेवती चैव कीर्तिता । एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ॥" इति । याम्या भरणी, आदित्या अदितिदेवताका पुनर्वसुः । मार्गी मृगवीथी एवं स्थिते यदगस्त्यादुत्तरमजवीथ्याश्च दक्षिणम् । अगस्त्यस्य [illegible] वैश्वानरपथाद् बहिः । वैश्वानरवीथीं वर्जयित्वा अजवीथीमात्रं पितृयानमित्यर्थः ॥ ८० ॥ भूतारम्भः प्रजोत्पादनं तत्कृतं कर्म [illegible] ब्रह्म तद् ब्रह्म शंसन्तः प्रवर्तकविधायकवेदभागं स्तुवन्तः ऋत्विगुद्यताः युगान्तरे वेदविच्छेदे सति ऋत्विग्भावेन यज्ञानुष्ठानायोद्यताः, यतो हि प्रारभन्ते-ऽतः ॥ ८१ ॥ चलितं विच्छिन्नसंप्रदायं ब्रह्म वेदं स्थापयन्ति ॥ ८२ ॥

सन्तत्या तपसा चैव मर्य्यादाभिः श्रुतेन च ।
जायमानास्तु पूर्वे च पश्चिमानां गृहेषु वै ॥ ८३ ॥
पश्चिमाश्चैव पूर्वेषां जायन्ते निधनेष्विह ।
एवमावर्त्तमानास्ते तिष्ठन्ति नियतव्रताः ।
सवितुर्दक्षिणं मार्गं श्रिता ह्याचन्द्रतारकम् ॥ ८४ ॥
नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणम् ।
उत्तरः सवितुः पन्था देवयानश्च स स्मृतः ॥ ८५ ॥
तत्र ते वशिनः सिद्धा विमला ब्रह्मचारिणः ।
सन्ततिं ते जुगुप्सन्ति तस्मान्मृत्युर्जितश्च तैः ॥ ८६ ॥
अष्टाशीतिसहस्राणां मुनीनामूर्द्ध्वरेतसाम् ।

सन्तत्या अपत्योत्पादनेन मर्य्यादाभिः वर्णाश्रमादिव्यवस्थाभिः, श्रुतेन वेदाध्ययनेन च पूर्वे पितरः पश्चिमानां पुत्राणां, पश्चिमाः पुत्राश्च पूर्वेषां स्वपुत्रत्वेनोत्पन्नानां पितॄणां, निधनेषु गृहेषु वैश्वदेवेन अधिकारवत्तया जायन्ते । "पिता पुत्रेण पितृमान् योनियोनौ" इति श्रुतेः । तथा च वायुः । "प्राप्ते त्रेतायुगे चैव पुनः सप्तर्षयश्च ह । प्रवर्त्तयन्ति तान् वर्णानाश्रमांश्च पृथक् पृथक् । त्रेतामेवाभ्यये धीरा जायन्ते पुनः पुनः । जायमानः पिता पुत्रात् पुत्रः पितरि चैव हि ॥ एवमावर्त्तमानास्ते द्वापरेषु पुनः पुनः । कल्पानां मन्वन्तराणां आभूतसंप्लवम् वै" इति ॥ ८३ ॥ सवितुर्दक्षिणं पितृयानं श्रिताः । श्रुतिश्च "अथ ये ग्रामे इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षम्" इत्यादि ॥ ८४ ॥ देवयानस्य अ नागवीथीति बहुभिः । अश्विन्यादि नक्षत्रत्रयं नागवीथी, तस्या उत्तरं सप्तर्षिभ्यश्च दक्षिणतः देवयानः पन्थाः ॥ ८५ ॥ वशिनः जितेन्द्रियाः ॥ ८६ ॥ यावत्सम्प्लवः ब्रह्मणः प्रलयपर्यन्तं तिष्ठन्ति तस्मात् अमृतत्वम्

उदक्पन्थानमर्यम्णः स्थिता ह्याभूतसंप्लवम् ॥ ८७ ॥

तेऽसंप्रयोगाल्लोभस्य मैथुनस्य च वर्जनात् ।
इच्छाद्वेषाप्रवृत्त्या च भूतारम्भविवर्जनात् ॥ ८८ ॥

पुनश्चाकामसंयोगाच्छब्दादेर्दोषदर्शनात् ।
इत्येभिः कारणैः शुद्धास्तेऽमृतत्वं हि भेजिरे ॥ ८९ ॥

आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते ।
त्रैलोक्यस्थितिकालोऽयमपुनर्मार उच्यते ॥ ९० ॥

ब्रह्महत्याश्वमेधाभ्यां पुण्यपापकृतो विधिः ।
आभूतसंप्लवं स्थानं फलमुक्तं तयोर्द्विज ! ॥ ९१ ॥

यावन्मात्रे प्रदेशे तु मैत्रेयावस्थितो ध्रुवः ।
क्षयमायाति तावत्तु भूमेराभूतसंप्लवे ॥ ९२ ॥

उत्तरं मार्गं स्थिताः स्थिता इति । आकाशस्थ इत्यर्थः ॥ ८७ ॥ लोभस्या-संप्रयोगात् तृष्णावियोगात् इच्छाद्वेषयोरप्रवृत्त्या च कर्माकरणेन ॥ ८८ ॥ पुनश्चाकामसंयोगात् योगभ्रंशाभावात् अमृतत्वमित्युक्तं तदाह । आभूतसंप्लवमिति । ब्रह्मणः परार्द्धान्तं यत् स्थानं तदेवामृतत्वमुपचारादुच्यते । उपचार-बीजमाह । त्रैलोक्येति । अपुनर्मार पुनर्मृत्युरहितः । क्रम-संहारस्थानत्वादिति भावः ॥ ९० ॥ भूतसंप्लवान्तस्थानेऽधिकमपि फलमाह ब्रह्महत्याश्वमेधाभ्याम् उपलक्षितं यत्पापपुण्यञ्च तत्कृतः तदुत्थितो विधिः विधीयतेऽस्मिन् । फलविधिः फलभोगकालः । तमेवाह । आभूतसंप्लवमिति भूतसंप्लवो हृदो योऽन्तः प्रलयः तत्पर्यन्तं तयोः पापपुण्ययोः फलभोगमित्यर्थः । यद्वा ब्रह्महत्याश्वमेधाभ्यामुपलक्षितं यत् पापं पुण्यञ्च तत्कृतः पुंसोऽयं फलभोगकाल इत्यर्थः । अवधि-रिति पाठेऽपि सामानेवार्थः ॥ ९१ ॥ ध्रुवसंस्थो दक्षिणतो दैव-यानमित्युक्तम् । तद्ध्रुवान्तरतो विष्णुपदस्थितिमाह, यावदिति

ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः ।
एतद् विष्णुपदं दिव्यं तृतीयं व्योम्नि भास्वरम् ॥ ८३ ॥
निर्धूतदोषपङ्कानां यतीनां संयतात्मनाम् ।
स्थानं तत परमं विप्र ! पुण्यपापपरिक्षये ॥ ८४ ॥
अपुण्यपुण्योपरमे क्षीणाशेषाप्तिहेतवः ।
यत्र गत्वा न शोचन्ति तद् विष्णोः परमं पदम् ॥ ८५ ॥
धर्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः ।
तत्सार्ष्ट्युत्पन्नयोगेद्धास्तद् विष्णोः परमं पदम् ॥ ८६ ॥
यत्रोतमेतत् प्रोतञ्च यद् भूतं सचराचरम् ।
भाव्यञ्च विश्वं मैत्रेय ! तद् विष्णोः परमं पदम् ॥ ८७ ॥
दिवीव चक्षुराततम् योगिनां तन्मयात्मनाम् ।
विवेकज्ञानदृष्टञ्च तद् विष्णोः परमं पदम् ॥ ८८ ॥

याज्ञवल्क्यसमाधि । ऊर्द्ध्वं तदुपरि तदुत्तरञ्च । सप्तर्षिभ्यः उत्तरस्यां दिश्यूर्द्ध्वं यत्र ध्रुवस्तिष्ठति तद् ध्रुवस्थानरूपं विष्णुपदाख्यं भूम्यपेक्षया त्रिषु तृतीयं स्थानमित्यर्थः ॥ ८३ ॥ तदेव वैराजस्य सूक्ष्मभागोद्भवस्थानम् अनन्तदृष्ट्यन्तर्यामिणो विष्णोः स्थानम्, अतः क्रममुक्तिस्थानमपि तत् स्थानमुक्तस्थानत्वेन वर्णयति । निर्धूतदोषेति पञ्चभिः ॥ ८४ ॥ क्षीणा अशेषाः कर्माद्याः आप्तिहेतवो येषां ते ॥ ८५ ॥ तत् साक्षात् तेन विष्णुना समानैश्वर्य्यं च इन्द्रियादिबाह्यकारणावच्छिन्नोत्पन्नो यो योगः तपःप्रभृतिः तेनेद्धाः दीप्ताः । "ऐश्वर्य्याद् विदितो योगो योगादैश्वर्य्यमिष्यते । सार्ष्ट्युत्पन्नयोगेति" इति श्रीधरीये ॥ ८६ ॥ दिवीव आततं सर्वतःप्रसृतं चक्षुरिव योगिनां चिदात्मनां विततं सर्वभावत्वेन ततम विवेकज्ञानेन प्रत्यग्ज्ञानेन दृष्टञ्च अपरि- च्छिन्नतया ज्ञातमित्यर्थः । अनेन च तद्विष्णोरिति सर्वार्थः ॥ ८८ ॥

यस्मिन् प्रतिष्ठितो भास्वान् मेधीभूतः स्वयं ध्रुवः।
ध्रुवे च सर्वज्योतींषि ज्योतिःष्वम्भोमुचो द्विज॥९९॥
मेघेषु सङ्गता वृष्टिर्वृष्टेः सृष्टेश्च पोषणम्।
आप्यायनञ्च सर्वेषां देवादीनां महामुने॥१००॥
ततश्चाज्याहुतिद्वारा पोषितास्ते हविर्भुजः।
वृष्टेः कारणतां यान्ति भूतानां स्थितये पुनः॥१०१॥
एवमेतत् पदं विष्णोस्तृतीयममलात्मकम्।
आधारभूतं लोकानां त्रयाणां वृष्टिकारणम्॥१०२॥
ततः प्रभवति ब्रह्मन्! सर्वपापहरा सरित्।
गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा॥१०३॥
वामपदाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गता।
विष्णोर्बिभर्त्ति यां भक्त्या शिरसाऽहर्निशं ध्रुवः॥१०४॥

यस्मिन्नेतत् प्रोतं चेत्यनेन विश्वस्य कारणमाश्रयत्वञ्चोक्तम्। ध्रुवाश्रयत्वेन तद्द्वारा विश्वपोषकत्वमाह। यस्मिन्निति चतुर्भिः। भास्वान् तेजस्वी ज्योतिष्षो मेघाः॥९९॥ वृष्टेर्हेतोः स्रोतोद्वारा सृष्टेः पोषणं वृद्धिः, आप्यायनञ्च तृप्तिः॥१००॥ वृष्टेः कारणतां यान्तीति। एतदुक्तं गीतासु। "देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥" इति॥१०१॥ विश्वपावनत्वं च विष्णुपदस्य दर्शयन्नाह। ततः इत्यादिना। ततः विष्णुपदस्थानात् गङ्गाप्रवहत्येव भवति। त्रिविक्रमपदोद्भवत्वादस्य ध्रुवशिरोद्भवत्वात् तत प्रागेव जातापि तत आरभ्य देवादिसेव्यत्वेन प्रकटी-भवतीत्यर्थः। तदेवाह देवाङ्गनानामङ्गानां जलकेलिषु आञ्चितानि यान्यनुलेपनानि कुङ्कुमादीनि तैः। पिञ्जरा पिङ्गलीभूता॥१०२॥ ॥१०३॥

विष्णोर्वामपदाम्बुजम् अम्बुजसदृशो यो वामपादः। तस्याङ्गुष्ठनखात् स्रोतोरूपेण विनिर्गताम्॥१०४॥ ध्रुवपर्य्यो यस्या अस्ये अवतरं

ततः सप्तर्षयो यस्याः प्राणायामपरायणाः ।
तिष्ठन्ति वीचिमालाभिरुह्यमानजटा जले ॥ १०५ ॥
वार्य्योघैः सन्ततैर्यस्याः प्लावितं शशिमण्डलम् ।
भूयोऽधिकतमां कान्तिं वहत्येतदुपक्षये ॥ १०६ ॥
मेरुपृष्ठे पतत्युच्चैर्निष्क्रान्ता शशिमण्डलात् ।
जगतः पावनार्थाय या प्रयाति चतुर्दिशम् ॥ १०७ ॥
सीता चालकनन्दा च चक्षुर्भद्रा च संस्थिता ।
एकैव या चतुर्भेदा दिग्भेदगतिलक्षणा ॥ १०८ ॥
भेदञ्चालकनन्दाख्यं यस्याः सर्वोऽपि दक्षिणम् ।
दधार शिरसा प्रीत्या वर्षाणामधिकं शतम् ॥ १०९ ॥
शम्भोर्जटाकलापाच्च विनिष्क्रान्तास्थिशर्कराः ।
प्लावयित्वा दिवं निन्ये पापाक्रान् सगरात्मजान् ॥ ११० ॥
स्नातस्य सलिले यस्याः सद्यः पापं प्रणश्यति ।
अपूर्वपुण्यप्राप्तिश्च सद्यो मैत्रेय ! जायते ॥ १११ ॥
दत्ताः पितृभ्यो यत्रापस्तनयैः श्रद्धयान्वितैः ।
समाशतं प्रयच्छन्ति तृप्तिं मैत्रेय ! दुर्लभाम् ॥ ११२ ॥
यस्यामिष्ट्वा महायज्ञैर्यज्ञेशं पुरुषोत्तमम् ।
द्विजभूपाः परां सिद्धिमवापुर्दिवि चेह च ॥ ११३ ॥
स्नानाद्विधूतपापाश्च यज्जलैर्यतयस्तथा ।
केशवासक्तमनसः प्राप्ता निर्वाणमुत्तमम् ॥ ११४ ॥

सूर्यरश्मिरश्मि । उह्यमाना ऊर्ध्वनमाना जटा येषां ते ॥ १०५ ॥ ॥ १०६ ॥ १०७ ॥ दिक्षु चतसृषु भेदेन या गतिः तेन चतुर्भेदेन लक्षणं यस्याः सा ॥ १०८ ॥ १०९ ॥ अस्थिशर्करा अस्थिचूर्णानि । पापाक्रान् पापाक्रान्तानपि ॥ ११० ॥ १११ ॥ समाशतं वर्षशतम् ॥ ११२ ॥

स्नाताभिरखिला हृष्टा स्पृष्टा पीतावगाहिता ।
या पावयति भूतानि कीर्त्तिता च दिने दिने ॥ ११५ ॥
गङ्गा गङ्गेति यैर्नाम योजनानां शतेष्वपि ।
स्थितैरुच्चारितं हन्ति पापं जन्मत्रयार्जितम् ॥ ११६ ॥
यतः सा पावनायालं त्रयाणां जगतामपि ।
समुद्भूता परं तत् तु तृतीयं भगवत्पदम् ॥ ११७ ॥

—०—

नवमोऽध्यायः ।

पराशर उवाच ।

तारामयं भगवतः शिशुमाराकृति प्रभोः ।
दिवि रूपं हरेर्यत्तु तस्य पुच्छे स्थितो ध्रुवः ॥ १ ॥
सैष भ्रमन् भ्रामयति चन्द्रादित्यादिकान् ग्रहान् ।
भ्रमन्तमनु तं यान्ति नक्षत्राणि च चक्रवत् ॥ २ ॥
सूर्य्याचन्द्रमसौ तारा नक्षत्राणि ग्रहैः सह ।

प्रस्तुतं विष्णुपदं निगमयति । यत इति । यतः स्थानात् समुद्भूता पावनं प्राप्ता तत् भगवत्पदम् इति ॥ ११७ ॥

विष्णुपदं ध्रुवादीनां सर्वेषामाश्रयो शिशुमारचक्रमुक्तम् । यस्मिन् प्रतिष्ठितो भास्वान् मेढीभूतः स्वयं ध्रुव इत्यादिना तदेव प्रकारविशेषेणाह तत्प्रकारविशेषानुरूपध्यानार्थमध्यायारम्भः । तार मय-मिति । नक्षत्रपुच्छात्मकं शिशुमाराकृति, शिशुमारः जलचरो धाव्याकारः तदवयवसन्निवेशः । तत्प्रकारविशेषतां तन्मयतो रूपं तस्य प्रदर्शितवानन्तरमुक्तो भूतदेवतानामनन्तरम् पुच्छाग्रे ध्रुवः स्थित इत्यर्थः ॥ १ ॥ सैष इति । ज्योतिश्चक्रे सैन्यादपूर्वभ्रमिति ध्रुवः । स एव ध्रुवः शिशुमारदेहेन भ्रमन् ग्रहान् भ्रामयति । नक्षत्राणि च तं भ्रमन्तं ध्रुवमनुयान्ति ॥ २ ॥ तत्र हेतुमाह सूर्य्याचन्द्रमसाविति ।

वातानीकमयैर्बन्धैर्ध्रुवे बद्धानि तानि वै ॥ ३ ॥
शिशुमाराकृति प्रोक्तं यद्रूपं ज्योतिषां दिवि ।
नारायणः परं धाम्नां तस्याधारः स्वयं हृदि ॥ ४ ॥
उत्तानपादपुत्रस्तु तमाराध्य प्रजापतिम् ।
स ताराशिशुमारस्य ध्रुवः पुच्छे व्यवस्थितः ॥ ५ ॥
आधारः शिशुमारस्य सर्वाध्यक्षो जनार्दनः ।
ध्रुवस्य शिशुमारश्च ध्रुवे भानुर्व्यवस्थितः ॥ ६ ॥
तदाधारं जगच्चेदं सदेवासुरमानुषम् ।
येन विप्र विधानेन तन्ममैकमनाः शृणु ॥ ७ ॥

नक्षत्राण्यृक्षादीनि इतरास्तारा ज्योतींषि सर्वैः सह वातमयू-र्बन्धैर्बध्यन्ते परिभ्रमति वक्रः ताराज्योतिर्भिर्बद्धानि वै वातानीकम-यान्यनिलैः । वाताश्च कूर्मोक्ताः । "आवहः प्रवहश्चैव तथैवानुवहः परः । संवहो विवहश्चैव तदूर्ध्वं स्यात् परावहः । तथा परिवह-श्चोर्ध्वं वायवः सप्तनैमिषाः ।" इति । स्थानानि च तेषामुक्तानि "मध्ये भूमेश्चावायुरावहः प्रवहस्ततः । मेघभास्करयोः सूर्यशशिनोरुद्वह-स्थितः । चन्द्रनक्षत्रयोः संवहो विवहस्ततः । नक्षत्रग्रहमध्यस्थो यश्चग्रहर्षिमध्यगः । परावहः परिवहः सप्तर्षिध्रुवमध्यगः । इत्येते वायवः सप्त वहन्ति भुवनत्रयम्" । इति ॥ ३ ॥ शिशुमाराकारं दर्शयन्नाह । शिशुमारेति । ज्योतिषां नक्षत्राणां धाम्नां च सूर्यादि-स्थानानामयनं दिवि शिशुमाराकृति यद्रूपं प्रोक्तं तस्य हृदि स्थितः स्वयं नारायण एव ताराद्रूपस्याधार इत्यन्वयः । पाठान्तरे धाम यद्रूपं प्रोक्तं नक्षत्राश्रयम् । सर्वनियन्तृ चाह । हृदि स्थितः स्वयं नारायणस्तस्याधार इति ॥ ४ ॥ स उत्तानपादपुत्रो ध्रुवः प्रजापतिं नारायणमाराध्य तारामयस्य शिशुमारस्य पुच्छे व्यवस्थितः ॥ ५ ॥ सर्वेषां ज्योतिषां । आधार इति ॥ ६ ॥ तदाधारं भान्मानं सर्वं चाह । येनेति सार्द्धेन ॥ ७ ॥ सूर्यादिक्कनिसाद्वसरित्मिवारथाह ।

विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः ।
वर्षत्यम्बु ततश्चान्नमन्नादप्यखिलं जगत् ॥ ८ ॥
विवस्वान् रश्मिभिस्तीक्ष्णैरादाय जगतो जलम् ।
सोमं पुष्णात्यथेन्दुश्च वायुनाडीमयैर्दिवि ॥ ९ ॥
नालैर्विक्षिपतेऽभ्रेषु धूमाग्न्यनिलमूर्त्तिषु ।
न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः ॥ १० ॥
अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः ।
संस्कारं कालजनितं मैत्रेयासाद्य निर्मलाः ॥ ११ ॥
सरित्समुद्रभौमास्तु तथापः प्राणिसम्भवाः ।
चतुःप्रकारा भगवानादत्ते सविता मुने ॥ १२ ॥
आकाशगङ्गासलिलं तथादाय गभस्तिमान् ।
अनभ्रगतमेवोर्व्यां सद्यः क्षिपति रश्मिभिः ॥ १३ ॥
तस्य संस्पर्शनिर्धूतपापपङ्को द्विजोत्तम ।
न याति नरकं मर्त्त्यो दिव्यस्नानं हि तत् स्मृतम् ॥ १४ ॥
दृष्टसूर्य्यं हि यद्वारि पतत्यभ्रैर्विना दिवः ।
आकाशगङ्गासलिलं तद्गोभिः क्षिप्यते रवेः ॥ १५ ॥
कृत्तिकादिषु ऋक्षेषु विषमेष्वम्बु यद्दिवः ।
दृष्टार्कं पतति ज्ञेयं तद्गाङ्गं दिग्गजोज्झितम् ॥ १६ ॥

विवस्वानष्टभिरिति षड्भिः ॥ ८ । ९ ॥ धूमाग्न्यनिल[illegible] मेघाख्येषु [illegible] न भ्रश्यन्तीति ॥ १० ॥ संस्कारं माधुर्य्यं [illegible] ॥ ११ ॥ [illegible] पूर्वं [illegible] । सरित्समुद्रभौमास्त्विति । सरित्समुद्र[illegible]मताख्येम् । प्राणिसम्भवा स्वेदजाः ॥ १२ ॥ [illegible] दिव्यं स्नानमाह । आकाशगङ्गेति षड्भिः ॥ १३ ॥ कृत्तिकादिषु-

युग्मर्क्षेषु च यत् तोयं पतत्यर्कोज्झितं दिवः ।
तत् सूर्य्यरश्मिभिः सद्यः समादाय निरस्यते ॥ १७ ॥
उभयं पुण्यमत्यर्थं नृणां पापापहं द्विज ।
आकाशगङ्गासलिलं दिव्यस्नानं महामुने ॥ १८ ॥
यत् तु मेघैः समुत्सृष्टं वारि तत् प्राणिनां द्विज ।
पुष्णात्योषधयः सर्वा जीवनायामृतं हि तत् ॥ १९ ॥
तेन वृष्टिं परां नीतः सलिलेनौषधीगणः ।
साधकः फलपाकान्तः प्रजानां द्विज जायते ॥ २० ॥
तेन यज्ञान् यथाप्रोक्तान् मानवाः शास्त्रचक्षुषः ।
कुर्वन्त्यहरहस्तैश्च देवानाप्याययन्ति ते ॥ २१ ॥
एवं यज्ञाश्च वेदाश्च वर्णाश्च द्विजपूर्वकाः ।
सर्वे देवनिकायाश्च पशुभूतगणाश्च ये ॥ २२ ॥
वृष्ट्या धृतमिदं सर्वम् अन्नं निष्पाद्यते यया ।
सापि निष्पाद्यते वृष्टिः सवित्रा मुनिसत्तम ॥ २३ ॥
आधारभूतः सवितुर्ध्रुवो मुनिवरोत्तम ।
ध्रुवस्य शिशुमारोऽसौ सोऽपि नारायणाश्रयः ॥ २४ ॥

ओजोऽदितिभरणमघासु त्रिष्वर्के दृष्टेऽर्के अयुग्मं वर्षन् पतति ॥ १६ ॥
एवं युग्मेषु रोहिण्याद्र्यादितिमघान्तेषु त्रिनोऽर्के इति चैवम् ।
उक्तोऽयमाकाशगङ्गानदीयेव दृष्टेऽर्केऽपारदर्शनात् ॥ १७ ॥ १८ ॥ साध-
कृत्वं यथोक्तं पुनर्नाना हविराहुतिं ददति । वर्षन्ति त्रिविधः ॥ १९ ॥
साधकः फलपाकान्तेषु प्रजानां च यति ॥ २० ॥ २१ ॥ अध्वानानादियज्ञ-
संभवन्ति । वर्णाश्चैव चतुर्भिः ॥ २२ ॥ २३ ॥ तस्य शिशुमारस्य

हृदि नारायणस्तस्य शिशुमारस्य संस्थितः।
बिभर्त्ता सर्वभूतानाम् आदिभूतः सनातनः ॥ २५ ॥

—०—

दशमोऽध्यायः।

पराशर उवाच।

साशीतिमण्डलशतं काष्ठयोरन्तरं द्वयोः।
आरोहणावरोहाभ्यां भानोरब्देन या गतिः ॥ १ ॥
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥ २ ॥
धाता क्रतुस्थला चैव पुलस्त्यो वासुकिस्तथा।
रथभृद् ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तमः ॥ ३ ॥

हृदि स्थितो नारायणस्तु [illegible] भर्त्ता [illegible] ॥ २५ ॥

अथ प्रतिमासं सूर्य[illegible] [illegible] साशीतीति। [illegible] [illegible] वायु[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] उत्तरायणे [illegible] [illegible] [illegible] इति ॥ १ ॥ [illegible] ॥ २ ॥ [illegible]

एते वसन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय ! स्यन्दने भानोः सप्त मासाधिकारिणः ॥ ४ ॥
अर्य्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थला ।
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुचिसंज्ञे निबोध मे ॥ ५ ॥
मित्रोऽत्रिस्तक्षको रक्षः पौरुषेयोऽथ मेनका ।
हाहा रथस्वनश्चैव मैत्रेयैते वसन्ति वै ॥ ६ ॥
वरुणो वसिष्ठो रम्भा सहजन्या हुहुर्बुधः ।
रथचित्रस्तथा शुक्रे वसन्त्याषाढसंज्ञके ॥ ७ ॥
इन्द्रो विश्वावसुः स्रोत एलापत्रस्तथाङ्गिराः ।
प्रम्लोचा च नभस्येते सर्पश्चार्के वसन्ति वै ॥ ८ ॥
विवस्वानुग्रसेनश्च भृगुरापूरणस्तथा ।
अनुम्लोचा शङ्खपालो व्याघ्रो भाद्रपदे तथा ॥ ८ ॥
पूषा च सुरुचिर्धाता गौतमोऽथ धनञ्जय ।

वासुकिरहिना स्थनेन । धाता सूर्यः रथकृत्संज्ञो ग्रामणीः यक्षः । हेतीराक्षसः ॥ ३ ॥ चैत्र एव मधुमासवर्णितम् ॥ ४ ॥ रथौजा यक्षः, प्रहेतिः राक्षसः । कच्छनीरः सर्पः माधवे वैशाखे शुचिसंज्ञे इति ज्येष्ठो विवक्षितः ॥ ५ ॥ पौरुषेयो राक्षसः रथस्वनो यक्षः ॥ ६ ॥ वरुणः सूर्यः रम्भा च सहजन्येति पाठे आषाढे सहजन्यावरुणो- व्याहृतरूपं वंशान्तरेच नक्र विशेषणम् । रथचित्र इति यक्षपर्य्यायोऽयं नाम । नागश्च सहजन्येति पाठे नागसंज्ञकः सर्पः । आषाढसंज्ञक इति चान्द्रमानादाषाढ एव शुक्रः पूर्वोक्तशुचिसंज्ञो ज्येष्ठ इति ज्ञेयम् ॥ ७ ॥ इन्द्रः सूर्यः । एलापत्रो नागः । नभसि श्रावणे । सर्पो राक्षसः । अर्के सूर्यरथे ॥ ८ ॥ उग्रसेनो गन्धर्वः, आपूरणो यक्षः, व्याघ्रो राक्षसः ॥ ९ ॥ सुरुचिर्गन्धर्वः, वातो राक्षसः, धनञ्जयः सर्पः, सुषेणो

सुषेणोऽन्यो घृताची च वसन्त्याश्वयुजे रवौ ॥ १० ॥
विश्वावसुर्भरद्वाजो पर्जन्यैरावतौ तथा ।
विश्वाची सेनजिच्चापः कार्त्तिके चाधिकारिणः ॥ ११ ॥
अंशुकाश्यपतार्क्ष्यास्तु महापद्मस्तथोर्वशी ।
चित्रसेनस्तथा विद्युन्मार्गशीर्षाधिकारिणः ॥ १२ ॥
क्रतुर्भगस्तथोर्णायुः स्फूर्जः कर्कोटकस्तथा ।
अरिष्टनेमिश्चैवान्या पूर्वचित्तिर्वराप्सराः ॥ १३ ॥
पौषमासे वसन्त्येते सप्त भास्करमण्डले ।
लोकप्रकाशनार्थाय विप्रवर्याधिकारिणः ॥ १४ ॥
त्वष्टाथ जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजिद् धृतराष्ट्रोऽथ सप्तमः ॥ १५ ॥
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ।
श्रूयतां चापरे सूर्ये फाल्गुने निवसन्ति ये ॥ १६ ॥
विष्णुरश्वतरो रम्भा सूर्यवर्चाश्च सत्यजित् ।
विश्वामित्रस्तथा रक्षो यज्ञापेतो महामुने ॥ १७ ॥

यक्षः ॥ १० ॥ विश्वावसुश्च [illegible] गन्धर्वः, पर्जन्यः सूर्यः, ऐरावतः सर्पः, सेनजिद्यक्षो । सेनजिच्चाप इति पाठे चापो राक्षसः ॥ ११ ॥ अंशुः सूर्यः, तार्क्ष्यो यक्षः, महापद्मः सर्पः, चित्रसेनो गन्धर्वः, विद्युद्राक्षसः ॥ १२ ॥ क्रतुर्ऋषिः, भगः सूर्यः, ऊर्णायुर्गन्धर्वः, स्फूर्जो राक्षसः, कर्कोटकः सर्पः, अरिष्टनेमिर्यक्षः ॥ १३ ॥ १४ ॥ त्वष्टा सूर्यः, कम्बलः सर्पः, ब्रह्मापेतो राक्षसः, ऋतजिद्यक्षः, धृतराष्ट्रो गन्धर्वः ॥ १५ ॥ विष्णुः सूर्यः, अश्वतरः सर्पः, सूर्यवर्चा गन्धर्वः, सत्यजिद्यक्षः, यज्ञापेतो राक्षसः ॥ १६ ॥ १७ ॥ तेषां व्यापार-

मासेष्वेतेषु मैत्रेय ! वसन्त्येते तु सप्तकाः ।
सवितुर्मण्डले ब्रह्मन् ! विष्णुशक्त्युपबृंहिताः ॥ १८ ॥
स्तुवन्ति मुनयः सूर्य्यं गन्धर्वैर्गीयते पुरः ।
नृत्यन्त्योऽप्सरसो यान्ति सूर्य्यस्यानु निशाचराः ॥ १९ ॥
वहन्ति पन्नगा यक्षैः क्रियतेऽभीषुसंग्रहः ।
बालखिल्यास्तथैवैनं परिवार्य्य समासते ॥ २० ॥
सोऽयं सप्तगणः सूर्य्यमण्डले मुनिसत्तम ! ।
हिमोष्णवारिवृष्टीनां हेतुत्वे समयं गतः ॥ २१ ॥

एकादशोऽध्यायः ।

मैत्रेय उवाच ।

यदेतद्भगवानाह गणः सप्तविधो रवेः ।
मण्डले हिमतापादेः कारणं तन्मया श्रुतम् ॥ १ ॥
व्यापारश्चापि कथितो गन्धर्वोरगरक्षसाम् ।
ऋषीणां बालखिल्यानां तथैवाप्सरसां गुरो ! ॥ २ ॥
यक्षाणाञ्च रथे भानोर्विष्णुशक्तिधृतात्मनाम् ।
किन्त्वादित्यस्य यत् कर्म तन्नात्रोक्तं त्वया मुने ! ॥ ३ ॥

---

१ क.ख.ग.घ.च. स्तुवन्तीति पाठः ॥ १८ ॥ वहन्ति वहनानुकूलतया रथं संवहन्तीत्यर्थः । 'वहन्ति रथं नागाः' इति पुराणोक्तेः । अभीषुसंग्रहः रश्मिसंग्रहणम् । नियन्तृत्वमित्यर्थः, बालखिल्या इति ॥ १९ ॥ [illegible] ॥ २० ॥ [illegible] इति पाठः [illegible] ॥ २१ ॥

७ क.ख.ग.घ.ङ. [illegible] रविविशेषं पृच्छति, यदेतदिति षड्भिः ॥ ॥ १ ॥

यदि सप्तगणो वारि हिममुष्णञ्च वर्षति।
तत् किमत्र रवेर्येन वृष्टिः सूर्य्यादितीर्य्यते ॥ ४ ॥
विवस्वानदितो मध्ये यात्यस्तमिति किं जनाः।
ब्रवीत्येतत् समं कर्म यदि सप्तगणस्य तत् ॥ ५ ॥

पराशर उवाच।

मैत्रेय! श्रूयतामेतद् यद् भवान् परिपृच्छति।
यथा सप्तगणेऽप्येकः प्राधान्येनाधिको रविः ॥ ६ ॥
सर्वा शक्तिः परा विष्णोर्ऋग्यजुःसामसंज्ञिता।
सैषा त्रयी तपत्यंहो जगतश्च हिनस्ति या ॥ ७ ॥
सैव विष्णुः स्थितः स्थित्यां जगतः पालनोद्यतः।
ऋग्यजुःसामभूतोऽन्तःसवितुर्द्विज! तिष्ठति ॥ ८ ॥
मासि मासि रविर्यो यस्तत्र तत्र हि सा परा।
त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै ॥ ९ ॥

स्यादित्यत्रापि दृष्टधर्मान्तरेण विवस्वानदितिमित्यादिना अत आह, साध, वर्षतीति। योऽयं सप्तगणो हिमोष्णवारिवृष्टीनां हेतुरिति हेतुरिति साधारणत्वोक्तत्वादित्यर्थः ॥ ४ ॥ ननु साधारणत्वात् रवेरपि तत् कर्म भवत्वेव, तथाच विवस्वानिति ॥ ५ ॥ विष्णुशक्तेः प्राधान्यादिति धानित्यत्वाद्विप्राधान्येन कोऽयं व्यवहारो युक्त इति परिहारमाह, मैत्रेयेत्यादिना ॥ ६ ॥ यद् यस्मात् यापरा सर्वोत्कृष्टा विष्णोरात्मभूतापा शक्तिः सैषा रविरूपेण तपति अतएव पापहराविना सैव हिनस्ति अतः प्राधान्येनाधिको रविः। "सैषा त्रय्येव विद्या तपति" इति श्रुतेः। सर्वा शक्तिरिति पाठे सर्वा शक्तिः समस्ता शक्तिरित्यर्थः ॥ ७ ॥ अत एव तत्र विष्णुना अभेदमेवाभिप्रेत्याह सैवेति। अतः स्थित्यां स्थित तत् पालनायोद्यतो विष्णुरेव वा शक्तिरेवेत्यन्वयः ॥ ८ ॥ ९ ॥ चापचरापरि इत्यत्र यतिः। 'ऋग्भिः पूर्वाह्णे दिवि

ऋचस्तपन्ति पूर्वाह्णे मध्याह्नेऽथ यजूंषि वै ।
बृहद्रथन्तरादीनि सामान्यह्नः क्षये रवौ ॥ १० ॥
अङ्गमेषा त्रयी विष्णोर्ऋग्यजुःसामसंज्ञिता ।
विष्णुशक्तिरवस्थानं सदादित्ये करोति सा ॥ ११ ॥
न केवलं रवौ शक्तिर्वैष्णवी सा त्रयीमयी ।
ब्रह्माथ पुरुषो रुद्रस्त्रयमेतत् त्रयीमयम् ॥ १२ ॥
सर्गादौ ऋङ्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः ।
रुद्रः साममयोऽन्ताय तस्मात् तस्याशुचिर्ध्वनिः ॥ १३ ॥
एवं सा सात्त्विकी शक्तिर्वैष्णवी या त्रयीमयी ।
आत्मसप्तगणस्थं तं भास्वन्तमधितिष्ठति ॥ १४ ॥
तया चाधिष्ठितः सोऽपि जाज्वलीति स्वरश्मिभिः ।
तमः समस्तजगतां नाशं नयति चाखिलम् ॥ १५ ॥
स्तुवन्ति तं वै मुनयो गन्धर्वैर्गीयते पुरः ।
नृत्यन्त्योऽप्सरसो यान्ति तस्य चानु निशाचराः ॥ १६ ॥
वहन्ति पन्नगा यक्षैः क्रियतेऽभीषुसंग्रहः ।
वालखिल्यास्तथैवेनं परिवार्य समासते ॥ १७ ॥

देव ईयते यजुर्वेदे तिष्ठति मध्येऽह्नः । सामवेदेनास्तमये महीयते" इत्यादि ॥ १० ॥ अङ्गं मूर्तिः ॥ ११ ॥ न केवलं रवेरेव सा शक्तिरधिष्ठात्री किन्तु ब्रह्मादीनामपीत्याह नेति । पुरुषो विष्णुस्त्रयीमयं त्रयीप्रधानं, तदधिष्ठानत्वात् ॥ १२ ॥ यस्मात् सामवेदो रुद्रोऽन्तकारीति तस्मात् तस्य साम्नो ध्वनिरशुचिः अशुचित्वेन वेदान्तरस्याध्ययनानध्यायत्वेन प्रसिद्धः । "न सामध्वनावृग्यजुषी" इति गौतमस्मृतेः ॥ १३ ॥ आत्मसप्तगणस्थं आदित्ये चतु-र्दशे स्थितं भास्वन्तं सूर्यमधितिष्ठत्यधितिष्ठति ॥ १४ ॥ जाज्वलीति अतिशयेन ज्वलति ॥ १५ ॥ अनन्तरं साधयन्ति पूर्वोक्ताः अक्षगणादे-

नोदिता नास्तमिता च कदाचिच्छक्तिरूपधृक् ।
विष्णुर्विष्णोः पृथक् तस्य गणः सप्तमयोऽप्ययम् ॥ १८ ॥
स्तम्भस्थदर्पणस्येव योऽयमासन्नतां गतः ।
छायादर्शनसंयोगं स तं प्राप्नोत्यथात्मनः ॥ १९ ॥
एवं सा वैष्णवी शक्तिर्नैवापैति ततो द्विज ।
मासानुमासं भास्वन्तमध्यास्ते तत्र संस्थितम् ॥ २० ॥
पितृदेवमनुष्यादीन् स सदाप्याययन् प्रभुः ।
परिवर्त्त्यहोरात्रकारणं सविता द्विज ॥ २१ ॥
सूर्यरश्मिः सुषुम्नो यस्तर्पितस्तेन चन्द्रमाः ।

एवं विततस्थायां दैत्यो रक्षांसि, सुरर्षीनिति शब्दात् ॥ १६ ॥ १७ ॥ ऋग्यजुःसामभूतोऽग्निः स एव द्विज । तिष्ठति । विष्णुशक्तिरवस्थानं प्रदीप्तिं करोति च ॥ न केवलं रवौ शक्तिस्वरूपं सर्वत्र शक्तिरूपधृक् विष्णोः प्रतिमासं भिन्नगणावाचिनं सूर्यमधिष्ठानात्मा । सूर्यादिवत् प्रतिमासं विष्णोरधिष्ठानभावाभ्यन्तरं प्रतीत भारयति, नोदिता उदयं न गता । नास्तमिता अस्तं न गता । अपि च सा विष्णुः प्रतिमासमयं न भावाभावौ न भवति किन्तु तदंशभूत [illegible] सप्तम [illegible] सप्तमोऽयं पृथगवस्थितावात्मा सप्तगणः पृथक् ॥ १८ ॥ एतदेव दृष्टान्तेन स्पष्टयति स्तम्भेति द्वाभ्याम् । स्तम्भे स्थितस्य दर्पणस्य सन्निकृष्टो यो यो जनः प्राप्नोति च योऽपि [illegible] आत्मनः छायादर्शनसंयोगं प्रतिबिम्बमात्रेण दर्पणस्थं यथा प्राप्नोति ॥ १९ ॥ एवं भास्वन्मध्ये स्थिता सा [illegible] वैष्णवी शक्तिः [illegible] नैवापगच्छति तत्रैव तु मासानुमासं प्रतिमासं तत्र स्थितमधिष्ठितं [illegible] भास्वन्तमध्यास्ते अधितिष्ठति ॥ २० ॥ एवं विष्णुशक्त्युपहितस्य रवेः पित्रादितर्पकत्वमाह, पितृदेवेति । आप्याययन् तर्पयन्, परिवर्त्येति परिवर्तनीस्वर्भः ॥ २१ ॥ तत्र देवपितृतर्पणे प्रकारमाह सूर्यरश्मिरिति द्वाभ्याम् ।

कृष्णपक्षेऽमरैः शश्वत् पीयते वै सुधामयः ॥ २२ ॥
पीतं तद् द्विकलं सोमं कृष्णपक्षक्षये द्विज ।
पिबन्ति पितरः शेषं भास्करात् तर्पणं तथा ॥ २३ ॥
आदत्ते रश्मिभिर्यं तु क्षितिसंस्थं रसं रविः ।
तमुत्सृजति भूतानां पुष्ट्यर्थं सस्यवृद्धये ॥ २४ ॥
तेन प्रीणात्यशेषाणि भूतानि भगवान् रविः ।
पितृदेवमनुष्यादीन् एवमाप्याययत्यसौ ॥ २५ ॥
पक्षतृप्तिन्तु देवानां पितृणाञ्चैव मासिकीम् ।
शश्वत् तृप्तिञ्च मर्त्यानां मैत्रेयार्कः प्रयच्छति ॥ २६ ॥

तदित्थं शुक्लप्रतिपदमारभ्यापूरितः षोडशकलः सन् कृष्णपक्षे प्रतिपदादि-प्रत्यहमेकैककलाक्रमेणामरैः पीयते । 'प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः' इत्यादिश्रुतेः ॥ २२ ॥ एवं प्रत्यहममरैरेकैककलाक्रमेण पीतायां चतुर्दश्यन्ते द्विकलमवशिष्टं सन्तं कृष्णपक्षक्षये दर्शे पितरः पिबन्ति । तथा तेन चन्द्रतर्पणप्रकारेण भास्करात् तेषां तृप्ति-रूपा [illegible] भवति ॥ २३ ॥ मनुष्यादितर्पणप्रकारमाह, आदत्त इति श्लोकद्वयम् ॥ २४ ॥ २५ ॥ [illegible] विशेषमाह, पक्षतृप्तिमिति । शश्वत् तृप्तिं तत्कालोत्पन्नतृप्तिं [illegible] रसैः [illegible] पक्ष-मासाभ्यामाप्यायिता तृप्तिं देवपितृमनुष्याणामर्कः करोतीत्यर्थः । अत एव श्रुतिः 'तस्मा[illegible] देवा इज्यन्ते मासि पितृभ्यः क्रियते'' इति ॥ २६ ॥

द्वादशोऽध्यायः ।

पराशर उवाच ।

रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः ।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ ॥ १ ॥
वीथ्याश्रयाणि ऋक्षाणि ध्रुवाधारेण वेगिना ।
ह्रासवृद्धिक्रमस्तस्य रश्मीनां सवितुर्यथा ॥ २ ॥
अर्कस्येव हि तस्याश्वाः सकृद्युक्ता वहन्ति ते ।
कल्पमेकं मुनिश्रेष्ठ वारिगर्भसमुद्भवाः ॥ ३ ॥
क्षीणं पीतं सुरैः सोममाप्याययति दीप्तिमान् ।
मैत्रेयैककलं सन्तं रश्मिनैकेन भास्करः ॥ ४ ॥
क्रमेण येन पीतोऽसौ देवैस्तेन निशाकरम् ।
आप्याययत्यनुदिनं भास्करो वारितस्करः ॥ ५ ॥

चक्रा चतुर्भिरश्वैरेवमादिरथैः स्थितिः । अथ सोमादि-संक्षोभ्या तद्रथस्योपवर्ण्यन्ते ॥ १ ॥ कुन्दाभाः श्वेताः रथिरथात् विशेषणाय, वामतो दक्षिणतश्च युक्तास्तस्य रथस्याश्वा दशेति । तेन रथेन ॥ १ ॥ नागवीथ्याद्याश्रयाण्यश्विन्यादीनि नक्षत्राणि प्राप्यादित्या चरति ह्रासवृद्धिक्रमश्च इति । यदितो वर्धमानाभिराप्याय्यादित्यस्य सवितृरश्मीनां यथोक्तलक्षणा तस्यापि ॥ २ ॥ क्षीणस्य सोमस्य पुनः पूर्णत्वं यतो देवादिभक्षणात्, क्षीणत्वञ्च चतुर्भिः । चतुर्दश्यां कलायां दर्शे त्रिभिः पीतायां षोडश्या कलायाः अवशिष्टत्वादेककलं सन्तम् इत्यर्थः । एकेन रश्मिना सुषुम्नाख्येन ॥ ४ ॥ येन क्रमेण प्रतिपद-मारभ्य देवैरश्वादिभिर्मरीचिभिः पीतस्तेनैव प्रतिदिनं तं निशाकरमा-

सम्भृतञ्चार्द्धमासेन तत्सोमस्थं सुधामृतम् ।
पिबन्ति देवा मैत्रेय ! सुधाहारा यतोऽमराः ॥ ६ ॥
त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि च ।
त्रयस्त्रिंशत् तथा देवाः पिबन्ति क्षणदाकरम् ॥ ७ ॥
कलाद्वयावशिष्टस्तु प्रविष्टः सूर्य्यमण्डलम् ।
अमाख्यरश्मौ वसति अमावास्या ततः स्मृता ॥ ८ ॥
अप्सु तस्मिन्नहोरात्रे पूर्वं विशति चन्द्रमाः ।
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥ ९ ॥
छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे ।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥ १० ॥
सोमे पञ्चदशे भागे किञ्चिच्छिष्टे कलात्मके ।
अपराह्णे पितृगणा जघन्यं पर्य्युपासते ॥ ११ ॥
पिबन्ति द्विकलाकारं शिष्टा तस्य कला तु या ।
सुधामृतमयी पुण्या तामिन्दोः पितरो मुने ! ॥ १२ ॥

आप्याययति । अम्भसि स्थितं वारि तस्करवत् हरतीति तथा वारितस्करः । एवं यथोक्तेन वारिणा सोमवायुरेव [illegible] ॥ ५ ॥ सुधामृतं सुधाख्यममृतं [illegible] ॥ ६ ॥ क्षणदाकरं सोमम् ॥ ७ ॥ पितृणां सोमपानप्रकारमाह कलाद्वयेति सार्द्धैः षड्भिः ॥ ८ ॥ सूर्यमण्डलप्रवेशक्रममाह अप्स्विति ॥ ९ ॥ [illegible] वीरुधां छेदनादि [illegible] विन्दतीति ॥ १० ॥ [illegible] सोमे पञ्चदशे भागे किञ्चिच्छिष्टे सति [illegible] पितृगणाः पर्य्युपासते [illegible] ॥ ११ ॥ [illegible] पितरः पिबन्ति [illegible]

निःसृतं तदमावास्यां गभस्तिभ्यः सुधामृतम ।
मासं तृप्तिमवाप्याग्र्यां पितरः सन्ति निर्वृताः ।
सौम्या वर्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा ॥ १३ ॥
एवं देवान् सिते पक्षे कृष्णपक्षे तथा पितॄन् ।
वीरुधश्चामृतमयैः शीतैरप्परमाणुभिः ॥ १४ ॥
वीरुदोषधिनिष्पत्त्या मनुष्यपशुकीटकान ।
आप्याययति शीतांशुः प्राकाम्याह्लादनेन तु ॥ १५ ॥
वाय्वग्निद्रव्यसंभूतो रथश्चन्द्रसुतस्य च ।
पिशङ्गैस्तुरगैर्युक्तः सोऽष्टाभिर्वायुवेगिभिः ॥ १६ ॥
सवरूथः सानुकर्षो युक्तो भूसम्भवैर्हयैः ।
सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान् ॥ १७ ॥

सोऽमृतमयीम् । द्विकलं सोममिति पाठे द्विकलं पर्यंशाप्य तस्य निशा-पितकलां पिबन्ति इत्यर्थः । त्रिकलमिति पाठे अतः तृतीया कलाऽवशिष्यते । त्रिकलपरिमितं मासं तां पिबन्तो मासं पितरो तृप्यन्ति ॥ १२ ॥ अमा-वास्याम् अमावास्यायां तस्य सोमस्य गभस्तिभ्यो निःसृतं सुधामृतं पीत्वेति शेषः । तद्देवमच्युतदारा सोमात् देवादीनां तर्पकत्वमुक्त्वा तद्द्वारा-दिनाद्यादिनापि तेषां तर्पकत्वात् वदति । सिते पक्षे देवानाप्याययति देवानां शुक्लपक्षे यजनात् आमात् तथाऽदावमावास्यापक्षे यजन्त इति श्रुतेः । "कृष्णपक्षे पितॄन् अपरपक्षे पितॄणाम्" इति श्रुतेः । अपरमाणुभिरपां सूक्ष्मांशैः ॥ १४ ॥ वीरुधो लताद्याः, ओषध्यो व्रीह्याद्याः, तासां निष्पत्त्या प्रकाशेन प्रह्लादनं तेन च ॥ १५ ॥ तदेवं सोमस्य रथादिप्रकारमुक्त्वा बुधादीनामप्याह, वाय्वग्न्यादिना प्रवहणेन च श्लाघ्य इत्यनेन । पिशङ्गैः कपिलैः ॥ १६ ॥ "वरूथो रथगुप्तौ तिरोधाने रथस्थितम् । रथस्याधःस्थितं काष्ठमनुकर्षो निगद्यते । उपासङ्गो इषोपाश्रयः पताका प्रसिद्धा, तद्युक्तः ॥ १७ ॥

अष्टाश्वः काञ्चनः श्रीमान् भौमस्यापि रथो महान् ।
पद्मरागारुणैरश्वैः संयुक्तो वह्निसम्भवैः ॥ १८ ॥
अष्टाभिः पाण्डुरैर्युक्तो वाजिभिः काञ्चनो रथः ।
तस्मिंस्तिष्ठति वर्षान्ते राशौ राशौ बृहस्पतिः ॥ १९ ॥
आकाशसम्भवैरश्वैः शबलैः स्यन्दनं युतम् ।
तमारुह्य शनैर्याति मन्दगामी शनैश्चरः ॥ २० ॥
स्वर्भानोस्तुरगा ह्यष्टौ भृङ्गाभा धूसरं रथम् ।
सकृद्युक्तास्तु मैत्रेय ! वहन्त्यविरतं सदा ॥ २१ ॥
आदित्यान्निःसृतो राहुः सोमं गच्छति पर्वसु ।
आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु ॥ २२ ॥
तथा केतुरथस्याश्वा अप्यष्टौ वातरंहसः ।
पलालधूमवर्णाभा लाक्षारसनिभारुणाः ॥ २३ ॥
एते मया ग्रहाणां वै तवाख्याता रथा नव ।
सर्वे ध्रुवे महाभाग ! प्रबद्धा वायुरश्मिभिः ॥ २४ ॥
ग्रहर्क्षताराधिष्ण्यानि ध्रुवे बद्धान्यशेषतः ।
भ्रमन्त्युचितचारेण मैत्रेयानिलरश्मिभिः ॥ २५ ॥
यावन्त्यश्चैव तारास्तास्तावन्तो वातरश्मयः ।
सर्वे ध्रुवे निबद्धास्ते भ्रमन्तो भ्रामयन्ति तम् ॥ २६ ॥

वह्निसम्भवैः ॥ १८ ॥ १९ ॥ शबलैश्चित्रवर्णैः ॥ २० ॥ स्वर्भानोः राहोर्भृङ्गाभाः अश्वाः धूसरम् रथम् पाण्डुरम् अविरतम् अनवरतम् ॥ २१ ॥ सौरेषु पर्वसु सौरं गच्छति ॥ २२ ॥ पलालं तृणं तद्धूमवर्णा आभा दीप्तिर्येषां ते लाक्षारसवदरुणाश्च ॥ २३ ॥ २४ ॥ ग्रहर्क्ष-ताराणां धिष्ण्यानि स्थानानि । उचितचारेण यथोचितगत्या ॥ २५ ॥

तैलपीडा यथा चक्रं भ्रमन्तो भ्रामयन्ति वै।
तथा भ्रमन्ति ज्योतींषि वाताविद्धानि सर्वशः॥ २७॥
अलातचक्रवद् यान्ति वातचक्रेरितानि तु।
यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः॥ २८॥
शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति।
सन्निवेशञ्च तस्यापि शृणुष्व मुनिसत्तम॥ २९॥
यदह्ना कुरुते पापं तं दृष्ट्वा निशि मुच्यते।
यावन्त्यश्चैव तारास्ताः शिशुमाराश्रिता दिवि।
तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि च॥ ३०॥
उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः।
यज्ञोऽधरश्च विज्ञेयो धर्मो मूर्द्धानमाश्रितः॥ ३१॥
हृदि नारायणश्चास्ते अश्विनौ पूर्वपादयोः।
वरुणश्चार्यमा चैव पश्चिमे तस्य सक्थिनी॥ ३२॥
शिश्नः संवत्सरस्तस्य मित्रोऽपानं समाश्रितः।

॥ २६॥ तैलपीडकास्तैलिकाः स्वयं भ्रमन्तो यथा चक्रं तद्वच्च भ्रामयन्ति। वाताविद्धानि प्रवहाख्यवातचक्रप्रेरितानि॥ २७॥ यस्मात् ज्योतींषि प्रवर्त्य वहति तेन स वायुः प्रवहः स्मृतः। प्रवहश्चैव भेदाः सर्वे वायुस्कन्धाः॥ २८॥ सर्वं ध्रुवे निबद्धमिति। तस्य ध्रुवस्याधारभूतं शिशुमारं [illegible] विशेषतो वक्तुमाह शिशुमारस्त्विति॥ २९॥ तद्दर्शनफलमाह यदह्नेति सार्द्धेन॥ ३०॥ तदवयवविन्यासमेवाह। उत्तानपाद इति सार्द्धैस्त्रिभिः। उत्तानपादः [illegible]। यज्ञो धर्मो [illegible]॥ ३१॥ सक्थिनी ऊरू॥ ३२॥ तारकामयस्य शिशुमारस्य [illegible]

पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः ।
तारकाशिशुमारस्य नास्तमेति चतुष्टयम् ॥ ३३ ॥
इत्येष सन्निवेशोऽयं पृथिव्या ज्योतिषां तथा ।
द्वीपानामुदधीनाञ्च पर्वतानाञ्च कीर्त्तितः ॥ ३४ ॥
वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै ।
तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः ॥ ३५ ॥
यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा ।
पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता ॥ ३६ ॥
ज्योतींषि विष्णुर्भुवनानि विष्णुः
वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं
यदस्ति यन्नास्ति च विप्रवर्य ॥ ३७ ॥
ज्ञानस्वरूपो भगवान् यतोऽसौ
अशेषमूर्त्तिर्न च वस्तुभूतः ।

[illegible] रक्षते । [illegible] पाठे तस्य पुच्छे चतुष्टयमेतच्चतुष्टयं निश्चलमित्यर्थः । श्रुतिश्च 'अग्निः पुच्छस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरभयं चतुर्थम्' इति ॥ ३३ ॥ उक्तं भुवनकोशमुपसंहरन् [illegible] [illegible] इत्येष इति [illegible] ॥ ३४ ॥ ३५ ॥ यदम्बु वैष्णवः कायः विष्णोरेव मूर्त्तिभूतोऽम्बु [illegible] पद्माकारा [illegible] [illegible] वसुन्धरा समुद्भूता । अतः [illegible] ततः [illegible] ॥ ३६ ॥ [illegible] ज्योतींषीति । [illegible] ॥ ३७ ॥ [illegible]

यतो हि शैलाब्धिधरादिभेदान्
जानीहि विज्ञानविजृम्भितानि । ३८ ॥
यदा तु शुद्धं निजरूपि सर्वं
कर्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि सङ्कल्पतरोः फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः ॥ ३९ ॥
वस्त्वस्ति किं कुत्रचिदादिमध्य-
पर्यन्तहीनं सततैकरूपम् ।
यच्चान्यथात्वं द्विज ! याति भूयो
न तत् तथा कुत्र कुतो हि तत्त्वम् ॥ ४० ॥

ज्ञानमेव वस्तु तच्च यद्यपि परमो भ्रमवशात् यतः अतोऽशेषम् सः प्रपञ्चभूतैर्वर्ती वस्तुभूतः परमार्थरूपो न भवति कथं तर्हि प्रपञ्च-स्फूर्तिस्तत्राह यतो हीति । तस्मात् ज्ञानरूपात् शैला-दिभेदान् विज्ञानेऽविद्याने विजृम्भितानि अविद्यया विवर्तितानि रूपाणि जानीहि ॥ ३८ ॥ अत्र हेतुमाह यदा त्विति । "यदा तु प्रतिबन्धककर्मक्षये सर्वेषामात्मानं शुद्धं निजरूपात्मना रूपमस्ति तच्च तथाभूतं निरस्तसमस्तदोषं ज्ञानमेव भवति तदा सङ्कल्पतरोः फलभूताः वस्तुषु पृथिव्यादिषु वस्तुभेदा घटादिविशेषा न स्फुरन्ति । यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् तं केन कं जिघ्रेत् इत्या-दिश्रुतेः । अतस्तत्त्वज्ञानबाधितत्वात् प्रपञ्चो वास्तव इत्यर्थः ॥ ३९ ॥ "आदावन्तेऽपि यन्नास्ति वर्तमानेऽपि तत् तथा" इत्यादिन्यायेनानाद्य-पायित्वात् परिणामित्वाच्च न वास्तवत्वमस्येत्याह, वस्त्विति । वस्त्व-न्यथात्वं परिणामान्तरं याति तत् पुनस्तथा पूर्ववत् भवति । तच्च तथाभूते आद्यन्तरहिते रूपात् प्रच्युते च वस्तुनि पृथिव्यादिषु

मही घटत्वं घटतः कपालिका
कपालिका चूर्णरजस्ततोऽणुः ।
जनैः स्वकर्मस्तिमितात्मनिश्चयै-
रालक्ष्यते ब्रूहि किमत्र वस्तु ॥ ४१ ॥
तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्
क्वचित् कदाचिद् द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्मभेद-
विभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥ ४२ ॥
ज्ञानं विशुद्धं विमलं विशोकम्
अशेषलोभादिनिरस्तसङ्गम् ।
एकं सदैकं परमः परेशः
स वासुदेवो न यतोऽन्यदस्ति ॥ ४३ ॥
सद्भाव एवं भवतो मयोक्तो
ज्ञानं यथा सत्यमसत्यमन्यत् ।

तत्त्वं परमार्थत इति ॥ ४० ॥ अन्यत्राप्यभेदोदाहरणम् विकारस्याभाव[illegible]
महीति । मह्यादिवस्तुदृष्ट्या घटत्वं प्राप्ता न लक्ष्यते, घटत्वावस्थायां च
कपालिकाभूता लक्ष्यते कपालिका च नष्टा चूर्णं रजश्च लक्ष्यते ।
तच्चाणुरिति सूक्ष्मा वस्तु । स्वकर्मणा [illegible] किंवत्तो
यस्यात्मन आत्मनिश्चयो तेषां तैर्जनैरत्र परिच्छेदपरम्परायां किं
वस्तु लक्ष्यते न किञ्चित् पृथक्परमाणुतैरित्यर्थः । तथा च श्रुतिः "वाचा-
रम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति ॥ ४१ ॥ इति-
[illegible] शोकादिभिर्निरस्तः सङ्गो यस्य तथाभूतं ज्ञानं सदैकमेव ।
स एव च परमः परेश्वरो वासुदेवः यतो व्यतिरिक्तं किञ्चि-
दपि नास्ति ॥ ४३ ॥ [illegible] सद्भाव इति । सद्भावः परमार्थः ।

एतत् तु यत् संव्यवहारभूतं
तत्रापि चोक्तं भुवनाश्रितं ते ॥ ४४ ॥
यज्ञः पशुर्वह्निरशेष ऋत्विक्
सोमः सुराः स्वर्गमयश्च कामः ।
इत्यादिकर्माश्रितमार्गदृष्टं
भूरादिभोगाय फलानि तेषाम् ॥ ४५ ॥
यच्चैतद् भुवनगतं मया तवोक्तं
सर्वत्र व्रजति हि तत्र कर्मवश्यः ।
ज्ञात्वैवं ध्रुवमचलं सदैकरूपं
तत् कुर्य्याद् विशति हि येन वासुदेवम् ॥ ४६ ॥

सर्वो भवत इति दुःखोपायाभावस्यार्थः । ननु चाण्डस्य संस्थानमस्मत्वे विषयमेतत् पद्माद्याश्रितं वस्तु वर्णितं तत्राह, एतत् तु यत् संव्यवहारभूतमिति यत् सर्वं व्यवहारभूतं प्रत्यक्षं परमार्थविषयोऽपि व्यवहारं भूतं स्थितं तत् यतः वस्तु तत्रापि च विशेषतस्तुभ्यं यत् भुवनाश्रितमुक्तम् ॥ ४४ ॥ यज्ञः पशुरित्यादिकर्माश्रितमार्गदृष्टमुक्तं भूरादिभोगाय तत्फलानीत्युक्तम् ॥ ४५ ॥ तेषु वैराग्योत्पादनेन आत्मनि तन्महारा जीवासुदेवप्राप्त्यर्थमित्याह, यच्चैतदिति, कर्मवश्यो जीवो नाना योनीर्व्रजतीति अतएव विरज्य यत् ध्रुवं निश्चलमचलं परिपूर्णम् अतः सर्वदैकरूपं वासुदेवं तेनोपायेन आत्मनीदिना तत्प्रसादात् तत्पदं दासत्वभावेन विशति तदेव कुर्यादित्यर्थः ॥ ४६ ॥

त्रयोदशोऽध्यायः ।

मैत्रेय उवाच ।

भगवन्! सम्यगाख्यातं यत् पृष्टोऽसि मयाखिलम् ।
भूसमुद्रादिसरितां संस्थानं ग्रहसंस्थितिम् ॥ १ ॥
विष्णवाधारं तथा चैतत् त्रैलोक्यं समवस्थितम् ।
परमार्थस्तु ते प्रोक्तो यथा ज्ञानं प्रधानतः ॥ २ ॥
यत् त्वेतद् भगवानाह भरतस्य महीपतेः ।
कथयिष्यामि चरितं तन्ममाख्यातुमर्हसि ॥ ३ ॥
भरतः स महीपालः शालग्रामेऽवसत् किल ।
योगयुक्तः समाधाय वासुदेवे सदा मनः ॥ ४ ॥
पुण्यदेशप्रभावेण ध्यायतश्च सदा हरिम् ।
कथन्नु नाभवन्मुक्तिर्यदभूत् स द्विजः पुनः ॥ ५ ॥
विप्रत्वे च कृतं तेन यद्भूयः सुमहात्मना ।
भरतेन मुनिश्रेष्ठ! तत् सर्वं वक्तुमर्हसि ॥ ६ ॥

[illegible] सागरैः [illegible] निरूपिते । तेन [illegible] पृच्छति । तत् [illegible] किं तेन [illegible] प्रथमाध्यायोपक्षिप्तमेव भरतचरितं [illegible] पृच्छति, भगवन्निति षड्भिः ॥ १ ॥ प्रधानत इति [illegible] । [illegible] ॥ २ ॥ भरतस्य चरितं [illegible] ॥ ३ ॥ ६ ॥ [illegible]

पराशर उवाच ।

शालग्रामे महाभागो भगवन्न्यस्तमानसः ।
स उवास चिरं कालं मैत्रेय ! पृथिवीपतिः ॥ ७ ॥
अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः ।
अवाप परमां काष्ठां मनसश्चापि संयमे ॥ ८ ॥
यज्ञेशाच्युत ! गोविन्द ! माधवानन्त ! केशव ! ।
कृष्ण ! विष्णो ! हृषीकेशेत्याह राजा स केवलम् ॥ ९ ॥
नान्यज्जगाद मैत्रेय ! किञ्चित् स्वप्नान्तरेऽपि च ।
एतत् परं तदर्थञ्च विना नान्यदचिन्तयत् ॥ १० ॥
समित्पुष्पकुशादानं चक्रे देवक्रियाकृते ।
नान्यानि चक्रे कर्माणि निःसङ्गो योगतापसः ॥ ११ ॥
जगाम सोऽभिषेकार्थम् एकदा तु महानदीम् ।
सस्नौ तत्र तदा चक्रे स्नानस्यानन्तरक्रियाः ॥ १२ ॥
अथाजगाम तत्तीर्थं जलं पातुं पिपासिता ।
आसन्नप्रसवा ब्रह्मन् एकैव ! हरिणी वनात् ॥ १३ ॥

यस्तु च्छिद्रेष्वन्तरेण तस्मिन् अल्पमपि ज्ञानं योगश्च यं यस्तु तस्य साधनं योगबद्धयति शालग्राम इति पर्वतः । भगवति न्यस्तं मानसं येन सः ॥ ७ ॥ अहिंसादिषु यमनियमादिषु । तदुपायेषु च मनसः संयमे समाधौ परमां काष्ठाम् उत्कर्षम् अवाप ॥ ८ ॥ यज्ञेशाच्युतेत्यादिभगवन्नामैवाह ॥ ९ ॥ नान्यद् वाचा जगाद मनसा च एतद्भगवन्नामैव तदर्थञ्च केवलमचिन्तयत् नान्यत् किमपि ॥ १० ॥ देवेन च समित्पुष्पकुशानाम् आदानं देवपूजार्थं चक्रे नान्यानि कर्माणि योगयुक्तः तापसः ॥ ११ ॥ अथ तस्य हरिणशावाद्योगभङ्गं

ततः समभवत् तत्र पीतप्राये जले तया ।
सिंहस्य नादः सुमहान् सर्वप्राणिभयङ्करः ॥ १४ ॥
ततः सा सहसा त्रासादाप्लुता निम्नगातटम् ।
अत्युच्चारोहणेनास्या नद्यां गर्भः पपात सः ॥ १५ ॥
तमुह्यमानं वेगेन वीचिमालापरिप्लुतम् ।
जग्राह स नृपो गर्भात् पतितं मृगपोतकम् ॥ १६ ॥
गर्भप्रच्युतिदोषेण प्रोत्क्रान्त्याक्रमणेन च ।
मैत्रेय ! सापि हरिणी पपात च ममार च ॥ १७ ॥
हरिणीं तां विलोक्याथ विपन्नां नृपतापसः ।
मृगपोतं समादाय निजमाश्रममागतः ॥ १८ ॥
चकारानुदिनञ्चासौ मृगपोतस्य वै नृपः ।
पोषणं पुष्यमाणश्च स तेन ववृधे मुने ! ॥ १९ ॥
चचाराश्रमपर्य्यन्ते तृणानि गहनेषु सः ।
दूरं गत्वा च शार्दूलत्रासादभ्याययौ पुनः ॥ २० ॥
प्रातर्गत्वातिदूरञ्च सायमायात्यथाश्रमम् ।
पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे ॥ २१ ॥
तस्य तस्मिन् मृगे दूरसमीपपरिवर्त्तिनि ।
आसीच्चेतः समासक्तं न ययावन्यतो द्विज ! ॥ २२ ॥
विमुक्तराज्यतनयः प्रोज्झिताशेषबान्धवः ।
ममत्वं स चकारोच्चैस्तस्मिन् हरिणबालके ॥ २३ ॥

पश्यति, [illegible] [illegible] [illegible] ॥ १२ ॥ १३ ॥
आप्लुता [illegible] ॥ १५ ॥ १० ॥ उटजाजिरे पर्णशालाङ्गणे ॥ २१ ॥
[illegible] [illegible] तस्मिन् [illegible] [illegible] [illegible] प्रवृत्ति, [illegible]

किं वृकैर्भक्षितो व्याघ्रैः किं सिंहेन निपातितः ।
चिरायमाणे निष्क्रान्ते तस्यासीदिति मानसम् ॥ २४ ॥
एषा वसुमती तस्य खुराग्रक्षतकर्बुरा ।
प्रीतये मम जातोऽसौ क्व ममैणकबालकः ॥ २५ ॥
विषाणाग्रेण मद्बाहुकण्डूयनपरो हि सः ।
क्षेमेणाभ्यागतोऽरण्यादपि मां सुखयिष्यति ॥ २६ ॥
एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ।
कुशाः काशा विराजन्ते बटवः सामगा इव ॥ २७ ॥
इत्थं चिरगते तस्मिन् स चक्रे मानसं मुनिः ।
प्रीतिप्रसन्नवदनः पार्श्वस्थे चाभवन्मृगे ॥ २८ ॥
समाधिभङ्गस्तस्यासीत् तन्मयत्वादृतात्मनः ।
सन्त्यक्तराज्यभोगर्द्धिस्वजनस्यापि भूपतेः ॥ २९ ॥
चपलं चपले तस्मिन् दूरगं दूरगामिनि ।
मृगपोतेऽभवच्चित्तं स्थैर्यवत् तस्य भूपतेः ॥ ३० ॥
कालेन गच्छता सोऽथ कालं चक्रे महीपतिः ।
पितेव सास्रं पुत्रेण मृगपोतेन वीक्षितः ॥ ३१ ॥
मृगमेव तदाद्राक्षीत् त्यजन् प्राणानसावपि
तन्मयत्वेन मैत्रेय नान्यत् किञ्चिदचिन्तयत् ॥ ३२ ॥
ततश्च तत्कालकृतां भावनां प्राप्य तादृशीम् ।

रिता ॥ २४ ॥ २५ ॥ खुराग्रक्षतैः कर्बुरा ॥ २६ ॥ अथवा तच्छिखा
सामगा बटवः बटवः छात्रा शिखां यस्य ते । तस्मात् इति पाठ
तन्मयत्वे महाभारते बटवः छात्रा यस्य । धृतिरविचलत्व समाधिः
॥ २९ ॥ ३० ॥ कालं चक्रे मृत्युं प्राप ॥ ३१ ॥ ३२ ॥ तत्कालकृतां
भावनाम् अन्तकाले मृगचिन्ताम् । जम्बूमार्गे कालञ्जरे गिरौ । जाति-

जम्बूमार्गे महारण्ये जातो जातिस्मरो मृगः ॥ ३३ ॥
जातिस्मरत्वादुद्विग्नः संसारस्य द्विजोत्तम ।
विहाय मातरं भूयः शालग्राममुपाययौ ॥ ३४ ॥
शुष्कैस्तृणैस्तथा पर्णैः स कुर्वन्नात्मपोषणम् ।
मृगत्वहेतुभूतस्य कर्मणो निष्कृतिं ययौ ॥ ३५ ॥
तत्र चोत्सृष्टदेहोऽसौ जज्ञे जातिस्मरो द्विजः ।
सदाचारवतां शुद्धे योगिनां प्रवरे कुले ॥ ३६ ॥
सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित् ।
अपश्यत स च मैत्रेय आत्मानं प्रकृतेः परम् ॥ ३७ ॥
आत्मनोऽधिगतज्ञानो देवादीनि महामुने ।
सर्वभूतान्यभेदेन स ददर्श महामतिः ॥ ३८ ॥
न पपाठ गुरुप्रोक्तं कृतोपनयनः श्रुतम् ।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च ॥ ३९ ॥
उक्तोऽपि बहुशः किञ्चिज्जडवाक्यमभाषत ।
तदप्यसंस्कारयुतं ग्राम्यवाक्योक्तिसंश्रितम् ॥ ४० ॥

[illegible] । जम्बूमार्गे [illegible] जातिस्मरो [illegible] ॥ ३३ ॥ ३४ ॥ इदानीं मृगत्वहेतुभूतकर्मणः [illegible] देहेन [illegible] परित्याज्य, तत्र [illegible] ॥ ३६ ॥ सर्वविज्ञानसम्पन्नः [illegible] आत्मनः [illegible] सर्वभूतानि ददर्श । [illegible] ॥ ३८ ॥ ददर्श न च कर्माणि [illegible] ॥ ३९ ॥ तदप्यसंस्कारगुणम् । संस्कारः [illegible] । गुण [illegible] । [illegible] ॥ ४० ॥

अपध्वस्तवपुः सोऽथ मलिनाम्बरधृग् द्विजः ।
क्लिन्नदन्तान्तरः सर्वैः परिभूतः स नागरैः ॥ ४१ ॥
सम्माननाः परां हानिं योगर्द्धेः कुरुते यतः ।
जनेनावमतो योगी योगसिद्धिञ्च विन्दति ॥ ४२ ॥
तस्माच्चरेत वै योगी सतां मार्गमदूषयन् ।
जना यथावमन्येरन् गच्छेयुर्नैव सङ्गतिम् ॥ ४३ ॥
हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः ।
आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने ॥ ४४ ॥
भुङ्क्ते कुल्माषवाटादि शाकं वन्यफलं कणान् ।
यद् यदाप्नोति सुबहु तदत्ति कालसंयमम् ॥ ४४ ॥
पितर्य्युपरते सोऽथ भ्रातृभ्रातृव्यबान्धवैः ।
कारितः क्षेत्रकर्म्मादि कदन्नाहारपोषितः ॥ ४५ ॥
स तूक्षपीनावयवो जडकारी च कर्म्मणि ।

अपध्वस्तवपुः मलोपचयैः । क्लिन्नानि मलापूरितानि दन्तान्तराणि दन्तमध्यानि यस्य सः ॥ ४१ ॥ सतां धर्म्मम् अदूषयन् । अवमानादेर्म्मार्गं निषिद्धम् अकुर्वन् ॥ ४३ ॥ एवमात्मनैवात्मोद्बोधकं हिरण्यगर्भोक्त-योगशास्त्रवचनं विचिन्त्य ॥ ४४ ॥ कुल्माषाः किञ्चित्पक्वाश्चणकादयः "स्यात् यावकस्तु कुल्माषः" इत्यमरसिंहः । [illegible] सुबहु [illegible] यत् यदाप्नोति तत्तदत्ति [illegible] [illegible] भुङ्क्ते इत्यर्थः । तथाच श्रुतिः । "शरीरं [illegible] [illegible] [illegible] [illegible] [illegible]" इति [illegible] [illegible] यथा भवति तथा । तदत्ति इति पाठे [illegible] [illegible] [illegible] दिवा नक्तं वा [illegible] [illegible] भुङ्क्ते इत्यर्थः ॥ ४४ ॥ भ्रातरः भ्रातृपुत्राः ॥ ४५ ॥ [illegible] [illegible] जडकारी । [illegible] [illegible] [illegible]

सर्वलोकोपकरणं बभूवाकारवेतनः ॥ ४६ ॥
तं तादृशमसंस्कारविप्राकृतिविचेष्टितम् ।
क्षत्ता सौवीरराजस्य विष्टियोग्यममन्यत ॥ ४७ ॥
स राजा शिबिकारूढो गन्तुं कृतमतिर्द्विज ।
बभूवेक्षुमतीतीरे कपिलर्षेर्वराश्रमम् ॥ ४८ ॥
श्रेयः किमत्र संसारे दुःखप्राये नृणामिति ।
प्रष्टुं तं मोक्षधर्मज्ञं कपिलाख्यं महामुनिम् ॥ ४९ ॥
उवाह शिबिकां तस्य क्षत्तुर्वचनचोदितः ।
नृणां विष्टिगृहीतानामन्येषां सोऽपि मध्यगः ॥ ५० ॥
गृहीतो विष्टिना विप्रः सर्वज्ञानैकभाजनः ।
जातिस्मरोऽसौ पापस्य क्षयकाम उवाह ताम् ॥ ५१ ॥
ययौ जडगतिः सोऽथ युगमात्रावलोकनम् ।
कुर्वन् मतिमतां श्रेष्ठस्तदन्ये त्वरितं ययुः ॥ ५२ ॥
विलोक्य नृपतिः सोऽपि विषमां शिबिकागतिम् ।
किमेतदित्याह समं गम्यतां शिबिकावहाः ॥ ५३ ॥

स ॥ ४६ ॥ इदानीं तस्य चरितं प्रस्तावयन् आख्यायिकामाह, तं तादृशमित्यादिना आध्यायसमाप्ति। क्षत्ता द्वाःस्थ नरपतेः। विष्टिर्मूल्यं विना कर्म, तत्र योग्यम्। शिबिकामारूढो [illegible] [illegible]। अत्र हि "बाधं प्रातर्वदा [illegible] [illegible] मे आपादयेत्। तत्र चैव धार्मिको राजा पुरुषमेव बोधयेत्" इति ॥ ४७ ॥ शिबिका दारुमयं मनुष्यवाह्यं यानम्। तत्र आरूढो भूत्वा [illegible] गन्तुं कृतमतिः सन् स राजा शिबिकावाहपुरुषसमेतः इक्षुमत्याः नद्याः तीरं बभूव ॥ ४८ ॥ तद्वचने [illegible] [illegible] इति ॥ ४९ ॥ ५० ॥ [illegible] [illegible] यम् ॥ ५१ ॥ किमेतत् विषमं, एवं यथा भवति तथा [illegible]

पुनस्तथैव शिबिकां विलोक्य विषमां हि सः ।
नृपः किमेतदित्याह भवद्भिर्गम्यतेऽन्यथा ॥ ५४ ॥
भूपतेर्वदतस्तस्य श्रुत्वेत्थं बहुशो वचः ।
शिबिकोद्वाहकाः प्रोचुरयं यातीत्यसत्वरम् ॥ ५५ ॥

राजोवाच ।

किं श्रान्तोऽस्यल्पमध्वानं त्वयोढा शिबिका मम ।
किमायाससहो न त्वं ? पीवानसि निरीक्ष्यसे ॥ ५६ ॥

ब्राह्मण उवाच ।

नाहं पीवान् न चैवोढा शिबिका भवतो मया ।
न श्रान्तोऽस्मि न चायासः सोढव्योऽस्ति महीपते ॥ ५७ ॥

राजोवाच ।

प्रत्यक्षं दृश्यसे पीवानद्यापि शिबिका त्वयि ।
श्रमश्च भारोद्वहने भवत्येव हि देहिनाम् ॥ ५८ ॥

ब्राह्मण उवाच ।

प्रत्यक्षं भवता भूप ! यद् दृष्टं मम तद् वद ।
बलवानबलश्चेति वाच्यं पश्चाद् विशेषणम् ॥ ५९ ॥

॥ ५२ ॥ ५३ ॥ असत्वरम् मन्दं यातीति प्रोचुः ॥ ५५ ॥ किं श्रान्तोऽसि त्वम् ? नैव श्रान्तोऽसि, यतः अल्पमेव अध्वानं त्वया शिबिका ऊढा आनीता । किञ्च, किं त्वम् आयाससहो न भवसि ? अपितु भवसि । यतः पीवान् स्थूलो बलवान् निरीक्ष्यसे दृश्यसे । पीवानसि न आयासासहोऽसि ॥ ५६ ॥ ५७ ॥ राजा भोक्तृभारवोढृविरोधम् उद्भावयन्नाह, प्रत्यक्षं दृश्यसे इति ॥ ५८ ॥ ब्राह्मणस्तु बाह्यप्रतीतेर्मिथ्यात्वाभिप्रायेणाह, प्रत्यक्षं भवता यद् दृष्टं देहो वा जीवो वा परमात्मा वा, तत्, प्रथमं वद, विशेषणं पश्चात् तु वाच्यं विशेष्यापेक्षत्वाद् विशेषणस्य ॥ ५९ ॥ देहपक्षे तावदात्मनो भाराभावमाह,

त्वयोढा शिबिका चेति त्वय्यथापि च संस्थिता ।
मिथ्यैतदत्र तु भवान् शृणोतु वचनं मम ॥ ६० ॥
भूमौ पादयुगस्यास्था जङ्घे पादद्वये स्थिते ।
ऊरू जङ्घाद्वयावस्थौ तदाधारं तथोदरम् ॥ ६१ ॥
वक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ ।
स्कन्धाश्रितेयं शिबिका मम भारोऽत्र किं कृतः ? ॥ ६२ ॥
शिबिकायां स्थितञ्चेदं वपुस्त्वदुपलक्षितम् ।
तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥ ६३ ॥
अहं त्वञ्च तथान्ये च भूतैरुह्याम पार्थिव ।
गुणप्रवाहपतितो भूतवर्गोऽपि यात्ययम् ॥ ६४ ॥
कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते ।
अविद्यासञ्चितं कर्म तच्चाशेषेषु जन्तुषु ॥ ६५ ॥

त्वयीति [illegible] ॥ ६० ॥ आस्था स्थितिः, [illegible] आस्थानम् । पादादिष्वन्तरेण देहस्यानिरूपणात् [illegible] भारत्वम् अतः देहस्यैव तावद् भारो दुर्वचः । मम तु सर्वथा भारः किंनिमित्तः [illegible] ॥ ६१ ॥ ६२ ॥ यत्तूक्तं त्वयोढा शिबिका भवेति तद्दूषयति त्वया [illegible] दृष्टं शरीरमेव शिबिकायां स्थितं न तु मम । तत्रापि तथा शिबिकायां [illegible] भूमौ [illegible] अन्यथा मिथ्यैव प्रोच्यते ॥ ६३ ॥ [illegible] [illegible] दारुणाम् । [illegible] [illegible] [illegible] गुणाः [illegible] भूतवर्गो देहा यान्ति । तदेवं भूतैरेव देहाकारपरिणतैः [illegible] सर्वे जीवाः तं तं [illegible] प्राप्यन्ते । [illegible] ॥ ६४ ॥ ६५ ॥

आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्ध्यपचयौ नास्य एकस्याखिलजन्तुषु ॥ ६६ ॥
यदा नोपचयस्तस्य न चैवापचयो नृप ! ।
तदा पीवानसीतीत्थं कया युक्त्या त्वयेरितम् ॥ ६७ ॥
भूपादजङ्घाकट्यूरुजठरादिषु संस्थिते ।
शिबिकेयं यदा स्कन्धे तदा भारः समस्त्वया ॥ ६८ ॥
तदान्यैर्जन्तुभिर्भूप ! शिबिकोत्था न केवलम् ।
शैलद्रुमगृहोत्थोऽपि पृथिवीसम्भवोऽपि वा ॥ ६९ ॥
यदा पुंसः पृथग्भावः प्राकृतैः कारणैर्नृप ! ।
सोढव्यस्तु तदायासः कथं वा नृपते ! मया ॥ ७० ॥
यद्द्रव्या शिबिका चेयं तद्द्रव्यो भूतसंग्रहः ।

परमात्मत्वे तु त्वदुक्तं पीवत्वादिकमयुक्तं निर्गुणत्वादित्याह, आत्मेति । शुद्धः देहाद्यतिरिक्तः अक्षरः अच्युतः । शान्तः रागादिशून्यः, निर्गुणः सत्त्वादिगुणशून्यः, प्रकृतेरपि परः, अतः अखिलजन्तुष्वेकस्य परिपूर्णस्य प्रवृद्ध्यपचयौ न स्तः ॥ ६६ ॥ यदा चैतौ न स्तः, तदा पीवेति भाषणमयुक्तमित्यर्थः ॥ ६७ ॥ इत्थं मम देहादिव्यतिरिक्तत्वात् भारो नास्तीत्युक्तम्, इदानीं मद्व्यतिरिक्तस्कन्धे स्थितो भारो यदि मे स्यात् तर्हि [illegible] न स्यात्, यदि वा [illegible] अपि शिबिकाया भारो मम [illegible] तर्हि पर्वतादिभारोऽपि किं नोच्यते इत्याह, भूपादेति द्वाभ्याम् । भूपादादिषु स्थिते स्कन्धे स्थितेयं शिबिका [illegible] यदि भारः स्यात् तदा [illegible] त्वया [illegible] स्यादित्यर्थः । तद्वत् तथा [illegible] भारः स्यादित्यर्थः ॥ ६८ ॥ ६९ ॥ [illegible] सोऽपि नास्तीत्याह, यदेति ॥ ७० ॥ किञ्च शिबिकायाः तव मम च शरीराणां भौतिकत्वे समाने किं तवेयं शिबिका । त्वं वा शिबिकायाः [illegible] वा [illegible]

भवता मेऽखिलस्यास्य समत्वेनोपलक्षितः ॥ ७१ ॥

पराशर उवाच ।

एवमुक्त्वाभवन्मौनी स वहन् शिबिकां द्विजः ।

सोऽपि राजावतीर्योर्व्यां तत्पादौ जगृहे त्वरन् ॥ ७२ ॥

राजोवाच ।

भो भो विसृज्य शिबिकां प्रसादं कुरु मे द्विज ।

कथ्यतां को भवानत्र जाल्मरूपधरः स्थितः ॥ ७३ ॥

यो भवान् यन्निमित्तं वा यदागमनकारणम् ।

तत् सर्वं कथ्यतां विद्वन् मह्यं शुश्रूषवे त्वया ॥ ७४ ॥

ब्राह्मण उवाच ।

श्रूयतां कोऽहमित्येतद् वक्तुं भूप न शक्यते ।

उपभोगनिमित्तञ्च सर्वत्रागमनक्रिया ॥ ७५ ॥

सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ

धर्माधर्मोद्भवौ भोक्तुं जन्तुर्देहादिमृच्छति ॥ ७६ ॥

सर्वस्यैव हि भूपाल जन्तोः सर्वत्र कारणम् ।

[illegible] ॥ ७१ ॥

॥ ७० ॥ [illegible] ॥ ७२ ॥ को भवानित्यादि [illegible]

[illegible]

[illegible] ॥ ७४ ॥ को भवानित्य [illegible]

[illegible]

[illegible]

॥ ७५ ॥ [illegible] सुखदुःखानि ।

[illegible] धर्माधर्मा [illegible], धर्माधर्मेति

॥ ७६ ॥ यदागमनकारणम् [illegible], सर्वत्रेति । [illegible]

धर्माधर्मौ यतः कस्मात् कारणं पृच्छसि ततः ॥ १७ ॥

राजोवाच ।

धर्माधर्मौ न सन्देहः सर्वकार्य्येषु कारणम् ।
उपभोगनिमित्तस्य देहाद्देहान्तरागमः ॥ १८ ॥
यत् त्वेतद् भवता प्रोक्तं कोऽहमित्यत्र तात्मनः ।
वक्तुं न शक्यते श्रोतुं तन्ममेच्छा प्रवर्त्तते ॥ १९ ॥
योऽस्ति सोऽहमिति ब्रह्मन् ! कथं वक्तुं न शक्यते ।
आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विज ॥ २० ॥

ब्राह्मण उवाच ।

शब्दोऽहमिति दोषाय आत्मन्येष तथैव तत ।

॥ यद्युपभोग[illegible] धर्माधर्मावेव सर्वत्र कारणं ततो मम गमने किमिति कारणं त्वया कस्मात् पृच्छ्यते ? इत्यर्थः ॥ १७ ॥ राजा तु [illegible] विदन्ति, धर्माधर्माविति त्रिभिः ॥ १८ ॥ कोऽहमित्येतद्[illegible]मात्मनो वक्तुं न शक्यते इति । यत् तु भवता प्रोक्तं तत् श्रोतुमिच्छामः ॥ १९ ॥ [illegible] स्यात् तर्हि वक्तुं न शक्नोति, न तु [illegible] योऽस्मीति । यदि च गुरो [illegible] शब्दो दोषाय स्यात् तर्हि वक्तुं न शक्नोति, तत्र [illegible] आत्मनीति ॥ २० ॥ [illegible] अहंपदस्य आत्म[illegible] शब्दोऽहमित्यादिना । अहमात्मेव शब्द आत्मनि दोषाय न भवतीति त्वया यदुक्तं तत् तथैव । किन्तु अहंपदस्य [illegible] स्यात् । अहंपदवाच्य आत्मा[illegible] स्यात्, अहंपदस्य [illegible] दोषाय स्यादित्यर्थः । तथापि अहं [illegible] प्रयुज्यते । तत्प्रयोगे च किं निमित्तम्? इति-

यमात्मन्यात्मविश्रामं गच्छतो वा भ्रान्तिसम्भवः ॥८१॥

जिह्वा ब्रवीत्यहमिति दन्तोष्ठं तालुकं नृप ! ।

एते नाहं यतः सर्वे वाङ्निष्पादनहेतवः ॥ ८२ ॥

किं हेतुभिर्वदत्येषा वागेवाहमिति स्वयम् ।

तथापि वाग् नाहमेतद् वक्तुमित्थं न युज्यते ॥ ८३ ॥

पिण्डः पृथग् यतः पुंसः पादपाण्यादिलक्षणः ।

ततोऽहमिति कुत्रैतां संज्ञां राजन् ! करोम्यहम् ॥८४॥

यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ! ।

तदैषोऽहमयञ्चान्यो वक्तुमेवमपीष्यते ॥ ८५ ॥

यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।

तदा हि को भवान् कोऽहमित्येतद् विफलं वचः ॥८६॥

त्वं राजा शिविका चेयम् इमे वाहाः पुरःसराः

—

स्थूलो वा कृशो वा ? पीवरो वा ? ॥८०॥ तत्र जिह्वादेरनात्मत्वमाह, जिह्वेति । एते जिह्वादयो नाहम्, अचेतनत्वात् न भवन्ति, जिह्वादिव्यतिरेकेणाभावात् । ननु वैते वाक्यनिष्पादने हेतवः वाक्-त्वमपि न तु वक्तारः, ततोऽपि ते नाहंशब्दवाच्याः ॥ ८२ ॥ वागीन्द्रिय-स्यापि अनात्मत्वमाह, किमिति । हेतुभिर्जिह्वादिभिः वदन्ती किं वागेव अहमस्मीति वदतीति चेत् तथापि वागिन्द्रियमहं न भवामि, अत एवमेतदपि न युज्यते ॥ ८३ ॥ इन्द्रियसङ्घातस्याप्यनात्मत्वमाह, पिण्ड इति । पिण्डं देहं पुंस आत्मनः पृथगेव लक्षणत्वात् पादादिमत्त्वात् ॥ ८४ ॥ भेदव्यवहारमप्याह, यदीति द्वाभ्याम् । यद्यन्यः सजातीयः परो विजातीयो वा यदि कोऽप्यस्ति तदा तत्सम्बन्धेनैषोऽहमिति वक्तुं युज्यते ॥ ८५ ॥ यदा सर्वदेहेष्वेक एव आत्मा व्यापितया व्यवस्थितः तदा को भवानिति वक्तुं विशेषेऽभ्यस्तः व्यवहारः कोऽहमित्यस्मत्प्रश्नस्यायुक्तत्वात् ॥८६॥ तत्र [illegible] वाहकादि-

अयत्र भवतो लोका न सदेतत् तथोच्यते ॥ ८७ ॥

वृक्षाद् दारु ततश्चेयं शिबिका त्वदधिष्ठिता ।

किं वृक्षसंज्ञा वास्याः स्याद् दारुसंज्ञाथ वा नृप ॥ ८८ ॥

वृक्षारूढो महाराजो नायं वदति ते जनः

न च दारुणि सर्वस्त्वां ब्रवीति शिबिकागतम् ॥ ८९ ॥

शिबिका दारुसंघातो रचनास्थितिसंस्थितः ।

अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया ॥ ९० ॥

एवं छत्रशलाकानां पृथग्भावो विमृश्यताम् ।

क्व यातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥ ९१ ॥

पुमान् स्त्री गौरजो वाजी कुञ्जरो विहगस्तरुः ।

चेतनभेदश्च च इत्यत्रापरत्वात् परमात्मनः सजातीयविजातीयभेदा भावोऽप्यभ्युपगन्तुं स्थिरस्य शिक्षात्मभाव, तां दर्शयति हिना । अपि च: पारमार्थिकः एतत् सर्वं सम्पद्यते यदि तु सदैव ॥ ८७ ॥ तत्र नार्थक्रियाकारित्वमात्र, यथा वृक्षः, ततः स्कन्धं पुष्पं चाथ दारु । तत अवयवा रचितेयं शिबिका । तदा च वृक्षदारुसंज्ञयोरभावात् अभिधानेन वृक्षदार्वभिधानमयुक्तं ॥ ८८ ॥ शिबिकास्थस्य वृक्षदारुसंज्ञाभिधाने तद्व्यवहारनिवृत्त्योपपादयति, वृक्षारूढ इति ॥ ८९ ॥ शिबिकावस्थाया अपि मिथ्यात्वमाह, शिबिकेति । रचनास्थिता अवस्थितो दारुसंघात एव शिबिका । तद्भेदे दार्वविभागे सति शिबिका कुतः तत्र त्वया नाधिष्ठेयाऽन्वेष्यताम् ॥ ९० ॥ एवं छत्रशलाका-समवायानां विभागे छत्रं क्व गतमिति विमृश्यताम् । तद्वत् शिबिकादिः अचेतनस्य सर्वं निरात्मकं तथैव न्यायं चेतनत्वेन अभ्युपगन्तव्यमिति, एव इति । यदि अहं च त्वं च देहे च विमृश्यता चिर पाञ्चभौतिक-विभागेन त्वं न चाहमित्यर्थः ॥ ९१ ॥ ननु तर्हि अहंकारस्य किं मूर्तविशेषेणात्र व्यवहारस्तत्राभिधाय, पुमान् स्त्रीति । कुत्रैव

देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु ॥ ८२ ॥

पुमान् न देवो न नरो न पशुर्न च पादपः ।

शरीराकृतिभेदास्तु भूपैते कर्मयोनयः ॥ ८३ ॥

वस्तु राजेति यल्लोके यच्च राजभटात्मकम् ।

तथान्यच्च नृपेत्थं तन्न सत् सङ्कल्पनामयम् ॥ ८४ ॥

यत् तु कालान्तरेणापि नान्यां संज्ञामुपैति वै ।

परिणामादिसंभूतं तद् वस्तु नृप ! तच्च किम् ॥ ८५ ॥

त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपोरिपुः ।

पत्न्याः पतिः पिता सूनोः किं त्वां भूप ! वदाम्यहम् ॥८६॥

त्वं किमेतच्छिरः किन्नु शिरस्तव तथोदरम् ।

किमु पादादिकं त्वं वा तवैतत् किं महीपते ! ॥८७॥

समस्तावयवेभ्यस्त्वं पृथग् भूप ! व्यवस्थितः ।

हेतुर्येषां तेषु देहेष्वेवेयं लोके संज्ञा नत्वात्मनि ॥ ८२ ॥ तत्र चांश-तया संज्ञैकरूप्यादिति दर्शयन्नाह पुमानिति ॥ ८३ ॥ अतो लोक-व्यवहारास्पदं वस्तु सङ्कल्पमात्रविलासत्वमित्याह, वस्त्विति ॥ ८४ ॥ एतदेव परमार्थवस्तुव्यतिरेकेण स्फुटीकरोति । यत्त्विति । परिणामादिना जाति संस्थानरं कालान्तरेणापि यन्न प्राप्नोति, तत् परमार्थवस्तु । तच्च किं ? न किञ्चित् । राजादीनामपि बाल्ययौवनादिपरिणामाद-वस्तुत्वमित्यर्थः । तदुक्तं [illegible] ॥८५॥ वर्तमानकालेऽप्यव-स्थितत्वात् [illegible], त्वं राजेति ॥ ८६ ॥ ननु राजादि-रूपस्य [illegible] इति शिरःपाण्यादिमानहमेव [illegible] त्वमिति । [illegible] वस्तु-[illegible] भावः ॥ ८७ ॥ ननु तथापि [illegible]

कोऽहमित्यत्र निपुणो भूत्वा चिन्तय पार्थिव ! ॥ ९८ ॥
एवं व्यवस्थिते तत्त्वे मयाहमिति भाषितुम् ।
पृथक्करणनिष्पाद्यं शक्यते नृपते ! कथम् ॥ ९९ ॥

चतुर्दशोऽध्यायः ।

पराशर उवाच ।

निशम्य तस्येति वचः परमार्थसमन्वितम् ।
प्रश्रयावनतो भूत्वा तमाह नृपतिर्द्विजम् ॥ १ ॥

राजोवाच ।

भगवन् ! यत् त्वया प्रोक्तं परमार्थमयं वचः ।
श्रुते तस्मिन् भ्रमन्तीव मनसो मम वृत्तयः ॥ २ ॥

सुपर्वेऽपर्वण्यपि दृष्टत्वेन पृथगंशरूपेण त्वं व्यवस्थितः । दृष्टुः स्वप्रकाशतया शब्दादिगोचरत्वासम्भवात् । त्वमेव स्वानुभवेन चिन्तयेत्याह, कोऽहमित्यत्रेति ॥ ९८ ॥ अतो मया यदुक्तं कोऽहमित्येतत् वक्तुं न शक्यत इति तत् सिद्धमित्युपसंहरति, एवमिति । एवमभिन्ने आत्मतत्त्वे व्यवस्थिते सति पृथक्करणेनान्यव्यवच्छेदेन निष्पाद्यमसाधारण्यमेवोऽहमित्याकारं वचं भाषितुं शक्यमित्यर्थः ॥ ९९ ॥

श्रुते तस्मिन्नित्यादिवाक्येन प्रमाणासम्भवे मते । प्रमेयसम्भवाशङ्की भूयोभूयोऽथ पृच्छति ॥ १ ॥ नाहं पीनेत्यादिवाक्यसन्दर्भतः प्रमाणाभ्यासवशात् निवृत्तावपि नानादर्शनपरिवर्तनेषु सर्वं परमार्थत्वे सति वाक्येन परमार्थं द्रष्टुं प्रमेयस्य सम्भावनया पृच्छति, भगवन्निति द्वाभ्याम् ॥ १-२ ॥ तस्मिन् त्वया किं परिच्छिन्नमुक्तं येन मम मनसो वृत्तयो भ्रमन्तीव भान्ति, एतदिति । यदेतत् विवेकविज्ञानं भवता दर्शितं

एतद् विवेकविज्ञानं यदशेषेषु जन्तुषु ।
भवता दर्शितं विप्र ! तत् परं प्रकृतेर्महत् ॥ ३ ॥
नाहं वहामि शिबिकां शिबिका न मयि स्थिता ।
शरीरमन्यदस्मत्तो येनेयं शिबिका धृता ॥ ४ ॥
गुणप्रवृत्त्या भूतानां प्रवृत्तिः कर्मचोदिता ।
प्रवर्त्तन्ते गुणा ह्येते किमेतद् यत् त्वयोदितम् ॥ ५ ॥
एतस्मिन् परमार्थज्ञ ! मम श्रोत्रपथं गते ।
मनो विह्वलतामेति परमार्थार्थितां गतम् ॥ ६ ॥
पूर्वमेव महाभागं कपिलर्षिमहं द्विज ! ।
प्रष्टुमभ्युद्यतो गत्वा श्रेयः किन्त्वत्र शंस मे ॥ ७ ॥
तदन्तरे च भवता यदेतद् वाक्यमीरितम् ।
तेनैव परमार्थार्थं त्वयि चेतः प्रधावति ॥ ८ ॥
कपिलर्षिर्भगवतः सर्वभूतस्य वै द्विज ! ।
विष्णोरंशो जगन्मोहनाशायोर्वीमुपागतः ॥ ९ ॥
स एव भगवान् नूनमस्माकं हितकाम्यया ।
प्रत्यक्षतामत्र गतो यथैतद् भवतोच्यते ॥ १० ॥
तस्मै प्रणताय त्वं यच्छ्रेयः परमं द्विज ! ।

तद् वदाखिलविज्ञानजलवीच्युदधिर्भवान् ॥ ११ ॥

ब्राह्मण उवाच ।

भूप ! पृच्छसि किं श्रेयः ? परमार्थं नु पृच्छसि ? ।

श्रेयांसि परमार्थानि अशेषाणि च भूपते ! ॥ १२ ॥

देवताराधनं कृत्वा धनसम्पदमिच्छति ।

पुत्रानिच्छति राज्यञ्च श्रेयस्तस्यैव तन्नृप ! ॥ १३ ॥

कर्म यज्ञात्मकं श्रेयः स्वर्लोकफलदायि च ।

श्रेयः प्रधानञ्च फले तदेवानभिसन्धिते ॥ १४ ॥

आत्मा ध्येयः सदा भूप ! योगयुक्तैस्तथापरम ।

श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मना ॥ १५ ॥

श्रेयांस्येवमनेकानि शतशोऽथ सहस्रशः ।

वीचयो यस्मिन् स तद्विधः परमपारावर्तो भवान् । अत परमार्थ-भूतं श्रेयो वदेत्यर्थः ॥ ११ ॥ तत्र शास्त्रान्तरसम्मत्या श्रेयो ऽन्यत्वमेव परमार्थ इति निश्चेतुं श्रेयःपरमार्थयोर्भेदं विकल्प पूर्वकमाह भूपेति । नु वितर्के श्रेयांसि परमार्थभूतानि न सन्ति विकल्पो न परमार्थोऽस्ति पाठे न विद्यते परमार्थभूतानां तेषु मानि मता ॥ १२ ॥ तान्येव श्रेयांस्यनेकप्रकाराणि सप्रपञ्चयन्ति देवतेति त्रिभिः । यो हि धनं पुत्रं राज्यं वाञ्छति, तस्य तदेव श्रेय इत्यन्वयः ॥ १३ ॥ फलेऽनभिसन्धिते तद् यज्ञादि कर्मैव प्रधानं मुख्यं श्रेयः । संकल्पिते तु यथा स्वर्गादि तथा तदेव श्रेय इत्यर्थः ॥ १४ ॥ आत्मा ध्येय इति श्रेयः आत्मध्यानं श्रेय इत्यर्थः ।

आत्मनः [illegible] यः परमात्मना संयोगः, स परं श्रेयः ॥ १५ ॥ श्रेयां

स्येवापरमार्थोऽनुक्तं भावयति । [illegible]

[illegible] वदन्ति [illegible] ऐश्वर्यं आत्मभोजनम् । केचिद् [illegible]

[illegible] विवदन्ते वदन्ति । [illegible] सर्वेषां श्रेयः

एतद् विवेकविज्ञानं यदशेषेषु जन्तुषु ।
भवता दर्शितं विप्र ! तत् परं प्रकृतेर्महत् ॥ ३ ॥
नाहं वहामि शिबिकां शिबिका न मयि स्थिता ।
शरीरमन्यदस्मत्तो येनेयं शिबिका धृता ॥ ४ ॥
गुणप्रवृत्त्या भूतानां प्रवृत्तिः कर्मचोदिता ।
प्रवर्त्तन्ते गुणा ह्येते किं ममेति त्वयोदितम् ॥ ५ ॥
एतस्मिन् परमार्थज्ञ ! मम श्रोत्रपथं गते ।
मनो विह्वलतामेति परमार्थार्थितां गतम् ॥ ६ ॥
पूर्वमेव महाभाग कपिलर्षिमहं द्विज ।
प्रष्टुमभ्युद्यतो गत्वा श्रेयः किन्वत्र शंस मे ॥ ७ ॥
तदन्तरे च भवता यदेतद् वाक्यमीरितम् ।
तेनैव परमार्थार्थं त्वयि चेतः प्रधावति ॥ ८ ॥
कपिलर्षिर्भगवतः सर्वभूतस्य वै द्विज ।
विष्णोरंशो जगन्मोहनाशायोर्वीमुपागतः ॥ ९ ॥
स एव भगवान् नूनमस्माकं हितकाम्यया ।
प्रत्यक्षतामत्र गतो यथैतद् भवतोच्यते ॥ १० ॥
तन्मह्यं प्रणताय त्वं यच्छ्रेयः परमं द्विज ।

तत् प्रकृतेः परं महद् वस्त्वेव दर्शितं, यद्वा महात्मा यस्येति सः कपि-
लर्षेरंशः ॥ ३ । ५ । ६ ॥ महाभागमित्यनुषङ्गः श्रेयः कुशलप्रश्नं
दर्शनव्याज पूर्वमेवाभि । अत्र संसारे किं श्रेयः इति प्रष्टु-
मभ्युद्यतः गत्वा मध्ये स्थितोऽस्मि ॥ ७ । ८ ॥ यथैतद् भवतोच्यते तथ
प्रत्यक्षतामत्र गतः स एव कपिलर्षिर्विष्णोरंशः स्वयमेवासीदिति भावः
॥ १० ॥ श्रेयसाम्राज्यानि विज्ञानानि सर्वाण्येवानि तानि च यथ-

तद्वदाखिलविज्ञानजलवीच्युदधिर्भवान् ॥ ११ ॥

ब्राह्मण उवाच ।

भूप ! पृच्छसि किं श्रेयः ? परमार्थं नु पृच्छसि ? ।

श्रेयांसि परमार्थानि अशेषाणि च भूपते ! ॥ १२ ॥

देवताराधनं कृत्वा धनसम्पदमिच्छति ।

पुत्रानिच्छति राज्यञ्च श्रेयस्तस्यैव तन्नृप ! ॥ १३ ॥

कर्म यज्ञात्मकं श्रेयः स्वर्लोकफलदायि च ।

श्रेयः प्रधानञ्च फले तदेवानभिसन्धिते ॥ १४ ॥

आत्मा ध्येयः सदा भूप ! योगयुक्तैस्तथापरम् ।

श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मना ॥ १५ ॥

श्रेयांस्येवमनेकानि शतशोऽथ सहस्रशः ।

वीचयो यस्मिन् स तद्विधः परमार्थ[illegible] भवान् । अतः परमार्थभूतं श्रेयो वक्तव्यः ॥ ११ ॥ तत्र [illegible] [illegible] परमार्थं इति [illegible] श्रेयःपरमार्थयोर्भेदं [illegible] पृच्छसि, भूपेति । नु [illegible] श्रेयांसि परमार्थभूतानि न [illegible] [illegible] न परमार्थानीति [illegible] न [illegible] परमार्थभूतानि तेषु मध्ये तथा ॥ १२ ॥ [illegible] [illegible] देवतेति [illegible] । यो [illegible] [illegible] [illegible] इच्छति, तस्य तदेव श्रेय इत्यन्वयः ॥ १३ ॥ फलेऽनभिसन्धिते तदेव यज्ञादि कर्मैव प्रधानं मुख्यं श्रेयः । [illegible] तु [illegible] [illegible] श्रेय इत्यर्थः ॥ १४ ॥ आत्मा ध्येय इति श्रेयः [illegible] श्रेय इत्यर्थः । [illegible] यः परमात्मना संयोगः, स परं श्रेयः ॥ १५ ॥ श्रेयांसि [illegible] भाषते । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible]

समस्तं परमार्थन्तु तत्त्वतः श्रूयताञ्च मे ॥ १६ ॥
धर्माय त्यज्यते किं नु परमार्थो धनं यदि ।
व्ययश्च क्रियते कस्मात् कामप्राप्त्युपलक्षणः ॥ १७ ॥
पुत्रश्चेत् परमार्थः स्यात् सोऽप्यन्यस्य नरेश्वर ।
परमार्थभूतः सोऽन्यस्य परमार्थो हि तत्पिता ॥ १८ ॥
एवं न परमार्थोऽस्ति जगत्यस्मिं श्चराचरे ।
परमार्था हि कार्य्याणि कारणानामशेषतः ॥ १९ ॥
राज्यादिप्राप्तिरत्रोक्ता परमार्थतया यदि
परमार्था भवन्त्यत्र न भवन्ति च वै ततः ॥ २० ॥
ऋग्यजुःसामनिष्पाद्यं यज्ञकर्म मतं तव ।
परमार्थभूतं तत्रापि श्रूयतां गदतो मम ॥ २१ ॥
यत्तु निष्पाद्यते कार्य्यं मृदा कारणभूतया ।
तत्कारणानुगमनात् जायते नृप मृन्मयम् ॥ २२ ॥

कर्मविनिर्मिताः । दुःखोदर्कास्ततोऽनित्याः कृतान्तग्रस्ताः पुरुषार्थाः, इत्यादिना ॥ १६ ॥ धनादीनाम् अपरमार्थत्वमुपपादयति, धर्माये-त्यादिना संक्षेपः श्रूयतां मयेत्यन्तेन । कामप्राप्त्युपलक्षणं निमित्तं यस्य व्ययस्य सः । पुत्रश्चेति द्वाभ्याम् । यदि पुत्रः परमार्थस्तर्हि तस्याप्यन्यस्य पुत्रत्वात् परमार्थभूतः सोऽन्यस्य तत्पितान्यस्य ॥ १७ ॥ एवंच परमार्थः कोऽपि नास्तीत्यनवस्था स्यात्, यस्मात् कार्य्याणि अन्यान्यपि पुत्रादीनि कारणानां जनकानां परमार्थः स्यात् तस्मात् अशेषः परमार्थः स्यात् ॥ १८ ॥ अत्र पक्षे परमार्था भवन्ति न भवन्ति चेति व्याहतं वोध्यम् । कामप्राप्तिविनाशाभ्यामिदं न परमार्थं इत्यर्थः ॥ २० ॥ यज्ञादिकाण्डस्य कर्मादिरुपनिषत्तां यावदपरमार्थतामाह, ऋगिति चतुर्भिः । यज्ञकर्मेति यत्तेरारम्भणं कर्मादिकं परमार्थभूतं यदुक्तं मतमिति ॥ २१ ॥ २२ ॥ या

एवं विनाशिभिर्द्रव्यैः समिदाज्यकुशादिभिः ।
निष्पाद्यते क्रिया या तु सा भवित्री विनाशिनी ॥२३॥
अनाशी परमार्थस्तु प्राज्ञैरभ्युपगम्यते ।
तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम् ॥ २४ ॥
तदेवाफलदं कर्म परमार्थो मतस्तव ।
मुक्तिसाधनभूतत्वात् परमार्थो न साधनम् ॥ २५ ॥
ध्यानञ्चैवात्मनो भूप परमार्थार्थशब्दितम् ।
भेदकारि परेभ्यस्तु परमार्थो न भेदवान् ॥ २६ ॥
परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥२७॥
तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः ।
परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम ॥ २८ ॥
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ।

क्रिया निष्पाद्यते इति क्रियाद्वारा तत्र समिदादिवत् तत्सम्पादितं तदिदानीं सर्वमित्यर्थः ॥ २३ ॥ २४ ॥ मुक्तिसाधनभूतस्य फलवदर्शनस्य स-ध्यात्वात् । साधनत्वात् परमार्थो न भवतीत्यर्थः ॥ २५ ॥ परेभ्यो देवादिभ्यो भिन्नत्वात्मतत्त्वनीभूतस्य ध्येयत्वात् ध्यानं भेदकारि-परमार्थस्तु न भेदवान् । एकमेवाद्वितीयं ब्रह्मेति श्रुतेः ॥ २६ ॥ जीवपरमात्मनोरैक्यापादकतया तादात्म्यरूपो योगः परमार्थ इत्येतदपि मिथ्यैव । तयोर्हि भिन्नयोरभिन्नयोर्वा योगः स्यात् । भिन्नत्वे घटपटयोरिवैक्यासम्भवः, अभिन्नत्वे च बिम्बप्रतिबिम्बयोरिव घटाभि-न्नुदाहरणात् विना योगशब्दार्थो नास्तीत्यर्थः ॥ २७ ॥ तस्मात् श्रेयांस्येवैतानि भवन्ति न तु परमार्थरूपाणि । परमार्थस्तु वक्ष्यमाणः ॥ २८ ॥ स च एक एव न तु प्रतिदेहं भिन्नः, व्यापी व्यापकतया सर्वव्यापकः, समः देवादिषु न तु ज्ञानादिपरिणामैर्भेदवत्.

अपक्षयादिरहित आत्मा सर्वगतोऽव्ययः ॥ २९ ॥
परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः ।
न योगवान् न युक्तोऽभून्नैव पार्थिव योक्ष्यते ॥ ३० ॥
तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः ॥ ३१ ॥
वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोस्तथा तस्य महात्मनः ॥ ३२ ॥

पुष्ट्यादिवज्जन्मादिकमप्यूह्यम् । अतो अपक्षयादिभिर्द्रव्यादिविकारैर्वर्जितः । अत एव सर्वगतः, न तु देहपरिमाणः । अतो मध्यपरिमाणत्वाभावात् अव्ययः ॥ २९ ॥ परज्ञानमयः चिन्मात्रस्वरूपः । न तु गुणिज्ञानात्मा । असद्भिः अविद्यामयैः नामजात्यादिभिः वर्तमानभूतभविष्यत्कालेषु योगशून्यः । अतः विभुः ईश्वरः स्वतन्त्र इत्यर्थः ॥ ३० ॥ ननु प्रतिदेहमात्मनो भेदविकारादिप्रतीतेः कथमेकत्वसर्वगतत्वादि ? तत्राह तस्येति । आत्मपरदेहेषु तद्देहाकाराकारतया सतः स्थितस्याप्येकाकारं यत् विशिष्टं अपकारापरिच्छिन्नं ज्ञानं स एव परमार्थः, भेदप्रतीतेरुपाधिनिबन्धनत्वात् । द्वैतवादिनोऽपरमार्थदर्शिन ॥ ३१ ॥ एतत् दृष्टान्तेनोपपादयति वेणुरन्ध्रेति द्वाभ्याम् । अभेदव्यापिनो वायोर्यथा वेणुरन्ध्रोपाधिभेदेन षड्जर्षभगान्धारादिस्वराभिव्यञ्जकत्वात् स षड्जादिसंज्ञितो भेदस्तथा तस्य अखण्डोऽपरिच्छिन्नस्य आत्मनः अत एकत्वम् ॥ ३२ ॥ रूपभेदस्तु देवमनुष्यादिलक्षणो बाह्यकर्मप्रवृत्तिजः बाह्यानामात्मनः पृथग्भूतानां देहेन्द्रियादीनां यत् कर्म तस्य प्रवृत्तिः फलं ततो जातः । पाठान्तरे बाह्यानां देहानां कर्मभिः या आवृत्तिः आवरणं ततः प्रजायते इति बाह्यकर्मावृत्तिजन्यो भेदः, नतु स्वतः । तत्र हेतुः । यस्मात् देवादिभेदे अपध्वस्ते विनष्टे अभेदेनेति भेदः अहङ्कारः, देवादिभेदे देहे यावत् अहङ्कारावरणं सुषुप्त्यादौ विलये च भेदो नास्त्येव । देवादिभेदप्रध्वस्ते इति पाठे तु बाह्य-

एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः॥९३॥



पञ्चदशोऽध्यायः।

पराशर उवाच।

इत्युक्ते मौनिनं भूयश्चिन्तयानं महीपतिम्।
प्रत्युवाचाथ विप्रोऽसावद्वैतान्तर्गतां कथाम्॥१॥

ब्राह्मण उवाच।

श्रूयतां नृपशार्दूल! यद्गीतमृभुणा पुरा।
अवबोधं जनयता निदाघस्य महात्मनः॥२॥
ऋभुर्नामाभवत् पुत्रो ब्रह्मणः परमेष्ठिनः।
विज्ञाततत्त्वसद्भावो निसर्गादेव भूपते!॥३॥
तस्य शिष्यो निदाघोऽभूत् पुलस्त्यतनयः पुरा।
प्रादादशेषविज्ञानं स तस्मै परया मुदा॥४॥
अवाप्तज्ञानतत्त्वस्य न तस्याद्वैतवासनाम्।

अथावरणविनिर्मुक्तो रूपभेदोऽपहार्य एव देवादिभेदस्य ध्वस्ते [illegible] वर्णते। अतस्तु भेदो बाह्य एव यस्मात् आवरणे ध्वस्ते न भेदः नास्त्येवेत्यर्थः॥९३॥



एवमाचरन्नपि: [illegible] मौने स्थितेऽपि नृपतौ। पुनरद्वैतबोधार्थं निदाघाख्यानमवतारयति॥ इत्युक्ते [illegible] अपि विपरीते भावनादार्ढ्यात् पुनरद्वैतबोधाय मौनिनं तूष्णीं चिन्तयानं भूयो विप्रः प्रत्युवाच॥१॥२॥ निसर्गात् स्वभावादेव विज्ञातं तत्त्वस्य सद्भावो याथार्थ्यं येन सः॥३॥४॥ [illegible]

स ऋभुस्तर्कयामास निदाघस्य नरेश्वर ॥ ५ ॥
देविकायास्तटे वीरनगरं नाम वै पुरम् ।
समृद्धमतिरम्यञ्च पुलस्त्येन निवेशितम् ॥ ६ ॥
रम्यापवनपर्य्यन्ते स तस्मिन् पार्थिवोत्तम ।
निदाघो नाम योगज्ञ ऋभुशिष्योऽवसत् पुरा ॥ ७ ॥
दिव्ये वर्षसहस्रे तु समतीतेऽस्य तत् पुरम् ।
जगाम स ऋभुः शिष्यं निदाघमवलोककः ॥ ८ ॥
स तस्य वैश्वदेवान्ते द्वारालोकनगोचरे ।
स्थितस्तेन गृहीतार्घ्यो निजवेश्म प्रवेशितः ॥ ९ ॥
प्रक्षालिताङ्घ्रिपाणिञ्च कृतासनपरिग्रहम् ।
उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरम् ॥ १० ॥

ऋभुरुवाच ।

भो विप्रवर्य्य ! भोक्तव्यं यदन्नं भवतो गृहे ।
तत् कथ्यतां कदन्नेषु न प्रीतिः सततं मम ॥ ११ ॥

निदाघ उवाच ।

सक्तुयावकवाट्यानामपूपानाञ्च मे गृहे ।
यद्रोचते द्विजश्रेष्ठ ! तत् त्वं भुङ्क्ष्व यथेच्छया ॥ १२ ॥

द्रष्टुं तर्कयामास ॥ ५ ॥ देविकायाः नद्यास्तटे ॥ ६ ॥ रम्यः उपवनपर्य्यन्तो यस्य तस्मिन् । योगज्ञः तत्त्वज्ञः ॥ ७ ॥ प्रक्षाल्यौ क्रियायां क्रियार्थायाम् इति सूत्रे पुणोरेनाविश्वासादेव प्रक्षाल्यैव इति द्रष्टव्यम् आत्मनोऽपि विश्वासिनश्चः ॥ १० ॥ तत्त्वमपरीक्षार्थ-माह भो विप्रवर्य्येत्यादि ॥ ११ ॥ यावको यवविकारः । वाट्यं वाट्यौदनं यव्यमित्यादि ॥ १२ ॥ स्वादु मधुरं तत्रापो मोदकादि-

ऋभुरुवाच ।

कदन्नानि द्विजैतानि मृष्टमन्नं प्रयच्छ मे ।
संयावपायसादीनि द्रप्सफाणितवन्ति च ॥ १३ ॥

निदाघ उवाच ।

हे हे शालिनि ! मद्गेहे यत् किञ्चिदतिशोभनम् ।
भक्ष्योपसाधनं मृष्टं तेनास्यान्नं प्रसाधय ॥ १४ ॥

ब्राह्मण उवाच ।

इत्युक्ता तेन सा पत्नी मिष्टमन्नं द्विजस्य यत् ।
प्रसाधितवती तद्वै भर्त्तुर्वचनगौरवात् ॥ १५ ॥
तं भुक्तवन्तमिच्छातो मिष्टमन्नं महामुनिम् ।
निदाघः प्राह भूपाल ! प्रश्रयावनतः स्थितः ॥ १६ ॥

निदाघ उवाच ।

अपि ते परमा तृप्तिरुत्पन्ना तुष्टिरेव च ।
अपि ते मानसं स्वस्थमाहारेण कृतं द्विज ! ॥ १७ ॥
क्व निवासो भवान् विप्र ! क्व च गन्तुं समुद्यतः
आगम्यते च भवता यतस्तच्च द्विजोच्यताम् ॥ १८ ॥

ऋभुरुवाच ।

क्षुद् यस्य तस्य भुक्तेऽन्ने तृप्तिर्ब्राह्मण ! जायते ।
न मे क्षुन्नाभवत् तृप्तिः कस्मान्मां परिपृच्छसि ॥ १९ ॥
वह्निना पार्थिवे धातौ क्षपिते क्षुत्समुद्भवः ।

निवारकमन्नमुपविश्य: । "द्रप्सं दधिघनं मतम्" इत्यमरसिंहः । "फाणितं शिखरिणीक्षौद्रौ" इति च वचाद्युः ॥ १३ ॥ शालिनि ! श्लाघ्ये प्रिये ! भक्ष्योपसाधनमुपस्कारः ॥ १४ ॥ १६ ॥ तृप्तिः क्षुन्निवृत्तिः शान्तिः, तुष्टिः सन्तोषः, स्वस्थं प्रसन्नम् ॥ १७ ॥ क्व निवासस्तवेति शेषः

भवत्यम्भसि च क्षीणे नृणां तृडपि जायते ॥ २० ॥

क्षुत् तृषौ देहधर्माख्ये न ममैते यतो द्विज ! ।
ततः क्षुत्सम्भवाभावात् तृप्तिरस्त्येव मे सदा ॥ २१ ॥

मनसः स्वस्थता तुष्टिश्चित्तधर्माविमौ द्विज ! ।
चेतसो यस्य तत् पृच्छ पुमानेभिर्न युज्यते ॥ २२ ॥

क्व निवासस्तवेत्युक्तं क्व गन्तासि च यत् त्वया ।
कुतश्चागम्यते तत्र त्रितयेऽपि निबोध मे ॥ २३ ॥

पुमान् सर्वगतो व्यापी आकाशवदयं यतः ।
कुतः कुत्र क्व गन्तासीत्येतदप्यर्थवत् कथम् ॥ २४ ॥

नाहं गन्ता नचागन्ता नैकदेशनिकेतनः
त्वञ्चान्ये च न च त्वं त्वं नान्ये नैवाहमप्यहम् ॥ २५ ॥

॥ १८ । २० ॥ देहधर्माख्ये देहस्य धर्माख्यौ प्राणिवायुधारणाभ्यां जायमाने इति । ते च तद्द्वारा प्राणधर्मौ जलनाडिपाकादि प्राणस्येति श्रुतेः । अत प्राणव्यतिरिक्तस्यैते न स्तः । तृप्तिमत्त्वे तु क्षुत्सम्भवाभावात् न प्रत्यक्षमत्र प्रकारः ॥ २१ ॥ मनसः स्वस्थता च तुष्टिश्चेति यत् पृष्टम्, इमौ तु चित्तस्य धर्मौ अतो यस्य चेतसश्चित्तस्य इमौ धर्मौ तच्चित्तमेव पृच्छ न त्वहं पुमान् प्रष्टव्यः । यतः पुमानेभिः स्वास्थ्यतुष्टिधर्मैश्चित्तस्य न युज्यते ॥ २२।२३ ॥ वायुवत् क्रमेण सर्वगतत्वं व्यापित्वं लोकत्रयम् ॥ २४ ॥ न केवलम् अहमेवेत्थम्भूतः किन्तु त्वमन्ये च सर्वेऽपि । ननु मम चान्येषाञ्च तव च परिच्छेदकत्वमदिहदर्शनात् कथं सर्वगतत्वमुच्यते ? तत्राह नच त्वमिति । यथा गोलिकाः परिच्छिन्नाः प्रतीयन्ते, एवं त्वं न भवसि । ये चान्ये प्राहेलिकाः प्रतीयन्ते तथाविधा-स्तेऽन्ये न भवन्ति । अहमपि तादृगाकारो दृश्यो न नाहमोऽहम्, किन्तु सर्वत्र विद्यादिमद्यगोचरः परमात्मैव सर्वं सर्वं, अतो न सर्वगतत्वविरोधः ॥ २५ ॥ सर्वेषु गतिं स्वरूपमेवाह सर्वा विषयं वाचितं ?

मृष्टं न मृष्टमप्येषा जिज्ञासा ते कृता तव ।
किं वक्ष्यसीति तत्रापि श्रूयतां द्विजसत्तम ॥ २६ ॥
किमस्वाद्वथवा मृष्टं भुञ्जतोऽन्नं द्विजोत्तम ।
मृष्टमेव यदाऽमृष्टं तदेवोद्वेगकारकम् ॥ २७ ॥
अमृष्टं जायते मृष्टं मृष्टादुद्विजते जनः ।
आदिमध्यावसानेषु किमन्नं रुचिकारकम् ॥ २८ ॥
मृन्मयं हि गृहं यद्वन्मृदा लिप्तं स्थिरं भवेत् ।
पार्थिवोऽयं तथा देहः पार्थिवैः परमाणुभिः ॥ २९ ॥
यवगोधूममुद्गादि घृतं तैलं पयो दधि ।
गुडं फलादीनि तथा पार्थिवाः परमाणवः ॥ ३० ॥

तत्राह मृष्टमिति । एवं भवोक्तो त्वं किं वक्ष्यसीति तव जिज्ञासा कृता । किन्तु मृष्टामृष्टभोजने यदा कृते तथा वस्तुतो [illegible] किम [illegible] वक्ष्यसि न वेति [illegible] कृता तत्र मृष्टादि- [illegible] । तच्छ्रूयतामित्यन्वयः ॥ २६ ॥ तदेवाह किमिति [illegible] । किमस्वादु अमृष्टम् अथवा किं मृष्टम् [illegible] भुञ्जानस्य [illegible] न किञ्चिदस्ति । तदेवाह, यत् मृष्टं तदेव यदा [illegible] तदा अमृष्टं भवति ॥ २७ ॥ [illegible] अमृष्टमेव [illegible] मृष्टं जायते तदेव यदा मृष्टादेव जनः कदाचिदुद्विजते, तदा आदिमध्यावसानेषु नियतं रुचिकारकं अन्नं किमस्ति ? न किञ्चिदस्तीति ॥ २८ ॥ तर्हि किमिति तथा मृष्टमेव भुङ्क्ते तत्राह, मृन्मयमिति । पार्थिवैः परमाणुभिः [illegible] उपचितो देहः, स्थिरो भवति ॥ २९ ॥ [illegible] मृष्टमपि [illegible] भुक्तं तत्र [illegible] । [illegible] परमाणवः [illegible], इति ॥ ३० ॥ [illegible]

तदेतद् भवता ज्ञात्वा मुख्यामुख्यविचारि यत् ।
तन्मनःसमतालम्बि कार्य्यं साम्यं हि मुक्तये ॥ २१ ॥

ब्राह्मण उवाच ।

इत्याकर्ण्य वचस्तस्य परमार्थाश्रितं नृप ।
प्रणिपत्य महाभागो निदाघो वाक्यमब्रवीत् ॥ २२ ॥

निदाघ उवाच ।

प्रसीद मद्धितार्थाय कथ्यतां यस्त्वमागतः ।
नष्टो मोहस्तथाकर्ण्य वचांस्येतानि मे द्विज ॥ २३ ॥

ऋभुरुवाच ।

ऋभुरस्मि तवाचार्य्यः प्रज्ञादानाय ते द्विज ।
इहागतोऽहं यास्यामि परमार्थस्तवोदितः ॥ २४ ॥

एवमेकमिदं विद्धि न भेदि सकलं जगत् ।
वासुदेवाभिधेयस्य स्वरूपं परमात्मनः ॥ २५ ॥

ब्राह्मण उवाच ।

तथेत्युक्ता निदाघेन प्रणिपातपुरःसरम् ।
पूजितः परया भक्त्या इच्छातः प्रययावृभुः ॥ २६ ॥

... तदेतदिति । मुख्यामुख्यविचारयोग्यं यत् मनः, तत् समतावलम्बनयोग्यं कार्य्यम्, यतो ... मुक्तये भवति ॥ २१ ॥ २२ ॥ २३ ॥ प्रज्ञादानायेति । ... ॥ २४ ॥ न भेदि ... भवति ॥ २५ ॥ २६ ॥

षोडशोऽध्यायः ।

ब्राह्मण उवाच ।

ऋभुर्वर्षसहस्रे तु समतीते नरेश्वर ! ।
निदाघज्ञानदानाय तदेव नगरं ययौ ॥ १ ॥
नगरस्य बहिः सोऽथ निदाघं ददृशे मुनिः ।
महाबलपरीवारे पुरं विशति पार्थिवे ॥ २ ॥
दूरे स्थितं महाभागं जनसंमर्दवर्जकम् ।
क्षुत्क्षामकण्ठमायान्तमरण्यात् ससमित्कुशम् ॥ ३ ॥
दृष्ट्वा निदाघं स ऋभुरुपगम्याभिवाद्य च ।
उवाच कस्मादेकान्ते स्थीयते भवता द्विज ॥ ४ ॥

निदाघ उवाच ।

भो विप्र ! जनसंमर्दो महानेष जनेश्वरे ।
प्रविविक्षौ पुरं रम्यं तेनात्र स्थीयते मया ॥ ५ ॥

ऋभुरुवाच ।

नराधिपोऽत्र कतमः कतमश्चेतरो जनः ।
कथ्यतां मे द्विजश्रेष्ठ ! त्वमभिज्ञो मतो मम ॥ ६ ॥

वर्षसहस्रे समतीते निदाघज्ञानदानाय ययाविति यदुक्तं तत्र [illegible] चिरकालाभ्यस्तदेहाद्यभिमानस्य दुर्भगता दर्शयति ॥ १ ॥ क्षुत्क्षा- [illegible] जनसंमर्दवर्जकम् । [illegible] ॥ २ ॥ [illegible] ॥ ४ ॥ ५ ॥ ६ ॥ नर-

निदाघ उवाच ।

योऽयं गजेन्द्रमुन्मत्तमद्रिशृङ्गसमुच्छ्रितम् ।
अधिरूढो नरेन्द्रोऽयं परलोकस्तथेतरः ॥ ७ ॥

ऋभुरुवाच ।

एतौ हि गजराजानौ युगपद्दर्शितौ मम ।
भवता न विशेषेण पृथक् चिह्नोपलक्षणौ ॥ ८ ॥
तत् कथ्यतां महाभाग विशेषो भवतानयोः ।
ज्ञातुमिच्छाम्यहं कोऽत्र गजः को वा नराधिपः ॥ ९ ॥

निदाघ उवाच

गजो योऽयमधो ब्रह्मन्नुपर्यस्यैष भूपतिः ।
वाह्यवाहकसम्बन्धं को न जानाति वै द्विज ॥ १० ॥

ऋभुरुवाच ।

जानाम्यहं यथा ब्रह्मंस्तथा मामवबोधय ।
अधःशब्दनिगद्यं किं किं चोर्ध्वमभिधीयते ॥ ११ ॥

ब्राह्मण उवाच ।

इत्युक्तः सहसारुह्य निदाघः प्राह तमृभुम् ।
श्रूयतां कथयाम्येष यन्मां त्वं परिपृच्छसि ॥ १२ ॥
उपर्यहं यथा राजा त्वमधः कुञ्जरो यथा ।
अवबोधाय ते ब्रह्मन् दृष्टान्तो दर्शितो मया ॥ १३ ॥

ऋभुरुवाच ।

त्वं राजेव द्विजश्रेष्ठ स्थितोऽहं गजवद्यदि ।

इतरः परजनः ॥ ७ ॥ ८ ॥ १२ ॥ तदुपरि आरोहणमात्रेण प्रत्युक्तवान्, दृष्टान्तं दर्शयन् इति ॥ १३ ॥ यद्येवं त्वं वदसि तत् [illegible] [illegible]

तदेतत् त्वं समाचक्ष्व कतमस्त्वमहं तथा ॥ १४ ॥

ब्राह्मण उवाच ।

इत्युक्तः सत्वरं तस्य प्रगृह्य चरणावुभौ ।
निदाघः प्राह भगवानाचार्य्यस्त्वमृभुर्ध्रुवम् ॥ १५ ॥
नान्यस्याद्वैतसंस्कारसंस्कृतं मानसं तथा ।
यथाचार्य्यस्य तेन त्वां मन्ये प्राप्तमहं गुरुम् ॥ १६ ॥

ऋभुरुवाच ।

तवोपदेशदानाय पूर्व्वशुश्रूषणादृतः ।
गुरुस्तेऽहमृभुर्नाम्ना निदाघ ! समुपागतः ॥ १७ ॥
तदेतदुपदिष्टं ते संक्षेपेण महामते ! ।
परमार्थसारभूतं यदद्वैतमशेषतः ॥ १८ ॥

ब्राह्मण उवाच ।

एवमुक्त्वा ययौ विद्वान् निदाघं स ऋभुर्गुरुः ।
निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत् ॥ १९ ॥
सर्व्वभूतान्यभेदेन ददृशे स तदात्मनः ।
यथा ब्रह्मपरो मुक्तिमवाप परमां द्विज ! ॥ २० ॥
तथा त्वमपि धर्म्मज्ञ ! तुल्यात्मरिपुबान्धवः ।
भव सर्व्वगतं जानन् आत्मानमवनीपते ! ॥ २१ ॥
सितनीलादिभेदेन यथैकं दृश्यते नभः ।

[illegible] न त्वं नाहं, न चान्येऽन्ये, नान्यदस्तीति ॥ १४ ॥

पूर्व्वं यदुक्तं [illegible] तदेव स्मारितः सन् चरणौ प्रगृह्य भावविशुद्धाय प्राह, ध्रुवं त्वं ममाचार्य्य इति ॥ १५ ॥

सर्व्वगतं [illegible] ॥ २१ ॥ [illegible]

आत्मदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥ २२ ॥

एकः समस्तं यदिहास्ति किञ्चित्
तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेतत्
आत्मस्वरूपं त्यज भेदमोहम् ॥ २३ ॥

पराशर उवाच ।

इतीरितस्तेन स राजवर्य्यस्तत्याज भेदं परमार्थदृष्टिः ।
स चापि जातिस्मरणाप्तबोधस्तत्रैव जन्मन्यपवर्गमाप ॥ २४ ॥

इति भरतनरेन्द्रसारवृत्तं
कथयति यश्च शृणोति भक्तियुक्तः ।
स विमलमतिरेति नात्ममोहं
भवति च संसरणेषु मुक्तियोग्यः ॥ २५ ॥

भेदस्याप्यपारमार्थ्यत्वेन सम्यगेव परिहृत्य निगमयति एक इति ॥ २२ ॥ २३ ॥ जातिस्मरणेन प्राप्तो बोधो येन, भरत-जन्मस्मरणेन हि तदा ब्रह्मभावेन यत् उपदिष्टं ज्ञानं तदेव योग-स्य तत्त्वमुपकारकमभूदित्यर्थः । तत्र-एव जन्मन्यपवर्गं प्राप ॥ २४ ॥ संसरणेष्वपि सत्स्वेव मुक्ति-योग्यः इत्यर्थः ।

तृतीयांशः ।

प्रथमोऽध्यायः ।

मैत्रेय उवाच ।

कथिता गुरुणा सम्यक् भूसमुद्रादिसंस्थितिः ।
सूर्य्यादीनाञ्च संस्थानं ज्योतिषामपि विस्तरात् ॥ १ ॥
देवादीनां तथा सृष्टिरृषीणामपि वर्णिता ।
चातुर्वर्ण्यस्य चोत्पत्तिस्तिर्य्यग्योनिगतस्य च ॥ २ ॥
ध्रुवप्रह्लादचरितं विस्ताराच्च त्वयोदितम् ।
मन्वन्तराण्यशेषाणि श्रोतुमिच्छाम्यनुक्रमात् ॥ ३ ॥
मन्वन्तराधिपांश्चैव शक्रदेवपुरोगमान् ।
भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो ॥ ४ ॥

पराशर उवाच ।

अतीतानागतानीह यानि मन्वन्तराणि वै ।
तान्यहं भवते सम्यक् कथयामि यथाक्रमम् ॥ ५ ॥

[illegible] ॥ १ ॥ [illegible] ॥ २ ॥ [illegible]

स्वायम्भुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ।
औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥ ६ ॥

षडेते मनवोऽतीताः साम्प्रतन्तु रवेः सुतः ।
वैवस्वतोऽयं यस्यैतत् सप्तमं वर्त्ततेऽन्तरम् ॥ ७ ॥

स्वायम्भुवन्तु कथितं कल्पादावन्तरं मया ।
देवास्तत्सप्तर्षयश्चैव यथावत् कथिता मया ॥ ॥

अत ऊर्द्ध्वं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु ।
मन्वन्तराधिपान् सम्यक् देवर्षींस्तत्सुतांस्तथा ॥ ९ ॥

पारावताः सतुषिता देवाः स्वारोचिषेऽन्तरे ।
विपश्चिच्चैव देवेन्द्रो मैत्रेयासीन्महाबलः ॥ १० ॥

ऊर्ज्जः स्तम्भस्तथा प्राणो दत्तोलिऋषभस्तथा ।
निश्चरश्चार्ववीरांश्च तत्र सप्तर्षयोऽभवन् ॥ ११ ॥

चैत्रकिम्पुरुषाद्याश्च सुताः स्वारोचिषस्य तु ।
द्वितीयमेतत् कथितमन्तरं शृणु चोत्तमम् ॥ १२ ॥

तृतीये त्वन्तरे ब्रह्मन् औत्तमिर्नाम यो मनुः ।
सुशान्तिर्नाम देवेन्द्रो मैत्रेयासीत् सुरेश्वरः ॥ १३ ॥

सुधामानस्तथा सत्याः शिवाश्चासन् प्रतर्दनाः ।
वशवर्त्तिनश्च पञ्चैते गणा द्वादशकाः स्मृताः ॥ १४ ॥

६॥ [illegible] । [illegible], [illegible] [illegible] कथितौ ॥ ८ ॥ देवर्षीन् देवान् ऋषींश्च तत्सुतान् मनुपुत्रान् ॥ ९ ॥ पारावतास्तुषिताश्च देवगणौ । विपश्चित्तन्नामा देवेन्द्रः ॥ १० ॥ [illegible] । [illegible] ॥ १४ ॥ द्वादशकाः द्वादशानां [illegible] [illegible] [illegible]

वसिष्ठतनयास्तत्र सप्त सप्तर्षयोऽभवन् ।
ऊर्जः पराद्याश्चत्वारस्तामसमनोः सुताः ॥ १५ ॥
तामसस्यान्तरे देवाः सुरूपा हरयस्तथा ।
सत्याश्च सुधियश्चैव सप्तविंशतिका गणाः ॥ १६ ॥
शिबिरिन्द्रस्तथा चासीच्छतयज्ञोपलक्षणः ।
सप्तर्षयश्च ये तेषां तत्र नामानि मे शृणु ॥ १७ ॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा ।
पीवरश्चर्षयो ह्येते सप्त तत्रापि चान्तरे ॥ १८ ॥
नरः ख्यातिः शान्तहयो जानुजङ्घादयस्तथा ।
पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः ॥ १९ ॥
पञ्चमे चापि मैत्रेय ! रैवतो नाम नामतः ।
मनुर्विभुश्च तत्रेन्द्रो देवांश्चैवान्तरे शृणु ॥ २० ॥
अमिताभा भूतरजो वैकुण्ठाः ससुमेधसः ।
एते देवगणास्तत्र चतुर्दश चतुर्दश ॥ २१ ॥
हिरण्यरोमा वेदश्रीरूर्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥ २२ ॥
एते सप्तर्षयो विप्र ! तत्रासन् रैवतेऽन्तरे ।
बलबन्धुः सुसम्भाव्यः सत्यकाद्याश्च तत्सुताः ॥ २३ ॥
नरेन्द्राः सुमहावीर्या बभूवुर्मुनिसत्तम ! ॥ २४ ॥
स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा ।
प्रियव्रतान्वया ह्येते चत्वारो मनवस्तथा ॥ २५ ॥

॥ १५ ॥ १६ ॥ सप्तविंशतिकाः सप्तविंशतिसंख्याः गणाः समूहाः । तत्र तामसे मन्वन्तरे ये सप्तर्षयः तेषां नामानि मे मत्तः शृणु इत्यन्वयः ॥ १७ ॥ ज्योतिर्धामेत्यादयः

विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः ।
मन्वन्तराधिपानेतान् लब्धवानात्मवंशजान् ॥ २६ ॥
षष्ठे मन्वन्तरे चासीच्चाक्षुषाख्यस्तथा मनुः ।
मनोजवस्तथैवेन्द्रो देवानपि निबोध मे ॥ २७ ॥
आद्याः प्रसूता भव्याश्च पृथगाश्च दिवौकसः ।
महानुभावा लेखाश्च पञ्चैते ह्यष्टका गणाः ॥ २८ ॥
सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥ २९ ॥
ऊरु पूरु शतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥ ३० ॥
विवस्वतः सुतो विप्र श्राद्धदेवो महाद्युतिः ।
मनुः संवर्तते धीमान् साम्प्रतं सप्तमेऽन्तरे ॥ ३१ ॥
आदित्यवसुरुद्राद्या देवाश्चात्र महामुने ।
पुरन्दरस्तथैवात्र मैत्रेय त्रिदशेश्वरः ॥ ३२ ॥
वसिष्ठः काश्यपोऽथात्रिर्जमदग्निः सगौतमः ।
विश्वामित्रो भरद्वाजः सप्त सप्तर्षयोऽभवन् ॥ ३३ ॥
इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभ उद्दिष्ट एव च ॥ ३४ ॥

नाम ॥ १९ ॥ [illegible] नाम नामत इति [illegible] नामतः [illegible]
[illegible] ॥ २० ॥ [illegible] एते गणाः ॥ २१ ॥ २२ ॥
[illegible] इति विशेषणद्वयम् । [illegible]
[illegible] । [illegible]
[illegible] । तथा [illegible] पुत्रा [illegible] इति [illegible]
[illegible] ॥ २४ ॥ २५ ॥ [illegible]

करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्राश्च धार्मिकाः ॥ ३५ ॥
विष्णुशक्तिरनौपम्या सत्त्वोद्रिक्ता स्थितौ स्थिता ।
मन्वन्तरेष्वशेषेषु देवत्वेनाधितिष्ठति ॥ ३६ ॥
अंशेन तस्य जज्ञेऽसौ यज्ञः स्वायम्भुवेऽन्तरे ।
आकूत्यां मानसो देव उत्पन्नः प्रथमेऽन्तरे ॥ ३७ ॥
ततः पुनः स वै देवः प्राप्ते स्वारोचिषेऽन्तरे ।
तुषितायां समुत्पन्नो ह्यजितस्तुषितैः सह ॥ ३८ ॥
औत्तमे त्वन्तरे चैव तुषितस्तु पुनः स वै ।
सत्यायामभवत् सत्यः सत्यैः सह सुरोत्तमैः ॥ ३९ ॥
तामसस्यान्तरे चैव सम्प्राप्ते पुनरेव हि ।
हर्य्यायां हरिभिः सार्द्धं हरिरेव बभूव ह ॥ ४० ॥
रैवतेऽप्यन्तरे देवः सम्भूत्यां मानसोऽभवत् ।
संभूतो राजसैः सार्द्धं देवैर्देववरो हरिः ॥ ४१ ॥
चाक्षुषे चान्तरे देवो वैकुण्ठः पुरुषोत्तमः ।
विकुण्ठायामसौ जज्ञे वैकुण्ठैर्दैवतैः सह ॥ ४२ ॥
मन्वन्तरे तु संप्राप्ते तथा वैवस्वते द्विज ।
वामनः कश्यपाद्विष्णुरदित्यां सम्बभूव ह ॥ ४३ ॥

पालने स्थितौ [illegible] विष्णोः [illegible] मन्वन्तरेषु पालने प्रवृत्ता विष्णोरंशावतारा इत्याह विष्णुशक्तिरित्यादिना [illegible] । देवत्वेन यज्ञादिरूपदेवतात्मना विष्णुः आकूति-सुता [illegible] विष्णोः अंशेन स्वायम्भुवमन्वन्तरे आकूत्यां [illegible] [illegible] यज्ञः [illegible] । यद्वा प्रथमे अन्तरे [illegible] मानसः [illegible] रुचिः तस्मात् [illegible] इति ॥ ३६ ॥ [illegible]

त्रिभिः क्रमैरिमान् लोकान् जित्वा येन महात्मना ।
पुरन्दराय त्रैलोक्यं दत्तं निहतकण्टकम् ॥ ४४ ॥
इत्येतास्तनवस्तस्य सप्तमन्वन्तरेषु वै ।
सप्तस्वेवाभवन् विप्र याभिः संवर्धिताः प्रजाः ॥ ४५ ॥
यस्माद् विष्टमिदं सर्वं तस्य शक्त्या महात्मनः ।
तस्मात् स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात् ॥ ४६ ॥
सर्वे च देवा मनवः समस्ताः सप्तर्षयो ये मनुसूनवश्च ।
इन्द्रश्च योऽयं त्रिदशेशभूतो विष्णोरशेषास्तु विभूतयस्ताः ॥ ४७ ॥

द्वितीयोऽध्यायः ।

मैत्रेय उवाच

प्रोक्तान्येतानि भवता सप्त मन्वन्तराणि वै ।
भविष्याण्यपि विप्रर्षे ममाख्यातुं त्वमर्हसि ॥ १ ॥

पराशर उवाच ।

सूर्यस्य पत्नी संज्ञाभूत् तनया विश्वकर्मणः ।
मनुर्यमो यमी चैव तदपत्यानि वै मुने ॥ २ ॥
असहन्ती तु सा भर्तुस्तेजश्छायां युयोज वै ।
भर्तुः शुश्रूषणेऽरण्यं स्वयञ्च तपसे ययौ ॥ ३ ॥

एवं [illegible] इदंमन्वन्तरादिषु च [illegible] तथा [illegible]
इत्याह । [illegible] [illegible] प्रवेशनात् प्रवेशनादीन् ॥ ४६ ॥

द्वितीये तु भाव्यादीन् मन्वन्तरादीन् एव पुनः । तत्र सावर्णिरष्टमः
[illegible] ॥ १ ॥ सूर्यस्येति ॥ २ ॥ [illegible]
[illegible] [illegible] [illegible] शुश्रूषणे
युयोज, [illegible] ॥ ३ ॥ [illegible] सावर्णिः ।

संज्ञेयमित्यथार्कश्च छायायामात्मजत्रयम् ।
शनैश्चरं मनुं चान्यं तपतीं चाप्यजीजनत् ॥ ४ ॥
छायासंज्ञा ददौ शापं यमाय कुपिता यदा ।
तदान्येयमसौ बुद्धिरित्यासीद् यमसूर्ययोः ॥ ५ ॥
ततो विवस्वानाख्यातां तयैवारण्यसंस्थिताम् ।
समाधिदृष्ट्या ददृशे तामश्वां तपसि स्थिताम् ॥ ६ ॥
वाजिरूपधरः सोऽपि तस्यां देवावथाश्विनौ ।
जनयामास रेवन्तं रेतसोऽन्ते च भास्करः ॥ ७ ॥
आनिन्ये च पुनः संज्ञां स्वस्थानं भगवान् रविः ।
तेजसः शमनञ्चास्य विश्वकर्मा चकार ह ॥ ८ ॥
भ्रमिमारोप्य सूर्यन्तु तस्य तेजोनिशातनम् ।
कृतवानष्टमं भागं न व्यशातयताव्ययम् ॥ ९ ॥
यत्तस्माद् वैष्णवं तेजः शातितं विश्वकर्मणा ।
जाज्वल्यमानमपतत् तद् भूमौ मुनिसत्तम ॥ १० ॥

तपती चरत्येव राजा आसीत् ॥ ४ ॥ छायेति । बुद्धाऽपेत्य स्थिता छायासंज्ञा । सा कदाचित् स्वापत्यस्नेहेन [illegible] पादस्फोटो- [illegible] यमाय पादस्ते [illegible] शापं ददौ । तदाऽयं [illegible] नैवेयं [illegible] किन्तु [illegible] बुद्धिरभूदिति ॥ ५ ॥ समाधिदृष्ट्या [illegible] किन्तु [illegible] [illegible] विवस्वान् [illegible] [illegible] तपसि स्थितां संज्ञां ददर्श । ततः [illegible] विवस्वान् वाजिरूपधर- स्तस्यामश्विनौ देवौ रेवन्तमपि अजनयत् । रेवतोऽश्व इति रेवन्- नामविशेषः ॥ ७ ॥ भ्रमिं चक्राकारं शाणयन्त्रम् । तेजसो निवर्तनं छेदनम् । अष्टमं भागं न व्यशातयत् शातितवान् ॥ ९ ॥ यत्तस्मा

त्वष्टैव तेजसा तेन विष्णोश्चक्रमकल्पयत् ।
त्रिशूलञ्चैव रुद्रस्य शिबिकां धनदस्य च ॥ ११ ॥
शक्तिं गुहस्य देवानामन्येषाञ्च यदायुधम् ।
तत्सर्वं तेजसा तेन विश्वकर्मा व्यवर्द्धयत् ॥ १२ ॥
छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः ।
पूर्वजस्य सवर्णोऽसौ सावर्णिस्तेन चोच्यते ॥ १३ ॥
तस्य मन्वन्तरं ह्येतत् सावर्णिकमथाष्टमम् ।
तच्छृणुष्व महाभाग भविष्यं कथयामि ते ॥ १४ ॥
सावर्णिस्तु मनुर्योऽसौ मैत्रेय भविता ततः ।
सुतपाश्चामिताभाश्च मुख्याश्चापि तथा सुराः ॥ १५ ॥
तेषां गणश्च देवानामेकैको विंशकः स्मृतः ।
सप्तर्षीनपि वक्ष्यामि भविष्यान् मुनिसत्तम ॥ १६ ॥
दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथापरः ।
मत्पुत्रश्च तथा व्यास ऋष्यशृङ्गश्च सप्तमः ॥ १७ ॥
विष्णुप्रसादादनघः पातालान्तरगोचरः ।
विरोचनसुतस्तेषां बलिरिन्द्रो भविष्यति ॥ १८ ॥
विरजाश्चार्ववीरांश्च निर्मोकाद्यास्तथापरे ।
सावर्णस्य मनोः पुत्रा भविष्यन्ति नरेश्वराः ॥ १९ ॥
नवमो दक्षसावर्णिर्मैत्रेय भविता मनुः ।
पारा मरीचिगर्भाश्च सुधर्माणस्तथा त्रिधा ॥ २० ॥

[illegible]म् ॥ ११ ॥ पूर्वजस्य चाक्षुषस्य सवर्णः सदृश इति [illegible] [illegible] [illegible] वा ॥ १३ ॥ विंशकः विंशतिसंख्यः ॥ १६ ॥ ऋष्यशृङ्गः [illegible] ॥ १७ ॥ [illegible] [illegible] ॥१७॥

भविष्यन्ति तदा देवा एकैको द्वादशो गणः ।
तेषामिन्द्रो महावीर्यो भविष्यत्यद्भुतो द्विज ॥ २१ ॥
सवनो द्युतिमान् भव्यो वसुर्मेधा धृतिस्तथा ।
ज्योतिष्मान् सप्तमः सत्यस्तत्रैते च महर्षयः ॥ २२ ॥
धृतकेतुर्दीप्तिकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवाद्याश्च तथा दक्षसावर्णिकात्मजाः ॥ २३ ॥
दशमो ब्रह्मसावर्णिर्भविष्यति मुने ! मनुः ।
सुधामानो विशुद्धाश्च शतसंख्यास्तथा सुराः ॥ २४ ॥
तेषामिन्द्रश्च भविता शान्तिर्नाम महाबलः ।
सप्तर्षयो भविष्यन्ति ये तदा तान् शृणुष्व च ॥ २५ ॥
हविष्मान् सुकृतिः सत्यो ह्यपांमूर्त्तिस्तथापरः ।
नाभागोऽप्रतिमौजाश्च सत्यकेतुस्तथैव च ॥ २६ ॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणादयो दश ।
ब्रह्मसावर्णपुत्रास्तु रक्षिष्यन्ति वसुन्धराम् ॥ २७ ॥
एकादशश्च भविता धर्मसावर्णिको मनुः ।
विहङ्गमाः कामगमा निर्माणरतयस्तथा ॥ २८ ॥
गणास्त्वेते तदा मुख्या देवानाञ्च भविष्यताम् ।
एकैकस्त्रिंशकस्तेषां गणश्चेन्द्रश्च वै वृषः ॥ २९ ॥
निश्चरोऽग्नितेजाश्च वपुष्मान् विष्णुरारुणिः ।
हविष्माननघश्चैव भाव्याः सप्तर्षयस्तथा ॥ ३० ॥
सवर्गः सर्वधर्मा च देवानीकादयस्तथा ।
भविष्यन्ति मनोस्तस्य तनयाः पृथिवीश्वराः ॥ ३१ ॥
रुद्रपुत्रस्तु सावर्णो भविता द्वादशो मनुः ।
ऋतधामा च तत्रेन्द्रो भविता शृणु मे सुरान् ॥ ३२ ॥

हरिता लोहिता देवास्तथा सुमनसो द्विज ।
सुकर्माणश्च ताराश्च दशकाः पञ्च वै गणाः ॥ ३३ ॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः ।
तपोधृतिर्द्युतिश्चान्य सप्तमस्तु तपोधनः ॥ ३४ ॥
देवत्वानुपदेवाश्च देवश्रेष्ठादयस्तथा ।
मनोस्तस्य महावीर्या भविष्यन्ति सुता नृपाः ॥ ३५ ॥
त्रयोदशो रौच्यनामा भविष्यति मुने मनुः ।
सुत्रामाणः सुधर्माणः सुकर्माणस्तथापरा ॥ ३६ ॥
त्रयस्त्रिंशद् विभेदास्ते देवानां ये तु वै गणाः ।
दिवस्पतिर्महावीर्यस्तेषामिन्द्रो भविष्यति ॥ ३७ ॥
निर्मोहस्तत्त्वदर्शी च निष्प्रकम्प्यो निरुत्सुकः ।
धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः ॥ ३८ ॥
सप्तर्षयस्त्वमी तस्य पुत्रानपि निबोध मे ।
चित्रसेनविचित्राद्या भविष्यन्ति महीक्षितः ॥ ३९ ॥
भौत्यश्चतुर्दशश्चात्र मैत्रेय भविता मनुः ।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च शृणुष्व तान् ॥ ४० ॥
चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिकास्तथा ।
वाचावृद्धाश्च वै देवाः सप्तर्षीनपि मे शृणु ॥ ४१ ॥
अग्निबाहुः शुचिः शुक्रो मागधोऽग्निध्र एव च ।
युक्तस्तथा जितश्चान्यो मनुपुत्रानतः शृणु ॥ ४२ ॥
ऊरुगम्भीरबुध्नाद्या मनोस्तस्य सुता नृपाः ।
कथिता मुनिशार्दूल ! पालयिष्यन्ति ये महीम् ॥ ४३ ॥
चतुर्युगान्ते वेदानां जायते किल विप्लवः ।
प्रवर्त्तयन्ति तानेत्य भुवि सप्तर्षयो दिवः ॥ ४४ ॥

कृते कृते स्मृतेर्विप्र ! प्रणेता जायते मनुः ।
देवा यज्ञभुजस्ते तु यावन्मन्वन्तरन्तु तत् ॥ ४५ ॥
भवन्ति ये मनोः पुत्रा यावन्मन्वन्तरन्तु तैः ।
तदन्वयोद्भवैश्चैव तावद् भूः परिपाल्यते ॥ ४६ ॥
मनुः सप्तर्षयो देवा भूपालाश्च मनोः सुताः ।
मन्वन्तरे भवन्त्येते शक्रश्चैवाधिकारिणः ॥ ४७ ॥
चतुर्दशभिरेतैस्तु गतैर्मन्वन्तरैर्द्विज ! ।
सहस्रयुगपर्य्यन्तः कल्पो निःशेष उच्यते ॥ ४८ ॥
तावत्प्रमाणा च निशा ततो भवति सत्तम ! ।
ब्रह्मरूपधरः शेते शेषाहावम्बुसंप्लवे ॥ ४९ ॥
त्रैलोक्यमखिलं ग्रस्त्वा भगवानादिकृद् विभुः ।
स्वमायासंस्थितो विप्र ! सर्वभूतो जनार्दनः ॥ ५० ॥
ततः प्रबुद्धो भगवान् यथा पूर्वं तथा पुनः ।

[illegible] चतुर्युगान्त इति । [illegible] ॥ ४४ ॥ [illegible] ॥ ४५ ॥ [illegible] मनुरिति ॥ ४७ ॥ तावत्- [illegible] ॥ ४८ ॥ [illegible]

सृष्टिं करोत्यव्ययात्मा कल्पे कल्पे रजोगुणः ॥ ५१ ॥
मनवो भूभुजः सेन्द्रा देवाः सप्तर्षयस्तथा ।
सात्त्विकोऽंशः स्थितिकरो जगतो द्विजसत्तम ॥ ५२ ॥
अन्यच्च योऽव्ययो विष्णुः स्थितिव्यापारलक्षणः ।
युगव्यवस्थां कुरुते यथा मैत्रेय ! तत् शृणु ॥ ५३ ॥
कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक् ।
ददाति सर्वभूतानां सर्वभूतहिते रतः ॥ ५४ ॥
चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः ।
दुष्टानां निग्रहं कुर्वन् परिपाति जगत्त्रयम् ॥ ५५ ॥
वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ॥ ५६ ॥
वेदांस्तु द्वापरे व्यस्य कलेरन्ते पुनर्हरिः ।
कल्किस्वरूपी दुर्वृत्तान् मार्गे स्थापयति प्रभुः ॥ ५७ ॥
एवमेष जगत् सर्वं परिपाति करोति च ।
हन्ति चान्तेष्वनन्तात्मा नास्त्यस्माद् व्यतिरेकि यत् ॥ ५८ ॥
भूतं भव्यं भविष्यच्च सर्वभूतान्महात्मनः ।
तदत्रान्यत्र वा विप्र ! सद्भावः कथितस्तव ॥ ५९ ॥
मन्वन्तराण्यशेषाणि कथितानि मया तव ।
मन्वन्तराधिपांश्चैव किमन्यत् कथयामि ते ॥ ६० ॥

अनादिर्निधनोऽपि ब्रह्मरूपेण, तत्र प्रथमं ब्रह्मादिना सृष्ट्यादिकरोति ॥ ५१ ॥ स्थितये यो व्यापारः स एव लक्षणम् यस्याधिकारस्य सः ॥ ५३ ॥ सर्वं संहरति, एवमिति द्वाभ्याम् ॥ ५८ ॥ अत्र वा अन्यत्र वा अस्मादीश्वरात् व्यतिरेकि यत् भूतादि, तन्नास्ति, किन्तु मैत्रेय सर्वात्मैवासौ ईश्वर एव सद्भावः परमार्थः कथित इति ॥ ५९ ॥

तृतीयोऽध्यायः ।

—:०:—

मैत्रेय उवाच ।

ज्ञातमेतन्मया त्वत्तो यथापूर्वमिदं जगत् ।
विष्णुर्विष्णौ विष्णुतश्च न परं विद्यते ततः ॥ १ ॥
एतत्तु श्रोतुमिच्छामि व्यस्ता वेदा महात्मना ।
वेदव्यासस्वरूपेण यथा तेन युगे युगे ॥ २ ॥
यस्मिन् यस्मिन् युगे व्यासो यो य आसीन्महामुने ।
तं तमाचक्ष्व भगवन् शाखाभेदांश्च मे वद ॥ ३ ॥

पराशर उवाच ।

वेदद्रुमस्य मैत्रेय शाखाभेदाः सहस्रशः ।
न शक्ता विस्तरो वक्तुं संक्षेपेण शृणुष्व तत् ॥ ४ ॥
द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने ।
वेदमेकं स बहुधा कुरुते जगतो हितम् ॥ ५ ॥

[illegible] ॥ वेदस्य [illegible] । यथा सर्वं जगत् [illegible] परं न विद्यते । यथा [illegible] विष्णोः [illegible] यथा [illegible] तथा [illegible] । अनेन [illegible] ॥ १ ॥ [illegible] वेदा व्यस्ता इति प्रकारप्रश्नः ॥ २ ॥ यस्मिन् यस्मिन्निति [illegible] यो य इति [illegible] । [illegible] तत्र तावत् शाखाभेदानां संक्षेपतो [illegible] इत्याह, वेदद्रुमस्येति ॥ ४ ॥ [illegible] द्वापर इति व्याख्यातम् ॥ ५ ॥ [illegible], तेजः [illegible]

वीर्य्यं तेजो बलञ्चाल्पं मनुष्याणामवेक्ष्य वै ।
हिताय सर्वभूतानां वेदभेदान् करोति सः ॥ ६ ॥
यया स कुरुते तन्वा वेदमेकं पृथक् प्रभुः ।
वेदव्यासाभिधाना तु सा मूर्त्तिर्मधुविद्विषः ॥ ७ ॥
यस्मिन् मन्वन्तरे ये ये व्यासास्तांस्तान् निबोध मे ।
यथा च भेदः शाखानां व्यासेन क्रियते मुने ! ॥ ८ ॥
अष्टाविंशति कृत्वा वै वेदा व्यस्ता महर्षिभिः ।
वैवस्वतेऽन्तरे तस्मिन् द्वापरेषु पुनः पुनः ॥ ९ ॥
वेदव्यासा व्यतीता ये अष्टाविंशति सत्तम ! ।
चतुर्धा यैः कृता वेदा द्वापरेषु पुनः पुनः ॥ १० ॥
द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ॥ ११ ॥
तृतीये चोशना व्यासश्चतुर्थे च बृहस्पतिः ।
सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ॥ १२ ॥
सप्तमे च तथैवेन्द्रो वशिष्ठश्चाष्टमे स्मृतः ।
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ॥ १३ ॥
एकादशे तु त्रिवृषा भरद्वाजस्ततः परम् ।
त्रयोदशे चान्तरीक्षो वर्णी चापि चतुर्दशे ॥ १४ ॥

[illegible] ॥ ६ ॥ ननु व्यास एव वेदव्यासः, कथं भगवान् वेदभेदान् करोतीति इत्यत आह, सा भगवन्मूर्त्तिरेवेत्याह ययेति ॥ ७ ॥ तत्र तावत् मन्वन्तरेषु व्यासान् प्रतिजानीते वैवस्वते मन्वन्तरे अतीतान् व्यासान् भाविनश्चैकं तथा शाखाभेदांश्च वक्तुं प्रतिजानीते ॥ ८ ॥ अष्टाविंशतिरिति व्यतीता निखिलाधिकारा व्यासा इत्यर्थः, त्रिंशत्त्वाद्‌न्तम् ॥ १० ॥ प्रजापतिर्मनुः, "द्वापरे

त्र्यारुणः पञ्चदशे षोडशे तु धनञ्जयः।
कृतञ्जयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः॥ १५॥
ततो व्यासो भरद्वाजो भरद्वाजात् तु गौतमः।
गौतमादुत्तमो व्यासो हर्य्यात्मा योऽभिधीयते॥ १६॥
अथ हर्य्यात्मनो वेणः स्मृतो राजश्रवास्तथा।
सोमशुष्मायणस्तस्मात् तृणविन्दुरिति स्मृतः॥ १७॥
ऋक्षोऽभूद् भार्गवस्तस्मात् वाल्मीकिर्योऽभिधीयते।
तस्मादस्मत्पिता शक्तिर्व्यासस्तस्मादहं मुने!॥ १८॥
जातूकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः।
अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः॥ १९॥
एको वेदश्चतुर्धा तु यैः कृतो द्वापरादिषु,
भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति॥ २०॥
व्यतीते मम पुत्रेऽस्मिन् कृष्णद्वैपायने मुनौ।
ध्रुवमेकाक्षरं ब्रह्म ओमित्येवं व्यवस्थितम्।
बृहत्त्वाद् बृंहणत्वाच्च तद् ब्रह्मेत्यभिधीयते॥ २१॥

स पुरा [illegible] मनोः [illegible] । [illegible] प्रभाषते।" इति वायूक्तः। [illegible] द्वापरादिष्वनेन द्वापरे आदिर्येषां तेषु द्वापरेषु [illegible] कल्पेषु। [illegible] कृष्णद्वैपायनोऽपि [illegible] ॥ २० ॥ इदानीं वेदविभागं वक्तुमादौ [illegible] वेदादिभूतं दर्शयितुमाह ध्रुवमिति। [illegible] ओमित्येवं [illegible] ब्रह्मेत्यभिधीयते। तत्र हेतुमाह [illegible] अपरिच्छिन्न[illegible]त्वात् बृंहणत्वात् वेदादीनां कारणत्वात् च [illegible] "[illegible]" इति श्रुतेः। ओमित्येकाक्षरं ब्रह्म [illegible] गीतासु [illegible]।

प्रणवान्तःस्थितं नित्यं भूर्भुवःस्वरितीर्य्यते।
ऋग्यजुःसामाथर्वाणं यत् तस्मै ब्रह्मणे नमः ॥ २२ ॥
जगतः प्रलयोत्पत्तौ यत् तत् कारणसंज्ञितम्।
महतः परमं गुह्यं तस्मै सुब्रह्मणे नमः ॥ २३ ॥
अगाधापारमक्षय्यं जगत्संमोहनालयम्।
स्वप्रकाशप्रवृत्तिभ्यां पुरुषार्थप्रयोजनम् ॥ २४ ॥
सांख्यज्ञानवतां निष्ठा गतिः शमदमात्मनाम्।
यत्तदव्यक्तममृतं प्रवृत्तं ब्रह्म शाश्वतम् ॥ २५ ॥

तदेव व्याचष्टे प्रणवादेरन् [illegible] ब्रह्मत्वेन प्रकाशस्य ब्रह्मणो नाद्य प्रणवान्त [illegible]। भूर्भुवःस्वरिति व्याहृतित्रय नित्य [illegible] तेन व्याहृतित्रयात्मकं यदित्यर्थः। ऋग्यजुः-सामाथर्वाणमिति प्रथमार्थे द्वितीया। एतद्वेदचतुष्टयात्मकञ्च यत् तस्मै ब्रह्मणे शब्दब्रह्माय नम इति ॥ २२ ॥ एवं [illegible] तद्वाच्य ब्रह्म प्रणमति जगत इति सार्द्धश्लोकः। जगतः प्रलयोत्पत्तौ यत् कारणभूतं महतश्च परमं गुह्यं [illegible] तस्मै सुब्रह्मणे [illegible] ब्रह्मणे नम इत्यन्वयः ॥ २३ ॥ तदेव [illegible] अगाधेति [illegible] अपारं [illegible] अक्षय्यं [illegible] जगत [illegible] तमोगुणः, [illegible]। किञ्च स्वप्रकाशप्रवृत्तिभ्यां सत्त्वरजोगुणाभ्यां पुरुषस्य योऽर्थो भोगापवर्गलक्षणः स प्रयोजनं यस्य तच्च तत् ॥ २४ ॥ तदेवाह, सांख्यज्ञानवतां [illegible] निष्ठा प्राप्य स्थानम्। शमः अन्तःकरणस्योपरमः, दमः बाह्ये-न्द्रियव्यापारोपरमः, स एव आत्मा स्वभावो येषां तेषां गतिः [illegible] [illegible] यत् तदव्यक्तम् [illegible] [illegible] ब्रह्म शाश्वतं [illegible] ॥ २५ ॥

प्रधानमात्मयोनिश्च गुहासत्त्वश्च गम्यते ।
अविभागं तथा शुक्लमक्षरं ब्रह्मवाचकम् ॥ २६ ॥
परमब्रह्मणे तस्मै नित्यमेव नमो नमः ।
यद् रूपं वासुदेवस्य परमात्मस्वरूपिणः ॥ २७ ॥
एतद् ब्रह्म त्रिधाभेदमभेदमपि स प्रभुः ।
सर्वभूतेष्वभेदोऽसौ भिद्यते भिन्नबुद्धिभिः ॥ २८ ॥
स ऋङ्मयः साममयः स चात्मा स यजुर्मयः ।
ऋग्यजुःसामसारात्मा स एवात्मा शरीरिणाम् ॥ २९ ॥

प्रधानं महदादिकार्यकर्तृत्वेन प्रतीयमानम् । यदा प्रधीयते आधीयते विश्वमिस्मिन्निति प्रधानम् आत्मयोनिः, अनन्यकार्यं स्वतःसिद्धमिति यावत् । गुहायां हृदयकुहरे प्रकाशमानं सत्त्वं यस्य तत् गम्यते वेदादिभ्यः । अविभागः निर्भेदम् पुंस्त्वभावेन । शुक्लं दोषिमत् स्वरूपरहितम् इति यावत् । अक्षरम् अपक्षयशून्यम् । ब्रह्मवाचकं ब्रह्मप्रकाशोपाधिकम् ॥ २६ ॥

यद्येवम्भूतं तथापि परमब्रह्मणे कूटस्थपरिपूर्णाय तस्मै प्रणवगम्याय नित्यं नमो नम इति भक्त्यतिशयो व्यज्यते ॥ २७ ॥ इदानीं वाच्यवाचकस्वरूपस्य ब्रह्मण एव अभेदविवक्षया आत्मस्वादिरूपतामाह, यद् रूपमिति, सार्द्धाभ्याम् । वासुदेवस्य यत् परमात्मरूपमेतदभेदमपि त्रिधा आत्मस्थितिरूपेण भूतादिस्थितिरूपेण च भेदो यस्य तत् । तस्य वेदभावं च प्रभुः परमात्मा वासुदेव एव विभिन्नाभिर्बुद्धिभिः भिद्यते भिन्नतया प्रतीयते । भिद्यते भिन्नबुद्धिभिरिति पाठे विषयभेदैरिति । सर्वभूतेष्वभेदोऽसौ इत्यत्र अतः भेदमपि तत्स्वरूपम् । त्रिधा भिद्यते इति त्रिधा भेदं प्राणात्मभक्त्या त्रिधा भिन्नस्तु भूतात्मभेदतः ॥ २८ ॥ किञ्च ऋगादिमयः ऋग्वेदादिरूप ऋगादिसारः प्रणवरूपात्मा च शरीरिणां देहाभिमानवतां आत्मा च स एव ॥ २९ ॥ प्रणवात्मवासुदेवस्य सर्वात्मत्वं निर्दिशति, स भिद्यत इति । स एव वेदमयः, स एव भिद्यते, ऋगादिरूपेण बहुभिर्भेदैः यथावत् अनेकप्रकारत्वेनास्य

स भिद्यते वेदमयः स वेदं
करोति भेदैर्बहुभिः सशाखम् ।
शाखाप्रणेता स समस्तशाखा
ज्ञानस्वरूपो भगवाननन्तः ॥ ३० ॥

चतुर्थोऽध्यायः ।

—:०:—

पराशर उवाच ।

आद्यो वेदश्चतुष्पादः शतसाहस्रसम्मितः ।
ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥ १ ॥
ततोऽत्र मत्सुतो व्यासोऽष्टाविंशतिमेऽन्तरे ।
वेदमेकं चतुष्पादं चतुर्धा व्यभजत् प्रभुः ॥ २ ॥

वेदम् एकमेव नानारूपं करोति स एव कर्ता, स एव समस्तशाखा-रूपश्च । तत्र हेतुं नित्यत्वमाह, ज्ञानस्वरूपो भगवाननन्त इति । तेन अनन्तवेदस्वरूपत्वं तत्प्रणेतृत्वञ्चोपपद्यत इति ॥ ३० ॥

अष्टाविंशे द्वापरेऽस्मिन् शाखाश्चापि प्रवृत्ताः । कल्पादावेक एव वेदो व्यक्त इत्याह आद्य इति द्वाभ्याम् । आद्यो वेदश्चतुष्पादः ऋगादिचतुर्भेदः शतसाहस्रसम्मितः लक्षसंख्यः । ततः प्रवृत्तोऽयं कृत्स्नो यज्ञो दशगुणः दशविधः, अग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमा इति पञ्च, त एव प्रकृतिविकृतिभेदेन दशविध इति । यद्वा ऋत्विग्भिः पञ्चयज्ञैः सह दशविधम् ॥ १ ॥ अत्र मन्वन्तरे अष्टाविंशतितमे द्वापरे चतुष्पादमेकं वेदं चतुर्धा ऋग्यजुःसामाथर्वरूपेण पृथग् व्यभजत् । प्रभुः ईश्वरः व्यासावतारः ॥ २ ॥ तैः पूर्वैः व्यासैः यथा च चतुर्विधे

यथा तु तेन वै व्यस्ता वेदव्यासेन धीमता।
वेदास्तथा समस्तैस्तैर्व्यस्ता व्यासैस्तथा मया ॥ ३ ॥
तदनेनैव वेदानां शाखाभेदान् द्विजोत्तम।
चतुर्युगेषु रचितान् समस्तेष्ववधारय ॥ ४ ॥
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम्।
कोऽन्यो हि भुवि मैत्रेय! महाभारतकृद् भवेत् ॥ ५ ॥
तेन व्यस्ता यथा वेदा मत्पुत्रेण महात्मना।
द्वापरे ह्यत्र मैत्रेय! तन्मे शृणु यथार्थतः ॥ ६ ॥
ब्रह्मणा चोदितो व्यासो वेदान् व्यस्तुं प्रचक्रमे।
अथ शिष्यान् स जग्राह चतुरो वेदपारगान् ॥ ७ ॥
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः।
वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत् ॥ ८ ॥
जैमिनिं सामवेदस्य तथैवाथर्ववेदवित्।
सुमन्तुस्तस्य शिष्योऽभूद् वेदव्यासस्य धीमतः ॥ ९ ॥
रोमहर्षणनामानं महाबुद्धिं महामुनिम्।
सूतं जग्राह शिष्यं स इतिहासपुराणयोः ॥ १० ॥

वेदा व्यस्ताः ॥ ३ ॥ तत् तस्मात् अनेन कृष्णद्वैपायनक्रमेण [illegible] द्वापरेषु चतुर्युगेषु सर्वेष्वपि वेदविभागान् तैः कृतान् अवधारय जानीहि ॥ ४ ॥ तदेवं कृष्णद्वैपायनव्यासस्य मत्पुत्रत्वमुक्तं तस्य विष्णुभाव[illegible] [illegible], अतः [illegible] [illegible] भारतादिकर्तृत्व इति [illegible] ॥ ५ ॥ वेदपारगान् वेदस्य पारं गन्तुं समर्थान् ॥ ७ ॥ ऋग्वेदश्रावकमिति [illegible] पारम[illegible] [illegible] पाठ ॥ ८ ॥ इतिहासपुराणयोरिति "आर्षादिबहुव्याख्यानं देवर्षिचरिताश्रयम्। इतिहासमिति प्रोक्तं भविष्याद्भुतधर्मयुक्॥" समा[illegible] [illegible] इतिहासः ॥ १० ॥ एवं व्यासा-

एक आसीद् यजुर्वेदस्तं चतुर्धा व्यकल्पयत् ।
चातुर्होत्रमभूद् यस्मिंस्तेन यज्ञमथाकरोत् ॥ ११ ॥
आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथा मुनिः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्वभिः ॥ १२ ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् मुनिः ।
यजूंषि च यजुर्वेदं सामवेदञ्च सामभिः ॥ १३ ॥
राज्ञस्त्वथर्ववेदेन सर्वकर्माणि स प्रभुः ।
कारयामास मैत्रेय ! ब्रह्मत्वञ्च यथास्थिति ॥ १४ ॥
सोऽयमेको महावेदतरुस्तेन पृथक् कृतः ।
चतुर्धा तु ततो जातं वेदपादपकाननम् ॥ १५ ॥
बिभेद प्रथमं विप्र ! पैल ऋग्वेदपादपम् ।
इन्द्रप्रमतये प्रादाद् बाष्कलाय च संहिते ॥ १६ ॥
चतुर्धा स बिभेदाथ बाष्कलिर्द्विज ! संहिताम् ।
बोध्यादिभ्यो ददौ ताश्च शिष्येभ्यः स महामुनिः ॥ १७ ॥

[illegible] ॥ ११ ॥ चातुर्होत्रमेवाह, आध्वर्यवमिति ॥ १२ ॥ [illegible] ततः इति । ततः वेदराशेः [illegible] ॥ १३ ॥ राज्ञः सर्वकर्माणि शान्तिपुष्ट्यादीनि ॥ १४ ॥ [illegible] ॥ १५ ॥ प्रथमम् ऋग्वेदपादपं द्विधा बिभेद ॥ १६ ॥ [illegible] ॥ १७ ॥ [illegible]

बौध्याग्निमाठरौ तद्वद् याज्ञवल्क्यपराशरौ ।
प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने ॥ १८ ॥
इन्द्रप्रमतिरेकां तु संहितां स्वसुतं ततः ।
माण्डूकेयं महात्मानं मैत्रेयाध्यापयत् तदा ॥ १९ ॥
तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यान् क्रमाद् ययौ ।
वेदमित्रस्तु शाकल्यः संहितां तामधीतवान् ॥ २० ॥
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः ।
तस्य शिष्यास्तु ये पञ्च तेषां नामानि मे शृणु ॥ २१ ॥
मुद्गलो गालवश्चैव वात्स्यः शालीय एव च ।
शिशिरः पञ्चमश्चासीन्मैत्रेय ! सुमहामुनिः ॥ २२ ॥
संहितात्रितयञ्चक्रे शाकपूर्णिस्तथेतरम् ।
निरुक्तमकरोत् तद्वच्चतुर्थं मुनिसत्तम ! ॥ २३ ॥
क्रौञ्चो वैतालिकस्तद्वत् बलाकश्च महामतिः ।
निरुक्तकृच्चतुर्थोऽभूद् वेदवेदाङ्गपारग ॥ २४ ॥
इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम ! ।
बाष्कलिश्चापरास्तिस्रः संहिताः कृतवान् द्विज ! ॥ २५ ॥

शाखाश्च बौध्यादयो जगृहुः ॥ १८ ॥ तस्य [illegible] इन्द्रप्रमतेः शिष्यप्रशिष्येभ्यः [illegible] पुत्रान् शिष्यांश्च क्रमात् ययौ ॥ २० ॥ वेदमित्राख्यः शाकल्यः इन्द्रप्रमतिसंहिताम् अधीतवान् । ततश्च स एव तस्याः पञ्च संहिताश्चकार । ताश्च शिष्येभ्यः मुद्गलादिभ्यो ददौ ॥ २१ ॥ शाकपूर्णिश्च इन्द्रप्रमतिशिष्यस्तत्संहितायाः संहितात्रितयं निरुक्तं च [illegible] अकरोत् ॥ २३ ॥ तत् संहितात्रितयं क्रौञ्चादिभ्यः [illegible] । चतुर्थो निरुक्तकृत् [illegible] ॥ २४ ॥ अनुशाखाः

शिष्यः कालायनिर्गार्ग्यस्तृतीयश्च कथाजवः ।
इत्येते बह्वृचाः प्रोक्ताः संहिता यैः प्रवर्त्तिताः ॥ २६ ॥

पञ्चमोऽध्यायः ।

पराशर उवाच ।

यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः ।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै ॥ १ ॥
शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् ।
याज्ञवल्क्यस्तु तत्राभूद्ब्रह्मरातसुतो द्विजः ।
शिष्यः परमधर्मज्ञो गुरुवृत्तिपरः सदा ॥ २ ॥
ऋषिर्योऽद्य महामेरौ समाजे नागमिष्यति ।
तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ॥ ३ ॥

[illegible] । शाकल्यः पैलशिष्यः । [illegible] संहिताः [illegible] [illegible] । [illegible] शाकल्यः, [illegible] ॥ २६ ॥

यजुर्वेदस्य यजुःशाखाः [illegible] । [illegible] ॥ १ ॥ [illegible] ॥ २ ॥ [illegible]

पूर्वमेवं मुनिगणैः समयोऽभूत् कृतो द्विज ।
वैशम्पायन एकस्तं व्यतिक्रान्तवांस्तदा ॥ ४ ॥
स्वस्रीयं बालकं सोऽथ पदास्पृष्टमघातयत् ॥ ५ ॥
शिष्यानाह च भोः शिष्याः ! ब्रह्महत्यापहं व्रतम् ।
चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ॥ ६ ॥
अथाह याज्ञवल्क्यस्तं किमेभिर्भगवन् ! द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् ॥ ७ ॥
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिः ।
मुच्यतां यत् त्वयाधीतं मत्तो विप्रावमन्यक ॥ ८ ॥
निस्तेजसो वदस्येतान् यस्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥ ९ ॥
याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् ।
ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज ! ॥ १० ॥

पूर्वोक्तात् महासभा सहितमुनिभिश्च समयोऽभूत् न वैशम्पायन एवं त्रि-
रात्रमागमिष्यति तयोरन्यत ॥ ४ ॥ स्वस्रीयं बालः सुतं पदा स्पृष्टं
मृतम् अघातयत् । अविचार्य तस्मात् पदा स्पृष्टमात्रोऽसौ ममारेत्यर्थः
॥ ५ ॥ ब्रह्महत्यापनोदनार्थं व्रतं यूयं मत्कृते चरत इदं
विचार्य न विचार्यं किन्तु तथा शीघ्रं यथा शास्त्रोक्तब्रह्मचर्यादि-
यथोक्तं व्रतं चरतेत्यर्थः ॥ ६ ॥ विप्रावमन्यक । विप्रावमन्तः ! ॥ ७ ॥
यतो निस्तेजसः एतान् वदसि तस्मात् नार्थोऽस्ति ममाज्ञाभङ्ग-
कारिणेत्यर्थः ॥ ८ ॥ भक्त्या तथा गुरुभक्त्या एतत् मयोक्तं यथा मद-
धीतं तदिदं त्यक्तुमर्हसीत्यर्थः ॥ १० ॥ तदिदमित्यादि पठन्-

पराशर उवाच ।

इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंषि सः ।
छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥ ११ ॥
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विजाः ।
जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः ॥ १२ ॥
ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः ।
चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम ॥ १३ ॥
याज्ञवल्क्योऽपि मैत्रेय ! प्राणायामपरायणः ।
तुष्टाव प्रयतः सूर्यं यजूंष्यभिलषंस्ततः ॥ १४ ॥

याज्ञवल्क्य उवाच ।

नमः सवित्रे द्वाराय विमुक्तेरमिततेजसे ।
ऋग्यजुःसामभूताय त्रयीधामवते नमः ॥ १५ ॥
नमोऽग्नीषोमभूताय जगतः कारणात्मने ।
भास्कराय परं तेजः सौषुम्नमुरु बिभ्रते ॥ १६ ॥

जगृहुरित्यत्रेति तित्तिराः पक्षिणो भूत्वा जगृहुः, ततो हेतोस्ते तैत्तिरीयाः प्रसिद्धाः ॥ १२ ॥ ततोऽन्ये ये चरणाध्वर्यवस्ते निर्दिष्टाः, ब्रह्महत्याव्रतचरणादिति ॥ १३ ॥ ततोऽसौ सूर्यं स्तुत्वा तत्प्रसादाद्यजूंषि प्राप्तवान् पञ्चदश शाखाः प्रवर्तितवांश्च, याज्ञवल्क्योऽपीत्यादिना वाचयत्याख्यानान्तरम् ॥ १४ ॥ विमुक्तेः द्वारा त्रयीधामवते त्रयीरूपतेजःधारिणे ॥ १५ ॥ अग्नीषोमभूताय यतो जगतः कारणात्मने । तदेवाह, भास्कराय भासमानविग्रहाय जगदुपकारिणे इति भावः । सुषुम्नाख्यं तेजो बिभ्रत वृष्टिहेतुभूतम् । सौषुम्नं बिभ्रत इति सौषुम्नम् । यदुक्तं, 'सूर्यरश्मिः सुषुम्नो यस्तर्पितस्तेन चन्द्रमाः' इति ॥ १६ ॥ कलाकाष्ठादिरूपाणो ध्यायते तेन यथाभूतः कालो यस्य

कलाकाष्ठानिमेषादिकालज्ञानात्मने नमः ।
ध्येयाय विष्णुरूपाय परमाक्षररूपिणे ॥ १७ ॥
बिभर्त्ति यः सुरगणानाप्याय्येन्दुं स्वरश्मिभिः ।
सुधामृतेन च पितॄन् तस्मै तृप्तात्मने नमः ॥ १८ ॥
हिमाम्बुघर्मवृष्टीनां कर्त्ता हर्त्ता च यः प्रभुः ।
तस्मै त्रिकालरूपाय नमः सूर्य्याय वेधसे ॥ १९ ॥
यो हन्ति तिमिराण्येको जगतोऽस्य जगत्पतिः ।
सत्वधामधरो देवो नमस्तस्मै विवस्वते ॥ २० ॥
सत्कर्मयोग्यो न जनो नैवापः शौचकारणम् ।
यस्मिन्ननुदिते तस्मै नमो देवाय वेधसे ॥ २१ ॥
स्पृष्टो यदंशुभिर्लोकः क्रियायोग्योऽभिजायते ।
पवित्रताकारणाय तस्मै शुद्धात्मने नमः ॥ २२ ॥
नमः सवित्रे सूर्य्याय भास्कराय विवस्वते ।
आदित्यायादिभूताय देवादीनां नमो नमः ॥ २३ ॥

तस्मै ध्येयाय सर्वदा ध्यानाहयेव धीमहीति । गायत्र्यैकत्वात् 'परमाक्षरं ब्रह्म अक्षरात् परतः परः' इति श्रुतेः । तद्रूपिणे ओङ्काररूपिणे इति वा ॥ १७ ॥ सुधामृतेन सुधैव अमृतम् अमरत्वप्रापकत्वात् तेन तृप्तात्मने तर्पकाय । स्वधात्मने इति पाठे स्वाहिने ॥ १८ ॥ हिमादीनां या सृष्टिः तद्वर्त्ता । शैत्यमवर्षोष्णात्मत्रिकालरूपाय वेधसे स्रष्ट्रे ॥ १९ ॥ सत्वधामधरः सत्वमूर्त्तिधरः । सत्वधामधर इति पाठे सत्वम् अविविक्तं धाम तेजो धरतीति यथार्थम् ॥ २० ॥ यदुदये रात्रिपर्य्यन्तरकालविहितं यत् कर्म तद्योग्य ॥ २१ ॥ पूर्वोक्तमेवार्थं विविच्याह, स्पृष्ट इति ॥ २२ ॥ मन्त्रनिचयेन पूर्वोक्तैः पञ्चभिर्नामभिः नमः करिष्ये इति ॥ २३ ॥ हिरण्मये तेजोमयम् ।

हिरण्मयो रथो यस्य केतवोऽमृतवाजिनः ।
वहन्ति, भुवनालोकिचक्षुषं तं नमाम्यहम् ॥ २४ ॥

पराशर उवाच ।

इत्येवमादिभिस्तेन स्तूयमानः स्तवैर्रविः ।
वाजिरूपधरः प्राह व्रियतामिति वाञ्छितम् ॥ २५ ॥
याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम् ।
यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ॥ २६ ॥

पराशर उवाच ।

एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥ २७ ॥
यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम ! ।
वाजिनस्ते समाख्याताः सूर्योऽश्वः सोऽभवद् यतः ॥२८॥
शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् ।
काण्वाद्यास्तु महाभाग ! याज्ञवल्क्यप्रवर्त्तिताः ॥ २९ ॥

केतवः षट्पदाः अथवा अमृतधारिण अमृताश्वा वा । *तद्रथं आत-
पत्रचक्रिणमादि जगतं चक्षुः । हिरण्मये रथ इति पाठे केतवः
रश्मय । अमृतं जलं तद्धारकाः । वहन्ति गच्छन्तीत्यर्थः ॥ २४ ॥
अयातयामसंज्ञानि अन्यैरनधीतानि ॥ २७ ॥ वाजिनः समाख्याताः
[illegible] ॥ २८ ॥

षष्ठोऽध्यायः ।



पराशर उवाच ।

सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः ।
क्रमेण येन मैत्रेय ! बिभेद शृणु तन्मम ॥ १ ॥
सुमन्तुस्तस्य पुत्रोऽभूत् सुकर्मास्याप्यभूत् सुतः ।
अधीतवन्तावेकैकां संहितां तौ महामुनी ॥ २ ॥
सहस्रं संहिताभेदं सुकर्मा तत्सुतस्ततः ।
चकार तच्च तच्छिष्यौ जगृहाते महामती ॥ ३ ॥
हिरण्यनाभः कौसल्यः पौष्पिञ्जिश्च द्विजोत्तम ! ।
उदीच्यसामगाः शिष्यास्तस्य पञ्चदश स्मृताः ॥ ४ ॥
हिरण्यनाभात् तावन्त्यः संहिता यैर्द्विजोत्तमैः ।
गृहीतास्तेऽपि चोच्यन्ते पण्डितैः प्राच्यसामगाः ॥ ५ ॥

साम्नोऽप्यवान्तरशाखाभेदाः पौराणिका अपि । अध्येतारश्च कतिचित्तेषां षष्ठे निरूप्यन्ते ॥ तत्र क्रमेण । तत्र जैमिनिपुत्रस्य सुमन्तोः । तौ जैमिनेः पुत्रपौत्रौ जैमिनिना । विभक्तामेकैकां संहितां सम्यगेवाधीतवन्तौ ॥ २ ॥ तत्सुत सुमन्तुसुतः स संहिताभेदम् ॥ ३ ॥ सुकर्मणः शिष्यावाह, हिरण्यनाभ इति । कौसल्य इति हिरण्यनाभविशेषणं हे द्विजोत्तम ! शिष्याः पञ्चदश संहिता हिरण्यनाभेन दत्तास्त एव उदीच्य सामगाः स्मृताः ॥ ४ ॥ अपरैर्द्विजोत्तमैस्तावत्संख्या गृहीतसंहिता तावत्यः संहिता हिरण्यनाभाद् गृहीताः ते प्राच्यसामगा उच्यन्ते इत्यन्वयः ॥ ५ ॥ पौष्पिञ्जिशिष्यानाह,

लौगाक्षिः कुथुमिश्चैव कुशीदिर्लाङ्गलिस्तथा ।
पौष्यिञ्जिशिष्यास्तद्भेदैः संहिता बहुलीकृताः ॥ ६ ॥
हिरण्यनाभशिष्यश्च चतुर्विंशतिसंहिताः ।
प्रोवाच कृतिनामासौ शिष्येभ्यः स महामतिः ॥ ७ ॥
तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः ॥ ८ ॥
अथर्वणामथो वक्ष्ये संहितानां समुच्चयम् ।
अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ॥ ९ ॥
शिष्यमध्यापयामास कबन्धं सोऽपि तद् द्विधा ।
कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान् ॥ १० ॥
देवदर्शस्य शिष्यास्तु मौद्गो ब्रह्मबलिस्तथा ।
शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तम ॥ ११ ॥
पथ्यस्यापि त्रयः शिष्याः कृता यैर्द्विज संहिताः ।
जाजलिः कुमुदादिश्च तृतीयः शौनको द्विजः ॥ १२ ॥
शौनकस्तु द्विधा कृत्वा ददावेकान्तु बभ्रवे ।
द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने ॥ १३ ॥
सैन्धवा मुञ्जकेशाय भिन्ना वेदा द्विधा पुनः ।

लौगाक्षिरिति । तद्भेदैः तच्छिष्यप्रशिष्यादिभिः ॥ ६ ॥ हिरण्यनाभस्य चतुर्विंशतिसंहिताः कृतिनामा शिष्यः ॥ ७ ॥ तैः कृतिनाम्नः शिष्यैः ॥ ८ ॥ देवदर्शः अथर्वसंहिता चतुर्धा चक्रे, तास्तु मौद्गादयः चत्वारो जगृहुरित्यर्थः ॥ ११ ॥ पथ्यकृताश्चाथ संहिता जाजल्यादयो जगृहुः, यैः अथर्वसंहिताः शिष्याः कृताः ॥ १२ ॥ सैन्धवाः सैन्धवायनशिष्याः मुञ्जकेशा इति बभ्रोरेव नामान्तरं तच्छिष्याः द्विधा द्विप्रकाराः भिन्नाः वेदाः अथर्वसंहिता यैः ते तथा । संहिताभेदानाह, नक्षत्रकल्प इति । तासां संहितानाञ्च कल्पाः पञ्चभेदाः । तत्र नक्षत्रकल्पो नक्षत्रादि-

नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ १४ ॥
चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः ।
श्रेष्ठास्त्वथर्वणामेते संहितानां विकल्पकाः ॥ १५ ॥
आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥ १६ ॥
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै रोमहर्षणः ।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः ॥ १७ ॥
सुमतिश्चाग्निवर्चाश्च मित्रयुः शांशपायनः ।
अकृतव्रणोऽथ सावर्णिः षट् शिष्यास्तस्य चाभवन् ॥ १८ ॥
काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः ।
रामहर्षणिका चान्या तिसृणां मूलसंहिता ॥ १९ ॥
चतुष्टयेनाप्येतेन संहितानामिदं मुने ! ॥ २० ॥

पूजाविधिः वेदकल्पो वैतानिकमन्त्रादिभिः संहिताकल्पः संहितादिभिः ॥ १४ ॥ आङ्गिरसकल्पः अभिचारादिविधिः शान्तिकल्पः अश्वगजादीनां शान्तिविधिः ॥ १५ ॥ आख्यानादिभिः सह पुराणसंहितां चक्रे व्यास इति शेषः । तत्र स्वयंदृष्टार्थकथनमाख्यानं परम्परया गाथाः पितृपृथिव्यादिगीताः कल्पशुद्धयः श्राद्धादिकल्पनिर्णयाः ॥ १६ ॥ सुमत्यादयस्तत्र रोमहर्षणस्य षट् शिष्याः तत्कृताः षट् संहिता अभवन् ॥ १८ ॥ काश्यपादिभिस्त्रिभिः कृतास्तिस्रः । अकृतव्रण एव काश्यपः काश्यपोऽकृतव्रण इति वायूक्तेः । रोमहर्षणिका च अन्या रोमहर्षणेन पुनः संक्षेपेण कृता ॥ १९ ॥ एतासां संहितानां चतुष्टयेन सारोद्धाररूपमिदं विष्णुपुराणं मुने ! मैत्रेय ! मया कृतमिति शेषः ॥ २० ॥

आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते ।
अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते ॥ २१ ॥
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ।
तथान्यं नारदीयञ्च मार्कण्डेयञ्च सप्तमम् ।
आग्नेयमष्टमञ्चैव भविष्यं नवमं तथा ॥ २२ ॥
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम् ।
वाराहं द्वादशञ्चैव स्कान्दञ्चात्र त्रयोदशम् ॥ २३ ॥
चतुर्द्दशं वामनञ्च कौर्म्मं पञ्चदशं स्मृतम् ।
मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततः परम् ॥ २४ ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
सर्वेष्वेतेषु कथ्यन्ते वंशानुचरितञ्च यत् ॥ २५ ॥
यदेतत् तव मैत्रेय ! पुराणं कथ्यते मया ।
एतद् वैष्णवसंज्ञं वै पाद्मस्य समनन्तरम् ॥ २६ ॥
सर्गे च प्रतिसर्गे च वंशमन्वन्तरादिषु ।
कथ्यते भगवान् विष्णुरशेषेष्वेव सत्तम ! ॥ २७ ॥

श्रोतव्यानि अष्टादशपुराणान्याह, आद्यमिति सार्द्धैश्चतुर्भिः । केचित्तु पञ्चलक्षणानां चतुर्लक्षेण दशमाद्यं ब्राह्ममुच्यते इति वदन्ति ॥ २१ ॥ तत्र अष्टादशपुराणेषु किमेतत् पुराणं मया कथ्यत इत्याह, यदेतदिति । यथा यदेतत् तव कथ्यते तदेतद्वैष्णवसंज्ञं पद्मपुराणानन्तरं क्रमेण ज्ञातव्यम्ः । तथाच मात्स्ये, "वराहकल्पवृत्तान्तमधिकृत्य पराशरः । यान् प्राह धर्म्मानखिलांस्तदुक्तं वैष्णवं विदुः ।" इत्येवं पराशरः । ... विष्णुपुराणस्य ... कथ्यते ॥ २६ ॥ ... ॥ २७ ॥

अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥ २८ ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः।
अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव ताः ॥ २९ ॥
ज्ञेया ब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः।
राजर्षयः पुनस्तेभ्य ऋषिप्रकृतयस्त्रयः ॥ ३० ॥
इति शाखाः प्रसङ्ख्याताः शाखाभेदास्तथैव च।
कर्त्तारश्चैव शाखानां भेदहेतुस्तथोदितः ॥ ३१ ॥
सर्वमन्वन्तरेष्वेव शाखाभेदाः समाः स्मृताः।
प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे द्विज ! ॥ ३२ ॥

पुराणानां वेदोपबृंहकत्वेन धर्मशास्त्रहेतुत्वात् धर्मविद्यात्वमेव चतुर्दशसङ्ख्यामाह, अङ्गानीति। अङ्गानि—शिक्षाकल्पनिरुक्तच्छन्दोनक्षत्रव्याकरणानि षट्। चतुरश्चत्वारः। धर्मशास्त्रं मन्वादिप्रणीतग्रन्थम् ॥ २८ ॥ केवलदृष्टार्थविद्यात्वादायुर्वेदादिचतुष्कं युक्त्वा धर्मविद्यास्थानैः सहाष्टादशविद्यास्थानान्याह आयुरिति। आयुर्वेदोऽष्टाङ्गचिकित्साशास्त्रं धन्वन्तरिप्रोक्तम्। धनुर्वेदो धनुरादिचतुर्विध आयुधप्रयोगाभ्यासादिविषयः। गान्धर्ववेदो भरतमुनिप्रणीतो नृत्यगीतादिविषयः। अर्थशास्त्रं बार्हस्पत्यादिनीतिशास्त्रम्। पूर्वोक्ताश्चतुर्दशेत्यष्टादशविद्या इति ॥ २९ ॥ वेदशाखाप्रसङ्गात् ऋषीन् शाखाप्रणेतॄणां भेदमाह, ज्ञेया इति ॥ ३० ॥ उपसंहरति इतीति। प्रसङ्ख्याताः सङ्ख्याताः प्रोक्ताः शाखाभेदाश्च तथा उक्ताः। भेदहेतुः पुत्रशिष्यप्रशिष्यादिः ॥ ३१ ॥ शाखानां पुनः प्रणीतत्वेन वेदस्य पौरुषेयत्वं स्यादित्यत आह, प्राजापत्येति। ब्रह्मादौ प्रजापतिना दृष्टा श्रुतिः। नित्या इमे तु शाखा-

एतत् तवोदितं सर्वं यत् पृष्टोऽहमिह त्वया।
मैत्रेय! वेदसम्बद्धं किमन्यत् कथयामि ते॥ २१॥

षष्ठोऽध्यायः।

मैत्रेय उवाच।

यथावत् कथितं सर्वं यत् पृष्टोऽसि मया द्विज!।
श्रोतुमिच्छाम्यहं त्वेकं तद् भवान् प्रब्रवीतु मे॥ १॥
सप्त द्वीपानि पातालवीथ्यश्च महामुने!।
सप्त लोका येऽन्तरस्था ब्रह्माण्डस्यास्य सर्वतः॥ २॥
स्थूलैः सूक्ष्मैस्तथा सूक्ष्मात् सूक्ष्मैः सूक्ष्मतरैस्तथा।
स्थूलैः स्थूलतरैश्चैतत् सर्वं प्राणिभिरावृतम्॥ ३॥
अङ्गुलस्याष्टभागोऽपि न सोऽस्ति मुनिसत्तम!।
न सन्ति प्राणिनो यत्र कर्मबन्धनिबन्धनाः॥ ४॥
सर्वे चैते वशं यान्ति यमस्य भगवन्! किल।
आयुषोऽन्ते तथा यान्ति यातनास्तत्प्रचोदिताः॥ ५॥
यातनाभ्यः परिभ्रष्टा देवाद्यास्वथ योनिषु।
जन्तवः परिवर्त्तन्ते शास्त्राणामेष निर्णयः॥ ६॥

भेदा जाता: सप्त [illegible] भेदा न स्पृष्टाः पुरुषैः [illegible]: ॥ २१ ॥

[illegible] कर्मादिभेदतः। [illegible] [illegible] ॥१॥ पातालवीथ्यः [illegible]: सप्त लोकाः [illegible]: । [illegible] ॥२॥ [illegible]

सोऽहमिच्छामि तत् श्रोतुं यमस्य वशवर्त्तिनः।
न भवन्ति नरा येन तत् कर्म कथयामलम् ॥ ७ ॥

पराशर उवाच।

अयमेव मुने! प्रश्नो नकुलेन महात्मना।
पृष्टः पितामहः प्राह भीष्मो यत् तत् शृणुष्व मे ॥ ८ ॥

भीष्म उवाच।

पुरा समागतो वत्स! सखा कालिङ्गको द्विजः।
स मामुवाच पृष्टो वै मया जातिस्मरो मुनिः ॥ ९ ॥
तेनाख्यातमिदञ्चेदम् इत्थञ्चैतद् भविष्यति।
तथा च तदभूद् वत्स! यथोक्तं तेन धीमता ॥ १० ॥
स पृष्टश्च मया भूयः श्रद्धानवता द्विजः।
यद् यदाह न तद् दृष्टम् अन्यथा हि मया क्वचित् ॥ ११ ॥
एकदा तु मया पृष्टं यदेतद् भवतोदितम्।
प्राह कालिङ्गको विप्रः स्मृत्वा तस्य मुनेर्वचः ॥ १२ ॥

प्रति पृष्टवानेव च भीष्मं प्रति यत् प्राह तत् शृणुष्व ॥ ८ ॥ स कालिङ्गको द्विजो मामुवाच यथा जातिस्मरो मुनिः पृष्ट इति ॥ ९ ॥ तेन जातिस्मरेण इदमिदं वर्त्तमानमेतदित्थमेव भविष्यतीति च कालिङ्गकाख्याने यदाख्यातं तेन च कालिङ्गकेन मह्यं यथोक्तं तथैव तदभूत् हे वत्स! नाप्यन्यथा ॥ १० ॥ श्रद्धानमनोयुक्तेन च कालिङ्गको द्विजो भूयः पुनः पृष्टः सन् जातिस्मरत्वात् यद् यदाह तदन्यथा व्यभिचारि मया न दृष्टमित्यतिविस्मयावहमिदम् ॥ ११ ॥ एकदामाह, पृष्टवेति। तस्य जातिस्मरस्य मुनेः ॥ १२ ॥ तदेवाह जानीति। मं

जातिस्मरेण कथितो रहस्यः परमो मम।
यमकिङ्करयोर्योऽभूत् संवादस्तं ब्रवीमि ते॥ १३ ॥

कालिङ्ग उवाच।

स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम्॥ १४ ॥

अहममरगणार्चितेन धात्रा
यम इति लोकहिताहिते नियुक्तः।
हरिगुरुवशगोऽस्मि न स्वतन्त्रः
प्रभवति संयमने ममापि विष्णुः॥ १५ ॥

कटकमुकुटकर्णिकादिभेदैः
कनकमभेदमपीष्यते यथैकम्।
सुरपशुमनुजादिकल्पनाभि-
र्हरिरखिलाभिरुदीर्यते तथैकः॥ १६ ॥

म[illegible]दृष्टवानस्मि ॥ १३ ॥ तमेवाह स्वपुरुषमित्यादि[illegible] योऽस्य[illegible] दृष्टान्तेन[illegible] शृणु। [illegible] पाशहस्तं स्वपुरुषमभिवीक्ष्य विष्णुभक्तान् परिहरेत्यादि[illegible] [illegible] कर्णमूले वदति स्म ॥ १४ ॥ न वैष्णवानां प्रभुरित्यत्र हेतुमाह, अहमिति। प्रजासंयमनात् यम इति नाम्ना लोकहिताहिते शुभाशुभफलदानार्थं धात्रा नियुक्तोऽपि हरिरेव गुरुस्तद्वशगोऽस्मि न स्वतन्त्रः, यतो ममापि संयमने दण्डे विष्णुः प्रभवति। हिताय च नियुक्त इति पाठे दण्डोऽपि पापक्षयार्थत्वाद्धित एव तथापि ॥ १५ ॥ तत्र हेतुमाह, कटकेति द्वाभ्याम्। सर्वोऽपि[illegible] सर्वमयत्वात् सर्वविषयत्वमित्यर्थः। कटको वलयः। कर्णिका कर्ण-

क्षितिजलपरमाणवोऽनिलान्ते
पुनरपि यान्ति यथैकतां धरित्र्या।
सुरपशुमनुजादयस्तथान्ते
गुणकलुषेण सनातनेन तेन॥ १७॥
हरिममरगणार्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम्॥ १८॥
इति यमवचनं निशम्य पाशी
यमपुरुषस्तमुवाच धर्मराजम्।
कथय मम विभो! समस्तधातु
र्भवति हरेः खलु यादृशोऽस्य भक्तः॥ १९॥

भूषणम्। कटकादिभेदैर्नानारूपं कार्यं रूपविच्छिन्नमपि अभेदं कारणात्मना एकमेवेष्यते यथा तथैव एव जगत्कारणभूतो हरिः सुरादिभेदैर्नाना-ख्यं ते ॥१६॥ किञ्च भेदस्य मायोपाधिकत्वान्मायानाशे तु ऐक्यमेव एव दृष्टान्तः, क्षितीति। अनिलोद्धृताः क्षितिजलपरमाणवो यथा अनिलस्यान्ते अवसाने धरित्र्यादिना एकतां यान्ति तथा गुणानां कलुषेण क्षोभेण ये सुरादयो जाताः अन्ते गुणक्षोभोपरमे तेन विष्णुना एकतां यान्तीत्यन्वयः ॥१७॥ तर्हि यमस्यापि नियन्तुर्भक्तः कथं मनुष्यपाशेन बध्यत आह, हरिमिति। परमार्थतः सर्वात्मत्वेन हरिं यः प्रणमति तं परित्यज्य व्रज। यदा हरिप्रणतिमात्रेण परमार्थतः समस्तपापबन्धविमुक्तः। अनेन दृष्टान्तेन भक्तस्य गन्धोऽपि नास्ति। एवम्भूतं येऽन्ये च पापाः तद्वासनया सुखमीति स्फुलिङ्गाः ॥१८॥ समस्तस्य धातुः पालकस्य ॥१९॥ अक्षैरित्यनेन चित्तं

यम उवाच।

न चलति निजवर्णधर्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न च हन्ति किञ्चिदुच्चैः
सितमनसं तमवेहि विष्णुभक्तम्॥ २०॥
कलिकलुषमलेन यस्य नात्मा
विमलमतेर्मलिनं कृतोऽस्तमोहे।
मनसि कृतजनार्दनं मनुष्यं
सततमवेहि हरेरतीव भक्तम्॥ २१॥
कनकमपि रहस्यवेक्ष्य बुद्ध्या
तृणमिव यः समवैति वै परस्वम्।
भवति च भगवत्यनन्यचेताः
पुरुषवरं तमवेहि विष्णुभक्तम्॥ २२॥
स्फटिकगिरिशिलामलः क्व विष्णु-
र्मनसि नृणां क्व च मत्सरादिदोषः।

एवं रागादिशून्यं मनो यस्य तं विष्णुभक्तं विद्धि। भक्तो चेत् तद्नु तं विशिनष्टि न चलतीति हरेरात्मेत्यमिति बुद्ध्या। निजवर्णाश्रमधर्मतो यो न चलति तम्। भक्तेर्विष्णावात्मत्वात्, सममतिरिति॥ २०॥ तेऽस्तमोहे मनसि सततं कृतजनार्दनमतीव भक्तमवेहि। किंविशिष्टे यस्य कलिकलुषमलेन तत्कृतेन पापमलेनात्मा बुद्धिर्न मलिनीकृतस्तम्॥ २१॥ न हरतीति यदुक्तं तत् विवृणोति, कनकमपीति कनकमपि रहस्यपि दृष्ट्वा परस्वं तृणमिव यः समवैति जिघृक्षाविमुखो भवतीत्यर्थः। भगवति अनन्यचेताः भवति तम्॥ २२॥ सितमनसमित्यत्र विवेचन यदुक्तं तदेव व्यतिरेकाभ्यां दर्शयति। स्फटिकेति। स्फटिकगिरिशिलेव

न हि तुहिनमयूखरश्मिपुञ्जे
भवति हुताग्नदीप्तिजः प्रतापः ॥ २३ ॥
विमलमतिर्विमत्सरः प्रशान्तः
शुचिचरितोऽखिलसत्वमित्रभूतः ।
प्रियहितवचनोऽस्तमानमायो
वसति सदा हृदि तस्य वासुदेवः ॥ २४ ॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
क्षितिरसमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव शालपोतः ॥ २५ ॥
यमनियमविधूतकल्मषाणाम्
अनुदिनमच्युतसक्तमानसानाम् ।
अपगतमदमानमत्सराणां
व्रज भट ! दूरतरेण मानवानाम् ॥ २६ ॥

अन्यः तुहिनमयूखचन्द्रस्य रश्मिपुञ्जे सहुताग्निदीप्तिजः [illegible] न हि विरागोऽक्रूरा तद्वोधर्षितस्येव विष्णुभक्तत्वं मया मन्ये भवति ॥ २३ ॥ तदेव विभिनष्टि त्रिभिः विमलमतिरिति । शुचि शुद्धं चरितं यस्य अखिलानां सत्त्वानां मित्रभूतः अस्तो निरस्तो मानमायौ येन सः ॥ २४ ॥ तस्य समस्तमेव विष्णुमयत्वमाह, वसतीति । उक्तमर्थं सर्वोत्कर्षाविष्करणेन द्रढयति, क्षितिरसमिति । शालपोतो बालतरुः शाल-तरु चारुतया सुकुमारतयैव स्वं क्षितिरसं स्वस्यान्तर्गतं कथयति अनुमापयति एवं सर्वभूतेषु सौम्यतया विष्णुभक्तोऽपि विष्णुं हृदि वसन्तं अनुमापयतीत्यर्थः ॥ २५ ॥ किञ्च यमनियमैरिति, अहिंसासत्यास्तेयब्रह्म-चर्यापरिग्रहा यमाः शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः, अमानित्वमदम्भित्वमित्यादि मदः उद्भावो मदः, आत्मनि पूज्यबुद्धिर्मानः, परोत्कर्षासहनं मत्सरः ॥ २६ ॥ अपगतमदमानमत्सराणामित्यादि सुगमम् । [illegible]

हृदि यदि भगवाननादिरास्ते
हरिरसिशङ्खगदाधरोऽव्ययात्मा ।
तदघमघविघातकर्त्तृ भिन्नं
भवति कथं सति चान्धकारमर्के ॥ २७ ॥
हरति परधनं निहन्ति जन्तून्
वदति तथानृतनिष्ठुराणि यश्च ।
अशुभजनितदुर्मदस्य पुंसः
कलुषमतेर्हृदि तस्य नास्त्यनन्तः ॥ २८ ॥
न सहति परसम्पदं विनिन्दां
कलुषमतिः कुरुते सतामसाधुः ।
न यजति न ददाति यश्च सन्तं
मनसि न तस्य जनार्दनोऽधमस्य ॥ २९ ॥
परमसुहृदि बान्धवे कलत्रे
सुततनयापितृमातृभृत्यवर्गे ।
शठमतिरुपयाति योऽर्थतृष्णां
तमधमचेष्टमवेहि नास्य भक्तम् ॥ ३० ॥

ज्ञाने, अपीति क्वचित् पाठः । ननु तर्हि अघानां पापानां विघातकर्त्तृ हरिरेव न भिन्नं ज्ञापितं एवं कथं भवति, अतश्चतुर्भिरपीति अत्रापरं न तिष्ठतीत्यध्याहारेण व्याख्येयं कथमिति ॥ २७ ॥ इदानीमभक्त-लक्षणान्याह हरतीति चतुर्भिः ॥ २८ ॥ सतां विनिन्दां कुरुते असाधवः न ददाति । यदा धनं विष्णुं तद्भक्तं वा न यजति न पूजयति न च तस्मै ददाति ॥ २९ ॥ परमसुहृदादिषु शठमतिः अर्थतृष्णया वर्त्तते अथवा तेषु अर्थं अपहृत्य न, यद्वा परमसुहृदादौ तेषां

अशुभमतिरसत्प्रवृत्तिसक्तः
सततमनार्य्यविशालसङ्गमत्तः ।
अनुदिनकृतपापबन्धयत्नः
पुरुषपशुर्नहि वासुदेवभक्तः ॥ ३१ ॥
सकलमिदमहञ्च वासुदेवः
परमपुमान् परमेश्वरः स एकः ।
इति मतिरचला भवत्यनन्ते
हृदयगते व्रज तान् विहाय दूरात् ॥ ३२ ॥
कमलनयन ! वासुदेव ! विष्णो !
धरणिधराच्युत ! शङ्खचक्रपाणे ! ।
भव शरणमितीरयन्ति ये वै
त्यज भट ! दूरतरेण तानपापान् ॥ ३३ ॥
वसति मनसि यस्य सोऽव्ययात्मा ।
पुरुषवरस्य न तस्य दृष्टिपाते ।
तव गतिरथवा ममास्ति चक्र-
प्रतिहतवीर्य्यबलस्य सोऽन्यलोक्यः ॥ ३४ ॥

यः सङ्गस्तेन मत्तः । अनार्य्यविशालेति पाठे नीचैः दुःशीलैश्च यः सङ्गस्तेन मत्त इत्यर्थः ॥ ३१ ॥ [illegible] भक्तिचिह्नं [illegible]माह, सकल-मिति ॥ ३२ ॥ नामसङ्कीर्तनं तदेकशरणता चैकान्तभक्तिचिह्नमित्याह, कमलनयनेति ॥ ३३ ॥

दूरतरेण त्यजेति यदुक्तं तत्र हेतुमाह वसतीति । तस्य दृष्टिपातं [illegible] प्रतिहतं [illegible] तस्य तव मम च तद्दृष्टिपातविषये [illegible] न गतिरस्ति स पुनरन्यलोक्यः

कालिङ्ग उवाच ।

इति निजभटशासनाय देवो
रवितनयः स किलाह धर्मराजः ।
मम कथितमिदञ्च तेन तुभ्यं
कुरुवर ! सम्यगिदं मयापि चोक्तम् ॥ ३५ ॥

भीष्म उवाच ।

नकुलैतत्समाख्यातं पूर्वं तेन द्विजन्मना ।
कलिङ्गदेशादभ्येत्य प्रीयता सुमहात्मना ॥ ३६ ॥
मयाप्येतद् यथान्यायं सम्यग् वत्स ! तवोदितम् ।
यथा विष्णुमृते नान्यत् त्राणं संसारसागरे ॥ ३७ ॥
किङ्करा दण्डपाशौ वा न यमो न च यातनाः ।
समर्थास्तस्य यस्यात्मा केशवालम्बनः सदा ॥ ३८ ॥

पराशर उवाच ।

एतन्मुने ! तवाख्यातं गीतं वैवस्वतेन यत् ।
त्वत्प्रश्नानुगतं सम्यक् किमन्यच्छ्रोतुमिच्छसि ॥ ३९ ॥

यमगीता समाप्ता ।

कुरुवर ! हे भीष्म ! ॥३५॥ तस्य यथोक्तं न प्रभवौ । केशवालम्बनः केशवाश्रयः ॥ ३८ ॥

अष्टमोऽध्यायः ।

मैत्रेय उवाच ।

भगवन् ! भगवान् देवः संसारविजिगीषुभिः ।
समाख्याहि जगन्नाथो विष्णुराराध्यते यथा ॥ १ ॥
आराधिताच्च गोविन्दादाराधनपरैर्नरैः ।
यत् प्राप्यते फलं श्रोतुं तच्चेच्छामि महामुने ॥ २ ॥

पराशर उवाच ।

यत् पृच्छति भवानेतत् सगरेण महात्मना ।
और्वः प्राह यथा पृष्टस्तन्मे कथयतः शृणु ॥ ३ ॥
सगरः प्रणिपत्यैतमौर्वं पप्रच्छ भार्गवम् ।
विष्णोराराधनोपायसम्बद्धं मुनिसत्तम ॥ ४ ॥
फलञ्चाराधिते विष्णौ यत् पुंसामभिजायते ।
स चाह पृष्टो यत् तेन तस्मै त्वयाखिलं शृणु ॥ ५ ॥

और्व उवाच ।

भौमान् मनोरथान् स्वर्गान् स्वर्गिवन्द्यं तथास्पदम् ।
प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमम् ॥ ६ ॥

विष्णोराराधनोपायो निजधर्मप्रवृत्तः । सगरौर्वसंवादं कथाध्यायैर्विवक्ष्यति । यथा यद्यप्रकारेण एवमेव ॥ १ ॥ विष्णोराराधन-परैराधाराधकपरैः ॥ २ ॥ स्वर्गिवन्द्यं ब्रह्मलोकादिपदम् ॥ ६ ॥

यद्‌ यदिच्छति यावच्च फलमाराधितेऽच्युते ।
तत्‌ तदाप्नोति राजेन्द्र ! भूरि स्वल्पमथापि वा ॥ ७ ॥
यत्‌ तु पृच्छसि भूपाल ! कथमाराध्यते हि सः ।
तदहं सकलं तुभ्यं कथयामि निबोध मे ॥ ८ ॥
वर्णाश्रमाचारवता पुरुषेण परः पुमान्‌ ।
विष्णुराराध्यते पन्था नान्यत्‌ तत्तोषकारणम्‌ ॥ ९ ॥
यजन्‌ यज्ञान्‌ यजत्येनं जपत्येनं जपन्‌ नृप ! ।
घ्नंस्तथान्यान्‌ हिनस्त्येनं सर्वभूतो यतो हरिः ॥ १० ॥
तस्मात्‌ सदाचारवता पुरुषेण जनार्दनः ।
आराध्यते स्ववर्णोक्तधर्मानुष्ठानकारिणा ॥ ११ ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च धरणीपते ! ।
स्वधर्मतत्परो विष्णुम्‌ आराधयति नान्यथा ॥ १२ ॥
परापवादं पैशुन्यम्‌ अनृतञ्च न भाषते ।
अन्योद्वेगकरञ्चापि तोष्यते तेन केशवः ॥ १३ ॥

यावत्‌ यत्प्रमाणं भूरि बहुलं वाल्पं प्रमाणम्‌ ॥ ७ ॥ वर्णाश्रमाचार-
वतेत्यधिकारिविशेषणात्‌ वेदोक्तवर्णाश्रमाचारवानेव
तदाराधनाधिकारी न विनीताचारः । अन्यः स्वस्वधर्मपरित्यागेन तदुपासना-
चारपरायणोऽपि नाधिकारी पन्था न भवति ॥ ९ ॥ यज्ञान्‌ यजमान्‌
इन्द्रादीन्‌ यजन्‌ विष्णुं यजति तं जपन्‌ जपम्‌ विष्णुमेव जपति
अन्यं घ्नन्‌ विष्णुमेव हन्ति ॥ १० ॥ यतः पृथिव्यादिसर्वभूतरूपो विष्णुः ।
तस्मात्‌ सदाचारवता वर्णाश्रमधर्मान्‌ यागादीन्‌ सदाचारांश्च कुर्वता विष्णु-
राराध्यते तोष्यते । सदाचारः अविनीतनिन्दाचारः ॥ ११ ॥ स्वस्व-
धर्मैकाधिकारित्वसम्पूर्णं व्यतिरेकमुखेन दर्शयन्‌ आराधयति ॥ १२ ॥
तत्र वाचारमेवोद्दिश्य, अनुभिः परस्यापवादं अपवादनिन्दां पैशुन्यं

परस्त्रीपरद्रव्यपरहिंसासु यो मतिम्।
न करोति पुमान् भूप तोष्यते तेन केशवः ॥ १४ ॥
न ताडयति नो हन्ति प्राणिनोऽन्यांश्च देहिनः।
यो मनुष्यो मनुष्येन्द्र तोष्यते तेन केशवः ॥ १५ ॥
देवद्विजगुरूणां यो शुश्रूषासु सदोद्यतः।
तोष्यते तेन गोविन्दः पुरुषेण नरेश्वर ॥ १६ ॥
यथात्मनि च पुत्रे च सर्वभूतेषु यस्तथा।
हितकामो हरिस्तेन सर्वदा तोष्यते सुखम् ॥ १७ ॥
यस्य रागादिदोषेण न दुष्टं नृप मानसम्।
विशुद्धचेतसा विष्णुस्तोष्यते तेन सर्वदा ॥ १८ ॥
वर्णाश्रमेषु ये धर्माः शास्त्रोक्ता नृपसत्तम।
तेषु तिष्ठन् नरो विष्णुमाराधयति नान्यथा ॥ १९ ॥

सगर उवाच।

तदहं श्रोतुमिच्छामि वर्णधर्मानशेषतः।
तथैवाश्रमधर्मांश्च द्विजवर्य्य ब्रवीहि तान् ॥ २० ॥

परोक्षे दुष्टादोषकथनम् ॥ १२ ॥ न हन्ति न प्राणान् वियोजयति। प्राणिनो जङ्गमानन्यान् देहिनः स्थावरान्। एतेषां नियमेनाक्रियमाणानां धर्मत्वेन हरितोषकत्वात् विजयोपकत्वम् ॥ १५ ॥ इदानीं हरितोषणम् आधारधर्मनाह, यथेति। निष्क्रियं चेतो यस्य सः। तेषु तिष्ठन्नेवाराधयत्येव नान्यथः ॥ १८ ॥ तत्र तांस्तान् श्रोतुमिच्छामि ब्रवीहीत्यर्थः ॥ २० ॥ तत्र ...

और्व उवाच ।

ब्राह्मणक्षत्रियविशां शूद्राणाञ्च यथाक्रमम् ।
त्वमेकाग्रमना भूत्वा शृणु धर्मान् मयोदितान् ॥ २१ ॥
दानं दद्यात् यजेद्देवान् यज्ञैः स्वाध्यायतत्परः ।
नित्योदकी भवेद्विप्र कुर्य्याच्चाग्निपरिग्रहम् ॥ २२ ॥
वृत्त्यर्थं याजयेच्चान्यान् अन्यानध्यापयेत् तथा ।
कुर्य्यात् प्रतिग्रहादानं गुर्व्वर्थं न्यायतो द्विजः ॥ २३ ॥
सर्व्वभूतहितं कुर्य्यात् नाहितं कस्यचिद् द्विजः ।
मैत्री समस्तभूतेषु ब्राह्मणस्योत्तमं धनम् ॥ २४ ॥
ग्राव्णि रत्ने च पारक्ये समबुद्धिर्भवेद् द्विजः ।
ऋतावभिगमः पत्न्यां शस्यते चास्य पार्थिव ॥ २५ ॥
दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोऽपि हि ।
यजेच्च विविधैर्यज्ञैरधीयीत च पार्थिव ॥ २६ ॥

धर्मांश्च दानादीन् । दद्यात् कुर्य्यात् नित्योदकी नित्यं स्नानतर्पणादिकृत् यथाधिकारमौपासनाग्नेस्त्रेताग्नीनां वा परिग्रहः ॥ २२ ॥ धनार्ज्जन-निमित्तानाह, वृत्त्यर्थमिति । प्रतिग्रहादानं प्रतिग्राह्यस्य धनादेरादानं तच्च गुर्व्वर्थं गुरोरर्थे सति न तु पुत्रार्थीयेति पाठे तु पुत्रः पुत्र-कर्ता स च तस्य तु विप्रार्थे । "क्रमागतं प्रीतिदायं प्राप्तञ्च सह भार्य्यया अविभाज्यं सवर्णानां धनं पुत्रलदापृतम्" इति विष्णुवचनात् । पुत्रार्थ-मिति पाठे पुत्रधर्मार्थानिमित्तमित्यर्थः । तथापि न्यायतः स्वाव-वृत्त्यादिद्रव्यतयाच विना द्विजो ब्राह्मणः ॥ २३ ॥ ग्राव्णि इति । ग्राव्णि पाषाणे पारक्ये परकीये रत्ने चास्य ब्राह्मणस्य समबुद्धिः । पत्न्याम् ऋतौ चाभिगमः शस्यते ऋत्वावप्यनुपगमने न तु निषेधः । "ऋतौ भार्य्यामुपेयात्" इति श्रुतौ परिसंख्याया अभावात् परिसङ्ख्या-

नियमयोर्भेदात् । तथाहि भट्टपादः, "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ।" इत्यस्यार्थ-स्तृतीयपादभूतज्योतिष्टोमस्यात्यन्तमप्राप्तस्य प्रापको विधिः । यथाग्निष्टोमेन यजेतेत्यादिः । पाक्षिकप्राप्तौ तस्याप्राप्तांशस्य परिपूरणाय नियमेन प्रापकं नियमविधिः । यथा व्रीहीनवहन्तीत्यत्र वितुषीकरणस्यावहननेन नखनिर्दलनादिना च प्राप्तस्य नखनिर्दलनादिपक्षेऽपि अवहननस्या-प्राप्तांशस्य नियमेन प्रापकं विधेयस्य तत्र चान्यत्र च प्राप्तौ प्राप्ति-योग्यतायाम् अन्यतरनिवृत्तये पुनः प्रापकं परिसंख्या । यथा "पञ्च पञ्चनखा भक्ष्याः" "अतो भाष्यमुपेयात्" इति । अत्र पञ्चनखभक्षणादेर्लोकत एव प्राप्तस्य अज्ञाततया भावात् । तत्र श्रुतेरज्ञातज्ञापकत्वलक्षणस्य प्रामाण्यस्य असम्भवेन स्वार्थत्वाभावात् पञ्चातिरिक्तपञ्चनखभक्षणनिषेधादि-रूपान्यार्थकल्पनं युक्तं तत्र च ... तदनुरोधेन रागतः प्राप्तस्य बाधोऽपि न्याय्य एव । अत एव न स्वार्थे तात्पर्यं ... निषेधा-र्थतो ... पञ्चनखभक्षणम्, एवं ... अपि इत्यादि ... अभिधानीमादत्त इत्यत्र अनपेक्षाधारणा-... इमां रशनां अगृभ्णन्नृतस्येत्यश्वाभिधानीमादत्त इत्यत्र मन्त्रस्यार्थ-प्रकाशनसामर्थ्येनाश्वाभिधान्यादाने गर्दभाभिधान्यादाने चोभ-यत्र ... अश्वाभिधान्यादाने मन्त्रविनियोगस्य श्रुत्यैव ... अप्राप्तस्य ... श्रुतेरप्राप्तप्रापकत्वलक्षणप्रामाण्यसम्भवात् न तदनुरोधेन ... अर्थ ... प्राप्तबाधश्च नास्तीति न दोषप्रसङ्गोऽपि, ननु अज्ञातज्ञापकत्वलक्षणप्रामाण्यस्य सर्वत्राविशेषात् पूर्वनियमपरिसंख्याविधीनां को भेदः ? इति चेत्, न प्रमाणान्तरायोग्ये अपाये पूर्वविधिः, पाक्षिकप्राप्तौ नियमविधिः युगपदेव विकल्पित-... पक्षप्राप्तयोरन्यतरस्य परिसंख्याविधिरिति पूर्वमेवोक्तत्वात् । अपूर्वविधिवत् परिसंख्याविधेरपि अप्राप्तप्रापकत्वेन परिमाणत्वा-... निवृत्तिः कथं न स्यादिति चेत्, किन्तु प्रापकतोऽस्य ... पूर्वप्रतिपादनस्य ... निवृत्तिफलकत्वात् । तथापि ... अश्वरशनादाने विनियुक्तस्य मन्त्रस्य गर्दभरशनादाने विनियोगाभावादत्र,

शस्त्राजीवो महीरक्षा प्रवरा तस्य जीविका ।
तस्यापि प्रथमे कल्पे पृथिवीपरिपालनम् ॥ २७ ॥
धरित्रीपालनेनैव कृतकृत्या नराधिपाः ।
भवन्ति नृपतेरंशा यतो यज्ञादिकर्मणाम् ॥ २८ ॥

निवृत्तिः सुतरां सिद्धैव इत्यनेन परिसंख्याफलम् । अपूर्वविधेस्तु अग्निहोत्रादिषु प्रवृत्तिजननस्य सम्भवात्तदन्यफलाकाङ्क्षेति । अत एव भट्टपादाः अयम् आहुः तन्त्रवार्त्तिके, "अप्राप्तविधिरेवायम् अतो मन्त्रस्य नियमः । परिसंख्याफलेनोक्तो न विशेषः पुनः श्रुते ॥" इति परिसंख्यान्यवृत्तिः फलमित्यर्थः । तत् कुत इत्यत्राह, "न विशेषः पुनः-श्रुते" इति विधिश्रवणमविशिष्टपुनःश्रवणस्य तत् प्रथमश्रवणतश्च-श्रवणस्य प्रवृत्तिजननफलमात्रे विशेषाभावात् श्रुतिद्वयस्य अन्यनिवृत्ति-फलसंबन्धेनैव कल्पनीयमित्यर्थः । केचित्तु भट्टमते परिसंख्याया आत्मोदाहरणं नास्तीति वदन्ति, तत्र "पञ्च पञ्चनखा भक्ष्या" इत्यादिषु उक्तप्रकारेण दोषत्रयाभावात् परिसंख्योदाहरणत्वेऽपि अदोषात् भेदेनैव परिसंख्यावचनस्य सामान्याभावात्। एवमतो भार्या-गमनादिष्वपि अनुरागात्तदभावयोर्नित्यवत् प्राप्ततया अप्राप्तांशपूरण-फलाभावात्तद्विषयविधिवचनं परिसंख्यैव । तथा, "ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः ॥" इति दोषश्रवणं न स्यात् । नैव दोषः सन्ति काले इच्छति तत्र इत्यादिना तामनुपगच्छतो दोषश्रवणोपपत्तेरिति ध्येयः । "भार्यां व्यवायाविषयत्वेन नित्यासु अन्नोभिश्च तत्र चोदना" इत्यादयुक्तोऽत्र च ॥ २५ ॥ आत्मवचनेनाह, दानादीति चतुर्भिः ॥ २६ ॥

शस्त्राजीवो युद्धजीविका तस्य क्षत्रियस्य प्रथमे कल्पे पक्षे पृथिवी-पालनं धर्मामिधीयत इति शेषः ॥ २७ ॥ अत्र हेतुः परिभाति । भवन्ति नृपतेरंशाः, "पुण्यात् षड्भागमादत्ते न्यायतः परिपालयन्" इत्यादिस्मृतेः अयमेवेत्यनुविधेयमात् प्रतिपालितविप्राणां पुण्यस्य षष्ठांशो भूपस्य भावः ॥ २८ ॥ पापानां अंशादानपात् तां करोतीति तथा ।

दुष्टानां शासनाद्राजा शिष्टानां परिपालनात् ।
प्राप्नोत्यभिमतान् लोकान् वर्णसंस्थाकरो नृपः ॥ २९ ॥
पाशुपाल्यं वाणिज्यञ्च कृषिञ्च मनुजेश्वर ! ।
वैश्याय जीविकां ब्रह्मा ददौ लोकपितामहः ॥ ३० ॥
तस्याप्यध्ययनं यज्ञो दानं धर्मश्च शस्यते ।
नित्यनैमित्तिकादीनाम् अनुष्ठानञ्च कर्मणाम् ॥ ३१ ॥
द्विजातिसंश्रयं कर्म तादर्थ्यं तेन पोषणम् ।
क्रयविक्रयजैर्वापि धनैः कारूद्भवेन वा ॥ ३२ ॥
दानञ्च दद्यात् शूद्रोऽपि पाकयज्ञैर्यजेत च ।
पित्र्यादिकञ्च वै सर्वं शूद्रः कुर्वीत तेन वै ॥ ३३ ॥
भृत्यादिभरणार्थाय सर्वेषाञ्च परिग्रहः ।
ऋतुकालाभिगमनं स्वदारेषु महीपते ! ॥ ३४ ॥

वर्णसंस्थाकर इति पाठे संस्थापको गुणाधायकस्तु ॥ २९ ॥ वैश्यधर्मानाह, पाशुपाल्यमिति द्वाभ्याम् ॥ ३० ॥ शूद्रधर्मानाह, द्विजातीति । द्विजातिसंश्रयं त्रैवर्णिकशुश्रूषारूपं कर्म तादर्थ्यं तदुपकारकत्वात्तु धर्मः । तेन द्विजशुश्रूषयाऽसौ पोषणं लभ्यम् । आपदि तु क्रयविक्रयजैर्वा शिल्पजैर्वा कारुकर्मोद्भवेन धनेन च पोषणं स्मृतम् । 'द्विजशुश्रूषया जीवन् न जीवेत्' इति पुराणोक्तेः ॥ ३२ ॥ पाकयज्ञैर्वैश्वदेवाद्यैः । ''नमस्कारेण मन्त्रेण पञ्च यज्ञान् न हापयेत्'' इति याज्ञवल्क्योक्तेः । पित्र्यादिकं श्राद्धादि, तेन द्विजशुश्रूषालब्धेन द्रव्येण कुर्वीत ॥ ३३ ॥ पुनः सर्वेषां साधारणधर्मानाह, भृत्यादि इति । अक्षुद्राधिकैः सार्द्धैस्त्रिभिः पद्यैः परिग्राह्याः सर्वेषां साधारणधर्मा इति चतुर्वर्णान्वयः । परिग्रहोऽर्थसंपादनम् ॥ ३४ ॥ दयाप्रवृत्तः परदुःखेच्छा । तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता ।

दया समस्तभूतेषु तितिक्षानभिमानिता ।
सत्यं शौचमनायासो मङ्गल्यं प्रियवादिता ॥ ३५ ॥
मैत्र्यस्पृहा तथा तद्वत् अकार्पण्यं नरेश्वर ! ।
अनसूया च सामान्या वर्णानां कथिता गुणाः ॥ ३६ ॥
आश्रमाणाञ्च सर्व्वेषाम् एते सामान्यलक्षणाः ।
गुणांस्तथापद्धर्मांश्च विप्रादीनामिमान् शृणु ॥ ३७ ॥
क्षात्रं कर्म द्विजस्योक्तं वैश्यकर्म तथापदि ।
राजन्यस्य च वैश्योक्तं शूद्रकर्म न वै तयोः ॥ ३८ ॥
सामर्थ्ये सति तत् त्याज्यम् उभाभ्यामपि पार्थिव ! ।
तदेवापदि कर्त्तव्यं न कुर्य्यात् कर्मसङ्करम् ॥ ३९ ॥
इत्येते कथिता राजन् ! वर्णधर्मा मया तव ।
धर्ममाश्रमिणां सम्यक् ब्रुवतो मे निशामय ॥ ४० ॥

अनभिमानिता आत्मनि श्लाघ्यत्वाभिमानशून्यता । सत्यं यथार्थवचनम् । शौचम्, "मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्" तत् द्विविधम् "शारीरं पीडनं येन शुभेनापि कर्मणा । अत्यन्तं तत् न कुर्वीत अनायासः स उच्यते ॥" इत्यनायासः । मङ्गल्यम् "[illegible]" इत्युक्तम् । मैत्री सर्वभूतहितेन वर्त्तनम् । अस्पृहा [illegible] अभिलाषः । "[illegible]" इति । अकार्पण्यं यथाशक्ति दानम् अनसूया गुणेषु दोषारोपाभावः ॥ ३६ ॥ [illegible] ॥ ३८ ॥ उभाभ्यां क्षत्रियवैश्याभ्याम् । [illegible] ॥ ३९ ॥ [illegible] ॥ ४० ॥

नवमोऽध्यायः।

—:•:—

और्व उवाच।

बालः कृतोपनयनो वेदाहरणतत्परः।
गुरुगेहे वसेद् भूप! ब्रह्मचारी समाहितः॥ १॥
शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः।
व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना॥ २॥
उभे सन्ध्ये रविं भूप! तथैवाग्निं समाहितः।
उपतिष्ठेत तथा कुर्य्यात् गुरोरप्यभिवादनम्॥ ३॥
स्थिते तिष्ठेत् व्रजेद् याति नीचैरासीत् तथा सति।
शिष्यो गुरौ नृपश्रेष्ठ! प्रतिकूलं न सञ्चरेत्॥ ४॥
तेनैवोक्तः पठेद् वेदं नान्यचित्तः पुरःस्थितः।
अनुज्ञातश्च भिक्षान्नमश्नीयाद् गुरुणा ततः॥ ५॥

निरूप्य वर्णेतराचारान् वर्णधर्मानशेषतः। तत्राद्याश्रमधर्मांश्च नवमेऽत्र निरूपिताः॥ १॥ व्रतानि 'प्राजापत्यं तथा सौम्यमाग्नेयं वैश्वदेविकम्' इत्यादीनि अनुयाजवर्जनादीनि च चरता कुर्वता वेदो ग्राह्यः॥ २॥ स्थिते अवस्थिते गुरौ शिष्यस्तिष्ठेत् अनुगच्छेत्, तथा आसीने आसीत नीचैः नीचासनेनासीत, प्रतिकूलमनाहूय गमनं न कुर्यात्॥ ४॥ तेनैवोक्तः पठेत्, न तु स्वीयाध्यापनाय गुरुं नियुञ्जीत॥ ५॥ आचामेदाचमनाद्युक्ता अपोऽवगाहेत। वस्त्रं बध्नं प्रातः

अवगाहेदपः पूर्वमाचार्य्येणावगाहिताः ।
समिज्जलादिकञ्चास्य कल्यं कल्यमुपानयेत् ॥ ६ ॥
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमाविशेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः ॥ ७ ॥
विधिनावाप्तदारस्तु धनं प्राप्य स्वकर्म्मणा ।
गृहस्थकार्य्यमखिलं कुर्य्याद् भूपाल ! शक्तितः ॥ ८ ॥
निवापेन पितॄनर्च्चेत् यज्ञैर्देवांस्तथातिथीन् ।
अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥ ९ ॥
बलिकर्म्मणा च भूतानि वाक्सत्येनाखिलं जगत् ।
प्राप्नोति लोकान् पुरुषो निजकर्म्मसमर्जितान् ॥ १० ॥
भिक्षाभुजश्च ये केचित् परिव्राड् ब्रह्मचारिणः ।
तेऽप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् ॥ ११ ॥
वेदाहरणकार्य्येण तीर्थस्नानाय च प्रभो ! ।
अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥ १२ ॥

प्रातः ॥ ६ ॥ गृहीतो ग्राह्यो यावत्पाठ्यो वेदो येन सः । निष्पन्नगुरुनिष्कृतिः दत्तगुरुदक्षिणः ॥ ७ ॥ विधिना ब्राह्मादिना स्वकर्म्मणा याजनादिना ॥ ८ ॥ निवापेन पिण्डदानादिना पितॄनर्च्चेत् पितृयज्ञो दर्शितः । यज्ञैर्देवानिति देवयज्ञः । अतिथीनन्नैरिति मनुष्ययज्ञः । मुनींश्च स्वाध्यायैरिति ब्रह्मयज्ञः । अपत्येन प्रजापतिमिति प्रजननात् स्वपुत्रकावस्थेव कर्त्तव्यमित्युक्तम् ॥ ९ ॥ बलिकर्म्मणा भूतानीति भूतयज्ञः । वाक्सत्येन सत्यवचनेन । वाक्पथ्येनेति पाठे हितवचनोपसर्पणेन वा ॥ १० ॥ अटन्ति भ्रमन्ति ॥ ११ ॥ प्रतिष्ठिताः आश्रयाः । अन्नाद्याहारः आहारार्थं वस्त्रादिभिर्वा । अत्र चायं तत्रैव अनुं वेदा ते । प्रतिष्ठा आश्रयः, योऽतिथीना भक्ष्योपभक्ष्यदानादिना देवपोषकत्वात् ॥ १२ ॥ अनन्तरं मध्यमतानां आगतोऽस्मिन् पूर्वं मधुरं प्रियं वचनम्

अनिकेता ह्यनाहारा ये तु सायं गृहाय ते।
तेषां गृहस्थः सर्वेषां प्रतिष्ठा योनिरेव च ॥ १३ ॥
तेषां स्वागतदानादि वक्तव्यं मधुरं नृप!।
गृहागतानां दद्याच्च शयनासनभोजनम् ॥ १४ ॥
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ १५ ॥
अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः।
परितापोपघातौ च पारुष्यञ्च न शस्यते ॥ १६ ॥
यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम्।
सर्वबन्धविनिर्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥ १७ ॥
वयःपरिणतो राजन्! कृतकृत्यो गृहाश्रमी।
पुत्रेषु भार्य्यां निःक्षिप्य वनं गच्छेत् सहैव वा ॥ १८ ॥
पर्णमूलफलाहारः केशश्मश्रुजटाधरः।
भूमिशायी भवेत् तत्र मुनिः सर्वातिथिर्नृप! ॥ १९ ॥
चर्मकाशकुशैः कुर्य्यात् परिधानोत्तरीयके।
तद्वत् त्रिषवणं स्नानं शस्तमस्य नरेश्वर! ॥ २० ॥

॥ १४ ॥ स भग्नाशोऽतिथिस्तस्मै पापं ददातीति नित्यकर्मरूपातिथिपूजाभावेन प्रत्यवायोत्पत्तेः। पुण्यमादत्ते न तत्पुण्यजन्यपुण्यानुत्पत्तेरेव पर्य्यवसानं ॥ १५ ॥ अहङ्कारः स्वात्मन्युत्कर्षबुद्धिः। दम्भो धार्मिकत्वप्रकाशनम्। परितापो दानादनन्तरं तापः। उपघातः प्रतिघातः ताडनं वा। पारुष्यं निष्ठुरता ॥ १६ ॥ सर्वबन्धैर्विमुक्तः सन् ॥ १७ ॥ कृतं कृत्यं पुत्रोत्पादनं येन सः ॥ १८ ॥ सर्वातिथिः सर्वातिथिपूजकः। भूमिशय्याशायी ॥ १९ ॥ त्रिषवणं त्रिकालस्नानं

देवताभ्यर्चनं होमः सर्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शस्तमस्य नरेश्वर ! ॥ २१ ॥
वन्यस्नेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपस्यतश्च राजेन्द्र ! शीतोष्णादिसहिष्णुता ॥ २२ ॥
यस्त्वेतां नियतश्चर्य्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् ॥ २३ ॥
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥ २४ ॥
पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ! ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ॥ २५ ॥
त्रैवर्गिकांस्त्यजेत् सर्वानारम्भानवनीपते ! ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥ २६ ॥
जरायुजाण्डजादीनां वाङ्मनःकर्मभिः क्वचित् ।
युक्तः कुर्वीत न द्रोहं सर्वसङ्गांश्च वर्जयेत् ॥ २७ ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वास्य न जायते ॥ २८ ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥ २९ ॥

अभ्यागतोऽभ्यागतः ॥ २१ ॥ वन्यस्नेहेन इङ्गुदीतैलादिना । तपश्चरतश्चरतः ॥ २२ ॥ जयेत् प्राप्नुयात् ॥ २३ ॥ चतुर्थमाश्रमं स्थानं भिक्षाश्रमः ॥ २५ ॥ त्रैवर्गिकान् धर्मार्थकामसाधनान् आरम्भान् [illegible] न कुर्य्यादिति भावः ॥ २६ ॥ [illegible] स्थितिर्न कर्त्तव्येति ॥ २८ ॥ विगताः [illegible]

काम: क्रोधस्तथा दर्पमोहलोभादयश्च ये।
तांस्तु दोषान् परित्यज्य परिव्राट् निर्ममो भवेत् ॥ ३० ॥
अभयं सर्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनि:।
न तस्य सर्वसत्त्वेभ्यो भयमुत्पद्यते क्वचित् ॥ ३१ ॥

कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निं स्वमुखे जुहोति।
विप्रस्तु भिक्षोपगतैर्हविर्भि:
चिताग्निना स व्रजति स्म लोकान् ॥ ३२ ॥
साश्रमं यश्चरते यथोक्तं
शुचि: स्वसङ्कल्पितबुद्धियुक्त:।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं जयति द्विजाति: ॥ ३३ ॥

विगता अङ्गारा यस्मिन्। भुक्तवन्तो जना यस्मिन् तस्मिन् काले प्रशस्ताः चेष्टाख्या वर्णा ये तेषाम् ॥ २९ ॥ भिक्षान्नभक्षणस्य पञ्चाग्नि-साम्यात्, कृत्वेति। अग्निहोत्रं पूर्वं कृतवान् स्वं शरीरस्थं कृत्वा प्राणापानव्यानोदानसमानाख्यमग्निमाधाय भिक्षाहृतैर्हविर्भिः स्वमुखे कण्ठ-स्थानीये शारीरं प्राणादियुक्तं जाठरमग्निमुद्दिश्य चिताग्निना जाठरोऽग्निरभ्युक्तो भावयति चिताचैतन्येनाग्निना अनुसन्धानेन यो जुहोति स लोकानवाप्नोत्यग्निहोत्रिणां व्रजतीत्युपासनाफलोक्तिः। यद्वा लोकान् इति लोको ब्रह्मैव बहुत्वमविवक्षितम्। चिताग्निनेति पाठे ॥ ३२ ॥ इदानीमाश्रमपालनस्य परमफलमाह, मोक्षेति। अस्मिन् अशुचि अनुच्छिन्नमिदं निर्वापति बुद्धियुक्तः ब्रह्मैव लोकम्, अनिन्धनं विधूमं यथा ज्योतिर्विधूमविभावसुरेव तथा। द्विजातिरिति पूर्वश्लोकोक्तस्य विप्रस्योक्तिः। "यतित्वं प्राप्ते नास्ति ब्राह्मणक्षत्रियोः क्वचित्।

दशमोऽध्यायः ।

—:०:—

सगर उवाच ।

कथितञ्चातुराश्रम्यं चातुर्वर्ण्यक्रिया तथा ।
पुंसः क्रियामहं श्रोतुमिच्छामि द्विजसत्तम ॥ १ ॥
नित्यां नैमित्तिकीं काम्यां क्रियां पुंसामशेषतः ।
समाख्याहि भृगुश्रेष्ठ सर्वज्ञो ह्यसि मे मतः ॥ २ ॥

और्व उवाच ।

यदेतदुक्तं भवता नित्यनैमित्तिकाश्रयम् ।
तदहं कथयिष्यामि शृणुष्वैकमना नृप ॥ ३ ॥
जातस्य जातकर्मादिक्रियाकाण्डमशेषतः ।

तुर्याश्रमे गतिः प्रोक्ता मुमुक्षूणां चतुर्थकी । इति तत्रादिशोक्तेः ।
ब्राह्मणः प्रव्रजेद् गृहादिति यमवाक्यं चोपायमात्रपरम् ॥ ११ ॥

———

पुंस. षोडशसंस्कारैर्नित्यादिविधानम् । अनध्यायाश्च दशमे चाध्यायेन निरूपिताः । चतुराश्रमा एव चातुराश्रम्यं तदुक्तं कथितं । चातुर्वर्ण्यक्रियाऽपि पुंसः क्रियां षोडशसंस्काररूपाम् ॥१॥ नित्यामवश्यकर्तव्यां क्रियमाणां प्रत्यवायपरिहारफलाम् । नैमित्तिकीं ग्रहणादिनिमित्ते सति विहितामावश्यकत्वात् प्रत्यवायप्रदाम् । काम्यां कामात् कृतां अग्निहोत्रादिरूपाम् ॥२॥ नित्यनैमित्तिकाश्रितमिति काम्यस्याप्युपलक्षणम् ॥३॥ जातस्य पुत्रस्य जातकर्म च आदिशब्दान्नामकरणादि

पुत्रस्य कुर्वीत पिता श्राद्धञ्चाभ्युदयात्मकम् ॥ ४ ॥
युग्मांस्तु प्राङ्मुखान् विप्रान् भोजयेन्मनुजेश्वर ।
यथाशक्ति तथा कुर्य्यात् दैवं पित्र्यं द्विजन्मनाम् ॥ ५ ॥
दध्ना यवैः सबदरैर्मिश्रान् पिण्डान् मुदा युतः ।
नान्दीमुखेभ्यस्तीर्थेन दद्याद् दैवेन पार्थिव ॥ ६ ॥
प्राजापत्येन वा सर्वमुपचारं प्रदक्षिणम् ।
कुर्वीत तत् तथाऽशेषवृद्धिकालेषु भूपते ॥ ७ ॥
ततश्च नाम कुर्वीत पितैव दशमेऽहनि ।
देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम् ॥ ८ ॥
शर्मेति ब्राह्मणस्योक्तं वर्मेति क्षत्रसंश्रयम्
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥ ९ ॥

च शब्दात् प्राचीनं गर्भाधानपुंसवनादिक्रियाकाण्डञ्च पिता कुर्वीत इत्यर्थः । तदुक्तम्, "गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा" इति ॥४॥ द्विजन्मानां ब्राह्मणानां यथाशक्ति यथोपचारं दैवं दैवसम्बन्धि कर्म पित्र्यं पितृसम्बन्धि कर्म कुर्य्यात् । अथ दशमः श्लोकेन निरूप्य प्रदक्षिणोपचारादिना दैवपित्र्यश्राद्धं कुर्य्यादित्यर्थ ॥ ५ ॥ [illegible] दध्नेति । दैवेन करायेण ॥ ६ ॥ प्राजापत्येन कनिष्ठामूलेन । तदुक्तम्, "[illegible] प्राजापत्यमनुक्रमात् ॥" इति अशेषवृद्धिकालेषु कन्यापुत्रविवाहेऽन्नप्राशनादिना वक्ष्यमाणेषु ॥ ७ ॥ दशमेऽहनि अतीत इति शेषः । तत्राशौचापनयनम् । अतएव [illegible] यथा, "नामधेयं दशम्यां तु केचिदिच्छन्ति पार्थिव । द्वादश्यामथवा रात्र्यां मासि पूर्णे तथापरे ॥" इति । देवपूर्वं कुलदेवतानामपूर्वकं कुलदेवतासम्बन्धं नाम कुर्य्यादिति यद्वक्ष्यते । नराख्यं पुरुषवाचकम् । तच्च नाम्ने शर्मवर्मादिसंयुतम् । यथा सोमशर्मा इन्द्रवर्मा चन्द्रगुप्त शिवदास इत्यादि । ८ ॥ शर्मेतीत्यादि ।

नार्थहीनं न चाशस्तं नापशब्दयुतं तथा ।
नामङ्गल्यं जुगुप्स्यं वा नाम कुर्यात् समाक्षरम् ॥१०॥
नातिदीर्घं न ह्रस्वं वा नातिगुर्वक्षरान्वितम् ।
सुखोच्चार्यन्तु तन्नाम कुर्याद् यत् प्रवणाक्षरम् ॥ ११ ॥
ततोऽनन्तरसंस्कारसंस्कृतो गुरुवेश्मनि ।
यथोक्तं विधिमाश्रित्य कुर्याद् विद्यापरिग्रहम् ॥ १२ ॥
गृहीतविद्यो गुरवे दत्त्वा च गुरुदक्षिणाम् ।
गार्हस्थ्यमिच्छन् भूपाल । कुर्याद् दारपरिग्रहम् ॥ १३ ॥
ब्रह्मचर्य्येण वा कालं कुर्यात् सङ्कल्पपूर्वकम् ।
गुरोः शुश्रूषणं कुर्यात् तत्पुत्रादेरथापि वा ॥ १४ ॥
वैखानसो वापि भवेत् परिव्रजेद् वा यथेच्छया ।
पूर्वसङ्कल्पितं यादृक् तादृक् कुर्य्यान्नृपोत्तम ! ॥ १५ ॥
वर्षैरेकगुणां भार्य्यामुद्वहेत् त्रिगुणः स्वयम् ।

अप्रशस्तं रेफमायावां अश्लीलम् अपशब्दं गुरुत्वमादि । जुगुप्स्यं बीभत्सरूपम् । समाक्षरं द्व्यक्षरचतुरक्षरादि नाम कुर्यात् ॥ १० ॥ अतिदीर्घं बह्वक्षरं गुरुबहुलाक्षरं प्रवणाक्षरं नम्रान्ताक्षरम् ॥ ११ ॥ अनन्तरसंस्कारैर्विष्णुबलाद्यन्नप्राशनचूडोपनयनाख्यैः संस्कृतः सन् यथोक्तं गुरुशुश्रूषादिलक्षणं विधिमाश्रित्य ॥ १२ ॥ ब्रह्मचर्येण नैष्ठिकं ब्रह्मचर्यं वा, ब्रह्मचर्यमुपेति । वा गार्हस्थ्यानिच्छायामित्यर्थः । कालं कुर्यात् नयेत् ॥ १४ ॥ वैखानसो वानप्रस्थः । इच्छया आश्रमादाश्रमं गच्छेत् । यावज्जीवं ब्रह्मचर्यमेवाश्रय इति पूर्वसङ्कल्पितं तदा तदेव तिष्ठेत्, नाश्रमान्तरं गच्छेत् । यस्तु दृढवैराग्याभावे गृहस्थम् । तस्मात् ब्रह्मचारिणो तु यतिः स्यादेव । "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति श्रुतेः ॥ १५ ॥ वर्षैरेकगुणामिति वर्षैरेका एकोवयस्कम्

नातिकेशामकेशां वा नातिकृष्णां न पिङ्गलाम् ॥ १६ ॥
निसर्गतो विकलाङ्गीमधिकाङ्गीं च नोद्वहेत् ।
नाविशुद्धां सरोमां वा कुलजां वातिरोगिणीम् ॥ १७ ॥
न दुष्टां दुष्टवाचाटां व्यङ्गिनीं पितृमातृतः ।
न श्मश्रुव्यञ्जनवतीं नचैव पुरुषाकृतिम् ॥ १८ ॥
न घर्घरस्वरां क्षामवाक्यां काकस्वरां न च ।
नानिबद्धेक्षणां तद्वत् वृत्ताक्षीं नोद्वहेत् स्त्रियम् ॥ १९ ॥
यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ ।
गण्डयोः कूपकौ यस्या हसन्त्यास्तां न चोद्वहेत् ॥ २० ॥
नोद्वहेत् तादृशीं कन्यां प्राज्ञः कार्य्यविशारदः ।
नातिरूक्षच्छविं पाण्डुकरजामरुणेक्षणाम् ॥ २१ ॥

अन्यथा मातृवदाचरणमकृत्यं यदनुमितात्सत्वातिशयतोऽपि ब्रह्मचर्य्य-स्थितद्वर्षादूर्ध्वं विवाहे दातारो भवन्ति कन्या यत ऊर्ध्वं रजस्वला इति निन्दितरजस्वलाविवाहापत्तेः । "असपिण्डा यवीयसीम्" इति स्मृतेः । अतिकेशां केशबहुलाम् । अकेशां निष्केशप्रायाम् ॥ १६ ॥ निसर्गतो स्वभावत एव । अविशुद्धां पातकादिदुष्टाम् । सरोमां बहुलरोमाम् । अकुलजां दुष्कुलाम् । अतिरोगिणीं नित्यमुत्कटरोगिणीम् ॥ १७ ॥ दुष्टां स्वैरादिदुर्व्यसनिताम् । दुष्टवाचाटां बहुविरुद्धभाषिणीम् । व्यङ्गिनीं विकृतां मातृतः कुष्ठिनीं कलिपन्नमातृजामित्यर्थः । श्मश्रु रोमैव व्यञ्जनं पुंस्त्वव्यञ्जकं तद्युक्ताम् ॥ १८ ॥ क्षामवाक्यां क्षामाति-स्वरवचनाम् । अनिबद्धेक्षणां पक्ष्मभिरसंहतेक्षणां निमिषेऽपि अविच्छिन्नदर्शनां वा निद्रायामपि अर्द्धनिमीलितनेत्रामिति वा । वृत्ताक्षीं वर्तुलनयनाम् ॥ १९ ॥ जङ्घा हसन्त्या गण्डयोः कूपकौ गर्तौ भवतस्तां नोद्वहेत् । नोद्वहेदिति पुनर्निषेधोऽतिदोषख्यापनाय । क्वचित् गुल्फावुन्नतौ यस्या नाश्नीव । हसन्त्याश्चैव जायते इति पाठे एकवचन-मार्षम् ॥ २० ॥ पाण्डुकरजां श्वेतनखाम् ॥ २१ ॥ संहते भ्रुवौ

आपीनहस्तपादाञ्च न कन्यामुद्वहेद् बुधः।

न वामनां नातिदीर्घां नोद्वहेत् संहतभ्रुवम् ॥२२॥

न चातिच्छिद्रदशनां न करालमुखीं नरः।

पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ॥ २३ ॥

गृहस्थस्तूद्वहेत् कन्यां न्याय्येन विधिना नृप!।

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥ २४ ॥

गान्धर्वराक्षसौ चान्यौ पैशाचश्चाष्टमोऽधमः ॥ २५ ॥

एतेषां यस्य यो धर्मो वर्णस्योक्तो महर्षिभिः।

कुर्वीत दाराहरणं तेनान्यं परिवर्जयेत् ॥ २६ ॥

संहतभ्रुवम् ॥ २२ ॥ करालमुखीं दन्तुराम्। पञ्चमीमिति। मातृपक्षात् मातृसन्तानात् पञ्चमीं पितृपक्षात् पितृसन्तानात् सप्तमीं विहायेति शेषः। "पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतस्तथा" इति वचनात्। तथाच मातरमारभ्य तत्पितृपितामहादिगणनायां पञ्चमपुरुषसन्तान-वर्त्तिनी मातृपक्षे पञ्चमीत्युच्यते। सन्तानभेदेऽपि तत सन्तानभेदमारभ्य गणयेत् यावत्पञ्चम इति। एवं पितृपक्षसप्तमीति बोध्यम्। तां नोद्वहेत् ततः परामुद्वहेदित्यर्थः ॥ २३ ॥ तमेव न्याय्यं विधिं दर्शयितुम् अष्टौ विवाहानाह, ब्राह्म इति। यथा, "ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता। यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयम्। सहोभौ चरतां धर्मं प्राजापत्यो विधिः स्मृतः। आसुरो द्रविणादानात् गान्धर्वः समयान्मिथः। राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्॥" इति ॥ २५ ॥ एतेषामिति। यदाह देवलः, "आद्या विवाहाश्चत्वारो धर्म्यास्ते विप्रदायिनः। अनुक्रमात् ब्राह्मणा-द्यैव तारयन्ति द्वयोः कुलम्। गान्धर्वराक्षसौ राज्ञ आसुरो वैश्य-शूद्रयोः। न कस्यचिद्विवाहानां पैशाचः पतितोऽधमः॥" इति। अन्यं पैशाचम् ॥ २६ ॥ यदुद्वहेत् कुर्वीत। यथा पूर्वोक्तलक्षणा

सधर्मचारिणीं प्राप्य गार्हस्थ्यं सहितस्तया ।
समुद्वहेद् ददात्येषा सम्यगूढा महाफलम् ॥ २७ ॥

एकादशोऽध्यायः ।

सगर उवाच ।

गृहस्थस्य सदाचारं श्रोतुमिच्छाम्यहं मुने ! ।
लोकादस्मात् परस्माच्च यमातिष्ठन्न हीयते ॥ १ ॥

और्व उवाच ।

श्रूयतां पृथिवीपाल ! सदाचारस्य लक्षणम् ।
सदाचारवता पुंसा जितौ लोकावुभावपि ।
साधवः क्षीणदोषास्तु, सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत् तु सदाचारः स उच्यते ॥ २ ॥
सप्तर्षयोऽथ मनवः प्रजानां पतयस्तथा ।
सदाचारस्य वक्तारः कर्त्तारश्च महीपते ! ॥ ३ ॥
ब्राह्मे मुहूर्त्ते सुस्थे च मानसे मतिमान् नृप ! ।
विबुद्धश्चिन्तयेद् धर्मम् अर्थञ्चास्याविरोधिनम् ॥ ५ ॥

सम्यक् विधिवत् ऊढा सती महाफलं ददाति । एतत् सम्यगूढं महाफलमिति पाठे सम्यग्गार्हस्थ्यमूढं प्रतिपादितं चेदित्यर्थः ॥ २७ ॥

धर्माधर्माविहिता पुंसः संक्षेपतः स्मृतिं ब्रुवन् । एकादशे सदाचारान् प्राह श्रीहरितोषणान् ॥ ब्राह्मे मुहूर्त्ते सूर्योदयात् पूर्वं तृतीये मुहूर्त्ते । अर्थञ्चास्य धर्मस्याविरोधिनम् ॥ ५ ॥ तयोर्धर्मार्थयो-

अपीडया तयोः काममुभयोरपि चिन्तयेत् ।
दृष्टादृष्टविनाशाय त्रिवर्गे समदर्शिता ।
परित्यजेदर्थकामौ धर्मपीडाकरौ नृप ।
धर्ममप्यसुखोदर्कं लोकविद्विष्टमेव च । ७ ॥
ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर ।
नैऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥ ८ ॥
दूरादावसथान्मूत्रं पुरीषञ्च समुत्सृजेत् ।
पादावनेजनोच्छिष्टे प्रक्षिपेन्न गृहाङ्गने ॥ ९ ॥
आत्मच्छायां तरुच्छायां गोसूर्य्याग्न्यनिलांस्तथा ।
गुरुद्विजातींश्च बुधो न मेहेत कदाचन ॥ १० ॥
न कृष्टे सस्यमध्ये वा गोव्रजे जनसंसदि ।
न वर्त्मनि न नद्यादितीर्थेषु पुरुषर्षभ ! ॥ ११ ॥
नाप्सु न चाम्भसस्तीरे न श्मशाने समाचरेत् ।
उत्सर्गं वै पुरीषस्य मूत्रस्य च विसर्जनम् ॥ १२ ॥

दृष्टादृष्टविनाशाय दृष्टादृष्टविनाशनिवृत्तये । तदाद्ये चतुर्थीयं ... निवृत्तेरपि बाधकत्वात् । यद्वा विनाशप्राप्तेरुपलक्षणे । क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी । यथा फलेभ्यो वनं गन्तुमिच्छति ... दृष्टादृष्टविनाशायेति । पाठः सुगमः । त्रिवर्गे समदर्शिता परस्पराविरोधेन सर्वास्विति समदर्शिता ॥ ६ ॥ धर्मे अपीति ... असुखोदर्कं दुःखोत्तरफलं लोकविद्विष्टं ... ॥ ७ ॥ ... इषुविक्षेपमतीत्य ... भुवः ॥ ८ ॥ ... ॥ ९ ॥ आत्मच्छायामिति । ... न मेहेत ... ॥ १० ॥ ...

उदङ्मुखो दिवोत्सर्गं विपरीतमुखो निशि ।
कुर्वीतानापदि प्राज्ञो मूत्रोत्सर्गञ्च पार्थिव ! ॥ १३ ॥
तृणैरास्तीर्य वसुधां वस्त्रप्रावृतमस्तकः ।
तिष्ठेन्नातिचिरं तत्र नैव किञ्चिदुदीरयेत् ॥ १४ ॥
वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा ।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम् ॥ १५ ॥
अन्तःप्राण्यवपन्नाञ्च हलोत्खाताञ्च भूमिप ! ।
परित्यजेन्मृदश्चैताः सकलाः शौचसाधनम् ॥ १६ ॥
एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश ।
हस्तद्वये च सप्तान्या मृदः शौचोपपादिकाः ॥ १७ ॥
अच्छेनागन्धफेनेन जलेनाबुद्बुदेन च ।
आचामेत मृदं भूयस्तथा दद्यात् समाहितः ॥ १८ ॥
निष्पादिताङ्घ्रिशौचस्तु पादावभ्युक्ष्य वै पुनः ।
त्रिः पिबेत् सलिलं तेन तथा द्विः परिमार्जयेत् ॥ १९ ॥
शीर्षण्यानि ततः खानि मूर्द्धानञ्च समालभेत् ।
बाहू नाभिञ्च तोयेन हृदयञ्चापि संस्पृशेत् ॥ २० ॥

॥ १५ ॥ अन्तःप्राण्यवपन्नाञ्च कीटाद्युपहताम् अप्युपाण्यवपन्नामिति पाठे [illegible] ॥ १६ ॥ एकाद्याः मृदः शौचोपपादिकाः ॥ १७ ॥ [illegible] आचामेत् अच्छेन अनाविलेन आचामितव्यमनन्तरं प्रस्तुत्य तस्य पूर्वोक्तस्य मृदमिति । भूयो मृदमादद्यात् ॥ १८ ॥ तथा निष्पादिताङ्घ्रिशौचः सन् पुनः पादावभ्युक्ष्य [illegible] पिबेत् [illegible] द्विः परिमार्जयेत् ॥ १९ ॥ शीर्षण्यानि [illegible] खानि आदि

आचान्तश्च ततः कुर्य्यात् पुमान् केशप्रसाधनम् ।
आदर्शाञ्जनमाङ्गल्यदूर्व्वाद्यालम्भनानि च ॥ २१ ॥
ततः स्ववर्णधर्म्मेण वृत्त्यर्थञ्च धनार्जनम् ।
कुर्वीत श्रद्धासम्पन्नो यजेच्च पृथिवीपते ! ॥ २२ ॥
सोमसंस्था हविःसंस्था पाकसंस्थाश्च संस्थिताः ।
धने यतो मनुष्याणां यतेतातो धनार्जने ॥ २३ ॥
नदीनदतडागेषु देवखातजलेषु च ।
नित्यक्रियार्थं स्नायीत गिरिप्रस्रवणेषु च ॥ २४ ॥
कूपेषूद्धृततोयेन स्नानं कुर्वीत वा भुवि ।

इन्द्रियस्पर्शं च आचमनेन स्पृशेत् हृदयस्थाणुसंश्रयम् इति पठे सोमीभूतमित्यर्थः । अत्र विशेषमाह, दक्षः प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम् । संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात् ततो मुखम् । संहताभिस्त्रिभिः पूर्वमास्यमेवमुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् । अङ्गुष्ठानामिकाभ्यान्तु चक्षुःश्रोत्रे पुनः पुनः । कनिष्ठाङ्गुष्ठतो नाभिं हृदयन्तु तलेन वै । सर्वाभिस्तु शिरः पश्चाद् बाहू चाग्रेण संस्पृशेत् ॥ २० ॥ अत्र प्रातःस्नानस्य महाफलत्वं सौचाङ्गत्वं च उक्तप्रायत्वात् । नित्योदको भवेद् विप्र इति पूर्वं संक्षेपेणोक्तत्वात् सन्ध्योपासनहोमादीनाञ्च सूर्य्योदयात् प्रागनुष्ठेयत्वात् तदुत्तरकालं क्रियाक्रममाह, आचान्त इति ॥ २१ ॥ सोमसंस्था अग्निष्टोमाद्याः सप्त । हविःसंस्था अग्न्याधेयाद्याः । पाकसंस्थाः अष्टकाद्याः । यथाह गौतमः, अष्टका पार्वणश्राद्धम् । श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकसंस्थाः, अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणी चेति सप्त हविःसंस्थाः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रम्, आप्तोर्याम इति सप्त सोमसंस्था इति ॥ २२ ॥ नद्यः स्वतोवहमानतया-

स्नायीतोद्धृततोयेन अथवा भुव्यसम्भवे ॥ २५ ॥
शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्पणम्।
तेषामेव हि तीर्थेन कुर्व्वीत सुसमाहितः ॥ २६ ॥
त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत्।
तथर्षीणां यथान्यायं सकृच्चापि प्रजापतेः ॥ २७ ॥
पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते!।
पितामहेभ्यश्च तथा प्रीणयेत् प्रपितामहान् ॥ २८ ॥
मातामहाय तत्पित्रे तत्पित्रे च समाहितः।
दद्यात् पैत्रेण तीर्थेन काम्यञ्चान्यत् शृणुष्व मे ॥ २९ ॥
मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप!।
गुरवे मातुलादीनां स्निग्धमित्राय भूभुजे ॥ ३० ॥
इदञ्चापि जपेदम्बु दद्यादात्मेच्छया नृप!।
उपकाराय भूतानां कृतदेवादितर्पणः ॥ ३१ ॥
देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः।

स्याह, नद्यादि। देवखातो मनुष्यादिकृतो ह्रदः। उद्धृतेन स्नायात्। कूपेषु स्नानाद्यसम्भवे तेन तोयेन भुवि तदसम्भवे स्नायात्। तदसम्भव … उद्धृतेन शीतवारिणा … स्नायात्। तथाप्यशक्तौ उष्णोदकेन तथाप्यशक्तौ मन्त्रस्नानादि कुर्यादित्यभिप्रायो ज्ञेयम् ॥ २५ ॥ तेषां देवादीनां तीर्थेन पूर्वोक्तेन ॥ २६ ॥ त्रिरप इति गाथाभेदव्याख्यानमिदम्। तत्र भूर्द्देवान् भुवर्द्देवान् … तर्पयामीति एवं त्रिरपो वर्जयेत् दद्यात् तथर्षीणामपि … त्रिरपो दद्यात् प्रजापतिं तर्पयामीति सकृत् ॥ २७ ॥ पितॄणामिति भूः स्वधेत्यादिना … पितॄणां तत्प्रयोगे … ॥ २८ ॥ पैत्रेण तीर्थेन तर्जनीमूलेन काम्यं फलविशेषार्थम् ॥ २९ ॥ हे भूभुज !

पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥ ३२ ॥
जलेचरा भूमिलया वाय्वाहाराश्च जन्तवः ।
प्रीतिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ॥ ३३ ॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः ।
तेषामाप्यायनायैतद् दीयते सलिलं मया ॥ ३४ ॥
येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते सर्वे तृप्तिमायान्तु ये चास्मत्तोयकाङ्क्षिणः ॥ ३५ ॥
यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ।
इदमप्यक्षयञ्चास्तु मया दत्तं तिलोदकम् ॥ ३६ ॥
काम्योदकप्रदानन्ते मयैतत् कथितं नृप ।
यद् दत्त्वा प्रीणयत्येतन्मनुष्यः सकलं जगत् ॥ ३७ ॥
जगदाप्यायनोद्भूतं पुण्यमाप्नोति चानघ ! ।
दत्त्वा काम्योदकं सम्यगेतेभ्यः श्रद्धयान्वितः ॥ ३८ ॥
आचम्य च ततो दद्यात् सूर्याय सलिलाञ्जलिम् ।
नमो विवस्वते ब्रह्मन् ! भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने ॥ ३९ ॥
ततो गृहार्चनं कुर्यादभीष्टसुरपूजनम् ।
जलाभिषेकपुष्पाणां धूपादेश्च निवेदनैः ॥ ४० ॥
अपूर्वमग्निहोत्रञ्च कुर्यात् प्राग्ब्रह्मणे ततः ।

भास्वदादित्यरूपाय सूर्याय नमः" ब्रह्मभास्वत इति पाठे [illegible] प्रकाश-
मानतेजसे । जगत्सवित्रे विश्वजनकाय, कर्मदायिने कर्मफलप्रदा-
याय ॥ ३९ ॥ अपूर्वमग्निहोत्रम् [illegible] ब्रह्म [illegible]
देवता [illegible] कुर्यादित्यर्थः । अपूर्वमिति पाठे [illegible]

प्रजापतिं समुद्दिश्य दद्यादाहुतिमादरात् ॥ ४१ ॥
गृह्येभ्यः काश्यपायाथ ततोऽनुमतये क्रमात् ।
तच्छेषं मणिकेऽद्भ्योऽथ पर्जन्याय क्षिपेत् ततः ॥ ४२ ॥
द्वारे धातुर्विधातुश्च मध्ये च ब्रह्मणः क्षिपेत् ।
गृहस्य पुरुषव्याघ्र ! दिग्देवानपि मे शृणु ॥ ४३ ॥
इन्द्राय धर्मराजाय वरुणाय तथेन्दवे ।
प्राच्यादिषु बुधो दद्यात् हुतशेषात्मकं बलिम् ॥ ४४ ॥
प्रागुत्तरे च दिग्भागे धन्वन्तरिबलिं बुधः ।
निर्वपेद् वैश्वदेवञ्च कर्म कुर्य्यात्ततः परम् ॥ ४५ ॥
वायव्ये वायवे दिक्षु समस्तासु ततो दिशाम् ।
ब्रह्मणे चान्तरिक्षाय भानवे प्रक्षिपेद् बलिम् ॥ ४६ ॥
विश्वेदेवान् विश्वभूतानथो भूतपतीन् पितॄन् ।
यक्षाणाञ्च समुद्दिश्य बलिं दद्यान्नरेश्वरः ॥ ४७ ॥

मित्यर्थः ॥ ४१ ॥ भूतयज्ञमाह, तच्छेषं हुतशेषं मणिके जलाधार-सन्निधौ अद्भ्यः पर्जन्याय च क्षिपेत् । पृथ्वीपर्जन्याभ्याम् इति पाठान्तरम् ॥ ४२ ॥ गृहस्य द्वारे धातुर्विधातुश्च मध्ये ब्रह्मणः ॥ ४३ ॥ प्राच्यादिषु गृहस्येति सर्वत्रान्वयः ॥ ४४ ॥ धन्वन्तरिबलिं निर्वपेत् इत्यन्वयः । तदेवं गृह्यदेवताभ्यो बलिरुक्तः, इदानीं तदन्तर्देवताकं बलिमाह, वैश्वदेवमित्यादिना भुवि यावता इत्यनेन विश्वेदेवादयो देवा उद्दिश्या यत्र बली तं तत्र कुर्य्यात् ॥ ४५ ॥ तदेवाह, वायव्ये कोणे वायवे बलिं प्रक्षिपेत् । वायवे इति पाठे वायव्या समस्तासु दिक्षु वायवे वायुसंज्ञकाय प्रक्षिपेदित्यर्थः । ततो दिशां प्राच्यै दिशे, दक्षिणस्यै दिशे इत्यादिना बलिं क्षिपेत् ॥ ४६ ॥ मध्ये ब्रह्मणादित्रयाणाम् उत्तरतः विश्वेभ्यो देवेभ्य इत्यादिना बलिं क्षिपेत्, दक्षिणतो भूतपत्यादीनामिति ॥ ४७ ॥

ततोऽन्यदन्नमादाय भूमिभागे शुचौ बुधः ।
दद्यादशेषभूतेभ्यः स्वेच्छया तत् समाहितः ॥ ४८ ॥

देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसङ्घाः ।
प्रेताः पिशाचास्तरवः समस्ताः
ये चान्नमिच्छन्ति मया प्रदत्तम् ॥ ४९ ॥

पिपीलिकाः कीटपतङ्गकाद्याः
बुभुक्षिताः कर्मनिबन्धबद्धाः ।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्यो विसृष्टं सुखिनो भवन्तु ॥ ५० ॥

येषां न माता न पिता न बन्धु-
र्नैवान्नसिद्धिर्न तथान्नमस्ति ।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्
प्रयान्तु तृप्तिं मुदिता भवन्तु ॥ ५१ ॥

भूतानि सर्वाणि तथान्नमेतत्
अहञ्च विष्णुर्न यतोऽन्यदस्ति ।
तस्मादहं भूतनिकायभूतम्
अन्नं प्रयच्छामि भवाय तेषाम् ॥ ५२ ॥

चतुर्दशो भूतगणो य एष
तत्र स्थिता येऽखिलभूतसङ्घाः ।

यच बन्धु नास्ति तेषामप्यन्नमस्तु नान्नसिद्धिः पाकसाधनं नास्तीत्यर्थः ॥ ५१ ॥ चतुर्दश इति एष देव इत्यादि श्लोकोक्तः कीटपतङ्गाद्य-चतुर्दशभूतग्रामो भूतगणः । तत्र भूतगणे स्थिताः । यद्वा देवमनुष्यादि,

तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदं ते मुदिता भवन्तु ॥ ५३ ॥
कृत्वा चान्नं नरो दद्यादन्नं श्रद्धासमन्वितः ।
भुवि भूतोपकाराय गृही सर्वाश्रयो यतः ॥ ५४ ॥
श्वचाण्डालविहङ्गानां भुवि दद्यात् ततो नरः ।
ये चान्ये पतिताः केचिदपात्रा भुवि मानवाः ॥ ५५ ॥
ततो गोदोहमात्रं वै कालं तिष्ठेद् गृहाङ्गणे
अतिथिग्रहणार्थाय तदूर्ध्वं वा यथेच्छया ॥ ५६ ॥
अतिथिं तत्र सम्प्राप्तं पूजयेत् स्वागतादिना ।
तथासनप्रदानेन पादप्रक्षालनेन च ॥ ५७ ॥
श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च ।
गच्छतश्चानुयानेन प्रीतिमुत्पादयेद् गृही ॥ ५८ ॥
अज्ञातकुलनामानमन्यतः समुपागतम् ।
पूजयेदतिथिं सम्यङ् नैकग्रामनिवासिनम् ॥ ५९ ॥
अकिञ्चनमसम्बन्धम् अन्यदेशात् समागतम्

तेषां गर्भोऽस्तु पर्युषितं मानुषैस्तिर्यग्भिश्च यद्दत्तं भूतानां । तत्र स्थिता अविज्ञाता भूतसंघाः भूतान्तरविशेषाः ॥ ५३ ॥ अन्नार्थदानान्तरमाश्रयत्वात् पृथक् पृथक् बलिदानं प्रतीयते तथापीदं सार्वं नरो दद्यादिति चान्नमथैषां विदानामिति ॥ ५४ ॥ अपात्राः आचारहीनाः । पुंश्चल्यादयः तेभ्यश्च भुवि दद्यात् ॥ ५५ ॥ गोदोहमात्रं घटिकाचतुर्थांशम् ॥ ५६ ॥ तत्र तस्मिन् काले ॥ ५७ ॥ अतिथिलक्षणमाह, अज्ञातेति । नैकग्रामनिवासिनम् एकग्रामवासिभिन्नम् ॥ ५९ ॥ निज्ञातार्थपूजने विशेषमाह । अकिञ्चनादिगुणविशिष्टातिथिपूजन मसम्बन्धं भवन् अन्नागतोऽतिथिरिति बोध्यं चापि पाठे अतिथे-

असंपूज्यातिथिं भुञ्जन् भोक्तुकामं व्रजत्यधः ॥ ६० ॥
स्वाध्यायगोत्रचरणमपृष्ट्वा च तथा कुलम् ।
हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृही ॥ ६१ ॥
पित्रर्थञ्चापरं विप्रमेकमप्याशयेन्नृप ।
तद्देश्यं विदिताचारसंभूतिं पाञ्चयज्ञिकम् ॥ ६२ ॥
अन्नाग्रञ्च समुद्धृत्य हन्तकारोपकल्पितम् ।
निर्वापभूतं भूपाल श्रोत्रियायोपकल्पयेत् ॥ ६३ ॥
दत्त्वा च भिक्षात्रितयं परिव्राड् ब्रह्मचारिणाम् ।
इच्छया च नरो दद्याद् विभवे सत्यवारितम् ॥ ६४ ॥
इत्येतेऽतिथयः प्रोक्ताः प्रागुक्ता भिक्षवश्च ये
चतुरः पूजयन् तान् नृऋणात् प्रमुच्यते ॥ ६५ ॥
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते

विविधम् ॥ ६० ॥ स्वाध्यायादिकमपृष्ट्वा चरणं वेदशाखान्तराध्यायाम् आचारं वा अपृष्ट्वा अभ्यागतमतिथिम् ॥ ६१ ॥ पित्रर्थं नित्यश्राद्धार्थं आशयेत् भोजयेत् । विदित आचारः संभूतिः जन्म च यस्य । पञ्चयज्ञिकं पञ्चयज्ञकारिणम् ॥ ६२ ॥ अन्नाग्रं भोजनात् पूर्वं गृहीतम् । अत्र श्लोकम् "ग्रासमात्रा भवेद्भिक्षा अग्रं ग्रासचतुष्टयम् । अग्राञ्चैव तु चत्वारि हन्तकारं प्रचक्षते ॥" मनुष्येभ्यो हन्तेति मन्त्रेणोपकल्पितम् हन्तकारोपकल्पितम् । निर्वापभूतं पृथक्कल्पितम् ॥ ६३ ॥ इत्येतेऽतिथय इति अज्ञातकुलनामानमित्यादिना तं मन्येताभ्यागतमित्यन्तेनोक्त एकः, पित्रर्थमुक्तो अपरः, हन्तकारसंप्रदानभूत इति त्रयः । पूर्वाध्यायोक्ताश्च परिव्राड् ब्रह्मचारिणो भिक्षवो भिक्षात्रितयविषयत्वेनोक्ता वा, एतांश्चतुरः पूजयन् मनुष्यऋणा-त्प्रमुच्यते ॥ ६५ ॥ नित्यश्राद्धादेरतिथिपूजायाः आवश्यकत्वमाह

स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ ६६ ॥
धाता प्रजापतिः शक्रो वह्निर्वसुगणोऽर्यमा ।
प्रविश्यातिथिमेते वै भुञ्जतेऽन्नं नरेश्वर ! ॥ ६७ ॥
तस्मादतिथिपूजायां यतेत सततं नरः ।
स केवलमघं भुङ्क्ते यो भुङ्क्ते त्वतिथिं विना ॥ ६८ ॥
ततः स्ववासिनीदुःखिगर्भिणीवृद्धबालकान् ।
भोजयेत् संस्कृतान्नेन प्रथमं चरमं गृही ॥ ६९ ॥
अभक्तवत्सु चैतेषु भुञ्जन् भुङ्क्ते हि दुष्कृतम् ।
मृतश्च नरकं गत्वा श्लेष्मभुग् जायते नरः ॥ ७० ॥
अस्नाताशी मलं भुङ्क्ते ह्यजपी पूयशोणितम् ।
असंस्कृतान्नभुङ् मूत्रं बालादिप्रथमं शकृत् ॥ ७१ ॥
तस्माच्छृणुष्व राजेन्द्र ! यथा भुञ्जीत वै गृही ।
भुञ्जतश्च यथा पुंसः पापबन्धो न जायते ॥ ७२ ॥
इह चारोग्यमतुलं बलवृद्धिस्तथा नृप ! ।
भवत्यनिष्टशान्तिश्च वैरिपक्षाभिचारिका ॥ ७३ ॥
स्नातो यथावत् कृत्वा च देवर्षिपितृतर्पणम् ।
प्रशस्तरत्नपाणिस्तु भुञ्जीत प्रयतो गृही ॥ ७४ ॥
कृतजाप्यो हुते वह्नौ शुद्धवस्त्रधरो नृप ! ।
दत्त्वाऽतिथिभ्यो विप्रेभ्यो गुरुभ्यः संश्रिताय च ॥ ७५ ॥

हरति, अतिथिरिति शेषः ॥ ६६ ॥ स्ववासिनी कृतविवाहा पितृगृहस्था कन्या, चरमं पश्चात् गृही भुञ्जीत ॥ ६८ ॥ अस्नाताशी स्नानमकृत्वैव भोक्ता, अजपी गायत्र्यादिमन्त्रजपहीनः । बालादिभ्यः प्रथमं भुञ्जानः । शकृत् पुरीषं भुङ्क्ते ॥ ७१ ॥ पापबन्धात् भोजनप्रकारश्च, तस्मादित्यादिना पापाप्यायनार्थेत्यन्वयः ॥ ७२ ॥

पुष्पगन्धधरः शस्तमाल्यधारी नरेश्वर ।
नैकवस्त्रधरोऽथार्द्रपाणिपादो नराधिप ॥ ७६ ॥
विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः ।
प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नृप ॥ ७७ ॥
अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः ।
न कुत्सिताहृतं नैव जुगुप्सावदसंस्कृतम् ॥ ७८ ॥
दत्त्वा तु भुक्तं शिष्येभ्यः क्षुधितेभ्यस्तथा गृही ।
प्रशस्तशुद्धपात्रेषु भुञ्जीताकुपितो नृप ॥ ७९ ॥
नासन्दीसंस्थिते पात्रे नादेशे च नरेश्वर ।
नाकाले नातिसंकीर्णे दत्त्वाग्रञ्च नरोऽग्नये ॥ ८० ॥
मन्त्राभिमन्त्रितं शस्तं न च पर्युषितं नृप ।
अन्यत्र फलमांसेभ्यः शुष्कशाकात् तथैव च ॥ ८१ ॥
तद्वद् वादरिकेभ्यश्च गुडपक्वेभ्य एव च ।
भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर ॥ ८२ ॥

अनिष्टमशुभादृष्टं तच्च शान्तिः वैरिपक्षाद्यागतप्रयोगानामभिचारिका विनाशयोक्ता ॥ ७६ ॥ प्राङ्मुख उदङ्मुखो न भुञ्जीत ॥ ७७ ॥ आसन्दी दारुमयं त्रिपदादि । अदेशे कुत्सिते स्थाने, अकाले सन्ध्यादिसमये । आकाशे इति पाठे अनावृते । अग्रमग्नये दत्त्वा परिविष्टान्नस्याग्रं वैश्वदेवाग्नौ दत्त्वा च न भुञ्जीत परिविष्टान्नस्याग्रं नाग्नौ क्षिपेदिति विधिः ॥ ८० ॥ मन्त्राभिमन्त्रितं शस्तं भुञ्जीतेत्यनुषङ्गः । शुष्कं शाकोपस्कं विना पक्वं शाकादिकं वस्त्रादिकं विवर्जन शेषः ॥ ८१ ॥ वादरिकेभ्यः अपक्वबदरादिभ्यः वादरिकेभ्य इति पाठे तु बदरविकारेभ्य इत्यर्थः । गुडपक्वेभ्यः शर्करादिभ्यः । गुडभक्ष्येभ्य इति पाठे च तुल्यार्थः । उद्धृतसाराणि मथिततक्रादीनि ॥ ८२ ॥ नाशेषं निःशेषं

नाशेषं पुरुषोऽश्नीयादन्यत्र जगतीपते ।।
मध्वम्बुदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान् ॥ ८३ ॥
अश्नीयात् तन्मना भूत्वा पूर्वन्तु मधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः ॥ ८४ ॥
प्राग्द्रवं पुरुषोऽश्नन् वै मध्ये च कठिनाशनम् ।
पुनरन्ते द्रवाशी च बलारोग्ये न मुञ्चति ॥ ८५ ॥
अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन् ।
पञ्चग्रासान्महामौनं प्राणाद्याप्यायनाय च ॥ ८६ ॥
भुक्त्वा सम्यगथाचम्य प्राङ्मुखोदङ्मुखोऽपि वा ।
यथावत् पुनराचामेत् पाणी प्रक्षाल्य मूलतः ॥ ८७ ॥
स्वस्थः प्रशान्तचित्तस्तु कृतासनपरिग्रहः ।
अभीष्टदेवतानान्तु कुर्व्वीत स्मरणं नरः ॥ ८८ ॥
अग्निराप्याययत्वन्नं पार्थिवं पवनेरितः ।
दत्तावकाशं नभसा जरयत्वस्तु मे सुखम् ॥ ८९ ॥
अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च ।
भवत्वेतत् परिणतौ ममास्त्वव्याहतं सुखम् ॥ ९० ॥
प्राणापानसमानानामुदानव्यानयोस्तथा ।

न भुञ्जीत ॥ ८३ ॥ तन्मनाः अन्ने दत्तचित्तः सन् ॥ ८४ ॥ बलारोग्ये न मुञ्चति न त्यजति, सर्वदा तद्युक्तो भवतीत्यर्थः ॥ ८५ ॥ अनिन्द्यम् अनिषिद्धं [illegible] केशादिरहितम् ॥ ८६ ॥ मूलतः कफोणिपर्यन्तम् ॥ ८७ ॥ पवनेरितो वह्निर्नभसा दत्तावकाशं यथा भुक्तमन्नं जरयतु । [illegible] पार्थिवं देहधातुम् आप्याययत्विति ॥ ८९ ॥ [illegible] मे [illegible] भूम्यादीनां बलायास्तु ॥ ९० ॥

अन्नं पुष्टिकरञ्चास्तु ममास्त्वव्याहतं सुखम् ॥ ८१ ॥

अगस्तिरग्निर्वडवानलश्च
भुक्तं मयान्नं जरयत्वशेषम् ।
सुखञ्च मे तत्परिणामसम्भवम्
यच्छत्वरोगो मम चास्तु देहे ॥ ८२ ॥

विष्णुः समस्तेन्द्रियदेहदेही
प्रधानभूतो भगवान् यथैकः ।
सत्येन तेनान्नमशेषमेतत्
आरोग्यदं मे परिणाममेतु ॥ ८३ ॥

विष्णुरत्ता तथैवान्नं परिणामश्च वै यथा ।
सत्येन तेन वै भुक्तं जीर्य्यत्वन्नमिदं तथा ॥ ८४ ॥
इत्युच्चार्य्य स्वहस्तेन परिमृज्य तथोदरम् ।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः ॥ ८५ ॥
सच्छास्त्रादिविनोदेन सन्मार्गाद्यविरोधिना ।
दिनं नयेत् ततः सन्ध्यामुपतिष्ठेत समाहितः ॥ ८६ ॥
दिनान्तसन्ध्यां सूर्य्येण पूर्वामृक्षैर्युतां बुधः ।
उपतिष्ठेद् यथान्यायं सम्यगाचम्य पार्थिव ! ॥ ८७ ॥

अरोगो रोगाभावः ॥ ८२ ॥ विष्णुर्यथा समस्तदेहादिषु प्रधानभूतो व्याप्यास्ते, तेनोपाधिनैव सत्येन परमार्थेनाऽपि सत्यभूतेनान्नम् आरोग्यदं सत् परिणाममेत्वित्यन्वयः ॥ ८३ ॥ एवं विष्णुरत्तेत्याद्यपि योज्यम् ॥ ८४ ॥ सच्छास्त्रादीति आदिपदेन क्रीड़ादेरपि परिग्रहः । अत एव विशिनष्टि, सन्मार्गाद्यविरोधिनेति ॥ ८६ ॥ सन्ध्योपासने विशेषमाह, दिनेति । तथाच श्रुतिः, "प्रातःसन्ध्यां सनक्षत्राम्

सर्वकालमुपस्थानं सन्ध्ययोः पार्थिवेष्यते।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः ॥ ९८ ॥
सूर्य्येणाभ्युदितो यश्च त्यक्तः सूर्य्येण च स्वपन्।
अन्यत्रातुरभावात् तु प्रायश्चित्ती भवेन्नरः ॥ ९९ ॥
तस्मादनुदिते सूर्य्ये समुत्थाय महीपते!।
उपतिष्ठेन्नरः सन्ध्यामस्वपंश्च दिनान्तजाम् ॥ १०० ॥
उपतिष्ठन्ति ये सन्ध्यां न पूर्वां न च पश्चिमाम्।
व्रजन्ति ते दुरात्मानस्तामिस्रं नरकं नृप! ॥ १०१ ॥
पुनः पाकमुपादाय सायमप्यवनीपते!।
वैश्वदेवनिमित्तं वै पत्न्यामन्त्रं बलिं हरेत् ॥ १०२ ॥
तत्रापि श्वपचादिभ्यस्तथैवान्नापवर्जनम्।
अतिथिश्चागतं तत्र स्वशक्त्या पूजयेद् बुधः ॥ १०३ ॥
पादशौचासनप्रह्वस्वागतोक्त्या च पूजनम्।
ततश्चान्नप्रदानेन शयनेन च पार्थिव! ॥ १०४ ॥
दिवातिथौ तु विमुखे गते यत् पातकं नृप!।

उपासीत यथाविधि। आदित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम्।" इति ॥ ९७ ॥ सूतकं जन्मनिमित्तमशौचम्। अशौचं मार्तं, विभ्रमो वैचित्त्यम्, आतुरमातुरत्वं रोगकृतं, भीतिरपायाद्याशङ्का तेभ्योऽन्यत्र ॥ ९८ ॥ सूर्य्येणाभ्युदितो यस्मिन् शये सूर्य्य उदेति, सूर्य्येण त्यक्तो यस्मिन् शये सूर्य्योऽस्तमेति। आतुरभावादिति सूतकादेरुपलक्षणम्। प्रायश्चित्तीयते पातकी भवति ॥ ९९ ॥ वैश्वदेवनिमित्तं वैश्वदेवकर्मफलसिद्ध्यर्थम्। पत्नीमन्त्रं विना बलिं हरेत् पत्न्या सायं बलिं हरेदित्यपि पाठ कृत्वापि ॥ १०२ ॥ तत्रापि सायमपि ॥ १०३ ॥ प्रह्वः प्रह्वत्वं प्रणाम इत्यर्थः ॥ १०४ ॥ सूर्य्योपात्तं गच्छता अह्नः प्रापित

तदेवाष्टगुणं पुंसां सूर्य्योढे विमुखे गते ॥ १०५ ॥
तस्मात् स्वशक्त्या राजेन्द्र ! सूर्य्योढमतिथिं नरः ।
पूजयेत् पूजिते तस्मिन् पूजिताः सर्वदेवताः ॥ १०६ ॥
अन्नशाकाम्बुदानेन स्वशक्त्या तोषयेत् पुमान् ।
शयनप्रस्तरमहीप्रदानैरथवापि तम् ॥ १०७ ॥
ततः पादावशेषन्तु भुक्त्वा सायं ततो गृही ।
गच्छेदस्फुटितां शय्यामपि दारुमयीं नृप ! ॥ १०८ ॥
नाविशालां नवाभग्नां नासमां मलिनां न च ।
न च जन्तुमयीं शय्यामधितिष्ठेदनास्तृताम् ॥ १०९ ॥
प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ! ।
सदैव स्वपतः पुंसो विपरीतन्तु रोगदम् ॥ ११० ॥
ऋतावुपगमः शस्तः स्वपत्न्यामवनीपते ! ।
पुन्नामर्क्षे शुभे काले ज्येष्ठास्वयुग्मासु रात्रिषु ॥ १११ ॥
नाप्रातान्तु स्त्रियं गच्छेत् नातुरां न रजस्वलाम् ।

पूर्व सूर्य्योढमननाभावात् इत्यर्थः ॥ १०६ ॥ शयनं खट्वादि । प्रस्तरः कटादिः, मही भूमिः [illegible] ॥ १०७ ॥ अस्फुटितामविदीर्णां गच्छे-दारुमयीं [illegible] ॥ १०८ ॥ अतः प्राच्यां याम्यायां वा शिरः [illegible] ॥ ११० ॥ [illegible] [illegible] । [illegible] [illegible] [illegible] रात्रिषु । [illegible] रात्रिषु । [illegible] पुन्नामिकर्क्षं ॥ १११ ॥ [illegible] [illegible] । [illegible]

नानिष्टां न प्रकुपितां नाप्रशस्तां न गर्भिणीम् ॥ ११२ ॥
नादक्षिणां नान्यकामां नाकामां नान्ययोषितम् ।
क्षुत्क्षामामतिभुक्तां वा स्वयञ्चैभिर्गुणैर्युतः ॥ ११३ ॥
स्नातः स्रग्गन्धधृक् प्रीतो न ध्मातः क्षुधितोऽपि वा ।
सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत् ॥ ११४ ॥
चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥ ११५ ॥
तैलस्त्रीमांससम्भोगी पर्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं नृप ॥ ११६ ॥
अशेषपर्वस्वेतेषु तस्मात् संयमिभिर्बुधैः ।
भाव्यं सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः ॥ ११७ ॥
नान्ययोनावयोनौ वा नोपयुक्तौषधस्तथा ।
देवद्विजगुरूणाञ्च व्यवायी नाश्रमे भवेत् ॥ ११८ ॥
चैत्यचत्वरतीर्थेषु गोष्ठे नैव चतुष्पथे ।
नैव श्मशानोपवनसलिलेषु महीपते ॥ ११९ ॥
प्रोक्तपर्वस्वशेषेषु नैव भूपाल ! सन्ध्ययोः ।
गच्छेद् व्यवायं मतिमान् न मूत्रोच्चारपीडितः ॥ १२० ॥
पर्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप ! ।

अनुपजातेच्छाम् अप्रशस्तां परिवादादिदूषिताम् ॥ ११२ ॥ अदक्षिणाम् अननुकूलाम् अन्यकामाम् अन्यपुरुषाभिलाषिणीम् । [illegible] एभिर्गुणैर्युतः पुरुषो व्यवायं व्रजेदित्युत्तरेणान्वयः ॥ ११४ ॥ अन्ययोनौ पश्वादियोनौ । अयोनौ मुखादौ औषधं [illegible] देवादीनामाश्रमे [illegible] । आश्रमेऽपि पाठे स एवार्थः ॥ ११८ ॥ [illegible]

भुवि रोगावहो नृणामप्रशस्तो जलाशये ॥ १२१ ॥
परदारान् न गच्छेत मनसापि कदाचन ।
किमु वाचास्थिबन्धोऽपि नास्ति तेषु व्यवायिनाम् ॥ १२२ ॥
मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः ।
परदाररतिः पुंसाम् उभयत्रापि भीतिदा ॥ १२३ ॥
इति मत्वा स्वदारेषु ऋतुमत्सु नरो व्रजेत् ।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि ॥ १२४ ॥

द्वादशोऽध्यायः ।

और्व उवाच ।

देवगोब्राह्मणान् सिद्धवृद्धाचार्य्यांस्तथार्च्चयेत् ।
द्विकालञ्च नमेत् सन्ध्यामग्नीनुपचरेत् तथा ॥ १ ॥

किमु ॥ १२२ ॥ यदा मनसा न गच्छेत् तदा वाचा तदभिलापः किं वक्तव्य इत्यर्थः । नरकेऽव्यवायिनामस्थिबन्धोऽपि नास्ति, कामचेष्टा-दिवर्जितेषु परिवर्जनीय इत्यर्थः ॥ १२२ ॥ परदारेषु रतिः गमनं सा पुंसां भीतिदा । उभयत्र इह परत्र च । तदेवाह, मृत इति [illegible] ॥ १२३ ॥

[illegible] विशेषाणां निरूप्यताः । सदाचारो द्वादशे तु न परस्त्रीगमनादयः । [illegible] ॥ १ ॥ [illegible]

सदानुपहते वस्त्रे प्रशस्ताश्च तथौषधीः ।
गारुड़ानि च रत्नानि विभृयात् प्रयतो नरः ॥ २ ॥
प्रस्निग्धामलकेशश्च सुगन्धिश्चारुवेशधृक् ।
सिताः सुमनसो हृद्या विभृयाच्च नरः सदा ॥ ३ ॥
किञ्चित् परस्वं न हरेन्नाल्पमप्याप्रियं वदेत् ।
प्रियञ्च नानृतं ब्रूयान्नान्यदोषानुदीरयेत् ॥ ४ ॥
नान्यस्त्रियं तथा वैरं रोचयेत् पुरुषेश्वर ! ।
न दुष्टं यानमारोहेत कूलच्छायां न संश्रयेत् ॥ ५ ॥
विद्विष्टपतितोन्मत्तबहुवैरातिकीटकैः ।
बन्धकीबन्धकीभर्तृक्षुद्रानृतकथैः सह ॥ ६ ॥
तथातिव्ययशीलैश्च परिवादरतैः शठैः ।
बुधो न मैत्रीं कुर्वीत नैकपन्थानमाश्रयेत् ॥ ७ ॥
नावगाहेज्जलौघस्य वेगमग्रे नरेश्वर ! ।
प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः ॥ ८ ॥
न कुर्य्याद् दन्तसंघर्षं न कुष्णीयाच्च नासिकाम् ।
नासंवृतमुखो जृम्भेत् श्वासकासौ च वर्जयेत् ॥ ९ ॥

विष्णुश्यामा दूर्वादयः ॥ २ ॥ प्रस्निग्धाः अरूक्षाः प्रसिद्धा इति पाठे अवहृताः येषां वस्त्रं ॥ ३ ॥ अन्याश्रयं वैरञ्च नाभिलषेत् । नद्यादीनां कूलच्छायाम् ॥ ५ ॥ विद्विष्टादिभिः सह मैत्रीं न कुर्वीत । बन्धुभिरैर सह । अतिकीटकैरत्यन्तं कीटवत् पीड़कैः । कीलकैरिति पाठे कुटिलस्वभावैः । बन्धकी वेश्या । क्षुद्रः अल्पलाभोत्सृष्टिच्छः । अनृत-कथो मिथ्यावादी ॥ ६ ॥ शठः कुटिलः ॥ ७ ॥ जलौघस्य वेगमग्रे । अन्यस्मिन् अगम्यतीर्थे नावगाहेत न प्रविशेत् । प्रदीप्तम् अग्निना ज्वालाकुलम् ॥ ८ ॥ न कुष्णीयान्नोत्क्षिपेत् । असंवृतमुखो जृम्भादि न कुर्यात् ॥ ९ ॥ न

नाक्षैर्द्दीव्येत् सदाऽन्यैश्च न धुनुयात् पवनं बुधः ।
नखांश्च वादयेच्छिन्द्यान्न तृणं न महीं लिखेत् ॥१०॥
न श्मश्रु भक्षयेल्लोष्टं न मृद्नीयाद् विचक्षणः ।
ज्योतींष्यमेध्यः शस्तानि नाभिवीक्षेत च प्रभो ! ।
नग्नां परस्त्रियञ्चैव सूर्य्यञ्चास्तमनोदये ॥ ११ ॥
न हुंकुर्य्याच्छवञ्चैव शवगन्धो हि सोमजः ॥ १२ ॥
चतुष्पथान् चैत्यतरून् श्मशानोपवनानि च ।
दुष्टस्त्रीसन्निकर्षञ्च वर्जयेन्निशि सर्वदा ॥ १३ ॥
पूज्यदेवद्विजज्योतिश्छायां नातिक्रमेद् बुधः ।
नैकः शून्याटवीं गच्छेन्न च शून्यगृहे वसेत् ॥ १४ ॥
केशास्थिकण्टकामेध्यवलिभस्मतुषांस्तथा ।
स्नानार्द्रां धरणीञ्चैव दूरतः परिवर्जयेत् ॥ १५ ॥
नानार्य्यान्नाश्रयेत् कांश्चिन्न जिह्मान् रोचयेद् बुधः ।
उपसर्पेत न व्यालान् चिरं तिष्ठेन्न चोत्थितः ॥ १६ ॥

अवमृद्नीयात् मर्द्दयेत् अमेध्योऽशुचिः सन् ज्योतींषि सूर्य्यादीनि शस्तानि च गवादीनि नाभिवीक्षेत । ज्योतींष्यमेध्याशस्तानीति पाठे ज्योतींषि चक्षुःप्रतिकूलानि अमेध्यानि पुरीषादीनि अशस्तानि अमङ्गलानि ॥११॥ हुं शवाकारान् शब्दांश्च न कुर्य्यात् न अनुकुर्य्यात् । तत्र हेतुः । [illegible] इति [illegible] शवस्य गन्धः सोमज इति "[illegible] सोम शरीरं [illegible] यतः" इति वचनात् ॥ १२ ॥ पूज्या गुर्वादयः ॥ १४ ॥ जिह्मान् कुटिलान् न रोचयेत् नेच्छेत् व्यालान् दुष्टगजान् सर्पान् वा नोपसर्पेत तन्निकटं न गच्छेत् ॥ १६ ॥ [illegible] न च [illegible] नाश्रयेत् । [illegible] [illegible] [illegible] इति

अतीव जागरस्वप्ने तद्वत् स्नानासने बुधः ।
न सेवेत तथा शय्यां व्यायामञ्च नरेश्वर ! ॥ १७ ॥
दंष्ट्रिणः शृङ्गिणश्चैव प्राज्ञो दूरेण वर्जयेत् ।
अवश्यायञ्च राजेन्द्र ! पुरोवातातपौ तथा ॥ १८ ॥
न स्नायात् न स्वपेन्नग्नो न चैवोपस्पृशेद्बुधः ।
मुक्तकच्छश्च नाचामेत् देवार्च्चाञ्च वर्जयेत् ॥ १९ ॥
होमदेवार्च्चनाद्यासु क्रियास्वाचमने तथा ।
नैकवस्त्रः प्रवर्त्तेत द्विजवाचनिके जपे ॥ २० ॥
नासमञ्जसशीलैस्तु सहासीत कदाचन ।
सद्वृत्तसन्निकर्षो हि क्षणार्द्धमपि शस्यते ॥ २१ ॥
विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः ।
विवादश्च विवाहश्च समशीलैर्नृपेष्यते ॥ २२ ॥
नारभेत कलिं प्राज्ञः शुष्कवैरं न कारयेत् ।
अप्यल्पहानिः सोढव्या वैरेणार्थागमं त्यजेत् ॥ २३ ॥
स्नातो नाङ्गानि निर्मार्जेत् स्नानशाट्या न पाणिना ।
न च निर्धूनयेत् केशान्नाचामेन्नैव चोत्थितः ॥ २४ ॥
पादेन नाक्रमेत् पादं न पूज्याभिमुखं नयेत् ।
वीरासनं गुरोरग्रे त्यजेत विनयान्वितः ॥ २५ ॥

अतिजागरस्वप्नयोरुपलक्षणं व्यायामं श्रमम् ॥ १७ ॥ अवश्यायं हिमम् ॥ १८ ॥ उपस्पृशेत् आचामेत् । मुक्तकच्छः मुक्तपश्चादञ्चलः ॥ १९ ॥ द्विजवाचनिके पुण्याहवाचने ॥ २० ॥ शस्यते यथा कथञ्चिदनुवर्त्तनं विधीयते ॥ २१ ॥ तद्वेषाद्वैरं न कार्यं कलहम् ॥ २२ ॥ पूज्याभिमुखं पादं न नयेत् न प्रसारयेत् ॥ २५ ॥ अपसव्यम-

अपसव्यं न गच्छेच्च देवागारचतुष्पथान् ।
मङ्गल्यपूज्यांश्च ततो विपरीतान् न दक्षिणाम् ॥ २६ ॥
सोमार्काग्न्यम्बुवायूनां पूज्यानाञ्च न सम्मुखम् ।
कुर्य्यात् ष्ठीवनविण्मूत्रसमुत्सर्गञ्च पण्डितः ॥ २७ ॥
तिष्ठन न मूत्रयेत् तद्वत् पथ्यासु नाऽपि मूत्रयेत् ।
श्लेष्मविण्मूत्ररक्तानि सर्वदैव न लङ्घयेत ॥ २८ ॥
श्लेष्मसिंघाणकोत्सर्गो नान्नकाले प्रशस्यते ।
बलिमङ्गलजप्यादौ न होमे न महाजने ॥ २९ ॥
योषितो नावमन्येत न चासां विश्वसेद् बुधः ।
न चेर्ष्युर्भवेत् तासु नाधिकुर्य्यात् कदाचन ॥ ३० ॥
माङ्गल्यपुष्परत्नाज्यपूज्याननभिवाद्य च ।
न निष्क्रामेद् गृहात प्राज्ञः सदाचारपरो नृप ॥ ३१ ॥
चतुष्पथान् नमस्कुर्य्यात् काले होमपरो भवेत् ।
दीनानभ्युद्धरेत् साधून् उपासीत बहुश्रुतान् ॥ ३२ ॥
देवर्षिपूजकः सम्यक् पितृपिण्डोदकप्रदः ।
सत्कर्त्ता चातिथीनां यः स लोकानुत्तमान् व्रजेत् ॥ ३३ ॥
हितं मितं प्रियं काले वश्यात्मा योऽभिभाषते ।
स याति लोकानाह्लादहेतुभूतान् नृपाक्षयान् ॥ ३४ ॥

प्रदक्षिणम् । विपरीतान् अमङ्गल्यान् प्रदक्षिणं न कुर्यात् ॥ २६ ॥ 'बल्यादौ' बलिदानः श्लेष्मा कर्मणि होमे च । महाजने बहुजन-समाजे ॥ २९ ॥ ईर्ष्युरविश्वस्तः तासु योषितो नाधिकुर्यात् कुत्रापि-कार्यादिष्वीशं कुर्यात् । नाधिकार इत्यस्य प्रवासादिकं न कुर्यादित्यर्थः ॥ ३० ॥ साधून् बहुश्रुतान् उपासीत सेवेत । काले यथोचितम्

धीमान् ह्रीमान् क्षमायुक्त आस्तिको विनयान्वितः ।
विद्याभिजनवृद्धानां याति लोकाननुत्तमान् ॥ ३५ ॥
अकालगर्जितादौ तु पर्वस्वाशौचकादिषु ।
अनध्यायं बुधः कुर्य्यादुपरागादिके तथा ॥ ३६ ॥
शमं नयति यः क्रुद्धान् सर्व्वबन्धुरमत्सरी ।
भीताश्वासनकृत् साधुः स्वर्गस्तस्याल्पकं फलम् ॥ ३७ ॥
वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥ ३८ ॥
नोर्ध्वं न तिर्य्यग्दूरं वा निरीक्षन् पर्य्यटेद् बुधः ।
युगमात्रं महीपृष्ठं नरो गच्छेद् विलोकयन् ॥ ३९ ॥
दोषहेतूनशेषांस्तु वश्यात्मा यो निरस्यति ।
तस्य धर्म्मार्थकामानां हानिर्नाल्पापि जायते ॥ ४० ॥
पापेऽप्यपापः परुषेऽप्यभिधत्ते प्रियाणि यः ।
मैत्रीद्रवान्तःकरणस्तस्य मुक्तिः करे स्थिता ॥ ४१ ॥
ये कामक्रोधलोभानां वीतरागा न गोचरे ।
सदाचारस्थितास्तेषामनुभावैर्धृता मही ॥ ४२ ॥
तस्मात् सत्यं वदेत् प्राज्ञो यत् परप्रीतिकारणम् ।
सत्यं यत् परदुःखाय तत्र मौनपरो भवेत् ॥ ४३ ॥
प्रियं युक्तं हितं नैतदिति मत्वा न तद् वदेत् ।

॥ ३५ ॥ विद्यादिवृद्धानां विनयजनकत्वं ... तदन्वित इत्यर्थः ॥३५॥ युगमात्रं चतुर्हस्तम् ॥ ३९ ॥ दोषहेतून् अशुभान् अनुशयान् ॥ ४० ॥ पापेऽपकारिण्यपि अपापः अपकर्त्ता परुषभाषिण्यपि प्रियभाषी ॥ ४१ ॥ ये कामादीनां न गोचरे नायत्ताः स्वधर्म्मीलनः । अनुभावैः प्रभावैर्धृता-

श्रेयस्तत्र हितं वाक्यं यद्यप्यत्यन्तमप्रियम् ॥ ४४ ॥
प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्मणा मनसा वाचा तदेव मतिमान् भजेत् ॥ ४५ ॥

त्रयोदशोऽध्यायः ।

और्व उवाच ।

सचेलस्य पितुः स्नानं जाते पुत्रे विधीयते ।
जातकर्म ततः कुर्य्यात् श्राद्धमभ्युदये च यत् ॥ १ ॥
युग्मान् देवांश्च पित्रांश्च सम्यक् सव्यक्रमाद् द्विजान् ।
पूजयेद् भोजयेच्चैव तन्मना नान्यमानसः ॥ २ ॥
दध्यक्षतैः सवदरैः प्राङ्मुखोदङ्मुखोऽपि वा ।
देवतीर्थेन वै पिण्डान् दद्यात् कायेन वा नृप ॥ ३ ॥
नान्दीमुखः पितृगणस्तेन श्राद्धेन पार्थिव ॥

माविर्भूता "सत्येनोत्तभिता भूमिः" इति श्रुतेः ॥ ४४ ॥ उपदेशसार-माह प्राणिनामिति ॥ ४५ ॥

त्रयोदशेऽथ श्राद्धानि सविधिनान्यवर्णयत् । ये तत्क्रियाकाला ताश्च यथार्थमधिकारिणः । पितुः पुत्रजन्मकाले सचेलस्नानं ॥ १ ॥ अभ्युदयात् प्रदक्षिणक्रमेण । नान्यमानसः अनन्यचित्तः तद्गतमनाः सम्यक् च । आभ्युदयिके श्राद्धे सर्वदिक्षु ॥ २ ॥ कायेन

प्रीयते तत् तु कर्त्तव्यं पुरुषैः सर्ववृद्धिषु ॥ ४ ॥
कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः ।
नामकर्मणि बालानां चूड़ाकर्मादिके तथा ॥ ५ ॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥ ६ ॥
पितृपूजाविधिः प्रोक्तो वृद्धावेष समासतः ।
श्रूयतामवनीपाल ! प्रेतकर्मक्रियाविधिः ॥ ७ ॥
प्रेतदेहं शुभैः स्नानैः स्नापितं स्रग्विभूषितम् ।
दग्ध्वा ग्रामाद् बहिः स्नाताः सचेलाः सलिलाशये ॥८॥
यत्र तत्र स्थितायैतदमुकायेति वादिनः ।
दक्षिणाभिमुखा दद्युर्बान्धवाः सलिलाञ्जलिम् ॥ ९ ॥
प्रविष्टाश्च समं गोभिर्ग्रामं नक्षत्रदर्शने ।
कटधर्मांस्ततः कुर्य्युर्भूमौ प्रस्तरशायिनः ॥ १० ॥
दातव्योऽनुदिनं पिण्डः प्रेताय भुवि पार्थिव ! ।
दिवा च भक्तं भोक्तव्यम् अमांसं मनुजर्षभ ! ॥ ११ ॥
दिनानि तावदिच्छातः कर्त्तव्यं विप्रभोजनम् ।

प्रजापतितीर्थेन ॥ ४ ॥ सर्ववृद्धिष्वपीति कन्यापुत्रेति ॥ ५ ॥ पुत्रस्यादि-मुखदर्शने प्रथमतो दर्शने । तत्र जन्मकाले सन्निहितस्यैव पितुस्तत्प्र-योक्तत्वात् ॥ ६ ॥ स्नानैः स्नानसाधनैः सचेलाः पूर्वधृतवस्त्रसहिता एव स्नाताः ॥ ८ ॥ अमुकायेति नामगोत्रोपलक्षणम् ॥ ९ ॥ गोभिः समं गवां प्रवेशसमये । एतच्च दिवादाहविषयम् । कटधर्मान् प्रेतकृत्यानि अशौचधर्मान् ॥ १० ॥ अनुदिनं यावदशौचं भक्तम् ओदनम् अत पिण्डादिकमप्यायाति । अमांसमित्युक्ते मांसव्यतिरिक्तानुक्रमा ॥ ११ ॥

प्रेतस्तृप्तिं तथा याति बन्धुवर्गेण भुञ्जता ॥ १२ ॥

प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ।

वस्त्रत्यागं बहिः स्नानं कृत्वा दद्यात् तिलोदकम् ॥ १३ ॥

ततोऽस्य बन्धुवर्गस्तु भुवि दद्यात् तिलोदकम् ।

चतुर्थेऽह्नि च कर्त्तव्यं भस्मास्थिचयनं नृप ! ॥ १४ ॥

तदूर्ध्वमङ्गसंस्पर्शश्च सपिण्डानामपीष्यते ।

योग्याः सर्वक्रियाणान्तु समानसलिलास्तथा ॥ १५ ॥

अनुलेपनपुष्पादिभोगादन्यत्र पार्थिव ! ।

शय्यासनोपभोगश्च सपिण्डानामपीष्यते ।

भस्मास्थिचयनादूर्ध्वं संयोगो न तु योषिता ॥ १६ ॥

बाले देशान्तरस्थे च पतिते च मुनौ मृते ।

सद्यः शौचं तथेच्छातो जलाग्न्युद्बन्धनादिषु ॥ १७ ॥

मृतबन्धोर्दशाहानि कुलस्यान्नं न भुज्यते ।

तिलमोचनम् । एतच्च सपिण्डसमानोदकैः कर्त्तव्यं सपिण्डादिभेदेन कूर्मोक्तः "सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु जन्मनाम्नोरवेदने" इति ॥ १२ ॥ सर्वक्रियाणामनुपालनं ... ॥ १५ ॥ बालेऽदन्तजाते देशान्तरस्थे इति संवत्सरादूर्ध्वं सद्यःशौचं संवत्सराभ्यन्तरे तु यथोचितं मृते त्रिरात्रम् । देशान्तरन्तु 'वचान्तरान्तरं' यत्र गिरिर्वा व्यवधानम् । वाचो यत्र विभिद्यन्ते तद् देशान्तरमिष्यते" इति । एतच्च मातापितृव्यतिरिक्तविषयम् । मनुवचनम् । "पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्" इति । मुनौ यतौ । इच्छात इति विशेषणा- दनिच्छया मृते सर्वोऽप्यशौचादि कार्यम् । "यदि कश्चित् प्रमादेन म्रियेताग्न्युदकादिना । तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया ।" इति स्मृतेः ॥ १७ ॥ मृतो बन्धुः सपिण्डो यस्य तत्कुलस्यान्नं दशाह

दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्त्तते ॥ १८ ॥
विप्रस्यैतद् द्वादशाहं राजन्यस्याप्यशौचकम्।
अर्द्धमासञ्च वैश्यस्य मासः शूद्रस्य शुद्धये ॥ १९ ॥
अयुजो भोजयेत् कामं द्विजानाद्ये ततो दिने।
दद्याद् दर्भेषु पिण्डञ्च प्रेतायोच्छिष्टसन्निधौ ॥ २० ॥
वार्य्यायुधप्रतोदास्तु दण्डश्च द्विजभोजनात्।
स्प्रष्टव्योऽनन्तरं वर्णैः शुध्येरंस्ते ततः क्रमात् ॥ २१ ॥
ततः स्ववर्णधर्मा ये विप्रादीनामुदाहृताः।
तान् कुर्वीत पुमान् जीवेन्निजधर्मार्जनैस्तथा ॥ २२ ॥
मृताहनि च कर्त्तव्यमेकोद्दिष्टमतः परम्।
आह्वानादिक्रियादैवनियोगरहितं हि तत् ॥ २३ ॥
एकोऽर्घस्तत्र दातव्यस्तथैवैकं पवित्रकम्।
प्रेताय पिण्डो दातव्यो भुक्तवत्सु द्विजातिषु ॥ २४ ॥

न भोक्तव्यम्। तत्कृतञ्च तदन्नभोक्तृञ्च यावदशौचं दानादि निवर्त्तेत ॥ १८ ॥ एतत् पूर्वोक्तद्वादशाहः ॥ १९ ॥ आद्यमेकोद्दिष्टश्राद्धमाह अयुज इति। एकं त्रीणीत्येवं विषमसंख्यान्। आद्ये अशौचानन्तरं प्रथमेऽहनि। अत्र इति पाठे अशौचान्त इत्यर्थः। "आद्यमेकादशेऽहनि" इति स्मृतेः ॥ २० ॥ द्विजभोजनादनन्तरं वर्णैर्विप्रादिभिर्वार्य्यादयः क्रमात् स्प्रष्टव्याः ततस्ते शुध्येरन् इत्यन्वयः। ब्राह्मणादिभिर्यथावर्णं वार्य्यादि क्रमात् स्प्रष्टव्यानीत्यर्थः ॥ २१ ॥ शुद्धेरनन्तरमेव निजधर्मार्जनैर्जीवेत् जीविकार्थं निजधर्मेणार्जनं कुर्यादित्यर्थः ॥ २२ ॥ अतः प्रथममासात् परं प्रतिमासं मृततिथौ यावद्वर्षम्। आह्वानम् आवाहनम् आदिशब्दादग्नौ करणादिक्रिया दैवनियोगो वैश्वदेवविप्रनियोगस्तद्रहितम् ॥ २३ ॥ भुक्तवत्सु सत्सु अयुजो भोजयेदित्युक्तत्वात् प्रेतायैक एव पिण्डो देय ॥ २४ ॥ ननु चाभिहितादिति अभिहितत्वादिति

प्रश्नश्च तत्राभिरतिर्यजमानैर्द्विजन्मनाम् ।
अक्षय्यममुकस्येति वक्तव्यं विरतौ तथा ॥ २५ ॥
एकोद्दिष्टमयो धर्म इत्थमावत्सरात् स्मृतः ।
सपिण्डीकरणं तस्मिन् काले राजेन्द्र ! तच्छृणु ॥ २६ ॥
एकोद्दिष्टविधानेन कार्य्यं तदपि पार्थिव ! ।
तिलगन्धोदकैर्युक्तं तत्र पात्रचतुष्टयम् ॥ २७ ॥
पात्रं प्रेतस्य तत्रैकं पात्रत्रययुतं तथा ।
सेचयेत् पितृपात्रेषु प्रेतपात्रं नृप ! त्रिषु ॥ २८ ॥
ततः पितृत्वमापन्ने तस्मिन् प्रेते महीपते ! ।
श्राद्धधर्मैरशेषैस्तु तत्पूर्वानर्चयेत् पितॄन् ॥ २९ ॥
पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसन्ततिः ।
सपिण्डसन्ततिर्वापि क्रियार्हो नृप ! जायते ॥ ३० ॥
तेषामभावे सर्वेषां समानोदकसन्ततिः ।
मातृपक्षस्य पिण्डेन सम्बद्धा ये जलेन वा ॥ ३१ ॥
कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्य्या क्रिया नृप ! ।

[illegible] अभिरताः स्थ इति वक्तव्यमित्यर्थः । अक्षय्यममुकस्येति [illegible] । [illegible] एकोद्दिष्टे [illegible] अभिरताः स्थ इति [illegible] ॥ २५ ॥ तस्मिन् काले पूर्णे संवत्सरे सपिण्डीकरणम् ॥ २६ ॥ पात्रचतुष्टय [illegible] पात्रं प्रेतस्येति ॥ २७ ॥ श्राद्धधर्मैः [illegible] सपिण्डीकरणः [illegible] पूजयेत् । चतुर्थस्तु निवर्त्तते [illegible] लेपभाजः [illegible] स्मृतेः ॥ २९ ॥ [illegible] अभावेन क्रियाधिकारः [illegible] पुत्र इति [illegible] ॥ ३० ॥ पूर्वोक्तानामभावे स्त्रीभिः [illegible] क्रिया कार्य्या इत्यर्थः ।

संघातान्तर्गतैर्वापि कार्य्या प्रेतस्य वा क्रिया ॥ २२ ॥
उत्सन्नबन्धुरिक्थानां कारयेदवनीपतिः ।
पूर्व्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः ॥ २३ ॥
त्रिप्रकाराः क्रिया ह्येतास्तासां भेदं शृणुष्व मे ।
आदाहवार्य्यायुधादिस्पर्शाद्यन्तास्तु याः क्रियाः ॥ २४ ॥
ताः पूर्व्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः ।
प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु ॥ २५ ॥
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः ।
पितृमातृसपिण्डैस्तु समानसलिलैस्तथा ॥ २६ ॥
तत्संघातान्तर्गतैर्वा राज्ञा वा धनहारिणा ।
पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः ॥ २७ ॥
दौहित्रैर्वा नरश्रेष्ठ ! कार्य्यास्तत्तनयैस्तथा ।
मृताहनि च कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः ।
प्रतिसंवत्सरं राजन् ! एकोद्दिष्टविधानतः ॥ २८ ॥

संघातः सार्थः पान्थसमुदायः । तत्र मृतस्य तदन्तर्गतैः प्रेतक्रिया कार्य्येत्यर्थः । समानप्रवरसमानगोत्रा [illegible] ॥ २२ ॥ उत्सन्ना बन्धवो रिक्थानि च यथा तेषाम् । [illegible] पाठे उत्सन्नबन्धोः प्रेतस्य [illegible] । [illegible] क्रियात्रैविध्यमाह पूर्व्वा इति [illegible] ॥ २३ ॥ आदाहः [illegible] तासाम् वार्य्यायुधादिस्पर्शादिरन्तो यासां [illegible] तथा । [illegible] दशमनादु दशा-न्तेऽस्थिसञ्चयनादौ [illegible] तेन प्रेतदा [illegible] । आदाहश्च वार्य्यायुधादिस्पर्शश्च आद्यन्तौ यासां ताः । [illegible] पूर्व्वाः क्रिया इत्यर्थः ॥ २४ ॥ तत्र पूर्व्वाः क्रिया [illegible] यथार्हं कर्त्तव्याः ॥ २५ ॥ पुत्रादौ [illegible] उत्तराः मध्यमाश्च [illegible] कर्त्तव्या इति गम्यते ॥ २७ ॥ मृताहनि चेति चकारादष्टकादिषु पार्व्वणविधिना

तस्मादुत्तरसंज्ञा याः क्रियास्ताः शृणु पार्थिव ।
यदा यदा च कर्त्तव्या विधिना येन चानघ ॥ १८ ॥

—०—

चतुर्दशोऽध्यायः ।

और्व उवाच ।

ब्रह्मेन्द्ररुद्रनासत्यसूर्याग्निवसुमारुतान् ।
विश्वेदेवानृषिगणान् वयांसि मनुजान् पशून् ॥ १ ॥
सरीसृपान् पितृगणान् यच्चान्यद् भूतसञ्ज्ञकम् ।
श्राद्धं श्रद्धान्वितः कुर्वन् तर्पयत्यखिलं हि तत् ॥ २ ॥
मासि मास्यसिते पक्षे पञ्चदश्यां नरेश्वर ।
तथाष्टकासु कुर्वीत काम्यान् कालान् शृणुष्व मे ॥ ३ ॥
श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजम् ।
श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने तथा ॥ ४ ॥

चेत्यर्थः ॥ १८ ॥ तस्मादुत्तरक्रियायाः उत्तरक्रिया याः ता तदुपाय-
विधीन् चेत्यर्थः ॥ १९ ॥

श्राद्धं तत्पदार्थांश्च विवक्षुस्तदिभेदतः । चतुर्दशे तु कालांश्च
तत्फलान्यभ्यधात्ततः । तत्र तावदुत्तरक्रियायां कालान् वक्तुमिच्छन्
श्राद्धफलमाह ब्रह्मेति ॥ १ ॥ प्रतिमासं कृष्णपक्षे पञ्चदश्यां दर्शश्राद्धं
कुर्वीतेत्यर्थः । अष्टका आग्रहायण्या ऊर्ध्वं तिस्रः कृष्णाष्टम्यः ॥ २ ॥
श्राद्धार्हं द्रव्यं विशिष्टं द्विजमागतं विज्ञायेत्यन्वयः ॥ ४ ॥ व्यतीपाते

विषुवे चैव संप्राप्ते ग्रहणे शशिसूर्ययोः।
समस्तेष्वेव भूपाल! राशिष्वर्के च गच्छति॥ ५॥
नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने।
इच्छाश्राद्धानि कुर्वीत नवसस्यागमे तथा॥ ६॥
अमावास्या यदा मैत्र! विशाखास्वातियोगिनी।
श्राद्धैः पितृगणस्तृप्तिं तदाप्नोत्यष्टवार्षिकीम्॥ ७॥
अमावास्या यदा पुष्ये रौद्रे चर्क्षे पुनर्वसौ।
द्वादशाब्दं तदा तृप्तिं प्रयान्ति पितरोऽर्चिताः॥ ८॥
वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छताम्।
वारुणे वाप्यमावास्या देवानामपि दुर्लभा॥ ९॥
नवस्वृक्षेष्वमावास्या यदैतेष्ववनीपते!।
तदा तृप्तिप्रदं श्राद्धं पितॄणां शृणु चापरम्॥ १०॥
गीतं सनत्कुमारेण यथैलाय महात्मने।
पृच्छते पितृभक्ताय प्रश्रयावनताय च॥ ११॥

राशिषु अर्के गच्छति सति इति सर्वसंक्रान्तीनां श्राद्धकालत्वोक्तत्वात् अयने विषुवे चेति पुनरुक्तिः फलातिरेकार्था॥ ५॥ इच्छाश्राद्धानि काम्यानि नवसस्यागम इति। एतच्च व्रीहियवव्यतिरिक्तविषयम्। तयोर्नित्यश्राद्धनिमित्तत्वात्॥ ६॥ मैत्रमनुराधा॥ ७॥ रौद्रमार्द्रा॥ ८॥ वासवं धनिष्ठा, अजैकपात् पूर्वभाद्रपदा, वारुणं शतभिषा, एतेषु नक्षत्रेष्वमावास्या पितॄणां देवानाम् तृप्तिं कर्त्तुमिच्छतां पुंसां दुर्लभा। इच्छतेति पाठे च एवार्थः॥ ९॥ नवस्वमावास्याश्राद्धव्याप्तिमुक्त्वैव तत् अन्यैरपि श्राद्धतृप्तिरित्युक्त आह, नवस्विति। मोदोक्तेनापः प्रवक्ष्ये यच्चापरं कीर्तितवत् सनत्कुमारोक्तात् गुप्तफलविधिरित्यर्थः। निःस्वात् भुक्तेनापि श्राद्धमितीति वा॥ १०॥ ऐलाय पुरूरवसे॥ ११॥ पञ्चदशी

वैशाखमासस्य तु या तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे ॥ १२ ॥
एता युगाद्याः कथिताः पुराणे
ह्यनन्तपुण्यास्तिथयश्चतस्रः ॥ १३ ॥
चन्द्रक्षयो माधवमासि यत्र
दिनक्षये वै विषुवद्द्वये च ।
मन्वन्तराद्यास्तिथयस्तथैव
छायागतश्च व्यतिपातयोगः ॥ १४ ॥
उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च ।
पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति ॥ १५ ॥
माघासिते पञ्चदशी कदाचित्
उपैति योगं यदि वारुणेन ।
ऋक्षेण कालः स परः पितॄणां
नह्यल्पपुण्यैर्नृप ! लभ्यतेऽसौ ॥ १६ ॥

माघ [illegible] ॥१२॥ एता युगाद्याः ॥१३॥ पूर्वोक्ते- [illegible] माघासिते [illegible] इति विधिः । पूर्वस्तु [illegible] विशेषः

काले धनिष्ठा यदि नाम तस्मिन्
भवन्ति भूपाल ! तदा पितृभ्यः।
दत्तं जलान्नं प्रददाति तृप्तिं
वर्षायुतं तत्कुलजैर्मनुष्यैः॥ १७॥

तत्रैव चेद् भाद्रपदास्तु पूर्वाः
काले तदा यत् क्रियते पितृभ्यः।
श्राद्धं परां तृप्तिमुपेत्य तेन
युगं समग्रं पितरः स्वपन्ति॥ १८॥

गङ्गां शतद्रूमथवा विपाशां
सरस्वतीं नैमिषगोमतीं वा।
तत्रावगाह्यार्चनमादरेण
कृत्वा पितॄणां दुरितं निहन्ति॥ १९॥

गायन्ति चैतत् पितरः सदैव
वर्षामघातृप्तिमवाप्य भूयः।
माघासितान्ते शुभतीर्थतोयैः
यास्याम तृप्तिं तनयादिदत्तैः॥ २०॥

चित्तञ्च वित्तञ्च नृणां विशुद्धं
शस्तश्च कालः कथितो विधिश्च।
पात्रं यथोक्तं परमा च भक्तिः
नृणां प्रयच्छन्त्यभिवाञ्छितानि॥ २१॥

॥ १९॥ पितृणामर्चनं कृत्वा आत्मनो दुरितं निघ्नन्ति नाशयन्ति॥ १९॥
मघासु वर्षासु तृप्तिमिति अपरपक्षस्यान्ते अमावास्यायां तृप्तिं प्राप्स्यामः॥ २०॥
चित्तं विशुद्धं शुद्धं युक्तं वित्तञ्च विशुद्धं विनयार्जितम्॥ २१॥

पितृगीतास्तथैवात्र श्लोकास्तांश्च शृणुष्व मे ।
श्रुत्वा तथैव भवता भाव्यं तत्रादृतात्मना ॥ २२ ॥
अपि धन्यः कुले जायादस्माकं मतिमान् नरः ।
अकुर्वन् वित्तशाठ्यं यः पिण्डान् नो निर्वपिष्यति ॥ २३ ॥
रत्नवस्त्रमहायानसर्वभोगादिकं वसु ।
विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति ॥ २४ ॥
अन्नेन वा यथाशक्त्या कालेऽस्मिन् भक्तिनम्रधीः ।
भोजयिष्यति विप्राग्रान् तन्मात्रविभवो नरः ॥ २५ ॥
असमर्थोऽन्नदानस्य धान्यमामं स्वशक्तितः ।
प्रदास्यति द्विजाग्र्येभ्यः स्वल्पाल्पां वापि दक्षिणाम् ॥ २६ ॥
तत्राप्यसामर्थ्ययुतः कराग्राग्रस्थितांस्तिलान् ।
प्रणम्य द्विजमुख्याय कस्मैचिद् भूप ! दास्यति ॥ २७ ॥
तिलैः सप्ताष्टभिर्वापि समवेतां जलाञ्जलिम् ।
भक्तिनम्रः समुद्दिश्य भुव्यस्माकं प्रदास्यति ॥ २८ ॥
यतः कुतश्चित् संप्राप्य गोभ्यो वापि गवाह्निकम् ।
अभावे प्रीणयन्नस्मान् श्रद्धायुक्तः स दास्यति ॥ २९ ॥
सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः ।
सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति ॥ ३० ॥

एतदेव पितृगीतैः ख्यापयति, पितृगीता इति वाक्यद्वयात्मकानि ।
अकुर्वन्वित्तशाठ्यादिदोषमयमानसः पितृगीतान् श्लोकान् शृणु ॥ २२ ॥
धान्यमामं धान्यमामपक्वं वा पाठः । तत्र तु स्वल्पाल्पां स्वल्पादल्पाम् ॥ २६ ॥
जलाञ्जलिम् जलस्य योऽञ्जलिस्तमुद्दिश्य भुव्यादि ॥ २८ ॥ कक्षामूल-
प्रदर्शकः निर्धनत्वख्यापनायोर्ध्वबाहुः ॥ ३० ॥ किञ्च सर्वदेवतादि

न मेऽस्ति वित्तं न धनं न चान्यत्
श्राद्धोपयोग्यं स्वपितॄन् नतोऽस्मि ।
तृप्यन्तु भक्त्या पितरो मयैतौ
भुजौ कृतौ वर्त्मनि मारुतस्य ॥ २१ ॥

और्व उवाच ।

इत्येतत् पितृभिर्गीतं भावाभावप्रयोजनम् ।
यः करोति कृतं तेन श्राद्धं भवति पार्थिव ॥ २२ ॥



पञ्चदशोऽध्यायः ।

और्व उवाच ।

ब्राह्मणान् भोजयेत् श्राद्धे यद्गुणांस्तान् निबोध मे ।
त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित् ॥ १ ॥

रन् धनञ्च नास्ति । तत्तृप्त्यर्थं मया भक्त्या मारुतस्य वर्त्मनि वायौ क्षिप्तौ ॥ २१ ॥ भावाभावप्रयोजनं वित्तस्य भावेऽभावे च करणं पितृतृप्तिहेतुप्रयोजनम् ॥ २२ ॥

इति श्रुत्वा विशेषतः श्राद्धीयान् ब्राह्मणानपि । भोक्तॄः कर्तृंश्च नीतिं प्राह पञ्चदशे मुनिः ॥ अथ पार्थिवश्राद्धप्रयोगान् वक्ष्यन् र्थं श्राद्धीयान् ब्राह्मणानाह ब्राह्मणानिति त्रिभिः । यद्गुणान् गुणैर्युक्तान् ॥ त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णस्त्रिणाचिकेताः । तद्-व्रतो तद्व्रतस्नाता च त्रिणाचिकेता । अधुगाना इति सूत्राध्यायो ऽयम त्रिमधु । ब्राह्मणेषु इत्यादि ...माध्यायो मद्गत ...वर्णः । षट् अङ्गानि यस्य तं वेदमधीते वेत्ति वा षडङ्गवित् ॥ १ ॥

वेदवित् श्रोत्रियो योगी तथा वै ज्येष्ठसामगः ।
ऋत्विक्स्वस्रीयदौहित्रजामातृश्वशुरास्तथा ॥ २ ॥
मातुलोऽथ तपोनिष्ठः पञ्चाग्न्यभिरतस्तथा ।
शिष्याः सम्बन्धिनश्चैव मातापितृरतश्च यः ॥ ३ ॥
एतान् नियोजयेत् श्राद्धे पूर्वोक्तान् प्रथमं नृप ।
ब्राह्मणान् पितृप्रीत्यर्थमनुकल्पेष्वनन्तरान् ॥ ४ ॥
मित्रध्रुक् कुनखी क्लीबः श्यावदन्तस्तथा द्विजः ।
कन्यादूषयिता वह्निवेदोज्झः सोमविक्रयी ॥ ५ ॥
अभिशस्तस्तथा स्तेनः पिशुनो ग्रामयाजकः ।
भृतकाध्यापकस्तद्वत् भृतकाध्यापितश्च यः ॥ ६ ॥
परपूर्वापतिश्चैव मातापित्रोस्तथोज्झकः ।

वेदवित् वेदार्थविचारकः । श्रोत्रियः [illegible] योगी योगाभ्यासी । मूर्द्धनि [illegible] ज्येष्ठं नाम साम तद्गाता ज्येष्ठसामगः । [illegible] पञ्चाग्निः तत्राभिरतस्तदुपासकः । यद्वा वेदान्तोक्तपञ्चाग्निविद्योपासकः ॥ ३ ॥ एतेषु मुख्यानुकल्पभेदमाह एतानिति । एतान् प्रथमं पूर्वोक्तान् ज्येष्ठसामगान्तान् प्रथमं मुख्यकल्पे नियोजयेत् । अनन्तरान् ऋत्विगादीन् अनुकल्पे तु ॥ ४ ॥ एतेषामलाभे [illegible] निषिद्धानाह, मित्रध्रुगिति सार्द्धैस्त्रिभिः । कुनखी [illegible] । श्यावदन्तः कृष्णदन्तः [illegible] । अग्निवेदोज्झः [illegible] । [illegible] सोमं [illegible] विक्रीणीते स तथा ॥ ५ ॥ अभिशस्तः [illegible] । स्तेनश्चौरः । पिशुनः [illegible] । ग्रामयाजकः [illegible] । भृतकाध्यापकः [illegible] भृतकाध्यापितश्च ॥ ६ ॥ परपूर्वा [illegible] । मातापित्रोस्त्यागी [illegible]

वृषलीसूतिपोष्टा च वृषलीपतिरेव च ।
तथा देवलकश्चैव श्राद्धे नार्हन्ति केतनम् ॥ ७ ॥
प्रथमेऽह्नि बुधः शस्तान् श्रोत्रियादीन् निमन्त्रयेत् ।
कथयेच्च तदैवैषां नियोगान् पैत्रदैविकान् ॥ ८ ॥
ततः क्रोधव्यवायादीन् आयासञ्च द्विजैः सह ।
यजमानो न कुर्वीत दोषस्तत्र महानयम् ॥ ९ ॥
श्राद्धे नियुक्तो भुक्त्वा तु भोजयित्वा नियुज्य च ।
व्यवायी रेतसो गर्त्ते मज्जयत्यात्मनः पितॄन् ॥ १० ॥
तस्मात् प्रथममत्रोक्तं द्विजाग्र्याणां निमन्त्रणम् ।
अनिमन्त्र्य द्विजान् गेहम् आगतान् भोजयेद् यतीन् ॥ ११ ॥
पादशौचादिना गेहम् आगतान् पूजयेद् द्विजान् ।
पवित्रपाणिराचान्तान् आसनेषूपवेशयेत् ॥ १२ ॥
पितॄणामयुजो युग्मान् देवानामिच्छया द्विजान् ।
देवानामेकमेकं वा पितॄणाञ्च नियोजयेत् ॥ १३ ॥

अपि च। वृषलीसूतिपोष्टा शूद्रापत्यपोषकः। देवलश्च "देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम्। असौ देवलको नाम हव्यकव्येषु गर्हितः॥" इत्युक्तः। केतनं निमन्त्रणम् ॥ ७ ॥ इदानीं प्रयोगमाह प्रथमेऽह्नि पूर्वेद्युः। पैत्रदैविकान् एते पैत्र्या एते दैविका इति कथयेत्। यद्वा पितृदेवसम्बन्धिनः। श्राद्धाङ्गैः सोपचारैरिति नियोगान् ॥ ८ ॥ व्यवायिना च तथा कुर्वीत्याह तत्र इति ॥ ९ ॥ महान्तं दोषमाह, श्राद्ध इति। नियुक्तः पूर्वदिने भुक्त्वा च परदिने व्यवायी एवं कुर्वीत ॥ १० ॥ अनिमन्त्रितानपि यतीन् द्विजान् भोजयेत्। यतिष्वेव पूर्वोक्तदोषाभावादिति भावः ॥ ११ ॥ तांश्च यतीन् पादशौचादिना पूजयेत् ॥ १२ ॥ पितॄणामयुजो युग्मान् देवानां युग्मानिच्छया वा यथाशक्ति भोजयेत्। अथवैकाकं एकमेकं वा ॥ १३ ॥ तथा चेति पितृदेवा-

तथा मातामहश्राद्धं वैश्वदेवसमन्वितम्।
कुर्वीत भक्तिसम्पन्नस्तन्त्रं वा वैश्वदैविकम् ॥ १४ ॥
प्राङ्मुखान् भोजयेद् विप्रान् देवानामुभयात्मकान्।
पितृपैतामहानाञ्च भोजयेच्चाप्युदङ्मुखान् ॥ १५ ॥
पृथक् तयोः केचिदाहुः श्राद्धस्य करणं नृप!।
एकत्रैकेन पाकेन वदन्त्यन्ये महर्षयः ॥ १६ ॥
विष्टरार्थं कुशान् दत्त्वा संपूज्यार्घ्यं विधानतः।
कुर्य्यादावाहनं प्राज्ञो देवानां तदनुज्ञया ॥ १७ ॥
यवाम्बुना तु देवानां कुर्य्यादर्घ्यं विधानवित्
स्रग्गन्धधूपदीपांश्च दत्त्वा तेभ्यो यथाविधि ॥ १८ ॥
पितॄणामपसव्यं तत् सर्व्वमेवोपकल्पयेत्।
अनुज्ञाञ्च ततः प्राप्य दत्त्वा दर्भान् द्विधाकृतान् ॥ १९ ॥
मन्त्रपूर्वं पितॄणान्तु कुर्य्यादावाहनं बुधः।
तिलाम्बुना चापसव्यं दद्यादर्घ्यादिकं नृप! ॥ २० ॥
काले तत्रातिथिं प्राप्तमन्नकामं नृपाध्वगम्।
ब्राह्मणैरभ्यनुज्ञातः कामं तमपि पूजयेत् ॥ २१ ॥
योगिनो विविधै रूपैर्नराणामुपकारिणः।
भ्रमन्ति पृथिवीमेतामविज्ञातस्वरूपिणः ॥ २२ ॥

तन्त्रपक्षोऽप्येक एव वैश्वदेवविभागनिरपेक्षः । तन्त्रमन्त्रेऽपि श्राद्धद्वयानामन्व-
यं तु मातामहश्राद्धे वैश्वदेवेन युतम् अन्यथा च्छायां तौ पृथक्श्राद्धं वैश्वदेविकं ॥१४॥
उभयात्मकान् पितृमातामहश्राद्धदैवत्यान् पितृमातामहपूर्वानपि उदो-
दङ्मुखानिति शेषः । भोजयेत् भोजनार्थमुपवेशयेत् दक्षिणा ॥१५॥
तयोः पितृमातामहवर्गयोः ॥ १६ ॥ द्विधाकृतान् द्विगुणीकृतान् ।
द्विगुणत्वे त्वपसव्यं यत एव द्विगुणादयो ... आसनानि ॥१९॥
सदा ... ब्राह्मणैरनुज्ञातः ... योगिन इति ॥ २१ ॥ अविज्ञात

तस्मादभ्यर्चयेत् प्राप्तं श्राद्धे तत्रातिथिं बुधः ।
श्राद्धक्रियाफलं हन्ति नरेन्द्रापूजितोऽतिथिः ॥ २३ ॥
जुहुयाद् व्यञ्जनक्षारवर्जमन्नं ततोऽनले ।
अनुज्ञातो द्विजैस्तैस्तु त्रिःकृत्वः पुरुषर्षभ ! ॥ २४ ॥
अग्नये कव्यवाहाय स्वाहेत्यादौ नृपाहुतिः ।
सोमाय वै पितृमते दातव्या तदनन्तरम् ।
वैवस्वताय चैवान्या तृतीया दीयते ततः ॥ २५ ॥
हुतावशिष्टमल्पान्नं विप्रपात्रेषु निर्वपेत् ।
ततोऽन्नं मिष्टमत्यर्थमभीष्टमतिसंस्कृतम ॥ २६ ॥
दत्त्वा जुषध्वमिच्छातो वाच्यमेतदनिष्ठुरम् ।
भोक्तव्यं तैश्च तच्चित्तैर्मौनिभिः सुमुखैः सुखम ॥ २७ ॥
अक्रुध्यता चात्वरता देयं तेनापि भक्तितः ।
रक्षोघ्नमन्त्रपठनं भूमेरास्तरणं तिलैः ॥ २८ ॥
कृत्वा ध्येयाः स्वपितरस्त एव द्विजसत्तमाः ।
पिता पितामहश्चैव तथैव प्रपितामहः ।
मम तृप्तिं प्रयान्त्वद्य विप्रदेहेषु संस्थिताः ॥ २९ ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
मम तृप्तिं प्रयान्त्वद्य होमाप्यायितमूर्त्तयः ॥ ३० ॥

श्राद्धादि । आरं कुर्व्याद् मद्रूज्ञेम् ॥ २३ ॥ वैवस्वताय यमायेति
इष्टमाच्छादिः यावद्भिर्द्विजैर्भक्षिता ॥ २६ ॥ अक्रुध्यता च अत्वरता च भक्तितो
देयम् । अक्रुध्यतेति पाठे मम कार्य्यं सम्यक् कुर्वन्तु पूर्व्वमाचारः ॥ २८ ॥

पिता पितामहश्चैव तथैव प्रपितामहः ।
तृप्तिं प्रयान्तु पिण्डेन मया दत्तेन भूतले ॥ ३१ ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
तृप्तिं प्रयान्तु मे भक्त्या यन्मयैतदिहाकृतम् ॥ ३२ ॥

मातामहस्तृप्तिमुपैतु तस्य
पिता तथा तस्य पिता तथान्यः ।
विश्वे च देवाः परमां प्रयान्तु
तृप्तिं प्रणश्यन्तु च यातुधानाः ॥ ३३ ॥
यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्वे ॥ ३४ ॥

तृप्तेष्वेतेषु विकिरेदन्नं विप्रेषु भूतले ।
दद्यादाचमनार्थाय तेभ्यो वारि सकृत् सकृत् ॥ ३५ ॥
सुतृप्तैस्तैरनुज्ञातः सर्वेणान्नेन भूतले ।
सतिलेन ततः पिण्डान् सम्यग् दद्यात् समाहितः ॥ ३६ ॥
पितृतीर्थेन सलिलान् दद्यादथ जलाञ्जलीन् ।
मातामहेभ्यस्तेनैव पिण्डांस्तीर्थेन निर्वपेत् ॥ ३७ ॥
दक्षिणाग्रेष्वेव दर्भेषु नापपादयेत् ।
चक्रकादिषु बालेषु जन्तोरपि चैव हि ॥ ३८ ॥

अथ पित्रादितृप्तिं प्रार्थयन्नन्वयः । सर्वं च अन्नमादिश्यैवमेव पिण्डान् दद्यात् ॥ ३६ ॥ चाक्रेषु पर्वतीयेषु देवभूमः पितृणां प्रकृष्टा ॥ ३८ ॥ पितृभ्यो मातामहेभ्यश्च तु अपेक्षाविधा शुभाम् ।

दक्षिणाग्रेषु दर्भेषु पुष्पधूपादिपूजितम् ।
स्वपित्रे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ ॥ ३९ ॥
पितामहाय चैवान्यत् तत्पित्रे च तथापरम् ।
दर्भमूले लेपभुजः प्रीणयेल्लेपघर्षणैः ॥ ४० ॥
पिण्डैर्मातामहांस्तद्वद् गन्धमाल्यादिसंयुतैः ।
पूजयित्वा द्विजाग्र्याणां दद्याच्चाचमनं ततः ॥ ४१ ॥
पितृभ्यः प्रथमं भक्त्या तन्मनस्को नरेश्वर ! ।
सुस्वधेत्याशिषा युक्तां दद्याच्छक्त्या च दक्षिणाम् ॥ ४२ ॥
दत्त्वा च दक्षिणां तेभ्यो वाचयेद् वैश्वदेविकान् ।
प्रीयन्तामिति ये विश्वेदेवास्तेन इतीरयेत् ॥ ४३ ॥
तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तथाशिषः ।
पश्चाद् विसर्जयेद् देवान् पूर्वं पैत्रान् महामते ! ॥ ४४ ॥
मातामहानामप्येवं सह देवैः क्रमः स्मृतः ।
भोजने च स्वशक्त्या च दाने तद्वद् विसर्जने ॥ ४५ ॥
आपादशौचनात् पूर्वं कुर्याद् देवद्विजन्मसु ।
विसर्जनन्तु प्रथमं पैत्रमातामहेषु वै ॥ ४६ ॥
विसर्जयेत् प्रीतिवचःसम्मानाभ्यर्चितांस्ततः ।
निवर्त्तेताभ्यनुज्ञात आद्वारान्तादनुव्रजेत् ॥ ४७ ॥

प्रसादनीं प्रार्थनानन्तरं दक्षिणां दद्यादित्युक्तौ दक्षिणापि पितृपूर्व-मेवेति ॥ ४२ ॥ किञ्च पश्चाद् विसर्जयेदित्यनेन विसर्जनमपि पितृपूर्व-मित्युक्तोऽस्त्यत् सर्वं दैवपूर्वमेवासीदित्यत ॥ ४४ ॥ एवमेवाह वैश्वदेवतन्त्र-पक्षेऽप्याह, आपादेति । पादप्रक्षालनात् पूर्वं तु देवार्थानां ब्राह्मणानां सर्वं प्रथमं कुर्यात् । ततः पितृपक्षीयाणां ततो मातामहपक्षीयाणाम् इति । विसर्जनमिति दक्षिणाया उपलक्षणं पूर्वमेवोक्तत्वात् ॥ ४६ ॥

ततस्तु वैश्वदेवाख्यं कुर्यान्नित्यक्रियां बुधः ।
भुञ्जीयाच्च समं पूज्यभृत्यबन्धुभिरात्मनः ॥ ४८ ॥
एवं श्राद्धं बुधः कुर्यात् पैत्रं मातामहं तथा ।
श्राद्धैराप्यायिता दद्युः सर्वकामान् पितामहाः ॥ ४९ ॥
त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपस्तिलाः ।
रजतस्य तथा दानं कथासङ्कीर्तनादिकम् ॥ ५० ॥
वर्ज्यानि कुर्वता श्राद्धं कोपोऽध्वगमनं त्वरा ।
भोक्तुरप्यत्र राजेन्द्र ! त्रयमेतन्न शस्यते ॥ ५१ ॥
विश्वेदेवाः सपितरस्तथा मातामहा नृप ।
कुलञ्चाप्याययन्ति पुंसां सर्वे श्राद्धं प्रकुर्वताम् ॥ ५२ ॥
सोमाधारः पितृगणो योगाधारश्च चन्द्रमाः ।
श्राद्धे योगिनियोगस्तु तस्माद् भूपाल ! शस्यते ॥ ५३ ॥

पूज्यैर्मान्यैर्भृत्यैर्बन्धुभिश्च सह भुञ्जीत ॥ ४८ ॥ दौहित्रो दुहितुः सुतः । कुतपोऽष्टमो मुहूर्त्तः । दौहित्रमिति पाठे दौहित्रं छागविशेषः । "अमावास्यागते सोमे याश्च छागेति तोषणम् । दौहित्रो वा मता तस्मा एवं दौहित्रमुच्यते ।" इति । दौहित्रं खड्गपात्रमिति केचित् केचित्तु कुतपमपि छागलोमजं कम्बलमाहुः । रजतस्य कथासङ्कीर्तना-दिकञ्च पवित्रं राजतं रजताक्तं वा पित्र्यो दानमुच्यते । "रजतस्य तथा दानं दर्शनं नाम कीर्त्तनम्" इति मनुस्मृतावुक्तेः ॥ ५० ॥ विश्वेदेवादय आप्याययन्ति कुलञ्चाप्याययन्ति इति ॥ ५२ ॥ सोमाधारः पितृगणः अग्निष्वात्तादिः [illegible] सोमोपजीविनः तु । सोमाधारश्चन्द्रमाश्चापि योगबलेन पुनश्चन्द्रमा आप्याययति । तथाच श्रुतिः [illegible] योगिनां योगभेदाः । आप्या-यन्ति च पुनः सोमं योगबलेन वै । तथा वायुः "श्राद्धे योगाः सुप्र-योगं पितरो योगधारिणः । आप्याययन्ति [illegible] तर्पयन्ति तु" तस्मात् श्राद्धे योगिनियोगस्तु शस्यते ॥ ५३ ॥

सहस्रस्यापि विप्राणां योगी चेत् पुरतः स्थितः ।
सर्वान् भोक्तॄंस्तारयति यजमानं तथा नृप ॥ ५४ ॥

षोडशोऽध्यायः ।

और्व उवाच ।

हविष्यमत्स्यमांसैस्तु शशस्य शकुनस्य च ।
शौकरच्छागलैरैणैरौरवैर्गवयेन च ॥ १ ॥
औरभ्रगव्यैश्च तथा मासवृद्ध्या पितामहाः ।
प्रयान्ति तृप्तिं मांसैस्तु नित्यं वाध्रीणसामिषैः ॥ २ ॥
खड्गमांसमतीवात्र कालशाकं तथा मधु ।
शस्तानि कर्मण्यत्यन्ततृप्तिदानि नरेश्वर ॥ ३ ॥

तदाचारप्रसङ्गानुप्रसङ्गेनाथ षोडशे हव्यादि श्राद्धीयद्रव्याणि [illegible] । तत्र श्राद्धे [illegible] हविष्यमत्स्या-
दिभिः । शशकादीनां सर्वेषां मांसैश्च प्रत्येकमेकैकमासवृद्ध्या पितामहाः ।
पितरस्तृप्तिं प्राप्नुवन्तीति द्वयोरन्वयः । [illegible]
[illegible] मांसस्योपचारः । [illegible]
[illegible] । [illegible]
[illegible] । [illegible] पायसेन वा । [illegible]
[illegible] पायसेन च" इति स्मृतेः । [illegible]
[illegible] । वाध्रीणसमांसैस्तु नित्यं सर्वदा [illegible]
वाध्रीणसः [illegible] । यथा [illegible]
[illegible] । वाध्रीणसस्तु [illegible] ॥" इति
[illegible] । [illegible]

गयामुपेत्य यः श्राद्धं करोति पृथिवीपते ।
सफलं तस्य तज्जन्म जायते पितृतुष्टिदम् ॥ ४ ॥
प्रशान्तिकाः सनीवाराः श्यामाका द्विविधास्तथा ।
वन्यौषधीप्रधानास्तु श्राद्धार्हाः पुरुषर्षभ ॥ ५ ॥
यवाः प्रियङ्गवो मुद्गा गोधूमा व्रीहयस्तिलाः ।
निष्पावाः कोविदाराश्च सर्षपाश्चात्र शोभनाः ॥ ६ ॥
अकृताग्रयणं यच्च धान्यजातं नरेश्वर ।
राजमाषानणूंश्चैव मसूरांश्च विवर्जयेत् ॥ ७ ॥
अलाबुं गृञ्जनञ्चैव पलाण्डुं पिण्डमूलकम् ।
गान्धारककरम्भाणि लवणान्यौषराणि च ॥ ८ ॥

[illegible] ॥ ३ ॥ तज्जन्मपितृतुष्टिदं [illegible] जन्मनि [illegible] ॥ ४ ॥ प्रशान्तिका देवधान्यानि [illegible] इति केचित् । श्यामाका द्विविधाः [illegible] वन्यौषधीप्रधाना [illegible] ॥ ५ ॥ प्रियङ्गवः कङ्गवः, व्रीहयः शरत्-पक्वानि धान्यानि । निष्पावाः शिम्बयः । कोविदाराः [illegible] सर्षपाः शोभनाः ॥ ६ ॥ [illegible], अकृताग्रयण-[illegible] । [illegible] । राजमाषान् [illegible] ॥ ७ ॥ अलाबुं [illegible] पिण्ड-मूलकं [illegible] । [illegible] गान्धार-[illegible] । करम्भाणि [illegible] । औषराणि [illegible] ॥ ८ ॥ [illegible]

आरनालाश्चैव निर्य्यासाः प्रत्यक्षलवणानि च ।
वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते ॥ ९ ॥
नक्ताहृतं न चात्यष्टं तृप्यते न च यत्र गौः ।
दुर्गन्धि फेनिलञ्चाम्बु श्राद्धयोग्यं न पार्थिव ॥ १० ॥
क्षीरमेकशफानां यदौष्ट्रमाविकमेव च ।
मार्गञ्च माहिषञ्चैव वर्जयेत् श्राद्धकर्मणि ॥ ११ ॥
षण्ढापविद्धचाण्डालपापपाषण्डरोगिभिः ।
कृकवाकुश्वनग्नैश्च वानरग्रामशूकरैः ॥ १२ ॥
उदक्यासूतकाशौचिमृतहारैश्च वीक्षिते ।
श्राद्धे सुरा न पितरो भुञ्जते पुरुषर्षभ ॥ १३ ॥
तस्मात् परिश्रिते कुर्य्यात् श्राद्धं श्रद्धासमन्वितः ।
उर्व्यां च तिलविक्षेपाद् यातुधानान् निवारयेत् ॥ १४ ॥
न पूति नैवापन्नं केशकीटादिभिर्नृप ।

आरनालाः सुवीरकाः । प्रत्यक्षलवणानि पश्चाद्दत्तलवणानि यच्च किञ्चिदपि वाचा न शस्यते निन्द्यते इत्यर्थः ॥ ९ ॥ नक्ताहृतम् रात्रावाहृतम् गौर्यत्र न तृप्यते तदल्पमित्यर्थः ॥ १० ॥ एकशफा अश्वादयः । आविकं मेषीक्षीरम् । मार्गं मृगीक्षीरम् ॥ ११ ॥ षण्ढादिभिश्चाण्डालादिभिर्वीक्षिते श्राद्धे सुराः पितरश्च न भुञ्जते षण्ढो नपुंसकम् अपविद्धो मातापितृपरित्यक्तः । पाषण्डो वेदबाह्यलिङ्गधारी । रोगी महारोगी । कृकवाकुः कुक्कुटः । श्वा कुक्कुरः । नग्ना अविद्यमानाङ्गे वस्त्रावरणाः ॥ १२ ॥ उदक्या रजस्वला, सूतकं जननाशौचम् । आशौचं मरणनिमित्तं तद्युक्तः । मृतहारः शवनिर्हारकः ॥ १३ ॥ परिश्रिते वेष्टिते पिहिते ॥ १४ ॥ पूति दुर्गन्धि केशकीटादिभिरापन्नं दुष्टम् । अपर्युषितमिति पाठे पर्युषितमिश्रणैः । अभिषवैः सन्धानैः । ...

नचैवाभिषवैर्मिश्रमन्नं पर्य्युषितं तथा ॥ १५ ॥
श्रद्धासमन्वितैर्दत्तं पितृभ्यो नामगोत्रतः ।
यदाहारास्तु ते जातास्तदाहारत्वमेति तत् ॥ १६ ॥
श्रूयन्ते चापि पितृभिर्गीता गाथा महीपते ।
इक्ष्वाकोर्मनुपुत्रस्य कलापोपवने पुरा ॥ १७ ॥
अपि नस्ते भविष्यन्ति कुले सन्मार्गगामिनः ।
गयामुपेत्य ये पिण्डान् दास्यन्त्यस्माकमादरात् ॥ १८ ॥
अपि नः स्वकुले जायाद् यो नो दद्यात् त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च ॥ १९ ॥
गौरीं वाप्युद्वहेत् कन्यां नीलं वा वृषमुत्सृजेत् ।
यजेत वाश्वमेधेन विधिवद्दक्षिणावता ॥ २० ॥

चिरं पक्वं रात्र्यन्तरितम्, एतत् सर्वमपि पितॄनुद्दिश्य न दद्यादित्यर्थः ॥ १५ ॥ श्रद्धासमन्वितैः पितॄनुद्दिश्य यद् दत्तं तदेव ते पितरो यदाहारा यदाहारयोन्यां जातास्तदाहारतामुपैतीत्यर्थः ॥ १६ ॥ इक्ष्वाकोर्मनुपुत्रस्य सम्बन्धिनि कलापोपवने इत्थं चोदिक्ष्वाकुं प्रति पितृभिर्गीता ॥ १७ ॥ अपि दुर्लभमेतत् ॥ १८ ॥ वर्षासु भाद्रपदे कृष्णपक्षे मघायुक्तां त्रयोदशीं प्राप्य ॥ १९ ॥ गौरीमुद्वहेदेव । "अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत् कन्या अत ऊर्ध्वं रजस्वला ॥" इति स्मृतेः । नाप्युद्वहेत कौतुकात् । अप्युद्वहेत् इति वा पाठः । "गौरीं ददन्नाकपृष्ठं वैकुण्ठं याति रोहिणीम् । कन्यां ददद् ब्रह्मलोकं रौरवन्तु रजस्वलाम् ॥" इति संवर्तोक्तेः । नीललक्षणन्तु । "लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥" इति ॥ २० ॥

सप्तदशोऽध्यायः ।

पराशर उवाच ।

इत्याह भगवानौर्वः सगराय महात्मने ।
सदाचारान् पुरा सम्यक् मैत्रेय ! परिपृच्छते ॥ १ ॥

मयाप्येतदशेषेण कथितं भवतो द्विज ! ।
समुल्लङ्घ्य सदाचारं कश्चिन्नाप्नोति शोभनम् ॥ २ ॥

मैत्रेय उवाच ।

षण्ढापविद्धप्रमुखा विदिता भगवन् ! मया ।
उदक्याद्याश्च मे सर्वं नग्नमिच्छामि वेदितुम् ॥ ३ ॥

को नग्नः किं समाचारो नग्नसंज्ञां नरो लभेत् ।
नग्नस्वरूपमिच्छामि यथावद्गदितं त्वया ॥ ४ ॥

पराशर उवाच ।

ऋग्यजुःसामसंज्ञेयं त्रयी वर्णावृतिर्द्विज ! ।
एतामुज्झति यो मोहात् स नग्नः पातकी स्मृतः ॥ ५ ॥

त्रयी समस्तवर्णानां द्विजसंवरणं यतः ।
नग्नो भवत्युज्झितायाम् अतस्तस्यामसंशयम् ॥ ६ ॥

एवं सर्वभिरध्यायैराश्रमधर्माः प्रपञ्चिताः । व्यतिरेके त्वधर्मोऽपि इदं सेनेव निरूप्यते ॥ नग्न सप्तदशे देवैः स्तुतो विष्णुरजोजनत् । मायामोहं यतो नग्ना देवा नग्नाश्च जज्ञिरे ॥ १ ॥ वर्णानाम् आवृतिः परिधानम् ॥ ५ ॥ किञ्च यत एव संवरणमपि प्रावरणम् उत्तरीयमिति यावत् । अतस्तत्परित्यागे परिधानोत्तरीयहीन इव नग्नो भवतीत्यर्थः ॥ ६ ॥ एतदेव

इदञ्च श्रूयतामन्यद् भीष्माय सुमहात्मने।
कथयामास धर्मज्ञो वसिष्ठो मत्पितामहः ॥ ७ ॥
ममापि तस्य गदतः श्रुतमेतन्महात्मनः।
तत्त्वतस्त्वपि मैत्रेय ! यत् पृष्टोऽहमिह त्वया ॥ ८ ॥
देवासुरमभूद् युद्धं दिव्यमब्दं पुरा द्विज ! ।
तस्मिन् पराजिता देवा दैत्यैर्ह्रादपुरोगमैः ॥ ९ ॥
क्षीरोदस्योत्तरं कूलं गत्वाऽतप्यन्त वै तपः।
विष्णोराराधनार्थाय जगुश्चेमं स्तवं तदा ॥ १० ॥

देवा ऊचुः।

आराधनाय लोकानां विष्णोरीशस्य यां गिरम्।
वक्ष्यामो भगवानाद्यस्तया विष्णुः प्रसीदतु ॥ ११ ॥
यतः भूतान्यशेषाणि प्रसूतानि महात्मनः।
यस्मिंश्च लयमेष्यन्ति कस्तं संस्तोतुमीश्वरः ॥ १२ ॥
तथाप्यरातिविध्वंसध्वस्तवीर्या भयार्थिनः।
त्वां स्तोष्यामस्तवोक्तीनां याथार्थ्यं नैव गोचरे ॥ १३ ॥
त्वमुर्वी सलिलं वह्निर्वायुराकाशमेव च।

श्रूयतामन्यद्भीष्माय कथितं इदञ्चेति ॥ ७ ॥ देवासुरयोः वीहारो तस्मिन् सत ॥ ९ ॥ लोकानामीशस्य विष्णोः ॥ ११ ॥ प्रसूतानि जातानि। प्रसूतानीति पाठे सृष्टं गतानि ॥ १२ ॥ यद्यपि तव याथार्थ्यं तत्त्वम् उक्तीनां वचसां गोचरं विषयं नैव भवति तथापि अरातिकृतेन विध्वंसेन पराभवेन विध्वस्तं नाशितं वीर्यं प्रभावो येषां ते वयं भयात् भयार्थिनः भयनिवृत्त्यर्थिनः त्वामनुगतं स्तोष्यामः ॥ १३ ॥ तत्र प्रथमं विभक्तेन चतुर्थं स्तुवन्ति, त्वमुर्वीत्यादिना पञ्च

समस्तमन्तःकरणं प्रधानं तत्परः पुमान् ॥ १४ ॥
एकं तवैतद्भूतात्मन् । मूर्त्तामूर्त्तमयं वपुः
आब्रह्मस्तम्बपर्य्यन्तं स्थानकालविभेदवत् ॥ १५ ॥
तत्रेश ! तव यत् पूर्वं त्वन्नाभिकमलोद्भवम् ।
रूपं सर्गोपकाराय तस्मै ब्रह्मात्मने नमः ॥ १६ ॥
शक्रार्करुद्रवस्वश्विमरुत्सोमादिभेदवत् ।
वयमेव स्वरूपं यत् तस्मै देवात्मने नमः ॥ १७ ॥
दम्भप्रायमसम्बोधि तितिक्षादमवर्जितम् ।
यद्रूपं तव गोविन्द ! तस्मै दैत्यात्मने नमः ॥ १८ ॥
नातिज्ञानवहा यस्मिन् नाड्यस्तिमिततेजसि ।
शब्दादिलोभि यत् तस्मै तुभ्यं यक्षात्मने नमः ॥ १९ ॥
क्रौर्य्यमायामयं घोरं यच्च रूपं तवासितम् ।
निशाचरात्मने तस्मै नमस्ते पुरुषोत्तम ! ॥ २० ॥
स्वर्गस्थधर्मिसद्धर्मफलोपकरणं तव ।
धर्माख्यञ्च तथा रूपं नमस्तस्मै जनार्दन ! ॥ २१ ॥

सर्वात्मने नम इत्यन्वयः । समस्तं मनोबुद्ध्यहङ्कारचित्तात्मकमन्तःकरणम् । तस्मात् प्रकृतेः परः ॥ १४ ॥ स्थानं देशः, देशे काले च तत्तत्कर्म्मविभागाभेदयुक्तं विश्वं तवैवैतद् वपुरित्यन्वयः ॥ १५ ॥ तत्र तव रूपमध्ये प्रथमं सर्गस्य विश्वोपकाराय यत् तव रूपं तस्मै नमः ॥ १६ ॥ वयमेव तव यत् स्वरूपं तस्मै नमः ॥ १७ ॥ असम्बोधि विवेकशून्यम् ॥ १८ ॥ यस्मिन् यक्षरूपे नाड्य इन्द्रियमार्गाः ज्ञानवहा वा नातिज्ञानवहा नातिज्ञानवाहाः । नाड्यस्तिमितेति पाठे नाडीभिः स्तम्भिता । तत्र तेजस्स्तिमितमपि स्वच्छत्वे ॥ १९ ॥ असितं तमोमयम् ॥ २० ॥ स्वर्गस्थाः स्वर्गस्थिता ये धर्मिणः धर्मवन्तस्तेषां च सद्धर्मो यागादिस्तस्य यत् रूपं

हर्षप्रायमसंसर्गि गतिमद्गमनादिषु ।
सिद्धाख्यं तव यद्रूपं तस्मै सिद्धात्मने नमः ॥ २२ ॥
अतितिक्षाधनं क्रूरमुपभोगसहं हरे ।
द्विजिह्वं तव यद्रूपं तस्मै सर्पात्मने नमः ॥ २३ ॥
अवबोधि च यच्छान्तमदोषमपकल्मषम् ।
ऋषिरूपात्मने तस्मै विष्णो रूपाय ते नमः ॥ २४ ॥
भक्षयत्यथ कल्पान्ते भूतानि यदवारितम् ।
त्वद्रूपं पुण्डरीकाक्ष तस्मै कालात्मने नमः ॥ २५ ॥
संभक्ष्य सर्वभूतानि देवादीन्यविशेषतः ।
नृत्यत्यन्ते च यद्रूपं तस्मै रुद्रात्मने नमः ॥ २६ ॥
प्रवृत्त्या रजसो यच्च कर्मणां कारकात्मकम् ।
जनार्दन नमस्तस्मै त्वद्रूपाय नरात्मने ॥ २७ ॥
अष्टाविंशद्वधोपेतं यद्रूपं तामसं तव ।
उन्मार्गगामि सर्वात्मन् तस्मै पश्वात्मने नमः ॥ २८ ॥

[illegible] ॥ २१ ॥ गमनादिषु गमनीयादिषु असंसर्गिणी या संसर्गशून्या [illegible] सिद्धा हि [illegible] ॥ २२ ॥ [illegible] ॥ २३ ॥ [illegible] ॥ २४ ॥ [illegible] ॥ २५ ॥ [illegible] ॥ २६ ॥ [illegible] नमः ॥ २७ ॥ अष्टाविंशद्वधोपेतमिति [illegible] ॥ २८ ॥ [illegible]

यस्माद्भूतं यद्रूपं जगतः सिद्धिसाधनम्।
ब्रह्मादिभेदैर्यद्भेदि तस्मै मुख्यात्मने नमः ॥ २९ ॥
तिर्य्यङ्मनुष्यदेवादिव्योमशब्दादिकञ्च यत्।
रूपं तवादेः सर्वस्य तस्मै सर्वात्मने नमः ॥ ३० ॥
प्रधानबुद्ध्यादिमयादशेषात् यदन्यदस्मात् परमं परात्मन्।
रूपं तवाद्यं न यदन्यतुल्यं तस्मै नमः कारणकारणाय ॥ ३१ ॥
शुक्लादिदीर्घादिघनादिहीनम्
अगोचरे यस्य विशेषणानाम्।
शुद्धातिशुद्धं परमर्षिदृश्यं रूपाय
तस्मै भगवन्! नताः स्म ॥ ३२ ॥
यन्नः शरीरेषु यदन्यदेहे-
ष्वशेषवस्तुष्वजमव्ययं यत्।
यस्माच्च नान्यद् व्यतिरिक्तमस्ति
ब्रह्मस्वरूपाय नताः स्म तस्मै ॥ ३३ ॥
सकलमिदमजस्य यस्य रूपं
परमपदात्मवतः सनातनस्य।

ब्रह्मादिभेदैर्यद्भेदि भिन्नम्। ब्रह्मभेदीति पाठे, ब्रह्मगुणमयत्वेनाविर्भूत० तथात्वकृतमायात्मना ब्रह्म भेदि; मुख्यात्मने ब्रह्मात्मने ॥ २९ ॥ सर्वस्यादेः कारणस्य यद्रूपं तिर्यङ्मनुष्यदेवादीत्यन्वयः ॥ ३० ॥ इदानीं निर्गुणं ब्रह्म प्रणमति, प्रधानादिमयादस्माद् विश्वरूपादस्मात् परमं रूपम् अत एव यदन्यतुल्यं न भवति निरुपमं तस्मै नमः ॥ ३१ ॥ तदेवोक्तमेव द्वाभ्यां प्रणमति, शुक्लादीति त्रिभिः। शुक्लत्वादीनां विशेषणानां निषेधस्तु सर्वविशेषणनिषेधमाह, अगोचर इति ॥ ३२ ॥ परमपदात्मवतः परमं

तमनिधनमशेषबीजभूतं
प्रभुममलं प्रणताः स्म वासुदेवम् ॥ ३४ ॥

पराशर उवाच ।

स्तोत्रस्यास्यावसाने तु ददृशुः परमेश्वरम् ।
शङ्खचक्रगदापाणिं गरुडस्थं सुरा हरिम् ॥ ३५ ॥
तमूचुः सकला देवाः प्रणिपातपुरःसरम् ।
प्रसीद देव ! दैत्येभ्यस्त्राहीति शरणार्थिनः ॥ ३६ ॥
त्रैलोक्यं यज्ञभागाश्च दैत्यैर्ह्लादपुरोगमैः ।
हृतं नो ब्रह्मणोऽप्याज्ञामुल्लङ्घ्य परमेश्वर ! ॥ ३७ ॥
यद्यप्यशेषभूतस्य वयं ते च तवांशकाः ।
तथाप्यविद्याभेदेन भिन्नं पश्यामहे जगत् ॥ ३८ ॥
स्ववर्णधर्माभिरता वेदमार्गानुसारिणः ।
न शक्यास्तेऽरयो हन्तुमस्माभिस्तपसान्विताः ॥ ३९ ॥
तमुपायमशेषात्मन् ! अस्माकं दातुमर्हसि ।
येन तानसुरान् हन्तुं भवेम भगवन् ! क्षमाः ॥ ४० ॥

पराशर उवाच ।

इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः ।
समुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान् ॥ ४१ ॥

श्रीभगवानुवाच ।

मायामोहोऽयमखिलान् दैत्यांस्तान् मोहयिष्यति ।

---

३४ [illegible] ॥ ३४ ॥ [illegible]
[illegible] ॥ ३६ ॥ [illegible]

ततो बध्या भविष्यन्ति वेदमार्गबहिष्कृताः ॥ ४२ ॥
स्थितौ स्थितस्य मे बध्या यावन्तः परिपन्थिनः ।
ब्रह्मणो ह्येऽधिकारस्य देवदैत्यादिकाः सुराः ॥ ४३ ॥
तद् गच्छत न भीः कार्य्या मायामोहोऽयमग्रतः ।
गच्छन्नद्योपकाराय भविता भवतां सुराः ॥ ४४ ॥

परासर उवाच ।

इत्युक्ता प्रणिपत्यैनं ययुर्देवा यथागतम् ।
मायामोहोऽपि तैः सार्धं ययौ यत्र महासुराः ॥ ४५ ॥

अष्टादशोऽध्यायः ।

परासर उवाच ।

तपस्यभिरतान् सोऽथ मायामोहो महासुरान् ।
मैत्रेय ! ददृशे गत्वा नर्मदातीरसंश्रयान् ॥१॥
ततो दिगम्बरो मुण्डो बर्हिपत्रधरो द्विज ! ।
मायामोहोऽसुरान् श्लक्ष्णमिदं वचनमब्रवीत् ॥ २ ॥

स्थितस्य ममाधिकारस्य ये यावन्तः परिपन्थिनस्ते सर्वे मम बध्या इत्यर्थः ॥ ४३ ॥

रक्षोघ्नमिति श्रुता दैत्या मायामोहविमोहिताः । नग्नाः [illegible] दोषोऽस्मै [illegible] दुःखदा ॥ १ ॥ श्लक्ष्णं मनोहरम् ॥ २ ॥ हे ...

मायामोह उवाच ।

भो दैत्यपतयो ! ब्रूत यदर्थं तप्यते तपः ।
ऐहिकं वाथ पारत्रं तपसः फलमिच्छथ ॥ ३ ॥

असुरा ऊचुः ।

पारत्रफललाभाय तपश्चर्या महामते ! ।
अस्माभिरियमारब्धा किं वा तेऽत्र विवक्षितम् ॥ ४ ॥

मायामोह उवाच ।

कुरुध्वं मम वाक्यानि यदि मुक्तिमभीप्सथ ।
अर्हध्वं धर्ममेतञ्च मुक्तिद्वारमनुत्तमम् ॥ ५ ॥
धर्मो विमुक्तेरर्होऽयं नैतस्मादपरः परः ।
अत्रैवावस्थिताः स्वर्गं विमुक्तिं वा गमिष्यथ ।
अर्हध्वं धर्ममेतञ्च सर्वे यूयं महाबलाः ॥ ६ ॥

पराशर उवाच ।

एवंप्रकारैर्बहुभिर्युक्तिदर्शनबाधितैः ।
मायामोहेन दैत्यास्ते वेदमार्गादपाकृताः ॥ ७ ॥
धर्मायैतदधर्माय सदेतन्न सदित्यपि ।
विमुक्तये त्विदं नैतद् विमुक्तिं संप्रयच्छति ॥ ८ ॥
परमार्थोऽयमत्यर्थं परमार्थो न चाप्ययम् ।

ऐहिकमैहलौकिकं पारत्रं परलोकभोग्यम् ॥ ३ ॥ पर्यं धर्मरूपं वक्ष्यमाणम् । असंवृतमनावृतमिदम् ॥ ५ ॥ अर्हः योग्यः । एतस्मादपरो धर्मः न परो न श्रेष्ठः ॥ ६ ॥ एवंप्रकारैर्वाक्यैः, युक्तिदर्शनं प्रमाणप्रदर्शनं, तेन बाधितैः । वर्जितैरिति वा पाठः । अपाकृता दूरीकृताः ॥ ७ ॥ वेदमार्गापाकरणमेव प्रपञ्चयति, धर्मायेति ॥ ८ ॥

कार्यमेतदकार्यञ्च नैतदेवं स्फुटं त्विदम् ।
दिग्वाससामयं धर्मो धर्मोऽयं बहुवाससाम् ॥ ९ ॥
इत्यनेकान्तवादञ्च मायामोहेन नैकधा ।
तेन दर्शयता दैत्याः स्वधर्मं त्याजिता द्विज ! ॥ १० ॥
अर्हथैनं महाधर्मं मायामोहेन ते यतः ।
प्रोक्तास्तमाश्रिता धर्ममार्हतास्तेन तेऽभवन् ॥ ११ ॥
त्रयीधर्मसमुत्सर्गं मायामोहेन तेऽसुराः ।
कारितास्तन्मया ह्यासंस्तथान्ये तत्प्रबोधिताः ॥ १२ ॥
तैरप्यन्ये परे तैश्च तैरप्यन्ये परे च तैः ।
अल्पैरहोभिः सन्त्यक्ता तैर्दैत्यैः प्रायशस्त्रयी ॥ १३ ॥
पुनश्च रक्ताम्बरधृङ्मायामोहोऽजितेक्षणः ।
अन्यानाहासुरान् गत्वा मृद्वल्पमधुराक्षरम् ॥ १४ ॥

मायामोह उवाच ।

स्वर्गार्थं यदि वो वाञ्छा निर्वाणार्थमथासुराः ।
तदलं पशुघातादिदुष्टधर्मैर्निबोधत ॥ १५ ॥
विज्ञानमयमेवैतदशेषमवगच्छथ ।
बुध्यध्वं मे वचः सम्यग् बुधैरेवमुदीरितम् ॥ १६ ॥

अनेकान्तवादं व्यवस्थाव्यभिचारित्ववादं भेदाभेदवादं वा दर्शयता तेनैवं स्वधर्मान् त्याजिता इत्युपसंहारः ॥ १० ॥ आर्हतानां नाम-निर्वचनमाह अर्हथेति ॥ ११ ॥ सम्प्रदायप्रवर्त्तनमाह त्रयीति ॥ १२ ॥ आर्हतमतमुक्त्वा बौद्धमतमाह पुनश्चेति सप्तभिः । रक्ताम्बरेति तदाचार-प्रदर्शनम् ॥ १४ ॥ अत्र हि विज्ञानमयं बुद्धिमयमित्यादिना योगाचाराख्या-चारमतमाह ॥ १६ ॥ अनाधारमिति माध्यमिकमतमुपन्यस्यति-

जगदेतदनाधारं भ्रान्तिज्ञानार्थतत्परम्।
रागादिदुष्टमत्यर्थं भ्राम्यते भवसङ्कटे ॥ १७ ॥

पराशर उवाच।

एवं बुध्यत बुध्यध्वं बुध्यतैवमितीरयन्।
मायामोहः स दैतेयान् धर्ममत्याजयन्निजम् ॥ १८ ॥
नानाप्रकारवचनं स तेषां युक्तियोजितम्।
तथा तथा च तद्धर्मं तत्यजुस्ते यथा यथा ॥ १९ ॥
तेऽप्यन्येषां तथैवोचुरन्यैरन्ये तथोदिताः।
मैत्रेय तत्यजुर्धर्मं वेदस्मृत्युदितं परम् ॥ २० ॥
अन्यानप्यन्यपाषण्डप्रकारैर्बहुभिर्द्विज।
दैतेयान् मोहयामास मायामोहोऽतिमोहकृत् ॥ २१ ॥
स्वल्पेनैव हि कालेन मायामोहेन तेऽसुराः।
मोहितास्तत्यजुः सर्वां त्रयीमार्गाश्रितां कथाम् ॥ २२ ॥
केचिद्विनिन्दां वेदानां देवानामपरे द्विज।
यज्ञकर्मकलापस्य तथान्ये च द्विजन्मनाम् ॥ २३ ॥
नैतद्युक्तिसहं वाक्यं हिंसा धर्माय नेष्यते।
हवींष्यनलदग्धानि फलायेत्यर्भकोदितम् ॥ २४ ॥

दर्शयन्। भ्रान्तिज्ञानस्य तदर्थं तत्परं सविषयम् ॥ १७ ॥ एवं बुध्यतेत्यत्र पुनरुक्तिर्बोधनादरार्था ॥ १८ ॥ अन्यपाषण्डप्रकारैर्बौद्धविवसनभेदैः ॥ २१ ॥ त्रयीमार्गाश्रितां कथामपि तत्यजुः ॥ २२ ॥ न केवलमेतावत् किन्तु केचित् विनिन्दां वेदानामकुर्वन्। अत्र द्विज इति भेदः ॥ २३ ॥ 'अग्नीषोमीयं पशुमालभेत' इत्यादिवाक्यं न युक्तिसहं यतः "न हिंस्यात् सर्वा भूतानि" इति श्रुत्यैव तन्निषेधात् इति

यज्ञैरनेकैर्देवत्वमवाप्येन्द्रेण भुज्यते ।
शम्यादि यदि चेत् काष्ठं तद् वरं पत्रभुक् पशुः ॥ २५ ॥
निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन किन्नु तस्मान्न हन्यते ॥ २६ ॥
तृप्तये जायते पुंसो भुक्तमन्येन चेत् ततः ।
दद्यात् श्राद्धं श्रद्धयान्नं न वहेयुः प्रवासिनः ॥ २७ ॥
जनश्रद्धेयमित्येतदवगम्य ततो वचः ।
उपेक्ष्य श्रेयसे वाक्यं रोचतां यन्मयेरितम् ॥ २८ ॥
न ह्याप्तवादा नभसो निपतन्ति महासुराः
युक्तिमद् वचनं ग्राह्यं मयान्यैश्च भवद्विधैः ॥ २९ ॥
मायामोहेन ते दैत्याः प्रकारैर्बहुभिस्तथा
व्युत्थापिता यथा नैषां त्रयीं कश्चिदरोचयत् ॥ ३० ॥
इत्थमुन्मार्गयातेषु तेषु दैत्येषु तेऽमराः ।

[illegible] सुगमः ॥ २४ ॥ शम्यादिसमिद्रूपं काष्ठं यज्ञे हुतञ्चेत् इन्द्रेण भुज्यते तत् तर्हि वरं श्रेष्ठः पशुः यतोऽसौ काष्ठात् कोमल पत्रभुक् ॥ २५ ॥ यज्ञे हतस्य पशोः स्वर्गप्राप्तिश्चेत् तर्हि यजमानेन स्वर्गप्राप्तये स्वपिता किं न हन्यते ? ॥ २६ ॥ अन्येन श्राद्धे दत्तं भुक्तम् अन्नम् तृप्तये चेज्जायते तर्हि प्रवासिनोऽन्नं न वहेयुः किन्तु प्रवासिनः पुत्रादिकर्तृकेण श्राद्धं दद्यात् ॥ २७ ॥ ततो मे युक्तियुक्तं श्रेयस्कं वचनमश्रद्धेयमेतद्वेदवाक्यादिविषयं वचः, अतो युष्माकमुपेक्षणीयम् युक्तं ॥ २८ ॥ अस्मात्प्रवादे किं कारणम् उपेक्ष्या ? तत्राह, नहीति । नहि आप्तवादाः नभसः देवेन पतन्ति, किन्तु यदेव युक्तिमद्वचनं तन्मया अन्यैश्च भवद्विधैश्च ग्राह्यम् । युक्तिश्च पूर्वोक्तरीत्या वेदवादेषु नास्तीति भावः ॥ २९ ॥ तेषां मध्ये ॥ ३० ॥ मार्गभ्रष्टं परित्यक्त वामपथः

उद्योगं परमं कृत्वा युद्धाय समुपस्थिताः ॥ ३१ ॥
ततो देवासुरं युद्धं पुनरेवाभवद् द्विज ।
हताश्च तेऽसुरा देवैः सन्मार्गपरिपन्थिनः ॥ ३२ ॥
स्वधर्मकवचस्तेषामभूद् यः प्रथमं द्विज ।
तेन रक्षाभवत् पूर्वं नेशुर्नष्टे च तत्र ते ॥ ३३ ॥
ततो मैत्रेय ! तन्मार्गवर्त्तिनो येऽभवन् जनाः ।
नग्नास्ते तैर्यतस्त्यक्तं त्रयीसम्वरणं वृथा ॥ ३४ ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थस्तथाश्रमी ।
परिव्राड् वा चतुर्थोऽत्र पञ्चमो नोपपद्यते ॥ ३५ ॥
यस्तु सन्त्यज्य गार्हस्थ्यं वानप्रस्थो न जायते ।
परिव्राड् वापि मैत्रेय ! स नग्नः पापकृन्नरः ॥ ३६ ॥
नित्यानां कर्मणां विप्र ! तस्य हानिरहर्निशम् ।
अकुर्वन् विहितं कर्म शक्तः पतति तद्दिने ॥ ३७ ॥
प्रायश्चित्तेन महता शुद्धिं प्राप्नोत्यनापदि ।
पक्षं नित्यक्रियाहानेः कर्त्ता मैत्रेय ! मानवः ॥ ३८ ॥
संवत्सरं क्रियाहानिर्यस्य पुंसोऽभिजायते ।
तस्यावलोकनात् सूर्यो निरीक्ष्यः साधुभिः सदा ॥ ३९ ॥
स्पृष्टे स्नानं सचैलस्य शुद्धिहेतुर्महामते ! ।

परिव्राड् वा यो न भवति स च नग्नः ॥ ३६ ॥ [illegible] ... [illegible] । विहितं दिने पतति पापवान् भवति ॥ ३७ ॥ पक्षं [illegible] प्रायश्चित्तेन महता शुद्धिं प्राप्नोत्यवशः । एवं [illegible] ॥ ३८ ॥ तस्य संवत्सरक्रियालोपवतः ॥ ३९ ॥

पुंसो भवति तस्योक्ता न शुद्धिः पापकर्मणः ॥ ४० ॥
देवर्षिपितृभूतानि यस्य निःश्वस्य वेश्मनि ।
प्रयान्त्यनर्चितान्यत्र लोके तस्मान्न पापकृत् ॥ ४१ ॥
देवादिनिःश्वासहतं शरीरं यस्य वेश्म च ।
न तेन सङ्करं कुर्य्यात् गृहासनपरिच्छदैः ॥ ४२ ॥
सम्भाषणानुप्रश्नादि सहास्यांश्चैव कुर्वतः ।
जायते तुल्यता पुंसस्तेनैव द्विज ! वत्सरम् ॥ ४३ ॥
अथ भुङ्क्ते गृहे तस्य करोत्यास्यां तथासने ।
शेते चाप्येकशयने स सद्यस्तत्समो भवेत् ॥ ४४ ॥
देवतापितृभूतानि तथानभ्यर्च्य योऽतिथीन्
भुङ्क्ते स पातकं भुङ्क्ते निष्कृतिस्तस्य कीदृशी ॥ ४५ ॥
ब्राह्मणाद्याश्च ये वर्णाः स्वधर्मादन्यतोमुखम् ।
यान्ति ते नग्नसंज्ञास्तु हीनकर्मस्ववस्थिताः ॥ ४६ ॥
चतुर्णां यत्र वर्णानां मैत्रेयात्यन्तसङ्करः ।
तत्रास्था साधुवृत्तीनामुपघाताय जायते ॥ ४७ ॥
अनभ्यर्च्य ऋषीन् देवान् पितॄन् भूतातिथींस्तथा ।
यो भुङ्क्ते तस्य सम्भाषात् पतन्ति नरके नराः ॥ ४८ ॥

पाप पृथिव्याम् ॥ ४१ ॥ श्वासादिभिः सङ्करं स्पर्शम् ॥ ४२ ॥ सम्भा-
षणमेवम् स्थितम् । सहास्यमिति पाठे परस्पर सम्भाषादिसमान-
क्रियत्वं वत्सरं कुर्वतः तेन भव्येन तत्तुल्यत्वं जायते ॥ ४३ ॥ एतानि
भोजनादीनि युगपत् क्रियमाणानि सद्यःपातकेनैव दृष्टान्त इति ॥ ४४ ॥
ब्राह्मणाद्याः स्वधर्मादन्यतोमुखं विमुखं यान्ति ते वै नग्नसंज्ञाः यान्तो-
ऽन्यव ॥ ४६ ॥ सङ्करो वर्णादिषु व्यास्था स्थितिः ॥ ४७ ॥ अर्थ

तस्मादेतान् नरो नग्नांस्त्रयीसन्त्यागदूषितान् ।
सर्वदा वर्जयेत् प्राज्ञ आलापस्पर्शनादिषु ॥ ४९ ॥
श्रद्धावद्भिः कृतं यत्नाद् देवान् पितृपितामहान् ।
न प्रीणयति तच्छ्राद्धं यद्येभिरवलोकितम् ॥ ५० ॥
श्रूयते च पुरा ख्यातो राजा शतधनुर्भुवि ।
पत्नी च शैब्या तस्याभूदतिधर्मपरायणा ॥ ५१ ॥
पतिव्रता महाभागा सत्यशौचदयान्विता ।
सर्वलक्षणसम्पन्ना विनयेन नयेन च ॥ ५२ ॥
स तु राजा तया सार्द्धं देवदेवं जनार्दनम् ।
आराधयामास विभुं परमेण समाधिना ॥ ५३ ॥
होमैर्जपैस्तथा दानैरुपवासैश्च भक्तितः ।
पूजाभिश्चानुदिवसं तन्मना नान्यमानसः ॥ ५४ ॥
एकदा तु समं स्नातौ तौ तु भार्यापती जले ।
भागीरथ्याः समुत्तीर्णौ कार्त्तिक्यां समुपोषितौ ॥ ५५ ॥
पाषण्डिनमपश्येतामायान्तं सम्मुखं द्विज ।
चापाचार्यस्य तस्यासौ सखा राज्ञो महात्मनः ॥ ५६ ॥
अतस्तद्गौरवात् तेन सख्यालापमथाकरोत् ।
न तु सा वाग्यता देवी तस्य पत्नी पतिव्रता ॥ ५७ ॥
उपोषितास्मीति रविं तस्मिन् दृष्टे ददर्श च ॥ ५८ ॥
समागम्य यथान्यायं दम्पती तौ यथाविधि ।
विष्णोः पूजादिकं सर्वं कृतवन्तौ द्विजोत्तम ॥ ५९ ॥

[illegible] ॥ ५० ॥ [illegible]
[illegible] ॥ ५१ ॥ [illegible]
[illegible] ॥ ५६ ॥ [illegible]

कालेन गच्छता राजा ममारासौ सपत्नजित्।
अन्वारुरोह तं देवी चितास्थं भूपतिं पतिम्॥ ६०॥
स तु तेनापचारेण श्वा जज्ञे वसुधाधिपः।
उपोषितेन पाषण्डसम्भाषो यः कृतोऽभवत्॥ ६१॥
सापि जातिस्मरा जज्ञे काशीराजसुता शुभा।
सर्वविज्ञानसंपूर्णा सर्वलक्षणपूजिता॥ ६२॥
तां पिता दातुकामोऽभूत् वराय विनिवारितः।
तयैव तन्व्या विरता विवाहारम्भतो नृपः॥ ६३॥
ततः सा दिव्यया दृष्ट्या दृष्ट्वा श्वानं निजं पतिम्।
वैदिशाख्यं पुरं गत्वा तदवस्थं ददर्श तम्॥ ६४॥
तं दृष्ट्वैव महाभागं श्वानं भूतं पतिं तदा।
ददौ तस्मै वराहारं सत्कारप्रवणं शुभम्॥ ६५॥
भुञ्जन् दत्तं तया सोऽन्नमतिमिष्टमभीप्सितम्।
स्वजातिललितं कुर्वन् बहु चाटु चकार वै॥ ६६॥
अतीव व्रीडिता बाला कुर्वता चाटु तेन सा।
प्रणामपूर्वमाहेदं दयितं तं कुयोनिजम्॥ ६७॥

पत्न्युवाच।

स्मर्य्यतां तन्महाराज! दाक्षिण्यललितं त्वया।

अमर्गेण पापेन। तदेवाह, उपोषितेन राज्ञा पाषण्डसम्भाष आलापः॥ ६१॥ सर्वविज्ञानं विज्ञानमर्यादितज्ञानं तेन संपूर्णा स्वभावतः पूर्णा सर्वैर्लक्षणैः॥ ६२॥ तया च पितुरनुज्ञया तथा विनिवारितः सन्॥ ६३॥ दाक्षिण्यात् गुरोः सखेति सद्भावात् वर्त्तितं प्रीतिपूर्वकं यत् तां येन भवान् मम चाटुकारो जातः स्मर्यते। चाटुः प्रीति-

येन श्वयोनिमापन्नो मम चाटुकरो भवान्॥ ७८॥

पाषण्डिनं समाभाष्य तीर्थस्नानादनन्तरम्

प्राप्तोऽसि कुत्सितां योनिं किं न स्मरसि तत् प्रभो॥ ७९॥

पराशर उवाच।

तथैवं स्मारिते तस्य पूर्वजातिकृते तदा।

दध्यौ चिरमथावाप निर्वेदमतिदुर्लभम्॥ ८०॥

निर्विण्णचित्तः स ततो निर्गम्य नगरात् ततः।

मरुत्प्रपतनं कृत्वा शार्गालीं योनिमागतः॥ ८१॥

सापि द्वितीये संप्राप्ते वर्षे दिव्येन चक्षुषा।

ज्ञात्वा शृगालं तं द्रष्टुं ययौ कोलाहलं गिरिम्॥ ८२॥

तत्रापि दृष्ट्वा तं प्राह शार्गालीं योनिमागतम्।

भर्तारमतिचार्वङ्गी तनया पृथिवीपतेः॥ ८३॥

पत्न्युवाच।

अपि स्मरसि राजेन्द्र! श्वयोनिस्थस्य यन्मया।

प्रोक्तं ते पूर्वचरितं पाषण्डालापसंश्रयम्॥ ८४॥

पुनस्त्वयोक्तमत्र ज्ञात्वा सत्यं सत्यवतां वरः

कानने स निराहारस्तत्याज स्वं कलेवरम्॥ ८५॥

भूयस्ततो वृको जातो गत्वा तं निर्जने वने।

स्मारयामास भर्तारं पूर्ववृत्तमनिन्दिता॥ ८६॥

न त्वं वृको महाभाग! राजा शतधनुर्भवान्।

श्वा भूत्वा त्वं शृगालोऽभूर्वृकत्वं साम्प्रतं गतः॥ ८७॥

[illegible] ॥ ७८ ॥ मरुत्प्रपतनं [illegible] ॥ ८१ ॥ [illegible] ॥ ८५ ॥ [illegible] ॥ ८६ ॥ [illegible]

पराशर उवाच ।

स्मारितेन यदा त्यक्तस्तेनात्मा श्वभ्रतां गतः ।

श्ववाप सा पुनश्चैनं बोधयामास भाविनी ॥ ७८ ॥

नरेन्द्र ! श्लाघ्यतामात्मा ह्यलं ते श्वभ्रचेष्टया ।

पाषण्डालापजातोऽयं दोषो यद् श्वभ्रतां गतः ॥ ७९ ॥

ततः काकत्वमापन्नं समनन्तरजन्मनि ।

उवाच तन्वी भर्त्तारमुपलभ्यात्मयोगतः ॥ ८० ॥

अशेषा भूभृतः पूर्वं वश्या यस्मै बलिं ददुः ।

स त्वं काकत्वमापन्नो जातोऽद्य बलिभुक् प्रभो ! ॥ ८१ ॥

पराशर उवाच ।

एवमेव च काकत्वे स्मारितः स पुरातनम् ।

तत्याज भूपतिः प्राणान् मयूरत्वमवाप च ॥ ८२ ॥

मयूरं तं ततः सा वै चकारानुगतं शुभा ।

दत्तैः प्रतिक्षणं भक्ष्यैस्तस्य तज्जातिभोजनैः ॥ ८३ ॥

ततस्तु जनको राजा वाजिमेधं महाक्रतुम् ।

चकार तस्यावभृथे स्नापयामास तं तदा ॥ ८४ ॥

सस्नौ स्वयञ्च तन्वङ्गी स्मारयामास चापि तम् ।

यथासौ श्वशृगालाद्या योनीर्जग्राह पार्थिवः ॥ ८५ ॥

नः । एनं श्वभ्रम् अवाप बोधयामास च ॥ ७८ ॥ ज्ञात्वा राज्ञः [illegible] । [illegible] इति पाठे ज्ञात्वा श्वभ्रदेहः । [illegible] [illegible] ॥ ७९ ॥ उपलभ्य ज्ञात्वा प्राप्य च ॥ ८० ॥ [illegible] बलिभुक् ॥ ८१ ॥ तज्जातिभोजनैर्मयूरजातिभोजनैः ॥ ८३ ॥ ज्ञात्वा पति [illegible] [illegible] पतिव्रता

मृतश्चावभृथे सोऽथ तत्याज स्वं कलेवरम्।
जज्ञे च जनकस्यैव पुत्रोऽसौ सुमहात्मनः। ८६ ॥
ततः सा पितरं तन्वी विवाहार्थमचोदयत्।
स चापि कारयामास पिता तस्याः स्वयंवरम् ॥ ८७ ॥
स्वयंवरे कृते सा तं संप्राप्तं पतिमात्मनः।
वरयामास भूयोऽपि भर्तृभावेन भामिनी ॥ ८८ ॥
बुभुजे च तया सार्द्धं स भोगान् नृपनन्दनः।
पितर्युपरते राज्यं विदेहेषु चकार वै। ८९ ॥
इयाज यज्ञान् सुबहून् ददौ दानानि चार्थिनाम्।
पुत्रानुत्पादयामास युयुधे च सहारिभिः ॥ ९० ॥
राज्यं भुक्त्वा यथान्यायं पालयित्वा वसुन्धराम्।
तत्याज स प्रियान् प्राणान् संग्रामे धर्मतो नृपः। ९१ ॥
ततश्चितास्थं तं भूयो भर्त्तारं सा शुभेक्षणा।
अन्वारुरोह विधिवद् यथापूर्वं मुदा सती ॥ ९२ ॥
ततोऽवाप तया सार्द्धं राजपुत्र्या स पार्थिवः।
ऐन्द्रानतीत्य वै लोकान् लोकान् कामदुहोऽक्षयान्। ९३ ॥
स्वर्गाक्षयत्वमतुलं दाम्पत्यमतिदुर्लभम्।
प्राप्तं पुण्यफलं प्राप्य संशुद्धिं तां द्विजोत्तम!। ९४ ॥
एष पाषण्डसम्भाषदोषः प्रोक्तो मया द्विज!।
तथाश्वमेधावभृथस्नानमाहात्म्यमेव च। ९५ ॥

[illegible] पत्युः [illegible] तस्यापि [illegible] वरणे [illegible]-
[illegible] दोषाभावः सूचितः ॥८८॥ ऐन्द्रान् लोकान् अतीत्य काम-
दुघ कामदुघान् लोकान् प्राप ॥ ९३ ॥ ताम् [illegible]
[illegible] ॥ ९४ ॥ इहाग्नौ [illegible]-

तस्मात् पाषण्डिभिः पापैरालापस्पर्शनं त्यजेत्।
विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षितः॥ ९६॥
क्रियाहानिर्गृहे यस्य मासमेकं प्रजायते।
तस्यावलोकनात् सूर्य्यं पश्येत मतिमान् नरः॥ ९७॥
किं पुनर्यैस्तु संत्यक्ता त्रयी सर्वात्मना द्विज!।
परान्नभोजिभिः पापैर्वेदवादविरोधिभिः॥ ९८॥
पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्॥ ९९॥
दूरादपास्तः सम्पर्कः सहास्यापि च पापिभिः।
पाषण्डिभिर्दुराचारैस्तस्मात् तान् परिवर्जयेत्॥ १००॥
एते नग्नास्तवाख्याता दृष्ट्या श्राद्धोपघातकाः।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति॥ १०१॥

अन्वयेन पूर्वोक्तमेव प्रायश्चित्तमाह, क्रियाहानिरिति ॥ ९७ ॥ यैः त्रयी त्यक्ता तेषां दर्शनात् सूर्य्यं पश्येदिति किं पुनर्वाच्यं परान्नभोजिभिः पाषण्डान्नभोजिभि ॥ ९८ ॥ पाषण्डादयः सर्वे वेदबाह्या एव, यदाहुः। "अन्यः धर्मात् पाषण्डो विकर्मस्थो निषिद्धकृत्। यस्तु धर्मध्वजो नित्यं सुराध्वज इवोच्छ्रितः। प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम्। प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम्। व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः। सन्देहकृद्धेतुभिश्च सद्धर्मेषु च हैतुकः। अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च वकव्रतचरो द्विजः" इति। वाङ्मात्रेणापि नार्चयेत्। तैः सम्भाषणमपि न कुर्यात् ॥ ९९ ॥ यदा चैवं तदा पूर्वोक्तैः पापिभिः सह सम्पर्कः सहभोजनादिरूपो दूरापास्तो निषिद्धः, सहास्यापि निषिद्धा। किं बहुना सर्वात्मना तान् परिवर्जयेत् ॥ १०० ॥ नग्नपाषण्डिनोः पूर्वोक्तमनुवदन् उपसंहरति, एत इति द्वाभ्याम् ॥ १०१ ॥

एते पाषण्डिनः पापा न ह्येतानालपेद् बुधः ।
पुण्यं नश्यति सम्भाषादेतेषां तद्दिनोद्भवम् ॥ १०२ ॥

पुंसां जटाधरणमौण्ड्यवतां वृथैव
मोघाशिनामखिलशौचनिराकृतानाम् ।
तोयप्रदानपितृपिण्डबहिष्कृतानां
सम्भाषणादपि नरा नरकं प्रयान्ति ॥ १०३ ॥

सर्वेषां तेषां सामान्यदोषमाह पुण्यमिति । वृथैवेति विशेषणाद्दर्श-
शिरःप्रोक्तं देवपाद्युपनयनाद्यङ्गभूतजटाधारणाद्यनुमतम् अमोघाशिनां
देवतातिथ्यादिदत्त्वा विना स्वयंभोक्तृणाम् अखिलशौचेत्यादि नरकाचे-
निराकृतानां वर्जितानां तोयप्रदानादयो मायामात्रेण बहिष्कृतानां-
मिति । तदुक्तोऽपि स्तुतिः ... बहिष्कृतं सुरेतरान् । तपश्चिनताम्
देवे स्तुतो विष्णुरभूत्तस्य ॥ १०२ ॥

इति श्रीविष्णुपुराणटीकायां श्रीधरस्वामिकृतायां तृतीयेऽंशे
अष्टादशोऽध्यायः समाप्तः ।
समाप्तश्च तृतीयोऽंशः ।

चतुर्थोऽंशः ।

प्रथमोऽध्यायः ।

मैत्रेय उवाच ।

भगवन् ! यन्नरैः कार्यं साधुकर्मण्यवस्थितैः ।
तन्मह्यं गुरुणाख्यातं नित्यनैमित्तिकात्मकम् ॥ १ ॥
वर्णधर्मास्तथाख्याता धर्मा ये चाश्रमेषु वै ।
श्रोतुमिच्छाम्यहं वंशान् तांस्त्वं प्रब्रूहि मे गुरो ॥ २ ॥

पराशर उवाच ।

मैत्रेय ! श्रूयताम् अयमनेकयज्ववीरशूरभूपालालङ्कृतो ब्रह्मादिर्मानवो वंशः ।

तथा चोच्यते ।

ब्रह्माद्यं यो मनोर्वंशम् अहन्यहनि संस्मरेत् ।
तस्य वंशसमुच्छेदो न कदाचिद् भविष्यति ॥ ३ ॥

धर्मोपधर्मयोः पूर्वत्रांशेऽनुवर्णिते । मनुवंशश्चतुर्थेऽस्मिन् प्रसंगान्निरूप्यते ॥ तेनैतद्वंशं प्रणम्याकथयद् यत्र रैवतः । रेवतीं हलिने प्रादात् अद्भुतां तु कथान्तया ॥ उक्तानुवादपूर्वकं मनुवंशं पृच्छति, भगवन्निति । गुरुणा त्वया आख्यातम् ॥ १ ॥ वीर ... शूरः पराभिभावी, ब्रह्मा आदिर्मूलकारणं यस्य सः । मानवो वैवस्वतस्य मनोः सम्बन्धी । तत्र प्रथमं वंशश्रवणादिफलमाह । ब्रह्माद्यमिति ॥ ३ ॥ ब्रह्म पद्मजो ब्रह्मा प्राग् बभूव । किं विधिरेषः ?

तदस्य वंशानुपूर्वीमशेषपापापनोदनाय मैत्रेय श्रूयतां तद् यथा सकलजगतामनादिरादिभूत ऋग्यजुःसामादिमयो भगवद्विष्णुमयस्य ब्रह्मणो मूर्त्तिरूपं हिरण्यगर्भो ब्रह्माण्डतो भगवान् ब्रह्मा प्राग् बभूव ॥ ४ ॥

ब्रह्मणश्च दक्षिणाङ्गुष्ठजन्मा दक्षः प्रजापतिः दक्षस्याप्यदितिरदितेर्विवस्वान् विवस्वतो मनुर्मनोरिक्ष्वाकुनृगधृष्टशर्यातिनरिष्यन्तप्रांशुनाभागनेदिष्टकरूषपृषध्राख्याः पुत्रा बभूवुः ॥ ५ ॥

इष्टिं च मित्रावरुणयोर्मनुः पुत्रकामश्चकार ॥ ६ ॥

तत्रापहुते होतुरपचारादिला नाम कन्या बभूव ॥ ७ ॥

जगत आदिभूतं कारणं [illegible] भगवद्विष्णु-मयस्य भगवद्विष्णोर्मूर्तिः । मूर्तिरूपं परिच्छिन्नं रूपम् । हिरण्यस्य ब्रह्माण्डस्य गर्भरूपत्वात् ॥ ४ ॥

अत्र मन्त्रः 'अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव' इत्यनुसारेण इत्यादिश्रुतिप्रसिद्धां वंशानुपूर्वीमाह, ब्रह्मण इति । दक्षस्य अदितिः, कन्येति शेषः । नाभागनेदिष्टेति, नाभागस्य पिता नेदिष्ट इत्यर्थः । [illegible] इत्यपि [illegible] ॥ ५ ॥ इष्टिं च पुत्रार्थमनुपयोः [illegible] चकार यथाह 'वायुः अकरोत् पुत्रकामस्तु मनुरिष्टिं प्रजापतिः । [illegible] पुत्रकामेष्टि [illegible]' इति ॥ ६ ॥ [illegible] [illegible] होतुरपचारात् [illegible] [illegible] अभवत् । [illegible] इति पाठे [illegible] ॥ ७ ॥ [illegible]

मैत्रावरुणप्रसादात् सुद्युम्नो नाम मनोः पुत्रो मैत्रेयासीत्। पुनश्चेश्वरकोपात् स्त्री सती सा तु सोमसूनोर्बुधस्याश्रमसमीपे बभ्राम ॥ ८ ॥

सानुरागश्च तस्यां बुधः पुरूरवसमात्मजमुत्पादयामास ॥ ९ ॥

जाते च तस्मिन्नमिततेजोभिः परमर्षिभिरिष्टिमय ऋङ्मयो यजुर्मयः साममयोऽथर्वमयः सर्वमयो मनोमयो ज्ञानमयोऽकिञ्चिन्मयो भगवान् यज्ञपुरुषस्वरूपी सुद्युम्नस्य पुंस्त्वमभिलषद्भिर्यथावदिष्टः ॥ १० ॥

तत्प्रसादादिला पुनरपि सुद्युम्नोऽभवत् ॥ ११ ॥

तस्याप्युत्कलगयविनतसंज्ञास्त्रयः पुत्रा बभूवुः। सुद्युम्नस्तु स्त्रीपूर्वकत्वाद्राज्यभागं न लेभे ॥ १२ ॥

तत्पित्रा तु वसिष्ठवचनात् प्रतिष्ठानं नाम नगरं सुद्युम्नाय दत्तम्। तच्चासौ पुरूरवसे प्रादात्। पृषध्रस्तु गुरुगोवधात् शूद्रत्वमगमत् ॥ १३ ॥

रममाणः श्रीशिवः पार्वत्या सह ... योऽस्मिन् वने प्रवेक्ष्यति, स स्त्री भविष्यतीति। सुद्युम्नस्तु मृगयाप्रसङ्गात् तत्र प्रविष्टो योषिद् बभूव ॥ ८ ॥ तस्यां स्त्रियां पुरूरवसमुत्पादयामासेत्यतः सूर्यवंश एव चन्द्रवंशसमुद्भवः सूचितः ॥ ९ ॥

तस्मिंश्च जाते परमर्षिभिर्भगवान् यथावदिष्टः। व्यवहारेण इष्ट्यादिमयः वस्तुतस्त्वकिञ्चिन्मयः ॥ १० ॥ स्त्रीपूर्वकत्वात् पूर्वं स्त्रीत्वादित्यर्थः ॥ १२ ॥ पृषध्रस्यापि राज्यानर्हत्वं तत्कृतादाह, पृषध्रस्त्विति। वसिष्ठेन गोरक्षणे नियुक्तो रात्रौ व्रजे प्रविष्टं व्याघ्रं जिघांसुः प्रमादात् गां जघानेति गुरुगोवधः शूद्रत्वमापेत्यर्थः ॥ १३ ॥ अत्र पाठक्रमो न

करूषात् कारूषा महाबलाः क्षत्रिया बभूवुः ॥ १४ ॥

नाभागो नेदिष्टपुत्रस्तु वैश्यतामगमत् ॥ १५ ॥

तस्माद् भलन्दनः पुत्रोऽभवत्। भलन्दनाद् वत्सप्रिरुदारकीर्त्तिः, वत्सप्रेः प्रांशुरभवत् प्रजानिश्च प्रांशोरेकोऽभवत्, ततश्च खनित्रः, तस्माच्च क्षुपः, क्षुपाच्च अतिबलपराक्रमोऽविविंशोऽभवत्। ततो विविंशः, तस्माच्च खनीनेत्रः, ततश्चातिविभूतिः, अतिविभूतेर्भूरिबलपराक्रमः करन्धमः पुत्रोऽभवत्, तस्मादप्यविक्षित्, अविक्षितोऽप्यतिबलः पुत्रो मरुत्तोऽभवत् ॥ १६ ॥

यस्येमावद्यापि श्लोकौ गीयेते। —

मरुत्तस्य यथा यज्ञस्तथा कस्याभवद् भुवि।
सर्वं हिरण्मयं यस्य यज्ञवस्त्वतिशोभनम्॥
अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः।
मरुतः परिवेष्टारः सदस्याश्च दिवौकसः ॥ १७ ॥

[illegible] सुवर्णादि [illegible] आह, [illegible]
॥ १४ ॥ [illegible] नाभागो दिष्टपुत्रोऽन्यः
[illegible] इति पुराणे ॥ १५ ॥ [illegible]
[illegible]
[illegible] ॥ १६ ॥ [illegible]
[illegible] परिवेष्टारः [illegible] ॥ १७ ॥

मरुत्तश्चक्रवर्त्ती नरिष्यन्तनामानं पुत्रमवाप । तस्माच्च दमः, दमस्य पुत्त्रो राज्यवर्द्धनो जज्ञे । राज्यवर्द्धनात् सुवृद्धिरभूत् । ततश्च नरः तस्माच्च केवलः, केवलाद् बन्धुमान्, बन्धुमतो वेगवान्, वेगवतो बुधः, ततः तृणविन्दुः, तस्याप्येका कन्या इलविला नाम । तत्रालम्बुषा नाम वराप्सरा तृणविन्दुं भेजे । तस्यामस्य विशालो जज्ञे, यः पुरीं वैशालीं नाम निर्ममे । हेमचन्द्रश्च विशालस्य पुत्रोऽभवत् । तस्माच्च सुचन्द्रः, तत्तनयो धूम्राश्वः, तस्यापि सृञ्जयोऽभूत् सृञ्जयात् सहदेवः, ततः कृशाश्वो नाम पुत्रोऽभूत् सोमदत्तः कृशाश्वात् जज्ञे यो दशाश्वमेधानाजहार । तत्पुत्रश्च जनमेजयः, जनमेजयात् सुमतिः । एते वैशालका भूभृतः । १८ ॥

श्लोकोऽप्यत्र गीयते,—

तृणविन्दोः प्रसादेन सर्वे वैशालका नृपाः ।
दीर्घायुषो महात्मानो वीर्य्यवन्तोऽतिधार्मिकाः ॥ १९ ॥

शर्य्यातेः कन्या सुकन्या नामाभवत् । यामुपयेमे च्यवनः ।

आनर्त्तश्च नाम धार्म्मिकः शर्य्यातिपुत्रोऽभवत् । आनर्त्तस्यापि रेवतो नाम पुत्रो जज्ञे । योऽसावानर्त्तविषयं बुभुजे, पुरीञ्च कुशस्थलीमध्युवास । रेवतस्यापि रैवतः पुत्रः ककुद्मी नाम धर्म्मात्मा भ्रातृशतज्येष्ठोऽभवत् । तस्य च रेवती नाम कन्या । तामादाय कस्येयमर्हतीति भगवन्तमब्जयोनिं प्रष्टुं ब्रह्मलोकं जगाम । तावच्च ब्रह्मणोऽ-

[illegible]ल्लोके हाहाहूहूसंज्ञाभ्यां गन्धर्वाभ्यामतितानं नाम दिव्यं गान्धर्वमगीयत ॥ २० ॥

तावच्च त्रिमार्गपरिवर्त्तैरनेकयुगपरिवृत्ति तिष्ठन्नपि रैवतकः शृण्वन् मुहूर्त्तमिव मेने ॥ २१ ॥

गीतावसाने भगवन्तमब्जयोनिं प्रणम्य रैवतकः कन्यायोग्यं वरमपृच्छत् । ततश्चाह भगवान्, कथय, योऽभिमतस्ते वर इति । पुनश्च प्रणम्य भगवते यथाभिमतान् आत्मनः स वरान् कथयामास, क एषां भगवतोऽभिमतः, कस्मै कन्यामिमां प्रयच्छामीति । ततः किञ्चिदवनतशिराः सुस्मितो भगवानब्जयोनिराह ॥ २२ ॥

य एते भवतोऽभिमताः, नैतेषां साम्प्रतमपत्यापत्यसन्ततिरप्यवनीतलेऽस्ति । बहूनि हि तवात्रैव गान्धर्वं शृण्वतश्चतुर्युगान्यतीतानि । साम्प्रतं भूतलेऽष्टाविंशतितमस्य मनोश्चतुर्युगमतीतप्रायम्, आसन्नो हि तत्कलिः, अन्यस्मै कन्यारत्नमिदं भवतैकाकिना देयम् ॥ २३ ॥

भवतोऽपि मित्रमन्त्रिभृत्यकलत्रबन्धुबलकोशादयः [illegible]मस्ताः कालेनैतेनात्यन्तमतीताः ॥ २४ ॥

अतितानं गन्धर्वभेदः । दिव्यं दिवि भवं पृथिव्यां तदभावात् । गान्धर्वं गन्धर्वैर्गेयं गीतम् । गान्धर्वमिति पाठे गान्धर्वरागविशेषम् ॥ २० ॥ त्रयो मार्गाः [illegible] त्रिमार्गपरिवर्त्तैः [illegible] युगानां परिवृत्तिर्यथा भवति तथा अनेकयुगपरिवृत्ति तिष्ठन्नपि तत् शृण्वन् मुहूर्त्तमिव मेने रैवतकः । [illegible] गान्धर्वविशेषणम् ॥ २१ ॥ अवनतशिराः विनयेनावनतमुखः । [illegible] पाठे रैवतविशेषणम् ॥ २२ ॥ [illegible] चतुर्युगं [illegible] ॥ २३ ॥ [illegible]

पुनरप्युत्पन्नसाध्वसः स राजा भगवन्तं प्रणम्य पप्रच्छ, भगवन्! एवमवस्थिते ममेयं कन्या कस्मै देयेति। ततः स भगवान् किञ्चिदवनतकन्धरः कृताञ्जलिभूतं समस्तलोकगुरुरब्जयोनिराह ॥ २५ ॥

ब्रह्मोवाच।

न ह्यादिमध्यान्तमजस्य यस्य
विद्मो वयं सर्वगतस्य धातुः।
न च स्वरूपं न परं स्वभावं
न चैव सारं परमेश्वरस्य ॥ २६ ॥
कलामुहूर्त्तादिमयश्च कालो
न यद्विभूतेः परिणामहेतुः।
अजन्मनाशस्य समस्तमूर्त्ते-
रनामरूपस्य सनातनस्य ॥ २७ ॥
यस्य प्रसादादहमच्युतस्य
भूतः प्रजासृष्टिकरोऽन्तकारी।

भवत इति ॥ २४ ॥ कन्याया वराभावादुत्पन्नसाध्वसः ॥ २५ ॥ पूर्वं विनिर्दिष्टेभ्योऽन्येभ्योऽप्यवनेः वरः क्वेति वदन् सर्वेश्वराय कन्या देयेत्याह, न ह्यादिमध्यान्तमिति द्वाभ्याम्। पूर्वकालज्ञाना च विष्णु-विभूतिं नावेवावतीर्णे दृष्टमेवान्यत्। आदिमध्यान्त्यज्ञानपेक्षः रहितया सर्वगतस्य स्वरूपं तत्त्वं परं स्वभावम् असाधारणं धर्मं सारम् ॥ २६ ॥ यस्य विभूतेरवतारूपायाः परिणामस्य वृद्ध्यादिविकारस्य हेतुर्न चेतः। तत्र हेतुः अजन्मेति ॥ २७ ॥ यस्याच्युतस्य प्रसादा-

क्रोधाच्च रुद्रः स्थितिहेतुभूतो
यस्माच्च मध्ये पुरुषः परस्मात् ॥ २८ ॥
मद्रूपमास्थाय सृजत्यजो यः
स्थितौ च योऽसौ पुरुषस्वरूपी ।
रुद्रस्वरूपेण च योऽत्ति विश्वं
धत्ते तथानन्तवपुः समस्तम् ॥ २९ ॥
शक्रादिरूपी परिपाति विश्वम्
अर्कन्दुरूपश्च तमो हिनस्ति ।
पाकाय योऽग्नित्वमुपेत्य लोकान्
बिभर्त्ति पृथ्वीवपुरव्ययात्मा ॥ ३० ॥
चेष्टां करोति श्वसनस्वरूपी
लोकस्य तृप्तिञ्च जलान्नरूपी ।
ददाति विश्वस्थितिसंस्थितन्तु
सर्वावकाशञ्च नभःस्वरूपी ॥ ३१ ॥
यः सृज्यते सर्गकृदात्मनैव
यः पाल्यते पालयिता च देवः ।

[illegible] भूतः । क्रोधात्तामसात् रुद्रः, मध्ये च [illegible] भूतः ॥ २८ ॥

[illegible] सृजति [illegible] ॥ २९ ॥ [illegible] ॥ ३० ॥ [illegible]

विश्वात्मनः संक्षिपतेऽस्तकारी
पृथक् न यस्यास्ति च योऽन्यथात्मा ॥ ३२ ॥
यस्मिन् जगद्‍ यो जगदेतदाद्यो
यश्चाश्रितोऽस्मिन् जगति स्वयम्भूः।
स सर्वभूतप्रभवो धरित्र्यां
स्वांशेन विष्णुर्नृपते! ऽवतीर्णः ॥ ३३ ॥
कुशस्थली या तव भूप! रम्या
पुरी पुराभूदमरावतीव।
सा द्वारका संप्रति तत्र चास्ते
स केशवांशो बलदेवनामा ॥ ३४ ॥
तस्मै त्वमेनां तनयां नरेन्द्र!
प्रयच्छ मायामनुजाय जायाम्।
श्लाघ्यो वरोऽसौ तनया तवेयम्
स्त्रीरत्नभूता सदृशो हि योगः ॥ ३५ ॥

पराशर उवाच।

इतीरितोऽसौ कमलोद्भवेन
भुवं समासाद्य पतिः प्रजानाम्।
ददर्श ह्रस्वान् पुरुषानशेषान्
अल्पौजसः स्वल्पविवेकवीर्यान् ॥ ३६ ॥

अथवा च यः पृथक् सुवृधिद्रवः। पृथक् न यस्येति पाठे यस्मात् पृथगन्यो नास्तीत्यर्थः ॥ ३२ ॥ यस्मिन् जगत्स्थापितः एतद् व्याप्य स्थितः। "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः ॥ ३३ ॥ अल्पौजसोऽल्पसामर्थ्यान्

कुशस्थलीं ताञ्च पुरीमुपेत्य
दृष्ट्वान्यरूपां प्रददौ स्वकन्याम् ।
सीरध्वजाय स्फटिकाचलाभ-
वक्षःस्थलायातुलधीर्नरेन्द्रः ॥ ३७ ॥
उच्चप्रमाणामिति तामवेक्ष्य
स्वलाङ्गलाग्रेण स तालकेतुः ।
विनामयामास ततश्च सापि
बभूव सद्यो वनिता यथान्या ॥ ३८ ॥
तां रेवतीं रैवतभूपकन्यां
सीरायुधोऽसौ विधिनोपयेमे ।
दत्त्वा च कन्यां स नृपो जगाम
हिमाचलं वै तपसे धृतात्मा ॥ ३९ ॥

॥ ३६ ॥ [illegible] ॥ ३७ ॥

द्वितीयोऽध्यायः ।

पराशर उवाच ।

यावच्च ब्रह्मलोकात् ककुद्मी रैवतो नाभ्येति, तावत् पुण्यजनसंज्ञा राक्षसाः ताम् अस्य पुरीं कुशस्थलीं जघ्नुः ॥१॥

तावच्चास्य भ्रातृशतं पुण्यजनत्रासात् दिशो भेजे । तदन्वयाश्च क्षत्रियाः सर्वदिक्षु अभवन् । धृष्टस्यापि धार्ष्टकं क्षत्रं समभवत । नभागस्यात्मजो नाभागः तस्याम्बरीषः अम्बरीषस्यापि विरूपोऽभवत् । विरूपात् पृषदश्वो जज्ञे । ततश्च रथीतरः तत्रायं श्लोकः ।

एते क्षत्रप्रसूता वै पुनश्चाङ्गिरसः स्मृताः ।
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ २ ॥

क्षुवतश्च मनोरिक्ष्वाकुर्घ्राणतः पुत्रो जज्ञे । तस्य पुत्रशतप्रवरा विकुक्षिनिमिदण्डाख्यास्त्रयः पुत्राः शकुनिप्रमुखाः पञ्चाशत् पुत्राः उत्तरापथरक्षितारो बभूवुः । चत्वारिंशदष्टौ च दक्षिणापथभूपालाः ॥ ३ ॥

धृष्टादिमनुपुत्राणां वंशानुक्रमानाह । द्वितीये ततःप्रसङ्गेन सोमवंशस्य संक्रमात् ॥ रैवतस्य भ्रातृशतमध्ये किलावन् कोऽपि राजा नाभवदित्याशङ्क्याह, यावच्चेति । पुण्यजनसंज्ञा इति विशेषणं शौर्यातिशयं राक्षसजातिविशेषपरं वा ॥ १ ॥ एते क्षत्रप्रसूता इति । एते रथीतरस्य प्रवरा गोत्रजाः क्षत्रप्रसूताः क्षत्रिया क्षत्रजस्य रथीतरस्य भार्यायामङ्गिरसा जातत्वात् । तथापि तयोर्योगात् पुनराङ्गिरसो ब्राह्मणाः स्मृताः, अतः क्षत्रोपेता द्विजातयः इत्यर्थः ॥ २ ॥ इक्ष्वाकुनामनिर्वचनमभिप्रेत्य तस्य जन्माह । क्षुवतः क्षुतं कुर्वत मनोर्घ्राणतः । पुत्रशतश्रेष्ठाधिपपुत्रशतस्य प्रवराः ॥ ३ ॥ विकुक्षेरेव

स च इक्ष्वाकुरष्टकायाम् उत्पाद्य श्राद्धार्हमांसमानयेति विकुक्षिमाज्ञापयामास ॥ ५ ॥

स तथेति गृहीताज्ञो वनमभ्येत्यानेकान् मृगान् हत्वा अतिश्रान्तोऽतिक्षुत्परीतो विकुक्षिरेकं शशमभक्षयत् शेषञ्च मांसमानीय पित्रे निवेदयामास । इक्ष्वाकुश्चापि इक्ष्वाकुकुलाचार्य्यस्तत् प्रोक्षणाय वशिष्ठः प्रचोदितः प्राह, अलमनेनामेध्येनामिषेण। दुरात्मनानेन ते पुत्रेण एतन्मांसमुपहतं, यतोऽनेन शशको भक्षितः। ततश्चासौ विकुक्षिः गुरुणैवमुक्तः शशादसंज्ञामवाप, पित्रापि च परित्यक्तः। पितर्य्युपरते चाखिलामेतां पृथ्वीं धर्मतः शशास। शशादस्य च पुरञ्जयो नाम पुत्रोऽभवत् ॥ ६ ॥

इदञ्चान्यत्, पुरा हि त्रेतायां देवासुरमतीव भीषणं युद्धमासीत्। तत्र चातिबलिभिरसुरैरमराः पराजिताः, भगवन्तं विष्णुमाराधयाञ्चक्रुः। प्रसन्नश्च देवानामनादिनिधनः सकलजगत्परायणो नारायणः प्राह, ज्ञातमेव मया युष्माभिर्यदभिलषितं, तदर्थमिदं श्रूयताम्। ८ ॥

शशादसंज्ञां शशभक्षणात्, न त्वन्येन। अनुपाख्य त्रियादिवं विना सर्वं शशान् धर्मेणार्थः ॥ ५ ॥ एवं शशादोऽपि मित्र पुरञ्जयः शशाद-संज्ञामवापेत्यन्वयः ॥ ६ ॥

उत्पन्न एव ककुत्स्थसंज्ञामवापेति वक्तुमितिहासमाह, इदञ्चे-त्यादिना संज्ञावापेत्यन्वयेन । इदञ्चान्यत् तत्र नामेति शेषः ॥ ७ ॥ ज्ञातमेव मदीयं परं श्रेयस् अवश्यमाश्वतो यच नारायणस्य सर्वा-भीष्टिमात् यदर्थं युष्माकं ॥ ८ ॥ पार्थिवं सविस्तरं वाच्यं । अपरं

परञ्जयो हि नाम शशादस्य च राजर्षेस्तनयः क्षत्रियवर्य्यः। तच्छरीरेऽहमंशेन स्वयमेवावतीर्य्य तान् अशेषान् असुरान् निहनिष्यामि, तद् भवद्भिः परञ्जयोऽसुरवधार्थाय इह कार्य्योद्योगः कार्य्य इति। एतत् श्रुत्वा प्रणम्य भगवन्तं विष्णुममराः परञ्जय सकाशमाजग्मुः॥ ९॥

ऊचुश्चैनं, भो भोः क्षत्रियवर्य्य! अस्माभिरभ्यर्थितेन भवता अस्माकमरातिवधोद्यतानां साहायकं कृतमिच्छामः॥१०॥

तद् भवता अस्माकमभ्यागतानां प्रणयभङ्गो न कार्य्यः। इत्युक्तः परञ्जयः प्राह, सकलत्रैलोक्यनाथो योऽयं युष्माकमिन्द्रः शतक्रतुः, अस्य यद्यहं स्कन्धमारूढो युष्मदरातिभिः सह योत्स्ये, तदाहं भवतां सहायः। इत्याकर्ण्य समस्तदेवैरिन्द्रेण च बाढमित्येवमन्वोपमितम्॥ ११॥

ततश्च शतक्रतोर्वृषरूपधारिणः ककुत्स्थो हर्षसमन्वितो भगवतश्चराचरगुरोरच्युतस्य तेजसाप्यायितो देवासुरसंग्रामे समस्तानेव असुरान् निजघान। यतश्च वृषभककुत्स्थेन राज्ञा निसूदितमसुरबलं, ततश्चासौ ककुत्स्थसंज्ञामवाप॥ १२॥

ककुत्स्थस्याप्यनेनाः पुत्रोऽभूत्। अनेनसः पृथुः, पृथोर्विष्टराश्वः, तस्य चान्द्रोऽभूत्, चान्द्रस्य युवनाश्वः, तस्य

विधेयः कर्त्तव्यो युद्धारम्भो येन परञ्जयेन स तथाविधः कार्य्यः श्रम इः॥ ९॥ साहायकं साहाय्यम्॥ १०॥ बाढं तथेत्यन्वोपमितम् अनुमतमित्यर्थः॥ ११॥ निसूदितं दग्धाः॥ १२॥ अध्य-

श्रावस्तः, यः श्रावस्तीं पुरीं निवेशयामास। श्रावस्तस्य बृहदश्वस्यापि कुवलयाश्वः योऽसावुदकस्य महर्षेरपकारिणं धुन्धुनामानमसुरं वैष्णवेन तेजसाप्यायितः पुत्रसहस्रै-रेकविंशतिभिः परिवृतो जघान, धुन्धुमारसंज्ञामवाप। तस्य च समस्ता एव पुत्रा धुन्धुमुखनिःश्वासाग्निना विप्लुष्टा विनेशुः ॥ १२ ॥

दृढाश्वचन्द्राश्वकपिलाश्वास्त्रयः केवलमवशेषिताः। दृढाश्वाद्धर्यश्वः, तस्मान्निकुम्भः, निकुम्भात् संहताश्वः, ततश्च कृशाश्वः, तस्मात् प्रसेनजित्, ततो युवनाश्वोऽभवत्। तस्य चापुत्रस्यातिनिर्वेदात् मुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनाय इष्टिः कृता। तस्यां च मध्यरात्रे निवृत्तायां मन्त्रपूतजलपूर्णकलसं वेदिमध्ये निवेश्य ते मुनयः सुषुपुः ॥ १३ ॥

तेषु च सुप्तेषु अतीव तृट्परीतः स भूपालस्तमाश्रमं विवेश, सुप्तांश्च तानृषीन् नैवोत्थापयामास ॥ १४ ॥

तच्च कलसमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ। प्रबुद्धाश्च ऋषयः पप्रच्छुः, केनैतन्मन्त्रपूतं वारि पीतम्? अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति। इत्याकर्ण्य स राजा अजानता मया पीतमित्याह ॥ १५ ॥

गर्भश्च युवनाश्वोदरेऽभवत्। क्रमेण च ववृधे। प्राप-

रात्रे निवृत्तायां समाप्तायाम् ॥ १३ ॥ सुप्तांश्च नोत्थापयामास, यतस्तान्

समयश्च दक्षिणं कुक्षिमवनीपतेर्निर्भिद्य निश्चक्राम, न चासौ राजा ममार ॥ १६ ॥

जातो नामैष कं धास्यतीति ते मुनयः प्रोचुः ॥ १७ ॥

अथागम्य देवराडब्रवीत्, मामयं धास्यतीति । ततो मान्धाता नामतोऽभवत् । वक्त्रे चास्य प्रदेशिनी देवराजेन न्यस्ता, तां पपौ । ताञ्चामृतस्राविणीमास्वाद्य पीत्वा चाह्नैव व्यवर्धत । स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे । भवति चात्र श्लोकः ।

यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्वं तद् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥ १८ ॥

मान्धाता च शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे, पुरुकुत्सम् अम्बरीषं मुचुकुन्दञ्च तस्यामपत्यत्रयमुत्पादयामास । पञ्चाशच्च दुहितरस्तस्य नृपतेर्बभूवुः ।

तस्मिन्नेव च सौभरिर्नाम ऋषिरन्तर्जले द्वादशाब्दं कालमुवास ॥ १९ ॥

तत्र चान्तर्जले सम्मदो नामातिबहुप्रजोऽतिप्रमाणो मीनाधिपतिरासीत् । तस्य पुत्रपौत्रदौहित्राः पार्श्वतः पृष्ठतोऽग्रतो वक्षःपुच्छशिरसाञ्चोपरि भ्रमन्तस्तेनैव सहाहर्निशमतिनिर्वृता रेमिरे । स चापि तत्स्पर्शोपचीय-

---

॥ १५ ॥ मुनीनां प्रभावादेव न ममार ॥ १६ ॥ कं धास्यति ? पातु-स्तनाभावात् ॥ १७ ॥ यावदिति । चक्रस्थे मेरोः सर्वतः सूर्यस्य उदयास्तमनोपलक्षितं सर्वं मान्धातुः क्षेत्रमधिष्ठेयम् उच्यते ॥ १८ ॥ मान्धातुः पञ्चाशत्कन्यानां सम्प्रदानाय वक्तव्यत्वात् प्रथमं वक्ष्यं सौभरिचरितमुच्यते, तस्मिन्नित्यादिना । द्वादशाब्दकं कालं व्याप्य ॥ १९ ॥ उषितं कौतुका-

आमहर्षप्रकर्षो बहुप्रकारं तस्यर्षेः पश्यतः तैरात्मज-पौत्रदौहित्रादिभिः सहानुदिवसं बहुप्रकारं रेमे। अथा-न्तर्जलावस्थितः स सौभरिरेकाग्रतासमाधानमपहायानु-दिनं तत् तस्य मत्स्यस्यात्मजपौत्रदौहित्रादिभिः सहाति-रमणीयं ललितमवेक्ष्याचिन्तयत्॥ २०॥

अहो! धन्योऽयम् ईदृशमपि अनभिमतं योन्यन्तर-मवाप्य एभिरात्मजपौत्रादिभिः सह रममाणोऽतीवास्माक-मस्पृहामुत्पादयति, वयमप्येवं पुत्रादिभिः सह रमिष्यामः। इत्येवमभिसमीक्ष्य स तस्मादन्तर्जलाद्विनिष्क्रम्य निवेष्टुकामः कन्यार्थं मान्धातारं राजानमगच्छत्॥ २१॥

अथागमनश्रवणसमनन्तरं चोत्थाय तेन राज्ञा सम्यग-र्घ्यादिना पूजितः कृतासनपरिग्रहः सौभरिरुवाच।

निवेष्टुकामोऽस्मि नरेन्द्र! कन्यां
प्रयच्छ मे मा प्रणयं विभाङ्क्षीः।
न ह्यर्थिनः कार्यवशाभ्युपेताः
ककुत्स्थगोत्रे विमुखाः प्रयान्ति॥ २२॥
अन्येऽपि सन्त्येव नृपाः पृथिव्यां
मान्धातः! येषां तनयाः प्रसूताः।
किन्त्वर्थिनामर्थितदानदीक्षा-
कृतव्रतं श्लाघ्यमिदं कुलं ते॥ २३॥

द्रष्टुम्॥ २०॥ निवेष्टुकामः परिणेतुकामः। मा प्रणयं विभाङ्क्षीः प्रणय-भङ्गं मा कार्षीः॥ २२॥ अर्थितदाने या दीक्षा सङ्कल्पः तत्र कृतं व्रतम् [illegible] येन कुलेन तत्॥ २३॥ [illegible]

यतोऽतिसंख्यास्तव सन्ति कन्याः
तासां ममैकां नृपते! प्रयच्छ।
यत् प्रार्थनाभङ्गभयाद्बिभेमि
तस्मादहं राजवरातिदुःखात् ॥ २४ ॥

पराशर उवाच। इति ऋषिवचनमाकर्ण्य स राजा जराजर्जरितदेहं तम् ऋषिमालोक्य प्रत्याख्यानकातरस्तस्माच्च भगवतः शापतो बिभ्यत् किञ्चिदधोमुखश्चिरं दध्यौ।

ऋषिरुवाच।

नरेन्द्र! कस्मात् समुपैषि चिन्ताम्
अशक्यमुक्तं न मयात्र किञ्चित्।
यावश्यदेया तनया तवैव
कृतार्थता नो यदि किं न लभ्यम् ॥ २५ ॥

पराशर उवाच।

अथ तस्य शापभीतः सप्रश्रयमुवाचासौ राजा ॥

राजोवाच।

भगवन्! अस्मत्कुलस्थितिरियं य एव कन्याया अभिरुचितोऽभिजनवान् वरस्तस्मै कन्या प्रदीयते। भग-

---

यद् मम यस्मात् तस्माद् यदतिदुःखं तस्माद् बिभेमि, तस्मात् ममैकां कन्यां प्रयच्छेत्यन्वयः ॥ २४ ॥ यस्मात् अवश्यदेया या कन्या इयं तया यदि नोऽस्माकं कृतार्थता स्यात्, तर्हि किं न लभ्यं ? लाभाभावः किं स्यात् ? किन्तु लाभः स्यादेव। यद्वा तर्हि त्वया किं न लभ्यं अस्मन्मनोरथपूरणेनैव तव महान् लाभ इत्यर्थः। न लभ्येति पाठे वा लभ्या किं न लभ्या ? लभ्यैवेति विवक्षितार्थः ॥ २५ ॥ प्रत्याख्याने-

भगवद्याच्ञा चास्मन्मनोरथानामप्यगोचरवर्तिनी कथमप्येषा सञ्जाता तदेवमुपस्थिते न विद्मः किं कुर्म इति, तन्मयाचिन्त्यत इत्यभिहिते तेन भूभुजा मुनिरचिन्तयत् २५ । अयमन्योऽस्मत्प्रत्याख्यानोपायः वृद्धोऽयम् अनभिमतः स्त्रीणां किमुत कन्यानामिति अमुना संचिन्त्य एवमभिहितम् ॥ २६ ॥

एवमस्तु तथा करिष्यामीति संचिन्त्य मान्धातारम् उवाच ॥ २७ ॥

यद्येवं तदादिश्यतामस्माकं प्रवेशाय कन्यान्तःपुरवर्षवरः ॥ २८ ॥

यदि कन्यैव काचिन्मामभिलषति तदाहं दारपरिग्रहं करिष्यामि, अन्यथा चेत् तदलमस्माकमेतेनातीतकालारम्भणेनेत्युक्त्वा विरराम । ततश्च मान्धाता मुनिशापशङ्कितः कन्यान्तःपुरवर्षवरं समाज्ञापयामास । कन्यान्तःपुरं प्रविशन्नेव भगवानखिलसिद्धगन्धर्वेभ्योऽतिशयेन कमनीयं रूपमकरोत् । प्रवेश्य च तमृषिमन्तःपुरवर्षवरस्ताः कन्यकाः प्राह भवतीनां जनयिता महाराजः समाज्ञापयति अयमस्मान् ब्रह्मर्षिः कन्यार्थी समभ्यागतः, मया चास्य प्रतिज्ञातं यद्यस्मत्कन्यका काचिद् भगवन्तं

[illegible] दर्शयति [illegible] । एतत् [illegible] राजा [illegible] पर्यन्तेन [illegible] ॥ २७ ॥ कन्यान्तःपुरस्य रक्षको वर्षवरः षण्ढः ॥ २८ ॥

वरयति, तत्कन्यायाश्छन्दे नाहं परिणयनं करिष्यामि, इत्याकर्ण्य सर्वा एव ताः कन्यकाः सानुरागाः ससंभ्रमाः करेणव इवेभयूथपतिं तम् अपि सहसहमहमिकया वरयाम्बभूवुः, अथ च ॥ २९ ॥

अलं भगिन्योऽहमिमं वृणोमि
वृतो मया, नैष तवानुरूपः ।
ममैव भर्त्ता विधिनैष सृष्टः
सृष्टाहमस्योपगमं प्रयाहि ॥ ३० ॥
वृतो मयायं प्रथमं मयायं
गृहं विशस्व विहन्यसे किम् ? ।
मया मयेति क्षितिपात्मजानां
तदाभवन्नर्मकलिप्रबन्धः ॥ ३१ ॥
यदा तु सर्वाभिरतीव हार्दात्
वृतः स कन्याभिरनिन्द्यकीर्त्तिः ।
तदा स कन्याभिवृतो नृपाय
यथावदाचष्ट विनम्रमूर्त्तिः ॥ ३२ ॥

तत् तदा कन्यायाश्छन्दे इच्छया परिणयनं प्रतिकूलं नाहं करिष्यामीति प्रतिज्ञातम्, इत्याकर्ण्येति शेषः इत्युक्तिक्रमम् इत्याकर्ण्येति कार्यान्तरोपस्थापनाय योज्यम् । एवमग्रेऽपि । करेणव पूर्ववत् ... अहमहमिकया तदा ॥ २९ ॥

तामेवाह अलं भगिन्य इति द्वाभ्याम् । सृष्टाहमस्य इत्यादि शेषः । उपगमं व्रज, पाठेऽपि यत्र मा कुरु इत्यर्थः ॥ ३० ॥ विहन्यसे विघ्नं किं कुरुषे । कलिः कलहः ॥ ३१ ॥ अतिहार्दात् स्नेहात् । कन्याभिरेव परस्परं कलहोऽनुचित इति विनम्रमूर्त्तिराचष्ट

तदवगमात्, किमेतत्? कथय किं करोमीति किं मयाभिहितमित्याकुलमतिरनिच्छन्नपि कथमपि राजानुमेने। कृतानुरूपविवाहश्च महर्षिः सकला एव ताः कन्यकाः स्वमाश्रममनयत्। तत्र चाशेषशिल्पिकल्पप्रणेतारं विधातारमिवान्यं विश्वकर्माणमाहूय सकलकन्यानामेकैकस्याः प्रोत्फुल्लपङ्कजाः कूजत्कलहंसकारण्डवादिविहङ्गमाभिरामजलाशयाः सोपधानाः सावकाशाः साधुशय्यासनपरिच्छदाः प्रासादाः क्रियन्तामित्यादिदेश ॥ ३३ ॥

तच्च तथैवानुष्ठितमशेषशिल्पिविशेषाचार्यस्त्वष्टा दर्शितवान् ॥ ३४ ॥

ततश्च परमर्षिणा सौभरिणाज्ञप्तस्तेषु गृहेष्वनपायानन्दनामा महानिधिरासाञ्चक्रे ॥ ३५ ॥

ततोऽनवरतभक्ष्यभोज्यलेह्याद्युपभोगैरागतानुगतभृत्यादीनहर्निशमशेषगृहेषु ताः क्षितीशदुहितरो भोजयामासुः ॥ ३६ ॥

एकदा तु दुहितृस्नेहाकृष्टहृदयः स महीपतिरतिदुःखितास्ताः सुखिता वा इति विचिन्त्य तस्य महर्षेराश्रमसमीपमेत्य स्फुरदंशुमालां स्फटिकमयीं प्रासादमालामतिरम्योपवनजलाशयां ददर्श ॥ ३७ ॥

॥ ३३ ॥ सोपधानाः उपधानसहिताः, परिच्छदाः भोगोपकरणानि ॥३३॥ तच्च 'शिल्पिशास्त्राचार्यत्वष्टा' तथैवानुष्ठितं दर्शितवान् ॥३४॥ आज्ञप्तः अनुमतवान् ॥ ३५ ॥ स्वमता अनुमताः अनुगतभृत्यादीनां तान् ॥३६॥ स्फुरन्त्यंशवो यस्याः तां प्रासादमालाम् ॥ ३७ ॥

प्रविश्य चैकं प्रासादमात्मजां परिष्वज्य कृतासनपरिग्रहः प्रवृत्तस्नेहनयनाम्बुगर्भनयनोऽब्रवीत् ॥ ३८ ॥

अप्यत्र वत्से! भवत्याः सुखम् उत किञ्चिदसुखम्? अपि ते महर्षिः स्नेहवान् उत संस्मर्य्यतेऽस्मद्गृहवासस्य?

इत्युक्ता तत्तनया पितरमाह, तात! अतिशयरमणीयः प्रासादोऽत्र, अतिमनोज्ञमुपवनमतिकलवाक्यविहङ्गाभिरुताः प्रोत्फुल्लपद्माकरजलाशयाः, मनोऽनुकूलभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगोपभोगा मृदूनि शयनानि, सर्वसम्पत्समवेतमेतद् गार्हस्थ्यं, तथापि केन वा जन्मभूमिर्न स्मर्य्यते? त्वत्प्रसादादिदमशेषमतिशोभनम् ॥ ३९

किन्तु एतत् ममैकं दुःखकारणं यदस्मद्भर्त्ताऽस्मद्गेहान्न निःसरति, ममैव केवलमतिप्रीत्या समीपवर्त्ती नान्यासां मद्भगिनीनाम् एवञ्च, मम सहोदरा दुःखिताः, इत्येवमतिदुःखकारणम्, इत्युक्तस्तया द्वितीयं प्रासादमुपेत्य स्वतनयां परिष्वज्योपविष्टस्तथैव पृष्टवान्। तयापि तथैव, सर्वमेतत् प्रासादाद्युपभोगसुखमाख्यातं, ममैव केवलं पार्श्ववर्त्ती नान्यासामस्मद्भगिनीनामित्येवमादि श्रुत्वा समस्तप्रासादेषु राजा प्रविवेश, तनयां तनया तथैवापृच्छत् ताभिश्च तथैवाभिहितः परितोषविस्मयनिर्भरविवशहृदयो भगवन्तं सौभरिमेकान्तावस्थितमुपेत्य कृतपूजोऽब्रवीत् ॥ ४०

प्रवृत्तो यः स्नेहस्तेन यानि नयनाम्बूनि तान्येव गर्भं ययोस्तादृशे नयने यस्य स । प्रवृत्तस्नेहाम्बुगर्भनयन इति पाठे प्रवृत्तस्नेहाम्बुगर्भे नयने यस्य इति विग्रहः ॥ ३८ ॥ प्रोत्फुल्लानि यानि पद्मानि तदाकरभूता जलाशयाश्च । भोगो भक्ष्यादिरुपभोगोऽनुलेपनादिः ॥ ३९ ॥

दृष्टस्ते भगवन्! सुमहानेष सिद्धिप्रभावो नैवंविध-मन्यस्य कस्यचिदस्माभिर्विभूतिविलसितमुपलक्षितं, कियदेतद्भगवतस्तपसः फलमित्यभिपूज्य तमृषिं तत्रैव तेन ऋषिवर्य्येण सह किञ्चित् कालमभिमतोपभोगं बुभुजे स्वपुरञ्च जगाम ॥ ४१ ॥

कालेन गच्छता तस्य राजतनयासु तासु पुत्रशतं सार्द्धमभवत्। तदनुदिनानुरूढस्नेहः स तत्रातीव ममताकृष्टहृदयोऽभवत् ॥ ४२ ॥

अप्येतेऽस्मत्पुत्राः कलभाषिणः पद्भ्यां गच्छेयुः, अप्येते यौवनिनो भवेयुः, अपि कृतदारानेतान् पश्येयम्, अप्येषां पुत्रा भवेयुः, अप्येतत्पुत्रान् पुत्रसमन्वितान् पश्येयम् एवमादिमनोरथमनुदिनकालसम्पत्तिप्रवृत्तमवे-त्यैतत् सञ्चिन्तयामास ॥ ४३ ॥ अहो मे मोहस्याति-विस्तारः।

मनोरथानां न समाप्तिरस्ति
वर्षायुतेनापि तथाब्दलक्षैः।

[illegible] दृष्टवा सुखेन, [illegible], [illegible] पुत्रं [illegible] | [illegible] ॥ ४१ ॥ [illegible]? [illegible]

[illegible] ॥ ४२ ॥ [illegible], [illegible] इति। [illegible] मनोरथे [illegible] ॥ ४३ ॥ [illegible]।

पूर्णेषु पूर्णेषु पुनर्नवानाम्
उत्पत्तयः सन्ति मनोरथानाम् ॥ ४४ ॥
पद्भ्यां गता यौवनिनश्च जाता
दारैश्च संयोगमिताः प्रसूताः ।
दृष्टाः सुतास्तत्तनयप्रसूतिं
द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा ॥ ४५ ॥
द्रक्ष्यामि तेषामपि चेत् प्रसूतिं
मनोरथो मे भविता ततोऽन्यः ।
पूर्णेऽपि तत्राप्यपरस्य जन्म
निवार्यते केन मनोरथस्य ॥ ४६ ॥
आमृत्युतो नैव मनोरथानाम्
अन्तोऽस्ति विज्ञातमिदं मया च ।
मनोरथासक्तिपरस्य चित्तं
न जायते वै परमात्मसङ्गि ॥ ४७ ॥
स मे समाधिर्जलवासमित्र-
मत्स्यस्य सङ्गात् सहसैव नष्टः ।
परिग्रहः सङ्गकृतो ममायं
परिग्रहोत्थाश्च महाविधित्साः ॥ ४८ ॥
दुःखं यदैवैकशरीरजन्म
शतार्द्धसङ्ख्यं तदिदं प्रसूतम् ।
परिग्रहेण क्षितिपात्मजानां
सुतैरनेकैर्बहुलीकृतं तत् ॥ ४९ ॥

तेषाञ्च सुता दृष्टाः । तस्य पौत्रवर्गस्य तनयप्रसूतिम् अपत्यजन्म ॥ ४५ ॥
महत्यो विधित्सा इति कार्येच्छाः ॥ ४८ ॥ एकशरीरजन्म दुःख

सुतात्मजैस्तत्तनयैश्च भूयो
भूयश्च तेषां स्वपरिग्रहेण ।
विस्तारमेष्यत्यतिदुःखहेतुः
परिग्रहो वै ममतानिधानम् ॥ ५० ॥
चीर्णं तपो यत् तु जलाश्रयेण
तस्यर्द्धिरेषा तपसोऽन्तरायः ।
मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरागो मुषितोऽस्मि तेन ॥ ५१ ॥
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ।
आरूढयोगोऽपि निपात्यतेऽधः
सङ्गेन योगी किमुताल्पसिद्धिः ॥ ५२ ॥
अहं चरिष्यामि तथात्मनोऽर्थे
परिग्रहग्राहगृहीतबुद्धिः ।
यथा हि भूयः परिहीनदोषो
जनस्य दुःखैर्भविता न दुःखी ॥ ५३ ॥
सर्वस्य धातारमचिन्त्यरूपम्
अणोरणीयांसमतिप्रमाणम् ।

[illegible]हेतुः ॥ ५० ॥ तपसाम् ऋद्धिरेषा तपसोऽन्तरायो विघ्नः । मुषितो वञ्चितः ॥ ५१ ॥ [illegible] ॥ ५२ ॥

[illegible] परिग्रहग्राहगृहीतबुद्धिरपि [illegible] दुःखै[illegible] न [illegible] ॥ ५३ ॥ [illegible]
[illegible]

मितामितस्येश्वरमीश्वराणाम्
आराधयिष्ये तपसैव विष्णुम् ॥ ५४ ॥
तस्मिन्नशेषौजसि सर्वरूपि-
ण्यव्यक्तविस्पष्टतनावनन्ते ।
ममाचलं चित्तमपेतदोषं
सदास्तु विष्णावभवाय भूयः ॥ ५५ ॥
समस्तभूतादमलादनन्तात्
सर्वेश्वरादन्यदनादिमध्यात् ।
यस्मान्न किञ्चित् तमहं गुरूणां
परं गुरुं संश्रयमेमि विष्णुम् ॥ ५६ ॥

तृतीयोऽध्यायः ।

पराशर उवाच ।

इत्यात्मानमात्मनैवाभिधायासौ सौभरिरपहाय पुत्र-गृहासनपरिच्छदादिकमशेषमर्थजातं सकलभार्यासमन्वितो वनं प्रविवेश । तत्राप्यनुदिनं वैखानसनिष्पाद्यमशेषं

मितस्य बद्धं जीवरूपेण, अमितस्य तद्विपरीतमीश्वररूपेण ॥ ५४ ॥ अशेषौजसि सर्वरूपिणि अव्यक्तं प्रधानं विस्पष्टं महदादि च तदुभयात्म-कं यस्य तस्मिन् भूयोऽभवाय पुनर्जन्माभावाय ॥ ५५ ॥ यस्मादन्यत् किञ्चिन्नास्ति तमाश्रयं परमेमि गच्छामि ॥ ५६ ॥

तृतीये सौभरेः विमोक्षानन्तरमान्वयः । वर्ण्यन्ते सगरस्यापि

क्रियाकलापं निष्पाद्य क्षपितसकलपापः परिपक्वमनोवृत्ति-रात्मन्यग्नीनारोप्य भिक्षुरभवत् ॥ १ ॥

भगवति चासज्याखिलं कर्मकलापमजमविकारममरणादिधर्ममवाप परं परवतामच्युतपदम् ॥ २ ॥

इत्येतन्मान्धातृदुहितृसम्बन्धाद्व्याख्यातम् ॥ ३ ॥

यश्चैतत् सौभरिचरितमनुस्मरति पठति शृणोति च धारयति तस्याष्टौ जन्मान्यसत्सन्ततिरसद्धर्मो वा मनसोऽसन्मार्गाचरणमशेषहेतुषु वा ममत्वं न भवतीति, अतो मान्धातुः पुत्रसन्ततिरभिधीयते ॥ ४ ॥

अम्बरीषस्य मान्धातुस्तनयस्य युवनाश्वः पुत्रोऽभूत् । तस्माद्धारीतः यतोऽङ्गिरसो हारीताः ॥ ५ ॥

रसातले च मौनेया नाम गन्धर्वाः षट्कोटिसङ्ख्या

[illegible] । परिपक्वा रागादिहीना [illegible] ॥ १ ॥ [illegible] । परवतां परम् [illegible] ॥ २ ॥ [illegible] ॥ ३ ॥ [illegible] ॥ ४ ॥ [illegible] ।

रसातलगतानि नागकुलानि अपहृतप्रधानरत्नाधिपत्यान्यक्रियन्त ॥ ६ ॥

तेषु गन्धर्ववीर्य्यावधूतेषूरगेश्वरैर्भगवानशेषदेवेशः स्तवश्रवणोन्मीलितोन्निद्रपुण्डरीकनयनो जलशयनो निद्रावसानाद्विबुद्धः प्रणिपत्याभिहितो भगवन् ! अस्माकमेभ्यो गन्धर्वेभ्यो भयमुपशममेष्यतीत्याह भगवाननादिपुरुषः पुरुषोत्तमो यौवनाश्वस्य मान्धातुः पुरुकुत्सनामा पुत्रस्तमनुप्रविश्य तानशेषदुष्टगन्धर्वानुपशमं नयिष्यामि ॥ ७ ॥

इत्याकर्ण्य भगवते कृतप्रणामाः पुनर्नागलोकमागताः पन्नगपतयो नर्मदाञ्च पुरुकुत्सानयनाय चोदयामासुः ॥ ८ ॥

सा चैनं रसातलं नीतवती । रसातलगतश्चासौ भगवत्तेजसाप्यायितात्मवीर्य्यः सकलगन्धर्वान् जघान । पुनश्च स्वभवनमाजगाम । सकलपन्नगपतयश्च नर्मदायै वरं

अपहृतानि प्रधानरत्नानि आधिपत्यञ्च येषां तान्यक्रियन्त ॥ ६ ॥ तैर्भगवान् स्तुत इति शेषः । तस्मात् तेषां स्तवश्रवणेन उन्मीलिते उन्निद्रे पुण्डरीके इव नयने यस्य । जलशयनः क्षीराब्धिशायी । एकवचनपाठे, जलशयनकृता या निद्रा तस्या अवसानात् । अवसाने इति वा पाठः । विबुद्धः सन् । अपि किं गन्धर्वेभ्यो यद्भयं तदुपशममेष्यतीति, प्रणिपत्य तैरभिहितो भगवान् मान्धातुः पुरुकुत्सः पुत्रस्तमहमनुप्रविश्य गन्धर्वानुपशमं नयिष्यामीत्याहेत्यन्वयः । [illegible] । नेत्र मौलि या पाठः ॥ ७ ॥

नर्मदां भगिनीं पुरुकुत्सस्य भार्य्याम् । "नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः । तया रसातलं नीतो भुजगेन्द्रप्रयुक्तया ॥" इति

ददुः। यस्तेऽनुस्मरणसमवेतं नामग्रहणं करिष्यति तस्य सर्पविषभयं न भविष्यतीति ॥ ८ ॥

अत्र श्लोकः।

नर्मदायै नमः प्रातर्नर्मदायै नमो निशि।
नमोऽस्तु नर्मदे तुभ्यं रक्ष मां विषसर्पतः॥
इत्युच्चार्याहर्निशमन्धकारप्रवेशे वा न सर्पैर्दश्यते ॥ १० ॥

न चापि कृतानुस्मरणभुजो विषमपि सुभुक्तमुपघाताय भविष्यति ॥ ११ ॥

पुरुकुत्साय च भवतः सन्ततिविच्छेदो न भविष्यतीत्युरगपतयो वरं ददुः ॥ १२ ॥

पुरुकुत्सो नर्मदायां त्रसद्दस्युमजीजनत्। त्रसद्दस्युतः सम्भूतः ततोऽनरण्यस्तं रावणो दिग्विजये जघान। अनरण्यस्य पृषदश्वः पृषदश्वस्य हर्यश्वः पुत्रोऽभवत्। ततश्च सुमनाः, तस्यापि त्रिधन्वा, त्रिधन्वनस्त्रय्यारुणः ॥ १२ ॥

तस्मात् सत्यव्रतः। योऽसौ त्रिशङ्कुसंज्ञामवाप, चण्डालतामुपगतश्च। द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रकलत्रापत्यपोषणार्थं चाण्डालप्रतिग्रहपरिहरणाय च जाह्नवीतीरन्यग्रोधे मृगमांसमनुदिनं बबन्ध ॥ १३ ॥

युष्मोक्तेः ॥ ८ ॥ आप्यायित आत्मा देहो वीर्यं च बलं यस्य सः ॥ ९ ॥ अत्र च नामपदस्मरणप्रकारे पुनर्नर्मदायाः अह्नि निशि वा उच्चार्य नर्मदेत्येवं अन्यत्र वा अन्धकारे प्रवेशे चापि सर्पैर्न दश्यते ॥ १० ॥ कृतानुस्मरणं नर्मदानुस्मरणपूर्वकम् अन्नादि भुञ्जानस्य ॥ ११ ॥ पुरुकुत्सस्य सन्ततिं वर्धन् तदुपयुक्तं वरदानमाह, पुरुकुत्सायेति ॥ १२ ॥

परितुष्टेन च विश्वामित्रेण सशरीरः स्वर्गमारोपितः ॥ १४ ॥

त्रिशङ्कोर्हरिश्चन्द्रः । तस्मात् रोहिताश्वः । ततश्च हरितः, हरिताच्चञ्चुः, चञ्चोर्विजयसुदेवौ । रुरुको विजयात् रुरुकस्य च वृकस्ततो बाहुः । योऽसौ हैहयतालजङ्घादिभिरवजितोऽन्तर्वत्न्या महिष्या सह वनं प्रविवेश ॥ १५ ॥

तस्याश्च सपत्न्या गर्भस्तम्भनाय गरो दत्तः । तेनास्या गर्भः स सप्तवर्षाणि जठर एव तस्थौ । स च बाहुर्वृद्धभावादौर्वाश्रमसमीपे ममार ॥ १६ ॥

सा तस्य भार्य्या चितां कृत्वा तमारोप्यानुमरणकृतनिश्चयाभूत् । अथैनामतीतानागतवर्त्तमानकालवेदी भगवानौर्वः स्वस्मादाश्रमान्निर्य्यायाब्रवीत् । अलमेतेनासद्ग्रहेण । अखिलभूमण्डलपतिरतिवीर्य्यपराक्रमोऽनेकयज्ञकृदरातिपक्षक्षयकर्त्ता तवोदरे चक्रवर्त्ती तिष्ठति । नैवं नैवं साहसाध्यवसायिनी भवती भवतु, इत्युक्ता च सा तस्मादनुमरणनिर्बन्धात् विरराम ॥ १७ ॥

अप्रोक्षितभक्षणगुरुधेनुवधपितृशापाख्यैस्त्रिभिः शङ्कुभिरिव हृदि व्यथाहेतुभिस्त्रिशङ्कुसंज्ञामवाप । तथा च हरिवंशे "पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च । अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः ॥ एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महायशाः । त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः ॥" इति । परिणीयमानविप्रकन्याहरणात् क्रुद्धेन पित्रा सप्तवर्षाण्यवनात्तपातितस्य । विश्वामित्रकलत्रादिपोषणार्थं कलत्रादिपोषणनिमित्तं साक्षात् चाण्डालतामप्य-स्वीकाराय वसिष्ठधेनोर्वधे वटवृक्षे बबन्ध ॥ १२ ॥ तत् स्मृत्वा परितुष्टेन तमारोपितस्त्रिशङ्कुः ॥ १४ ॥ अन्तर्वत्न्या गर्भिण्या ॥ १५ ॥

तेनैव भगवता स्वाश्रममानीयत। कतिपयदिनाभ्यन्तरे च सहैव तेन गरेणातितेजस्वी बालको जज्ञे। तस्यौर्वो जातकर्मादिकां क्रियां निष्पाद्य सगर इति नाम चकार। कृतोपनयनञ्चैनमौर्वो वेदान् शास्त्राण्यस्त्रञ्चाग्नेयं भार्गवाख्यमध्यापयामास। उत्पन्नबुद्धिश्च मातरमपृच्छत्, अम्ब ! कथमत्र वयम् ? क्व वा तातः ? तातोऽस्माकं कः ? इत्येवमादि पृच्छतः तस्माता सर्वमेवावोचत्। ततः पितृराज्यहरणामर्षितो हैहयतालजङ्घादिवधाय प्रतिज्ञामकरोत्। प्रायशश्च हैहयान् जघान। शककयवनकाम्बोजपारदपह्लवा हन्यमानास्तत्कुलगुरुं वशिष्ठं शरणं ययुः ॥१८॥

अथैनान् वशिष्ठो जीवन्मृतकान् कृत्वा सगरमाह, वत्स ! वत्स ! अलमेभिरतिजीवन्मृतकैरनुसृतैः ॥१९॥

एते च मयैव त्वत्प्रतिज्ञापरिपालनाय निजधर्मं द्विजसङ्गपरित्यागं कारिताः ॥२०॥

स तथेति तद्गुरुवचनमभिनन्द्य तेषां वेषान्यत्वमकारयत्। यवनान् मुण्डितशिरसः, अर्द्धमुण्डान् शकान्,

गरो विषम् ; [illegible] ॥१६॥ [illegible] ॥१७॥ [illegible] ॥१८॥ [illegible] ॥१९॥ [illegible]

प्रलम्बकेशान् पारदान् पह्लवांश्च श्मश्रुधरान्, निःस्वाध्याय-वषट्कारान् एतानन्यांश्च क्षत्रियांश्चकार। ते च निजधर्मपरित्यागाद् ब्राह्मणैश्च परित्यक्ता म्लेच्छतां ययुः। सगरोऽपि स्वमधिष्ठानमागम्य अस्खलितचक्रः सप्तद्वीपवतीमिमामुर्वीं प्रशशास ॥ २१ ॥

चतुर्थोऽध्यायः।

पराशर उवाच।

काश्यपदुहिता सुमतिर्विदर्भराजतनया च केशिनी द्वे भार्ये सगरस्यास्ताम् ॥ १ ॥

ताभ्याञ्चापत्यार्थमाराधितः और्वः परेण समाधिना वरमदात् ॥ २ ॥

एका वंशकरमेकं पुत्रम्, अपरा षष्टिं पुत्रसहस्राणि जनयिष्यतीति यस्या यदभिमतं तदिच्छया गृह्यताम्। इत्युक्ते केशिन्येकं, सुमतिः पुत्रसहस्राणि षष्टिं वव्रे। तथेति च ऋषिणाभिहिते अल्पैरेवाहोभिरेकम् असमञ्जसं नाम वंशकरं पुत्रमसूत केशिनी। विनतातनयायास्तु सुमत्याः षष्टिं पुत्रसहस्राण्यभवन्। तस्मादसमञ्जसादंशुमान् नाम कुमारो जज्ञे ॥ ३ ॥

[illegible] ॥" इति स्मृतेः ॥ २० ॥ अस्खलितचक्रम् अप्रतिहतं चक्रं [illegible] आज्ञा वा यस्य सः ॥ २१ ॥

[illegible] । [illegible] ॥ काश्यपदुहितेति । काश्यपस्य मरीचिपुत्रस्य [illegible] ॥ १ ॥ समाधिना चित्तैकाग्र्येण

स तु असमञ्जा बाल्यादेवासद्वृत्तः। पिता चास्याचिन्तयदयमतीतबाल्यो बुद्धिमान् भविष्यतीति। अथ तत्रापि वयस्यतीते तच्चरितमेवैनं पिता तत्याज ॥ ४ ॥

तान्यपि षष्टिः कुमारसहस्राणि असमञ्जसचरितमनुचक्रुः ॥ ५ ॥

ततश्चासमञ्जसचरितानुकारिभिः सागरैरपध्वस्तयज्ञादिसन्मार्गे जगति देवाः सकलविद्यामयमसंस्पृष्टमशेषदोषैर्भगवतः पुरुषोत्तमस्यांशभूतं कपिलर्षिं प्रणम्य तदर्थमूचुः ॥ ६ ॥

भगवन् एभिः सगरतनयैरसमञ्जसचरितमनुगम्यते। कथमेभिरसमञ्जसैर्जगद्भविष्यतीत्यार्तजगत्परित्राणाय च भगवतोऽत्र शरीरग्रहणम्, इत्याकर्ण्य भगवान् अल्पैरेव दिनैर्विनङ्क्ष्यतीत्युक्तवान् ॥ ७ ॥

तत्रान्तरे च सगरो हयमेधमारभे। तत्र च तत्पुत्रैरधिष्ठितमस्याश्वं कोऽप्यपहृत्य भुवो विवरं प्रविवेश ॥ ८ ॥

ततश्चाश्वान्वेषणाय तनयान् युयोज। ततस्ते तनया

---

४ ॥ असद्वृत्तो दुर्वृत्तः, अतीतबाल्यो गतबाल्यः। तत्र वयस्यतीतेऽपि तदेव दुश्चरितं यथा तथा ॥ ४ ॥ अनुचक्रुः अनुसृताः। अपध्वस्ता विनाशिताः यज्ञादयः सन्मार्गाः यस्मिन् तथाभूते जगति। तदर्थं सगरादिकोपद्रवार्थम् ॥ ६ ॥ भगवच्छरीरादिना आर्त-जगत्त्राणम् ॥ ७ ॥

अश्वं हृतं अपहृतम् ॥ ८ ॥ ततोऽनन्तरं तनयाः सगरतनयाः। अतिनिर्बन्धेन अश्वान्वेषणे बद्धाग्रहाः विविशुरिति पूर्वेण ... विवरं सर्वविदिशां ... ।

चाश्वखुरपदवीमनुसरन्तोऽतिनिर्बन्धेन वसुधातलमेकैको योजनं योजनमधो निचखान ॥ ९ ॥

पाताले चाश्वं परिभ्रमन्तमवनीपतितनयास्ते ददृशुः। नातिदूरस्थितञ्च भगवन्तमपघने शरत्कालेऽर्कमिव तेजोभिरनवरतमूर्ध्वमधश्चाशेषदिशश्चोद्भासयमानं कपिलर्षिमपश्यन् ॥ १० ॥

ततश्चोद्यतायुधा दुरात्मायमस्मदपकारी यज्ञविघातकर्त्ता हयहर्त्ता हन्यतां हन्यतामित्यधावन्। ततश्च तेनापि भगवता किञ्चिदीषत्परिवर्त्तितलोचनेन विलोकिताः स्वशरीरसमुत्थेनाग्निना दह्यमाना विनेशुः ॥ ११ ॥

सगरोऽप्यवगम्याश्वानुसारि तत् पुत्रबलमशेषं परमर्षिकपिलतेजसा दग्धमंशुमन्तमसमञ्जसः पुत्रमश्वानयनाय नियोजयामास ॥ १२ ॥

स तु सगरतनयखातमार्गेण कपिलमुपगम्य भक्तिनम्रस्तथा तथा च तुष्टाव यथैन भगवानाह गच्छैनं पितामहायाश्वं प्रापय वरं वृणीष्व च। पुत्र! पौत्रश्च ते स्वर्गाद् गङ्गामानयिष्यतीति ॥ १३ ॥

योजनं खनन् [illegible] दृश्यं। खनन्निति पाठे [illegible] [illegible] एकैक [illegible] [illegible] [illegible]। एकैक अधोऽपि [illegible] योजनं योजनं [illegible] ॥ ९ ॥ अपघने [illegible] ॥ १० ॥ ईषत् परिवर्त्तितं तिर्यक्कृतं यदेकं लोचनं तेन [illegible] विलोकिताः सन्तः विनेशुः ॥ ११ ॥ कपिलेन निमित्तेन यत् [illegible] तेजसा तेन दग्धम् ॥ १२ ॥ हे पुत्र! तव पौत्रो गङ्गामानयिष्यतीति [illegible]। [illegible] ॥ १३ ॥ [illegible] [illegible]

यथांशुमानपि ब्रह्मदण्डहतानामस्मत्पितॄणां स्वर्गाय
स्वर्गायोग्यानां स्वर्गप्राप्तिकरं वरमस्माकं भगवान् प्रयच्छतु
इत्याह ॥ १४ ॥

तमाह भगवान्, उक्तमेवैतन्मया पौत्रस्ते त्रिदिवाद् गङ्गां
भुवमानयिष्यतीति। तदम्भसा संस्पृष्टेष्वस्थिभस्मस्वेते स्वर्ग-
मारोक्ष्यन्ति। भगवद्विष्णुपादाङ्गुष्ठविनिर्गतजलस्य हि
तदाह्लादो यन्न केवलमभिसन्धिपूर्वकं स्नानाद्युपभोगेषूपका-
रकमनभि सहितमप्यपेतप्राणस्यास्थिचर्मस्नायुकेशाद्युपस्पृष्टं
शरीरजं यद् भपतितं सद्यः शरीरिणं स्वर्गं नयतीत्युक्तः
प्रणम्य च भगवन्तमश्वमादाय पितामहयज्ञमाजगाम ॥ १५ ॥

सगरोऽप्यश्वमासाद्य तं यज्ञं समापयामास। सागरं
चात्मजप्रीत्या पुत्रत्वे कल्पयामास ॥ १६ ॥

तस्याप्यंशुमतो दिलीपः पुत्रोऽभवत्। दिलीपस्यापि
भगीरथः योऽसौ गङ्गां स्वर्गादिहानीय भागीरथीसंज्ञां
चकार ॥ १७ ॥

[illegible]

[illegible]

भगीरथात् श्रुतः, तस्यापि नाभागः, ततोऽप्यम्बरीषः, तस्मात् सिन्धुद्वीपः, तस्याप्ययुताश्वः, तत्पुत्र ऋतुपर्णो नलसहायोऽक्षहृदयज्ञोऽभूत् ॥ १८ ॥

ऋतुपर्णपुत्रः सर्वकामः, तत्तनयः सुदासः सुदासात् सौदासो मित्रसहनामा ॥ १९ ॥

योऽसावटव्यां मृगयागतो व्याघ्रद्वयमपश्यत् ॥ २० ॥

ताभ्याञ्च तद्वनमपमृगं कृतम् ॥ २१ ॥

स चैकं तयोर्बाणेन जघान ॥ २२ ॥

म्रियमाणश्चासावतिभीषणाकृतिरतिकरालवदनो राक्षसोऽभवत् ॥ २३ ॥

द्वितीयोऽपि प्रतिक्रियां ते करिष्यामीत्युक्त्वा अन्तर्धानं जगाम ॥ २४ ॥

कालेन गच्छता स सौदासो यज्ञमयजत्, परिनिष्ठितयज्ञे चाचार्ये वसिष्ठे निष्क्रान्ते तद्रक्षो वसिष्ठरूपमास्थाय, यज्ञावसाने मम नरमांसभोजनं देयं तत् संस्क्रियतां क्षणादागमिष्यामीत्युक्त्वा निष्क्रान्तः ॥ २५ ॥

भूयश्च सूदवेषं कृत्वा राजाज्ञया मानुषमांसं संस्कृत्य

कृतवान् इत्यर्थः ॥ १६ ॥ भागीरथी संज्ञा यथाख्याता ॥ १७ ॥ नलस्य सहाय सखा अक्षहृदयज्ञः द्यूतादौ गणनानिपुणः ॥ १८ ॥

मित्रं वसिष्ठं प्रतिगम्य समर्थोऽपि सहते स्म, तेन मित्रसहनामा ॥ १९ ॥ तस्यैव मृगयाप्रसङ्गेन दृष्टां वक्तुं कथां प्रक्रमते, योऽसाविति ॥ २० ॥ अपमृगं निर्मृगम् ॥ २१ ॥ तयोर्व्याघ्रयोः ॥ २२ ॥ अतिकरालं दन्तुरं वदनं यस्य सः ॥ २३ ॥ प्रतिक्रियां वैरनिर्यातनम् ॥ २४ ॥

राज्ञे न्यवेदयत्। असावपि हिरण्यपात्रस्थितं मांसमादाय वसिष्ठागमनप्रतीक्षोऽभवत् ॥ २६ ॥

आगताय च वसिष्ठाय निवेदितवान्। स चाप्यचिन्तयत्, अहो। राज्ञोऽस्य दौःशील्यम्। येनैतन्मांसमस्माकं प्रयच्छति। किमेतद् द्रव्यजातमिति ध्यानपरोऽभूत्, अपश्यच्च तन्मानुषं मांसम्। ततश्च क्रोधकलुषीकृतचेता राजानं प्रति शापमुत्ससर्ज। यस्मादभोज्यमस्मद्विधानां तपस्विनामवगच्छन्नपि भवान् मह्यं ददाति, तस्मात्तवैवात्र लोलुपा बुद्धिर्भविष्यतीति ॥ २७ ॥

अनन्तरञ्च तेनापि भगवतैवाभिहितोऽस्मीत्युक्तः, किं किं मयैवाभिहितम् इति पुनरपि समाधौ तस्थौ ॥ २८ ॥

समाधिविज्ञानावगतार्थश्चानुग्रहं चकार, नात्यन्तिकमेतत्, द्वादशाब्दं भवतो भोजनं भविष्यतीति ॥ २८ ॥

असावपि तु प्रगृहीतोदकाञ्जलिर्मुनिशापप्रदानायोद्यतो भगवानस्मद्गुरुः, नार्हस्येनं कुलदेवताभूतमाचार्यं

[illegible] तस्मिन् निष्क्रान्ते सति ॥ २५ ॥ [illegible] ॥ २६ ॥

अथ [illegible] ॥ २७ ॥ तेन राज्ञा [illegible] ॥ २८ ॥ [illegible] इति [illegible] ॥ २९ ॥ भगवानस्मद्-

शप्तुमिति स्वपत्न्या मदयन्त्या प्रसादितः शस्याम्बुदरक्षार्थं तच्छापाम्बु नोर्व्यां नाकाशे चिक्षेप तेनैव स्वपादौ सिषेच ॥ २० ॥

तेन क्रोधदुष्टेनाम्भसा दग्धच्छायौ तत्पादौ कल्माषतामुपगतौ ॥ २१ ॥

ततश्च स कल्माषपादसंज्ञामवाप, वशिष्ठशापाच्च षष्ठे काले राक्षसभावमुपेत्याटव्यां पर्य्यटन् अनेकशो मानुषानभक्षयत् ॥ २२ ॥

एकदा तु कञ्चिन्मुनिमृतुकाले भार्य्यया सह सङ्गतं ददर्श ॥ २३ ॥

तयोश्च तमतिभीषणं राक्षसमवलोक्य त्रासात् प्रधाविवयोर्दम्पत्योः ब्राह्मणं जग्राह ॥ २४ ॥

ततः सा ब्राह्मणी बहुशस्तं याचितवती प्रसीदेक्ष्वाकुकुलतिलकभूतस्त्वं महाराजमित्रसहो न राक्षसः। नार्हसि स्त्रीधर्मसुखाभिज्ञो मय्यकृतार्थायामिमं मद्भर्त्तारमत्तुमित्येवं बहुप्रकारं तस्यां विलपन्त्यां व्याघ्रः पशुमिव तं ब्राह्मणमभक्षयत् ॥ २५ ॥

शप्तुमित्यादि—सोपपत्तिकवचनेन मदयन्त्या प्रसादितः तच्छापाम्बु वशिष्ठशापार्थं गृहीतं सस्यरक्षार्थं नोर्व्याम् अम्बुदरक्षार्थं नाकाशे च चिक्षेप किन्तु तेन अम्बुना स्वपादौ सिषेच ॥ २० ॥ क्रोधदुष्टेन क्रोधाग्निदग्धेन दग्धा छाया कान्तिः ययोः। कल्माषता कल्माषपादत्वम् ॥ २१ ॥

राक्षसभावमुपेत्य अत एव षष्ठे षष्ठे काले तृतीयदिनान्ते ॥ २२ ॥ ऋतुकाले नक्तमेव रात्रौ औरसपुत्राभावं वक्तुं कथां प्रकरोति, एकदेत्यादिना स्त्रीसम्भोगं तस्याक्षेपलक्षणेन ॥ २३ ॥ दम्पत्योः प्रधावितयोः पलायितयो-

ततश्चातिकोपसमन्विता ब्राह्मणी तं राजानं, यस्मादेव मय्यतृप्तायां त्वयायं मत्पतिर्भक्षितः, तस्मात् त्वमप्यन्तमबलोपभोगप्रवृत्तो प्राप्स्यसि, इति शशापाग्निं प्रविवेश च ॥ ३६ ॥

ततस्तस्य द्वादशाब्दपर्य्यये विमुक्तशापस्य स्त्रीविषयाभिलाषिणो मदयन्ती स्मारयामास ॥ ३७ ॥

ततश्च परमसौ स्त्रीसम्भोगं तत्याज। वशिष्ठश्च अपुत्रेण राज्ञा पुत्रार्थमभ्यर्थितो मदयन्त्यां गर्भाधानं चकार। यदा च सप्त वर्षाण्यसौ गर्भो न जज्ञे, ततस्तं गर्भमश्मना सा देवी जघान। पुत्रश्चाजायत। तस्य चाश्मक एव नामाभवत्। अश्मकस्य मूलको नाम पुत्रोऽभवत्। योऽसौ निःक्षत्रेऽस्मिन् क्ष्मातले क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य्य रक्षितः। ततस्तं नारीकवचमुदाहरन्ति। मूलकात् दशरथः, तस्मादिलिविलः, ततश्च विश्वसहः, तस्माच्च खट्वाङ्गो दिलीपः, योऽसौ देवासुराणां संग्रामे देवैरभ्यर्थितोऽसुरान् जघान। स्वर्गे च कृतप्रियैर्देवैर्वरार्थं चोदितः प्राह, यद्यवश्यं वरो ग्राह्यस्तन्ममायुः कथ्यतामिति। अनन्तरञ्च तैरुक्तम्, एकमुहूर्त्तप्रमाणमायुः। इत्युक्तोऽथास्खलितगतिना विमानेन लघिमगुणो मर्त्त्यलोकमागम्येदमाह, यथा न ब्राह्मणेभ्यः सकाशादात्मापि मे प्रियतरः, न चापि स्वधर्मोल्लङ्घनं मया

[illegible] ॥ ३५ ॥ योऽसौ [illegible] ॥ ३५ ॥ [illegible] ॥ ३६ ॥ द्वादशाब्दपर्य्यये तं ब्राह्मण्याः शापं पत्नी स्मारयामास ॥ ३७ ॥

कदाचिदप्यनुष्ठितं, न च सकलदेवमानुषपशुवृक्षादिकेभ्यश्चात्मव्यतिरिक्तवतो दृष्टिर्ममाभूत्, तथा तमेव देव मुनिजनानुस्मृतं भगवन्तमस्खलितगतिः प्रापयेयमित्यशेषदेवगुरौ भगवत्यनिर्देश्यवपुषि सत्तामात्रात्मन्यात्मानं परमात्मनि वासुदेवे युयोज, तत्रैव लयमवाप ॥ ३८ ॥

तत्रापि श्रूयते श्लोको गीतः सप्तर्षिभिः पुरा ।
खट्वाङ्गेन समो नान्यः कश्चिदुर्व्यां भविष्यति ।
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम्
त्रयोऽभिसंहिता लोका बुद्ध्या दानेन चैव हि ॥ ३९ ॥

खट्वाङ्गात् दीर्घबाहुः पुत्रोऽभवत्, ततो रघुः, तस्मादप्यजः, अजात् दशरथः, दशरथस्यापि भगवानब्जनाभो जगतः स्थित्यर्थमात्मांशेन रामलक्ष्मणभरतशत्रुघ्नरूपेण चतुर्धा पुत्रत्वमयासीत् ॥ ४० ॥

रामोऽपि बाल एव विश्वामित्रयज्ञरक्षणाय गच्छन् ताड़कां जघान ॥ ४१ ॥

यज्ञे च मारीचमिषुपाताहतं दूरं चिक्षेप, सुबाहुप्रमुखांश्च क्षयमनयत्, अहल्यामप्यवलोकनमात्रेण एव अपाप्मा-

अनन्तमतिना ध्यायमानेन आत्मगुणोऽतियोगगतिः सन् मत्त्वं बालमपेत्य प्रकृष्टप्रवृत्त्यादिना धर्मेण भगवद्दास्यं प्रार्थयन् ध्यायी यतते केवलम्, यथेत्यादिना वासुदेवाख्ये युयोजेत्यन्तेन । प्राप्यैव प्राप्याम् ॥ ३८ ॥ मुहूर्तं जीवितं प्राप्य ज्ञात्वा बुद्ध्या वासुदेवः सर्वमिति ज्ञानेन । यदा दानं समर्पणं आत्मनिर्गतं वा प्रतिज्ञापयतीति यावत् तेनाभिसंहिता त्रिपदीकृतास्त्रयो लोका विष्णौ प्रतिष्ठापिताः स्वर्गाः ॥ ३९ ॥ अथ सौत मागः ॥ ४० ॥ ताड़कायुप्राख्यानम् रामायणप्रसिद्धम् ॥ ४१ ॥ वीर्यं पराक्रम एव शुल्कं

मपापां चकार। जनकगृहे च माहेश्वरं चापमनायासेनैव बभञ्ज, ततश्चायोनिजां जनकराजतनयां वीर्यशुल्कां लेभे ॥ ४२ ॥

सकलक्षत्रक्षयकारिणमशेषहैहयकुलधूमकेतुभूतञ्च परशुराममपास्तवीर्यबलावलेपं चकार ॥ ४३ ॥

पितृवचनाच्चागणितराज्याभिलाषो भ्रातृभार्यासमेतो वनं विवेश ॥ ४४ ॥

विराधखरदूषणादीन् कबन्धवालिनौ च जघान बद्ध्वा चाम्भोनिधिमशेषराक्षसकुलक्षयं कृत्वा दशाननापहृतां तद्वधादपहृतकलङ्कामप्यनलप्रवेशशुद्धामशेषदेवसङ्घैः स्तूयमानशीलां जनकराजतनयामयोध्यामानिन्ये ॥ ४५ ॥

भरतोऽपि गन्धर्वविषयसाधनार्थं गन्धर्वकोटीस्तिस्रो जघान। शत्रुघ्नेनाप्यमितबलपराक्रमो मधुपुत्रो लवणो नाम राक्षसपतिर्निहतो मथुरा च निवेशिता। इत्येवमाद्यतिबलपराक्रमविक्रमणैरतिदुष्टसंहारिणोऽशेषस्य जगतो निष्पादितस्थितयो रामलक्ष्मणभरतशत्रुघ्नाः पुनरपि दिव-

---

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

मारूढाः। येऽपि तत्र भगवदंशमनुगामिनः कोशलनगरजानपदास्तेऽपि तन्मनसस्तत्सालोकतामवापुः। ४६ ॥

रामस्य तु कुशलवौ पुत्रौ, लक्ष्मणस्याङ्गदचन्द्रकेतू, तक्षपुष्करौ भरतस्य, सुबाहुशूरसेनौ च शत्रुघ्नस्य ॥ ४७ ॥

कुशस्यातिथिः, अतिथेरपि निषधः पुत्रोऽभवत्। निषधस्यापि नलः, तस्यापि नभाः, नभसः पुण्डरीकः, तत्तनयः क्षेमधन्वा, तस्य च देवानीकः, तस्याप्यहीनगुः ततो रूपः ततो रुरुः, तस्य च पारिपात्रः, पारिपात्राद्दलः दलात् छलः, तस्याप्युक्थः उक्थाद् वज्रनाभः, तस्मात् शङ्खनाभः, ततो व्युषिताश्वः, ततश्च विश्वसहो जज्ञे। हिरण्यनाभस्ततो महायोगीश्वरजैमिनिशिष्यः यतो याज्ञवल्क्यो योगमवाप। हिरण्यनाभस्य पुत्रः पुष्यः, तस्मात् ध्रुवसन्धिः, ततः सुदर्शनः, तस्मादग्निवर्णः, ततश्च शीघ्रः, ततोऽपि मरुः पुत्रोऽभूत्। योऽसौ योगमास्थायाद्यापि कलापग्राममाश्रितस्तिष्ठति। आगामियुगे सूर्यवंशक्षत्रप्रवर्त्तयिता भविष्यतीति। प्रसुश्रुतस्तस्यात्मजः, तस्यापि सुगन्धिः, ततश्चामर्षः, तस्य महस्वान्, ततो विश्रुतवान्, ततो बृहद्बलः योऽर्जुनतनयेनाभिमन्युना भारतयुद्धे क्षयमनीयत। ४८ ॥

एते हीक्ष्वाकुभूपालाः प्राधान्येन मयोदिताः।
एतेषां चरितं शृण्वन् सर्वपापैः प्रमुच्यते ॥ ४९ ॥

[illegible] विचित्रचरितानि तैः ॥ ४६ ॥ [illegible] तक्ष भरतोः ॥ ४७ ॥

पञ्चमोऽध्यायः ।

पराशर उवाच

इक्ष्वाकुतनयो योऽसौ निमिर्नाम, स तु सहस्रसंवत्सरं सत्रमारेभे, वसिष्ठञ्च होतारं वरयामास ॥ १ ॥

तमाह वसिष्ठः, अहमिन्द्रेण पञ्चवर्षशतं यागार्थं प्रथमं वृतः, तदनन्तरं प्रतिपाल्यताम्, आगतस्तवापि ऋत्विग् भविष्यामीत्युक्ते स पृथिवीपतिना न किञ्चि-दुक्तः ॥ २ ॥

वसिष्ठोऽप्यनेन समन्वीप्सितमित्यमरपतेर्यागमकरोत् ॥ ३ ॥

सोऽपि तत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत् । समाप्ते चामरपतेर्यागे त्वरया वसिष्ठो निमेः कर्म करिष्यामीत्याजगाम, तत्कर्मकर्तृत्वञ्च तत्र गौतमस्य दृष्ट्वा, स्वपते तस्मै राज्ञे मामप्रत्याख्यायैतदनेन गौतमाय कर्मान्तरमर्पितं यस्मात्, तस्मादयं विदेहो भविष्यतीति शापं ददौ ॥ ४ ॥

[illegible] निमेः [illegible] परस्परम् । [illegible]
[illegible] निमिरपि विदेह इति [illegible] भवतीति,
[illegible] निमिर्नाम [illegible] ॥ १ ॥
[illegible] भविष्यामि । [illegible]
[illegible] ॥ २ ॥ [illegible]
[illegible] ॥ ३ ॥
[illegible] ।
[illegible]

प्रतिबुद्धश्चासाववनीपतिरपि प्राह, यस्मान्मामसंभाष्य अजानत एव शयानस्य शापोत्सर्गमसौ दुष्टगुरुश्चकार, तस्मात् तस्यापि देहः पतितो भविष्यतीति प्रतिशापं दत्त्वा देहमत्यजत् ॥ ५ ॥

तच्छापाच्च मित्रावरुणयोस्तेजसि वसिष्ठतेजः प्रविष्टम् उर्वशीदर्शनादुद्भूतवीर्यप्रपातयोः सकाशात् वसिष्ठो देहमपरं लेभे ॥ ६ ॥

निमेरपि तच्छरीरमतिमनोहरं तैलगन्धादिभिरुपस्क्रियमाणं नैव क्लेदादिकं दोषमवाप, सद्योमृतमिव तस्थौ ॥ ७ ॥

यज्ञसमाप्तौ च भागग्रहणायागतान् देवान् ऋत्विज ऊचुः यजमानाय वरो दीयताम् इति। देवैश्छन्दितो निमिराह ॥ ८ ॥

भगवन्तोऽखिलसंसारदुःखहन्तारः न ह्येतादृगन्यत् दुःखमस्ति, यच्छरीरात्मनोर्वियोगो भवति, तदहमिच्छामि सकललोकलोचनेषु वस्तुम्, न पुनः शरीर-

---

अबोधितं मद्गुरुत्वं गौतमाय समर्पितं कर्मेदं अन्यस्मै समर्पयामो हम इति भावः। यतोऽस्मानपहायाऽऽदद कर्म आरब्धमित्यतो विदेहो भव इति शापं ददौ ॥ ४ ॥ माम् असंभाष्येति मां विनैव गौतम-द्वारा विनिहितं कर्म ज्ञातमिति मां प्रत्यनुक्त्वैव ॥ ५ ॥ तेजसि वीर्ये तेजः मित्रावरुणयोरत्वेन इति पाठे च एवार्थः। यद्वा उद्भूतो वीर्यप्रपातो ययोस्तयोर्मित्रावरुणयोः ॥ ६ ॥

भवान् देहधारणं यज्ञसमाप्तिं संप्रवर्त्तिं चोदिष्यतीति वक्तुं देह-धारणप्रकारमाह, निमेरिति ॥ ७ ॥ छन्दितः वरार्थमिच्छां कारितः

अशक्यं कर्तुम्। इत्युक्ते देवैरसावशेषभूतानां नेत्रेषु आत्मा कारितः ॥ ९ ॥

ततो भूतान्युन्मेषनिमेषं चक्रुः। अपुत्रस्य च तस्य भूभुजः शरीरमराजकभीरवस्ते मुनयोऽरण्यां ममन्थुः ॥ १० ॥

तत्र कुमारो जज्ञे। जननाज्जनकसंज्ञाञ्चावाप ॥ ११ ॥

अभूद् विदेहोऽस्य पितेति वैदेहः मथनान्मिथिरभूत्। तस्योदावसुः पुत्रोऽभवत्। ततो नन्दिवर्धनः, तस्मात् सुकेतुः तस्यापि देवरातः, ततश्च बृहदुक्थः तस्य च महावीर्यः, तस्यापि सत्यधृतिः, ततश्च धृष्टकेतुः, धृष्टकेतोर्हर्यश्वः, तस्य च मनुः, मनोः प्रतिबन्धकः, तस्मात् कृतरथः, तस्मात् कृतिः, तस्य विबुधः तस्यापि महाधृतिः, तस्य च कृतरातः, ततो महारोमा, ततः सुवर्णरोमा, तस्यापि ह्रस्वरोमा, ततः सीरध्वजोऽभवत्। तस्य पुत्रार्थं यजनभुवं कृषतः सीरे सीता दुहिता समुत्पन्नासीत्। सीरध्वजस्य भ्राता सांकाश्याधिपतिः कुशध्वजनामा। सीरध्वजस्यापत्यं भानुमान् ॥ १२ ॥

भानुमतः शतद्युम्नः तस्य शुचिः, तस्मादूर्जवहो नाम पुत्रो जज्ञे। तस्यापि सत्यध्वजः, ततः कुनिः (कृतिः), कुनेरञ्जनः तत्पुत्रः ऋतुजित्, ततोऽरिष्टनेमिः, तस्मात् श्रुतायुः ततः सुपार्श्वः, तस्मात् सञ्जयः, (संनयः), ततः क्षेमारिः, तस्मादनेनाः, तस्मान्मीनरथः, (मासरथः)

[illegible] ॥ ९ ॥ [illegible]
[illegible] ॥ १० ॥ [illegible]

तस्य सत्यरथः, तस्य सात्यरथिः, सात्यरथेरुपगुः, तस्मात् श्रुतः (उपगुप्तः), तस्मात् सात्वतः, तस्मात् सुधन्वा (सुवर्चाः), तस्यापि सुभासः, ततः सुश्रुतः, तस्माज्जयः, जयपुत्रो विजयः, तस्य ऋतः, ऋतात् सुनयः, ततो वीतहव्यः, तस्मात् सञ्जयः, तस्मात् (क्षेमाश्वः, तस्मात्) धृतिः, धृतेर्बहुलाश्वः, तस्य पुत्रः कृतिः, कृतौ सन्तिष्ठतेऽयं जनकवंशः ॥ १३ ॥

इत्येते मैथिलाः । प्राचुर्य्येण एतेषामात्मविद्याश्रयिणो भूपाला भविष्यन्तीति ॥ १४ ॥

षष्ठोऽध्यायः ।

मैत्रेय उवाच ।

सूर्य्यस्य भगवन् ! वंशः कथितो भवता मम ।
सोमस्य वंशे त्वखिलान् श्रोतुमिच्छामि पार्थिवान् ॥ १ ॥
कीर्त्त्यते स्थिरकीर्त्तीनां येषामद्यापि सन्ततिः ।
प्रसादसुमुखस्तान्मे ब्रह्मन्नाख्यातुमर्हसि ॥ २ ॥

पराशर उवाच ।

श्रूयतां मुनिशार्दूल ! वंशः प्रथिततेजसः ।
सोमस्यानुक्रमात् ख्याता यत्रोर्व्वीपतयोऽभवन् ॥ ३ ॥

अनन्तात् ॥ ११ ॥ सात्वतः [illegible] ॥ १२ ॥ आत्मविद्याश्रयिणः आत्मविदः ॥ १४ ॥

सूर्य्यवंशप्रसङ्गेन सोमवंश[illegible] । [illegible] वर्ण्यते षष्ठे [illegible] ॥ १ ॥ [illegible], पराशरः [illegible]

अयं हि वंशोऽतिबलपराक्रमद्युतिशीलचेष्टावद्भिरति-गुणान्वितैर्नहुषययातिकार्त्तवीर्य्यार्जुनादिभिर्भूपालै-रलङ्कृतः ॥ ४ ॥

तमहं कथयामि, श्रूयताम्, अखिलजगत्स्रष्टुर्भगवतो-नारायणनाभिसरोजसमुद्भवाब्जयोनेर्ब्रह्मणः पुत्रोऽत्रिः, अत्रेः सोमः, तञ्च भगवानब्जयोनिरशेषौषधिद्विजनक्षत्राणामा-धिपत्येऽभ्यषेचयत् ॥ ५ ॥

स च राजसूयमकरोत् । तत्प्रभावादत्युत्कृष्टाधि-पत्याधिष्ठातृत्वाच्चैनं मद आविवेश ॥ ६ ॥

मदावलेपाच्चासौ सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार ॥ ७ ॥

बहुशश्च बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच । तस्य च बृहस्पतेर्द्वेषादुशनाः पार्ष्णिग्राहोऽभवत् ॥ ८ ॥

द्युतिः कान्तिः, शीलमाचारः, चेष्टा दानभोगादिक्रिया । अतिशयात् [illegible] भिद्वद्भिः, गुणाः मार्जवादयः, अतिगुणान्वितैः च अलङ्कृतः ॥ ४ ॥ [illegible] नारायणस्य नाभिसरोजिनी नाभिपद्मः तस्य जातं यदब्जं तदेव [illegible] कारणं यस्य तस्य अब्जयोनेर्ब्रह्मणः पुत्र इत्यन्वयः । ओषधी [illegible] इति [illegible] तत्र भगवानित्यादिना [illegible] ॥ ५ ॥ तत्प्रभावादस्य उत्कृष्टाधिपत्या-धिष्ठातृत्वं तत्, [illegible] एनं सोमं मद आविवेश ॥ ६ ॥ मद एव [illegible] ॥ ७ ॥ पार्ष्णिग्राहः सहायः ॥ ८ ॥ [illegible]

अङ्गिरसश्च सकाशोपलब्धविद्यो भगवान् रुद्रो बृहस्पतेः साहाय्यमकरोत् ॥ ९ ॥

यतश्चोशनाः, ततो हि जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यमं चक्रुः। बृहस्पतेरपि सकलदेवसैन्यसहायः शक्रोऽभवत् ॥ १० ॥

एवञ्च तयोरतीवोग्रः संग्रामस्तारकानिमित्तस्तारकामयो नामाभवत्। ततश्च समस्तशस्त्राण्यसुरेषु रुद्रपुरोगमा देवा देवेषु चाशेषदानवा मुमुचुः ॥ ११ ॥

एवञ्च देवासुराहवसंक्षोभक्षुब्धहृदयमशेषमेव जगद् ब्रह्माणं शरणं जगाम ॥ १२ ॥

ततश्च भगवानप्युशनसं शङ्करमसुरान् देवांश्च निवार्य्य बृहस्पतेस्तारामदात्। ताञ्चान्तःप्रसवामवलोक्य बृहस्पतिराह ॥ १३ ॥

नैष मम क्षेत्रे भवत्यान्यसुतो धार्य्यस्तदुत्सृजैनमलमतिधार्ष्ट्येनेति सा च तेनैवमुक्ता पतिव्रता भर्त्तृवचनात् तमीषिकास्तम्बे गर्भमुत्ससर्ज ॥ १४ ॥

अङ्गिरस उपलब्धा विद्या येन सः ॥ ९ ॥ यतो यस्य । बृहस्पतेरपि सकलदेवसैन्यं सहायो यस्य स शक्रोऽभवत् सहाय इति शेषः । तारकामय इति नामनिर्वचनं तारकानिमित्त इति ॥ ११ ॥

देवासुराहवक्षोभेण क्षुब्धं व्याकुलं हृदयं यस्य तज्जगत् ॥ १२ ॥ अन्तःप्रसवां गर्भिणीम् ॥ १३ ॥ पतिव्रता पत्युः छन्दानुवर्त्तिनी, तोयेन यथाह्रादितं गर्भमुत्सृष्टवती । इषीकास्तम्बे शरस्तम्बे ॥ १४ ॥

स चात्युत्कृष्टमान एवातितेजसा देवानां तेजांस्याचिक्षेप ॥ १५ ॥

बृहस्पतिरिन्दुश्च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवाः समुत्पन्नसन्देहास्तारां पप्रच्छुः, सत्यं कथयास्माकमतिसुभगे ! कस्यायमात्मजः ? सोमस्याथ बृहस्पतेः ? इत्युक्तापि सा तारा ह्रिया न किञ्चिदुवाच ॥ १६ ॥

बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे, ततः स कुमारस्तां शप्तुमुद्यतः प्राह च दुष्टे ! अम्ब ! कस्मान्मम तातं नाख्यासि ? अद्यैव ते व्यलीकलज्जावत्यास्तथा शास्तिमहमेवं करोमि, यथा नैवमद्याप्यतिमन्थरवचना भवतीति ॥ १७ ॥

अथ भगवान् पितामहस्तं कुमारं संनिवार्य स्वयमपृच्छत्तां तारां कथय वत्से ! कस्यायमात्मजः ? सोमस्याथ बृहस्पतेः ? इत्युक्ता लज्जमानाह सोमस्येति ॥ १८ ॥

ततः स्फुरदुच्छूनितामलकपोलकान्तिर्भगवानुडुपतिस्तमालिङ्ग्य कुमारं साधु साधु वत्स ! प्राज्ञोऽसीति बुध इति नाम चक्रे ॥ १९ ॥

स च ख्यातमेतत्, येनैलायामात्मजं पुरूरवसमुत्पादयामास ।

[illegible] अभिभूतवान् ॥ १५ ॥ माता भर्त्रा पितृ पुत्र इत्यादि- [illegible] पुत्र [illegible] [illegible] ॥ १६ ॥ मन्थरवचना [illegible] ॥ १७ ॥ [illegible] ॥ १८ ॥ स्फुरन्ती [illegible] ॥ १९ ॥ बुध इत्याख्यो बभौ पुरूरव

पुरूरवास्त्वतिदानशीलोऽतियज्वा अतितेजस्वी। यं सत्यवादिनमतिरूपवन्तं मित्रावरुणशापान्मानुषे लोके मया वस्तव्यमिति कृतमतिरुर्वशी ददर्श ॥ २० ॥

दृष्टमात्रे च तस्मिन्, अपहाय मानमशेषमपास्य स्वर्गसुखाभिलाषं तन्मना भूत्वा तमेवोपतस्थे ॥ २१ ॥

सोऽपि च तामतिशयितसकललोकस्त्रीकान्तिसौकुमार्यलावण्यातिविलासादिगुणामवलोक्य तदायत्तचित्तवृत्तिर्बभूव ॥ २२ ॥

उभयमपि तन्मनस्कमनन्यदृष्टि परित्यक्तसमस्तान्यप्रयोजनमभूत् ॥ २३ ॥

राजा तु प्रागल्भ्यात् तामाह ॥ २४ ॥

सुभ्रु! त्वामहमभिकामोऽस्मि प्रसीदानुरागमुद्वहेत्युक्ता लज्जावखण्डितमुर्वशी प्राह ॥ २५ ॥

भवत्वेवं, यदि मे समयपरिपालनं भवान् करोतीति ॥ २६ ॥

आख्याहि मे समयमित्यथ पृष्टा पुनरब्रवीत् ॥ २७ ॥

जनयामास तथा प्रागेवोक्तम्, स पुरूरवा उर्वश्यां षट् पुत्रान् जनयामास इति वक्तुं कथामाह। पुरूरवास्त्वित्यादिना स मनुष्यमात्रिं, अभिरूपं रूपं धनं वक्ष्यति तम् उर्वशी ददर्श इत्यन्वयः ॥ २० ॥ मानमर्यादामपहाय उपतस्थे अभजत् ॥ २१ ॥ कान्तिः शोभा, सौकुमार्यं मार्दवं, लावण्यमङ्गसुन्दरत्वं, विलासः अङ्गचेष्टासु मानुषादिवशो विशेषः, अतिशयिताः अभिभूयविशेषिताः सकललोकस्त्रीणां कान्त्यादयो गुणा यया ताम् ॥ २२ ॥ उभयमपि तद् मिथुनरूपं तन्मनस्कम् अन्यो-

शयनसमीपे ममोरणकद्वयं पुत्रभूतं नापनेयम् । २८ ॥

भवांश्च मया नग्नो न द्रष्टव्यः, घृतमात्रञ्च ममाहारः । इत्येवमेवेति भूपतिराह । तया च सहावनिपतिरलकायां चैत्ररथादिवनेषु अमलपद्मखण्डेषु अतिरमणीयेषु मानससरःसु अतिरममाण एकषष्टिवर्षसहस्राणि अनुदिनप्रवर्धमानप्रमोदोऽनयत् । उर्वशी च तदुपभोगात् प्रतिदिनप्रवर्धमानानुरागा अमरलोकवासेऽपि न स्पृहां चकार । विना चोर्वशीं सुरलोकोऽप्सरसां सिद्ध गन्धर्वाणाञ्च नातिरमणीयोऽभवत् । २९ ॥

ततश्चोर्वशीपुरूरवसोः समयविद्विश्वावसुर्गन्धर्वसमवेतो निशि शयनाभ्याशादेकमुरणकं जहार । ३० ।

तस्याकाशे नीयमानस्योर्वशी शब्दमशृणोत् । उवाच च, ममानाथायाः पुत्रः केनाप्यपह्रियते कं शरणमुपयामीत्याकर्ण्य राजा, नग्नं मां देवी द्रक्ष्यतीति न ययौ । अथान्यमप्युरणकमादाय गन्धर्वा ययुः । तस्याप्यपह्रियमाणस्य शब्दमाकर्ण्य आकाशे पुनरपि, अनाथास्म्यहमभर्तृका कुपुरुषाश्रयेति आर्तराविणी बभूव । राजाप्यमर्षवशादन्धकारमेतदिति खड्गमादाय दुष्ट दुष्ट हतोऽसीति

[illegible]

व्याहरन्नभ्यधावत्। तावच्च गन्धर्वैरतीवोज्ज्वला विद्युत् जनिता। तत्प्रभया चोर्वशी राजानमपगताम्बरं दृष्ट्वा अपवृत्तसमया तत्क्षणादेवापक्रान्ता ॥ २९ ॥

परित्यज्य तावप्युरणकौ गन्धर्वाः सुरलोकमुपागताः। राजापि तौ मेषावादाय हृष्टमनाः स्वशयनमायातो नोर्वशीं ददर्श ॥ ३० ॥

तां चापश्यन्नपगताम्बर एवोन्मत्तरूपो बभ्राम। कुरुक्षेत्रे चाम्भोजसरस्यन्याभिश्चतसृभिरप्सरोभिः समवेतामुर्वशीं ददर्श। ततश्चोन्मत्तरूपो राजा, जाये! हे तिष्ठ, मनसि घोरे! वचसि, इत्यनेकप्रकारं सूक्तमवोचत् ॥ ३२ ॥

आह चोर्वशी, महाराज! अलमनेनाविवेकचेष्टितेन, अन्तर्वत्न्यहम्, अब्दान्ते भवतात्रागन्तव्यम्, कुमारस्ते भविष्यति, एकाञ्च निशामहं त्वया सह वत्स्यामि, इत्युक्तः प्रहृष्टः स्वपुरमाजगाम। तासाञ्चाप्सरसामुर्वशी कथयामास, अयं स पुरुषोत्कृष्टो, येनाहमेतावन्तं कालमनुरागाकृष्टमनसा सहोषिता ॥ ३४ ॥

अनयनमङ्गेन उर्वश्या नियमं दर्शयति । तेन चोर्वश्येत्यादिना तत्क्षणादेवापक्रान्तेत्यन्तेन ॥ १९ ॥ गगनात् दोषाच्छयननिकटात् ॥ २० ॥ गगने चेद्रः, अपवृत्तोऽपगतः समयः स्थितिहेतुर्यस्याः सा ॥ २१ ॥

पुनश्चोर्वशीं कुमाराय प्रतिपुष्टोत्पत्तिं सम्मोहनात् उपायान्निश्च यक्ष्यु-माह, पुरूरवा इत्यादिना यावदध्यायसमाप्ति । अस्योऽनुक्तं सदसि-वचो । जाये ! तिष्ठ, मनसि तिष्ठ घोरे ! निर्दये ! वचसि वाक्यमिश्र-मार्थं तिष्ठ । यथा वचसि तिष्ठ, अद्यापि कुर्विस्तस्य । इत्याद्यनेक-प्रकारं सूक्तमितिपदं वेदसूक्तमुक्तरूपमार्थम् । सूक्तमिति पाठे

इत्येवम् उक्तमात्रा अप्सरस ऊचुः. साधु साध्वस्य रूपम् अनेन सहास्माकमपि सर्वकालमभिरन्तुं स्पृहा भवेदिति ॥ २५ ॥

अब्दे च पूर्णे स राजा तत्राजगाम, कुमारञ्चायुषमस्मै तदोर्वशी ददौ. एकाञ्च निशां तेन राज्ञा सहोषित्वा पञ्च-पुत्रोत्पत्तये गर्भमवाप ॥ २६ ॥

उवाच चैनं राजानम्, अस्मत्प्रीत्या महाराजाय सर्व एव गन्धर्वा वरदाः सम्वृत्ताः, तस्मात् व्रियतां वर इति ॥ २७ ॥

आह राजा च. विजितसकलारातिरविहतेन्द्रियसामर्थ्यो बन्धुमानमितबलकोषः, नान्यदस्माकमुर्वशीसालोक्यात् प्राप्यमस्ति तदहमनया सहोर्वश्या कालं नेतुमभिलषामि ॥ २८ ॥

[illegible] । [illegible] ॥ २२ ॥ [illegible] ॥ २४ ॥ [illegible] भावः ॥ २५ ॥ [illegible] ॥ २६ ॥ [illegible] सर्वे वरदाः सम्वृत्ताः ॥ २७ ॥ नान्यदस्माकमित्यादि राजा वाक्येऽन्वयः ।

इत्युक्ते गन्धर्वा राज्ञेऽग्निस्थालीं ददुः ॥ ३९ ॥

अथ च, एनमग्निम् आम्नायानुसारी भूत्वा त्रिधा कृत्वा उर्वशीसलोकतामनोरथमुद्दिश्य सम्यक् यजेथाः, ततोऽवश्यमभिलषितमवाप्स्यसि ॥ ४० ॥

इत्युक्तस्तामग्निस्थालीमादायाजगाम। अन्तरटव्याम् अचिन्तयत्, अहो मे अतिमूढता! यदग्निस्थाली मया नीता नोर्वशीति। अथैनामटव्यामेवाग्निस्थालीं तत्याज, स्वपुरञ्चाजगाम ॥ ४१ ॥

व्यतीतार्द्धरात्रौ विनिद्रश्चाचिन्तयत्, ममोर्वशीसालोक्य-प्राप्त्यर्थमग्निस्थाली गन्धर्वैर्दत्ता। सा च मया अटव्यां परित्यक्ता। तदहं तत्र तदाहरणाय यास्यामि, इत्युत्थाय तत्राप्युपगतो नाग्निस्थालीमपश्यत्। शमीगर्भञ्चाश्वत्थमग्निस्थालीस्थाने दृष्ट्वा अचिन्तयत्, मयात्र स्थाली निक्षिप्ता, सा चाश्वत्थः शमीगर्भोऽभूत्। तदेतमेवाहमग्निरूपमादाय स्वपुरमभिगम्य अरणीं कृत्वा तदुत्पन्नाग्नेरुपास्तिं करिष्यामि इति ॥ ४२ ॥

अन्तरटव्यां मार्गमध्ये। विभक्त्यादि इत्युक्ते इत्यत्र सन्धिः पूर्वापरयोः सम्बध्यते ॥ ३८ ॥ उर्वशीलोकप्राप्तिम् अग्निस्थालीलाभे-नाग्निस्थालीं ददुः ॥ ३९ ॥ आम्नायानुसारी वेदविधौ दत्तचित्तः गार्ह-पत्याहवनीयदक्षिणाग्निरूपेणाग्निं त्रिधा कृत्वा मनोरथमुद्दिश्य कृत्वा ॥ ४० ॥ शमीगर्भोऽश्वत्थमध्यादुत्थित एवाग्निररणिकाष्ठोपयुक्त इति दर्शय-न्नाह, अन्तरटव्यामिति। यद्यप्यग्निं त्रिधा कृत्वा उर्वशीलोकमुद्दिश्य यजेथा इत्येवं गन्धर्वैरुक्तं न त्वयमुर्वशीति तथापि मोहवशात् पुरू-रवा उर्वशीविरहवशात् इदानीमचिन्तयदित्यर्थः ॥ ४१ ॥ शमीगर्भ शम्या गर्भे स्थितम् ॥ ४२ ॥ एवमेव यथा निक्षिप्तमेव आहर-

एवमेव स्वपुरमुपगतोऽरणीं चकार ॥ ४३ ॥

तत्प्रमाणेनाङ्गुलैः कुर्वन् गायत्रीमपठत् । पठतश्चाक्षरसंख्यान्येवाङ्गुलान्यरण्यभवत् ॥ ४४ ॥

तत्राग्निं निर्मथ्याग्नित्रयमाम्नायानुसारी भूत्वा जुहाव, उर्वशीसालोक्यं चैव फलमभिसंहितवान् । तेनैवाग्निविधिना बहुविधान् यज्ञान् इष्ट्वा गन्धर्वलोकान् प्राप्य उर्वश्या सह वियोगं नावाप ॥ ४५ ॥

एकोऽग्निरादावभवत् ऐलेन त्वत्र मन्वन्तरे त्रेता प्रवर्त्तिता ॥ ४६ ॥



सप्तमोऽध्यायः ।

पराशर उवाच ।

तस्याप्यायुर्धीमानमावसुर्विश्वावसुः श्रुतायुः शतायुः (श्रुतायुः) सञ्ज्ञाः षडभवन् पुत्राः ॥ १ ॥

[illegible] ऽरणीं चकार ॥ ४३ ॥ गायत्र्यक्षरसङ्ख्यान्यङ्गुलानि [illegible] ॥ ४४ ॥ [illegible] ॥ ४५ ॥ [illegible] त्रेता [illegible] ॥ ४६ ॥

[illegible] ॥ १ ॥

अमावसोर्भीमो नाम पुत्रोऽभवत्। भीमस्य काञ्चनः, काञ्चनात् सुहोत्रः, तस्यापि जह्नुः। योऽसौ यज्ञवाटमखिलं गङ्गाम्भसा प्लावितमालोक्य क्रोधसंरक्तनयनो भगवन्तं यज्ञपुरुषमात्मनि परमेण समाधिना समारोप्याखिलामेव गङ्गामपिबत्॥ २॥

अथैनं देवर्षयः प्रसादयामासुः, दुहितृत्वे चास्य गङ्गामनयन्। जह्नोश्च सुजह्नुर्नाम पुत्रोऽभवत्। तस्याप्यजकः, ततो बलाकाश्वः, तस्मात् कुशः, कुशस्य कुशाम्बकुशनाभामूर्त्तरयामावसवश्चत्वारः पुत्रा बभूवुः॥ ३॥

तेषां कुशाम्बः शक्रतुल्यो मे पुत्रो भवेदिति तपश्चचार। तञ्चोग्रतपसमवलोक्य मा भवत्वन्योऽस्मत्तुल्यो वीर्येणेत्यात्मनैवास्येन्द्रः पुत्रत्वमगच्छत्॥ ४॥

गाधिर्नाम स कौशिकोऽभवत्। गाधिश्च सत्यवतीं नाम कन्यामजनयत्। तां च भार्गव ऋचीको वव्रे। गाधिरप्यतिरोषणाय अतिवृद्धाय च ब्राह्मणाय दातुमनिच्छन्नेकतः श्यामकर्णानामिन्दुवर्चसामनिलरंहसामश्वानां सहस्रं कन्याशुल्कमयाचत॥ ६॥

तेनापि ऋषिणा वरुणसकाशादुपलभ्य अश्वतीर्थोत्पन्नं तादृशमश्वसहस्रं दत्तम्॥ ७॥

अथैनं जह्नुं देवर्षयः प्रसादयामासुः, ततस्तां मुमोच। ततो दुहितृत्वेऽनयन् स्वजङ्घाद्वारेण योजनीयम्। अमूर्त्तरयामावसव इत्यत्र सन्धिरार्षः॥ ३॥ आत्मना स्वयमेवेन्द्रः पुत्रत्वमगच्छत्॥ ४॥ तदेवाह, गाधिरिति। कन्यायाः शुल्कं मूल्यम्॥ ६॥ तेनापि ऋचीकेन अश्वतीर्थं कान्यकुब्जे गङ्गाप्रदेशविशेषः, तस्मादुत्पन्नं जातम्, तेन पयोद्भूतमिति वा उपलभ्य प्राप्य॥ ७॥ चरुमसाधयत् तस्मात्

ततः तामृचीकः कन्यामुपयेमे। ऋचीकश्च तस्याश्चरुमपत्यार्थं चकार। तया प्रसादितश्च तन्मात्रे क्षत्रवरपुत्रोत्पत्तये चरुमपरं साधयामास ॥ ८ ॥

एष चरुर्भवत्या अयमपरश्चरुस्त्वन्मात्रा सम्यगुपयोज्य इत्युक्त्वा वनं जगाम ॥ ९ ॥

उपयोगकाले च तां माता सत्यवतीमाह सर्व एवात्मपुत्रमतिगुणमभिलषति, नात्मजायाभ्रातृगुणेष्वतीवादृतः भवत्यतोऽर्हसि मम त्वम् आत्मीयचरुं दातुं मदीयचरुमात्मनोपयोक्तुम् ॥ १० ॥

मत्पुत्रेण हि सकलभूमण्डलपरिपालनं कार्यम् ॥ ११ ॥

कियद्ब्राह्मणस्य बलवीर्यसम्पदित्युक्ता सा स्वं चरुं मात्रे दत्तवती ॥ १२ ॥

अथ वनादभ्यागत्य सत्यवतीमृषिरपश्यत्, आह चैनाम्, अतिपापे! किमिदमकार्यं भवत्या कृतम्। अतिरौद्रं ते वपुर्लक्ष्यते, नूनं त्वया त्वन्मातृसात्कृतश्चरुरुपयुक्तो न युक्तमेतत् ॥ १३ ॥

मया हि तत्र चरौ सकलैव शौर्यवीर्यबलसम्पदारोपिता, त्वदीये चरावप्यखिलशान्तिज्ञानतितिक्षादिका

प्रसादितः तन्मात्रे क्षत्राख्या मात्रे दातुं क्षत्रवरपुत्रोत्पत्तये चरुम् ॥ ८ ॥ एष भवत्या अयमपरस्त्वन्मात्रोपयोज्यो भवतीव इत्युक्त्वा ऋचीकः वनं ययौ ॥ ९ ॥ आत्मनो जायाया भ्रातृगुणेषु, बहो नातीवादृतो भवति । मम चरुं त्वं भक्षय ॥ १० ॥ कियद्ब्राह्मणस्येति शेषः । इत्युक्त्वा सती स्वं चरुं मात्रे दत्तवती, अथ च मातृचरुं बुभुजे इति शेषः ॥ १२ ॥ सत्यवतीमृषिरपश्यत्, रौद्ररूपामिति शेषः ॥ १३ ॥ मात्रे चरुः । मातृचरुश्च इति पाठे पाठः

ब्राह्मणगुणसम्पत्। एतच्च विपरीतं कुर्वत्याः तवातिरौद्रास्त्रधारणमारणनिष्ठः क्षत्रियाचारः पुत्रो भविष्यत्यस्याश्चोपशमरुचिः ब्राह्मणाचारः ॥ १४ ॥

इत्याकर्ण्यैव सा तस्य पादौ जग्राह। प्रणिपत्य च एनमाह, भगवन्! मयैतदज्ञानादनुष्ठितं प्रसादं मे कुरु, मैवंविधः पुत्रो भवतु, काममेवंविधः पौत्रो भवत्वित्युक्तो मुनिरप्याह, एवमस्तु इति ॥ १५ ॥

अनन्तरञ्च सा जमदग्निमजीजनत्। तन्माता च विश्वामित्रं जनयामास। सत्यवती च कौशिकी नाम नद्यभवत्। जमदग्निरिक्ष्वाकुवंशोद्भवस्य रेणोः तनयां रेणुकामुपयेमे। तस्याञ्चाशेषक्षत्रवंशहन्तारं परशुराममंशं भगवतः सकललोकगुरोर्नारायणस्यायं जमदग्निरजीजनत् ॥ १६ ॥

विश्वामित्रपुत्रस्तु भार्गव एव शुनःशेफो नाम देवैर्दत्तः ततश्च देवरातनामाभवत्। ततश्चान्ये मधुच्छन्दजयकृतदेव-

चतुर्मात्रवक्रभ्रोऽस्त्वर्थ । स्यार्थं च । मुनिरप्याह, एवमस्त्विति ॥ १५ ॥ आत्मा वै जायते पुत्र इति न्यायात् मुनिरयमपि पुत्रे चरुफलाभावेन, न चेत् पुत्रे पौत्रोऽपि स्यात् तत्फलं पौत्रे जातमिति भावः ॥ १६ ॥ भार्गवः भृगुवंशोद्भवः शुनःशेफः पशुत्वक्रीतो नरमेधे हरिश्चन्द्रपरीक्षेण क्रतुपुरोऽपि स्तुतैर्देवैर्विश्वामित्राय दत्तः पुत्रो देवरातनामा पुत्रोऽभवदित्यर्थः ॥ १६ ॥ ततश्चान्ये मधुच्छन्दादयः पुत्रा औरसा बभूवुः ॥ १७ ॥ एवं भार्गवस्य शुनःशेफस्य कौशिकगोत्रत्वं देवरातप्रवरत्वञ्च उक्तम्, अन्येषां औरसानां मधुच्छन्दादिप्रवरत्वमिति प्रवरभेदात् बहूनि कौशिकगोत्राणि कल्पान्तरेषु वैवाह्यानि न तु सपाव-

देवाष्टककच्छपहारीतकाख्या विश्वामित्रपुत्रा बभूवुः ॥१७॥

तेषाञ्च बहूनि कौशिकगोत्राणि ऋष्यन्तरेषु वै-
वाह्यानि भवन्तीति ॥ १८ ॥

—:०:—

अष्टमोऽध्यायः।

पराशर उवाच।

पुरूरवसो ज्येष्ठः पुत्रो यस्त्वायुर्नामा, स राहोर्दु-
हितरम् उपयेमे। तस्यां स पञ्च पुत्रान् जनयामास।
नहुषक्षत्रवृद्धरम्भरजिसंज्ञाः, तथैवानेनाः पञ्चमः पुत्रोऽभूत।
क्षत्रवृद्धात् सुहोत्रः पुत्रोऽभूत। काश्यलेशगृत्समदाख्याः
पुत्रास्त्रयोऽभवन्। गृत्समदस्य शौनकश्चातुर्वर्ण्यप्रवर्त्त-
यिताभूत् ॥ १ ॥

काशस्य काशिराजः, ततो दीर्घतमाः पुत्रोऽभवन्।
धन्वन्तरिस्तु दीर्घतमसोऽभूत्। स हि संसिद्धकार्यकरणः
सकलसम्भूतिष्वशेषज्ञानवित् ॥ २ ॥

ऋषेः। एतत् गोत्रान्तरेऽपि द्रष्टव्यम्। तथाच "एक एव ऋषिर्यावत्
प्रवरेष्वनुवर्त्तते। तावत् समानगोत्रत्वमन्यत्र [illegible] भवेत्।" इति
[illegible] ॥ १८ ॥

[illegible] ॥ [illegible] धन्वन्तरिः [illegible] ॥ १ ॥

[illegible] ॥ २ ॥

भगवता नारायणेन च अतीतसंभूतावस्मै वरो दत्तः ॥३॥

काशिराजगोत्रेऽवतीर्य्य त्वमष्टधा सम्यगायुर्वेदं करिष्यसि। यज्ञभाग् भविष्यसि इति ॥ ४ ॥

तस्य च धन्वन्तरेः पुत्रः केतुमान्। केतुमतो भीमरथः तस्यापि दिवोदासः, ततः प्रतर्द्दनः। स च मद्रश्रेण्यवंशविनाशादशेषाः शत्रवोऽनेन जिता इति शत्रुजिदभवत् ॥५॥

तेन च प्रीतिमतात्मपुत्रो वत्स वत्सेत्यभिहितः, ततो वत्सोऽभवत् ॥ ६ ॥

सत्यव्रततया ऋतध्वजसंज्ञामवाप। पुनश्च कुवलयनामानमश्वं लेभे, कुवलयाश्व इत्यस्यां पृथिव्यां प्रथितः ॥७॥

तस्य च वत्सस्य पुत्रोऽलर्को नामाभवत्। यस्यायमद्यापि श्लोको गीयते।

षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च।

अलर्कादपरो नान्यो बुभुजे मेदिनीं पुरा ॥ ८ ॥

अतीतसम्भूतौ क्षीराब्धिजन्मनि ॥ ३ ॥ अष्टधेति। अष्टप्रकारमायुर्वेदं करिष्यसि। अष्टाङ्गमिति वा पाठः। तदुक्तं "कायबालग्रहोर्द्ध्वाङ्ग शल्यं दंष्ट्रा जरा विषम्। अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संस्थिता॥" यद्वा "शल्यं, शलाक्यं, भूतविद्या, कायचिकित्स अगदतन्त्रं, रसायनं, वाजीकरणं, कुमारतन्त्रम्," इत्यष्टधा ॥ ४ ॥ प्रतर्द्दनस्यैव शत्रुजित् पदेन व्याख्यानतः सर्वा निर्वाह्या, तेन वेत्र्यादिना प्रथित इत्यन्वयः ॥५॥ तेन दिवोदासेनात्मपुत्रः प्रतर्द्दनः वत्स वत्सेत्यनेनाभिहितस्ततो वत्सवंशोऽभवत् ॥ ६ ॥ कुवलयनामानं कुं पृथ्वीं वलयति वेष्टयतीति परिवेष्टनेनाक्रामतीति तथा तथाभूतमश्वं लेभे इति कुवलयाश्वसंज्ञा इति ॥ ७ ॥ षष्टिवर्षसहस्राधिकं यावदलर्कादपरो न नृपो तावद्

तथालर्कस्य सन्नतिर्नामात्मजोऽभवत्। ततः सुनीथः, तस्य सुकेतुः, ततो धर्मकेतुः, ततः सत्यकेतुः, तस्मात् विभुः, तत्तनयः सुविभुः, ततश्च सुकुमारः, तस्यापि धृष्टकेतुः, ततश्च वैनहोत्रः, ततश्च भार्गः, भार्गस्य भार्गभूमिः, अतश्चातुर्वर्ण्य-प्रवृत्तिः। इत्येते काश्यपा भूपतयः कथिताः। रजेस्तु सन्ततिः श्रूयतामिति ॥ ९ ॥

नवमोऽध्यायः।

पराशर उवाच।

रजेः पञ्चपुत्रशतान्यतुलबलवीर्यसाराण्यासन्। देवासुर-संग्रामारम्भे परस्परवधेप्सवो देवाश्चासुराश्च ब्रह्माण-मुपेत्य पप्रच्छुः ॥ १ ॥

भगवन्! अस्माकमत्र विरोधे कतरः पक्षो जेता भविष्यतीति। अथाह भगवान्, येषामर्थे रजिरात्तायुधो योत्स्यतीति। अथ दैत्यैरुपेत्य रजिरात्मसाहाय्यदानाया-भ्यर्थितः प्राह, योत्स्येऽहं भवतामर्थे यद्यहममरजयाद्-भवतामिन्द्रो भविष्यामि इत्याकर्ण्यैतत् तैरभिहितो न

[illegible] ॥ ८ ॥ भार्गभूमिः [illegible] ॥ ९ ॥

रजेः [illegible] ॥ [illegible] ॥ १ ॥ न [illegible]

वयमस्माकं वदिष्यामोऽन्यथा करिष्यामः । अस्माकमिन्द्रः प्रह्लादस्तदर्थमेवायमुद्यमः । इत्युक्त्वा गतेष्वसुरेषु देवैरप्यसावेवमेवोक्तः । तेनापि च तथैवोक्ते देवैरिन्द्रस्त्वं भविष्यसीति समन्वीप्सितम् ॥ २ ॥

रजिनापि देवसैन्यसहायेनानेकैर्महास्त्रैः तदशेषमसुरबलं निसूदितम् । अथ जितारातिपक्षश्च इन्द्रो रजिचरणयुगलमात्मशिरसा निपीड्याह भयत्राणदानादस्मत्पिता भवान् अशेषलोकानामुत्तमोत्तमो भवान् यस्याहं पुत्रस्त्रिलोकेन्द्रः ॥ ३ ॥

स चापि राजा प्रहस्याह, एवमस्तु, अनतिक्रमणीया हि वैरिपक्षादप्यनेकविधचाटुवाक्यगर्भा प्रणतिः, इत्युक्त्वा स्वपुरम् आजगाम ॥ ४ ॥

शतक्रतुरपीन्द्रत्वं चकार । स्वर्याते च रजौ नारदर्षिचोदिता रजिसुताः शतक्रतुमात्मपितृपुत्रमाचाराद्राज्यं याचितवन्तः ॥ ५ ॥

अप्रदाने चावजित्यातिबलिनः स्वयमिन्द्रत्वं

दानीं वदिष्यामः, किन्तु वाच्यं ऽन्यथा प्रह्लादमिन्द्रं करिष्यामः किन्तु भवन्तमेवेन्द्रः प्रह्लाद इत्युक्त्वा निर्गतेषु समन्वीप्सितमनुमतम् ॥ २ ॥ भयत्राणदानादिति "अन्नदाता भयत्राता कन्यादाता तथैव च । जनिता चोपनेता च पञ्चैते पितरः स्मृताः ॥" इत्युक्तेः । भवानिति पदावृत्तिरोत्कर्षभेदात् ॥ ३ ॥ अनेकविधानि चाटूनि प्रियाणि वाक्यानि गर्भे यस्याः सा प्रणतिः वैरिपक्षादपि वैरिपक्षस्थितस्यापि अनतिक्रमणीया वैरिणो भयत्राणादुपलक्षणमुपकारकस्य, किं पुनर्मद्वाहार्येनेति भाव ॥ ४ ॥ पितृत्वं पुत्रत्वं भवतीति अनुक्त्वाचाराद्राज्यमिन्द्रत्वमात्मपितुः पुत्रत्वमापन्नमिन्द्रं याचितवन्तः ॥ ५ ॥ बहुतिथे दीर्घकाले बहुतं

चक्रुः। ततश्च बहुतिथे काले व्यतीते बृहस्पतिमेकान्ते दृष्ट्वापहृतत्रैलोक्ययज्ञभागः शतक्रतुरुवाच । ६ ।

बदरीफलमात्रमप्यर्हसि मम आप्यायनाय पुरोडाशखण्डं दातुम्, इत्युक्तो बृहस्पतिरुवाच, यद्येवं पूर्वमेव त्वयाहं चोदितः स्यां तन्मया त्वदर्थं किम् अकर्त्तव्यमिति । ७ ।

स्वल्पैरेवाहोभिस्त्वां निजं पदं प्रापयिष्यामि, इत्यभिधाय तेषामनुदिनमभिचारिकं बुद्धिमोहाय शक्रस्य च तेजोऽभिवृद्धये जुहाव। ते चापि तेन बुद्धिमोहेनाभिभूयमाना ब्रह्मद्विषो धर्मत्यागिनो वेदवादपराङ्मुखा बभूवुः। ततश्च तानपेतधर्माचारान् इन्द्रो जघान। पुरोहिताप्यायिततेजाश्च दिवमाक्रामत। एतदिन्द्रस्य स्वपदच्यवनारोहणं श्रुत्वा पुरुषः स्वपदभ्रंशं दौरात्म्यं वा न च आप्नोति। रम्भस्त्वनपत्योऽभवत्। क्षत्रवृद्धसुतः प्रतिक्षत्रः, तत्पुत्रः सञ्जयः, तस्यापि जयः, ततश्च विजयः, तस्माच्च यज्ञकृत्, तस्य हर्यवर्धनः, हर्यवर्धनसुतः सहदेवः, तस्मादहीनः, तस्य जयसेनः, ततश्च संकृतिः, तत्पुत्रः क्षत्रधर्मा, इत्येते क्षत्रवृद्धस्य। अतो नहुषवंशं वक्ष्यामि, इति ॥ ८ ॥

इदमेवाह बदरी इ: ॥ ६ ॥ [illegible] ॥ ७ ॥ [illegible] ॥ ८ ॥

दशमोऽध्यायः ।

पराशर उवाच ।

यतिययातिसंयात्यायातिवियातिकृतिसंज्ञा नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः। यतिस्तु राज्यं नैच्छत्। ययातिस्तु भूभृदभवत्, उशनसश्च दुहितरं देवयानीं शर्मिष्ठाञ्च वार्षपर्वणीमुपयेमे ॥ १ ॥

अत्रानुवंशश्लोको भवति ।

यदुं च तुर्वसुञ्चैव देवयानी व्यजायत ।
द्रुह्युञ्चानुञ्च पूरुञ्च शर्मिष्ठा वार्षपर्वणी ॥ २ ॥

काव्यशापाच्चाकालेनैव ययातिर्जरामवाप ॥ ३ ॥

प्रसन्नशुक्रवचनाच्च जरां संक्रामयितुं ज्येष्ठं पुत्रं यदुम् उवाच, त्वन्मातामहशापादियमकालेनैव जरा मामुपस्थिता। तामहं तस्यैवानुग्रहात् भवतः सञ्चारयाम्येकं वर्षसहस्रं, न तृप्तोऽस्मि विषयेषु, त्वद्वयसा विषयानहं भोक्तुमिच्छामि। नात्र भवता प्रत्याख्यानं

दशमे नाहुषस्य ययातेर्वंश उच्यते। बहुगीततमेव सर्वेषां वैलक्षण्यमुपपादयति ॥ उपयेमे देवयानीं शाक्रेय शर्मिष्ठां मात्स्यर्येणाववचेयम् ॥ १ ॥ अनुवंशो वंशमनुगतः श्लोक इत्यर्थः ॥ २ ॥ काव्यशापादिति। शर्मिष्ठायां दास्यां ययातिना पुत्रोत्पादनं देवयान्या कथितं श्रुत्वा [illegible] शापादकाले जरां ययातिरवाप ॥ ३ ॥ प्रसन्नशुक्रवचनादिति पुनः प्रसन्नशुक्रस्य वचनं, अन्यस्मै जरां संक्रामयितुमिति,

असंख्याम् इत्युक्तः स नैच्छत् तां जरामादातुम्। तथापि पिता शशाप, त्वत्प्रसूतिर्न राज्यार्हा भविष्यतीति ॥ ५ ॥

अनन्तरञ्च द्रुह्युं तुर्वसुम् अनुञ्च पृथिवीपतिर्जरा-ग्रहणार्थं स्वयौवनप्रदानाय च चोदयामास। तैरप्येकैकेन प्रत्याख्यातस्तांश्च शशाप। अथ शर्मिष्ठा-तनयमशेषकनीयांसं पूरुं तथैवाह, स चातिप्रवणमतिः प्रणम्य पितरं सबहुमानं महान् प्रसादोऽयमस्माकम्, इत्युदारम् अभिधाय जरां प्रतिजग्राह, स्वकीयञ्च यौवनं पित्रे ददौ। सोऽपि च नवं यौवनमासाद्य धर्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं विषयं चचार, सम्यक् प्रजापालनमकरोत् ॥ ६ ॥

विश्वाच्या सहोपभोगं भुक्त्वा कामानामन्तमवाप्स्यामी-त्यनुदिनं तन्मनस्को बभूव ॥ ७ ॥

अनुदिनञ्च उपभोगतश्च कामानतीव रम्यान् मेने ॥ ८ ॥

ततश्चैवमगायत।

ययातिरुवाच।

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ ९ ॥

नहि तु [illegible] यतोऽद्य यौवनं च प्राप्स्यामीति, इत्याशयेन शंकायामिह-वनाद् दौरात्म्याद् यदुश्चाह। यथा यौवनेन ॥ ५ ॥ चचार भुक्त ॥ ६ ॥ विश्वाच्या अप्सरसा ॥ ७ ॥ उपभोगतः कामानाम्। अतिरम्यान् विषयान् अतीव मेने अभिवर्द्धमानाभिलाषत्वात् ॥ ८ ॥ ततश्च निर्वेदात् [illegible], न [illegible]

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
एकस्यापि न पर्य्याप्तं तदित्यतितृषं त्यजेत् ॥ १० ॥
यदा न कुरुते भावं सर्वभूतेषु पापकम् ।
समदृष्टेस्तदा पुंसः सर्वा एव सुखा दिशः ॥ ११ ॥
या दुस्त्यजा दुर्मतिभिर्या न जीर्य्यति जीर्य्यतः ।
तां तृष्णां संत्यजन् प्राज्ञः सुखेनैवाभिपूर्य्यते ॥ १२ ॥
जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ॥ १३ ॥
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वेव जायते ॥ १४ ॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥ १५ ॥

यावत्तत्पर्याप्तम् । तृष्णायां सत्यां दोषः ॥ ९ ॥ यदि न तृष्णापूर्त्तेरशक्यतया दुःखहेतुत्वात् दोषदृष्टिं कुर्वन् तां त्यजेदिति भावः ॥ १० ॥

तर्हि विषयत्यागे कथं सुखप्राप्तिरत आह, यदा सर्वभूतेषु विषयेषु भावं बुद्ध्याख्यं पापकं रागादिजनकं न कुरुते किन्तु तद्भोगित्वेन समदृष्टिस्तदा, दुर्विषयाभावाद्दुःखाभावात् सर्वा दिशः सुखमय्यः, दुःखाभावे सुखत्वोपचारात् ॥ ११ ॥ ननु सा दुस्त्यजेति चेत् ? सत्यं दुर्मतिभिर्दुस्त्यजापि दोषदर्शनवता तु त्यक्तुं शक्यैवेत्याह, या दुस्त्यजेति । सुखेनाभिपूर्य्यत इति पूर्णत्वानुवादः ॥ १२ ॥ दोषदृष्टिं दर्शयन् तृष्णायाः जीर्य्यतोऽपि दुष्पूरत्वमाह, जीर्य्यन्तीति द्वाभ्याम् ॥ १३ ॥ पूर्णमित्यत्र भवत्वत्र सर्वं त्यजन्नुपभुक्तमिति, तथापीति । एतां तृष्णाम् ॥ १४ ॥ मत्स्यविनः मृगैरेवाभिहिताम् ॥ १५ ॥

परागर उवाच ।

पूरोः सकाशादादाय जरां दत्त्वा च यौवनम् ।
राज्येऽभिषिच्य पूरुञ्च प्रययौ तपसे वनम् ॥ १६ ॥
दिशि दक्षिणपूर्वस्यां तुर्वसुं प्रत्यथादिशत् ।
प्रतीच्यां च तथा द्रुह्युं दक्षिणापथतो यदुम् ॥ १७ ॥
उदीच्यां च तथैवानुं कृत्वा मण्डलिनो नृपान् ।
सर्वपृथ्वीपतिं पूरुं सोऽभिषिच्य वनं ययौ ॥ १८ ॥

एकादशोऽध्यायः ।

पराशर उवाच

अतः परं ययातेः प्रथमपुत्रस्य यदोर्वंशमहं कथयामि । यत्राशेषलोकनिवासो मनुष्यसिद्धगन्धर्वयक्षराक्षसगुह्यककिम्पु-रुषाप्सरउरगविहगदैत्यदानवादित्यरुद्रवस्वश्विमरुद्देवर्षिमुमुक्षुधर्मार्थ-कामाभिलाषिभिः तत्फललाभाय सदाभिष्टुतोऽपरिच्छेद्य-माहात्म्यांशेन भगवाननादिनिधनो विष्णुरवततार ॥ १ ॥

अत्र श्लोकः ।

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ।
यत्रावतीर्णं विष्ण्वाख्यं परं ब्रह्म निराकृति ॥ २ ॥

---

१८ [illegible]

सहस्रजित्क्रोष्टुनलनघुसंज्ञाश्चत्वारो यदुपुत्रा बभूवुः। सहस्रजित्पुत्रः शतजित्। तस्य हैहयवेणुहयास्त्रयः पुत्रा बभूवुः। हैहयात् धर्मनेत्रः, ततः कुन्तिः, कुन्तेः साहञ्जिः, तत्तनयो महिष्मान्, तस्मात् भद्रश्रेण्यः, ततो दुर्दमः, तस्मात् धनकः, धनकस्य कृतवीर्यकृताग्निकृतवर्मकृतौजसश्चत्वारः पुत्राः। कृतवीर्यादर्जुनः सप्तद्वीपपतिर्बाहुसहस्रो जज्ञे। योऽसौ भगवदंशमत्रिकुलप्रसूतं दत्तात्रेयाख्यमाराध्य बाहुसहस्रम् अधर्मसेवानिवारणं स्वधर्मेण पृथिवीजयं धर्मतश्चानुपालनम् अरातिभ्योऽपराजयम् अखिलजगत्प्रख्यातपुरुषाच्च मृत्युम् इत्येतान् वरान् अभिलषितवान् लेभे च। तेनेयमशेषद्वीपवती पृथ्वी सम्यक् परिपालिता दशयज्ञसहस्राण्यसावयजत्। तस्य च श्लोकोऽद्यापि गीयते॥३॥

नूनं न कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः।
यज्ञैर्दानैस्तपोभिर्वा प्रश्रयेण श्रुतेन च॥४॥

अनष्टद्रव्यता च तस्य राज्येऽभवत्॥५॥

न विनष्टाः यत एतादृशोऽपि तस्य माहात्म्येन द्रव्यप्राप्तेः। 'अनष्टद्रव्यता चैव तस्य नासाभिमीलनात्' इति कूर्मोक्तेः॥२॥ माहिष्मत्यां पुर्यां दिग्विजयार्थमागतो रावणस्तेनार्जुनेन बद्धा स्वनगरे काले स्थापित इत्यन्वयः। कथमर्जुनेन? नर्मदाजलावगाहनक्रीडायां मदिरापानमदितामर्जुनेन यो बद्धो जलतात्(?) तटः कृतेन। एवं हि हरिवंशे जलक्रीडासक्तोऽर्जुन इव बाहुसहस्रेण प्रतिस्रोत प्रवाहात् तत्र शिबिरो रावणः तदभिमताय मदमत्तोऽर्जुनेन बद्धा स्वनगरे स्थापित इति।

एवं पञ्चाशीतिवर्षसहस्राण्यव्याहतारोग्यश्रीबलपराक्रमो राज्यमकरोत् माहिष्मत्यां दिग्विजयाभ्यागतो नर्मदाजलावगाहनक्रीडातिपानमदाकुलेनायत्नेनैव तेनाशेषदेवदैत्यगन्धर्वेशजयोद्भूतमदावलेपोऽपि रावणः पशुरिव बद्धः स्वनगरैकान्ते स्थापितः ॥ ६ ॥

यश्च पञ्चाशीतिवर्षसहस्रावसाने भगवन्नारायणांशेन परशुरामेणोपसंहृतः। तस्य च पुत्रशतप्रधानाः पञ्च पुत्रा बभूवुः शूरशूरसेनवृषसेनमधुध्वजजयध्वजसंज्ञाः। जयध्वजात् तालजङ्घः पुत्रोऽभवत्। तालजङ्घस्य तालजङ्घाख्यं पुत्रशतमासीत् तेषां ज्येष्ठो वीतिहोत्रः, तथान्यो भरतः, भरतात् वृषसुजातो वृषस्य पुत्रो मधुरभवत्। तस्यापि वृष्णिप्रमुखं पुत्रशतमासीत्। यतो वृष्णिसंज्ञामेतद्गोत्रमवाप। मधुसंज्ञाहेतुश्च मधुरभवत्। यादवाश्च यदुनामोपलक्षणात् ॥ ७ ॥

द्वादशोऽध्यायः।

पराशर उवाच।

क्रोष्टोस्तु यदुपुत्रस्यात्मजो ध्वजिनीवान्। ततश्च स्वातिः, ततो रुशङ्कुः, रुशङ्कोश्चित्ररथः, तत्तनयः शशबिन्दुः चतुर्दशमहारत्नश्चक्रवर्त्त्यभवत् ॥ १ ॥

द्वादशे क्रोष्टुवंशस्तु यदुपुत्रस्य वर्ण्यते। शशबिन्दुर्वर्ण्यते यत्र ख्यातः कीर्त्तिमतां वरः। चतुर्दश महान्ति रत्नानि यस्य सः। रत्नानि चात्र चक्रादीनि सप्ताजीवानि भार्यादीनि सप्त जीवानि 'चक्रं रथो मणिः खड्गश्चर्म रत्नञ्च पञ्चमम्। केतुर्निधिश्च सप्तैव प्राणहीनानि चक्षते। भार्या पुरोहितश्चैव सेनानी रथकृच्च यः। पत्त्यश्वौ कलभाश्चेति प्राणिनः सप्त कीर्त्तिताः। चतुर्दशेति रत्नानि सर्वेषां चक्रवर्त्तिनाम्' ॥ १ ॥

तस्य च शतसहस्रं पत्नीनामभवत्। दशलक्षसंख्याश्च पुत्राः। तेषाञ्च पृथुयशाः, पृथुकर्म्मा, पृथुजयः, पृथुदानः, पृथुकीर्त्तिः, पृथुश्रवाः, षट् पुत्राः प्रधानाः। पृथुश्रवसः पुत्रः तमः, तस्मादुशनाः। यो वाजिमेधानां शतम् आजहार। तस्य च शितपुर्नाम पुत्रोऽभूत् तस्यापि रुक्मकवचः, ततः परावृत्, परावृतो रुक्मेषुपृथुरुक्मज्यामघपालितहरितसंज्ञाः तस्य पञ्चात्मजा बभूवुः। अत्राद्यापि ज्यामघस्य श्लोको गीयते॥ २॥

भार्य्यावश्यास्तु ये केचिद् भविष्यन्त्यथवा मृताः।
तेषान्तु ज्यामघः श्रेष्ठः शैब्यापतिरभूत् नृपः॥
अपुत्रा तस्य सा पत्नी शैब्या नाम तथाप्यसौ।
अपत्यकामोऽपि भयात् नान्यां भार्य्यामविन्दत॥

स त्वेकदातिप्रभूतगजतुरगसम्मर्दनातिदारुणे महाहवे युध्यमानः सकलमेवारातिचक्रमजयत्। तच्चारिचक्रमपास्त पुत्रकलत्रबन्धुबलकोषं स्वमधिष्ठानं परित्यज्य दिशः प्रविद्रुतम्॥ ३॥

तस्मिंश्च विद्रुतेऽतित्रासाल्लोलायतलोचनयुगलं त्राहि तात मातः। इत्याकुलविलापविधुरं राजकन्यारत्नमद्राक्षीत्॥ ४॥

ज्यामघस्य शैब्यापतेः अपुत्रस्य भार्य्यान्तर[illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तत्।

तद्दर्शनाच्च तस्यामनुरागानुगतान्तरात्मा स भूपोऽचिन्तयत् ॥ ५ ॥

साध्विदं ममापत्यविरहितस्य वन्ध्याभर्तुः साम्प्रतं विधिनापत्यकारणं कन्यारत्नमुपपादितम्। तदेतत् उद्वहामि। अथ चैनां स्यन्दनमारोप्य स्वमधिष्ठानं नयामि ॥ ६ ॥

तदेव देव्याहमनुज्ञातः समुद्वहामीति। अथैनां रथमारोप्य स्वनगरमागच्छत् ॥ ७ ॥

विजयिनश्च राजानमशेषपौरभृत्यपरिजनामात्यसमवेता शैब्या द्रष्टुमधिष्ठानद्वारमागता ॥ ८ ॥

सा चावलोक्य राज्ञः सव्यपार्श्ववर्तिनीं कन्यामीषदुद्भूतामर्षस्फुरदधरपल्लवा राजानमवोचत्, अतिचपलचित्तात्र स्यन्दने केयमारोपिता इति। असावप्यनालोचितोत्तरवचनोऽतिभयात् तामाह, स्नुषा ममेयमिति ॥ ९ ॥

अथैनं शैब्योवाच।

नाहं प्रसूता पुत्रेण नान्या पत्न्यभवत् तव।

स्नुषासम्बन्धता ह्येषा कतमेन सुतेन ते ॥ १० ॥

[illegible] तद्दर्शनं [illegible]। अनुरागानुगतोऽन्तरात्मा मनो यस्य स ॥ ५ ॥ उद्वहामि परिणेष्यामि ॥ ६ ॥ [illegible] समुद्वहामीति निश्चयात् [illegible] कन्यारत्नम् [illegible] ॥ ७ ॥ अधिष्ठानद्वारं पुरद्वारम् ॥ ८ ॥ [illegible] यस्याः। अनालोचित [illegible] ॥ ९ ॥ [illegible] तथा च पुत्रेण [illegible] नाभवत्। [illegible] ॥ १० ॥ [illegible]

पराशर उवाच ।

इत्यात्मेर्ष्याकोपकलुषितवचनमुषितविवेकतया दुरुक्त-परिहारार्थमिदमवनीपतिराह ॥ ११ ॥

यस्ते जनिष्यत्यात्मजः तस्येयमनागतस्यैव भार्य्या निरूपिता, इत्याकर्ण्योद्भूतमृदुहासा तथेत्याह, प्रविवेश च राज्ञा सहाधिष्ठानम् इति ॥ १२ ॥

अनन्तरञ्चातिशुद्धलग्नहोरांशकावयवोत्कृष्टपुत्रजन्म-लाभगुणात् वयसः परिणाममुपगतापि शैव्या स्वल्पैरेवाहो-भिर्गर्भमवाप ॥ १३ ॥

कालेन च पुत्रमजीजनत् । तस्य च विदर्भ इति पिता नाम चक्रे । स च तां स्नुषामुपयेमे ॥ १४ ॥

तस्यां चासौ क्रथकौशिकसंज्ञौ पुत्रावजनयत् । पुनश्च तृतीयं रोमपादसंज्ञं कुमारमजीजनत् । रोमपादाद् बभ्रुः,

ईर्ष्याकोपाभ्यां कलुषितं कलुषितं वचनं तेन मुषितो विवेको यस्य तत्तया, दुरुक्तम् [illegible] तत्परिहारार्थम् ॥ ११ ॥ अस्याः नववधूः निरूपिता कल्पिता ॥ १२ ॥ अनन्तरञ्च शैव्या गर्भमवा-पेत्यन्वयः । तत्र हेतुः, अतिशुद्धा ये लग्नहोरांशकावयवास्तैरुत्कृष्टं यथा स्यात्तथा । वसुदेवतयोत्कर्षाख्येन उत्कृष्टतो यः शैव्याराज्ञोरस्यां पुत्रजन्मलाभः लाभोपलक्षणं गुणात् सद्गुणत्वात् । अस्तु देवतास्था-नान्यत्र देवता हि शुभाशुभफलं तथापि न अनुमोदते, तत्र राशीनां षष्ठ्या अन्यं, राशयस्तु द्वारा, राशेर्भागो भागोऽपर, अवयवः द्रेष्काणादि, एतेषु शुभेषु उत्कृष्टं लग्नलाभश्च भवतीत्यर्थः ॥ १३ ॥ स च विदर्भः कथं स्नुषामुपयेमे ? अत आह स्नुषाप्रवेशप्रतिपादनादित्याशुद्धम् ॥ १४ ॥

बभ्रोः पुत्रो धृतिः। कौशिकस्यापि चेदिः पुत्रोऽभूत् यस्य सन्ततौ चैद्या भूपालाः। क्रथस्य रुमापुत्रस्य पुत्रः कुन्तिरभवत्॥ १५॥

कुन्तेर्वृष्णिः, वृष्णेर्निर्वृतिः, निर्वृतेर्दशार्हः, ततश्च व्योमा, तस्मादपि जीमूतः, तस्यापि विकृतिः, ततो भीमरथः, तस्मान्नवरथः, ततश्च दशरथः, तस्य शकुनिः, तत्तनयः करम्भिः, करम्भेर्देवरातोऽभवत्। तस्माद्देवक्षत्रः, तस्य मधुः, मधोरनवरथः, अनवरथात् कुरुवत्सः, ततश्चानुरथः, ततः पुरुहोत्रो जज्ञे। ततश्च अंशुः, ततश्च सत्वतः, सत्वतादेते सात्वताः॥ १६॥

इत्येतां ज्यामघसन्ततिं सम्यक् श्रद्धासमन्वितः श्रुत्वा सर्वपापैः प्रमुच्यते॥ १७॥

त्रयोदशोऽध्यायः।

पराशर उवाच।

भजिनभजमानदिव्यान्धकदेवावृधमहाभोजवृष्णिसंज्ञाः सत्वतस्य पुत्रा बभूवुः॥ १॥

भजमानस्य निमिकृकणवृष्णयः, तथान्ये तद्वैमात्राः शताजित्सहस्राजिदयुताजित्संज्ञाः॥ २॥

[illegible] ॥ १८॥ [illegible]
[illegible] ॥ १९॥

[illegible] ॥ १॥
[illegible] ॥ २॥ [illegible]

देवावृधस्यापि बभ्रुः पुत्रोऽभूत्। तस्य च अयं श्लोको गीयते ॥ ३ ॥

यथैव शृणुमो दूरात्सम्पश्यामस्तथान्तिकात्।
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ ४ ॥
पुरुषाः षट् च षष्टिश्च षट् सहस्राणि चाष्ट च।
येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ ५ ॥

महाभोजस्त्वतिधर्मात्मा। तस्यान्वये भोजा मार्त्तिकावता बभूवुः ॥ ६ ॥

वृष्णेः सुमित्रो युधाजिच्च पुत्रोऽभवत्। ततश्चानमित्रशिनी तथा ॥ ७ ॥

अनमित्रान्निघ्नः निघ्नस्य प्रसेनसत्राजितौ। तस्य च सत्राजितस्य भगवानादित्यः सखा अभवत् ॥ ८ ॥

एकदा तु अम्भोधितीरसंश्रयः सूर्यं सत्राजित तुष्टाव। तन्मनस्कतया च भास्वानभिष्टूयमानोऽग्रतस्तस्थौ। अस्पष्टमूर्त्तिधरं चैनमालोक्य सत्राजितः सूर्यमाह, यथैव व्योम्नि त्वां वह्निपिण्डोपममहमपश्यं तथैवाद्याग्रतो

अथोदाहृत देवावृधस्यापि श्लोको यशो गीयते ॥ ३ ॥ दूरात् दूरे स्थितं यथा शृणुमः अन्तिकात् समीपे स्थितमपि सम्यक्तया तथैव पश्यामः, न ततः किञ्चिदपि न्यूनम्। अतो बभ्रुर्मनुष्याणां मध्ये श्रेष्ठो देवावृधस्तु देवैः सम इति ॥ ४ ॥ बभ्रोर्देवावृधादपि तस्मादुपदेशमार्गेण पुरुषा अमृतत्वं प्राप्ताः: एवमेव षट्षष्ट्यादयोऽमृतत्वं प्राप्ताः। बभ्रुर्देवावृधोपीति पाठे बभ्रुः देवावृधश्चापि इति शेषः। स एवार्थः ॥ ५ ॥ मृत्तिकावतं नाम पुरं तत्र स्थिता भोजा मार्त्तिकावताः ॥ ६ ॥ वृष्णेः सुमित्रयुधाजितौ पुत्रावित्यर्थः। ततः युधाजितः ॥ ७ ॥ सत्राजितः

गतमप्यत्र न किञ्चिद्भगवता प्रसादीकृतं विशेषमुपलक्षयामि ॥ ९ ॥

इत्येवमुक्ते भगवता सूर्येण निजकण्ठादुन्मुच्य स्यमन्तकनामा मणिरवतार्य एकान्ते न्यस्तः। ततस्तमाताम्रोज्ज्वलह्रस्ववपुषम् ईषदापिङ्गलनयनमादित्यमद्राक्षीत्। कृतप्रणिपातस्तवादिकञ्च सत्राजितमाह भगवान्, वरमस्मत्तोऽभिमतं वृणीष्वेति। स च तदेव मणिरत्नमयाचत। स चापि तस्मै तद् दत्त्वा वियति स्वं धिष्ण्यमारुरोह ॥ १० ॥

सत्राजितोऽप्यमलमणिरत्नसनाथकण्ठतया सूर्य इव तेजोभिरशेषदिगन्तराण्युद्भासयन् द्वारकां विवेश ॥ ११ ॥

द्वारकावासिजनस्तु तमायान्तमवेक्ष्य भगवन्तमादिपुरुषं पुरुषोत्तमम् अवनिभारावतारणायांशेन मानुषरूपधारिणं प्रणिपत्याह, भगवन्! भगवन्तमयं नूनं द्रष्टुमायात्यादित्यः। इत्याकर्ण्य प्रहस्य च तानाह भगवान् नायमादित्यः, सत्राजितोऽयमादित्यदत्तं स्यमन्तकाख्यं महामणिं बिभ्रदत्रोपयाति। तदेनं विस्रब्धाः पश्यत इत्युक्तास्ते ययुः ॥ १२ ॥

[illegible] ॥ ८ ॥
[illegible] ॥ ९ ॥

[illegible] ॥ ११ ॥ विस्रब्धाः [illegible] ॥ १२ ॥ [illegible]

स च तं स्यमन्तकाख्यं महामणिमात्मनिवेशने चक्रे ॥ १३ ॥

प्रतिदिनञ्च तन्मणिरत्नमष्टौ कनकभारान् स्रवति ॥ १४ ॥

तत्प्रभावाच्च सकलस्यैव राष्ट्रस्योपसर्गानावृष्टि-व्यालाग्निचौरदुर्भिक्षादिभयं न भवति ॥ १५ ॥

अच्युतोऽपि तद्दिव्यमुग्रसेनस्य भूपतेर्योग्यमेतदिति लिप्साञ्चक्रे गोत्रभेदभयाच्च शक्तोऽपि न जहार ॥ १६ ॥

सत्राजितोऽप्यच्युतो मामेतद् याचिष्यतीत्यवगत-रत्नलोभः स्वभ्रात्रे प्रसेनाय तद्रत्नं दत्तवान् ॥ १७ ॥

तच्च शुचिना ध्रियमाणमशेषसुवर्णस्रावादिकं गुणमुत्-पादयति, अन्यथा य एव धारयति तमेव हन्तीति। असा-वपि प्रसेनः स्यमन्तकेन कण्ठासक्तेनाश्वमारुह्याटव्यां मृगयामगच्छत्। तत्र च सिंहाद् वधमवाप। साश्वञ्च तं निहत्य सिंहोऽप्यमलमणिरत्नमास्याग्रेणादाय गन्तुमु-द्यतः ऋक्षाधिपतिना जाम्बवता दृष्टो घातितश्च। जाम्ब-

---

आत्मे आलये चक्रे स्थापयामास ॥ १३ ॥ [illegible] [illegible] [illegible] कनकभारान् । भारप्रमाणं [illegible] "माषो दश-[illegible]: [illegible] निष्कादि वर्णः। [illegible] सुवर्णैश्च पलं चतुर्भिः। तुला पलशतं प्रोक्ता भारः स्याद् विंशतिस्तुलाः" इति ॥ १४ ॥ [illegible] रोगादिः ॥ १५ ॥ [illegible] [illegible] [illegible] [illegible] [illegible], [illegible] ॥ १६ ॥ [illegible]

वामप्यमलं तच्चाचिररत्नमादाय स्वबिलं प्रविवेश, सुकुमारकसंज्ञाय च बालकाय क्रीडनकम् अकरोत् ॥ १८ ॥

अनागच्छति च तस्मिन् प्रसेने, कृष्णो मणिरत्नमभिलषितवान्, न च प्राप्तवान्, नूनमेतदस्य कर्म, नान्येन प्रसेनो हत इत्यखिल एव यदुलोकः परस्परं कर्णाकर्णि अकथयत ॥ १९ ॥

विदितलोकापवादवृत्तान्तश्च भगवान् यदुसैन्यपरिवारः प्रसेनाश्वपदवीमनुससार, ददर्श चाश्वसमेतं प्रसेनं निहतं सिंहेन। अखिलजनमध्ये सिंहपददर्शनकृतपरिशुद्धिः सिंहपदमनुससार ॥ २० ॥

ऋक्षपतिनिहतञ्च सिंहमप्यल्पे भूमिभागे दृष्ट्वा ततश्च तद्रत्नगौरवादृक्षस्यापि पदान्यनुययौ। गिरितटे च सकलमेव यदुसैन्यमवस्थाप्य तत्पदानुसारी ऋक्षबिलं प्रविवेश। अर्धप्रविष्टश्च धात्र्याः सुकुमारकमुल्लापयन्त्या वाणीं शुश्राव ॥ २१ ॥

सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः ॥ २२ ॥

[illegible] ॥ १७ ॥ क्रीडनं क्रीडासाधनम् ॥ १८ ॥ कर्णाकर्णि कर्णे कर्णे। कर्णाकर्ण्या इति पाठे कर्णपरम्परया इत्यर्थः ॥ १९ ॥ सिंहपददर्शनेन कृता परिशुद्धिर्येन सः। सिंहेनैव प्रसेनो हतो न कृष्णेनेति [illegible] तथापि मणिरत्नलोभात् सिंहपदमनुससार ॥ २० ॥ [illegible] ॥ २१ ॥ [illegible] इति ॥ २२ ॥ [illegible]

श्रुत्वाकर्ण्य स्यमन्तकोद्भासोऽन्तःप्रविष्टः कुमारक्रीडनकीकृतञ्च धात्रीहस्ते तेजोभिर्ज्वल्यमानं स्यमन्तकं ददर्श ॥ २३ ॥

तञ्च स्यमन्तकाभिलाषचक्षुषमपूर्वं पुरुषमागतमवेक्ष्य धात्री त्राहि त्राहीति व्याजहार ॥ २४ ॥

तदार्त्तनादश्रवणानन्तरमामर्षपूर्णहृदयः स जाम्बवान् आजगाम, तयोश्च परस्परं युध्यतोरेकविंशतिदिनान्यभवत्। ते च यदुसैनिकास्तत्र सप्ताष्टदिनानि तन्निष्क्रान्तिमुदीक्षमाणास्तस्थुः। अनिष्क्रममाणे च मधुरिपौ असाववश्यमत्र बिलेऽत्यन्तनाशमाप्तो भविष्यत्यन्यथा तस्य कथमेतावन्ति दिनानि शत्रुजये व्याक्षेपो भवतीति कृताध्यवसाया द्वारकामागता हतः कृष्ण इति कथयामासुः ॥ २५ ॥

तद्बान्धवाश्च तत्कालोचितमखिलमुपरतक्रियाकलापं चक्रुः ॥ २६ ॥

ततश्चास्य युध्यमानस्यातिश्रद्धादत्तविशिष्टपात्रोपयुक्तान्नतोयादिना कृष्णस्य बलप्राणपुष्टिरभूत् ॥ २७ ॥

इतरस्यानुदिनमतिगुरुपुरुषभिद्यमानस्यातिनिष्ठुर-

धात्री तेन च। स्यमन्तकोद्भासोऽन्तरिति पाठे प्रातः स्यमन्तकः तेन च अन्तःप्रविष्टः कृष्णः। ज्वल्यमानमिति प्रकाशमानम् ॥ २३॥ तं कृष्णं स्यमन्तकाभिलाषचक्षुषं चक्षुर्यस्य तम् ॥ २४ ॥ तन्निष्क्रान्तिं तन्निर्गमम्। व्याक्षेपो विलम्बः। कृताध्यवसायाः कृतनिश्चयाः ॥२५॥ उपरतक्रियाकलापं मृतक्रियाकलापं श्राद्धादिकम् ॥ २६ ॥ ततश्चास्य युध्यमानस्य श्रद्धादत्तं श्राद्धादिकं कृष्णस्येति भाव ॥ २७ ॥ विशिष्टपात्रेभ्यो दत्तमपि कृष्णस्य तृप्तये भवति महा-

प्रहारपीडिताखिलावयवस्य निराहारतया बलहानिः।
निर्जितश्च भगवता जाम्बवान् प्रणिपत्याह, सुरासुरयक्ष-
गन्धर्वराक्षसादिभिरप्यखिलैर्भगवान् न जेतुं शक्यः, किमु-
तावनिगोचरैरल्पवीर्य्यैर्नरावयवभूतैश्च तिर्य्यग्योन्यनुसृतिभिः
किं पुनरस्मद्विधैरवश्यं भगवताऽस्मत्स्वामिनो नारायणस्य
सकलजगत्परायणस्यांशेन भगवता भवितव्यमित्युक्तः ॥२८॥
तस्मै भगवानखिलमवनिभारावतारमाचचक्षे ॥ २९ ॥
प्रीत्याभिस्पृष्टकरतलेन चैनमपगतयुद्धखेदं चकार ॥३०॥
स च प्रणिपत्यैनं पुनरपि प्रसाद्य जाम्बवतीं नाम
कन्यां गृहागतायार्घ्यभूतां ग्राहयामास । ३१ ॥
स्यमन्तकमणिमप्यसौ प्रणिपत्य तस्मै प्रददौ । अच्यु-
तोऽप्यतिप्रणतात् तस्मादग्राह्यमपि तन्मणिरत्नमात्मसंशोधनाय
जग्राह । ३२ ।
सह जाम्बवत्या द्वारकामाजगाम । भगवदागमनोद्भूत-
हर्षोत्कर्षस्य द्वारकावासिजनस्य कृष्णावलोकनात्तत्क्ष-
णमेवातिपरिणतवयसोऽपि नवयौवनमिवाभवत् । जाम्बव-

नारावयवभूतैरकृतत्वे ... ... इति किं
पुनरस्मद्विधैः ॥ २८ ॥ अवनेर्भारावतारो यस्मात् तथाभूतमवतार-
स्वरूपम् आचचक्षे आख्यातवान् । यद्वा भारावतारं तस्मै
... आख्यातवान् ॥ २९ ॥ यथा ... ...
... ... पूर्व तत्र ...
... ... ॥ ३० ॥
कन्यां ... ... ॥ ३१ ॥ आत्मशोधनाय ... ...
... इति ... ॥ ३२ ॥ ...

पुरुभिश्च हिंस्या निरुद्धेति च सकलयादवाः स्त्रियश्च समा-
अयामासुः ॥ २३ ॥

भगवानपि यथानुभूतमशेषमेव यादवसमाजे यथावदाचचक्षे, स्यमन्तकञ्च सत्राजिताय दत्त्वा मिथ्याभिशस्तिविशुद्धिमवाप, जाम्बवतीञ्चान्तःपुरे निवेशयामास । सत्राजितोऽपि मयास्याभूतमलिनमारोपितमिति जातसन्त्रासः स्वसुतां सत्यभामां भगवते भार्य्यां ददौ ॥ २४ ॥

तां चाक्रूरकृतवर्मशतधन्वप्रमुखा यादवाः पूर्वं वरयामासुः । ततस्तत्प्रदानादवज्ञातमात्मानं मन्यमानाः सत्राजिते वैरानुबन्धं चक्रुः । अक्रूरकृतवर्मप्रमुखाश्च शतधन्वानमूचुः, अयमतिदुरात्मा सत्राजितो योऽस्माभिर्भवता चाभ्यर्थितोऽप्यात्मजामस्मान् भवन्तं चाविगणय्य कृष्णाय दत्तवान् । तदलमनेन जीवता । घातयित्वैनं तच्चारत्नं त्वया किं न गृह्यते? वयमभ्युपपत्स्यामः, यद्यच्युतस्तवापि वैरानुबन्धं करिष्यतीति ॥ २५ ॥

एवमुक्तस्तथेत्यसावप्याह । जतुगृहदग्धानाञ्च पाण्डु-

वक्तुं यद्भूत् दृष्टानुभवेनानुभूतम् ॥ २३ ॥ यथानुभूतमशेषमेवाख्यानं जाम्बवतीविवाहान्तम्, सत्यभामाविवाहाय, सत्राजितोऽददीति । अभूतमलिनं मिथ्यारोपणं ॥२४॥ तस्यै विवाहार्थोपायोऽर्थं वरयाञ्चक्रुः । नाङ्गीकारिता अपि रत्नरत्नविनिमयेन । अभ्युपपत्स्यामः सहायाः करिष्यामः । यदि वैरानुबन्धमच्युतः करिष्यति तदा तस्मादप्यावां वैरानुबन्धे सहायाश्च भवेयुरिति भावः ॥ २५ ॥ जतुगृहदग्धानाम् जतुगृहे स्थिता पाण्डवादयोऽदग्धा अपि

नष्टमानो विदितपरमार्थोऽपि भगवान्, दुर्योधनप्रयत्न-शैथिल्यार्थं कुल्यकरणाय वारणावतं गतः ॥ ७६ ॥

गते च तस्मिन् सुप्तमेव सत्राजितं शतधन्वा जघान, मणिरत्नञ्चादात्। पितृवधामर्षपूर्णा च सत्यभामा शीघ्रं स्यन्दनमारुह्य वारणावतं गत्वा, भगवन्तमहं प्रतिपादितेति भवताक्षान्तिमता शतधन्वना अस्मत्पिता व्यापादितः, तच्च स्यमन्तकमणिरत्नमपहृतम्। तदियमस्यावहासना। तदा-लोच्य यदत्र युक्तं, तत् क्रियतामिति कृष्णमाह ॥ ७७ ॥

तया चैवमुक्तः परितुष्टान्तःकरणोऽपि कृष्णः सत्यभामा-ममर्षताम्रलोचनः प्राह, सत्ये! ममैवावहासना। नाहमेनां तस्य दुरात्मनः सहिष्ये। न ह्यनुल्लङ्घ्य वरपादपं तत्कृत-नीडाश्रयिणो विहङ्गा वध्यन्ते ॥ ७८ ॥

तदलमत्यर्थममुनास्मत्पुरतः शोकप्रेरितवाक्यपरिकरेण, इत्युक्त्वा द्वारकामभ्येत्य बलदेवमेकान्ते वासुदेवः प्राह, मृगयागतं प्रसेनमटव्यां मृगपतिर्जघान। सत्राजितोऽप्यधुना

सत्यदृष्टत्वाय अनुग्रहेणेति। ज्ञातोऽपि तत्त्वं कृष्णः पाण्डवानामदग्धत्वमपि [illegible] यथा वर्तेत दुर्योधनस्य तत्प्रयत्नशैथिल्यार्थं कुल्य-क्रियाकरणाय वारणावतं [illegible] गत इत्यर्थः ॥ ७६ ॥

[illegible] ॥ ७७ ॥ परितुष्टान्तःकरणोऽपि [illegible] [illegible]

शतधन्वना निधनं प्रापितः । तदुभयविनाशात् तस्यापि रत्नमावाभ्यां सामान्यं भविष्यति ॥ ४० ॥

तदुत्तिष्ठ, आरुह्यतां रथः, शतधनुर्निधनायोद्यमं कुरु, इत्यभिहितस्तथेति समन्वीप्सितवान् । कृतोद्योगौ च तावुभावुपलभ्य शतधन्वा कृतवर्माणमुपेत्य पार्ष्णिपूरणकर्मनिमित्तमचोदयत् । आह चैनं कृतवर्मा, नाहं बलभद्रवासुदेवाभ्यां सह विरोधायालम्, इत्युक्तश्चाक्रूरमचोदयत् । आह चासावपि, न हि कश्चिद् भगवता पादप्रहारपरिकम्पितजगत्त्रयेण असुरवरवनितावैधव्यकारिणा प्रबलरिपुचक्राप्रतिहतचक्रेण चक्रिणा, मदमुदितनयनावलोकिताखिलविशातनेन अतिगुरुवैरिवारणापकर्षणाविकृतमहिमोरुसीरेण सीरिणा च सह सकलजगद्वन्द्यानाममरवराणामपि योद्धुं समर्थः, किमुताहम् । तदन्यतः शरणमभिलष्यताम् ॥ ४१ ॥

वो कथं भगवतोऽस्यामानेतव्य इत्याह, अन्वक्रूरेति । यत्र प्रदत्तस्थाने भगवान्, प्रतिष्ठाने समर्पितम् ॥ ३९ ॥ आवाभ्यां सामान्यम् ॥ ४० ॥ भगवता चक्रिणा कृष्णेन, सीरिणा बलभद्रेण च सहामरवराणां मध्ये कश्चिद् योद्धुं न समर्थः, इत्यन्वयः । त्रिविक्रमावतारे पादप्रहारेण परिकम्पितं जगत्त्रयं येन । प्रबलरिपुचक्रेषु अप्रतिहतं चक्रं यस्य तेन चक्रिणा, सीरिणा च किम्भूतेन ? मदमुदितनयनाभ्यां विलोकितेनैव अरिबलं विनाशयतीति तथा तेन, अतिगुरवो महान्तो वैरिण एव वारणाः तेषामाकर्षणेनाविकृतो महिमा येन तथाविधः अपकर्षणात् सीरो हलमस्यास्तीति तथाभूतेन ॥ ४१ ॥ कृत-

इत्युक्तः शतधनुराह, अस्मत्परित्राणासमर्थं भव-न्तमात्मानमवगच्छति, तदयमस्मन्मणिः संरक्ष्यताम्। इत्युक्तः सोऽप्याह, यद्यन्त्यायामप्यवस्थायां न कस्मैचिद् भवान् कथयिष्यति, तदहमेनं ग्रहीष्यामि। तथेत्युक्ते चाक्रूरस्तन्मणिरत्नं जग्राह ॥ ४२ ॥

शतधनुरप्यतुलवेगां शतयोजनवाहिनीं वडवामारुह्या-पक्रान्तः। शैब्यसुग्रीवमेघपुष्पबलाहकाश्वचतुष्टययुक्तरथा-वस्थितौ बलदेववासुदेवौ तमनुप्रयातौ ॥ ४३ ॥

सा च वडवा शतयोजनप्रमाणं मार्गमतीत्य पुनरपि वाह्यमाना मिथिलावनोद्देशे प्राणानुत्ससर्ज। शतधनुरपि तां परित्यज्य पदातिरेवाद्रवत् ॥ ४४ ॥

कृष्णोऽपि बलभद्रमाह, तावदत्रैव स्यन्दने भवता स्थेयम्। अहमेनमधमाचारं पदातिरेव पदातिमनुगम्य यावद् घातयामि। अत्र हि भूभागे दृष्टदोषा ह्यश्वा नैतेऽश्वा भवतेमं भूमिभागमुल्लङ्घनीयाः ॥ ४५ ॥

तथेत्युक्त्वा बलभद्रो रथ एव तस्थौ। कृष्णोऽपि द्विक्रोश-मात्रं भूमिभागमनुसृत्य दूरस्थस्यैव चक्रं क्षिप्त्वा शतधनुषः शिरश्चिच्छेद। तच्छरीराम्बरादिषु च बहुप्रकारमन्विष्यन्नपि

[illegible] विदिते भगवान् जानाति, [illegible] [illegible] [illegible], [illegible], [illegible] ॥ ४२ ॥ [illegible] [illegible] [illegible] यावद् [illegible] [illegible] [illegible] ॥ ४३ ॥ [illegible] [illegible] ॥ ४४ ॥ [illegible] [illegible] इति [illegible] [illegible] [illegible] इति [illegible], [illegible] ॥ ४५ ॥ [illegible]

स्यमन्तकं मणिं नावाप यदा, तदोपगम्य बलभद्रमाह, वृथैवास्माभिर्घातितः शतधनुर्न प्राप्तमखिलजगत्सारभूतं तन्मणिरत्नम्। इत्याकर्ण्य उद्भूतकोपो बलदेवो वासुदेवमाह, धिक् त्वां यस्त्वमेवमर्थलिप्सुः। एतच्च ते भ्रातृत्वान्मर्षये तदयं पन्थाः, स्वेच्छया गम्यताम्, न मे द्वारकया, न त्वया, न बन्धुभिः कार्य्यम्। अलमेभिर्ममाग्रतोऽलीकशपथैः। इत्याक्षिप्य तं तथा प्रसाद्यमानोऽपि न तस्थौ, विदेहपुरीं प्रविवेश ॥ ४६ ॥

जनकश्चार्घ्यपूर्वकमेवैनं गृहं प्रवेशयामास। स तत्रैव च तस्थौ। वासुदेवोऽपि द्वारकामाजगाम। यावच्च जनकराजगृहे बलभद्रोऽवतस्थे, तावत् धार्त्तराष्ट्रो दुर्य्योधनस्तत्सकाशाद् गदाशिक्षामशिक्षत ॥ ४७ ॥

वर्षत्रयान्ते च बभ्रूग्रसेनप्रभृतिभिर्यादवैर्न तद्रत्नं कृष्णेनापहृतमिति कृतावगतिभिर्विदेहपुरीं गत्वा बलदेवः संप्रत्याय्य द्वारकामानीतः ॥ ४८ ॥

अक्रूरोऽप्युत्तममणिसमुद्भूतसुवर्णध्यानपरस्ततो यज्ञानीजे ॥ ४९ ॥

सवनगतौ हि क्षत्रियवैश्यौ निघ्नन् ब्रह्महा भवतीत्यतो दीक्षाकवच प्रविष्ट एव तस्थौ द्विषष्टिवर्षाणि ॥ ५० ॥

निरस्य [illegible] ॥ ४६ ॥ [illegible], [illegible]। अविघ्नेन शिक्षायु-
क्तवतोः ॥ ४७ ॥ तद्रत्नं [illegible] श्रीकृष्णबलभद्रयोः [illegible]
[illegible]
[illegible]। बलभद्रमित्यवमाह, [illegible]। संप्रत्याय्य [illegible]
[illegible] ॥ ४८ ॥ [illegible] ॥
[illegible] ॥ ४९ ॥ सवनगतौ दीक्षितौ ॥ ५० ॥ [illegible]

एवं तन्मणिरत्नप्रभावात् सर्वोपसर्गदुर्भिक्षमरकादिकं नाभवत् ॥ ५१ ॥

अक्रूरपक्षीयैर्भोजैः शत्रुघ्ने सात्वतस्य प्रपौत्रे व्यापादिते भोजैः सहाक्रूरो द्वारकामपहाय अपक्रान्तः ॥ ५२ ॥

तदपक्रान्तिदिनादारभ्य सर्वोपसर्गव्यालानावृष्टिमरकाद्युपद्रवा बभूवुः । अथ यादवबलभद्रोग्रसेनसमवेतोऽमन्त्रयत् भगवानुरगारिकेतनः किमिदमेकदैव प्रचुरोपद्रवागमनमेतदालोच्यताम् ॥ ५३ ॥

इत्युक्ते अन्धकनामा यदुवृद्धः प्राह अस्याक्रूरस्य पिता श्वफल्को नाम यत्र यत्राभूत् तत्र तत्र दुर्भिक्षमरकानावृष्ट्यादिकं नाभवत् ॥ ५४ ॥

काशिराजस्य विषये त्वनावृष्ट्यां श्वफल्कोऽनीयत । ततश्च तत्क्षणाद्देवो ववर्ष । काशिराजस्य पत्न्याश्च गर्भे कन्या प्रत्यभवत् ॥ ५५ ॥

सापि पूर्णेऽपि प्रसूतिकाले नैव निश्चक्राम । एवञ्च तस्य गर्भस्य द्वादश वर्षाण्यनिष्क्रामतो ययुः । काशिराजश्च तामात्मजां गर्भस्थामाह, पुत्रि ! कस्मान्न जायसे ? निष्क्रम्यताम्, आस्यं ते द्रष्टुमिच्छामि । एताञ्च मातरं किमिति चिरं क्लेशयसि ? इत्युक्ता सा गर्भस्थैव व्याजहार तात । यद्येकैकां गां दिने दिने ब्राह्मणेभ्यः प्रयच्छसि,

(१) [illegible] तथा [illegible] विरामे [illegible],
[illegible] ॥ ६० ॥ [illegible]
[illegible]
[illegible] ॥ ११ ॥ [illegible]

तदाहमस्याः त्रिभिर्वर्षैरस्मात् गर्भात् तावदवश्यं निष्क्र-मिष्यामीति। एतच्च तद्वचनमाकर्ण्य राजा ब्राह्मणाय दिने दिने गां प्रादात्। सापि तावता कालेन जाता। ततस्तस्याः पिता गान्दिनीति नाम चकार। तां च गान्दिनीं कन्यां श्वफल्कायोपकारिणे गृहागतायार्घ्यभूतां प्रादात्। सा च गान्दिनी प्रतिदिनं यावज्जीवं ब्राह्मणाय गां दत्त-वती। तस्यामयमक्रूरः श्वफल्कात् जज्ञे। तस्यैवं गुण-मिथुनादुत्पत्तिः॥ ५६॥

तत् कथमस्मिन्नपक्रान्तेऽत्र मरकदुर्भिक्षाद्युपद्रवा न भविष्यन्ति। तदयमानीयतामिति, अलमतिगुणवत्य-पराधान्वेषणेन इति॥ ५७॥

यदुवृद्धस्यान्धकस्य एतद्वचनमाकर्ण्य केशवोग्रसेनबल-भद्रपुरोगमैर्यदुभिः कृतापराधतितिक्षाभयमभयं दत्त्वा श्वाफल्किः स्वपुरमानीतः तत्र चागत एव तस्य स्यमन्तक-मणेरनुभावादनावृष्टिमरकदुर्भिक्षव्यालाद्युपद्रवः शशाम। कृष्णश्च चिन्तयामास, स्वल्पमेतत् कारणं, यदयं गान्दिन्यां

जातो ॥ ५४ ॥ गर्भं वसता पूर्णमार्योदितेन निवसो ब्राह्मणः वाक्या-दिना ॥ ५५ ॥ एवं पूर्वोक्ता गुणा यस्य विद्यन्ते तस्मात् ॥ ५६ ॥ इति पूर्वोक्तप्रकारेणातिगुणवत्यक्रूरे दूतो निष्क्रान्ततया निमित्ते सति अपराधमिथ्यानुसरणेनालं अर्दन्निरुक्तं ॥ ५७ ॥ कृष्णश्चिन्तयामासेत्यतो भगवतस्तस्य सर्वज्ञस्य ततुपरामर्शस्य अविद्यमानत्वं बोधनमनुसरणमात्रं न तत्त्वतः, अन्यथा सर्वज्ञत्वक्षतौ भगवति वाच्ये इति तद-रिष्टदर्शनादपि दुर्घटमिति ॥ तथाच पुनः 'तत्कृष्णोऽपि हि यन्ने हि विद्यया मानुषमाचरत्। अविद्यानिवारणे किं पटोऽरिष्टदर्शनम्॥' इति। तथा-प्येतद्गोचारपक्षं परमार्थेन व्यवहारपरिहारपरमेवति।

मकरकेतावृतो भ्रमितः, सुमहाभावसमाकुलितसुर्भिक्षसरस्वा-
कृपयासमस्कारो प्रभावः । ५८ ॥

तथा तमस्य सकाशे स मत्तामतिः समस्तशास्त्र-
विज्ञाति । तत्र त्रिविधाः प्रभावाः श्रूयन्ते । वयमपि
यथाऽवतारम पश्यन कलयन्तर, तत्रान यथान्तरं यथ-
मीति । पश्यापाटानवाम्य । पयंस्रयसमासौ यत्नेवि-
क्षिपतीति, कृताध्रयमार्गोऽस्यान प्रयोजनमनुविश्य सकाम
यादवसमासान्नाति पयापोकरत नम चोपविष्टेष्वपिवेषु
यादवेषु पूर्वं प्रयोजनमनुपश्यन पर्यवमिते च तस्मिन्
प्रसङ्गागमपरिहासमकृयामकृरैव मत्र कृत्वा जनार्दन
समर्क्ष्य रमाप । ५८ ।

दानपते ! आमीत एव वयं यथा यमधरमना चक्षिम-
समन्तमारभूतं समन्तकरत्नं भवतः सकाशे समर्पितम ।
तद्देनत्राष्ट्रोपकारकं भवतः सकाशे तिष्ठतीति तिष्ठतु सर्व
एव वयं तत्प्रभावफलभुजः, किन्त्वेष बलभद्रोऽस्मामायद्भित-
वान् । तदस्मत्प्रीतये इदं च, इत्यभिहितः सरत्नः सोऽचिन्त-
यत् किमत्रानुष्ठेयम ? अन्यथा चेन् ब्रवीम्यहं, तत् केवला-
म्बरनिरोधानमन्विषन्तो रत्नमेतं दृष्टन्तीति, यतोऽन्येषां
न चर्यमिति संचिन्त्य समस्तजगत्कारणभूतं नारायण-
माचाक्रूरः, भगवन् ! ममैतत् समन्तकमपि रत्नं प्रतधनुषा
समर्पितम् । ६० ॥

मद्गोऽपहारं कृतकोऽभिशापकम् । यन्नु तदोषं विचारयति-
प्रतिज्ञा पयानं दुष्टानामविशत् कारणमापि । ५८ । मद्यं जान्वः

अपगते च तस्मिन् अद्य श्वः परश्वो वा भगवान् मां याचिष्यतीति कृतमतिरतिकृच्छ्रेणैतावन्तं कालमधारयम् तस्य च धारणक्लेशेनाहमशेषोपभोगेष्वसङ्गिमानसो न वेद्मि स्वसुखकलामपि ॥ ६१ ॥

एतावन्मात्रमशेषराष्ट्रोपकारि धारयितुं न शक्नोतीति मां भगवान् मंस्यत इत्यात्मना न चोदितम् । ६२ ॥

तदिदं स्यमन्तकरत्नं गृह्यताम्, इच्छया यस्याभिमतं तस्य समर्प्यताम् । ततः स्वोदरवस्त्रनिगोपितमतिलघुकनकसमुद्गकं प्रकटीकृतवान् ॥ ६३ ॥

ततश्च निष्क्राम्य स्यमन्तकमणिं तत्र यदुसमाजे मुमोच । मुक्तमात्रे च तस्मिन्नतिकान्त्या तदखिलमास्थानमुद्योतितम् ॥ ६४ ॥

अथाहाक्रूरः, स एष मणिः शतधन्वनास्माकं समर्पितः, यस्यायं, स एनं गृह्णात्विति । तमवलोक्य सर्वयादवानां साधु साध्विति विस्मितमनसां वाचोऽश्रूयन्त ।

[illegible] इति [illegible] ॥ ५८ ॥ दानपते ! इति [illegible] ॥ ६० ॥ धारणोपक्लेशेन [illegible] । भोगेषु [illegible] ॥ ६१ ॥ ननु [illegible] ? तत्राह, एतावन्मात्रं [illegible] अशेष-राष्ट्रोपकारमपि [illegible] धारयितुं न शक्नोतीत्येवं मां भगवान् मंस्यत इति [illegible] आत्मना [illegible] नोदितम् । [illegible] ॥ ६२ ॥ [illegible] ॥ ६३ ॥ [illegible] ॥ ६४ ॥

[illegible] इति

तमालोक्य ममायमच्युतेनैव सामान्यः समन्वीप्सित इति बलभद्रः सस्पृहोऽभवत् ॥ ६५ ॥

ममैवेदं पितृधनमित्यतीव च सत्यभामापि स्पृहयाञ्चकार । बलसत्याननावलोकनात् कृष्णोऽप्यात्मानं चक्रान्तरावस्थितमिव मेने । ६६ ॥

सकलयादवसमक्षञ्चाक्रूरमाह, एतद्धि मणिरत्नमात्मसंशोधनाय एतेषां यदूनां दर्शितम् । एतच्च मम बलभद्रस्य च सामान्यं पितृधनञ्चैतत् सत्यभामाया नान्यस्य । ६७ ।

एतच्च सर्वकालं शुचिना ब्रह्मचर्य्यगुणवता ध्रियमाणमशेषराष्ट्रस्योपकारकम्, अशुचिना ध्रियमाणमाधारमेव हन्ति । ६८ ।

अतोऽहमस्य षोडशस्त्रीसहस्रपरिग्रहादसमर्थो धारणे ॥ ६८

कथमेतत् सत्यभामा स्वीकरोतु । आर्य्यञ्च बलभद्रेणापि मदिरापानाद्यशेषोपभोगपरित्यागः कार्य्यः । तदलं यदुलोकोऽयं बलभद्रोऽहञ्च सत्या च त्वां दानपते ! प्रार्थयामः । एतद्भवानेव धारयितुं समर्थः । त्वद्धृतञ्चास्य राष्ट्रस्योपकारकं, तद्भवानशेषराष्ट्रोपकारनिमित्तमेतत् पूर्ववत् धारयतु त्वयान्यन्न वक्तव्यमित्युक्तो दानपतिः तथेत्युक्त्वा

[illegible] समन्वीप्सितः [illegible] इति चैताः [illegible] सस्पृहोऽभवत् [illegible] ॥ ६५ ॥ [illegible] ॥ ६७ ॥ [illegible] ॥ ६८ ॥ [illegible] इति ॥ ६८ ॥ [illegible] ॥ ६९ ॥ [illegible]

जगाद। तच्चाशेषमपि रत्नं ततः प्रभृति चाक्रूरः प्रकटेनैवातीव तेजसा जाज्वल्यमानेनात्मकण्ठासक्तेनादित्य इवांशुमाली चचार ॥ ७० ॥

इत्येतां भगवतो मिथ्याभिशस्तिक्षालनं यः स्मरति, न तस्य कदाचिदल्पापि मिथ्याभिशस्तिर्भवति, अव्याहतेन्द्रियश्चाखिलपापमोक्षमवाप्नोति ॥ ७१ ॥

भवत्स्वभावाद्राज्यस्पृहाभावात्। अतो अक्रूरे भगवता ख्यापितमिति लोकभयात् मणिं गुप्तं धनाद्युपगतमेवाधारयत्। इदानीमभिशस्तिपरिहाराय स्वयमेव कण्ठे प्रकटीकृतमक्रूरो धृतवानित्यर्थः ॥ ७० ॥

मिथ्याभिशस्तिक्षालनं मिथ्याभिशापनिरसनोपायभूतं चरितं यः स्मरति, तस्य मिथ्याभिशापो न भवति। अन्येन स्वमणिं मणिं ख्यापित इति मिथ्याभियोगपरिहाराय एवं गुप्तं दधार, अनेनैवाभिप्रायेण सत्यभामया मणौ स्वमत्वं मासे बलभद्रादिष्वपि नात्मन उपयति तच्छेदाशङ्कानिवृत्तये, न तु स्वं राज्यस्पृहया, यदुवंशधारणयादवसभायामेव न तु स्वसभायाम्, अन्यथा मणिना सह समागमो न घटते। अतोऽक्रूरे मणिधारणाद्युक्तं वर्णितमादिरूपमनन्तमिव पेशलीकर्तव्यमिति भावः ॥ ७१ ॥

चतुर्दशोऽध्यायः ।

पराशर उवाच ।

अनमित्रस्यानुजः शिनिर्नामाभवत् । तस्यापि सत्यकः, सत्यकात् सात्यकिः युयुधानापरनामा, तस्मादप्यसङ्गः तत्पुत्रश्च तूणिः तूणेर्युगन्धर इति शैनेयाः ॥ १ ॥

अनमित्रस्यैवान्वये वृष्णिः तस्माच्च श्वफल्कः । तत्प्रभावः कथित एव । श्वफल्कस्य कनीयांश्चित्रको नाम भ्राता । श्वफल्कादक्रूरो गान्दिन्याम् अभवत् । तथोपमद्गुमृदुरविश्वारिमेजयगिरिक्षत्रोपक्षत्रशतघ्नारिमर्द-नधर्मदृग्दृष्टधर्मगन्धमोजवाह-प्रतिवाहाख्याः पुत्राः, सुताराख्या च कन्या । देववान् उपदेवश्च अक्रूर-पुत्रौ । पृथुविपृथुप्रमुखाः चित्रकस्य पुत्रा बहवोऽभवन् ॥२॥

कुकुरभजमानशुचिकम्बलबर्हिषाख्याः तथा अन्धकस्य चत्वारः पुत्राः ॥ ३ ॥

क्रमागता वृष्णिवंश्याः शैनेयाद्याश्चतुर्दशे । यदुवंशे [illegible] [illegible] पूर्वजे ॥ अनमित्रस्य प्रथमः पुत्रो वृष्णिस्तत्पुत्रो [illegible] [illegible] । [illegible] [illegible] तत्र [illegible] [illegible] । तत्र [illegible] [illegible], [illegible] शिनेर्वंशं च वक्ष्यते । अनमित्रस्यान्वये इत्यादिना इति श्रेण्यर्थः [illegible] । शिनेर्वंश्याः शैनेयाः ॥ १ ॥ पृथ्व्यामनमित्रस्य वंशमाह, अनमित्रस्यान्वये इत्यादिना [illegible] । चित्रकस्य पृथुप्रमुखाः पुत्राः ॥ २ ॥ अन्धकस्य भजमानस्य कुकुरादयः पुत्राः ॥ ३ ॥

कुकुरात् धृष्टः, तस्माच्च कपोतरोमा, ततश्च विलोमा, तस्मादपि तुम्बुरुसखा भवसंज्ञकश्चन्दनोदकदुन्दुभिः। ततश्चाभिजित् ततः पुनर्वसुः, तस्याप्याहुकः पुत्रः, चाहुकी कन्याभूत् ॥ ४ ॥

चाहुकस्य देवकोग्रसेनौ द्वौ पुत्रौ। देववानुपदेवश्च सुदेवो देवरक्षितो देवकस्यापि चत्वारः पुत्राः। तेषाञ्च वृकदेवा उपदेवा देवरक्षिता श्रीदेवा शान्तिदेवा सहदेवा देवकी च सप्त भगिन्यः। ताश्च सर्वा एव वसुदेव उपयेमे। उग्रसेनस्यापि कंसन्यग्रोधसुनामकङ्कशङ्कुसुभूमिराष्ट्रपाल-युद्धमुष्टितुष्टिमत्संज्ञाः पुत्राः कंसाकंसवतीसुतनुराष्ट्रपाली-कङ्की चोग्रसेनतनुजाः ॥ ५ ॥

भजमानाच्च विदूरथः पुत्रोऽभवत्। विदूरथात् शूरः, शूरात् शमी, शमिनः प्रतिक्षत्रः तस्मात् स्वयम्भोजः, ततश्च हृदिकः ॥ ६ ॥

ततश्च कृतवर्मा, तस्मात् शतधनुर्देवमीढ़ाद्या बभूवुः ॥ ७ ॥

देवमीढ़ुषस्य शूरः, शूरस्यापि मारिषा नाम पत्न्यभवत् ॥ ८ ॥

तत्र कुकुरस्य वंशमाह, कुकुरादित्यादिना [illegible] इत्यन्तेन। भवसंज्ञकश्च [illegible] चन्दनोदकदुन्दुभिरिति ॥ ४ ॥ तनुजाः कन्याः ॥ ५ ॥ भजमानस्य [illegible] इत्युक्तौ [illegible] वंश उक्तः। इदानीं तस्यैव वंशान्तरमाह, भजमानादित्यादिना [illegible] ॥ ६ ॥ हृदिकात् कृतवर्मशतधनुर्देवमीढ़ुषाद्याः पुत्रा बभूवुः। देवमीढ़ाद्या इति पाठे तु देवमीढ़ेन देवमीढ़ुष उक्तः ॥ ७ ॥ देवमीढ़ुषस्य पुत्रो यः

तस्याञ्चासौ दश पुत्रानजनयत् वसुदेवपूर्व्वान्। वसुदेवस्य जातमात्रस्यैव एतद्गृहे भगवदंशावतारमव्याहतदृष्ट्या पश्यद्भिर्द्देवैः दिव्या आनका दुन्दुभयश्च वादिताः ॥ ९॥

ततश्चासावानकदुन्दुभिसंज्ञामवाप। तस्यापि देवभागदेवश्रवोऽनाधृष्टिककनकवत्सकगृञ्जयश्यामशमीकगण्डूषसंज्ञा नव भ्रातरो बभूवुः, पृथा श्रुतदेवा श्रुतकीर्त्तिः श्रुतश्रवा राजाधिदेवी च वसुदेवादीनां पञ्च भगिन्योऽभवन्। शूरस्य च कुन्तिभोजनामा सखाभवत्। तस्मै चापुत्राय पृथामात्मजां विधिना शूरोऽददात्। ताञ्च पाण्डुरुवाह। तस्याञ्च धर्म्मानिलेन्द्रैर्य्युधिष्ठिरभीमार्ज्जुनाख्यास्त्रयः पुत्राः समुत्पादिताः। पूर्व्वमनूढायाश्च भगवता भास्वता कर्णाख्यः कानीनः पुत्रोऽजन्यत ॥१०॥

तस्याश्च सपत्नी माद्री नामाभवत्। तस्याञ्च नासत्यदस्राभ्यां नकुलसहदेवौ पाण्डोः पुत्रौ जनितौ। श्रुतदेवाञ्च वृद्धशर्म्मा नाम कारूष उपयेमे। तस्यां दन्तवक्त्रो नाम महासुरो जज्ञे। श्रुतकीर्त्तिमपि केकयराज उपयेमे। तस्यां सन्तर्द्दनादयः पञ्च कैकेयाः पुत्रा बभूवुः। राजाधिदेव्यामावन्त्यौ विन्दानुविन्दौ जज्ञाते।

श्रुतश्रवसमपि चेदिराजो दमघोषनामा उपयेमे। तस्यां शिशुपालम् उत्पादयामास। स हि पूर्व्वमप्युदारविक्रमसम्पन्नो दैत्यादिपुरुषो हिरण्यकशिपुरभूत् ॥११॥

शूरस्य भार्य्या [illegible] ॥ ८ ॥ आनकाः पटहाः दुन्दुभयो भेर्य्यः ॥ ९ ॥ कानीनः कन्यकायां जातः ॥ १० ॥
अनाचारः [illegible], विक्रमः शौर्य्यं, [illegible] ॥ ११ ॥

यत्र भगवता सकललोकगुरुणा घातितः पुनरप्यतुल-वीर्यशौर्यसम्पत्पराक्रमगुणः समाक्रान्तसकलत्रैलोक्येश्वर-प्रतापो दशाननोऽभवत् ॥ १२ ॥

बहुकालोपभुक्तभगवत्सकाशादेवाप्तशरीरपातोद्भवपुण्यफलोऽथ भगवतैव राघवरूपिणा सोऽपि निधनमुपनीतः चेदिराजदमघोषपुत्रः शिशुपालनामाभवत् ॥ १३ ॥

शिशुपालत्वे च भगवतो भूभारावतारणायावतीर्णांशस्य पुण्डरीकनयनाख्यस्य उपरि द्वेषानुबन्धमतितरां चकार । भगवता च निधनमुपनीतः, तत्रैव परमात्मभूते मनसस्तदे-काग्रतया तत्रैव सायुज्यमवाप ॥ १४ ॥

भगवान् हि प्रसन्नो यथाभिलषितं ददाति, अप्र-सन्नोऽपि निघ्नन् दिव्यमनुपमं स्थानं प्रयच्छति ॥ १५ ॥

अतुलाः पूर्वोक्ता वीर्यादिगुणा यस्य सः । तेजो बलं, शौर्यमुत्साहः, पराक्रमः प्रभावः, समाक्रान्ताः त्रैलोक्येश्वरा येन तथाभूतः प्रभावो यस्य सः ॥ १२ ॥ बहुकालोपभुक्तं भगवत्सकाशादेवाप्तशरीरपातोद्भवपुण्यफलं येन सः ॥ १३ ॥ [illegible] पुण्डरीक[illegible] दोषात् ॥ १४ ॥ भगवद्द्वेषादपि सायुज्यमवाप्तवान्, भगवान् [illegible] । [illegible] तथा प्रयच्छतीति ॥ १५ ॥

पञ्चदशोऽध्यायः।

मैत्रेय उवाच।

हिरण्यकशिपुत्वे च रावणत्वे च विष्णुना।
अवाप निहतो भोगानप्राप्यानमरैरपि॥
न लयं तत्र तेनैव निहतः स कथं पुनः।
सम्प्राप्तः शिशुपालत्वे सायुज्यं शाश्वते हरौ॥
एतदिच्छाम्यहं श्रोतुं सर्वधर्मभृतां वर!।
कौतूहलपरेणैतत् पृष्टो मे वक्तुमर्हसि॥ १ ॥

पराशर उवाच।

दैत्येश्वरस्य तु वधायाखिललोकोत्पत्तिस्थितिविनाशकारिणा पूर्वंतनुग्रहणं कुर्वता नृसिंहरूपमाविष्कृतम्। तत्र हिरण्यकशिपोर्विष्णुरयमित्येवं न मनस्यभूत्॥ २ ॥

निरतिशयपुण्यसमुद्भूतमेतत् सत्त्वमिति रजोद्रेकप्रेरितैकाग्रमतिस्तद्भावनायोगात् ततोऽवाप्तवधहेतुकां निरतिशयामेवाखिलत्रैलोक्याधिक्यधारिणीं दशाननत्वे भोगसम्पदमवाप॥ ३ ॥

पूर्वेऽस्मिन् पञ्चदशे वंशानुकीर्त्तन यादवे। सायुज्यं शिशुपालस्य [illegible]। विष्णुनैव निहतत्वात् प्राक्तनजन्मनोर्विं न [illegible] हिरण्यकशिपुत्व रावणत्वादिजन्मनोः ॥ १ ॥ [illegible] [illegible] [illegible] तत्र विष्णुत्वज्ञानं च [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] ॥२॥

यानस्तस्मिन् अनादिनिधने परब्रह्मभूते भगवत्यना-लम्बनीकृते मनसस्तत्र लयम् ॥ ४ ॥

दशाननत्वेऽप्यनङ्गपराधीनतया जानकीसमासक्तचेतसो दाशरथिरूपधारिणः तद्रूपदर्शनमेवासीत्, नायमच्युत इत्यासक्तिर्विपद्यतोऽन्तःकरणस्य मानुषबुद्धिरेव केवलमभूत् ॥ ५ ॥

पुनरप्यच्युत-विनिपातमात्रफलमखिलभूमण्डलश्लाघ्यचेदि-राजकुलजन्माव्याहतैश्वर्यं शिशुपालत्वे चवाप ॥ ६ ॥

तत्र त्वखिलान्येव भगवन्नामकारणान्यभवन् । ततश्च तत्कालकृतानां तेषामशेषाणामेवाच्युतनाम्नामनवरतमनेकजन्मसंवर्धितविद्वेषानुबन्धिचित्तो विनिन्दन् सन्तर्जनादिषु उच्चारणमकरोत् ॥ ७ ॥

रजोद्रेकेति [illegible] । [illegible] रजस [illegible] [illegible] यथा [illegible] [illegible] । [illegible] [illegible] ॥ ३ ॥

[illegible] अनादिनिधने [illegible] परब्रह्मभूते [illegible] ॥ ४ ॥ दशाननत्वे [illegible] दाशरथि-रूपदर्शनमेव [illegible] । [illegible] मानुषबुद्धि-[illegible] ॥ ५ ॥ [illegible] ॥ ६ ॥ [illegible] । [illegible] इति [illegible] [illegible] [illegible] [illegible]

तच रूपमुत्फुल्लपद्मदलामलायतनेत्रमतिस्वच्छपीतवस्त्रधार्य्य-मलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहु शङ्ख-चक्रगदासिधरम् अतिप्रौढवैराग्यभावात् षट्सर्गाजनन्यामाः-सनयनादिस्वरूपान्तरम् सेवापरगणावतारासेवितम् ॥ ८ ॥

ततस्तमेवाक्रूरोऽपश्यदवगत तमेव हृदये धारयन्नात्म-प्रभाय भगवदस्तवक्रांशुमालाज्ज्वलनस्वयंतेजःस्वरूपं परम-ब्रह्मस्वरूपमपगतरागद्वेषादिदोषं भगवन्तमक्रूराेऽस्तौत् ॥ ९ ॥

तावच्च भगवत्प्रकृत्याद्यापादितः । तेन ततस्तस्य दृष्ट्याभिलाषितमतया भगवतस्तदात्मस्वरूपतोऽपि तत्क्षणं च जग-न्मयत्वे । एतत् तवाखिलं मयाभिहितम् । भगवानिह कीर्तितः संस्तुतश्च हि धामृतस्मै नाप्याखिलसुरासुरादिदुर्लभ फलं प्रयच्छति, किमुत सम्यक् भक्तिमताम् ॥ १० ॥

वसुदेवस्यानकदुन्दुभेः पौरवौरोहिणीमदिराभद्रादेवकी प्रमुखा बह्वाः पत्न्योऽभवन् ॥ ११ ॥

चतुर्गाभि-प्रथमोक्ता पतङ्गं पाशपाशं, सदैव भगवद्भावतीर्णता-इत्यवधा ॥ ७ ॥

स्वाचार्य्यानविघाताय, मघु दुर्वषिवि । मधु प्रसन्नताऽस्तु स्वाभाव: विपुरावन्तु पंचधो मेषावमवादिल्लम्बव: । स्वाभावो गुडूचिनवच मेषावनवाद्दि'म च'र्व: ॥ ८ ॥ ससघ चौत्रैनवनानाद्वौ सुषुम्न:चापवच्च भोवचैवुषाद्वायुवारयाच, सम दवि । वाक्यौ वेवाद्वैपोष्ठितु बवयता वक्ष 'वस्र' वम वाच मद्वायुवादा'वषद्मवष ॥ ९ ॥ विवुनावषष्ठि विवयवा'स, धनदूवि । कुशादिप्रवर्त्त वाच वदिपवष्ट ॥ १० ॥

बलभद्रसारणशठदुर्मदादीन् पुत्रान् रोहिण्यामानकदुन्दुभिरुत्पादयामास। बलभद्रोऽपि रेवत्यां विशठोल्मुकौ पुत्रावजनयत्। सार्ष्टिमार्ष्टिमसृष्टिशिशुसत्यधृतिप्रमुखाः सारणात्मजाः। भद्राश्वभद्रबाहुदुर्दमभूताद्या रोहिण्याः कुलजाः ॥ १२ ॥

नन्दोपनन्दकृतकाद्या मदिरायास्तनयाः। भद्रायाश्चोपनिधिगदाद्याः। वैशाल्यां च कौशिकमेकमेवानकदुन्दुभिः। देवक्यामपि कीर्त्तिमत्सुषेणोदायिभद्रसेनऋजुदासभद्रदेवाख्याः षट् पुत्रा जज्ञिरे ॥ १३ ॥

तांश्च सर्वानेव कंसो घातितवान्। अनन्तरञ्च सप्तमं गर्भमर्द्धरात्रे भगवत्प्रहिता योगनिद्रा रोहिण्या जठरमपकृष्य नीतवती ॥ १४ ॥

कर्षणाच्चासावपि सङ्कर्षणाख्यामवाप ॥ १५ ॥

विपृष्ठादयश्चत्वारः पुत्राः वसुदेवस्य ... पौरवी सुभद्रेत्युक्तैव रोहिण्या विशेषणम्, अत एव पौरव्या न पृथग्वंशोऽभिहितः ॥ ११ ॥ रोहिण्याः प्राधान्येन बलभद्रादीन् बहूनुक्त्वा अन्यासामपि वंशानाह, भद्राद्येति। ... 'पौरवी रोहिणी...' इत्युक्तम्। अत पौरव्या इति पदेऽपि रोहिणीनाम्ना इत्यर्थः। ... रोहिण्याः ... कुलजा वंश्याः ॥ १२ ॥ कीर्त्तिमदादीनां षण्णामपि ... घातितवान् ॥ १३ ॥ रोहिण्या जठरमपकृष्य ... नीतवती ॥ १४ ॥ ... सङ्कर्षणाख्यामवापेति ॥ १५ ॥

ततः सकलजगन्महातरुमूलभूतो भूतातीतभविष्यादि सकलसुरासुरमुनिमनुजमनसामप्यगोचरोऽब्जभवप्रमुखैरनलप्रमुखैश्च प्रणम्यावनिभारावतारणाय प्रसादितो भगवाननादिमध्यो देवकीगर्भे समवततार वासुदेवः ॥ १६ ॥

तत्प्रसादविवर्द्धितमानाभिमाना च योगनिद्रा नन्दगोपपत्न्या यशोदाया गर्भमधिष्ठितवती ॥ १७ ॥

सुप्रसन्नादित्यचन्द्रादिग्रहमव्यालादिभयं सुस्थमानसमखिलमेवैतत् जगदपास्ताधर्ममभवत् तस्मिंश्च पुण्डरीकनयने जायमाने ॥ १८ ॥

जातेन च तेनाखिलमेवैतत् सन्मार्गवर्त्ति जगदक्रियत । भगवतोऽप्यत्र मर्त्त्यलोकेऽवतीर्णस्य षोडशसहस्राण्येकोत्तरशताधिकानि स्त्रीणामभवन् । तासाञ्च रुक्मिणीसत्यभामाजाम्बवतीचारुहासिनीप्रमुखा ह्यष्टौ पत्न्यः प्रधानाः । तासु चाष्टायुतानि लक्षञ्च पुत्राणां भगवानखिलमूर्त्तिरनादिमानजनयत् ॥ १९ ॥

सकलं जगदेव महातरुस्तस्य मूलभूतः । भूता वर्त्तमानाः अतीताश्च भविष्यन्तश्च आदिपदात् तद्व्यतिरिक्ताश्च सकला ये सुरासुरादयस्तेषाम् अप्यगोचरः । अब्जभवो ब्रह्मा अनलप्रमुखैरिन्द्रादिभिः भारहरे अनलप्रमुखैः देवैश्च प्रसादितो वासुदेवो देवकीगर्भे समवततार अवततार ॥ १६ ॥ मानः सम्मानः, अभिमानो अहङ्कारः, तत्प्रसादेन वर्द्धितौ यौ तावुभौ यस्याः सा योगनिद्रा यशोदागर्भमधिष्ठितवती बभूव ॥ १७ ॥

तस्मिन् जायमाने सुप्रसन्नादित्यचन्द्रादिग्रहव्यालादिभयशून्यत्वेन स्थितं जगदपास्ताधर्मम् ॥ १८ ॥ तासु पत्नीषु अष्टायुतानि अष्टषष्टिः । एवं रुक्मिण्यादीनामष्टानां प्रत्येकं दश दश पुत्रा ज्ञेयाः । अन्यासां

तेषां च प्रद्युम्नचारुदेष्णसाम्बादयस्त्रयोदश प्रधानाः । प्रद्युम्नो हि रुक्मिणस्तनयां ककुद्मतीं नामोपयेमे । तस्यामस्यानिरुद्धो [illegible] जज्ञे, अनिरुद्धोऽपि रुक्मिण एव पौत्रीं सुभद्रां नामोपयेमे । तस्यामस्य वज्रोऽभवत् । वज्रस्य प्रतिबाहुः, तस्यापि सुचारुः । एवमनेकशतसाहस्रपुरुषसङ्ख्यस्य यदुकुलस्य पुरुषसंख्या वर्षशतैरपि वक्तुं न शक्यते । यतो हि श्लोकावत्र परिगीतौ ॥ २० ॥

तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च ।
कुमाराणां गृहाचार्याश्चापयोग्यासु ये रताः ॥ २१ ॥
संख्यानं यादवानां कः करिष्यति महात्मनाम् ।
यत्रायुतानामयुतं लक्षेणास्ते शताधिकम् ॥ २२ ॥
देवासुरे हता ये तु दैतेयाः सुमहाबलाः ।
ते चोत्पन्ना मनुष्येषु जनोपद्रवकारिणः ॥ २३ ॥

[illegible] ॥ १९ ॥ परिगीतौ कथितौ ॥ २० ॥ [illegible] ॥ २१ ॥

[illegible] ॥ २२ ॥ [illegible] ॥ २३ ॥ [illegible]

तेषामुत्सादनार्थाय भुवि देवा यदोः कुले।
अवतीर्णाः कुलशतं यत्रैकाभ्यधिकं द्विज ॥ २४ ॥
विष्णुस्तेषां प्रमाणे च प्रभुत्वे च व्यवस्थितः।
निदेशस्थायिनस्तस्य ववृधुः सर्वयादवाः ॥ २५ ॥
प्रसूतिं वृष्णिवीराणां यः शृणोति नरः सदा।
स सर्वपातकैर्मुक्तो विष्णुलोकं प्रपद्यते ॥ २६ ॥

षोडशोऽध्यायः।

पराशर उवाच।

इत्येष समासतस्ते कथितः तुर्वसोर्वंशमवधारय ॥१॥

तुर्वसोर्वह्निरात्मजः वह्नेर्गोभानुः, ततश्च त्रैसानुः तस्माच्च करन्धमः, तस्मादपि मरुत्तः, सोऽनपत्योऽभवत्। ततश्च पौरवं दुष्यन्तं पुत्रमकल्पयत। एवं ययातिशापात् तद्वंशः पौरवं वंशमाश्रितवान् ॥ २ ॥

अत इत्यत्र पूर्वोक्तेनैवान्वय इति ॥ २४ ॥ प्रमाणे शास्त्रीयार्थनिर्णये प्रभुत्वे शासने च निदेशस्थायिनः वचनस्था ववृधुः। वृष्णिरिति [illegible] [illegible] ॥ २६ ॥

॥ अथ तुर्वसोर्वंशो वक्तव्य [illegible]। ययातिशापात् दुष्यन्तं पौरवं [illegible] [illegible] तुर्वसोर्वंशमाह, तुर्वसोरिति [illegible] ययातिशापा[illegible] [illegible] ॥२॥

सप्तदशोऽध्यायः ।

पराशर उवाच ।

द्रुह्योस्तु तनयो बभ्रुः ॥ १ ॥

ततः सेतुः, सेतुपुत्र आरद्वान नाम, तदात्मजो गान्धारः ततो धर्मः धर्मात् घृतः, घृतात् दुर्गमः, ततः प्रचेताः, प्रचेतसः पुत्रशतम् अधर्मबहुलानां म्लेच्छानामुदीच्यादीनामाधिपत्यमकरोत् ॥ २ ॥

अष्टादशोऽध्यायः ।

पराशर उवाच ।

ययातेश्चतुर्थस्य पुत्रस्य अनोः सभानरचाक्षुषपरमेषु-संज्ञास्त्रयः पुत्रा बभूवुः । सभानरपुत्रः कालानरः, कालानरात् सृञ्जयः, सृञ्जयात् पुरञ्जयः, तस्मात् जनमेजयः, ततो महाशालिः, तस्मात् च महामनाः, तस्मादुशीनरतितिक्षू द्वौ पुत्रौ उत्पन्नौ । उशीनरस्यापि शिबिनृगनर-

[illegible]

कृमिवर्माख्याः पञ्च पुत्रा बभूवुः। वृषदर्भसुवीरकैकेयमद्रकाश्चत्वारः शिबिपुत्राः। तितिक्षोरपि रुशद्रथः पुत्रोऽभूत्। ततो हेमः, हेमात् सुतपाः तस्माद् बलिः, यस्य क्षेत्रे दीर्घतमसा अङ्गवङ्गकलिङ्गसुह्मपुण्ड्राख्यं बालेयं क्षत्रमजन्यत॥ १ ॥

तन्नामसन्ततिसंज्ञाश्च पञ्च विषया बभूवुः॥ २ ॥

अङ्गादनपानः, ततो दिविरथः, तस्मात् धर्मरथः, ततश्चित्ररथः। रोमपादसंज्ञो यस्य पुत्रो दशरथो जज्ञे। तस्मै चाजपुत्रो दशरथः शान्तां नाम कन्यामनपत्याय दुहितृत्वे युयोज॥ ३॥

रोमपादाच्चतुरङ्गः, तस्मात् पृथुलाक्षः, ततश्चम्पः। यश्चम्पां निवेशयामास॥ ४॥

चम्पस्य हर्यङ्गः, ततो भद्ररथः, बृहद्रथः, बृहत्कर्मा च। बृहत्कर्मणश्च बृहद्भानुः, तस्माद् बृहन्मनाः, ततो जयद्रथः। जयद्रथस्तु ब्रह्मक्षत्रान्तरालसम्भूत्यां पत्न्यां विजयं नाम पुत्रमजीजनत॥ ५॥

[illegible] ॥ १ ॥

तन्नामेति [illegible] देशा बभूवुः ॥ २ ॥ ततश्चित्ररथ इति [illegible] पुत्रो रोमपाद [illegible] दशरथः [illegible] पुराण ॥ ३ ॥ [illegible] "ब्राह्मण्यां [illegible] जातः सूत." इति [illegible] इति

विजयस्य धृतिं पुत्रमवाप। तस्यापि धृतव्रतः पुत्रोऽभवत्। धृतव्रतात् सत्यकर्मा, सत्यकर्मणस्त्वतिरथः। योऽसौ गङ्गां गतो मञ्जूषागतं पृथापविद्धं कर्णं पुत्रमवाप ॥ ६ ॥

कर्णाद् वृषसेन इत्येते अङ्गाः ॥ ७ ॥

अतश्च पौरववंशं श्रोतुमर्हसीति ॥ ८ ॥

ऊनविंशोऽध्यायः ।

पराशर उवाच

पुरोर्जनमेजयः पुत्रः तस्यापि प्रचिन्वान् प्रचिन्वतः प्रवीरः, तस्मान्मनस्युः, मनस्योश्चाभयदः, तस्यापि सुद्युम्नः, ततो बहुगवः तस्य संयातिः, संयातेरहंयातिः ततो रौद्राश्वः ऋतेयुः कक्षेयुः कृतेयुः, स्थण्डिलेयुः धृतेयुः जलेयुः सन्नतेयुः धर्मेयुः वनेयुः नामानो रौद्राश्वस्य दशात्मजा बभूवुः ॥ १ ॥

[illegible] ॥ ५ ॥

[illegible] ॥ ६ ॥ [illegible] ॥ ७ ॥

ऊनविंशे [illegible] पुरोर्वंशो निरूप्यते । [illegible]

ऋतेयोरन्तिनारः पुत्रोऽभूत्। तंसुम अप्रतिरथं ध्रुवञ्च रन्तिनारः पुत्रानवाप। अप्रतिरथात् कण्वः, तस्यापि मेधातिथिः। यतः काण्वायना द्विजा बभूवुः। तंसोरैलिनः, ततो दुष्मन्ताद्याश्चत्वारः पुत्रा बभूवुः। दुष्मन्ताच्चक्रवर्त्ती भरतोऽभवत्। यन्नामहेतुर्देवैः श्लोको गीयते।

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्मन्त मावमंस्थाः शकुन्तलाम्॥ २॥
रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात्।
त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला॥ ३॥

काण्वायना इति [illegible] ते [illegible] इति [illegible] ॥ १ ॥ दुष्मन्तो [illegible] ततो विश्वामित्रान्मेनकाया जाता शकुन्तला [illegible] कण्व [illegible] गान्धर्वेण विवाहेन [illegible] गर्भ [illegible] । [illegible] जातपुत्रां [illegible] दुष्मन्तं प्रति [illegible] । भस्त्रा चर्मपुटं, [illegible] माता [illegible] पितुः पुत्रः। पिता येन पिता जातो [illegible] स एव पुत्रः [illegible], आत्मा वै जायते पुत्र इति वचनात्। अतः पुत्रं भरस्व [illegible] शकुन्तलाम् [illegible] इति [illegible] ॥ २ ॥ किञ्च रेतोधाः रेतसां [illegible] रेतोधाः [illegible]। [illegible] पुत्रो [illegible] नरकात् [illegible] उन्नयति ऊर्ध्वं नयति। अतो रेतोधाः रेतःसेक्तारं पुत्रम् उन्नयति। ततः किम्? अत आह, त्वं अस्य गर्भस्य रेतोधा रेतःसेक्ता इति शकुन्तला [illegible], [illegible]। [illegible] ॥ ३ ॥

भरतस्य च पत्नीनां ये नव पुत्रा बभूवुर्नैते ममानुरूपाः पुत्राः इत्यभिहितास्तन्मातरो जघ्नुः परित्यागभयात् ॥ ४ ॥

ततोऽस्य पुत्रजन्मनि वितथे पुत्रार्थिनो मरुत्स्तोमयाजिना दीर्घतमसा पार्ष्ण्यपास्ताद्बृहस्पतिवीर्यादुतथ्यपत्नीममतासमुत्पन्नो भरद्वाजाख्यः पुत्रो मरुद्भिर्दत्तः ॥ ५ ॥

तस्यापि नामनिर्वचनश्लोकः पठ्यते ॥ ६ ॥

मूढे ! भर द्वाजमिमं भर द्वाजं बृहस्पते ! ।
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥ ७ ॥ इति ।

नैते पुत्रा ममानुरूपा मत्सदृशा भवन्तीति भरतेनोक्तास्तन्मातरोऽसत्पुत्रमातृत्वेन अयमस्मान् पतिरस्मान् परित्यक्ष्यतीति परित्यागभयात् तान् पुत्रान् जघ्नुः अघातयन् ॥ ४ ॥
वितथे व्यर्थे सति। दीर्घतमसेति। अत्रेयं कथा, बृहस्पतेरग्रजस्य उतथ्यस्य ममताख्यायां भार्यायां बृहस्पतिः कामाभिभूतो रेतोऽसृजत्। तत्र गर्भं प्रविशत् गर्भस्थेन स्थानसङ्कोचभयात् पार्ष्णिघातेनाऽपास्तं बहिः पतितमपि अमोघवीर्यतया भरद्वाजनामा पुत्रोऽभवत्। गर्भस्थश्च बृहस्पतिना शप्तोऽन्धो दीर्घतमा नाम्नाऽभवत्। स भरद्वाजो देवैर्दत्तः ॥ ५ ॥
तत्र च भरद्वाजनामनिरुक्तिपरस्तन्मातापित्रोर्विवादरूपः श्लोको देवैः पठितः ॥ ६ ॥
मूढे ! ममते ! द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्रं भर पुषाण, इदं तु वचनं बृहस्पतिं ममताऽऽह, हे बृहस्पते ! त्वमेवेमं द्वाजं भर इति प्रत्युवाच। परित्यज्य पितरौ ममताबृहस्पती यद् यस्मात् यातौ ततः भरद्वाजश्चासौ भरद्वाजसंज्ञोऽभूदित्यर्थः। यातौ यदुक्त्वेति पाठे विवदमानाविति व्याख्यानम् ॥ ७॥ भरद्वाजस्यैव भरतपुत्रत्वदर्शनात्

भरद्वाजश्च तस्य वितथे पुत्रजन्मनि मरुद्भिर्दत्तः, ततो वितथसंज्ञामवाप ॥ ८ ॥

वितथस्यापि मन्युः पुत्रोऽभूत् । बृहत्क्षत्रमहावीर्यनरगर्गाद्या अभवन्मन्युपुत्राः । नरस्य संकृतिः, संकृते रुचिरधीरन्तिदेवौ । गर्गाच्छिनिः, ततो गार्ग्याः शैन्याः क्षत्रोपेता द्विजातयो बभूवुः ॥ ९ ॥

महावीर्यादुरुक्षयो नाम पुत्रोऽभूत् । तस्य त्रय्यारुणपुष्करिण्यौ कपिश्च पुत्रत्रयमभूत् । तच्च त्रितयमपि पश्चाद्विप्रतामुपजगाम । बृहत्क्षत्रस्य सुहोत्रः, सुहोत्रात् हस्ती । य इदं हस्तिनापुरमावासयामास । अजमीढद्विमीढपुरुमीढास्त्रयो हस्तिनस्तनयाः । अजमीढात् कण्वः, कण्वान्मेधातिथिः, यतः काण्वायना द्विजाः ॥ १० ॥

अजमीढस्यान्यः पुत्रो बृहदिषुः, बृहदिषोर्बृहद्धनुः, ततश्च बृहत्कर्मा, तस्मात् जयद्रथः । ततोऽपि विश्वजित्, ततश्च सेनजित् । रुचिराश्वकाश्यदृढधनुर्वत्सहनुसंज्ञाः सेनजितः पुत्राः । रुचिराश्वात् पृथुसेनः, तस्मात् पारः, पारात् नीपः । तस्यैकशतं पुत्राणाम्, तेषां प्रधानः काम्पिल्याधिपतिः समरः ॥ ११ ॥

वितथत्वे हेतुमाह, भरद्वाजश्चेति । [illegible] ततो [illegible] वितथसंज्ञामवापेत्यर्थः ॥ ८ ॥

[illegible] गार्ग्याः शैन्याश्च [illegible] क्षत्रियाः सन्तो ब्राह्मणा बभूवुः ॥ ९ ॥ [illegible] रन्तिदेवो नृपः, [illegible] ॥ १० ॥ काम्पिल्यं नगरं तस्याधिपतिः ॥ ११ ॥

समरस्यापि पारसम्पारसदश्वाख्यास्त्रयः पुत्राः। पारात् पृथुः, पृथोः सुकृतिः, सुकृतेर्विभ्राजः, ततश्चाणुहः। स च शुकदुहितरं कीर्त्तिं नामोपयेमे ॥ १२ ॥

अणुहात् ब्रह्मदत्तः, ततो विष्वक्सेनः, तस्मादुदक्सेनः, ततो भल्लाटः, तस्यात्मजो द्विमीढः, द्विमीढस्य यवीनरसुतः, तस्यापि धृतिमान् ततः सत्यधृतिः, ततश्च दृढनेमिः, तस्माच्च सुपार्श्वः, ततः सुमतिः, ततश्च सन्नतिमान्, सन्नतिमतः कृतोऽभूत्। यं हिरण्यनाभो योगमध्यापयामास। यश्चतुर्विंशतिं प्राच्यसामगानां चकार संहिताः ॥ १३ ॥

कृताच्चोग्रायुधः। येन प्राचुर्य्येण नीपक्षयः कृतः ॥ १४ ॥

उग्रायुधात् क्षेम्यः, तस्मात् सुवीरः तस्य नृपञ्जयः, ततो बहुरथः। इत्येते पौरवाः। अजमीढस्य नीलिनी नाम पत्नी। तस्यां नीलसंज्ञः पुत्रोऽभवत्। तस्मादपि शान्तिः, शान्तेः सुशान्तिः, सुशान्तेः पुरुजानुः, ततश्चक्षुः, ततो हर्य्यश्वः, तस्मात् मुद्गलसृञ्जयबृहदिषुप्रवीरकाम्पिल्याः। पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्राः, इति पित्राभिहिताः, अतस्ते पाञ्चालाः ॥ १५ ॥

पुत्रश्च अंशुमतश्च दुहितरं, हरिवंशे तथैव दर्शनात्। तथाच "चराचरकृतोत्कृष्टः शुको नाम महायशाः। ... शुकस्य दौहित्रोऽभवत्। स तदा विष्वक्सेनाख्यां पौत्रीं ... । तस्य गौरवं ... तथा भूरिश्रुतं ... । ... कीर्तिं वरीं योगिनीं योगमातरम्। ब्रह्मदत्तस्य जननीं ... च ॥" इति। ... ॥ १२ ॥ यः ... संहिताश्चकार ॥ १३ ॥

मुद्गलाच्च मौद्गल्याः क्षत्रोपेता द्विजातयो बभूवुः।
मुद्गलाद् बृहदश्वः, बृहदश्वाद् दिवोदासोऽहल्या च मिथुन-
मभूत्। शरद्वतोऽहल्यायां शतानन्दोऽभवत्। शतान-
न्दात् सत्यधृतिः धनुर्वेदान्तगो जज्ञे। सत्यधृतेस्तु वराप्स-
रसमुर्वशीं दृष्ट्वा रेतः स्कन्नं शरस्तम्बे पपात॥ १६॥

तच्च द्विधागतमपत्यद्वयं कुमारः कन्या च अभवत्।
मृगयामुपयातः शान्तनुर्दृष्ट्वा कृपया जग्राह॥ १७॥

ततः स कुमारः कृपः, कन्या चाश्वत्थाम्नो जननी कृपी
द्रोणाचार्यस्य पत्न्यभवत्। दिवोदासस्य मित्रयुः, मित्रयोश्च्य-
वनो नाम राजा, च्यवनात् सुदासः, ततः सौदासः सह-
देवः, तस्यापि सोमकः, ततो जन्तुः शतपुत्रज्येष्ठोऽभवत्।
तेषां यवीयान् पृषतः, पृषतात् द्रुपदः, तस्मात् धृष्टद्युम्नः,
तस्मात् धृष्टकेतुः। अजमीढस्यान्य ऋक्षनामा पुत्रोऽभूत्
तस्मात् संवरणः, संवरणात् कुरुः, य इदं धर्मक्षेत्रं
कुरुक्षेत्रं चकार॥ १८॥

सुधनुर्जह्नुपरीक्षित्प्रमुखाः कुरोः पुत्रा बभूवुः।
सुधनुषः सुहोत्रः, तस्माच्च्यवनः, च्यवनात् कृतकः,
ततश्चोपरिचरो वसुः। बृहद्रथप्रत्यग्रकुशाम्बमावेल्लमत्स्य-
प्रमुखा वसोः पुत्राः सप्ताजायन्त। बृहद्रथात् कुशाग्रः,

मौद्गः: क्षत्रियविशेषाज्जाता इव जाताः। पञ्चानां विप्राणां
मध्येऽपरः देवादासः॥ १६॥ शरद्वतो गौतमात् स्कन्नं रेतःपतितम्।
तद्द्वेधा द्विधाभूतं इति, मृगयार्थं गतः शन्तनुः शिबिकायां आरोप्य
स कृपया अनुगृहीतः॥ १७॥ कर्षणेन धर्मक्षेत्रं पितृव्यवंश्यम्॥ १७॥
कुरुणा कर्षणेन धर्मक्षेत्रं देवयजनभूमिकारणं क्षेत्रं चकार॥ १८॥

तस्मादृषभः, ततः पुष्पवान्, तस्मात् सत्यधृतः, तस्मात् सुधन्वा, तस्य च जन्तुः । बृहद्रथाच्चान्यः शकलद्वयजन्मा जरया सन्धितो जरासन्धो नाम । तस्मात् सहदेवः, ततः सोमापिः, ततः श्रुतश्रवाः । इत्येते मागधा भूभृतः ॥ १८ ॥

विंशोऽध्यायः ।

पराशर उवाच ।

परिक्षितो जनमेजयश्रुतसेनोग्रसेनभीमसेनाश्चत्वारः पुत्राः ॥ १ ॥

जह्नोस्तु सुरथो नामात्मजो बभूव ॥ २ ॥

तस्य विदूरथः, विदूरथस्य सार्वभौमः, सार्वभौमात् जयसेनः, तस्मात् आराधी, ततश्च अयुतायुः, अयुतायोरक्रोधनः, तस्मात् देवातिथिः, ततश्च ऋक्षोऽन्यः ॥ ३ ॥

ऋक्षात् भीमसेनः, ततश्च दिलीपः, दिलीपात् प्रतीपः, तस्यापि देवापिशान्तनुबाह्लीकसंज्ञास्त्रयः पुत्रा बभूवुः । देवापिर्बाल्य एवारण्यं विवेश ॥ ४ ॥

शकलद्वयं जन्म यस्य जरया राक्षस्या सन्धितो योजितः ॥ १८ ॥

विंशे तु कुरुपुत्राणां वंशमाह पराशरः । तत्र अनुक्तवक्ष्यमाण-कुरुवंशानुकीर्तनमिति: । कुरोः पुत्राणां मध्ये जह्नुवंशं वक्ष्यन्, इदानीं कुरुपुत्रकीर्तन परिक्षितो वंशं वक्ष्यति, परिक्षित इति ॥ १ ॥ कुरुपुत्रस्यैव जह्नोर्वंशमाह, जह्नोरिति ॥ २ ॥ पूर्वोक्तात् अक्रोधनादृक्षादन्यः ॥ ३ ॥ देवापिर्यो नामवदिदृक्षायामेवाह, देवापिरिति ॥ ४ ॥ सं सं अस्य

शान्तनुरवनीपतिरभवत्। अयञ्च तस्य श्लोकः पृथिव्यां गीयते।

यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः।

शान्तिञ्चाप्नोति येनाग्र्यां कर्मणा तेन शान्तनुः॥ ५॥

तस्य शान्तनो राष्ट्रे द्वादश वर्षाणि देवो न ववर्ष॥ ६॥

ततश्च सर्वराष्ट्रविनाशमवेक्ष्यासौ राजा ब्राह्मणान् अपृच्छत् भोः! कस्मात् अस्मिन् राष्ट्रे देवो न वर्षति? को ममापराधः? इति। ते तम् ऊचुः अग्रजस्य ते हीयमवनिस्त्वया भुज्यते, परिवेत्ता त्वम् इत्युक्तः स पुनस्तान् अपृच्छत्, किं मया विधेयमिति? ते तम् ऊचुः, यावत् देवापिर्न पतनादिभिर्दोषैरभिभूयते तावत् तस्यार्हं राज्यम्, तदलमेतेन तस्मै दीयताम्, इत्युक्ते तस्य मन्त्रिप्रवरेण अश्मसारिणा तत्रारण्ये तपस्विनो वेदवादविरोधवक्तारः प्रयोजिताः॥ ७॥

तैरपि अतिऋजुमतेर्महीपतिपुत्रस्य बुद्धिर्वेदविरोधमार्गानुसारिण्यक्रियत॥ ८॥

राजा च शान्तनुर्द्विजवचनोत्पन्नपरिदेवनशोकस्तान् ब्राह्मणान् अग्रतः कृत्वा अग्रजराज्यप्रदानाय अरण्यं

[illegible] यौवनमेति, [illegible] [illegible] [illegible] [illegible] ॥५॥ [illegible] ॥६॥

[illegible] प्रयोजिताः ॥ ७॥ अति-ऋजुमतेः [illegible] ॥ ८॥

जगाम। तदाश्रमम् उपगताश्च तमवनीपतिपुत्रं देवापिमुपतस्थुः। ते ब्राह्मणा वेदवादानुबन्धीनि वचांसि राज्यमग्रजेन कर्त्तव्यमित्यर्थवन्ति तमूचुः। असावपि वेदवादविरोधियुक्तिदूषितमनेकप्रकारं तानाह। ततस्ते ब्राह्मणाः शान्तनुमूचुः, आगच्छ भो राजन्! अलमत्रातिनिर्बन्धेन, प्रशान्त एवासावनावृष्टिदोषः, पतितोऽयमनादिकालमहितवेदवचनदूषणोच्चारणात्। पतिते च अग्रजे नैव परिवेत्तृत्वं भवति, इत्युक्तः शान्तनुः स्वपुरम् आगत्य राज्यमकरोत्। वेदवादविरोधिवचनोच्चारणदूषिते च ज्येष्ठेऽस्मिन् भ्रातरि देवापावखिलशस्यनिष्पत्तये ववर्ष भगवान् पर्जन्यः। बाह्लीकस्य सोमदत्तः पुत्रोऽभूत् ॥ ९ ॥

सोमदत्तस्यापि भूरिर्भूरिश्रवाः शल्यसंज्ञास्त्रयः पुत्राः। शान्तनोरप्यमरनद्यां गङ्गायामुदारकीर्त्तिरशेषशास्त्रार्थविद् भीष्मः पुत्रोऽभूत्। सत्यवत्याञ्च चित्राङ्गदविचित्रवीर्यौ पुत्रावजनयत शान्तनुः। चित्राङ्गदस्तु बाल एव चित्राङ्गदेन गन्धर्वेणाहवे विनिहतः। विचित्रवीर्योऽपि काशिराजतनये अम्बिकाम्बालिके उपयेमे। तदुपभोगातिखेदाच्च यक्ष्मणा गृहीतः पञ्चत्वमगमत्। सत्यवतीनियोगाच्च मत्पुत्रः कृष्णद्वैपायनो मातुर्वचनमनतिक्रमणीयम् इति विचित्रवीर्यक्षेत्रे धृतराष्ट्रपाण्डू तत्प्रहितभुजिष्यायाञ्च विदुरमुत्पादयामास ॥ १० ॥

शान्तनोर्द्दैवर्षितविधानं व्याप्ते पञ्चम् प्रथमं बाह्लीकवंशमाह, बाह्लीकेति ॥ ९ ॥ अथ पराशरस्य पुत्रः सत्यवत्याः भुजिष्यायां दास्याम् ॥ १० ॥

धृतराष्ट्रोऽपि दुर्य्योधनदुःशासनादिप्रधानं पुत्रशतं
(गान्धार्य्याम्) उत्पादयामास। पाण्डोरप्यरण्ये मृगयायामृषिशापो-
पहतजननसामर्थ्यस्य धर्म्मवायुशक्रैर्युधिष्ठिरभीमसेनार्ज्जुनाः
कुन्त्यां, नकुलसहदेवौ च अश्विभ्यां माद्र्यां पञ्च पुत्राः समुत्-
पादिताः। तेषां द्रौपद्यां पञ्च पुत्रा बभूवुः। युधिष्ठिरात्
प्रतिविन्ध्यः, भीमसेनात् श्रुतसोमः, श्रुतकीर्त्तिरर्ज्जुनात्,
शतानीको नकुलात् श्रुतकर्म्मा सहदेवात्। अपरे च
पाण्डवानामात्मजाः। तद्यथा, यौधेयी युधिष्ठिरात्
देवकं पुत्रमवाप। हिडिम्बा घटोत्कचं भीमसेनात्
पुत्रमवाप। काशी च भीमसेनादेव सर्व्वगं पुत्रमवाप।
सहदेवाच्च विजया सुहोत्रं नाम पुत्रं प्राप्तवती। करेणु-
मत्याञ्च नकुलोऽपि निरमित्रमजीजनत्। अर्ज्जुनस्याप्यु-
लूप्यां नागकन्यायामिरावान् नाम पुत्रोऽभूत्। मणिपूर-
पतिपुत्र्याञ्च पुत्रिकाधर्म्मेण बभ्रुवाहनं नाम पुत्रमजी-
जनत्॥ ११॥

सुभद्रायाञ्चार्भकत्वेऽपि योऽसावतिबलपराक्रमसमस्ता-
रातिरथजेता सोऽभिमन्युरजायत। अभिमन्योरुत्तरायां
परिक्षीणेषु कुरुष्वश्वत्थामप्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो
भगवतः सकलसुरासुरवन्दितचरणयुगलस्यात्मेच्छाकारण-

योऽयं साम्प्रतमेतद्भूमण्डलमखण्डितायति धर्म्मेण पालयतीति ।

एकविंशोऽध्यायः ।

पराशर उवाच ।

अतःपरं भविष्यानहं भूमिपालान् कीर्त्तयिष्ये । योऽयं साम्प्रतमवनीपतिः, तस्यापि जनमेजयश्रुतसेनोग्रसेनभीमसेनाः पुत्राश्चत्वारो भविष्यन्ति ॥ १ ॥

तस्यापरः शतानीको भविष्यति । योऽसौ याज्ञवल्क्यात् वेदमधीत्य कृपादस्त्राण्यवाप्य विषयविरक्तचित्त-

---

धृतिमिति भगवतत्पादुकाभ्यां परिरक्षितामनियतो च चेतः । आश्वत्थामास्त्र-चारणेन मातृगर्भे भस्मीभूतं यो च तस्य तस्य पुनर्जीवितमवाप्य परिक्षित् अभूत् ॥ १२ ॥

साम्प्रतमित्यनेन परिक्षितुः स्वकाल एव पराशरमैत्रेयसंवाद इति गम्यते । अखण्डिता आयतिः प्रभावो यस्य तद् यथा स्यादिति क्रियाविशेषणम् स्यात् प्रभावेऽपि आयतिरित्यमरः । आयतिरुत्तरफल-रादिलक्षणम्, वा अखण्डिता यस्य तद् यथा स्यादिति वा ॥ १२ ॥

तेषां भविष्यन् उपपद्यन्ते । क्षेमकं प्राप्य यः संस्थां

कुरुपाण्डव-परिक्षित इत्यादि जनमेजयादिवंशा

१ ॥ तस्य जनमेजयस्य । आश्वविप्राणामतत्-

धृतराष्ट्रोऽपि दुर्योधनदुःशासनादिप्रधानं पुत्रशतं (गान्धार्याम्) उत्पादयामास। पाण्डोरप्यरण्ये मृगयायामृषिशापोपहतप्रजाजननसामर्थ्यस्य धर्मवायुशक्रैर्युधिष्ठिरभीमसेनार्जुनाः कुन्त्यां, नकुलसहदेवौ चाश्विभ्यां माद्र्यां पञ्च पुत्राः समुत्पादिताः। तेषां द्रौपद्यां पञ्च पुत्रा बभूवुः। युधिष्ठिरात् प्रतिविन्ध्यः, भीमसेनात् श्रुतसोमः, श्रुतकीर्तिरर्जुनात्, शतानीको नकुलात्, श्रुतकर्मा सहदेवात्। अपरे च पाण्डवानामात्मजाः। तद्यथा, यौधेयी युधिष्ठिरात् देवकं पुत्रमवाप। हिडिम्बा घटोत्कचं भीमसेनात् पुत्रमवाप। काशी च भीमसेनादेव सर्वगं पुत्रमवाप। सहदेवाच्च विजया सुहोत्रं नाम पुत्रं प्रासूत। करेणुमत्यां च नकुलोऽपि निरमित्रमजीजनत्। अर्जुनस्याप्युलूप्यां नागकन्यायामिरावान् नाम पुत्रोऽभवत्। मणिपुरपतिपुत्र्यां पुत्रिकाधर्मेण बभ्रुवाहनं नाम पुत्रमर्जुनोऽजनयत्। ११।

सुभद्रायाञ्चार्भकत्वेऽपि योऽसावतिबलपराक्रमसमस्तारातिरथजेता सोऽभिमन्युरजायत। अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वश्वत्थामप्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो भगवतः सकलसुरासुरवन्दितचरणयुगलस्यात्मेच्छया कारणमानुषरूपधारिणोऽनुभावात् पुनर्जीवितमवाप्य परिक्षित् जज्ञे। १२।

बभ्रुवाहनं नाम पुत्रं ... पुत्रिकाधर्मेण "अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति" इत्यादिसमयबन्धेन ॥ ११ ॥ परिक्षीणेषु

सोऽयं साम्प्रतमेतद् भूमण्डलमखण्डितायति धर्मेण पालयतीति ।

एकविंशोऽध्यायः ।

पराशर उवाच ।

अतः परं भविष्यानहं भूमिपालान् कीर्त्तयिष्ये । योऽयं साम्प्रतमवनीपतिः, तस्यापि जनमेजयश्रुतसेनोग्रसेनभीमसेनाः पुत्राश्चत्वारो भविष्यन्ति ॥ १ ॥

तस्यापरः शतानीको भविष्यति । योऽसौ याज्ञवल्क्यात् वेदमधीत्य कृपादस्त्राण्यवाप्य विषयविरक्तचित्त-

---

इति भगवत्पादपृष्ठे परिक्षितामभिरक्षी च चेद्यः । ध्यात्वा ध्या-
चारत्वेन आत्मपक्षं धनुं मोक्षं यस्य तस्य पुनर्जीवितमवाप्य परि-
क्षितः ॥ १२ ॥

शाम्भलविज्ञानेन परिक्षिद्भूषावाक एव पराशरमैत्रेयसंवाद इति
। अखण्डिता आयतिः प्रभावो यस्य तद् यथा स्यादिति क्रिया-
विशेषणम् स्यात् प्रभावेऽपि आयतिरित्यमरः । आयतिरुत्तरफलं
दैर्घ्यम्वा, वा अखण्डिता यस्य तद् यथा स्यादिति वा ॥ १२ ॥

एकविंशे पुरोर्वंशो भविष्यन् उपवर्ण्यते । क्षेमकं प्राप्य यः संस्थां
समविन्दति । कुरुवंश-परिक्षित इत्यत्रापि जनमेजयादिसंज्ञा
चत्वारः पुत्राः ॥ १ ॥ तस्य जनमेजयस्य । याज्ञवल्क्यादयस्तु-

इत्येष श्रोत्रियोपदेशादात्मविज्ञानपरायणः परं निर्वाणमाप्स्यति ॥ २ ॥

शतानीकादश्वमेधदत्तो भविता, तस्मादप्यधिसीमकृष्णः, अधिसीमकृष्णात् निचक्नुः, यो गङ्गयापहृते हस्तिनापुरे कौशाम्ब्यां निवत्स्यति। तस्याप्युष्णः पुत्रो भविता। उष्णाद्विचित्ररथः, ततः शुचिरथः, तस्मात् वृष्णिमान्, ततः सुषेणः, तस्मादपि सुनीथः, सुनीथान्नृचक्षुः, तस्मादपि सुखावलः, तस्मात् परिप्लवः, ततश्च सुनयः, ततो मेधावी, मेधाविनो नृपञ्जयः, ततो मृदुः तस्मात् तिग्मः, तिग्मात् बृहद्रथः, तस्मात् वसुदानः, ततोऽपरः शतानीकः ॥ ३ ॥

तस्माच्चोदयनः, उदयनादहीनरः, ततश्च दण्डपाणिः, ततो निरमित्रः, तस्माच्च क्षेमकः। तत्राय श्लोकः।

ब्रह्मक्षत्रस्य यो योनिर्वंशो राजर्षिसत्कृतः।

क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥ ४ ॥

—:०:—

[illegible] ॥ १ ॥ [illegible] [illegible] ॥

द्वाविंशोऽध्यायः ।

पराशर उवाच ।

अतश्चेक्ष्वाकवो भविष्याः पार्थिवाः कथ्यन्ते ।
बृहद्बलस्य पुत्रो बृहत्क्षणः ॥ १ ॥

तस्मादुरुक्षेपः, ततो वत्सः, वत्सात् वत्सव्यूहः, ततः प्रतिव्योमः, तस्यापि दिवाकरः, तस्मात् सहदेवः ॥२॥

ततो बृहदश्वः तत्सूनुर्भानुरथः, तस्यापि सुप्रतीकः, ततो मरुदेवः, मरुदेवात् सुनक्षत्रः, तस्मात् किन्नरः, किन्नरादन्तरिक्षः, तस्मात् सुवर्णः, ततश्चामित्रजित्, ततश्च बृहद्भाजः, तस्यापि धर्मी, धर्मिणः कृतञ्जयः, कृतञ्जयाद्रणञ्जयः, रणञ्जयात् सञ्जयः, तस्मात् शाक्यः, शाक्यात् शुद्धोदनः, तस्मात् राहुलः, ततः प्रसेनजित्, ततश्च क्षुद्रकः, ततः कुण्डकः, तस्मादपि सुरथः, ततश्च सुमित्रोऽन्त्यः, इत्येते चेक्ष्वाकवो बृहद्बलान्वयाः । अत्रानुवंशश्लोकः ।

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥ ३ ॥

—:⌣:—

सोमवंशे भविष्याणां राज्ञामत्र प्रसङ्गः । द्वाविंशे सूर्यवंशानां भविष्यो वंश उच्यते । बृहद्बलस्येति, चतुर्थेऽध्याये चतुर्थवंशस्याभि-मन्युना भारते युद्धे व्यापादितस्येत्यत्र दर्शितत्वात् वंशः ॥ १ ॥ यस्य यस्य राज्ञो देवव्यासं दृश्यते तत्र तत्र सुमित्रादि-भेदेन व्यवस्थापयितव्यम् ॥ २ ॥

त्रयोविंशोऽध्यायः ।

पराशर उवाच ।

मागधानां बार्हद्रथानां भविष्याणामनुक्रमं कथयामि ॥१॥
अत्र हि वंशे महाबला जरासन्धप्रधाना बभूवुः ॥ २ ॥
जरासन्धसुतात् सहदेवात् सोमापिः, तस्मात् श्रुतवान्,
तस्याप्ययुतायुः, ततश्च निरमित्रः, तत्तनयः सुक्षत्रः तस्मा-
दपि बृहत्कर्मा, ततश्च सेनजित तस्माच्च श्रुतञ्जयः, ततो
विप्रः, तस्य च पुत्रः शुचिनामा भविष्यति । तस्यापि क्षेम्यः,
ततश्च सुव्रतः, सुव्रतात धर्मः, ततः सुश्रमः ततो दृढसेनः,
ततः सुमतिः, तस्मात सुबलः, तस्य सुनीतो भविता । ततः
सत्यजित, सत्यजितो विश्वजित्, तस्यापि रिपुञ्जयः पुत्रः,
इत्येते बार्हद्रथा भूपतयो वर्षसहस्रमेकं भविष्यन्ति ॥ ३ ॥



बार्हद्रथानां वंशेऽपि भविष्याननुक्रमयति । यस्मो रिपुञ्जयो यत्र सहस्रे यावत् वर्षं । लोकस्य वंशयशोऽभविष्यन् भरतामुखा लोक-वंशतृतनुज्ञानां बार्हद्रथानां भविष्याणाञ्च, मागधानामिति । अत्र च वक्ष्यते लौकिं मागधानामपि जरासन्धादीनामतुल्यत्वं वृन्दसुतात्युःप्रभृतीन भविष्याणाञ्च, अत्र लोकादिना यावद्वक्ष्यति ॥ १ ॥ बार्हद्रथा बृह-द्रथवंशोद्भवाः ॥ ३ ॥

चतुर्विंशोऽध्यायः ।

पराशर उवाच ।

योऽयं रिपुञ्जयो नाम बार्हद्रथोऽन्त्यः, तस्य सुनिको नामामात्यो भविष्यति ॥ १ ॥

स चैनं स्वामिनं हत्वा स्वपुत्रं प्रद्योतनामानम् अभिषेक्ष्यति । तस्यापि पालकनामा पुत्रो भविता । ततश्च विशाखयूपः, तत्पुत्रो जनकः तस्य च नन्दिवर्धनः, इत्येते अष्टत्रिंशदुत्तरमब्दशतं पञ्च प्रद्योताः पृथिवीं भोक्ष्यन्ति ॥२॥

ततश्च शिशुनागः, तत्पुत्रश्च काकवर्णो भविता । तत्पुत्रः क्षेमधर्मा तस्यापि क्षत्रौजाः, तत्पुत्रो विधिसारः, ततश्चाजातशत्रुः, तस्माच्च दर्भकः, दर्भकाच्चोदयाश्वः, तस्मादपि नन्दिवर्धनः, ततो महानन्दी, इत्येते शैशुनागा दश भूमिपालास्त्रीणि वर्षशतानि द्विषष्ट्यधिकानि भविष्यन्ति ॥३॥

महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवापरोऽखिलक्षत्रान्तकारी भविता ॥ ४ ॥

चतुर्विंशे कलौ भाविवंशजाः शूद्रास्तथा नृपाः । भूमेर्गीताश्च श्लोकाः च वैराग्यं च निरूपिताः । इदानीन्तु तद्वंश्यानेव भूभुजः कालेनात्मबलगर्वितान् भाविनः दर्शयन्नाह, योऽयमित्यादिना सर्वैः पृथिव्यां भुक्तो भविष्यतीत्यर्थेन ॥ १ ॥ प्रद्योताः प्रद्योतनामानः । एतच्च राज्ञां तद्राज्यभोगवर्णनं कालकृतराज्यव्यवहारदर्शनेन वैराग्यार्थं ॥ २ ॥ शैशुनागाः शिशुनागापत्यानि ॥ ३ ॥ महापद्म इति । कोटिः शतगुणं पद्मं, पद्मशतगुणं खर्वं, तद्दशगुणं पुनः निखर्वं, तद्दशगुणं महापद्म-

ततः प्रभृति शूद्रा भूमिपाला भविष्यन्ति, स चैकच्छत्रा-मनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यति ॥ ५ ॥

तस्याप्यष्टौ सुताः सुमाल्याद्या भवितारः। तस्य च महापद्मस्यानु पृथिवीं भोक्ष्यन्ति। महापद्मः तत्पुत्राश्च एकं वर्षशतमवनीपतयो भविष्यन्ति। नवैव तान् नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यति ॥ ६ ॥

तेषामभावे मौर्याश्च पृथिवीं भोक्ष्यन्ति। कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति ॥ ७ ॥

तस्यापि पुत्रो बिन्दुसारो भविष्यति। तस्यापि अशोक-वर्धनः, ततः सुयशाः, ततो दशरथः, ततः सङ्गतः, ततः शालिशूकः, तस्मात् सोमशर्मा, तस्मात् शतधन्वा, तस्याप्यनु बृहद्रथनामा भविता। एवं मौर्या दश भूपतयो भविष्यन्ति अब्दशतं सप्तत्रिंशदुत्तरम्। तेषामन्ते पृथिवीं शुङ्गा भोक्ष्यन्ति ॥ ८ ॥

ततः पुष्यमित्रः सेनापतिः स्वामिनं हत्वा राज्यं करि-ष्यति ॥ ९ ॥

निषेत्स्यति, एक एव क्षत्त्रवंशस्य शेषस्य उच्छेत्ता ... शस्त्रः ॥ ५ ॥ एतेनैव सह पुत्रा नव ॥ ६ ॥ नन्दान् नन्द-महापद्मान् कौटिल्यः कौटिल्यनामा वात्स्यायन-विष्णुगुप्तादि-नामधेयः ... ॥ ६ ॥

चन्द्रगुप्तं नन्दस्यैव पत्न्यन्तरस्य मुरासंज्ञस्य पुत्रं मौर्याणां प्रथ-मम् ॥ ७ ॥ शुङ्गाः पुष्पवंशाः ॥ ८ ॥ नामैतत्, पुष्यमित्र इति, पुष्पमित्रः पुष्पाणां प्रभवः ॥ ९ ॥ ...

तस्यात्मजोऽग्निमित्रः, तस्मात् सुज्येष्ठः, ततो वसु-मित्रः, तस्मादप्यार्द्रकः, ततः पुलिन्दकः, ततो घोषवसुः, तस्मादपि वज्रमित्रः, ततो भागवतः ॥ १० ॥

तस्मात् देवभूतिः, इत्येते वै शुङ्गा दशोत्तरं वर्षशतं पृथिवीं भोक्ष्यन्ति। ततः कण्वानेषा भूर्यास्यति ॥ ११ ॥

देवभूतिन्तु शुङ्गराजानं व्यसनिनं, तस्यैवामात्यः कण्वो वसुदेवनामा निपात्य स्वयमवनीं भोक्ष्यति। तत्पुत्रो भूमि-मित्रः, तस्यापि नारायणः, नारायणस्य सुशर्म्मा, एते काण्वायनाश्चत्वारः, पञ्चचत्वारिंशद्वर्षाणि भूपतयो भवि-ष्यन्ति। सुशर्म्माणं काण्वन्तु भृत्यो बलात् शिप्रकनामा हत्वा अन्ध्रजातीयो वसुधां भोक्ष्यति। ततश्च कृष्णनामा तद्भ्राता भूपतिर्भावी। तस्य श्रीशान्तकर्णिः, तस्यापि पूर्णोत्सङ्गः, तत्पुत्रश्च शातकर्णिः, तस्माच्च लम्बोदरः, तस्मात् दिवि-लकः, ततो मेघस्वातिः, ततः पटुमान्, ततश्च अरिष्टकर्म्मा, ततो हालः, हालात् पत्तलकः, ततः प्रविल्लसेनः, ततः सुन्दरः शातकर्णी, तस्मात् चकोरः शातकर्णी ॥ १२ ॥

ततः शिवस्वातिः, ततश्च गोमतीपुत्रः, तत्पुत्रः पुलि-मान्, तस्यापि शातकर्णी शिवश्रीः, ततः शिवस्कन्धः, तस्मात् यज्ञश्रीः, ततो विजयः, ततः चन्द्रश्रीः, तस्यापि पुलोमाविः, एवमेते त्रिंशत्, चत्वार्य्यब्दशतानि षट्पञ्चाश-

---

दश ॥ १० ॥ कण्वान् कण्वसंज्ञकान् भूर्यास्यति प्राप्स्यति। ततः कण्वानेषा भूर्यास्यति ॥ ११ ॥ कण्वान् कथं भूर्यास्यति? तत्राह, देवभूतिमिति। शातकर्णीपुत्रान् ॥ १२ ॥ इते [illegible]-

दधिकानि पृथिवीं भोक्ष्यन्ति अन्ध्रभृत्याः। सप्ताभीरा दश गर्द्दभिलाः भूभुजो भविष्यन्ति । १३ ॥

ततः षोडश शका भूभुजो भवितारः। ततश्चाष्टौ यवनाः, चतुर्दश तुखाराः, मुण्डाश्च त्रयोदश, एकादश मौनाः, एते पृथिवीं त्रयोदश वर्षशतानि नवनवत्यधिकानि भोक्ष्यन्ति ॥ १४ ॥

ततश्च पौरा एकादश भूपतयोऽष्टशतानि त्रीणि महीं भोक्ष्यन्ति । १५ ॥

तेषु च्छन्नेषु कैलकिला यवना भूपतयो भविष्यन्ति। मूर्द्धाभिषिक्तस्तेषां विन्ध्यशक्तिः । १६ ॥

ततः पुरञ्जयः, ततो रामचन्द्रः, तस्मात् धर्म्मः, धर्म्मात् वराङ्गः, कृतनन्दनः, सुधिनन्दिः, नन्दियशाः। शिशुकप्रवीरौ च, एते वर्षशतं षड्वर्षाणि भविष्यन्ति। ततः तत्पुत्राः त्रयोदशैव, वाह्लिकाश्च त्रयः, ततः पुष्पमित्रपटुमित्रपद्ममित्रास्त्रयो दश मेकलाश्च सप्तकोशलायान्तु नवैव भूप

तय ॥ १३ ॥ आभीराद्या मौनान्ता एकोनाशीतिराजाश्च एकोनचतुर्दशशतवर्षाणि पृथ्वीं भोक्ष्यन्ति ॥ १४ ॥ ततश्च पौराश्चाष्टशतानि भोक्ष्यन्ति। क्वचित् पौरा इत्यत्र पुनर्मौना इति पाठः। तदा आभीरादिवर्ज्जितानां मौनानां अन्तरेण पूर्व्वराज्यकालबहुत्वात्, इत्यन्तु मत पुनरेव मौनानां राज्यकालमत्र वक्तव्यमिति चेदम् ॥ १५ ॥

कैलकिला नगरी तत्र भवाः कैलकिलाः, तेषां मूर्द्धाभिषिक्तो मुख्यः। विन्ध्यशक्तिर्मूर्द्धाभिषिक्त इति पाठे वक्तिव्यस्य दर्शनं ॥ १६ ॥

तेषां विन्ध्यशक्त्यादीनां यथायथं त्रयोदश पुत्राः, वाह्लीकाश्च त्रयः, पुष्पमित्रादयश्चापरे त्रय मेकला मेकलदेशस्थाः, कोशलायां चैव

तयो भविष्यन्ति। नैषधास्तु तावन्त एव भूपतयो भविष्यन्ति ॥ १७ ॥

मागधायां विश्वस्फटिकसंज्ञोऽन्यान् वर्णान् करिष्यति। कैवर्त्तं वटु पुलिन्द ब्राह्मणान् राज्ये स्थापयिष्यत्युत्साद्याखिलक्षत्रजातिम्। नव नागाः पद्मावत्यां कान्तिपुर्य्यां, मथुरायामनुगङ्गाप्रयागं मागधा गुप्ताश्च भोक्ष्यन्ति। कोसलौड्र (पराड्रक) ताम्रलिप्तान् समुद्रतटपुरीञ्च देवरक्षितो रक्षिष्यति। कलिङ्गमाहिषिकमाहेन्द्रभौमा गुहां भोक्ष्यन्ति। नैषाद नैमिषिक कालतोयान् जनपदान् मणिधारवंशा भोक्ष्यन्ति। स्त्रीराज्य (त्रैराज) मूषिकजनपदान् कनकाह्वया भोक्ष्यन्ति। सौराष्ट्रावन्तिशूद्रानर्व्वुदमरुभूमिविषयांश्च व्रात्या द्विजाभीरशूद्राद्या भोक्ष्यन्ति। सिन्धुतटदार्व्वीकोर्व्वीचन्द्रभागाकाश्मीरविषयान् व्रात्या म्लेच्छादयः शूद्राः भोक्ष्यन्ति। एते च तुल्यकालाः सर्व्वे पृथिव्यां भूभृतो भविष्यन्ति। अल्पप्रसादाः बृहत्कोपाः सर्व्वकालमनृताधर्म्मरुचयः स्त्री बाल गो वधकर्त्तारः परस्वादान रुचयोऽल्पसाराः उदितास्तमितप्रायाः स्वल्पायुषो महेच्छा अल्पधर्म्माश्च भविष्यन्ति। १८ ॥

नैषधास्तावन्तः नवैव भूपतयो भविष्यन्ति। नैषधादिदेशानां मध्ये समविषया देशास्तत्तद्देशीया इत्यर्थः ॥ १७ ॥ उत्साद्याखिलं क्षत्रजातिं बहुर-जातिम् अपवृत्तादिरूपाम्। एते ततस्तत्पुत्रा इत्यारभ्य शूद्रा इत्यन्तास्तु-ल्यकालाः अल्पप्रसादादयोऽल्पधर्मान्ताद्विविधा भूभृतो भविष्यन्तीत्यन्वयः ॥ १८ ॥

तैश्च विमिश्रा जनपदास्तच्छीलवर्त्तिनो राजाश्रय-शुष्मिणो म्लेच्छाचाराश्च विपर्य्ययेण वर्त्तमानाः प्रजाः क्षपयिष्यन्ति ॥ १८ ॥

ततश्चानुदिनमल्पाल्पह्रासाद्व्यवच्छेदात् धर्मार्थयोर्जगतः संक्षयो भविष्यति ॥ २० ॥

ततश्चार्थ एवाभिजनहेतुर्बलमेवाशेषधर्महेतुरभिरुचिरेव दाम्पत्यसम्बन्धहेतुरनृतमेव व्यवहारजयहेतुः स्त्रीत्वमेवोप-भोगहेतुः उन्नताम्बुभागितैव पृथिवीहेतुर्ब्रह्मसूत्रमेव विप्रत्व-हेतुः लिङ्गधारणमेवाश्रमहेतुर्न्याय एव वृत्तिहेतुः ॥२१॥२२॥

दौर्बल्यमेवावृत्तिहेतुरभयगर्भोच्चारणमेव पाण्डित्य-हेतुः ॥ २३ ॥

दानमेव धर्महेतुः आढ्यतैव साधुत्वहेतुः ॥ २४ ॥

स्नानमेव प्रसाधनहेतुः स्वीकरणं विवाहहेतुः सद्वेष-धार्य्येव पात्रं दूरायतनोदकमेव तीर्थमित्येवमनेकदोषोत्तरे भूमण्डले सर्ववर्णेष्वेव यो यो बलवान् स भूपतिर्भविष्यति ।

राज्याश्रयेण शुष्मिणो बलिनः न तु धर्मेण, म्लेच्छाचाराश्च विपर्य्य-येण [illegible] रमेतत्पूर्वेण ॥ १८ ॥ अनयोः [illegible] दिनं [illegible] व्यवच्छेदात् [illegible] भविष्यति ॥ २० ॥ [illegible] पृथिवीहेतुः [illegible] ॥ २१ ॥ इति [illegible] ॥ २२ ॥ [illegible] ॥ २३ ॥ दानमेव धर्महेतुः, [illegible] ॥ आढ्यतैव साधुत्वहेतुः ॥ २४ ॥

एवं चातिलुब्धकराजासहाः शैलानामन्तरद्रोणीः प्रजाः संश्रयिष्यन्ति, मधुशाकमूलफलपत्रपुष्पाद्याहाराश्च भविष्यन्ति। तरुवल्कलचीरप्रावरणाश्चातिबहुप्रजाः शीतवातातपवर्षसहाश्च भविष्यन्ति। न च कश्चित् त्रयोविंशतिवर्षाणि जीविष्यति। अनवरतं चात्र कलियुगे क्षयमायात्यखिलमेवैष जनः क्षयमुपैष्यति ॥ २५ ॥

श्रौतस्मार्त्तधर्मे विप्लवमत्यन्तमुपगते क्षीणप्राये च कलावशेषजगत्स्रष्टुश्चराचरगुरोरादिमध्यान्तमयस्य सर्वमयस्य ब्रह्ममयस्यात्मस्वरूपिणो भगवतो वासुदेवस्यांशः शम्भलग्रामप्रधानब्राह्मणविष्णुयशसो गृहे अष्टगुणर्द्धिसमन्वितः कल्किरूपी, जगत्यत्रावतीर्य सकलम्लेच्छदस्युदुष्टाचरणचेतसामशेषाणामपरिच्छिन्नमाहात्म्यशक्तिः क्षयं करिष्यति । २६ ।

स्वधर्मेषु चाखिलं जगत् संस्थापयिष्यतीति। अनन्तर-

जीवरक्षैव विनाशहेतुत्वं न त्वन्याहाराद्य-विधिप्रकारः। सर्वे प्रचारी दारिद्र्यतः। कलियुगे क्षयमवेत्य याति यति जनः क्षयमुपैष्यतीत्यन्वयः॥२५॥ एवं कलेरन्ते धर्मप्रवर्त्तनाय धर्मयुगप्रवर्त्तनाय, श्रौतस्मार्त्तेत्यादिना। आदिमयस्य सर्वकारणरूपस्यात्ममयस्य निर्विकारविभुतस्य अत एव सर्वमयस्य निखिलसत्तासंगतस्य। ततो विभवादिमाहात्म्यात्, ब्रह्ममयस्य अष्ट-गुणर्द्धिसमन्वितः। "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। यत्र कामावसायित्वं वशित्वमिति गुणाष्टकम्" इति योगगुणगुणाः। अन्ये त्वन्यथा गुणाष्टकं वदन्ति। "अणिमा महिमा चैव लघिमा गरिमा तथा। ईशित्वञ्च वशित्वञ्च प्राकाम्यं कामवश्च चेति॥२६॥

मधुशाकादिभक्षणेन अवस्थाचोद्यो दर्शितः। तेन चापेन सुधा-

चाशेषकलेरवसाने प्रवृत्तानां तेषामेव जनपदानाममलस्फ-
टिकविशुद्धा मतयो भविष्यन्ति ॥ २७ ॥

तेषाञ्च बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्यति ॥ २८ ॥

तानि च तदपत्यानि कृतयुगधर्मानुसारीणि भविष्यन्तीति ॥ २९ ॥

अत्रोच्यते ।

यदा चन्द्रश्च सूर्य्यश्च तथा तिष्यबृहस्पती ।
एकराशौ समेष्यन्ति भविष्यति तदा कृतम् ॥ ३० ॥
अतीता वर्त्तमानाश्च तथैवानागताश्च ये ।
एते वंशेषु भूपालाः कथिता मुनिसत्तम ॥ ३१ ॥
यावत् परीक्षितो जन्म यावन्नन्दाभिषेचनम् ।
एतद् वर्षसहस्रन्तु ज्ञेयं पञ्चदशोत्तरम् ॥ ३२ ॥
सप्तर्षीणाञ्च यौ पूर्वौ दृश्येते उदितौ दिवि ।

नामार्द्धकृतयज्ञोपवीतानामित्यर्थः ॥ २७ ॥ तत्कालकृतेति पाठे प्रकृतेर्विशेषणम् ॥ २८ ॥ कालस्वभावादेव कृतयुगधर्मानुसारीणि ॥ २९ ॥ एतत् सर्वं कस्मिन् योगे भविष्यतीत्यपेक्षायामाह, अत्रोच्यत इति । तिष्यः पुष्यः, चन्द्रार्कबृहस्पतीनां तिष्ययोगे कृतं सत्ययुगं भविष्यति । यद्यपि प्रतिद्वादशाब्दं कर्कटस्थे बृहस्पतौ अमावास्यायां [illegible] पुष्ययोगः स्यात् तथाप्येकराशौ समेष्यन्तीति विशेषणेनोक्त [illegible] इति द्रष्टव्यः ॥ ३० ॥

एवं राजवंशं निगमयति, अतीता इति । अनागता भूपालाश्च उक्ता ॥ ३१ ॥ अनागतः कश्चिद्वंशः स्थितश्चेत् स कियन्तं कालमित्यपेक्षायामाह, यावदिति । पञ्चदशोत्तरसहस्रवर्षपर्य्यन्तं पुनः कश्चिद्वंशः स्यादिति, अनन्तरं नन्देन सर्वक्षत्रवंशनाशादित्यर्थः ॥ ३२ ॥

तयोस्तु मध्यनक्षत्रं दृश्यते यत् समं निशि।
तेन सप्तर्षयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ॥ २३ ॥
ते तु पारिक्षिते काले मघास्वासन् द्विजोत्तम!।
तदा प्रवृत्तश्च कलिर्द्वादशाब्दशतात्मकः ॥ २४ ॥
यदैव भगवद्विष्णोरंशो यातो दिवं द्विज!।
वसुदेवकुलोद्भूतस्तदैव कलिरागतः ॥ २५ ॥
यावत् स पादपद्माभ्यां पस्पर्शेमां वसुन्धराम्।
तावत् पृथ्वीपरिष्वङ्गे समर्थो नाभवत् कलिः ॥ २६ ॥
गते सनातनस्यांशे विष्णोस्तत्र भुवो दिवम्।
तत्याज सानुजो राज्यं धर्मपुत्रो युधिष्ठिरः ॥ २७ ॥

कथं प्रवर्त्तते इत्यपेक्ष्य वक्तुं तत्कालावलक्षणमाह, सप्तर्षीणामिति। प्राग्भागे शकटाकारं तारासप्तकं सप्तर्षिमण्डलम्, तत्र पूर्वेण ईषाकारेऽग्रभागमध्यमूलेषु मरीचि-वसिष्ठाङ्गिरसः, ततः पश्चिमे खटाकारे तारा-चतुष्के ऐषामाग्नेय-नैर्ऋत-वायव्य-कौवेरेष्वत्रि पुलस्त्य पुलह-क्रतवो यथाक्रमं तत्र यौ पूर्वौ प्रथमोदितौ पुलह-क्रतुसंज्ञौ दृश्येते, तयोस्तत्पूर्वयोश्च मध्ये समं दक्षिणोत्तररेखाया समदेशावस्थितं यदश्विन्यादिनक्षत्रेष्वन्यतमनक्षत्रं दृश्यते, तेन तथैव युक्ता शतमब्दशतं तिष्ठन्ति ॥ २३ ॥

कालवशप्रवृत्तिं कलिप्रवृत्तिमाह, त इति। तदा सन्ध्यासन्ध्यांशाभ्यां सह द्वादशाब्दशतात्मकः कालः पूर्वसन्ध्या पूर्वं सन्ध्यारूपेण प्रवृत्तोऽपि सन्ध्यारूपमतिक्रम्य स्वेन रूपेण प्रवृत्तः प्रकर्षेण इत्यर्थः ॥ २४ ॥ एतदेव स्पष्टयति, यदैवेति द्वाभ्याम् ॥ २५ ॥ पृथ्वीपरिष्वङ्गे भूमेः पादभवे समर्थ इत्युक्तेः पूर्वमपि कलिः प्रविष्ट इति मन्यते ॥ २६ ॥ यावात् कलिप्रवेशे च युधिष्ठिरादिभिः स्वराज्यं परित्यक्तमित्याह, गत इति द्वाभ्याम् ॥ २७ ॥ कलेः प्रवृत्तिमुक्त्वा

विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः ।
याते कृष्णे चकाराथ सोऽभिषेकं परिक्षिति ॥ ३८ ॥
प्रयास्यन्ति यदा चैते पूर्वाषाढां महर्षयः ।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ ३९ ॥
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे ॥ ४० ॥
त्रीणि लक्षाणि वर्षाणां द्विज मानुषसंख्यया ।
षष्टिश्चैव सहस्राणि भविष्यत्येष वै कलिः ॥ ४१ ॥
शतानि तानि दिव्यानि सप्त पञ्च च संख्यया ।
निःशेषेण ततस्तस्मिन् भविष्यति पुनः कृतम् ॥ ४२ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ।
युगे युगे महात्मानः समतीताः सहस्रशः ॥ ४३ ॥
बहुत्वान्नामधेयानां परिसंख्या कुले कुले ।
पुनरुक्तबहुत्वात् तु न मया परिकीर्तिता ॥ ४४ ॥
देवापिः पौरवो राजा मरुश्चेक्ष्वाकुवंशजः ।

[illegible] ॥ ३८ ॥ [illegible] ॥ ३९ ॥ [illegible] ॥ ४१ ॥

[illegible] ॥ ४२ ॥ [illegible] ॥ ४३ ॥ [illegible] ॥ ४४ ॥ [illegible]

महायोगबलोपेतौ कलापग्रामसंश्रयौ ॥ ४५ ॥
कृते युग इहागम्य क्षत्रप्रावर्त्तकौ हि तौ ।
भविष्यतो मनोर्वंशे बीजभूतौ व्यवस्थितौ ॥ ४६ ॥
एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा ।
कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते ॥ ४७ ॥
कलौ तु बीजभूतास्ते केचित् तिष्ठन्ति भूतले ।
यथैव देवापिमरू साम्प्रतं समवस्थितौ ॥ ४८ ॥
एष तूद्देशतो वंशस्तवोक्तो भूभुजां मया ।
निखिलो गदितुं शक्यो नैव जन्मशतैरपि ॥ ४९ ॥
एते चान्ये च भूपाला यैरत्र क्षितिमण्डले ।
कृतं ममत्वं मोहान्धैर्नित्येऽनित्यकलेवरैः ॥ ५० ॥
कथं ममेयमचला मत्पुत्रस्य कथं मही ।
मद्वंशस्येति चिन्तार्त्ता जग्मुरन्तमिमे नृपाः ॥ ५१ ॥
तेभ्यः पूर्वतराश्चान्ये तेभ्यस्तेभ्यस्तथापरे ।
भविष्याश्चैव यास्यन्ति तेषामन्ये च येऽप्यनु ॥ ५२ ॥

कस्मात् क्षत्रियाभावे ऽपि पुनः प्रवर्त्तनाच्च, देवापिरिति द्वाभ्याम् ॥ ४५ ॥ क्षत्रस्य प्रवर्त्तकौ भविष्यतः, यतो मनोर्वंशे बीजभूतं प्रवृत्तं बीजभूतौ व्यवस्थितौ ॥ ४६ ॥ मनोः पुत्राणामेव क्षत्रियत्वात् त्रीणि च युगानि भुज्यन्ते इत्युक्तम् ॥ ४७ ॥ देवापि-मरुवदन्येऽपि कलौ सूर्यवंशादीनां बीजभूताः तिष्ठन्तीत्याह, कलाविति ॥ ४८ ॥ वंश-कथनस्य वैराग्ये तात्पर्यमाह, एते चेति । भूमण्डले नित्ये कल्पान्त-स्थायिनि तदपेक्षया अनित्यानि अस्थिराणि कलेवराणि येषां तथाभूतैरपि ममत्वं कृतम् ॥ ५० ॥ मोहान्धत्वमेवाह, कथं ममेयमिति द्वाभ्याम् ॥ ५१ ॥

विलोक्यात्मजयोद्योग-यात्राव्यग्रान् नराधिपान् ।
पुष्पप्रहासैः शरदि हसतीव वसुन्धरा ॥ ५३ ॥
मैत्रेय ! पृथिवी गीताञ्छ्लोकांश्चात्र निबोध तान् ।
यानाह धर्मध्वजिने जनकायासितो मुनिः ॥ ५४ ॥

पृथिव्युवाच ।

कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन फेनसधर्माणोऽप्यतिविश्वस्तचेतसः ॥ ५५ ॥
पूर्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ।
ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून् ॥ ५६ ॥
क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् ॥ ५७ ॥
समुद्रावरणं याति [illegible]मथो वशम् ।
कियदात्मजयादेतन्मुक्तिरात्मजये फलम् ॥ ५८ ॥
उत्सृज्य पूर्वजा याता यां नादाय गतः पिता ।
तां ममेति विमूढत्वाज्जेतुमिच्छन्ति पार्थिवाः ॥ ५९ ॥
मत्कृते पितृपुत्राणां भ्रातॄणाञ्चापि विग्रहाः ।

फेनधर्माणः पूर्वं सन्तो [illegible] नाशावस्था दृश्यन्ते, एवं अविश्वस्ता [illegible] नाशावस्था ॥५५॥ [illegible] पृथिवीगीतैः [illegible] इति भावः । [illegible] ॥५६॥ पूर्वं [illegible] ॥५७॥ [illegible] ॥५८॥ [illegible]

आत्मन्यस्त्वमलमोहेन ममताधृतचेतसाम् ॥ १० ॥

पृथ्वी ममेयं सकला ममैषा
मदन्वयस्यापि च शाश्वतेयम् ।
यो यो मृतो ह्यत्र बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य ॥ ११ ॥

दृष्ट्वा ममत्वादृतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्यान्वयस्थस्य कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति ॥ १२ ॥

पृथ्वी ममैषाशु परित्यजैनां
वदन्ति ये दूतमुखैः स्वशत्रुम् ।
नराधिपास्तेषु ममातिहासः
पुनश्च मूढेषु दयाभ्युपैति ॥ १३ ॥

[illegible] पूर्वत्राः [illegible] वा पाठः ॥ ९ ॥ [illegible] ॥ १० ॥

किञ्च मयि राज्ञां ममत्वं दृष्ट्वैव हास्यं च, पृथ्वी ममेति । अत्र मयि यो यो राजा मृतो बभूव, तस्य तस्यैव कुबुद्धिरासीत् [illegible] पारमार्थिकफलाभावात् । ह्यत्रेति पाठे अत्र [illegible] राजा बभूव, तस्यापि [illegible] कुबुद्धिः संसारपदाभोक्तृत्वः ॥ ११ ॥ किञ्च [illegible] दृष्ट्वेति । मयि ममत्वं [illegible] चित्तं [illegible] तदन्वयस्थस्य हृदि [illegible] मद्विषयं ममत्वं [illegible] करोतीति ॥ १२ ॥

अपि च एतेऽतियोग्या हास्याः, पृथ्वीति । तेषु मम हासो भवति, मूढत्वात् दयाभ्युपैति [illegible] ॥ १३ ॥ [illegible]

पराशर उवाच ।

इत्येते धरणीगीताः श्लोका मैत्रेय यैः श्रुताः ।
ममत्वं विलयं याति तापन्यस्तं यथा हिमम् ॥ ६४ ॥
इत्येष कथितः सम्यङ् मनोर्वंशो मया तव ।
यत्र स्थितिप्रवृत्तस्य विष्णोरंशांशका नृपाः ॥ ६५ ॥
शृणोति य इमं भक्त्या मनोर्वंशमनुक्रमात् ।
तस्य पापमशेषं वै प्रणश्यत्यमलात्मनः ॥ ६६ ॥
धनधान्यर्द्धिमतुलां प्राप्नोत्यव्याहतेन्द्रियः ।
श्रुत्वैवमखिलं वंशं प्रशस्तं शशिसूर्ययोः ॥ ६७ ॥
इक्ष्वाकुजह्नुमान्धातृसगराविक्षितान् रघून् ।
ययातिनहुषाद्यांश्च ज्ञात्वा निष्ठामुपागतान् ।
महाबलान् महावीर्याननन्तधनसञ्चयान् ॥ ६८ ॥
कृतान् कालेन बलिना कथाशेषान् नराधिपान्
श्रुत्वा न पुत्रदारादौ गृहक्षेत्रादिके तथा ।
द्रव्यादौ च कृतप्रज्ञो ममत्वं कुरुते नरः ॥ ६९ ॥

तप्तं तपो यैः पुरुषप्रवीरै-
रुद्बाहुभिर्वर्षगणाननेकान् ।
इष्ट्वा च यज्ञैर्बलिनोऽतिवीर्याः
कृतास्तु कालेन कथावशेषाः ॥ ७० ॥

धनधान्येति । [illegible] ॥ ६६ ॥ [illegible] ॥ ६८ ॥ [illegible]

पृथुः समस्तान् प्रचचार लोकान्
अव्याहतो योऽरिविदारिचक्रः ।
स कालवाताभिहतो विनष्टः
छिन्नं यथा शाल्मलितूलमग्नौ ॥ ७१ ॥
यः कार्त्तवीर्यो बुभुजे समस्तान्
द्वीपान् समाक्रम्य हतारिचक्रः ।
कथाप्रसङ्गेष्वभिधीयमानः
स एव सङ्कल्पविकल्पहेतुः ॥ ७२ ॥
दशाननाविक्षितराघवाणा-
मैश्वर्यमुद्भासितदिङ्मुखानाम् ।
भस्मापि जातं न कथं क्षणेन
भ्रूभङ्गपातेन धिगन्तकस्य ॥ ७३ ॥
कथाशरीरत्वमवाप यद्वै
मान्धातृनामा भुवि चक्रवर्ती ।

कथावशेषत्वमित्याह, तत्प्रभृति ॥ ७० ॥ तानेवाह पृथुरिति द्वाभ्याम् ॥ ७१ ॥

सङ्कल्पविकल्पयोः केवलमिह सङ्कल्पस्य तदेति प्रत्ययस्य हेतुः विकल्पस्य किमासीदिति संशयस्य हेतुर्नित्यं सङ्कल्पस्य मनसा विकल्पस्य हेतुः ॥ ७२ ॥ उद्भासितानि दिङ्मुखानि यैः । उद्भासित-दिङ्मुखानामिति पाठे ऐश्वर्यविशेषणम् । तेषां रावणादीनामैश्वर्यम् अन्तकस्य भ्रूभङ्गपातेन क्षणं भस्म न जातं ? किन्तु जातमेव, तस्मात् ऐश्वर्यं धिक् । यद्वा काष्ठं दग्धमपि भस्म भवति । ऐश्वर्यं तु भस्मापि न जातं किञ्चिदवशिष्टमपि क्षणं न जातं, तस्मात् धिक् ॥ ७३ ॥

श्रुत्वापि तं कोऽपि करोति साधु
ममत्वमात्मन्यपि मन्दचेताः ॥ ७४ ॥
भगीरथाद्याः सगरः ककुत्स्थो
दशाननो राघवलक्ष्मणौ च ।
युधिष्ठिराद्याश्च बभूवुरेते
सत्यं न मिथ्या क्व नु ते न विद्मः ॥ ७५ ॥
ये साम्प्रतं ये च नृपा भविष्याः
प्रोक्ता मया विप्रवरोग्रवीर्य्याः ।
ये ते तथान्ये च तथाभिधेयाः
सर्वे भविष्यन्ति यथैव पूर्वे ॥ ७६ ॥
एतद् विदित्वा न नरेण कार्य्यं
ममत्वमात्मन्यपि पण्डितेन ।
तिष्ठन्तु तावत् तनयात्मजाद्याः
क्षेत्रादयो ये तु शरीरतोऽन्ये ॥ ७७ ॥

[illegible] ॥ ७४ ॥ भगी-
रथाद्याः [illegible] आसन् सत्यं क्व नु ते इति न विद्मः कालेन [illegible]
[illegible] ॥ ७५ ॥
[illegible] ॥ ७६ ॥
[illegible]
[illegible] ॥ ७७ ॥

पञ्चमोंऽशः।

प्रथमोऽध्यायः।

नृपाणां कथितः सर्व्वो भवता वंशविस्तरः।
वंशानुचरितञ्चैव यथावदनुवर्णितम् ॥ १ ॥
अंशावतारो ब्रह्मर्षे ! योऽयं यदुकुलोद्भवः।
विष्णोस्तं विस्तरेणाहं श्रोतुमिच्छाम्यशेषतः ॥ २ ॥
चकार यानि कर्म्माणि भगवान् पुरुषोत्तमः।
अंशांशेनावतीर्य्योर्व्व्यां तत्र तानि मुने ! वद ॥ ३ ॥

पराशर उवाच।

मैत्रेय ! श्रूयतामेतद् यत् पृष्टोऽहमिदं त्वया।
विष्णोरंशांशसम्भूतिचरितं जगतो हितम् ॥ ४ ॥

अथातः पञ्चमांशे श्रीकृष्णलीलामृतोदयः। विष्णुनाथयतीन्द्राय यथामति वितन्यते ॥ तत्रानुवादपूर्व्वं श्रीकृष्णावतारप्रकारं तच्चरितानि च पृच्छति नृपाणामिति त्रिभिः ॥ १ ॥ विष्णोरंशावतारः परब्रह्मण एव परिच्छिन्नमहाकारेणावतारः। विस्तरेणेति। यदर्थं यदा च येन च प्रकारेणांशावतार इत्याद्यविशेषतः श्रोतुमिच्छामि ॥ २ ॥ तच्चरितञ्च विस्तरेण वदेत्याह चकारेति। परब्रह्मणोऽंश इवांशः श्रीरामावतारो तस्यांश इवांशो महाकारस्तेनावतीर्य्य तत्र यानि चकार तानि वदेत्यन्वयः

देवकस्य सुतां पूर्वं वसुदेवो महामुने ।
उपयेमे महाभागां देवकीं देवतोपमाम् ॥ ५ ॥
कंससयोर्वररथं चोदयामास सारथिः ।
वसुदेवस्य देवक्याः संयोगे भोजवर्धनः ॥ ६ ॥
अथान्तरिक्षे वागुच्चैः कंसमाभाष्य सादरम् ।
मेघगम्भीरनिर्घोषं समाभाष्येदमब्रवीत् ॥ ७ ॥
यामेतां वहसे मूढ सह भर्त्रा रथे स्थिताम् ।
अस्यास्तेऽष्टमो गर्भः प्राणानपहरिष्यति ॥ ८ ॥

पराशर उवाच ।

इत्याकर्ण्य समादाय खड्गं कंसो महाबलः ।
देवकीं हन्तुमारब्धो वसुदेवोऽब्रवीदिदम् ॥ ९ ॥
न हन्तव्या महाभाग देवकी भवतानघ ।
समर्पयिष्ये सकलान् गर्भानस्योदरोद्भवान् ॥ १० ॥

पराशर उवाच ।

तथेत्याह च तं कंसो वसुदेवं द्विजोत्तम ।
न घातयामास च तां देवकीं सत्यगौरवात् ॥ ११ ॥

॥ ४ ॥ [illegible] ॥ ५ ॥ [illegible] ॥ ६ ॥ [illegible] ॥ ७ ॥ ८ ॥ [illegible] ॥ ९ ॥ [illegible]

एतस्मिन्नेव काले तु भूमिभारावपीडिता ।
जगाम धरणी मेरौ समाजे त्रिदिवौकसाम् ॥ १२ ॥
सब्रह्मकान् सुरान् सर्वान् प्रणिपत्याथ मेदिनी ।
कथयामास तत् सर्वं खेदात् करुणभाषिणी ॥ १३ ॥
अग्निः सुवर्णस्य गुरुर्गवां सूर्यः परो गुरुः ।
ममाप्यखिललोकानां गुरुर्नारायणो गुरुः ॥ १४ ॥
प्रजापतिपतिर्ब्रह्मा पूर्वेषामपि पूर्वजः ।
कलाकाष्ठानिमेषात्मा कालश्चाव्यक्तमूर्त्तिमान् ॥ १५ ॥
तदंशभूतः सर्वेषां समूहो वः सुरोत्तमाः ।

क्तेति वा । अत्र सन्धिरार्षः । यद्वा अनुक्तेपत इति प्राप्नोतेति हि कोपे रूपं तया वर्णितात्मना क्वापि यथेच्छं विचेरतुः ॥ १०॥११॥
तत्कालावधयात् कंसे देवकीपुत्रनिधनोद्यमा स्थिते सति भारावपीडित-धरण्या प्रार्थितैर्देवैः प्रस्तुत प्रसादितो हरिः । तत्र तदाऽऽदिपर्वम-वततारेति वक्तुमाह, एतस्मिन्नेवेत्यादिना यावदध्यायसमाप्ति । धरणी गोरूपेण जगामेति शेषं, गोभूत्वाश्रुमुखीति पुराणोक्तेः ॥ १२ ॥
तत् सर्वं देवकभारपीडादि ॥ १३ ॥

अग्न्यादिदृष्टान्तैरनन्तः । अग्निः सुवर्णस्य गुरुर्जनकः । अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गाव इति श्रुतेः । यतो यथाग्निः सुवर्णस्य मलं दहन् सुवर्णं रक्षति, यथा च गवां सूर्यः परो गुरुः तत्कालः पर्जन्यरूपेण तृणानि पायो रश्मयो वा वत्सत्वात् यथा विवर्धयति तथा ममापि नारायणो गुरुः कर्मोऽभ्युप-स्थितवतोभावात् गुरुः । अतः स एव मम भारहर्त्ता पालकश्च । तथापि ब्रह्मादिपर्यन्ता भवन्तोऽप्यन्यनाम्ना तदंशभूतास्तस्मात् यथा नारायणस्य ममापि तद्वत् इति ॥ १४ ॥ यावच्च तदंशभूतः तच्छक्तित्वात् ॥ १५ ॥

आदित्या मरुतः साध्या रुद्रा वस्वश्विवह्नयः ॥ १६ ॥
पितरो ये च लोकानां स्रष्टारोऽत्रिपुरोगमाः ।
एतत् तस्याप्रमेयस्य रूपं विष्णोर्महात्मनः ॥ १७ ॥
यक्षराक्षसदैतेयाः पिशाचोरगदानवाः ।
गन्धर्वाप्सरसश्चैव रूपं विष्णोर्महात्मनः ॥ १८ ॥
ग्रहर्क्षतारकाचित्रगगनाग्निजलानिलाः ।
अहञ्च विषयाश्चैतत् सर्वं विष्णुमयं जगत् ॥ १९ ॥
तथाप्यनेकरूपस्य तस्य रूपाण्यहर्निशम् ।
बाध्यबाधकतां यान्ति कल्लोला इव सागरे ॥ २० ॥
ततः साम्प्रतमिमे दैत्याः कालनेमिपुरोगमाः ।
मर्त्यलोकं समाक्रम्य बाधन्तेऽहर्निशं प्रजाः ॥ २१ ॥
कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना ।
उग्रसेनसुतः कंसः सम्भूतः स महासुरः ॥ २२ ॥
अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा ।
सुन्दोऽसुरस्तथात्युग्रो बाणश्चापि बलेः सुतः ॥ २३ ॥

[illegible] यो [illegible] । विश्वरूपत्वात् तस्य । एतदेव प्रपञ्चयन्नाह आदित्या इत्यादि [illegible] । [illegible] अश्विनौ च [illegible] ॥ १६ ॥ [illegible] विश्वरूपस्य [illegible] ॥१७॥१८॥ [illegible] प्रतीयते । [illegible] ॥ १९ ॥

[illegible] ॥२०॥ [illegible] ॥२१॥ [illegible]

तथान्ये च महावीर्या नृपाणां भवनेषु ये ।
समुत्पन्ना दुरात्मानस्तान् न संख्यातुमुत्सहे ॥ २४ ॥
अक्षौहिण्योऽत्र बहुला दिव्यमूर्त्तिभृतां सुराः ।
महाबलानां दृप्तानां दैत्येन्द्राणां ममोपरि ॥ २५ ॥
तद्भूरिभारपीडार्त्ता न शक्नोम्यमरेश्वराः ।
बिभर्त्तुमात्मानमहमिति विज्ञापयामि वः ॥ २६ ॥
क्रियतां तन्महाभागा मम भारावतारणम् ।
यथा रसातलं नाहं गच्छेयमतिविह्वला ॥ २७ ॥

पराशर उवाच ।

इत्याकर्ण्य धरावाक्यमशेषैस्त्रिदशैस्ततः ।
भुवो भारावतारार्थं ब्रह्मा प्राह प्रचोदितः ॥ २८ ॥

ब्रह्मोवाच ।

यथाह वसुधा सर्वं सत्यमेतद् दिवौकसः ।
अहं भवो भवन्तश्च सर्वं नारायणात्मकम् ॥ २९ ॥
विभूतयस्तु यास्तस्य तासामेव परस्परम् ।
आधिक्यन्यूनता बाध्यबाधकत्वेन वर्त्तते ॥ ३० ॥
तदागच्छत गच्छामः क्षीराब्धेस्तटमुत्तरम् ।
तत्राराध्य हरिं तस्मै सर्वं विज्ञापयाम वै ॥ ३१ ॥

पञ्चविंशतिवाक्यं यतात्मनो च यति: । एवं यतश्चक्रमस्तु ।रिच तथा मम । धराणामपि पद्मावत् यमानि कोटिश्चैव चतुर्दशपद्मानि तथा[illegible] यमानि च । इत्येतान्यक्षौहिणीत्याहुर्बुधा इति ॥ २५ ॥ २६ ॥ २७ ॥ अशेषैस्त्रिदशैः धराया वाक्यमाकर्ण्य तरवैः प्रचोदितो ब्रह्मा प्राह ॥२८॥२९॥ [illegible] बाधकत्वेन न्यूनता च बाध्यत्वेन वर्त्तते इत्यर्थः ॥ ३० ॥

एवमेव जगत्स्रष्टा स सर्वात्मा जगन्मयः ।
स्वल्पांशेनावतीर्योर्व्यां धर्मस्य कुरुते स्थितिम् ॥ १२ ॥

पराशर उवाच ।

इत्युक्त्वा प्रययौ विप्र ! सह देवैः पितामहः ।
समाहितमतिश्चैवं तुष्टाव गरुड़ध्वजम् ॥ १३ ॥

ब्रह्मोवाच ।

द्वे विद्ये त्वमनाम्नाय ! परा चैवापरा तथा ।
ते एव भवतो रूपे मूर्तामूर्त्तात्मके प्रभो ! ॥ १४ ॥
द्वे ब्रह्मणी त्वणीयोऽतिस्थूलात्मन् ! सर्व ! सर्ववित् ।
शब्दब्रह्म परञ्चैव ब्रह्म ब्रह्ममयस्य यत् ॥ १५ ॥
ऋग्वेदस्त्वं यजुर्वेदः सामवेदस्तथार्थवं च ।
शिक्षा कल्पो निरुक्तञ्च छन्दो ज्योतिषमेव च ॥ १६ ॥
इतिहासपुराणे च तथा व्याकरणं प्रभुः ।
मीमांसा न्यायकं तस्य धर्मशास्त्राण्यधोक्षज ! ॥ १७ ॥

॥ ११ ॥ १२ ॥ १३ ॥ द्वे अनाम्नाय ! आम्नायैर्वेदैरविषयीभूत ! [illegible] विद्ये वेदरूपे, परा चैवापरा चेति श्रुतिप्रोक्ते परापरब्रह्मविषये द्वे विद्ये । ते एव [illegible] भवतः रूपे मूर्तामूर्तात्मके [illegible] ॥ १४ ॥

[illegible] द्वे ब्रह्मणी विदि । ते ब्रह्मणी भवतो रूपे [illegible] । [illegible] सर्व [illegible] ! [illegible] ! [illegible] ब्रह्म [illegible] [illegible] ॥ १५ ॥ १६ ॥ १७ ॥ [illegible]

आत्माज्ञदेहगुणवद्विचाराचारि सन्ततः।
तदच्युताधिपते! आत्मज्ञानात्मस्वरूपवत्॥ ३८॥
त्वमव्ययमनिर्देश्यमचिन्त्यनामवर्जितम्।
अपाणिपादरूपञ्च शुद्धं नित्यं परात्परम्॥ ३९॥

शृणोष्यकर्णः परिपश्यसि त्वम्
अचक्षुरेको बहुरूपरूपः।
अपादहस्तो जवनो ग्रहीता
त्वं वेत्सि सर्वं न च सर्ववेद्यः॥ ४०॥

तत्त्वमप्यन्यमेवेत्याह आत्मेति। आत्माज्ञानप्रज्ञाभ्यां जीवपरमात्मानौ देहगतेन च ... गुणत्रयेण तत् कारणमथम्। एतेषां विचारमाचरतीति तथा। एवञ्च विचारे क्रियमाणे यदात्मस्वरूपं त्वं वेदस्यम्, आत्मस्वरूपस्य संदर्शनं तद्ब्रह्मरूपमनुभवतः सविशेषम् सर्वेषु तत्त्वाभिमानेऽपि निरवयवमात्मत्वम् भवति। भो आद्यपते! ब्रह्मादिपते! यतः ... दादिष्वपि ... प्रत्यक्षं ... ज्ञानेन पाञ्चभौतिकादावपि तत्र तदात्मापि देहसम्बन्धरूपत्वेन इति व्याख्येयम्॥ ३८॥ सम्प्रज्ञातरूपतामाह त्वमिति। अव्ययं चक्षुरादेरगोचरः। अनिर्देश्यं वाचामगोचरः। अचिन्त्यं मनसोऽप्यगोचरः। अचिन्त्यत्वात् तदनामवर्जितम्। पाणिपादवर्जितस्वरूपं नित्यञ्च परात्परमत्परम्। नामरूपादिसम्बन्धादिदृश्यवाङ्मनसागोचर-विषयत्वं यद् ब्रह्म विद्वांसोऽनवद्यमपि त्वमेवेत्यन्वयः॥ ३९॥

देवरूपतामाह। शृणोषीति इत्यादि। बहूनि रूपाणि रूपं यस्य सः। अपादोऽपि जवनो वेगवान्। अहस्तोऽपि ग्रहीता। श्रुतिश्च "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्" इति॥ ४०॥ देवत्वेन च ब्रह्मरूपं प्रत्यक्षवद्दर्शितात्मेत्यः

अणोरणीयांसमसत्स्वरूपं
त्वां पश्यतोऽज्ञाननिवृत्तिरग्र्या ।
धीरस्य धीरस्य बिभर्त्ति नान्य-
द्वरेण्यरूपात् परतः परात्मन् ॥ ४१ ॥
त्वं विश्वनाभिर्भुवनस्य गोप्ता
सर्वाणि भूतानि तवान्तराणि ।
यद् भूतभव्यं तदणोरणीयः
पुमांस्त्वमेकः प्रकृतेः परस्तात् ॥ ४२ ॥
एकश्चतुर्धा भगवान् हुताशो
वर्चोविभूतिं जगतो ददासि ।
त्वं विश्वतश्चक्षुरनन्तमूर्ते
त्रेधा पदं त्वं निदधे विधातः ॥ ४३ ॥

[illegible] । [illegible] अणोः अणीयांसं निरुपाधि- [illegible] । [illegible] धीरस्येति [illegible] । [illegible] ॥ ४१ ॥ [illegible] ॥ ४२ ॥

[illegible]

यथाग्निरेको बहुधा समिध्यते
विकारभेदैरविकाररूपः।
तथा भवान् सर्वगतैकरूपो
रूपाण्यशेषाण्यनुपुष्यतीश ! ॥ ४४ ॥
एकस्त्वमग्र्यं परमं पदं यत्
पश्यन्ति त्वां सूरयो ज्ञानदृश्यम्।
त्वत्तो नान्यत् किञ्चिदस्ति त्वयीह
यद्वा भूतं यच्च भाव्यं परात्मन् ! ॥ ४५ ॥
व्यक्ताव्यक्तस्वरूपस्त्वं समष्टिव्यष्टिरूपवान्।
सर्वज्ञः सर्वदृक् सर्वशक्तिज्ञानबलर्द्धिमान् ॥ ४६ ॥
अन्यूनश्चाप्यवृद्धिश्च स्वाधीनो नादिमान् वशी।
क्लमतन्द्राभयक्रोधकामादिभिरसंयुतः ॥ ४७ ॥
निरवद्यः परः प्रीतः निरनिष्टोऽक्षरक्रमः।

सोऽस्माकं भोपासनयैव हन्तीव चतुर्थी। यद्वा ऐक्यत्मना जठरवाग्निः वैश्वानरो वाङ्मात्मकेनेवं चतुर्थी। यद्वा वैश्वानरनिमित्तजनौरजठराग्निना चतुर्थी, वर्णात्मकः विभूतिं सम्यग् ददाति अथ पदं भूर्भुवः स्वर्लोकेषु स्थितिमभावतारं वषिद्र्वे निरूपितवान्। अथवा विश्वरूपः सोऽयं विश्वरूप इति श्रुतेः ॥ ४२ ॥ अनन्तमूर्ते इति यदुक्तं तदुपपादयति। यथाग्निरिति त्रिभिः। अनुपुष्यति वर्धयति ॥ ४४ ॥ ४५ ॥ व्यक्तं महदादि, अव्यक्तं प्रधानं तत्स्वरूपस्त्वम्। तत समष्टिर्विराड्रूपः, व्यष्टिरादित्यप्रवर्त्तकेश्वरो भूतमात्रः तद्रूपवान्। सर्वज्ञः सामान्येन सर्वविदित्येवमतः ॥ ४६ ॥ तदेवं सर्वकार्यरूपत्वेऽपि कार्यधर्मराहित्यं षड्विकारादिरहितत्वं चाह, अन्यून इति त्रिभिः। वशी नियन्ता। क्लमः श्रमः, तन्द्रा आलस्यम् ॥ ४७ ॥

सर्वेश्वर ! पराधार ! धाम्नां धामात्मकोऽव्ययः ॥ ४८ ॥

सकलावरणातीत ! निरालम्बन ! भावन ! ।

महाविभूतिसंस्थान ! नमस्ते पुरुषोत्तम ! ॥ ४९ ॥

नाकारणात् कारणाद्वा कारणाकारणान्न च ।

शरीरग्रहणं वापि धर्मत्राणाय ते परम् ॥ ५० ॥

पराशर उवाच ।

इत्येवं संस्तुतिं श्रुत्वा मनसा भगवानजः ।

ब्रह्माणमाह प्रीतात्मा विश्वरूपधरो हरिः ॥ ५१ ॥

श्रीभगवानुवाच ।

भो भो ब्रह्मन् ! त्वया मत्तः सह देवैर्यदिष्यते ।

निरवद्य निर्दोषः, निरञ्जन इति संस्कृतपाठः । [illegible]
[illegible] । पराधार ब्रह्मादीनामाधार । धाम्नां तेजसां सूर्यादीनां
धामात्मकः प्रकाशरूपः ॥ ४८ ॥ सकलावरणातीत ! [illegible]
[illegible] । अतो निरालम्बन [illegible]
[illegible] । महाविभूतिर्विश्वरूपत्वं [illegible] संस्थानं [illegible]
तत्र सम्बुद्धिः ॥४९॥ ननु कुतो मम शरीरग्रहणमित्याशङ्क्याह
[illegible] कारणात् [illegible]
[illegible] कारणात् [illegible] कारणं कर्म, [illegible]
कारणाकारणम् [illegible]
[illegible] धर्मत्राणायैव । [illegible]
[illegible] । [illegible]
[illegible] । [illegible] कारणाकारण-
[illegible] । ते शरीरग्रहणं न भवति [illegible]
धर्मत्राणाय [illegible] । [illegible]
[illegible] ॥ ५० ॥ ५१ ॥

तदुच्यतामशेषं वः सिद्धमेवावधार्य्यताम् ॥ ५२ ॥

पराशर उवाच।

ततो ब्रह्मा हरेर्दिव्यं विश्वरूपमवेक्ष्य तत्।
तुष्टाव भूयो देवेषु साध्वसावनतात्मसु ॥ ५३ ॥

ब्रह्मोवाच।

नमो नमस्तेऽस्तु सहस्रमूर्त्ते!
सहस्रबाहो! बहुवक्त्रपाद!।
नमो नमस्ते जगतः प्रवृत्ति-
विनाशसंस्थानकराप्रमेय! ॥ ५४ ॥
सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाण!
गरीयसामप्यतिगौरवात्मन्!।
प्रधानबुद्धीन्द्रियवत्प्रधान-
मूलात् परात्मन्! भगवन्! प्रसीद ॥ ५५ ॥
एषा मही देव! महीप्रसूतै-
र्महासुरैः पीड़ितशैलबन्धा।
परायणं त्वां जगतामुपैति
भारावतारार्थमपारसारम् ॥ ५६ ॥

यदिच्छितं अपेक्षते ॥ ५२ ॥ साध्वसं भयं तेनावनतशरीरेषु सत्सु ॥ ५३ ॥ प्रवृत्तिः सृष्टिः, संस्थानं स्थितिः ॥ ५४ ॥ अतिबृहत्-प्रमाण यस्य अतिगौरवयुक्त आत्मा मूर्त्तिर्यस्य प्रधानं प्रकृतिः, बुद्धिर्महत्तत्त्वम्, इन्द्रियवानहङ्कारः, एतेषां प्रधानः पुरुषः स एव मूलं जगत्कारणत्वात्, तस्मादपि परात्मन् सर्व्वश्रेष्ठ! ॥५५॥ एवं स्तुत्वा प्रस्तुतमाह एषेति, मही महीप्रसूतैर्भूमिजैरसुरैः पीड़िता-

एते वयं वृत्ररिपुस्तथायं
नासत्यदस्रौ वरुणो यमश्च ।
इमे च रुद्रा वसवः ससूर्याः
समीरणाग्निप्रमुखास्तथान्ये ॥ ५७ ॥
सुराः समस्ताः सुरनाथ कार्यम्
एभिर्मया यच्च तदीश सर्वम् ।
आज्ञापयाज्ञां प्रतिपालयन्त-
स्तवैव तिष्ठाम सदास्तदोषाः ॥ ५८ ॥

पराशर उवाच ।

एवं संस्तूयमानस्तु भगवान् परमेश्वरः ।
उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ ५९ ॥
उवाच च सुरानेतौ मत्केशौ वसुधातले ।
अवतीर्य भुवो भारक्लेशहानिं करिष्यतः ॥ ६० ॥

[illegible] ॥ ५६ ॥ [illegible] ॥ ५७ । ५८ ॥ [illegible] ॥ ५९ ॥ [illegible]

सुराश्च सकलाः स्वांशैरवतीर्य्य महीतले ।
कुर्वन्तु युद्धमुन्मत्तैः पूर्वोत्पन्नैर्महासुरैः ॥ ६१ ॥
ततः क्षयमशेषास्ते दैतेया धरणीतले ।
प्रयास्यन्ति न सन्देहो मद्दृक्पातविचूर्णिताः ॥ ६२ ॥
वसुदेवस्य या पत्नी देवकी देवतोपमा ।
तस्यायमष्टमो गर्भो मत्केशो भविता सुराः ॥ ६३ ॥
अवतीर्य्य च तत्रायं कंसं घातयिता भुवि ।
कालनेमिं समुद्भूतमित्युक्त्वान्तर्दधे हरिः ॥ ६४ ॥
अदृश्याय ततस्तेऽपि प्रणिपत्य महात्मने ।
मेरुपृष्ठं सुरा जग्मुरवतेरुश्च भूतले ॥ ६५ ॥
कंसाय चाष्टमो गर्भो देवक्या धरणीधरः ।
भविष्यतीत्याचचक्षे भगवान् नारदो मुनिः ॥ ६६ ॥
कंसोऽपि तदुपश्रुत्य नारदात् कुपितस्ततः ।
देवकीं वसुदेवञ्च गृहे गुप्तावधारयत् ॥ ६७ ॥
जातं जातञ्च कंसाय तेनैवोक्तं यथा पुरा ।
तथैव वसुदेवोऽपि पुत्रमर्पितवान् द्विज ! ॥ ६८ ॥
हिरण्यकशिपोः पुत्राः षड्गर्भा इति विश्रुताः ।
विष्णुप्रयुक्ता तान् निद्रा क्रमाद्गर्भे न्ययोजयत् ॥ ६९ ॥

परिच्छन्नः ॥ ६० ॥ तथापि युद्धादिक्रीडार्थं सुरानवतारयति सुराश्चेति ॥ ६१ ॥ तेषाञ्च मत्प्रभावात् वधमिति न मे वध्याभिप्रायः ततः क्षयमिति ॥ ६२ ॥ अयं कृष्णवर्णो मत्केशः रामकृष्णात्मना प्रकटमेतत् ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ गुप्तौ धारयितौ ॥ ६७ ॥ तेनैव कंसेनैव पुरा यथोक्तं समर्पयिष्ये सर्वान् पुत्रानुदरोद्भवानिति ॥ ६८ ॥ ६९ ॥ षड् वा विष्णुना प्रयुक्ता

योगनिद्रा महामाया वैष्णवी मोहितं यया।
अविद्यया जगत् सर्वं तामाह भगवान् हरिः॥ ७० ॥

श्रीभगवानुवाच।

निद्रे! गच्छ ममादेशात् पातालतलसंश्रयान्।
एकैकश्येन षड्गर्भान् देवकीजठरं नय॥ ७१ ॥
हतेषु तेषु कंसेन शेषाख्योंऽशस्ततो मम।
अंशांशेनोदरे तस्याः सप्तमः संभविष्यति॥ ७२ ॥
गोकुले वसुदेवस्य भार्य्याऽन्या रोहिणी स्थिता।
तस्याः स सम्भूतिसमं देवि! नेयस्त्वयोदरम्।
सप्तमो भोजराजस्य भयाद्रोधोपरोधतः॥ ७३ ॥
देवक्याः पतितो गर्भ इति लोको वदिष्यति।
गर्भसङ्कर्षणात् सोऽथ लोके सङ्कर्षणेति वै।
संज्ञामवाप्स्यते वीरः श्वेताद्रिशिखरोपमः॥ ७४ ॥

[illegible] तमः [illegible] योगनिद्रा [illegible] योगनिद्रा [illegible] निद्रेव निद्रा [illegible] अविद्यारूपैव [illegible] जगत्सर्वं [illegible] तमः [illegible] ॥ ७० ॥ ७१ ॥ ॥ ७२ ॥

संभूतिः सम्भवस्तुल्यं यथा भवत्येवं नेयः। यथैव वसुदेवान्तःपुर-मध्ये रोहिण्याः गर्भः [illegible] मासाः [illegible] मासि [illegible] गर्भं देवकीजठरात् [illegible] गर्भसंकर्षणमात्रात् [illegible] नेय इत्यर्थः। रोधोपरोधतः कारागारनिरोधात् ॥ ७३ ॥ सङ्कर्षण इति संज्ञामवाप्स्यति ॥ ७४ ॥ अथवा [illegible] [illegible] [illegible]

ततोऽहं सम्भविष्यामि देवकीजठरे शुभे।
गर्भे त्वया यशोदाया गन्तव्यमविलम्बितम् ॥ ७५ ॥
प्रावृट्काले च नभसि कृष्णाष्टम्यामहं निशि।
उत्पत्स्यामि नवम्यां च प्रसूतिं त्वमवाप्स्यसि ॥ ७६ ॥
यशोदाशयने मां तु देवक्यास्त्वामनिन्दिते।
मच्छक्तिप्रेरितमतिर्वसुदेवो नयिष्यति ॥ ७७ ॥
कंसश्च त्वामुपादाय देवि शैलशिलातले।
प्रक्षेप्स्यत्यन्तरिक्षे च त्वं स्थानं समवाप्स्यसि ॥ ७८ ॥
ततस्त्वां शतदृक् शक्रः प्रणम्य मम गौरवात्।
प्रणिपातानतशिरा भगिनीत्वे ग्रहीष्यति ॥ ७९ ॥
ततः शुम्भनिशुम्भादीन् हत्वा दैत्यान् सहस्रशः।
स्थानैरनेकैः पृथिवीमशेषां मण्डयिष्यसि ॥ ८० ॥
त्वं भूतिः सन्नतिः कीर्त्तिः कान्तिर्वै पृथिवी धृतिः।
लज्जा पुष्टिरुषा या च काचिदन्या त्वमेव सा ॥ ८१ ॥
ये त्वामार्य्येति दुर्गेति वेदगर्भाऽम्बिकेति च।
भद्रेति भद्रकालीति क्षेम्या क्षेमङ्करीति च ॥ ८२ ॥

॥ ७५ ॥ नभसि श्रावणे मासि सिंहस्थे रवौ कृष्णपक्षस्याष्टम्यामर्द्धरात्रानन्तरं नवम्यां प्रविष्टायां यशोदाशयने मां नेष्यति वसुदेवः नयने ॥ ७७ ॥ तथापि त्वया न भेतव्यमित्याह कंसश्चेति ॥ ७८ ॥ मां गौरवादुपहास तत्कल्पामिति बभूवुः। ततस्त्वां ... ॥ ७९ ॥ स्थानैर्योगपीठाख्यैरनेकैर्विन्ध्याचलादिभिः ॥ ८० ॥ लज्जा विभूतिरूपा त्वं भूतिरसि। या च काचिदन्यापि स्त्र्यादिः सापि त्वमेव ॥ ८१ ॥ ८२ ॥ ८३ ॥ सुराद्युपहारैर्यथाविधानं बलैः भक्ष्यादिभिरपि पूजिता सती ॥ ८४ ॥ ते सर्वे मम प्रसादात् ...

प्रातश्चैवापराह्ने च स्तोष्यन्त्यानम्रमूर्तयः।
तेषां हि प्रार्थितं सर्वं मत्प्रसादाद्भविष्यति ॥ ८३ ॥
सुरामांसोपहारैश्च भक्ष्यभोज्यैश्च पूजिता।
नृणामशेषकामांस्त्वं प्रसन्ना सम्प्रदास्यसि ॥ ८४ ॥
ते सर्वे सर्वदा भद्रे मत्प्रसादादसंशयम्।
असन्दिग्धा भविष्यन्ति गच्छ देवि यथोदितम् ॥ ८५ ॥

द्वितीयोऽध्यायः।

पराशर उवाच।

यथोक्ता सा जगद्धात्री देवदेवेन वै तदा।
षड्गर्भगर्भविन्यासं चक्रे चान्यस्य कर्षणम् ॥ १ ॥
सप्तमे रोहिणीं प्राप्ते गर्भे गर्भं ततो हरिः।
लोकत्रयोपकाराय देवक्याः प्रविवेश वै ॥ २ ॥
योगनिद्रा यशोदायास्तस्मिन्नेव ततो दिने।
सम्भूता जठरे तद्वद् यथोक्तं परमेष्ठिना ॥ ३ ॥

ते सर्वे मत्प्रसादादसन्दिग्धा असंशयविचारका भविष्यन्ति। अत एव गच्छ ॥ ८५ ॥

षड्गर्भविन्यासं देवक्याः गर्भविन्यासं कृतवती निद्रा, अन्यस्य सप्तमस्य देवक्याः जठरात् रोहिण्याः जठरं प्रति कर्षणं चक्रे ॥ १ ॥ देवक्याः गर्भं हरिः प्रविवेशेत्यन्वयः ॥ २ ॥ परमेष्ठिना परमेश्वरेण ॥ ३ ॥

ततो ग्रहगणः सम्यक् प्रचचार दिवि द्विज! ।
विष्णोरंशे भुवं याते ऋतवश्चाभवन् शुभाः ॥ ४ ॥
न सेहे देवकीं द्रष्टुं कश्चिदप्यतितेजसा ।
ज्वाल्यमानां तां दृष्ट्वा मनांसि क्षोभमाययुः ॥ ५ ॥
अदृष्टाः पुरुषस्त्रीभिर्देवकीं देवतागणाः ।
बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम् ॥ ६ ॥
प्रकृतिस्त्वं परा सूक्ष्मा ब्रह्मगर्भाभवः पुरा ।
ततो वाणी जगद्धातुर्वेदगर्भासि शोभने ! ॥ ७ ॥
सृज्यस्वरूपगर्भा च सृष्टिभूता सनातने ! ।
बीजभूता तु सर्वस्य यज्ञगर्भाभवस्त्रयी ॥ ८ ॥
फलगर्भा त्वमेवेज्या वह्निगर्भा तथारणिः ।
अदितिर्देवगर्भा त्वं दैत्यगर्भा तथा दितिः ॥ ९ ॥
ज्योत्स्ना वासरगर्भा त्वं ज्ञानगर्भासि सन्नतिः ।
नयगर्भधरा नीतिर्लज्जा त्वं प्रश्रयोद्वहा ॥ १० ॥
कामगर्भा तथेच्छा त्वं तुष्टिस्तोषगर्भिणी ।
मेधा च बोधगर्भासि धैर्यगर्भोद्वहा धृतिः ।
ग्रहर्क्षतारकागर्भा द्यौरस्याखिलहैतुकी ॥ ११ ॥

॥ ४ ॥ ५ ॥ नरस्त्रीः स्त्रीपुरुषैरदृष्टा अन्वस्तुवन् ॥ ६ ॥ या पुरा ब्रह्मप्रतिबिम्बधारिणी प्रकृतिरभवत् सा त्वमेवास्य, एवं सर्वत्र ॥ ७।८ ॥ ॥ ९ ॥ ज्योत्स्ना प्रकाश: सन्नतिः सता नतिः । गुरुपादाभिवन्दनः । नयो न्यायः सामादिर्गर्भे यस्याः सा नीतिर्नीतिशास्त्रं त्वं लज्जा प्रश्रयोऽन्येन धृतिः ॥ १० ॥ कामः कामितार्थो गर्भे यस्याः सा फलाभि-लाषिणीच्छा त्वमिच्छैव । तुष्टिरसन्तोषस्तोषादिमिताः सन्तोषो गर्भे यस्याः सा त्वं धैर्यवतीत्वं धृतिश्च स्थिरता अखिलहैतुकी द्यौरा-

एता विभूतयो देवि तथान्याश्च सहस्रशः ।
यथासङ्ख्या जगद्धात्रि साम्प्रतं जठरे तव ॥ १२ ॥
समुद्राद्रिनदीद्वीपवनपत्तनभूषणा ।
ग्रामखर्वटखेटाढ्या समस्ता पृथिवी शुभे ! ॥ १३ ॥
समस्तवह्नयोऽम्भांसि सकलाश्च समीरणाः ।
ग्रहर्क्षतारकाचित्रविमानशतसङ्कुलम् ॥ १४ ॥
अवकाशमशेषस्य यद्ददाति नभश्च तत् ।
भूर्लोकश्च भुवर्लोकः स्वर्लोकोऽथ महर्जनः ॥ १५ ॥
तपश्च ब्रह्मलोकश्च ब्रह्माण्डमखिलं शुभे ! ।
तदन्तर्वे स्थिता देवा दैत्यगन्धर्वचारणाः ॥ १६ ॥
महोरगास्तथा यक्षा राक्षसाः प्रेतगुह्यकाः ।
मनुष्याः पशवश्चान्ये ये च जीवा यशस्विनि ! ॥ १७ ॥
तैरन्तःस्थैरनन्तोऽसौ सर्वगः सर्वभावनः ।
रूपकर्माणि रूपाणि न परिच्छेदगोचरे ।
यस्याखिलप्रमाणानि स विष्णुर्गर्भगस्तव ॥ १८ ॥
त्वं स्वाहा त्वं स्वधा विद्या सुधा त्वं ज्योतिरम्बरे ।
त्वं सर्वलोकरक्षार्थमवतीर्णा महीतले ॥ १९ ॥

[illegible] ॥ ११ ॥ एता [illegible] ॥ १२ ॥ [illegible] परिच्छेद्यानि न भवन्ति । स विष्णुस्तव गर्भं

प्रसीद देवि ! सर्वस्य जगतः शं शुभे ! कुरु ।
प्रीत्या त्वं धारयेशानं धृतं येनाखिलं जगत् ॥ २० ॥

तृतीयोऽध्यायः ।

पराशर उवाच ।

एवं संस्तूयमाना सा देवैर्देवमधारयत् ।
गर्भेण पुण्डरीकाक्षं जगतस्त्राणकारणम् ॥ १ ॥
ततोऽखिलजगत्पद्मबोधायाच्युतभानुना ।
देवकीपूर्वसन्ध्यायामाविर्भूतं महात्मना ॥ २ ॥
तज्जन्मदिनमत्यर्थमाह्लाद्यमलदिङ्मुखम् ।
बभूव सर्वलोकस्य कौमुदी शशिनो यथा ॥ ३ ॥
सन्तः सन्तोषमधिकं प्रशमं चण्डमारुताः ।
प्रसादं निम्नगा याता जायमाने जनार्दने ॥ ४ ॥
सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम् ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ५ ॥

प्राप्य ॥ १८ ॥ १९ ॥ प्रीत्या धारय मां पुनः प्रागुक्तमंशांशाभ्यामतो दृष्ट्वा विषादं कुरु ॥ २० ॥

अखिलं जगदेव पद्मं तस्य बोधाय विकासाय अच्युतरूपेण भानुना देवक्येव पूर्वसन्ध्या तस्यामाविर्भूतम् ॥ २ ॥ आह्लादि बभूव । अमलानि दिशां मुखानि यस्मिन् तत् कौमुदी ज्योत्स्ना ॥ ३ ॥ ४ ॥

ससृजुः पुष्पवर्षाणि देवा भुव्यन्तरिक्षगाः ।
जज्वलुश्चाग्नयः शान्ता जायमाने जनार्दने ॥ ६ ॥
मध्यरात्रेऽखिलाधारे जायमाने जनार्दने ।
मन्दं जगर्जुर्जलदाः पुष्पवृष्टिमुचो द्विज ॥ ७ ॥
फुल्लेन्दीवरपत्राभं चतुर्बाहुमुदीक्ष्य तम् ।
श्रीवत्सवक्षसं जातं तुष्टावानकदुन्दुभिः ॥ ८ ॥
अभिष्टूय च तं वाग्भिः प्रसन्नाभिर्महामतिः ।
विज्ञापयामास तदा कंसाद्भीतो द्विजोत्तमः ॥ ९ ॥

वसुदेव उवाच ।

ज्ञातोऽसि देवदेवेश शङ्खचक्रगदाधर ।
दिव्यं रूपमिदं देव प्रसादेनोपसंहर ॥ १० ॥
अद्यैव देव कंसोऽयं कुरुते मम घातनम् ।
अवतीर्णमिति ज्ञात्वा त्वामस्मिन् मम मन्दिरे ॥ ११ ॥

देवक्युवाच ।

योऽनन्तरूपोऽखिलविश्वरूपो
गर्भेऽपि लोकान् वपुषा बिभर्ति ।
प्रसीदतामेष स देवदेवः
स्वमाययाविष्कृतबालरूपः ॥ १२ ॥

[illegible] ॥ ६ ॥ शान्ताः शोभाः [illegible] ॥ ६ ॥ [illegible] ॥ ७ ॥ ८ ॥ ९ ॥ [illegible] ॥ १० ॥ [illegible] ॥ ११ ॥ [illegible] ॥ १२ ॥

उपसंहर सर्वात्मन् रूपमेतच्चतुर्भुजम् ।
जानातु मावतारं ते कंसोऽयं दितिजाधमः ॥ १३ ॥

श्रीभगवानुवाच ।

स्तुतोऽहं यत् त्वया पूर्वं पुत्रार्थिन्या तदद्य ते ।
सफलं देवि ! सञ्जातं जातोऽहं यत् तवोदरात् ॥ १४ ॥

पराशर उवाच ।

इत्युक्त्वा भगवांस्तूष्णीं बभूव मुनिसत्तम ! ।
वसुदेवोऽपि तं रात्रावादाय प्रययौ बहिः ॥ १५ ॥
मोहिताश्चाभवंस्तत्र रक्षिणो योगनिद्रया ।
मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ ॥ १६ ॥
वर्षतां जलदानाञ्च तोयमत्युल्बणं निशि ।
सञ्छाद्यानुययौ शेषः फणैरानकदुन्दुभिम् ॥ १७ ॥
यमुनां चातिगम्भीरां नानावर्त्तसमाकुलाम् ।
वसुदेवो वहन् विष्णुं जानुमात्रवहां ययौ ॥ १८ ॥
कंसस्य करमादाय तत्रैवाभ्यागतांस्तटे ।
नन्दादीन् गोपवृद्धांश्च यमुनाया ददर्श सः ॥ १९ ॥

दितिजाधमः दैत्येभ्योऽपि दुष्टः । दितिजात्मज इति पाठे कालनेमि-नाम्ना दैत्येन कंसरूपेणावतारिणा तदभावात्मीयात् कंस उत्पादित इति हरिवंशे नारदेनोक्तं ज्ञेयम् ॥ १३ ॥ पूर्वं स्वायम्भुवेऽन्तरे ॥ १४ ॥ तूष्णीं बभूवेति प्राकृतबालभावोक्त्यैव कंसवधपर्यन्तं पित्रोः पालनया चतुर्भुजत्वोपसंहारोऽपि कृत इति मन्तव्यम् ॥ १५ ॥ १६ ॥ १७ ॥ विष्णुं वहन्निति तद्वहनादेव जानुमात्रजला कृता यमुनेत्यर्थः । अयमेव हेतुः कंसद्वारकपाटबन्धविघटनायामपि द्रष्टव्यः । हरिवंशे वसुदेव आगते यथा यथा तथा तथा इत्यादि यदुक्तं ॥ १८ ॥ आभ-

तस्मिन् काले यशोदापि मोहिता योगनिद्रया ।
तामेव कन्यां मैत्रेय प्रसूता मोहिते जने ॥ २० ॥
वसुदेवोऽपि विन्यस्य बालमादाय दारिकाम् ।
यशोदाशयनात् तूर्णमाजगामामितद्युतिः ॥ २१ ॥
ददृशे च प्रबुद्धा सा यशोदा जातमात्मजम् ।
नीलोत्पलदलश्यामं ततोऽत्यर्थं मुदं ययौ ॥ २२ ॥
आदाय वसुदेवोऽपि दारिकां निजमन्दिरम् ।
देवकीशयने न्यस्य यथापूर्वमतिष्ठत ॥ २३ ॥
ततो बालध्वनिं श्रुत्वा रक्षिणः सहसोत्थिताः ।
कंसायावेदयामासुर्देवकीप्रसवं द्विज ॥ २४ ॥
कंसस्तूर्णमुपेत्यैनां ततो जग्राह बालिकाम् ।
मुञ्च मुञ्चेति देवक्या सन्नकण्ठ्या निवारितः ॥ २५ ॥
चिक्षेप च शिलापृष्ठे सा क्षिप्ता वियति स्थिता ।
अवाप रूपं सुमहत् सायुधाष्टमहाभुजम् ॥ २६ ॥
प्रजहास तथैवोच्चैः कंसं च रुषिताब्रवीत् ।
किं मया क्षिप्तया मूढ जातो यस्त्वां वधिष्यति ॥ २७ ॥
सर्वस्वभूतो देवानामासीन्मृत्युः पुरा स ते ।
तदेतत् सम्प्रधार्याशु क्रियतां हितमात्मनः ॥ २८ ॥

[illegible] ददर्श ॥ १९ ॥ २० ॥ [illegible]
[illegible] बालमादाय दारिकाम् । [illegible] ॥ २१ ॥
[illegible] मुदं ययौ ॥ २२ ॥ [illegible]

इत्युक्त्वा प्रययौ देवी दिव्यस्रग्गन्धभूषणा ।
पश्यतो भोजराजस्य सुता सिद्धैर्विहायसि ॥ २८ ॥

चतुर्थोऽध्यायः ।

पराशर उवाच ।

कंसस्ततोद्विग्नमनाः प्राह सर्वान् महासुरान् ।
प्रलम्बकेशिप्रमुखानाहूयासुरपुङ्गवान् ॥ १ ॥

कंस उवाच ।

हे प्रलम्ब ! महाबाहो ! केशिन् ! धेनुक ! पूतने ! ।
अरिष्टाद्यैस्तथा चान्यैः श्रूयतां वचनं मम ॥ २ ॥
मां हन्तुममरैर्यत्नः कृतः किल दुरात्मभिः ।
मद्वीर्यतापितैर्वीरा ! न त्वेतान् गणयाम्यहम् ॥ ३ ॥
किमिन्द्रेणाल्पवीर्येण किं हरेणैकचारिणा ।
हरिणा वापि किं साध्यं छिद्रेष्वसुरघातिना ॥ ४ ॥
किमादित्यैः सवसुभिरल्पवीर्यैः किमग्निभिः ।
किञ्चान्यैरमरैः सर्वैर्मद्बाहुबलनिर्जितैः ॥ ५ ॥

कण्ठग्रहा निवारितोऽपि तां कन्यां अपाह ॥ २५ ॥ आकाशे स्थित्वा च महद्रूपं चाचार ॥ २६ ॥ २७ ॥ पुरा कालनेमिजन्मनि ॥ २८ ॥

ततोद्विग्नमनाः ततं विततम् उद्विग्नहृदयः विततोद्वेगयुक्तचित्तः । ततेति पाठः सुगमः ॥ १ ॥ युष्माभिररिष्टाद्यैश्च मम वचः श्रूयताम् ॥ २ ॥ निर्जितेति पंक्तिः ॥ ३ ॥ एकचारिणा साधवेन । छिद्रेषु अपकारादिसमयेषु ॥ ४ ॥ युक्तमैव बहुभूषणागच्छत् अपरा-

किं न दृष्टोऽमरपतिर्मया सयुगमित्व मः ।
पुत्रैमैव वदन् वाणानपागच्छत्व यत्समा ॥ ६ ॥
मद्बाहुशालिना अहितदा शक्रेण किं तदा ।
मद्बाणभिन्नैर्जलदैरापो मुक्ता यथेप्सिताः ॥ ७ ॥
किमत्र बहुनोक्तेन मद्बल जवनोरवः ।
न सर्वे भवति यावत् जगत्यन्यसमं गुरुम् ॥ ८ ॥
यत्नेनापि च महता जायते दैत्यपुङ्गवाः ।
हास्यं से जानते वा गास्ते यत्र मरेष्वपि ॥ ९ ॥
तथापि खलु दुष्टानां तेषामभ्यधिकं मया ।
मत्स्नातस्य दैत्यस्य तातस्य दुरात्मनाम ॥ १० ॥
तद् हि वनाश्विन कश्चित् पृथिव्यां ये च यक्षिमः ।
कार्यो देवारक्षार्थं सदा सर्वात्मना वधः ॥ ११ ॥
तत्पवयापि सुखं भवते स वै किल ।
कृत्वे तदङ्गलिकाः प्राप्तं देवागमसम्भवा ॥ १२ ॥
तस्माद् बालिन् परमां तत्र कार्यां महीतले ।
यज्ञाद्विजा बल यानि स हन्तव्य प्रयत्नतः ॥ १३ ॥

पराशर उवाच ।

इत्याज्ञाप्यासुरान् कंसः प्रविश्यात्मगृहं ततः ।
मुमोच वसुदेवञ्च देवकीञ्च निरोधतः ॥ १४ ॥

ट ४ । ६ । किमत्र ... इति ह: । नायो सुखा इति वा
ट ४ । ७ । सुष्ठ वपुः ... किं सर्वे भवति न बाधाः ।
... पाठे ... ॥ ८ । ९ ॥ १० । यज्ञस्विनो
दानविना देवापकारादेवैति तेषां वधे ... देवानां

कंस उवाच ।

युवयोर्घातिता गर्भा वृथैवैते मयाधुना ।
कोऽप्यन्य एव नाशाय बालो मम समुद्गतः ॥ १५ ॥
तदलं परितापेन नूनं तद्भाविनो हि ते ।
अर्भका युवयोः को वा नायुषोऽन्ते वियुज्यते ॥ १६ ॥
इत्याश्वास्य विमुक्त्वा च कंसस्तौ परिशङ्कितः ।
अन्तर्गृहं द्विजश्रेष्ठ प्रविवेश पुनः स्वकम् ॥ १७ ॥

पञ्चमोऽध्यायः ।

पराशर उवाच ।

विमुक्तो वसुदेवोऽपि नन्दस्य शकटं गतः ।
प्रहृष्टं दृष्टवान् नन्दं पुत्रो जातो ममेति वै ॥ १ ॥
वसुदेवोऽपि तं प्राह दिष्ट्या दिष्ट्येति सादरम् ।
वार्धकेऽपि समुत्पन्नस्तनयोऽयं तवाधुना ॥ २ ॥
दत्तो हि वार्षिकः सर्वो भवद्भिर्नृपतेः करः ।
यदर्थमागतास्तस्मात् नावस्थेयं महाधनाः ॥ ३ ॥

कलिनाशादपकारः स्यात् । तस्मादिन प्रदान देवा उपजीवन्तीति श्रुतेः ॥ ११ ॥ १० ॥ १२ ॥ १४ ॥ १५ ॥ ननु पुत्राभरणं भावि येषां ते तद्भाविनः ॥ १६ ॥

कंसेन बालवधाय सर्वे दैत्याः प्रहिता इति जानन् वसुदेवो नन्दादीन् गोकुलरक्षार्थम् प्रस्थापयितुं नन्दस्य शकटं शकटावस्थानं गतः ॥ १ ॥ ततवार्धिके निकेटु इराजसमाविधो न त्वोऽवविस्य-पदिपद्मात् । इतो गच्छतं द्वाभ्याम् ॥ २ ॥ किमाश्रितं विपत्र स्थीयते

यदर्थमागताः कार्य्यं तद्विज्ञातं किमास्यते ।
भवद्भिर्गम्यतां नन्द तच्छीघ्रं निजगोकुलम् ॥ ४ ॥
ममापि बालकस्तत्र रोहिणीप्रभवो हि यः ।
स रक्षणीयो भवता यथायं तनयो निजः ॥ ५ ॥

पराशर उवाच ।

इत्युक्ताः प्रययुर्गोपा नन्दगोपपुरोगमाः ।
शकटारोपितैर्भाण्डैः करं दत्त्वा महाबलाः ॥ ६ ॥
वसतां गोकुले तेषां पूतना बालघातिनी ।
सुप्तं कृष्णमुपादाय रात्रौ तस्मै ददौ स्तनम् ॥ ७ ॥
यस्मै यस्मै स्तनं रात्रौ पूतना संप्रयच्छति ।
तस्य तस्य क्षणेनाङ्गं बालकस्योपहन्यते ॥ ८ ॥
कृष्णस्तस्याः स्तनं गाढं कराभ्यामतिपीडितम् ।
गृहीत्वा प्राणसहितं पपौ क्रोधसमन्वितः ॥ ९ ॥
सा विमुक्तमहारावा विच्छिन्नस्नायुबन्धना ।
पपात पूतना भूमौ म्रियमाणातिभीषणा ॥ १० ॥
तन्नादश्रुतिसन्त्रासात् प्रबुद्धास्ते व्रजौकसः ।
ददृशुः पूतनोत्सङ्गे कृष्णं तां च निपातिताम् ॥ ११ ॥
आदाय कृष्णं सन्त्रस्ता यशोदापि द्विजोत्तम ।
गोपुच्छं भ्राम्य हस्तेन बालदोषमपाकरोत् ॥ १२ ॥

॥ ४ ॥ [illegible] ॥ ६ ॥ ७ ॥ ८ ॥ [illegible] ॥ ९ ॥ [illegible] ॥ १० ॥ [illegible]

गोः करीषमुपादाय नन्दगोपोऽपि मस्तके ।
कृष्णस्य प्रददौ रक्षां कुर्वन्नेतदुदीरयन् ॥ १३ ॥

नन्दगोप उवाच ।

रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः ।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत् ॥ १४ ॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत् ।
वराहरूपधृग् देवः स त्वां रक्षतु केशवः ॥ १५ ॥
नखाङ्कुरविनिर्भिन्नवैरिवक्षःस्थलो विभुः ।
नृसिंहरूपी सर्वत्र स त्वां रक्षतु केशवः ॥ १६ ॥
वामनो रक्षतु सदा भवन्तं यः क्षणादभूत् ।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः ॥ १७ ॥
शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः ।
गुह्यञ्च जठरं विष्णुर्जङ्घापादौ जनार्दनः ॥ १८ ॥
मुखं बाहू प्रबाहू च मनः सर्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्यस्तव नारायणोऽव्ययः ॥ १९ ॥
शार्ङ्गचक्रगदाखड्गशङ्खनादहताः क्षयम् ।
गच्छन्तु प्रेतकूष्माण्डराक्षसा ये तवाहिताः ॥ २० ॥
त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः ।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः ॥ २१ ॥

भाषा अतिभीषणा सती पपात स्वयं ॥११॥ ॥१२॥ करीषं गोमयचूर्णम् ॥१३॥ यस्मात् भवन्त्यस्मादिति प्रभवः ॥१४॥ ॥१५॥ ॥१६॥ क्रमाः पादविन्यासाः तैराक्रान्तं त्रैलोक्यं येन सः स्फुरन्त्यायुधानि यस्य सः। ईदृक्पाठे त्रिभिर्विक्रमैः क्रमैराक्रान्तं त्रैलोक्यं येन तथाभूतो यः क्षणादभूद्विस्तीर्णः ॥१७॥ बाहू प्रबाहू च कूर्परस्याधोभागौ ॥१८॥

एवं कृतस्वस्त्ययनो नन्दगोपेन बालकः ।
शायितः शकटस्याधो बालपर्य्यङ्किकातले ॥ २३ ॥
ते च गोपा महद् दृष्ट्वा पूतनायाः कलेवरम् ।
मृतायाः परमं त्रासं विस्मयं परमं ययुः ॥ २४ ॥

षष्ठोऽध्यायः ।

पराशर उवाच ।

कदाचिच्छकटस्याधः शयानो मधुसूदनः ।
चिक्षेप चरणावूर्ध्वं स्तन्यार्थी प्ररुरोद च ॥ १ ॥
तस्य पादप्रहारेण शकटं परिवर्त्तितम् ।
विध्वस्तकुम्भभाण्डं वै विपरीतं पपात च ॥ २ ॥
ततो हाहाकृतं सर्वो गोपगोपीजनो द्विज ।
आजगामाथ ददृशे बालमुत्तानशायिनम् ॥ ३ ॥
गोपाः केनेति केनेदं शकटं परिवर्त्तितम् ।
तत्रैव बालकाः प्रोचुर्बालेनानेन पातितम् ॥ ४ ॥

[illegible]

[illegible]

रुदता दृष्टमस्माभिः पादविक्षेपपातितम्।
शकटं परिवृत्तं वै नैतदन्यस्य चेष्टितम्॥ ५॥
ततः पुनरतीवासन् गोपा विस्मितचेतसः।
नन्दगोपोऽपि जग्राह बालमत्यन्तविस्मितः॥ ६॥
यशोदा शकटारूढभग्नभाण्डकपालिकाः।
शकटं चार्चयामास दधिपुष्पफलाक्षतैः॥ ७॥
गर्गश्च गोकुले तत्र वसुदेवप्रचोदितः।
प्रच्छन्न एव गोपानां संस्कारानकरोत् तयोः॥ ८॥
ज्येष्ठञ्च राममित्याह कृष्णञ्चैव तथापरम्।
गर्गो मतिमतां श्रेष्ठो नाम कुर्वन् महामतिः॥ ९॥
स्वल्पेनैव हि कालेन रिङ्गिणौ तौ तदा व्रजे।
घृष्टजानुकरौ तौ हि बभूवतुरुभावपि॥ १०॥

चेष्टा॥ ४॥ ५॥ ६॥ शकटारूढाः शकटे स्थापिताः। भग्नानां भाण्डानां कपालिकाः॥ ७॥ गोपानां प्रच्छन्न इत्यत्र युक्तोक्तिरनुसन्धेया। गर्गो हि गोकुलमागतो नन्देन बालयोर्नामकरणार्थं यदा प्रार्थितः तदा तेनोक्तम् अहं तावद्यदुकुलाचार्यः प्रख्यातः त्वञ्च वसुदेवस्य चेष्टः सखा। अथ तोरदारिकारूपाया देवक्याः पुत्र अष्टमः कश्चिज्जातोऽस्तीति कंसो मन्यत एवं स्थिते यदि मया यदुपुरोहितेन नामकरणादि कृतं ज्ञात्वा देवकीपुत्र एव कथञ्चिद् गोकुलं प्राप्तो नन्देन स्वपुत्रतयाभिषिक्त इति जानीयात् कंसो यदि तस्मात् तर्हि महाननर्थः स्यादिति। ततो नन्देनोक्तं मदीयैर्गोपैरप्यविज्ञातः सन् रहसि द्विजोचितं संस्कारमात्रं कुर्विति तदनन्तरम्। प्रच्छन्न एव गोपानां संस्कारानकरोत् तयोरिति॥ ८॥ महामतिरिति च॥ ९॥ रिङ्गिणौ जानुभ्यामेव

करीषभस्मदिग्धाङ्गौ भ्रममाणावितस्ततः ।
न निवारयितुं सेहे यशोदा न च रोहिणी ॥ ११ ॥
गोवाटमध्ये क्रीडन्तौ वत्सवाटगतौ पुनः ।
तदहर्जातगोवत्सपुच्छाकर्षणतत्परौ ॥ १२ ॥
यदा यशोदा तौ बालावेकस्थानचरावुभौ ।
शशाक नो वारयितुं क्रीडन्तावतिचञ्चलौ ॥ १३ ॥
यशोदा यष्टिमादाय कोपेनानुगता च तम् ।
कृष्णं कमलपत्राक्षं तर्जयन्ती तथा तदा ॥ १४ ॥
दाम्ना बद्ध्वा तदा मध्ये निबबन्ध उदूखले ।
कृष्णमक्लिष्टकर्माणमाह चेदममर्षिता ॥ १५ ॥
यदि शक्नोषि गच्छ त्वमतिचञ्चलचेष्टित ।
इत्युक्त्वा च निजं कर्म सा चकार कुटुम्बिनी ॥ १६ ॥
व्यग्रायामथ तस्यां स कर्षमाण उदूखलम् ।
यमलार्जुनमध्येन जगाम कमलेक्षणः ॥ १७ ॥
कर्षता वृक्षयोर्मध्ये तिर्यग्गतमुदूखलम् ।
भग्नावुत्तुङ्गशाखाग्रौ तेन तौ यमलार्जुनौ ॥ १८ ॥
ततः कटकटाशब्दं समाकर्ण्य च कातरः ।
आजगाम व्रजजनो ददृशे च महाद्रुमौ ॥ १९ ॥
भग्नस्कन्धौ निपतितौ भग्नशाखौ महीतले ।
नवोद्गताल्पदन्तांशुसितहासं च बालकम् ॥ २० ॥

---

१० ग. [illegible] इति । [illegible] च [illegible]
[illegible] ॥ १० ॥ करीषभस्म[illegible] दिग्धाङ्गौ [illegible] ॥ ११ ॥
॥ १० ॥ ११ ॥ १५ ॥ १६ ॥ [illegible]
॥ १७ ॥ १८ ॥ [illegible] ॥ १९ ॥ [illegible]

तयोर्मध्यगतं बद्धं दाम्ना गाढं तथोदरे ।
ततश्च दामोदरतां स ययौ दामबन्धनात् ॥ २१ ॥
गोपवृद्धास्ततः सर्वे नन्दगोपपुरोगमाः ।
मन्त्रयामासुरुद्विग्ना महोत्पातातिभीरवः ॥ २२ ॥
स्थानेनेह न नः कार्यं गच्छामोऽन्यन्महावनम् ।
उत्पाता बहवो ह्यत्र दृश्यन्ते नाशहेतवः ॥ २३ ॥
पूतनाया विनाशश्च शकटस्य विपर्ययः ।
विना वातादिदोषेण द्रुमयोः पतनं तथा ॥ २४ ॥
वृन्दावनमितः स्थानात् तस्माद् गच्छाम मा चिरम् ।
यावद् भौममहोत्पातदोषो नाभिभवेद् व्रजम् ॥ २५ ॥
इति कृत्वा मतिं सर्वे गमने ते व्रजौकसः ।
ऊचुः स्वं स्वं कुलं शीघ्रं गम्यतां मा विलम्ब्यताम्॥२६॥
ततः क्षणेन प्रययुः शकटैर्गोधनैस्तथा ।
यूथशो वत्सपालांश्च कालयन्तो व्रजौकसः ॥ २७ ॥
द्रव्यावयवनिर्धूतं क्षणमात्रेण तत् तथा ।
काककाकीसमाकीर्णं व्रजस्थानमभूद् द्विज ! ॥ २८ ॥
वृन्दावनं भगवता कृष्णेनाक्लिष्टकर्मणा ।
शुभेन मनसा ध्यातं गवां वृद्धिमभीप्सता ॥ २९ ॥

[illegible] स्थितो [illegible] ददर्शाम्बरः ॥ २० ॥ ॥ २१ ॥ २२ ॥ इत उपवृन्दावने स्थानेन गच्छेम ॥ २३ ॥ भौमः भूमि-विशेषवात्वर्षविशेषो महोत्पातसम्भवो दोषः ॥२५॥ कुलं कुटुम्बादि ॥२६॥ कालयन्तश्चालयन्तः ॥२७॥ द्रव्याणां दध्यादीनां [illegible] अवयवैः लेशैः निर्धूतं न काकीर्णं च ॥२८॥ [illegible] ॥२९॥ [illegible]

ततस्तत्रातिवर्षेऽपि धर्मकाले द्विजोत्तम ।
प्रावृट्काल इवोद्भूतं नवं शष्पं समन्ततः ॥ ३० ॥
स समावासितः सर्वो व्रजो वृन्दावने ततः ।
शकटीवाटपर्यन्तश्चन्द्रार्द्धाकारसंस्थितिः ॥ ३१ ॥
वत्सपालौ च संवृत्तौ रामदामोदरौ ततः ।
एकस्थानस्थितौ गोष्ठे चेरतुर्बाललीलया ॥ ३२ ॥
बर्हिपत्रकृतापीडौ वन्यपुष्पावतंसकौ ।
गोपवेणुकृतातोद्यपत्रवाद्यकृतस्वनौ ॥ ३३ ॥
काकपक्षधरौ बालौ कुमाराविव पावकौ ।
हसन्तौ च रमन्तौ च चेरतुस्तौ महावने ॥ ३४ ॥
क्वचिद्धसन्तावन्योन्यं क्रीडमानौ तथापरैः ।
गोपपुत्रैः समं वत्सांश्चारयन्तौ विचेरतुः ॥ ३५ ॥
कालेन गच्छता तौ तु सप्तवर्षौ महाव्रजे ।
सर्वस्य जगतः पालौ वत्सपालौ बभूवतुः ॥ ३६ ॥
प्रावृट्कालस्ततोऽतीव मेघौघस्थगिताम्बरः ।
बभूव वारिधाराभिरैक्यं कुर्वन् दिशामिव ॥ ३७ ॥

पाठः शकटवाटपर्यन्तः [illegible] चन्द्रार्द्धाकारसंस्थितिः [illegible] ॥ ३० ॥ [illegible] ॥ ३१ ॥ [illegible] मयूरपिच्छकृतशेखरौ वन्यपुष्पावतंसकौ [illegible] । [illegible] ॥ ३२ ॥ [illegible] ॥ ३३ ॥ [illegible] ॥ ३४ ॥ [illegible] ॥ ३५ ॥ [illegible]

प्ररूढनवशस्याढ्या शक्रगोपाचिता मही ।
तदा मारकतीवासीत् पद्मरागविभूषिता ॥ ३८ ॥
जग्मुः कृष्णागवाहीनि निम्नगाम्भांसि सर्वतः ।
मनांसि दुर्विनीतानां प्राप्य लक्ष्मीं नवामिव ॥ ३८ ॥
न रेजेऽन्तरितश्चन्द्रो निर्मलो मलिनैर्घनैः ।
सद्वाक्यवादी मूर्खाणां प्रगल्भाभिरिवोक्तिभिः ॥ ४० ॥
निर्गुणेनापि चापेन शक्रस्य गगने पदम् ।
अवाप्यताविवेकस्य नृपस्येव परिग्रहे ॥ ४१ ॥
मेघपृष्ठे बलाकानां रराज विमला ततिः ।
दुर्वृत्ते वृत्तचेष्टेव कुलीनस्यातिशोभना ॥ ४२ ॥
न बबन्धाम्बरे स्थैर्यं विद्युदत्यन्तचञ्चला ।
मैत्रीव प्रवरे पुंसि दुर्जनेन प्रयोजिता ॥ ४३ ॥
मार्गा बभूवुरस्पष्टा नवशस्यचयावृताः ।
अर्थान्तरमनुप्राप्ताः प्रजडानामिवोक्तयः ॥ ४४ ॥

प्रावृषं तावद् वर्णयति प्ररूढेत्यादिभिः । मेघैः स्वच्छन्नं छादितमम्बरं यस्मात् सः ॥ ३७ ॥ शक्रगोपैरिन्द्रगोपाख्यैः कीटैराचिता व्याप्ता मारकता मरकतमयीव । पद्मरागैरिवोक्तैर्विभूषिता ॥ ३८ ॥

मूर्खाणां वेदवाह्यानां प्रगल्भाभिः निःशङ्काभिः ॥ ४० ॥ निर्गुणेन ज्यारहितेनापि शक्रस्य चापेन । अविवेकस्य परिग्रहे स्वीकारे यथा निर्गुणेनापि पुंसा प्रतिष्ठावाप्यते तद्वत् ॥ ४१ ॥ ततिः पङ्क्तिः दुर्वृत्ते कपटे पुंसि कुलीनस्य वृत्तचेष्टा निष्कपटा व्यवहार इव ॥ ४२ ॥ अम्बरे गगनेऽपि विद्युत् स्थैर्यं न बबन्ध न चकार । प्रयोजिता कृता ॥ ४३ ॥ अस्पष्टाः अनिर्दृश्याः जडानां मन्दानामर्थान्तरविभिन्नार्थयुक्ता वाक्यानुक्तयो यथा अर्थान्तरं प्राप्ताः सत्यः अनिर्दृश्याः अभुः तद्वत् । यद्वा प्रजडानां जडानां वोक्तिनावचनाय इव । ते हि विवक्षितमर्थं अर्थान्तराभिधानेन

उन्मत्तशिखिसारङ्गे तस्मिन् काले महावने ।
कृष्णरामौ मुदा युक्तौ गोपालैश्चेरतुः सह ॥ ४५ ॥
क्वचिद् गोपैः समं रम्यं गेयनृत्यरतावुभौ ।
चेरतुः क्वचिदत्यर्थं शीतवृक्षतलाश्रयौ ॥ ४६ ॥
क्वचित् कदम्बस्रक्चित्रौ मयूरस्रग्धरौ क्वचित् ।
विचित्रौ क्वचिदासातां विविधैर्गिरिधातुभिः ॥ ४७ ॥
पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ ।
क्वचिद् गर्जति जीमूते हाहाकाररवाकुलौ ॥ ४८ ॥
गायतामन्यगोपानां प्रशंसापरमौ क्वचित् ।
मयूरकेकानुगतौ गोपवेणुप्रवादकौ ॥ ४९ ॥
इति नानाविधैर्भावैरुत्तमप्रीतिसंयुतौ ।
क्रीडासक्तौ वने तस्मिन् चेरतुः प्रीतमानसौ ॥ ५० ॥
विकाले तु समं गोभिर्गोपवृन्दसमन्वितौ ।
आजग्मतुः कृष्णरामौ गोपवेषधरावुभौ ॥ ५१ ॥

विचर्चित [illegible] ॥ ४४ ॥ तदेवं [illegible]
[illegible] ॥ [illegible] ॥ ४५ ॥ गोपैः [illegible] रम्यं [illegible]
[illegible] चेरतुः । [illegible]
[illegible] ॥ ४६ ॥ [illegible]
[illegible] ॥ ४८ ॥ मयूरकेकानुगतौ गोपवेणुप्रवादकौ च [illegible]
[illegible] पूर्वेणान्वयः ॥ ४९ ॥ [illegible] ॥ ५० ॥

विकाले च यथाजोषं व्रजमेत्य महाबलौ ।
गोपैः समानैः सहितौ विक्रीडातेऽमराविव ॥ ५२ ॥

सप्तमोऽध्यायः ।

पराशर उवाच ।

एकदा तु विना रामं कृष्णो वृन्दावनं ययौ ।
विचचार वृतो गोपैर्वन्यपुष्पस्रगुज्ज्वलः ॥ १ ॥
स जगामाथ कालिन्दीं लोलकल्लोलशालिनीम् ।
तीरसंलग्नफेनौघैर्हसन्तीमिव सर्वतः ॥ २ ॥
तस्यां चातिमहाभीमं विषाग्निसृतवारिणम् ।
ह्रदं कालियनागस्य ददर्शेऽतीव भीषणम् ॥ ३ ॥
विषाग्निना विसरता दग्धतीरमहातरुम् ।

विकाले सन्ध्यायां रामौ च क्रीडामत्तौ क्वचिद् वन एव चेरतुः ॥ ५१ ॥
क्वचिद् विकाले व्रजमेत्य यथासुखं विक्रीडाते ॥ ५२ ॥

विषमयजलह्रदविक्षोभणेन हि कालियदमनं रामः सहेत नेत्यवेत्य रामं विनैव ययौ ॥ १ ॥ लोलैश्चपलैः कल्लोलैः शालिनीं शोभमानाम् । फेनौघानां पौण्ड्राद्युत्तमोत्सवेक्षुदुमो या विषाग्निना सृतं तप्तं वारि यस्मिन् तं ह्रदम् अतिभीषणं यथा भवत्येवम् ॥ २ ॥ ३ ॥

वाताहताम्बुविक्षेपस्पर्शदग्धविहङ्गमम् ॥ ४ ॥
तमतीव महारौद्रं मृत्युवक्त्रमिवापरम् ।
विलोक्य चिन्तयामास भगवान् मधुसूदनः ॥ ५ ॥
अस्मिन् वसति दुष्टात्मा कालियोऽसौ विषायुधः ।
यो मया निर्जितस्त्यक्त्वा दुष्टो नष्टः पयोनिधिम् ॥ ६ ॥
तेनेयं दूषिता सर्वा यमुना सागरगामा ।
न गोपैर्गोधनैर्वापि तृषार्त्तैरुपभुज्यते ॥ ७ ॥
तदस्य नागराजस्य कर्त्तव्यो निग्रहो मया ।
निस्त्रासास्तु सुखं येन चरेयुर्व्रजवासिनः ॥ ८ ॥
एतदर्थं नृलोकेऽस्मिन्नवतारो मया कृतः ।
यदेषामुत्पथस्थानां कार्य्या शान्तिर्दुरात्मनाम् ॥ ९ ॥
तदेतं नातिदूरस्थं कदम्बमुरुशाखिनम् ।
अधिरुह्योत्पतिष्यामि ह्रदेऽस्मिन्ननिलाशिनः ॥ १० ॥

पराशर उवाच ।

इत्थं विचिन्त्य बद्ध्वा च गाढं परिकरं ततः ।
निपपात ह्रदे तत्र सर्पराजस्य वेगितः ॥ ११ ॥

[illegible] वाताहतस्याम्बुनो विक्षेपात् [illegible] [illegible] [illegible] ॥ ४ ॥ ५ ॥

[illegible] निर्जितो दुष्टो भयातुरः पयोनिधिं [illegible] [illegible] ॥ ६ ॥

[illegible]

तेनापि पतता तत्र क्षोभितः स महाह्रदः ।
अत्यर्थं दूरजातांश्च समसिञ्चन्महीरुहान् ॥ १२ ॥
ते हि दुष्टविषज्वालातप्ताम्बुपवनोक्षिताः ।
जज्वलुः पादपाः सद्यो ज्वालाव्याप्तदिगन्तराः ।
आस्फोटयामास तदा कृष्णो नागह्रदे भुजम् ॥ १३ ॥
तच्छब्दश्रवणाच्चाथ नागराजोऽभ्युपागमत् ।
आताम्रनयनो दुष्टविषज्वालाकुलैः फणैः ।
वृतो महाविषैश्चान्यैरुरगैरनिलाशिभिः ॥ १४ ॥
नागपत्न्यश्च शतशो हारिहारोपशोभिताः ।
प्रकम्पिततनुक्षेपचलत्कुण्डलकान्तयः ॥ १५ ॥
ततः प्रवेष्टितः सर्पैः स कृष्णो भोगबन्धनैः ।
ददंशुश्चापि ते कृष्णं विषज्वालाविलैर्मुखैः ॥ १६ ॥
तं तत्र पतितं दृष्ट्वा सर्पभोगनिपीडितम् ।
गोपा व्रजमुपागम्य चुक्रुशुः शोकलालसाः ॥ १७ ॥
एष मोहं गतः कृष्णो मग्नो वै कालियह्रदे ।
भक्ष्यते सर्पराजेन तदागच्छत पश्यत ॥ १८ ॥

परिधीयते इति परिकरो बन्धं तत् प्रगाढं बद्ध्वा वेगेन वेगवान् ॥ ११ ॥
समसिञ्चत् वस्त्रवत् सिषेच ॥ १२ ॥ १३ ॥ दुष्टविषज्वालाभिराकुलै-स्तीव्रैः फणैरुपलक्षित आगमत् ॥ १४ ॥ हारिभिर्मनोहरैर्हारैरुप-शोभिताः प्रकम्पितानां तनूनां क्षेपेणोत्क्षेपेण चलद्भिः कुण्डलैः कान्तिः शोभा यासान्ताः ॥ १५ ॥ भोगो देहः स एव बन्धनं बाधकत्वात् बन्धनं तत् प्रवेष्टितः कृष्णकीलितैर्विषैराविलैः दष्टः । ददंशु-र्दंष्टवन्तः ॥ १६ ॥ शोकेन लालसाः लालसायाः उत्सुका इत्यर्थः

तत् श्रुत्वा ते तदा गोपा वज्रपातोपमं वचः ।
गोप्यश्च त्वरिता जग्मुर्यशोदाप्रमुखा द्रुतम् ॥ १९ ॥
हा हा क्वासाविति जनो गोपीनामतिविह्वलः ।
यशोदया समं भ्रान्तो द्रुतं प्रस्खलितं ययौ ॥ २० ॥
नन्दगोपश्च गोपाश्च रामश्चाद्भुतविक्रमः ।
त्वरितं यमुनां जग्मुः कृष्णदर्शनलालसाः ॥ २१ ॥
ददृशुश्चापि ते तत्र सर्पराजवशं गतम् ।
निष्प्रयत्नं कृतं कृष्णं सर्पभोगेन वेष्टितम् ॥ २२ ॥
नन्दगोपश्च निश्चेष्टो न्यस्य पुत्रमुखे दृशौ ।
यशोदा च महाभागा बभूव मुनिसत्तम ॥ २३ ॥
गोप्यस्त्वन्या रुदन्त्यश्च ददृशुः शोककातराः ।
प्रोचुश्च केशवं प्रीत्या भयकातर्य्यगद्गदम् ॥ २४ ॥
सर्वा यशोदया सार्द्धं विशामोऽत्र महाह्रदे ।
नागराजस्य नो गन्तुमस्माकं युज्यते व्रजे ॥ २५ ॥
दिवसः को विना सूर्य्यं विना चन्द्रेण का निशा ।
विना वृषेण का गावो विना कृष्णेन को व्रजः ॥ २६ ॥
विनाकृता न यास्यामः कृष्णेनानेन गोकुलम् ।
अरम्यं नापि सेव्यञ्च वारिहीनं यथा सरः ॥ २७ ॥

॥ १७ ॥ वज्रं वज्रपातरूपं वच इति ॥ १८ ॥ द्रुतम् प्रस्खलितम् यथा भवत्येवं ययौ ॥ २० ॥ यशोदा च निश्चेष्टा बभूव ॥ २३ ॥

शोकेन कातरा विक्लवाः भयकातर्य्येण गद्गदं यथा भवत्येवं प्रोचुः । सम्प्रत्येव वयं इति वाक्यशेषः ॥ २४ ॥ कृष्णेन विनाकृता विरहिता न यास्यामः ॥ २७ ॥

यत्र नेन्दीवरदलप्रख्यकान्तिरयं हरिः ।
तेनापि मातुर्वासेन रतिरस्तीति विस्मयः ॥ २८ ॥
उत्फुल्लपङ्कजदलस्पष्टकान्तिविलोचनम् ।
अपश्यन्तो हरिं दीनाः कथं गोष्ठे भविष्यथ ॥ २९ ॥
अत्यन्तमधुरालापहृताशेषमनोधनाः ।
न विना पुण्डरीकाक्षं यास्यामो नन्दगोकुलम् ॥ ३० ॥
भोगिनावेष्टितस्यापि सर्पराजेन पश्यत ।
स्मितशोभि मुखं गोप्यः कृष्णस्यास्मद्विलोकने ॥ ३१ ॥

पराशर उवाच ।

इति गोपीवचः श्रुत्वा रौहिणेयो महाबलः ।
गोपांश्च त्रासविधुरान् विलोक्य स्तिमितेक्षणः ॥ ३२ ॥
नन्दं च दीनमत्यर्थं न्यस्तदृष्टिं सुतानने ।
मूर्च्छाकुलां यशोदां च कृष्णमाहात्म्यसंज्ञया ॥ ३३ ॥
किमिदं देवदेवेश ! भावोऽयं मानुषस्त्वया ।
व्यज्यतेऽत्यन्तमात्मानं किमनन्तं न वेत्सि यत् ॥ ३४ ॥
त्वमस्य जगतो नाभिरराणामिव संश्रयः ।
कर्तापहर्ता पाता च त्रैलोक्यं त्वं त्रयीमयः ॥ ३५ ॥

यत्राथं हरिर्नास्ति तेनापि मातुर्वासेन जननीस्नेहेनापि रतिर्भवतीति विस्मयोऽस्माकम् अत्यरिःकृते पारमेश्वेऽपि तुष्ट नाक्तेवेसर्वः ॥ २८ ॥ कथं भविष्यथ स्थास्यथेति च गोपानुपलक्ष्यः ॥ २९ ॥ अत्यन्तमधुरैरालापैरशेषं मनोरूपं धनं याभ्यो ता ॥ ३० ॥ त्रासविधुरान् मातुर्भयदुःखात् कर्तुं दुरामाविलक्षः ॥ ३१ ॥ कृष्णं प्रति व्यज्यते तव अव्यक्तात् विभावमपेक्षायां महदादि विश्वं विकृतिभिः ॥ ३३ ॥ आत्मानम् अनन्तं किं न वेत्सि मानुषत्वस्य यदि त्वं लघु अवेक्षसे इति ॥ ३४ ॥

इन्द्ररुद्राश्विवसुभिरादित्यैर्मरुदग्निभिः ।
चिन्त्यसे त्वमचिन्त्यात्मन् समस्तैश्चैव योगिभिः ॥ ३६ ॥
जगत्यत्र जगन्नाथ ! भारावतरणेच्छया ।
अवतीर्णोऽसि मर्त्येषु तवांशश्चाहमग्रजः ॥ ३७ ॥
मनुष्यलीलां भगवन् ! भजता भवता सुराः ।
विडम्बयन्तस्त्वल्लीलां सर्व एव सहासते ॥ ३८ ॥
अवतार्य भवान् पूर्वं गोकुलेऽत्र सुराङ्गनाः ।
क्रीडार्थमात्मनः पश्चादवतीर्णोऽसि शाश्वत ॥ ३९ ॥
अत्रावतीर्णयोः कृष्ण ! गोपा एव हि बान्धवाः ।
गोप्यश्च सीदतः कस्मात् त्वं बन्धून् समुपेक्षसे ॥ ४० ॥
दर्शितो मानुषो भावो दर्शितं बालचापलम् ।
तदयं दम्यतां कृष्ण ! दुरात्मा दशनायुधः ॥ ४१ ॥
पराशर उवाच ।
इति संस्मारितः कृष्णः स्मितभिन्नौष्ठसंपुटः ।
आस्फोट्य मोचयामास स्वदेहं भोगबन्धनात् ॥ ४२ ॥
आनम्य चापि हस्ताभ्यामुभाभ्यां मध्यमं फणम् ।
आरुह्याभुग्नशिरसः प्रननर्तोरुविक्रमः ॥ ४३ ॥

[illegible] इति श्रुतः ॥ ३६ ॥ [illegible] ॥ ३७ ॥

मनुष्यलीलां भजता भवता [illegible] सुरा एव [illegible] ॥ ३८ ॥ ३९ ॥ [illegible] ॥ ४० ॥ [illegible] इति वा पाठः

मग्नाः फणेऽभवंस्तस्य कृष्णस्याङ्घ्रिनिकुट्टनैः ।
यत्रोन्नतिञ्च कुरुते ननामास्य ततः शिरः ॥ ४४ ॥
मूर्च्छामुपययौ भ्रान्त्या नागः कृष्णस्य रेचकैः ।
दण्डपातनिपातेन ववाम रुधिरं बहु ॥ ४५ ॥
तन्निर्भुग्नशिरोग्रीवमास्येभ्यः स्रुतशोणितम् ।
विलोक्य शरणं जग्मुस्तत्पत्न्यो मधुसूदनम् ॥ ४६ ॥

नागपत्न्य ऊचुः ।

ज्ञातोऽसि देवदेवेश ! सर्वेशस्त्वमनुत्तम ! ।
परं ज्योतिरचिन्त्यं यत्तदंशः परमेश्वरः ॥ ४७ ॥
न समर्थाः सुरास्तोतुं यमनन्यभवं प्रभुम् ।
स्वरूपवर्णनं तस्य कथं योषित् करिष्यति ॥ ४८ ॥

अवनतफणा अभवन् ॥ ४३ ॥ कृष्णस्याङ्घ्रिभ्यां निकुट्टनैः खण्डनैः ननाम नम्रतामाप्तवत् ॥ ४४ ॥ कृष्णस्य भ्रान्त्या नर्त्तकोत्तमवेन मूर्च्छां नागः प्राप्तः दण्डवत्पातो दण्डपातः तीव्रप्रहारः । पाठान्तरे नटत्पादनिपातेनेति च एवार्थः । यद्वा भ्रान्तिरेचकदण्डपातादयो नृत्योक्ताः पादन्यासविशेषाः यदाह भरतः चलनं चरित्वा चैव भ्रमरी वामापूर्विका । अलम्बुस्वस्तीव स्याद्दिक्सम्भ्रमरी तथा । विभ्रमचरिका चैव दण्डचरिका तथा । निपातमन्तरे चोत्र भवा सप्त प्रकीर्त्तिताः ॥ पार्श्वे पार्श्वे च चरणं भ्रामितं भ्रामितैः पुनः विक्षिपेच्चेत् पादञ्च पादरेचक उच्यते । नूपुरं चरणं कृत्वा पूरतः प्रसारयेत् । चिह्नभाविद्धयोर्युग्मं दण्डपादेति वा स्मृतेति ॥ ४५ ॥ ४६ ॥ न विद्यते उत्तमो यस्मात् हे अनुत्तम ! परं ज्योतिः अचिन्त्यं यद्ब्रह्म तस्य तदंशः परमेश्वरः स त्वमसि ज्ञातोऽसि ॥ ४७ ॥ एवं चेत्तर्हीश तव त्वं वर्णयतेति चेत्तत्राहुः । नेति सार्द्धाभ्याम् । अनन्येषु भवतीत्यनन्यभवस्तस्य स्वरूपवर्णनं योषित्स्त्रीजनः कथं करिष्यति ॥ ४८ ॥

यस्याखिलं महीव्योमजलाग्निपवनात्मकम् ।
ब्रह्माण्डमल्पकांशांशस्तोष्यामस्तं कथं वयम् ॥ ४८ ॥
यतन्तो न विदुर्नित्यं यत्स्वरूपमयोगिनः ।
परमार्थमणोरल्पं स्थूलात् स्थूलं नताः स्म तम् ॥ ५० ॥
न यस्य जन्मने धाता यस्य नान्ताय चान्तकः ।
स्थितिकर्त्ता न चान्योऽस्ति यस्य तस्मै नमः सदा ॥ ५१ ॥
कोपः स्वल्पोऽपि ते नास्ति स्थितिपालनमेव ते ।
कारणं कालियस्यास्य दमने श्रूयतामतः ॥ ५२ ॥
स्त्रियोऽनुकम्प्याः साधूनां मूढा दीनाश्च जन्तवः ।
यतस्ततोऽस्य दीनस्य क्षम्यतां क्षमतां वर ! ॥ ५३ ॥
समस्तजगदाधारो भवानल्पबलः फणी ।
त्वया च पीडितो जह्यात् मुहूर्त्तार्द्धेन जीवितम् ॥ ५४ ॥
क्व पन्नगोऽल्पवीर्य्योऽयं क्व भवान् भुवनाश्रयः ।
प्रीतिद्वेषौ समोत्कृष्टगोचरौ च यतोऽव्यय ! ॥ ५५ ॥
ततः कुरु जगत्स्वामिन् ! प्रसादमवसीदतः ।
प्राणांस्त्यजति नागोऽयं भर्त्तृभिक्षा प्रदीयताम् ॥ ५६ ॥

यस्य स्थितिकर्त्ता अन्यो नास्ति विष्णुपराभावात् ॥ ५१ ॥ एवं स्तुत्वा तदर्थं प्रार्थयन्ते कोप इति । कोपेन यदस्य दमनं स्यात् तन्न कोपोऽपि नास्तीति तत्र स्यात् । स्थितिपालनार्थं तु दमने । दमनात् कारणमेव श्रूयताम् ॥ ५२ ॥ ५३ ॥ ५४ ॥ न च प्रभु हिंसनार्थं इत्याहुः यतः प्रीतिः समोत्कृष्टगोचरा द्वेषः इति अपकृष्टगोचरो न च दृष्टो युक्तः ॥ ५५ ॥ अत एवं अवसीदतो दीनस्य प्रसादमेव कुरु न चान्यत् किञ्चन, यावत् प्राणांस्त्यजति । प्राणानिति ॥ ५६ ॥ भर्त्तृभिक्षा पत्यौ

पराशर उवाच ।

इत्युक्ते ताभिराश्वस्य क्लान्तदेहोऽपि पन्नगः ।
प्रसीद देवदेवेति प्राह वाक्यं शनैः शनैः ॥ ५७ ॥
तवाष्टगुणमैश्वर्य्यं नाथ ! स्वाभाविकं परम् ।
निरस्तातिशयं यस्य तस्य स्तोष्यामि किं त्वहम् ॥ ५८ ॥
त्वं परस्त्वं परस्याद्यः परं त्वत्तः परात्मक ! ।
परस्मात् परमो यस्त्वं तस्य स्तोष्यामि किं त्वहम् ॥५९॥
यस्मात् ब्रह्मा च रुद्रश्च चन्द्रेन्द्रमरुतोऽश्विनौ ।
वसवश्च सहादित्यैस्तस्य स्तोष्यामि किं त्वहम् ॥ ६० ॥
एकावयवसूक्ष्मांशो यस्यैतदखिलं जगत् ।
कल्पनावयवस्यांश तं स्तोष्यामि कथं त्वहम् ॥ ६१ ॥

अत निमग्न इति कृष्णचरणाभिहतमूर्द्धा इति चरणाभिघातव्यथितो विह्वलात्मा न शक्नोति विषमां वाणीम् शनैः प्राह ॥ ५७ ॥ तव अष्टगुणं परं निरतिशयम् ऐश्वर्यं अणिमाद्यष्टगुणैश्वर्यं विभवं सोऽहमपि नैवं स्तोतुं समर्थ इति भावः ॥ ५८ ॥

निरतिशयैश्वर्यमेव दर्शयन्नाह । त्वमिति त्वं परः सर्वोत्कृष्ट एतदेवाह परस्य हिरण्यगर्भस्याप्याद्यो जनकः "यो ब्रह्माणं विदधाति पूर्वमिति" श्रुतेः तत्र हेतुः परमात्मक त्वत्तः प्रवर्तन्ते ये पर तत्तत्प्रवर्तकत्वात् , तदेव स्फुटं दर्शयन्नाह । परस्मादिन्द्रियादेः परमो यः "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेः परतस्तु सः ॥ महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इति श्रुतेरित्यर्थः । पाठान्तरे त्वनवेव टीका आचक्षते ॥ ५९ ॥ परमत्वमेव प्रपञ्चयन्नाह । यस्मादिति वसवश्च ॥ ६० ॥ यदीयकल्पनावयवस्य सूक्ष्मांशोऽखिलमिदं जगत् । ननु चिदात्मकस्य अङ्गं जगत् सर्वमंशः स्यात् तमाह । कल्प-

सदसद्रूपिणो यस्य ब्रह्माद्यास्त्रिदशोत्तमाः ।
परमार्थं न जानन्ति तस्य स्तोष्यामि किं त्वहम् ॥ १२ ॥
ब्रह्माद्यैरर्च्यते दिव्यैर्यश्च पुष्पानुलेपनैः ।
नन्दनादिसमुद्भूतैः सोऽर्च्यते वा कथं मया ॥ १३ ॥
यस्यावतारक्रपाणि देवराजः सदार्चति ।
न वेत्ति परमं रूपं सोऽर्च्यते वा कथं मया ॥ १४ ॥
विषयेभ्यः समाहृत्य सर्वाक्षाणि च योगिनः ।
यमर्चयन्ति ध्यानेन सोऽर्च्यते वा कथं मया ॥ १५ ॥
हृदि सङ्कल्प्य यद्रूपं ध्यानेनार्चन्ति योगिनः ।
भावपुष्पादिना नाथ ! सोऽर्च्यते वा कथं मया ॥ १६ ॥
सोऽहं ते देवदेवेश ! नार्चनायां स्तुतौ न च ।
सामर्थ्यवान् कृपामात्रमनोवृत्तिः प्रसीद मे ॥ १७ ॥
सर्पजातिरियं क्रूरा यस्यां जातोऽस्मि केशव ! ।
तत्स्वभावोऽयमत्रास्ति नापराधो ममाच्युत ! ॥ १८ ॥

वेत्ति [illegible] यस्य सः । [illegible] पुनः ॥ १२ ॥ [illegible] ॥ १४ ॥ [illegible] । भावपुष्पादिना [illegible] । तदुक्तम् । "अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः । सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः ॥ शमः पुष्पं तपः पुष्पं ध्यानं पुष्पं च सप्तमम् । सत्यं चैवाष्टमं पुष्पमेतैस्तुष्यति केशवः" ॥ १६ ॥ [illegible] ॥ १७ ॥

[illegible]

सृज्यते भवता सर्वं तथा संह्रियते जगत् ।
जातिरूपस्वभावाश्च सृज्यन्ते जगती त्वया ॥ ६८ ॥
यथाहं भवता सृष्टो जात्या रूपेण चेश्वर ! ।
स्वभावेन च संयुक्तस्तथेदं चेष्टितं मम ॥ ७० ॥
यद्यन्यथा प्रवर्त्तेयं देवदेव ! ततो मयि ।
न्याय्यो दण्डनिपातो वै तवैव वचनं यथा ॥ ७१ ॥
तथापि यज्जगत्स्वामी दण्डं पातितवान् मयि ।
स सोढोऽयं वरं दण्डस्त्वत्तो नान्योऽस्तु मे वरः ॥ ७२ ॥
हतवीर्यो हतविषो दमितोऽहं त्वयाच्युत ! ।
जीवितं दीयतामेकमाज्ञापय करोमि किम् ॥ ७३ ॥

श्रीभगवानुवाच ।

नात्र स्थेयं त्वया सर्प ! कदाचित् यमुनाजले ।
सभृत्यपरिवारस्त्वं समुद्रसलिलं व्रज ॥ ७४ ॥
मत्पदानि च ते सर्प ! दृष्ट्वा मूर्द्धनि सागरे ।
गरुडः पन्नगरिपुस्त्वयि न प्रहरिष्यति ॥ ७५ ॥

रिति षड्भिः ॥ ६८ ॥ जातिरूपस्वभावाश्च जातिः सर्पत्वादि रूपं फणित्वादि, स्वभावः क्रौर्य्यादि ॥ ६८ ॥ ७० ॥ तवैव वचनं स्मृत-स्मृत्यादि यथा । परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्म-संस्थापनार्थाय सम्भवामि युगे युगे इत्यादि । साधुत्वन्तु तदा दण्डकर्म-णस्तदैव मया कृतं मान्यादित्यर्थः ॥ ७१ ॥ त्वत्तो दण्डोऽपि वरं श्लाघ्यत्वात् । त्वदन्यतो वरोऽपि न काम्यः । नान्यस्तु वरमिति पाठे दण्डविशेषोऽयं वर एव त्वत्तो नान्यदपेक्षित ॥ ७२ ॥ ७३ ॥ नात्र

पराशर उवाच ।

इत्युक्तो सर्पराजानं मुमोच भगवान् हरिः ।

प्रणम्य सोऽपि कृष्णाय जगाम पयसां निधिम् ॥ ७६ ॥

पश्यतां सर्वभूतानां सभृत्यापत्यबान्धवः ।

समस्तभार्य्यासहितः परित्यज्य स्वकं ह्रदम् ॥ ७७ ॥

ततः सर्पे परिष्वज्य मृतं पुनरिवागतम् ।

गोपा मूर्द्धनि गोविन्दं सिषिचुर्नेत्रजैर्जलैः ॥ ७८ ॥

कृष्णमक्लिष्टकर्म्माणमन्ये विस्मितचेतसः ।

तुष्टुवुर्मुदिता गोपा दृष्ट्वा शिवजलां नदीम् ॥ ७९ ॥

गीयमानः स गोपीभिश्चरितैश्चारुचेष्टितः ।

संस्तूयमानो गोपैश्च कृष्णो व्रजमुपागमत् ॥ ८० ॥

अष्टमोऽध्यायः ।

पराशर उवाच ।

गाः पालयन्तौ च पुनः सहितौ बलकेशवौ ।

भ्रममाणौ वने तस्मिन् रम्यं तालवनं गतौ ॥ १ ॥

तत्तु तालवनं दिव्यं धेनुको नाम दानवः ।

मृगमांसकृताहारः सदाध्यास्ते खराकृतिः ॥ २ ॥

तत्तु तालवनं पक्वफलसम्पत्समन्वितम् ।

दृष्ट्वा स्पृहान्विता गोपाः फलादानेऽब्रुवन् वचः ॥ ३ ॥

हे राम ! हे कृष्ण ! सदा धेनुकेनैष रक्ष्यते ।

भूप्रदेशो यतस्तस्मात् पक्वानीमानि सन्ति वै ॥ ४ ॥

[illegible] । [illegible] ॥ ७८ ॥

[illegible] ॥ ७९ ॥ [illegible] ॥

फलानि पश्य तालानां गन्धामोदितदिंशि च।
वयमस्तुमभीप्सामः पात्यन्तां यदि रोचते ॥ ५ ॥
इति गोपकुमाराणां श्रुत्वा सङ्कर्षणो वचः।
कृष्णश्च पातयामास भुवि तालफलानि वै ॥ ६ ॥
फलानां पततां शब्दमाकर्ण्य स दुरासदः।
आजगाम सुदुष्टात्मा कोपाद्दैतेयगर्दभः ॥ ७ ॥
पद्भ्यामुभाभ्यां स तदा पश्चिमाभ्यां बली बलम्।
जघानोरसि ताभ्यां च स च तेनाप्यगृह्यत ॥ ८ ॥
गृहीत्वा भ्रामणेनैव सोऽम्बरे गतजीवितम्।
तस्मिन्नेव च चिक्षेप वेगेन तृणराजनि ॥ ९ ॥
ततः फलान्यनेकानि तालाग्रान्निपतन् खरः।
पृथिव्यां पातयामास महावातोऽम्बुदानिव ॥ १० ॥
अन्यानप्यस्य वै ज्ञातीनागतान् दैत्यगर्दभान्।
कृष्णश्चिक्षेप तालाग्रे बलभद्रश्च लीलया ॥ ११ ॥
क्षणेनालङ्कृता पृथ्वी पक्वैस्तालफलैस्तथा।
दैत्यगर्दभदेहैश्च मैत्रेय शुशुभेऽधिकम् ॥ १२ ॥

फलानामाह्लादने युक्ताम्बिताः बन्धोऽप्युदकम् ॥ १ । ४ ॥ गन्धामोदितादिंशि गन्धेनामोदिताः दिशो यैस्तानि फलानि पश्य। पाठान्तरे गन्धेनामोदिता दिशः। येषां गन्धेनामोदस्तस्मिन् दिश इत्यर्थः ॥ ५ ॥ पातयामास बाहुभ्यामिति शेषम्। बाहुभ्यां तालान् संचाल्य त्यन्त सुबोधः ॥ ६ ॥ ७ ॥ ताभ्यां तयोः पादयोः स च धेनुकश्चेन रामेणाप्यगृह्यत ॥ ८ ॥ गृहीत्वा धेनुकं स रामः तृणराजनि तालवृक्षे च

तथा गावो निराबाधास्तस्मिंस्तालवने द्विज ! ।
नवशस्यं सुखं चेरुर्यन्न भुक्तमभूत् पुरा ॥ ११ ॥

नवमोऽध्यायः ।

पराशर उवाच ।

[illegible] रासभदैतेये सानुगे विनिपातिते ।
सेव्यं गोगोपगोपीनां रम्यं तालवनं बभौ ।
ततस्तौ जातहर्षौ तु वसुदेवसुतावुभौ ।
हत्वा धेनुकदैतेयं भाण्डीरवटमागतौ ॥ २ ॥
क्ष्वेडमानौ प्रगायन्तौ विचिन्वन्तौ च पादपान् ।
चारयन्तौ च गा दूरे व्याहरन्तौ च नामभिः ॥ ३ ॥
निर्योगपाशस्कन्धौ तौ वनमालाविभूषितौ ।
शुशुभाते महात्मानौ बालशृङ्गाविवर्षभौ ॥ ४ ॥

[illegible]

[illegible] ॥ १ ॥ क्ष्वेडमानौ [illegible] ॥ २ ॥ निर्योग[illegible] [illegible] निर्योगपाशस्कन्धौ [illegible] ॥ ३ ॥ [illegible]

सुवर्णाञ्जनचूर्णाभ्यां तौ तदा रूषिताम्बरौ ।
महेन्द्रायुधसंयुक्तौ श्वेतकृष्णाविवाम्बुदौ ॥ ५ ॥
चेरतुर्लोकसिद्धाभिः क्रीडाभिरितरेतरम् ।
समस्तलोकनाथानां नाथभूतौ भुवं गतौ ॥ ६ ॥
मनुष्यधर्माभिरतौ मानयन्तौ मनुष्यताम् ।
तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनम् ॥ ७ ॥
ततः त्वान्दोलिकाभिश्च नियुद्धैश्च महाबलौ ।
व्यायामं चक्रतुस्तत्र क्षेपणीयैस्तथाश्मभिः ॥ ८ ॥
तल्लिप्सुरसुरस्तत्र उभयो रममाणयोः ।
आजगाम प्रलम्बाख्यो गोपवेषतिरोहितः ॥ ९ ॥
सोऽवगाहत निःशङ्कः तेषां मध्यममानुषः ।
मानुषं वपुरास्थाय प्रलम्बो दानवोत्तमः ॥ १० ॥
तयोश्छिद्रान्तरं प्रेप्सुरविषह्यममन्यत ।
कृष्णं ततो रौहिणेयं हन्तुं चक्रे मनोरथम् ॥ ११ ॥
हरिणाक्रीडनं नाम बालक्रीडनकं ततः ।
प्रक्रीडन्तो हि ते सर्वे द्वौ द्वौ युगपदुत्पतन् ॥ १२ ॥

महेन्द्रायुधमिन्द्रधनुस्तत्संयुक्तावम्बुदाविव ॥ ५ ॥ ६ ॥ ७ ॥ आन्दोलिकाभिः दोलाफलकप्रदोलारोहणैः आस्फालनादिमल्लक्रीडाभिश्च । नियुद्धैः बाहुयुद्धैः व्यायामं श्रमः ॥ ८ ॥ तल्लिप्सुः तौ जिघृक्षुः । गोपवेषेण तिरोहितः अप्रतीयमानचिह्नः ॥ ९ ॥ अवगाहत प्रविष्टवान् ॥ १० ॥ छिद्रान्तरप्रेप्सुः प्रमादावसरं प्रतीक्षमाणः अविषह्यमशक्यम् ॥ ११ ॥ हरिणाक्रीडनं हरिणप्लुतक्रीडनं यत्र द्वयोः युगपदुत्प्लुतयोः पूर्वतो याति स जेता इतरस्तु जितः । यश्च जितो जेतारं वहन् भाण्डीरवटं नीत्वा पुनः उत्प्लुत्यागच्छेदिति व्यवस्थाः उत्पतन् उत्प्लुतवन्तः ॥ १२ ॥ युग्मशः उत्प्लुतवन्तः । तत्र प्रलम्बः

श्रीदाम्ना सह गोविन्दः प्रलम्बेन तथा बलः ।
गोपालैरपरैश्चान्ये गोपालाः पुप्लुवुस्ततः ॥ १३ ॥
श्रीदामानं ततः कृष्णः प्रलम्बं रोहिणीसुतः ।
जितवान् कृष्णपक्षीयैर्गोपैरन्ये पराजिताः ॥ १४ ॥
ते वाहयन्तस्त्वन्योन्यं भाण्डीरस्कन्धमेत्य वै ।
पुनर्निववृतुः सर्वे ये ये तत्र पराजिताः ॥ १५ ॥
सङ्कर्षणं तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः ।
न तस्थौ स जगामैव सचन्द्र इव वारिदः ॥ १६ ॥
असहन् रौहिणेयस्य स भारं दानवोत्तमः ।
ववृधे सुमहाकायः प्रावृषीव बलाहकः ॥ १७ ॥
सङ्कर्षणस्तु तं दृष्ट्वा दग्धशैलोपमाकृतिम् ।
स्रग्दामलम्बाभरणं मुकुटाटोपिमस्तकम् ॥ १८ ॥
रौद्रं शकटचक्राक्षं पादन्यासचलत्क्षितिम् ।
ह्रियमाणस्ततः कृष्णमिदं वचनमब्रवीत् ॥ १९ ॥
कृष्ण कृष्ण ह्रियाम्येष पर्वतोदयमूर्त्तिना ।
केनापि पश्य दैत्येन गोपालच्छद्मरूपिणा ॥ २० ॥

श्रीदामाद्याः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ दग्धशैलोपमा नाकृतौ कालिमत्वं यस्य । स्रग्दाम पुष्पमाला सैव लम्बमानमाभरणं यस्य तम् । मुकुटाटोपि आटोपयुक्तमुकुटं यस्य ॥ १८ ॥ रौद्रं घोरं शकटचक्रे इव अक्षिणी यस्य तं पादन्यासेन चलन्ती क्षितिर्यस्य तम् ॥ १९ ॥

ह्रियामि ह्रिये सर्वत्र परस्मैपदमार्षं पर्वतस्येव उदयः उच्छ्रितिर्यस्य

यदत्र साम्प्रतं कार्य्यं मया मधुनिषूदन ! ।
तत् कथ्यतां प्रयात्येष दुरात्मा दानवाधमः ॥ २१ ॥

पराशर उवाच ।

तमाह रामं गोविन्दः स्मितभिन्नौष्ठसम्पुटः ।
महात्मा रौहिणेयस्य बलवीर्य्यप्रमाणवित् ॥ २२ ॥
किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते ।
सर्वात्मन् ! सर्वगुह्यानां गुह्यगुह्यात्मना त्वया ॥ २३ ॥
स्मराशेषजगद्बीजकारणं कारणाग्रजम् ।
आत्मानमेकं तद्वच्च जगत्येकार्णवे च यत् ॥ २४ ॥
किन्न वेत्सि यथाहञ्च त्वञ्चैकं कारणं भुवः ।
भारावतारणार्थाय मर्त्त्यलोकमुपागतौ ॥ २५ ॥

नभः शिरस्तेऽम्बुमयी च मूर्त्तिः
पादौ क्षितिर्वक्त्रमनन्त ! वह्निः ।
सोमो मनस्ते श्वसितं समीरो
दिशश्चतस्रोऽव्यय ! बाहवस्ते ॥ २६ ॥

नेन ॥ २० ॥ २१ ॥ पूर्वं कार्य्यविभागेन तत्त्वं मां किमात्मानं परमेश्वरं न वेत्सीति तत्त्वं संज्ञार्थं स्वयमिदानीं पृच्छतीति विस्मयात् स्मितेन भिन्नौष्ठसंपुटं यस्य सः ॥ २२ ॥ सर्वात्मन्: सर्वगुह्यानां सर्वेषां गुह्यानां कारणानां गुह्यकारणभूत । अत एव गुह्यात्मना मनुष्येऽवधारितव्यावच्छिन्नरूपेण ॥ २३ ॥ एतत् प्रपञ्चयन्नाह स्मरेति द्वाभ्यां अशेषजगद्बीजकारणम् । सर्वं जगत् ब्रह्माण्डमपि कारणमात्मा तं स्मर तत्र हेतुः कारणस्याप्यग्रजम् अग्रस्थमपि प्रपञ्चनया पूर्वं स्थितं तद्वत् तथैव जगत्येकार्णवे यदीक्षणात्वं स्थितं यदेवमपश्यन्ते तदेवावलोक्य स्थितमात्मानं स्मर ॥ २४ ॥ २५ ॥ विराड्रूपेण स्तौति नभ इति ॥ २६ ॥

सर्वस्वरूपो भगवान् महात्मा
सर्वस्वरूपाद्धि शरीरभेदः ।
सर्वस्वरूपात्मवयामिराद्यः
सर्वस्वयज्ञां मुनयो स्तुवन्ति ॥ २७ ॥
दिव्यं हि रूपं तव वेत्ति नान्यो
देवैरशेषैरवतारस्वरूपम् ।
तथापि ते, वेत्सि न किं, वहन्ते
त्वय्येव विश्वं लयमभ्युपैति ॥ २८ ॥
त्वया धृतेयं धरणी बिभर्त्ति
चराचरं विश्वमनन्तमूर्त्ते ।
कृतादिभेदैरज कालरूपो
निमेषपूर्वो जगदेतदत्सि ॥ २९ ॥
जलं यथा वायुवशाद्धिमाख्यं
हिमस्वरूपं परिगृह्य कास्तम् ।
हिमाचले भानुमतोऽंशुसङ्गात्
जलत्वमभ्येति पुनस्तदेव ॥ ३० ॥

[illegible] स्तौति [illegible] इति । [illegible] शरीरभेदा [illegible] । [illegible] ॥ २७ ॥ [illegible] ॥ २८ ॥ [illegible] ॥ २९ ॥ [illegible] ।

एवं त्वया संहरणेऽत्तमेतत्
जगत् समस्तं पुनरप्यवश्यम्।
तवैव सर्गाय समुद्यतस्य
जगत्त्वमर्थ्यं त्वनुकम्पनीय! ॥ ३१ ॥
भवानशेष विश्वात्मन्! एकमेव हि कारणम्।
जगतोऽस्य जगत्यर्थे भेदेनाथं व्यवस्थितौ ॥ ३२ ॥
तत् स्थीयतामसेयात्मन्! त्वयात्मा जहि दानवम्।
मानुष्यमेवावलम्ब्य बन्धनां क्रियतां हितम् ॥ ३३ ॥
पराशर उवाच।

स्तुत्भूमिस्थानस्थायः प्राप्तिसमधाः। चतुःप्रकारा भगवानादन्ये पवित्रा सुने!। विश्वाभ्यन्तरमभोभिराय जगतो जवम् सोमे समुत्थितन्स्य वायुनाऽशांमते दिव। निमोच्यातदृशांसा हेतुः स्वमवहुत इत्यादि पूर्वोक्तरीत्या महादिरूपेणागतं जलं जवने च वायुना वडवाग्निना पीतं स्थीयवर्धितमनं मतं तेन वायुना नाडीवदरविरश्मना चन्द्रद्वारा हिमाद्रौ क्षिप्तं पीतं पुनरुदेव नवमासपेन विलीयमानं हिमतो जगतां यातं यथा ॥ ३० ॥

तवैव त्वया संहरणकाले चतुराग्निस्थानीयेन बद्धादिरूपेणागतं भक्षितं जगत्त्वदधीनं स्वस्थैव हिमादूरस्थानीये परमपुरुषे कारणात्मना संक्षिप्तं सदेव नवमासपेन कालेन विलीयमानं जगतां प्राप्य यावत् समयं स्थितं तत् पुनः संहरणकर्मात्मना सर्गोद्यतस्य तस्य स्थानीयस्य सूक्ष्मसंस्कारस्थानत्वात् पुनर्विरोधात्मकस्य जगदुत्पत्त्यं प्रतिबध्यमेतीति वाक्यार्थोपमा। यथाह दण्डी 'वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते। एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा मता' ॥ ३१ ॥

एवंभूतः परमेश्वरस्त्वमेव नान्य इति चेतसाह। भवानशेषेति ॥ ३२ ॥

इति संस्मारितो विप्र! कृष्णेन सुमहात्मना।
विहस्य पीडयामास प्रलम्बं बलवान् बलः॥ २४॥
मुष्टिना चाहनन्मूर्ध्नि कोपसंरक्तलोचनः।
तेन चास्य प्रहारेण बहिर्याते विलोचने॥ २५॥
स निष्कासितमस्तिष्को मुखाच्छोणितमुद्वमन्।
निपपात महीपृष्ठे दैत्यवर्य्यो ममार च॥ २६॥
प्रलम्बं निहतं दृष्ट्वा बलेनाद्भुतकर्म्मणा।
प्रहृष्टास्तुष्टुवुर्गोपाः साधु साध्विति चाब्रुवन्॥ २७॥
संस्तूयमानो गोपैस्तु रामो दैत्ये निपातिते।
प्रलम्बे, सह कृष्णेन पुनर्गोकुलमाययौ॥ २८॥

दशमोऽध्यायः।

पराशर उवाच।

तयोर्विहरतोरेवं रामकेशवयोर्व्रजे।
प्रावृड्व्यतीता विकसत्सरोजा चाभवच्छरत्॥ १॥

[illegible] तथापि [illegible]
[illegible] ॥ २४ ॥ २५ ॥ २६ ॥ निष्कासि-
तं [illegible] ॥२६॥२७॥२८॥

तयोरेवं विहरतोरिति [illegible]
[illegible] ॥ १ ॥ [illegible]

अवापुस्तापमत्यर्थं शफर्यः पल्वलोदके ।
पुत्रक्षेत्रादिसक्तेन ममत्वेन यथा गृही ॥ २ ॥
मयूरा मौनिनस्तस्थुः परित्यक्तमदा वने ।
असारतां परिज्ञाय संसारस्येव योगिनः ॥ ३ ॥
उत्सृज्य जलसर्वस्वं विमलाः सितमूर्तयः ।
तत्यजुश्चाम्बरं मेघा गृहं विज्ञानिनो यथा ॥ ४ ॥
शरत्सूर्यांशुतप्तानि ययुः शोषं सरांसि च ।
बह्वालम्बममत्वेन हृदयानीव देहिनाम् ॥ ५ ॥
कुमुदैः शरदम्भांसि योग्यतालक्षणं ययुः ।
अवबोधैर्मनांसीव समत्वममलात्मनाम् ॥ ६ ॥
तारकाविमले व्योम्नि रराजाखण्डमण्डलः ।
चन्द्रश्चरमदेहात्मा योगी साधुकुले यथा ॥ ७ ॥

[illegible] शरत्क्रीडा [illegible] कर्मभिः कर्मभिरवर्धयति । तयोरन्यादि पञ्चदशभिः विकसन्ति सरोजानि यस्तां वा ॥ १ ॥ शफर्यः क्षुद्रमत्स्याः पल्वलोदके अल्पगर्तजले ॥ २ ॥ परित्यक्तो मदो दर्पो येन ॥ ३ ॥ जलसर्वस्वं जलमयत्वादिकं च सर्वं त्यक्त्वा मेघाः अहङ्कारकामरागादिरहिताः सितमूर्तयः शुभ्ररूपाः । शुद्धसत्त्वाश्च विज्ञानिनः आत्मज्ञाः ॥ ४ ॥

शरदम्भांसि सम्बन्धजातानि कुमुदैः सितैर्योग्यतालक्षणं ययुः स्वच्छत्वं प्रापुरित्यर्थः । अमलात्मनां वीतरागाणां मनांसि अवबोधैरात्मविज्ञानैरिव ॥ ६ ॥ तारकाभिरुपलक्षिते विमले व्योम्नि अखण्डमण्डलः सम्पूर्णमण्डलः पूर्णिमायां चन्द्रो रराज यथा नास्तिकैर्विद्याचारादिभिर्विमले साधूनां कुले पूर्वजन्मप्रभावो योगी चरमे

शनकैः शनकैस्तीरं तत्यजुश्च जलाशयाः ।
ममत्वं क्षेत्रपुत्रादिरूढमुच्चैर्यथा बुधाः ॥ ८ ॥
पूर्वत्यक्तैः सरोऽम्भोभिर्हंसा योगं पुनर्ययुः ।
क्लेशैः कुयोगिनोऽशेषैरन्तरायहता इव ॥ ९ ॥
निभृतोऽभवदत्यर्थं समुद्रः स्तिमितोदकः ।
क्रमावाप्तमहायोगो निश्चलात्मा यथा यतिः ॥ १० ॥
सर्वत्रातिप्रसन्नानि सलिलानि तदाभवन् ।
ज्ञाते सर्वगते विष्णौ मनांसीव सुमेधसाम् ॥ ११ ॥
बभूव निर्मलं व्योम शरदा ध्वस्ततोयदम् ।
योगाग्निदग्धक्लेशौघं योगिनामिव मानसम् ॥ १२ ॥
सूर्यांशुजनितं तापं निन्ये तारापतिः शमम् ।
अहंमानोद्भवं दुःखं विवेकः सुमहानिव ॥ १३ ॥
नभसोऽभ्रान् भुवः पङ्कान् कालुष्यं चाम्भसः शरत् ।
इन्द्रियाणीन्द्रियार्थेभ्यः प्रत्याहार इवाहरत् ॥ १४ ॥
प्राणायाम इवाम्भोभिः सरसां कृतपूरकैः ।
अभ्यस्यतेऽनुदिवसं रेचकाकुम्भकादिभिः ॥ १५ ॥

इव [illegible] ॥ ७ ॥ ८ ॥ अन्तरायहताः विघ्नाभिभूताः [illegible] ॥ ९ ॥

[illegible] ॥ १० ॥ [illegible] ॥ ११ ॥ १२ ॥ [illegible] ॥ १३ ॥ [illegible] ॥ १४ ॥ [illegible]

विमलाम्बरनक्षत्रे काले चाभ्यागते व्रजम् ।
ददर्शेन्द्रमहारम्भायोद्यतांस्तान् व्रजौकसः ॥ १६ ॥
कृष्णस्तानुत्सुकान् दृष्ट्वा गोपानुत्सवलालसान् ।
कौतूहलादिदं वाक्यं प्राह वृद्धान् महामतिः ॥ १७ ॥
कोऽयं शक्रमहो नाम येन वो हर्ष आगतः ।
प्राह तं नन्दगोपश्च पृच्छन्तमतिसादरम् ॥ १८ ॥
मेघानां पयसां चेशो देवराजः शतक्रतुः ।
तेन सञ्चोदिता मेघा वर्षन्त्यम्बुमयं रसम् ॥ १९ ॥
तद्वृष्टिजनितं शस्यं वयमन्ये च देहिनः ।
वर्त्तयामोपयुञ्जानास्तर्पयामश्च देवताः ॥ २० ॥
क्षीरवत्य इमा गावो वत्सवत्यश्च निर्वृताः ।
तेन संवर्धितैः शस्यैः पुष्टास्तुष्टा भवन्ति वै ॥ २१ ॥
नाशस्या नातृणा भूमिर्न बुभुक्षार्दितो जनः ।
दृश्यते, यत्र दृश्यन्ते वृष्टिमन्तो बलाहकाः ॥ २२ ॥

रश्मिभिः । [illegible] प्राणायामो [illegible] [illegible] पाठः [illegible] इत्येवमर्थः । ता निर्वृतबुद्ध्या [illegible] कृष्ण- [illegible] पुनर्यथाभावं [illegible] प्रत्याहि- [illegible] निःश्वासं इति प्राणायामस्य रेचकपूरकादिभिरित्यादि- [illegible] पूरका [illegible] योगशास्त्रे [illegible] । पूरकः पूरणं वायोः कुम्भकः स्थापनं [illegible] । बहिर्निःसारणं तस्य रेचकः परिकीर्तित इति ॥ १५ ॥

शक्रस्य महः पूजोत्सवः तदारम्भायोद्युक्तान् । कृष्णो ददर्श ॥ १६ ॥ [illegible] युक्तान् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ [illegible]

भौममेतत् पयो दुग्धं गोभिः सूर्य्यस्य वारिदः।
पर्जन्यः सर्वलोकस्य भवाय भुवि वर्षति ॥ २३ ॥
तस्मात् प्रावृषि राजानः सर्वे शक्रं मुदा युताः।
मखैः सुरेशमर्चन्ति वयमन्ये च मानवाः ॥ २४ ॥

पराशर उवाच।

नन्दगोपस्य वचनं श्रुत्वेत्थं शक्रपूजने।
कोपाय त्रिदशेन्द्रस्य प्राह दामोदरस्तदा ॥ २५ ॥
न वयं कृषिकर्त्तारो वाणिज्याजीविनो न च।
गावोऽस्मद्दैवतं तात वयं वनचरा यतः ॥ २६ ॥
आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथापरा।
विद्याचतुष्टयं त्वेतत् वार्त्तामात्रं शृणुष्व मे ॥ २७ ॥
कृषिर्वणिज्या तद्वच्च तृतीयं पशुपालनम्।
विद्या ह्येषा महाभाग वार्त्ता वृत्तित्रयाश्रया ॥ २८ ॥
कर्षकाणां कृषिर्वृत्तिः पण्यं विपणिजीविनाम्।
अस्माकं गौः परा वृत्तिर्वार्त्ताभेदैरियं त्रिभिः ॥ २९ ॥

[illegible] ॥ २३ ॥ [illegible] ॥ २६ ॥ [illegible] ॥ २८ ॥ [illegible] ॥ २९ ॥

विद्यया यो यया युक्तस्तस्य सा दैवतं महत्।
सैव पूज्यार्चनीया च सैव तस्योपकारिका ॥ ३० ॥
योऽन्यस्य फलमश्नन् वै पूजयत्यपरं नरः।
इह च प्रेत्य चैवासौ तात नाप्नोति शोभनम् ॥ ३१ ॥
कृष्यन्ताः प्रथिताः सीमाः सीमान्तश्च पुनर्वनम्।
वनान्ता गिरयः सर्वे ते चास्माकं परा गतिः ॥ ३२ ॥
न द्वारबन्धावरणा न गृहक्षेत्रिणस्तथा।
सुखिनः सकले लोके यथा वै चक्रचारिणः ॥ ३३ ॥
श्रूयन्ते गिरयश्चापि वनेऽस्मिन् कामरूपिणः।
तत्तद्रूपं समास्थाय रमन्ते स्वेषु सानुषु ॥ ३४ ॥

तत्र किमत आह विद्ययेति त्रयो मान्यः। अर्चनीया च सत्कारादिभिः ॥ ३० ॥ विपक्षे दोषमाह योऽन्यस्येति ॥ ३१ ॥ किञ्च नास्माकं [illegible] युक्ता [illegible] इत्यादिनाह कृष्यन्ता इति। कृषिः कर्षणीय क्षेत्र तदन्ते सीमा मर्यादा सन्धारण-प्रथिताः। सीमान्ता अन्ते च [illegible] वनानामन्ते च गिरयः। ते च गिरयोऽस्माकं [illegible] परा गतिः [illegible] ॥ ३२ ॥ तदेवाह न द्वारेति। न विद्यते द्वार-बन्धकवाटादिद्वारावरणं येषाम्। न द्वारबन्धनावरणाः [illegible] येषामिति वा [illegible] तथा [illegible] सर्वत्र [illegible] दिवति [illegible] विचरन्तः सर्वस्मिन् [illegible] सुखिनः। यथा वै चक्रचारिणः चक्रोपलक्षितेन शकटेन चरन्तो [illegible]। यदा यथा [illegible] किञ्चित् [illegible] भावः ॥ ३३ ॥

यदा चैतेऽपराध्यन्ते तेषां ये काननौकसः ।
तदा सिंहादिरूपैस्तान् घातयन्ति महीधराः ॥ ३५ ॥
गिरियज्ञस्त्वयं तस्मात् गोयज्ञश्च प्रवर्त्त्यताम् ।
किमस्माकं महेन्द्रेण गावः शैलाश्च देवताः ॥ ३६ ॥
मन्त्रयज्ञपरा विप्राः सीतायज्ञाश्च कर्षकाः ।
गिरिगोयज्ञशीलाश्च वयमद्रिवनाश्रयाः ॥ ३७ ॥
तस्माद् गोवर्धनः शैलो भवद्भिर्विविधार्हणैः ।
अर्च्यतां पूज्यतां मेध्यं पशुं हत्वा विधानतः ॥ ३८ ॥
सर्वघोषस्य सन्दोहा गृह्यन्तां मा विचार्य्यताम् ।
भोज्यन्तां तेन वै विप्रास्तथा ये चाभिवाञ्छकाः ॥ ३९ ॥
तत्रार्चिते कृते होमे भोजितेषु द्विजातिषु ।
शरत्पुष्पकृतापीडाः परिगच्छन्तु गोगणाः ॥ ४० ॥
एतन्मम मतं गोपाः ! संप्रीत्या क्रियते यदि ।
ततः कृता भवेत् प्रीतिर्गवामद्रेस्तथा मम ॥ ४१ ॥
इति तस्य वचः श्रुत्वा नन्दाद्यास्ते व्रजौकसः ।
प्रीत्युत्फुल्लमुखा विप्र ! साधु साध्वित्यथाब्रुवन् ॥ ४२ ॥

[illegible] निरयोऽपराध्यन्ते [illegible] ॥ ३५ ॥ ये काननौकस [illegible] तेषां गिरीणां वा [illegible] । [illegible] ॥ ३५ ॥ ३६ ॥ मन्त्र-[illegible] विप्रा न तु [illegible] देवताः [illegible] गिरिगोयज्ञशीलाः [illegible] गिरयो [illegible] । ३७ ॥ ३८ ॥ [illegible] गोवर्धनो [illegible] ॥ ३९ ॥

शोभनं ते मतं वत्स! यदेतद्भवतोदितम्।
तत् करिष्यामहे सर्वं गिरियज्ञः प्रवर्त्त्यताम्॥ ४३ ॥

पराशर उवाच।

तथा च कृतवन्तस्ते गिरियज्ञं व्रजौकसः।
दधिपायसमांसाद्यैर्ददुः शैलबलिं ततः॥ ४४ ॥
द्विजांश्च भोजयामासुः शतशोऽथ सहस्रशः।
अन्यानप्यागतानित्थं कृष्णो मांसं यथा पुरा॥ ४५ ॥
गावः शैलं ततश्चक्रुरर्चितास्ताः प्रदक्षिणम्।
ऋषभाश्चापि नर्दन्तः सतोया जलदा इव॥ ४६ ॥
गिरिमूर्द्धनि कृष्णोऽपि शैलोऽहमिति मूर्त्तिमान्।
बुभुजेऽन्नं बहु तदा गोपवर्य्याहृतं द्विज!॥ ४७ ॥
अन्येन कृष्णो रूपेण गोपैः सह गिरेः शिरः।
अधिरुह्यार्चयामास द्वितीयामात्मनस्तनुम्॥ ४८ ॥
अन्तर्धाने गते तस्मिन् गोपा लब्ध्वा ततो वरान्।
कृत्वा गिरिमखं गोष्ठं निजमभ्याययुः पुनः॥ ४९ ॥

परितो गच्छन्तः प्रदक्षिणीकुर्वन्तः ॥ ४४ ॥ ४५ ॥ ४६ ॥ इन्द्रोपेक्षणार्थं शैलाभिमानिदेवतारूपेणात्मानं प्रदर्श्य शैलोऽहमिति ब्रुवन् गोपवर्य्याहृतं बहु अन्नं बुभुजे ॥ ४७ ॥ गोपानां भक्त्युद्रेकार्थं स्वेन रूपेणान्येन तां मूर्त्तिं अर्चयामास ॥ ४८ ॥ ततः शैलदेवाद्रूपस्यान्तर्धाने गते तस्मिन् गोपा निजमभ्याययुः ॥ ४९ ॥

एकादशोऽध्यायः ।

पराशर उवाच ।

मखे प्रतिहते शक्रो मैत्रेयातिरुषान्वितः ।
संवर्तकं नाम गणं तोयदानामथाब्रवीत् ॥ १ ॥
भो भो मेघाः ! निशम्यैतत् वचनं वदतो मम ।
आज्ञानन्तरमेवाशु क्रियतामविचारितम् ॥ २ ॥
नन्दगोपः सुदुर्बुद्धिर्गोपैरन्यैः सहायवान् ।
कृष्णाश्रयबलाध्मातो मखभङ्गमचीकरत् ॥ ३ ॥
आजीवो यः परस्तेषां गोपत्वस्य च कारणम् ।
ता गावो वृष्टिवातेन पीड्यन्तां वचनान्मम ॥ ४ ॥
अहमप्यद्रिशृङ्गाभं तुङ्गमारुह्य वारणम् ।
साहाय्यं वः करिष्यामि वाय्वम्बूत्सर्गयोजितम् ॥ ५ ॥

पराशर उवाच ।

इत्याज्ञप्ताः सुरेन्द्रेण मुमुचुस्ते बलाहकाः ॥ ६ ॥
वातवर्षं महाभीममभावाय गवां द्विज !
ततः क्षणेन धरणी ककुभोऽम्बरमेव च ।

संवर्तकं संहारकं ॥ १ ॥ [illegible] वचः [illegible] मेघाः । आज्ञायाः अनन्तरम् अविचारितम् ॥ २ ॥ मेघा- [illegible] गोपत्वस्य कारणं ता गावः पीड्- यन्ताम् ॥ ४ ॥ [illegible] योजितं [illegible] साहाय्यं कर- [illegible] ॥ ५ ॥ अभावाय नाशाय ॥ ६ ॥ धाराभिः [illegible]

एवं धारामहासारपूरेणाभवन्मुने ! ॥ ७ ॥
विद्युल्लताकशाघातत्रस्तैरिव घनैर्घनम् ।
नादापूरितदिक्चक्रैर्धारासारमपात्यत ॥ ८ ॥
अन्धकारीकृते लोके वर्षद्भिरनिशं घनैः ।
अधश्चोर्द्ध्वं च तिर्यक् च जगदाप्यमिवाभवत् ॥ ९ ॥
गावस्तु तेन पतता वर्षवातेन वेगिना ।
धूताः प्राणान् जहुः सन्नत्रिकसक्थिशिरोधराः ॥१०॥
क्रोडेन वत्सानाक्रम्य तस्थुरन्या महामुने ! ।
गावो विवत्साश्च कृता वारिपूरेण चापराः ॥ ११ ॥
वत्साश्च दीनवदनाः पवनाकम्पिकन्धराः ।
त्राहि त्राहीत्यल्पशब्दाः कृष्णमूचुरिवार्त्तकाः ॥ १२ ॥
ततस्तद्गोकुलं सर्वं गोगोपीगोपसङ्कुलम् ।
अतीवार्त्तं हरिर्दृष्ट्वा मैत्रेयाचिन्तयत् तदा ॥ १३ ॥

[illegible] पूरेण [illegible] ॥ ७ ॥ विद्युल्लतैव कशा तया घातेन त्रस्तैरिव [illegible] घनैर्घनं निविडं यथाभवत्येवं धारासारं [illegible] वर्षमपात्यत । [illegible] ॥ ८ ॥ [illegible] ॥ ९ ॥ धूताः कम्पिताः त्रिकः कटिः सक्थि ऊरुः शिरोधरा ग्रीवा [illegible] प्राणान् जहुः [illegible] ॥ १० ॥ क्रोडेन [illegible] ॥ ११ ॥

पवनेनाकम्पिताः [illegible] ॥ १२ ॥ १३ ॥ [illegible]

एतत् कृतं महेन्द्रेण मखभङ्गविरोधिना ।
तदेतदखिलं गोष्ठं त्रातव्यमधुना मया ॥ १४ ॥
इममद्रिमहं धैर्य्यादुत्पाट्योरुशिलाघनम् ।
धारयिष्यामि गोष्ठस्य पृथुच्छत्रमिवोपरि ॥ १५ ॥

पराशर उवाच ।

इति कृत्वा मतिं कृष्णो गोवर्द्धनमहीधरम् ।
उत्पाट्यैककरेणैव धारयामास लीलया ॥ १६ ॥
गोपांश्चाह जगन्नाथः समुत्पाटितभूधरः ।
विशध्वमत्र त्वरिताः कृतं वर्षनिवारणम् ॥ १७ ॥
सुनिर्वातेषु देशेषु यथाजोषमिहास्यताम् ।
प्रविश्यतां न भेतव्यं गिरिपातस्य निर्भयैः ॥ १८ ॥
इत्युक्तास्तेन ते गोपा विविशुर्गोधनैः सह ।
शकटारोपितैर्भाण्डैर्गोप्यश्चासारपीडिताः ॥ १९ ॥
कृष्णोऽपि तं दधारैव शैलमत्यन्तनिश्चलम् ।
व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः ॥ २० ॥
गोपगोपीजनैर्हृष्टैः प्रीतिविस्फारितेक्षणैः ।
संस्तूयमानचरितः कृष्णः शैलमधारयत् ॥ २१ ॥

[illegible] यथा [illegible] स यथा-
[illegible] ॥ १४ ॥ [illegible]
[illegible] ॥ १५ ॥ १६ ॥ १७
[illegible] यथाजुषम् । [illegible]
[illegible] न भेतव्यं [illegible] ॥ १८ ॥
॥ १९ ॥ [illegible]

सप्तरात्रं महामेघा ववर्षुर्नन्दगोकुले।
इन्द्रेण चोदिता विप्र! गोपानां नाशकारिणः॥ २२॥
ततो धृते महाशैले परित्राते च गोकुले।
मिथ्याप्रतिज्ञो बलभिद् वारयामास तान् घनान्॥२३॥
व्यभ्रे नभसि देवेन्द्रे वितथात्मवचस्यथ।
निष्क्रम्य गोकुलं सर्वं स्वस्थाने पुनरागमत्॥२४॥
मुमोच कृष्णोऽपि तदा गोवर्धनमहाचलम्।
स्वस्थाने विस्मितमुखैर्दृष्टस्तैस्तु व्रजौकसैः॥ २५॥

द्वादशोऽध्यायः।

परशर उवाच।

धृते गोवर्धने शैले परित्राते च गोकुले।
रोचयामास कृष्णस्य दर्शनं पाकशासनः॥ १॥
सोऽधिरुह्य महानागमैरावतममित्रजित्।
गोवर्धनगिरौ कृष्णं ददर्श त्रिदशेश्वरः॥ २॥

पाठान्तराणि: सप्ताहोरात्रमथवा[illegible] ॥ २१ ॥ [illegible] ॥ २२ ॥ [illegible] ॥ २३ ॥ [illegible] ॥ २४ ॥ व्रजौकसैः व्रजौकोभिः ॥ २५ ॥

चारयन्तं महावीर्य्यं गावो गोपवपुर्धरम्।
कृत्स्नस्य जगतो गोपं वृतं गोपकुमारकैः॥ ३॥
गरुडञ्च ददर्शोच्चैरन्तर्धानगतं द्विज!।
कृतच्छायं हरेर्मूर्ध्नि पक्षाभ्यां पक्षिपुङ्गवम्॥ ४॥
अवरुह्य स नागेन्द्रादेकान्ते मधुसूदनम्।
शक्रः सस्मितमाहेदं प्रीतिविस्फारितेक्षणः॥ ५॥
कृष्ण कृष्ण! शृणुष्वेदं यदर्थमहमागतः
त्वत्समीपं महाभाग! नैतच्चिन्त्यं त्वयान्यथा॥ ६॥
भारावतारणार्थाय पृथिव्याः पृथिवीतलम्।
अवतीर्णोऽखिलाधारस्त्वमेव परमेश्वर!॥ ७॥
मखभङ्गविरोधेन मया गोकुलनाशकाः।
समादिष्टा महामेघास्तैश्चेदं कदनं कृतम्॥ ८॥
त्रातास्ताश्च त्वया गावः समुत्पाट्य महागिरिम्।
तेनाहं तोषितो वीर! कर्मणात्यद्भुतेन ते॥ ९॥
साधितं कृष्ण! देवानामहं मन्ये प्रयोजनम्।
त्वयायमद्रिप्रवरः करेणैकेन यद्धृतः॥ १०॥
गोभिश्च चोदितः कृष्ण! त्वत्सकाशमिहागतः।
त्वया त्राताभिरत्यर्थं युष्मत्सत्कारकारणात्॥ ११॥

गावो गाश्चारयन्तम्। गोपं गोप्तारम्॥ ३॥ ४॥ ५॥ त्वत्समीप-मागतो [illegible] [illegible] नैतद् [illegible] अन्यथा [illegible] न विचिन्त्यम्॥ ६॥ भारं [illegible] [illegible] [illegible] [illegible] [illegible] चतुर्भिः॥ ७॥ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] विवदः॥ ८॥ ९॥

स त्वां कृष्णाभिषेक्ष्यामि गवां वाक्यप्रचोदितः।
उपेन्द्रत्वे गवामिन्द्रो गोविन्दस्त्वं भविष्यसि ॥ १२ ॥
अथोपवाह्यादादाय घण्टामैरावताद् गजात्।
अभिषेकं तया चक्रे पवित्रजलपूर्णया ॥ १३ ॥
क्रियमाणेऽभिषेके तु गावः कृष्णस्य तत्क्षणात्।
प्रस्रवोद्भूतदुग्धार्द्रां सद्यश्चक्रुर्वसुन्धराम् ॥ १४ ॥
अभिषिच्य गवां वाक्याद् देवेन्द्रो वै जनार्दनम्।
प्रीत्या सप्रश्रयं कृष्णं पुनराह शचीपतिः ॥ १५ ॥
गवामेतत् कृतं वाक्यं तथान्यदपि मे शृणु।
यद् ब्रवीमि महाभाग! भारावतरणेच्छया ॥ १६ ॥
ममांशः पुरुषव्याघ्र! पृथायां पृथिवीतले।
अवतीर्णोऽर्जुनो नाम स रक्ष्यो भवता सदा ॥ १७ ॥
भारावतरणे साह्यं स ते वीरः करिष्यति।
स रक्षणीयो भवता यथात्मा मधुसूदन! ॥ १८ ॥

श्रीभगवानुवाच।

जानामि भारते वंशे जातं पार्थं तवात्मजम्।

प्रस्तुतं विज्ञापयति गोभिरिति। गोभिरस्माभिः कामधेनुभिरन्यथा तत्-पालितत्वात् प्रीताभिः ॥ ११ ॥ उपेन्द्रत्वे इन्द्रस्योपरि स्थितलोकेन्द्रत्वं तथाचेन्द्रवाक्यं हरिवंशे। ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वर। उपेन्द्र इति कृष्ण त्वां गास्यन्ति दिवि देवता इति। अतो गवामिन्द्र इति विज्ञप्त्या गोविन्दश्च त्वं भविष्यसि ॥ १२ ॥ उपवाह्यात् राज-वाहनात् ॥ १३ ॥ प्रस्रवः स्तन्योद्गमः तेनोद्भूतं यद् दुग्धं तेना-र्द्राम् ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

तमहं पालयिष्यामि यावदस्मि महीतले ॥ १९ ॥

यावन् महीतले शक्र! स्थास्याम्यहमरिन्दम ।

न तावदर्जुनं कश्चिद् देवेन्द्र! युधि जेष्यति ॥ २० ॥

कंसो नाम महाबाहुर्दैत्योऽरिष्टस्तथापरः ।

केशी कुवलयापीडो नरकाद्यास्तथापरे ॥ २१ ॥

हतेष्वेतेषु देवेन्द्र! भविष्यति महाहवः ।

तत्र विद्धि सहस्राक्ष! भारावतरणं कृतम् ॥ २२ ॥

स त्वं गच्छ न पुत्रार्थे सन्तापं कर्त्तुमर्हसि ।

नार्जुनस्य रिपुः कश्चिन्ममाग्रे प्रभविष्यति ॥ २३ ॥

अर्ज्जुनार्थे त्वहं सर्वान् युधिष्ठिरपुरोगमान् ।

निवृत्ते भारते युद्धे कुन्त्यै दास्याम्यविक्षतान् ॥ २४ ॥

पराशर उवाच ।

इत्युक्तः संपरिष्वज्य देवराजो जनार्दनम् ।

आरुह्यैरावतं नागं पुनरेव दिवं ययौ ॥ २५ ॥

कृष्णोऽपि सहितो गोभिर्गोपालैश्च पुनर्व्रजम् ।

आजगामाथ गोपीनां दृष्टिपूतेन वर्त्मना ॥ २६ ॥

तमहं पालयामि न च यथाऽस्य अन्यः तथा संरक्षणीयः ॥ १८ ॥ १९ ॥ यावत् भोक्ष्यामि भूतले इति यदुः पाण्डवानां रक्षणार्थमीश्वरः पराशर उवाच ॥ २० ॥ २१ ॥ भाराक्षतो भारतयुद्धम् ॥ २२ ॥ २३ ॥ अविक्षतान् अक्षतशरीरान् ॥ २४ ॥ २५ ॥ अत्युत्कण्ठितहृदयेन गोपीभिः सानन्दमवलोकितानां दृष्टिपूतेन वर्त्मनेत्युक्तम् । यद्वा दृष्टिपूतं न्यसेत् पादमिति न्यायात् ॥ २६ ॥

त्रयोदशोऽध्यायः।

पराशर उवाच।

गते शक्रे तु गोपालाः कृष्णमक्लिष्टकारिणम्।
ऊचुः प्रीत्या धृतं दृष्ट्वा तेन गोवर्धनाचलम्॥ १॥
वयमस्मान्महाभाग! भवता महतो भयात्।
गावश्च भवता त्राता गिरिधारणकर्मणा॥ २॥
बालक्रीडेयमतुला गोपालत्वं जुगुप्सितम्।
दिव्यञ्च कर्म भवतः किमेतत्? तात! कथ्यताम्॥ ३॥
कालियो दमितस्तोये प्रलम्बो विनिपातितः।
धृतो गोवर्धनश्चायं शङ्कितानि मनांसि नः॥ ४॥
सत्यं सत्यं हरेः पादौ शपामोऽमितविक्रम!।
यथा त्वद्वीर्यमालोक्य न त्वां मन्यामहे नरम्॥ ५॥
प्रीतिः सस्त्रीकुमारस्य व्रजस्य तव केशव!।
कर्म चेदमशक्यं यत् समस्तैस्त्रिदशैरपि॥ ६॥
बालत्वं चातिवीर्यञ्च जन्म चास्मास्वशोभनम्।
चिन्त्यमानममेयात्मन्! शङ्कां कृष्ण! प्रयच्छति॥ ७॥

कृष्णं [illegible] गोपाला [illegible] । इति श्लोकार्द्ध-
[illegible] । [illegible] तस्मिन् [illegible]
॥ १ ॥ २ ॥ बालक्रीडेयं पूतनाशकटोच्चाटनादि दिव्यञ्च [illegible]
कर्म ॥ ३ ॥ तदेवाह कालिय इति प्रलम्बो विनिपातित इति । कृष्णा-
[illegible]नैव रामेण विपातितत्वात् कृष्णेनैव निपातित इत्युच्यते ॥ ४ ॥

देवो वा दानवो वा त्वं यक्षो गन्धर्व एव वा ।
किमस्माकं विचारेण बान्धवोऽसि नमोऽस्तु ते ॥ ८ ॥

पराशर उवाच ।

क्षणं भूत्वा त्वसौ तूष्णीं किञ्चित् प्रणयकोपवान् ।
इत्येवमुक्तस्तैर्गोपैः कृष्णोऽप्याह महामुने ॥ ९ ॥

श्रीभगवानुवाच ।

मत्सम्बन्धेन भो गोपा यदि लज्जा न जायते ।
श्लाघ्यो वाहं ततः किं वो विचारेण प्रयोजनम् ॥ १० ॥
यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि ।
तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि ॥ ११ ॥
नाहं देवो न गन्धर्वो न यक्षो न च दानवः ।
अहं वो बान्धवो जातो नास्ति चिन्त्यमतोऽन्यथा ॥ १२ ॥

पराशर उवाच ।

इति श्रुत्वा हरेर्वाक्यं बद्धमौनास्ततो वनम् ।
ययुर्गोपा महाभाग तस्मिन् प्रणयकोपिनि ॥ १३ ॥

पादौ पादाभ्यां चचार ॥ ६ ॥ [illegible] त्वत् प्रीतिः [illegible] करोतीति भाव इत्थं चेदम् ॥ ६ । ७ । ८ । ९ ॥

[illegible] ॥ १० ॥ [illegible] परमेश्वरः [illegible] क्रियताम् ॥ ११ ॥ अथवा [illegible] देवो गन्धर्वो वा [illegible] बान्धवो जातोऽस्मि [illegible] ॥ १२ ॥ [illegible]

कृष्णस्तु विमलं व्योम शरच्चन्द्रस्य चन्द्रिकाम् ।
तथा कुमुदिनीं फुल्लामामोदितदिगन्तराम् ॥ १४ ॥
वनराजिं तथा कूजद्भृङ्गमालां मनोरमाम् ।
विलोक्य सह गोपीभिर्मनश्चक्रे रतिं प्रति ॥ १५ ॥
सह रामेण मधुरमतीव वनिताप्रियम् ।
जगौ कलपदं सौरिर्नानातन्त्रीकृतव्रतम् ॥ १६ ॥
रम्यं गीतध्वनिं श्रुत्वा सन्त्यज्यावसथांस्तदा ।
आजग्मुस्त्वरिता गोप्यो यत्रास्ते मधुसूदनः ॥ १७ ॥
शनैः शनैर्जगौ गोपी काचित् तस्य लयानुगम् ।
दत्तावधाना काचित् तु तमेव मनसा स्मरन् ॥ १८ ॥
काचित् कृष्णेति कृष्णेति प्रोक्त्वा लज्जामुपागता ।
ययौ च काचित् प्रेमान्धा तत्पार्श्वमविलज्जिता ॥ १९ ॥
काचिदावसथस्यान्तः स्थिता दृष्ट्वा बहिर्गुरुम् ।

गोपीं [illegible] [illegible] सह रामेणेति कलपदं अव्यक्तमधुराक्षरं नानातन्त्रीभिः कृतं व्रतं मार्गनियतिर्यस्मिन् नाना [illegible] पाठे तु [illegible] [illegible] तारमन्द्र [illegible] इति पाठे तारमन्द्राभ्यां [illegible] ततः क्रमो [illegible] इत्यर्थः ॥ १६ ॥ आवसथान् गृहान् ॥ १७ ॥ लयान् [illegible] [illegible] जगौ तदुक्तं [illegible] इति ॥ १८ ॥ १९ ॥

काचिद् गोपवनिता आवसथस्यान्तः स्थिता बहिर्गुरुं [illegible] [illegible] गोविन्दं दध्यौ तन्मय । तत् [illegible] भोगेन क्षीणपुण्यपापा [illegible] [illegible] [illegible] परब्रह्म [illegible] चिन्तयन्ती निरुच्छ्वासतया मुक्ता एव [illegible] गता ।

तन्मयत्वेन गोविन्दं दध्यौ मीलितलोचना ॥ २० ॥
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ।
तदप्राप्तिमहादुःखविलीनाशेषपातका ॥ २१ ॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥ २२ ॥
गोपीपरिवृतो रात्रिं शरच्चन्द्रमनोरमाम् ।
मानयामास गोविन्दो रासारम्भरसोत्सुकः ॥ २३ ॥
गोप्यश्च वृन्दशः कृष्णचेष्टास्वायत्तमूर्तयः ।
अन्यदेशं गते कृष्णे चेरुर्वृन्दावनान्तरम् ॥ २४ ॥
कृष्णे निरुद्धहृदया इदमूचुः परस्परम् ।
कृष्णोऽहमेतल्ललितं व्रजाम्यालोक्यतां गतिः ।
अन्या ब्रवीति कृष्णस्य मम गीतिर्निशाम्यताम् ॥ २५ ॥

[illegible] ॥ २० ॥ [illegible] ॥ २१ ॥ [illegible] ॥ २२ ॥ रासक्रीडारम्भे रसो रासः [illegible] रासो नाम । यथाह भरत । [illegible] ॥ २३ ॥ अन्यदेशं गते कृष्णे सति [illegible] ॥ २४ ॥

दुष्ट कालिय ! तिष्ठात्र कृष्णोऽहमिति चापरा ।
बाहुमास्फोट्य कृष्णस्य लीलासर्वस्वमाददे ॥ २६ ॥
अन्या ब्रवीति भो गोपा ! निःशङ्कैः स्थीयतामिह ।
अलं वृष्टिभयेनात्र धृतो गोवर्धनो मया ॥ २७ ॥
धेनुकोऽयं मया क्षिप्तो विचरन्तु यथेच्छया ।
गोपी ब्रवीति वै चान्या कृष्णलीलानुकारिणी ॥ २८ ॥
एवं नानाप्रकारासु कृष्णचेष्टासु तास्तदा ।
गोप्यो व्यग्राः समञ्चेरूरम्यं वृन्दावनं वनम् ॥ २९ ॥
विलोक्यैका भुवं प्राह गोपी गोपवराङ्गना ।
पुलकाञ्चितसर्वाङ्गी विकासिनयनोत्पला ॥ ३० ॥
ध्वजवज्राङ्कुशाब्जाङ्करेखावन्त्यालि ! पश्यत ।
पदान्येतानि कृष्णस्य लीलालङ्कृतगामिनः ॥ ३१ ॥
कापि तेन समं याता कृतपुण्या मदालसा ।
पदानि तस्याश्चैतानि घनान्यल्पतनूनि च ॥ ३२ ॥

कृष्णचेष्टा एवाह कृष्णोऽहमिति पञ्चभिः । यत् कृष्णमन्वच्छत तन्न इतः समायातः । यतोऽहमेव कृष्ण इति ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ व्यग्रा अनुकुर्वाः ॥ २९ ॥

अन्वेषणप्रकारमाह विलोक्येति द्वाभ्याम् । पुलकैराञ्चितं व्याप्तं सर्वमङ्गं यस्याः सा ॥ ३० ॥ ध्वजवज्राङ्कुशाब्जाङ्करेखावन्ति ध्वजादि-लक्षणया रेखायुक्तानि पदानि । हे आलि सखि ! बहुश्चनाटैः चैतन्यघनं लीलयालङ्कृतं यथा भवत्येवं गमनशीलस्य ॥ ३१ ॥ घनानि मध्यमेनिमग्नाङ्गुल्यग्राणि अल्पतनूनि अङ्गुलीपर्वाणि पदानि स्त्री-चरणे चिह्नानि ॥ ३२ ॥ अत्र अन्वीक्ष्य स्थित्वा पुष्पावचयं चक्रे तत्र विद्धं ज्ञेयेति । अतोऽत्रैव पदद्वयेऽप्यङ्गुलिमात्रम् दृश्यते इत्याह

पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम्।
येनाग्राक्रान्तिमात्राणि पदान्यत्र महात्मनः॥ ३३॥
अत्रोपविश्य सा तेन कापि पुष्पैरलङ्कृता।
अन्यजन्मनि सर्वात्मा विष्णुरभ्यर्चितो यया॥ ३४॥
पुष्पबन्धनसम्मानकृतमानामपास्य ताम्।
नन्दगोपसुतो यातो मार्गेणानेन पश्यत॥ ३५॥
अनुयातैनमत्रान्या नितम्बभरमन्थरा।
या गन्तव्ये द्रुतं याति निम्नपादाग्रसंस्थितिः॥ ३६॥
हस्तन्यस्ताग्रहस्तेयं तेन याति तथा सखि।
अनायत्तपदन्यासा लक्ष्यते पदपद्धतिः॥ ३७॥
हस्तसंस्पर्शमात्रेण धूर्तेनैषा विमानिता।
नैराश्यमन्दगामिन्या निवृत्तं लक्ष्यते पदम्॥ ३८॥

[illegible] सखि ॥ ३३ ॥ अन्यजन्मनि पुष्पैरर्चितः [illegible] । अत्रोप-
विश्येति ॥ ३४ ॥

पुष्पबन्धनच्छेदेन सम्मानेन कृतो मानो गर्वो यया ताम् ॥ ३५ ॥
तत्र पुरतोऽवस्थिताः पदानि दृष्ट्वा अन्यदर्शितानि अनुयातेति नितम्बभरेण
मन्थरा [illegible] वा [illegible] गन्तव्ये गमने [illegible] द्रुतं
[illegible] तत्र निम्नं [illegible] पादाग्रैः संस्थितैरङ्कैः [illegible] ॥ ३६ ॥ [illegible]
[illegible] तेन [illegible] याति । [illegible]
[illegible] पदन्यासो [illegible] पदपद्धति-
[illegible] ॥ ३७ ॥

[illegible] धूर्तेन [illegible] विमानिता
[illegible] । तत्र [illegible] नैराश्यमन्दगामिन्याः निराशतया [illegible]
[illegible] निवृत्तं प्रतिगमनं पदं च [illegible] ॥ ३८ ॥ [illegible] ।

नूनमुक्ता त्वरामीति पुनरेष्यामि तेऽन्तिकम्।
तेन कृष्णेन येनैषा त्वरिता पदपद्धतिः॥ ३८ ॥
प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते।
निवर्तध्वं शशाङ्कस्य नैतद्दीधितिगोचरे॥ ४० ॥
निवृत्तास्तास्ततो गोप्यो निराशाः कृष्णदर्शने।
यमुनातीरमागत्य जगुस्तच्चरितं तदा॥ ४१ ॥
ततो ददृशुरायान्तं विकासिमुखपङ्कजम्।
गोप्यस्त्रैलोक्यगोप्तारं कृष्णमक्लिष्टचेष्टितम्॥ ४२ ॥
काचिदालोक्य गोविन्दमायान्तमतिहर्षिता।
कृष्ण! कृष्णेति कृष्णेति प्राह नान्यदुदैरयत्॥ ४३ ॥
काचिद्भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिम्।
विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपङ्कजम्॥ ४४ ॥
काचिदालोक्य गोविन्दं निमीलितविलोचना।

त्वमत्रैव तिष्ठ इतः कश्चिद्दूरमस्ति तं कुसुमस्तबकमानेष्यामि शीघ्रं पुनस्त्वदन्तिकमागमिष्यामीति नूनमिव तेनोक्ता। तेन किल येनैषा कृष्णस्य पदानां पद्धतिः पङ्क्तिः त्वरिता शीघ्रा निम्नापि लक्ष्यते ॥ ३९ ॥ कृष्णान्वेषणाद्गोपीर्निवर्तयितुमाह प्रविष्ट इति द्वाभ्याम्। गहनं निविडं दुर्गमं वनं प्रविष्टः अत एव शशाङ्करश्मिप्रवेशाभावात् तस्य पदमत्र न लक्ष्यते ॥ ४० ॥ ततो निवृत्ताः सत्यो यमुनातीरं प्राप्य तद्गुणगानं गोपिकास्तत्र कृष्णोपलब्धये तच्चरितं जगुः ॥४१॥

अपेक्षमाणानयाकाङ्क्षे ततः कृष्णं तासां तद्दर्शनोत्सवमाह तत इति चतुर्भिः ॥ ४२ ॥ ४३ ॥ काचिदिति भ्रूभङ्गुरमिति। प्रणयकोपेन वक्रिताभ्यां भ्रूभ्यां भङ्गुरम् आकुञ्चितं ललाटफलकं कृत्वा हरिं विलोक्य नेत्रभृङ्गाभ्यां भृङ्गाभ्यां तस्य मुखपङ्कजं पपौ ॥ ४४ ॥ काचिद् गोविन्द-

तस्यैव रूपं ध्यायन्ती योगारूढेव चाबभौ ॥ ४५ ॥
ततः काश्चित् प्रियालापैः काश्चित् भ्रूभङ्गवीक्षणैः ।
निन्येऽनुनयमन्याश्च करस्पर्शेन माधवः ॥ ४६ ॥
ताभिः प्रसन्नचित्ताभिर्गोपीभिः सह सादरम् ।
ररास रासगोष्ठीभिरुदारचरितो हरिः ॥ ४७ ॥
रासमण्डलबन्धोऽपि कृष्णपार्श्वमनुज्झता ।
गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥ ४८ ॥
हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलम् ।
चकार तत्करस्पर्शनिमीलितदृशं हरिः ॥ ४९ ॥

[illegible] ॥ ४५ ॥

[illegible] ततः [illegible] ॥ ४६ ॥ ४७ ॥

[illegible] ॥ ४८ ॥

[illegible] ॥ ४९ ॥

[illegible]

ततः स ववृते रासश्चलद्वलयनिस्वनः ।
अनुयातशरत्काव्यगेयगीतिरनुक्रमात् ॥ ५० ॥
कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् ।
जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः ॥ ५१ ॥
परिवृत्तश्रमेणैका चलद्वलयलापिनीम् ।
ददौ बाहुलतां स्कन्धे गोपी मधुनिघातिनः ॥ ५२ ॥
काचित् प्रविलसद्बाहुः परिरभ्य चुचुम्ब तम् ।
गोपी गीतस्तुतिव्याजनिपुणा मधुसूदनम् ॥ ५३ ॥
गोपीकपोलसंश्लेषम् अभिपत्य हरेर्भुजौ ।
पुलकोद्गमशस्याय स्वेदाम्बुघनतां गतौ ॥ ५४ ॥
रासगेयं जगौ कृष्णो यावत् तारतरध्वनिः ।
साधु कृष्णेति कृष्णेति तावत् ता द्विगुणं जगुः ॥ ५५ ॥
गते तु गमनं चक्रुर्वलने संमुखं ययुः ।
प्रतिलोमानुलोमाभ्यां भेजुर्गोपाङ्गना हरिम् ॥ ५६ ॥
स तथा सह गोपीभी रराम मधुसूदनः ।
यथाब्दकोटिप्रमितः क्षणस्तेन विनाभवत् ॥ ५७ ॥
ता वार्य्यमाणाः पतिभिः पितृभिर्भ्रातृभिस्तथा ।
कृष्णं गोपाङ्गना रात्रौ रमयन्ति रतिप्रियाः ॥ ५८ ॥

या अनुयाता अनुसृता यस्मिन् स रासः प्रवृत्तः ॥ ५० ॥ एतदेवाह कृष्णः शरच्चन्द्रमसमिति ॥ ५१ ॥ चलद्भिर्वलयैरालापिनी सस्वरा ॥ ५२ ॥ पुलकोद्गम एव शस्यं तदर्थं स्वेदरूपाम्बुनो घनतां मेघभावं गतौ परिरभ्य गोप्या हि परिभुजचुम्बने क्रियमाणे हरेर्भुजयोः स्वेदः गोप्याः कपोलयोः रोमोद्गमं चक्रुरित्यन्योन्यानुरागोक्तिः ॥ ५४ ॥ ५५ ॥ गमने आवर्त्ते प्रतिलोमानुलोमाभ्यामिति गमने अनुलोमगमनम् वलने च

सोऽपि कैशोरकवयो मानयन् मधुसूदनः ।
रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः ॥ ५८ ॥
तद्भर्तृषु तथा तासु सर्वभूतेषु चेश्वरः ।
आत्मस्वरूपरूपोऽसौ व्याप्य वायुरिव स्थितः ॥ ६० ॥
यथा समस्तभूतेषु नभोऽग्निः पृथिवी जलम् ।
वायुश्चात्मा तथैवासौ व्याप्य सर्वमवस्थितः ॥ ६१ ॥

चतुर्दशोऽध्यायः ।

पराशर उवाच ।

प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने ।
त्रासयन् समदो गोष्ठमरिष्टः समुपागतः ॥ १ ॥
सतोयतोयदच्छायस्तीक्ष्णशृङ्गोऽर्कलोचनः ।
खुराग्रपातैरत्यर्थं दारयन् धरणीतलम् ॥ २ ॥

[illegible] ॥ ५६ ॥ ५७ ॥ ५८ ॥ कैशोरकं [illegible] वयो मानयन् [illegible] ॥ ५९ ॥ [illegible] ॥ ६० ॥ [illegible] ॥ ६१ ॥



प्रदोषार्द्धे प्रथमयामार्द्धे अरिष्टो नाम वृषभाकृतिर्दैत्यः समदो गोष्ठं त्रासयन् समुपागतः ॥ १ ॥ सतोयतोयदवत् कृष्णः ॥ २ ॥ खुरि-

लेलिहानः सनिष्पेषं जिह्वयौष्ठौ पुनः पुनः ।
संरम्भाविद्धलाङ्गूलः कठिनस्कन्धबन्धनः ॥ ३ ॥
उदग्रककुदाभोगः प्रमाणाद्दुरतिक्रमः ।
विण्मूत्रलिप्तपृष्ठाङ्गो गवामुद्वेगकारकः ॥ ४ ॥
प्रलम्बकण्ठोऽतिमुखस्तरुघाताङ्किताननः ।
पातयन् स गवां गर्भान् दैत्यो वृषभरूपधृक् ।
सूदयंस्तापसानुग्रो वनान्यटति यः सदा ॥ ५ ॥
ततस्तमतिघोराक्षमवेक्ष्यातिभयातुराः ।
गोपा गोपस्त्रियश्चैव कृष्ण कृष्णेति चुक्रुशुः ॥ ६ ॥
सिंहनादं ततश्चक्रे तलशब्दञ्च केशवः ।
तच्छब्दश्रवणाच्चासौ गोविन्दाभिमुखं ययौ ॥ ७ ॥
अग्रन्यस्तविषाणाग्रः कृष्णकुक्षिकृतेक्षणः ।
अभ्यधावत दुष्टात्मा कृष्णं वृषभदानवः ॥ ८ ॥
आयान्तं दैत्यवृषभं दृष्ट्वा कृष्णो महाबलः ।
न चचाल ततः स्थानादवज्ञास्मितलीलया ॥ ९ ॥
आसन्नं चैव जग्राह ग्राहवन्मधुसूदनः ।
जघान जानुना कुक्षौ विषाणग्रहणाचलम् ॥ १० ॥

सपेषं सघट्टनं यथा भवत्येवमोष्ठौ जिह्वया लेलिहानः । संरम्भात् आविद्धमुद्धमितं लाङ्गूलं येन कठिनं स्कन्धबन्धनं यस्य ॥ ३ ॥ उदग्रः उच्छ्रितस्तस्य ककुदो गलपृष्ठस्कन्धस्याभोगो विस्तारो यस्य सः उच्चतरप्रमाणाद्देहाद् दुरतिक्रमः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ अग्रे पुरतो न्यस्ते विषाणाग्रे येन । कृष्णस्य कुक्षौ कृतमीक्षणं येन ॥ ८ ॥ अवज्ञया स्मितं सैव लीला तया ॥ ९ ॥ विषाणग्रहणादचलं स्थिरं सन्तं जघान ॥ १० ॥

तस्य दर्पबलं भङ्क्त्वा गृहीतस्य विषाणयोः ।
आपीडयदरिष्टस्य कण्ठं क्लिन्नमिवाम्बरम् ॥ ११ ॥
उत्पाट्य शृङ्गमेकञ्च तेनैवाताडयत् ततः ।
ममार स महादैत्यो मुखाच्छोणितमुद्वमन् ॥ १२ ॥
तुष्टुवुर्निहते तस्मिन् दैत्ये गोपा जनार्दनम् ।
जम्भे हते सहस्राक्षं पुरा देवगणा यथा ॥ १३ ॥



पञ्चदशोऽध्यायः ।

पराशर उवाच ।

ककुद्मिनि हतेऽरिष्टे धेनुके विनिपातिते ।
प्रलम्बे निहते वीरे धृते गोवर्द्धनाचले ॥ १ ॥
दमिते कालिये नागे भग्ने तुङ्गद्रुमद्वये ।
हतायां पूतनायाञ्च शकटे परिवर्त्तिते ॥ २ ॥
कंसाय नारदः प्राह यथावृत्तमनुक्रमात् ।
यशोदादेवकीगर्भपरिवर्त्ताद्यशेषतः ॥ ३ ॥
श्रुत्वा तत् सकलं कंसो नारदाद्देवदर्शनात् ।
वसुदेवं प्रति तदा कोपं चक्रे सुदुर्मतिः ॥ ४ ॥
सोऽतिकोपादुपालभ्य सर्वयादवसंसदि ।

[illegible] ॥ ११ ॥ [illegible] परिवर्त्तादि ॥ ३ ॥ ४ ॥ वसुदेव-

जगर्हे यादवांश्चैव कार्य्यञ्चैतदचिन्तयत् ॥ ५ ॥
यावन्न बलमारूढौ रामकृष्णौ सुबालकौ ।
तावदेव मया वध्यावसाध्यावूढयौवनौ ॥ ६ ॥
चाणूरोऽत्र महावीर्य्यो मुष्टिकश्च महाबलः ।
एताभ्यां मल्लयुद्धेन घातयिष्यामि दुर्मदौ ॥ ७ ॥
धनुर्महमहायागव्याजेनानीय तौ व्रजात् ।
तथा तथा यतिष्यामि यास्येते संक्षयं यथा ॥ ८ ॥
श्वफल्कतनयं सोऽहमक्रूरं यदुपुङ्गवम् ।
तयोरानयनार्थाय प्रेषयिष्यामि गोकुलम् ॥ ९ ॥
वृन्दावनचरं घोरमादेक्ष्यामि च केशिनम् ।
तत्रैवासावतिबलस्तावुभौ घातयिष्यति ॥ १० ॥
गजः कुवलयापीडो मत्समीपमुपागतौ ।
घातयिष्यति वा गोपौ वसुदेवसुतावुभौ ॥ ११ ॥

पराशर उवाच ।

इत्यालोच्य स दुष्टात्मा कंसो रामजनार्दनौ ।
हन्तुं कृतमतिर्वीरमक्रूरं वाक्यमब्रवीत् ॥ १२ ॥

कंस उवाच ।

भो भो दानपते ! वाक्यं क्रियतां प्रीतये मम ।
इतः स्यन्दनमारुह्य गम्यतां नन्दगोकुलम् ॥ १३ ॥
वसुदेवसुतौ तत्र विष्णोरंशसमुद्भवौ ।
नाशाय किल सम्भूतौ मम दुष्टौ प्रवर्धतः ॥ १४ ॥

सुपांसुत्व निर्भर्त्सनं जगच्च निन्दितवान् ॥ ५ ॥ कंसस्य मनोरथप्रकार-माह यावदिति सप्तभिः ॥ ७ ॥ स्वाभिप्रायं निवेदयन् कंसोऽक्रूरं नादि-शति भो भो इत्यादिद्वयेन ॥ ११ ॥ प्रवर्धतः प्रवर्धमानौ वर्तेते ॥ १४ ॥

धनुर्महो ममाप्यत्र चतुर्दश्यां भविष्यति ।
आनेयौ भवता गत्वा मल्लयुद्धाय तावुभौ ॥ १५ ॥
चाणूरमुष्टिकौ मल्लौ नियुद्धकुशलौ मम ।
ताभ्यां सहानयोर्युद्धं सर्वलोकोऽत्र पश्यतु ॥ १६ ॥
नागः कुवलयापीडो महामात्रप्रचोदितः ।
स वा निहंस्यते पापौ वसुदेवात्मजौ शिशू ॥ १७ ॥
तौ हत्वा वसुदेवञ्च नन्दगोपञ्च दुर्मतिम् ।
हनिष्ये पितरं चैनमुग्रसेनं सुदुर्मतिम् ॥ १८ ॥
ततः समस्तगोपानां गोधनान्यखिलान्यहम् ।
वित्तं चापि हरिष्यामि दुष्टानां मद्वधैषिणाम् ॥ १९ ॥
त्वामृते यादवाश्चैते दुष्टा दानपते मयि ।
एतेषाञ्च वधायाहं प्रयतिष्याम्यनुक्रमात् ॥ २० ॥
ततो निष्कण्टकं सर्वं राज्यमेतदयादवम् ।
प्रशासिष्ये त्वया तस्मान्मत्प्रीत्या वीर गम्यताम् ॥ २१ ॥
यथा च माहिषं सर्पिर्दधि चाप्युपहार्य्य वै ।
गोपाः समानयन्त्याशु त्वया वाच्यास्तथा तथा ॥ २२ ॥

पराशर उवाच ।

इत्याज्ञप्तस्तदाक्रूरो महाभागवतो द्विज ।
प्रीतिमानभवत् कृष्णं श्वो द्रक्ष्यामीति सत्वरः ॥ २३ ॥
तथेत्युक्त्वा च राजानं रथमारुह्य शोभनम् ।
निश्चक्राम ततः पुर्य्या मथुराया मधुप्रियः ॥ २४ ॥

नियुद्धकुशलौ बाहुयुद्धाभिज्ञौ ॥ १५ ॥ १६ ॥ महामात्रो हस्तिपकस्तेन प्रचोदितः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ उपहार्य्यम् उपहारणीयम् ॥ २२ ॥ मधुप्रियः मधोर्वंश्यानां प्रियः ॥ २४ ॥

षोडशोऽध्यायः ।

पराशर उवाच ।

केशी चापि बलोदग्रः कंसदूतप्रचोदितः ।
कृष्णस्य निधनाकाङ्क्षी वृन्दावनमुपागमत् ॥ १ ॥
स खुरक्षतभूपृष्ठः सटाक्षेपधुताम्बुदः ।
द्रुतविक्रान्तचन्द्रार्कमार्गो गोपानुपाद्रवत् ॥ २ ॥
तस्य हेषितशब्देन गोपाला दैत्यवाजिनः ।
गोप्यश्च भयसंविग्ना गोविन्दं शरणं ययुः ॥ ३ ॥
त्राहि त्राहीति गोविन्दः श्रुत्वा तेषां ततो वचः ।
सतोयजलदध्वानगम्भीरमिदमुक्तवान् ॥ ४ ॥

श्रीकृष्ण उवाच ।

अलं त्रासेन गोपालाः केशिनः किं भयातुरैः ।
भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते ॥ ५ ॥

बलोदग्रः बलेनोद्धतः कंसस्य दूतेन तस्याज्ञया प्रचोदितः । न तु बलेनाहूय स्वयं प्रेषितः तस्य कार्यत्वादस्यार्थस्य तावद् विलम्बा-सहनात् ॥ १ ॥ खुरैः क्षतं भूपृष्ठं येन सटानां केशराणां क्षेपेण धूननेन धुता विचालिता अम्बुदा येन । द्रुतेन प्लवनेन विक्रान्तौ विलङ्घितौ चन्द्रार्कमार्गौ येन ॥ २ ॥ ३ ॥ सतोयस्य जलदस्य ध्वानो नादस्तद्वद् गम्भीरं यथा भवत्येवमुक्तवान् ॥ ४ ॥

किं वीरवीर्यं विलोप्यत इति । यदा स्वामिनि सन्निहितेऽपि परिजनो भयातुरः स्यात्तदासौ स्वामी मन्दवीर्य इत्यन्येषां बुद्धिः स्यात् । अतो मदीयैर्भवद्भिर्भीरुतया मम वीर्यस्य वीर्यलोपः क्रियत इति किमित्यर्थः ॥ ५ ॥ हेषितमेवाटोपस्तत्कारिणा दैत्येन बलात् पातेन

किमनेनाल्पसारेण हेषिताटोपकारिणा ।
दैतेयबलवाह्येन वल्गता दुष्टवाजिना ॥ ६ ॥
एह्येहि दुष्ट कृष्णोऽहं पूष्णस्त्विव पिनाकधृक् ।
पातयिष्यामि दशनान् वदनादखिलांस्तव ॥ ७ ॥
इत्युक्त्वास्फोट्य गोविन्दः केशिनः संमुखं ययौ ।
विवृतास्यश्च सोऽप्येनं दैतेयाश्व उपाद्रवत् ॥ ८ ॥
बाहुमाभोगिनं कृत्वा मुखे तस्य जनार्दनः ।
प्रवेशयामास तदा केशिनो दुष्टवाजिनः ॥ ९ ॥
केशिनो वदने तेन विशता कृष्णबाहुना ।
शातिता दशनाः पेतुः सिताभ्रावयवा इव ॥ १० ॥
कृष्णस्य ववृधे बाहुः केशिदेहगतो द्विज ।
विनाशाय यथा व्याधिरासम्भूतेरुपेक्षितः ॥ ११ ॥
विपाटितोष्ठो बहुलं सफेनं रुधिरं वमन् ।
सोऽक्षिणी विवृते चक्रे निःसृते मुक्तबन्धने ॥ १२ ॥
जघान धरणीं पादैः शकृन्मूत्रं समुत्सृजन् ।
स्वेदार्द्रगात्रः श्रान्तश्च निर्यत्नः सोऽभवत् ततः ॥ १३ ॥

दैतेयेति [illegible] दैत्यबल[illegible] [illegible] ॥ ६ ॥ [illegible] पूष्णो- [illegible] ॥ ७ ॥ ८ ॥

आभोगिनं विस्तारितम् ॥ ९ ॥ शातिता पातिता ॥ १० ॥ आसम्भूतेरुत्पत्तेरारभ्योपेक्षितः ॥ ११ ॥ ॥ १२ ॥ ॥ १३ ॥ [illegible]

व्यादितास्यो महारौद्रः सोऽसुरः कृष्णबाहुना।
निपपात द्विधाभूतो वैद्युतेन द्रुमो यथा॥ १४ ॥
द्विपादपृष्ठपुच्छार्द्धश्रवणैकाक्षिनासिके।
केशिनस्ते द्विधाभूते शकले द्वे विरेजतुः॥ १५ ॥
हत्वा तु केशिनं कृष्णो गोपालैर्मुदितैर्वृतः।
अनायस्ततनुः स्वस्थो हसंस्तत्रैव तस्थिवान्॥ १६ ॥
ततो गोप्यश्च गोपाश्च हते केशिनि विस्मिताः।
तुष्टुवुः पुण्डरीकाक्षमनुरागमनोरमम्॥ १७ ॥
अथाहान्तरितो विप्रो नारदो जलदे स्थितः।
केशिनं निहतं दृष्ट्वा हर्षनिर्भरमानसः॥ १८ ॥
साधु साधु जगन्नाथ। लीलयैव यदच्युत।
निहतोऽयं त्वया केशी क्लेशदस्त्रिदिवौकसाम्॥ १९ ॥
युद्धोत्सुकोऽहमत्यर्थं नरवाजिमहाहवम्।
अभूतपूर्वमन्यत्र द्रष्टुं स्वर्गादुपागतः॥ २० ॥
सुकर्माण्यत्रावतारे ते कृतानि मधुसूदन।
यानि तैर्विस्मितं चेतस्तोषमेतेन मे गतम्॥ २१ ॥
तुरङ्गस्यास्य शक्रोऽपि कृष्ण! देवाश्च बिभ्यति।
धुतकेसरजालस्य ह्रेषतोऽभ्रावलोकिनः॥ २२ ॥

विदलनभाक्त्वं वज्र वैद्युतेन अशनिना ॥ १४ ॥ द्वौ द्वौ पादौ ययो पृष्ठपुच्छे च अर्धश्रवणे ययोः। एकचक्षुः अवयवपदात् प्रत्येकं तेन एकैकाः अक्षिनासिका ययोस्ते च तयोस्ते ॥ १५ ॥ १६ ॥ युद्धोत्सुकः युद्धदर्शनोत्सुकः ॥ २० ॥ २१ ॥

धुतं कम्पितं केसराणां जालं समूहो येन तस्य ह्रेषतः ह्रेषारवं

यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्दन ।
तस्मात् केशवनाम्ना त्वं लोके गेयो भविष्यसि ॥ २३ ॥
स्वस्त्यस्तु ते गमिष्यामि कंसयुद्धेऽधुना पुनः ।
परश्वोऽहं समेष्यामि त्वया केशिनिषूदन ! ॥ २४ ॥
उग्रसेनसुते कंसे सानुगे विनिपातिते ।
भारावतारकर्त्ता त्वं पृथिव्याः पृथिवीधर ! ॥ २५ ॥
तत्रानेकप्रकाराणि युद्धानि पृथिवीक्षिताम् ।
द्रष्टव्यानि मया युष्मत्प्रणीतानि जनार्दन ! ॥ २६ ॥
सोऽहं यास्यामि गोविन्द ! देवकार्य्यं महत् कृतम् ।
त्वया सभाजितश्चास्मि स्वस्ति तेऽस्तु व्रजाम्यहम् ॥ २७ ॥

पराशर उवाच

नारदे तु गते कृष्णः सह गोपैरविस्मितः ।
विवेश गोकुलं गोपीनेत्रपानैकभाजनम् ॥ २८ ॥

कीर्त्ति ॥ २२ ॥ केशिवधात् लोका रत्यकारमाव स्वर्मंगद्रः ॥ २३ ॥ अधुना गमिष्यामि परश्वः कंसयुद्धे पुनस्त्वया समेष्यामि ॥ २४ ॥ पृथिव्या भारहर्त्ता त्वं भविष्यसि ॥ २५ ॥ तत्र भारावतारकरणे युष्मत्प्रणीतानि युष्माभिः कृतानि द्रष्टव्यानि ॥ २६ ॥ इत्थं सभाजितः कंसवधः मम अतः सम्मतः ॥ २७ ॥ गोपीनेत्राणां पानस्यास्वादस्य एकमेव भाजनं विषयं कृष्णो विवेश ॥ २८ ॥



सप्तदशोऽध्यायः।

पराशर उवाच।

अक्रूरोऽपि विनिष्क्रम्य स्यन्दनेनाशुगामिना।
कृष्णसन्दर्शनायैव प्रययौ नन्दगोकुलम्॥ १॥
चिन्तयामास चाक्रूरो नास्ति धन्यतरो मया।
योऽहमंशावतीर्णस्य मुखं द्रक्ष्यामि चक्रिणः॥ २॥
अद्य मे सफलं जन्म सुप्रभाता च मे निशा।
यदुन्निद्राब्जपत्राक्षं विष्णोर्द्रक्ष्याम्यहं मुखम्॥ ३॥
अद्य मे सफले नेत्रे अद्य मे सफला गिरः।
यस्मे परस्परालापो द्रष्टा विष्णुर्भविष्यति॥ ४॥
पापं हरति यत् पुंसां स्मृतं सङ्कल्पनामयम्।
तत् पुण्डरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखम्॥ ५॥
निर्जग्मुश्च यतो वेदा वेदाङ्गान्यखिलानि च।
द्रक्ष्यामि तत् परं धाम धाम्नां भगवतो मुखम्॥ ६॥
यज्ञेषु यज्ञपुरुषः पुरुषैः पुरुषोत्तमः।
इज्यते योऽखिलाधारस्तं द्रक्ष्यामि जगत्पतिम्॥ ७॥

श्रीकृष्णो गोकुलं विवेश अक्रूरोऽपि मथुराया विनिष्क्रम्य गोकुलं प्रययौ॥ १॥ पथि गच्छतो अक्रूरस्य मनोरथानाह चिन्तयामासे-त्यादिनाक्रूरेति षष्ठ्यन्तोल्लेखेन। मया यस्मात् धन्यतरो नास्ति॥ २॥ ॥ ३॥ ४॥ सङ्कल्पनामयं ध्यानमात्रावस्थानमपि॥ ५॥ धाम्नां तेजोमयानां सूर्यादीनां परं धाम आश्रयं मुखावयवेषु लोचनरूपेणावस्थानेन सूर्यचन्द्राग्नीनामाश्रयत्वात्॥ ६॥ ७॥ मायासत्त्वादिव यस्य तत्कृत-

दृष्ट्वा यमिन्द्रो यज्ञानां शतेनामरराजताम् ।
अवाप तमनन्तादिमहं द्रक्ष्यामि केशवम् ॥ ८ ॥
न ब्रह्मा नेन्द्ररुद्राश्विवस्वादित्यमरुद्गणाः ।
यस्य स्वरूपं जानन्ति स्पृशत्यङ्गं स मे हरिः ॥ ९ ॥
सर्वात्मा सर्ववित् सर्वः सर्वभूतेष्ववस्थितः ।
यो वितत्याव्ययो व्यापी स वक्ष्यति मया सह ॥ १० ॥
मत्स्यकूर्मवराहाश्वसिंहरूपादिभिः स्थितिम् ।
चकार जगतो योऽजः सोऽद्य मामालपिष्यति ॥ ११ ॥
साम्प्रतञ्च जगत्स्वामी कार्य्यमात्महृदि स्थितम् ।
कर्त्तुं मनुष्यतां प्राप्तः स्वेच्छादेहधृगव्ययः ॥ १२ ॥
योऽनन्तः पृथिवीं धत्ते शेखरस्थितिसंस्थिताम् ।
सोऽवतीर्णो जगत्यर्थं मामक्रूरेति वक्ष्यति ॥ १३ ॥
पितृपुत्रसुहृद्भ्रातृमातृबन्धुमयीमिमाम् ।
यन्मायां नालमुत्तर्त्तुं जगत् तस्मै नमो नमः ॥ १४ ॥
तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते ।
योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥ १५ ॥

न्तादिम् ॥ ८ ॥ वितत्यावस्थित वक्ष्यति वदिष्यति ॥ १० ॥ मत्स्यकूर्मवराहाश्व सिंहरूपादिभिः अश्वः हयग्रीवः सिंहः नृसिंहः मामालपिष्यति । अक्रूरेति तातेत्याभाषिष्यति ॥ ११ ॥ शेखरस्थेवातिलघ्वा धारणेन स्थितां योऽवतीर्णो रामः ॥ १३ ॥ तदुत्तीर्णमात्मबन्धुपातसम्बन्धे तमेव प्रणमति पितृपुत्रेति त्रिभिः ॥ १४ ॥ तरत्यविद्याम् आत्माच्छादिकां तामेव मायाम् अहङ्कारममकारादिमोहकरीं अप्रयासेनैव तरति ॥ १५ ॥

यज्ञिभिर्यज्ञपुरुषो वासुदेवश्च सात्वतैः ।
वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम् ॥१६॥
यथा यत्र जगद्धाम्नि धातर्य्येतत् प्रतिष्ठितम् ।
सदसत् तेन सत्येन मय्यसौ यातु सौम्यताम् ॥ १७ ॥
स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥ १८ ॥

पराशर उवाच ।

इत्थं संचिन्तयन् विष्णुं भक्तिनम्रात्ममानसः ।
अक्रूरो गोकुलं प्राप्तः किञ्चित् सूर्य्ये विराजति ॥१९॥
स ददर्श तदा तत्र कृष्णमादोहने गवाम् ।
वत्समध्यगतं फुल्लनीलोत्पलदलच्छविम् ॥ २० ॥
प्रस्फुटपद्मपत्राक्षं श्रीवत्साङ्कितवक्षसम् ।
प्रलम्बबाहुमायामितुङ्गोरःस्थलमुन्नतम् ॥ २१ ॥
सविलासस्मिताधारं बिभ्राणं मुखपङ्कजम् ।
तुङ्गरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितम् ॥ २२ ॥
बिभ्राणं वाससी पीते वन्यपुष्पविभूषितम् ।
सान्द्रनीललताहस्तं सिताम्भोजावतंसकम् ॥ २३ ॥

यज्ञिभिः कर्मनिष्ठैः सात्वतैरुपासकैः वेदान्तवेदिभिः ज्ञाननिष्ठैश्च यज्ञपुरुषादिशब्दैर्यः प्रोच्यते ॥ १६ ॥ मम कंसस्य दूतोऽयमिति मय्यकृपामकुर्वन् प्रसन्नो भवत्विति प्रार्थयते यथेति । सदसत् कार्य्यकारणात्मकं साध्वसाधुरूपं वा जगदेतत् यस्मिन् धाम्नि आश्रये प्रतिष्ठितं तेन सत्येन यथार्थतया सर्वव्यापित्वेन मयि सौम्यतां प्रसन्नतां यातु ॥ १७ ॥ सकलापराधे सत्यं सर्वं प्रख्याताभिख्यापकेनाप्य स्मृत इति ॥१८॥ भक्त्या नम्र आत्मा बुद्धिर्मानसञ्च यस्य सः ॥ १९ ॥ आदोहने दोहन-

शंखकुन्देन्दुधवलं नीलाम्बरधरं द्विज ।

तस्यापि बलभद्रस्य ददर्श यदुनन्दनम् ॥ २४ ॥

प्रांशुमुन्नतबाह्वंसं विकासिमुखपङ्कजम् ।

मेघमालापरिवृतं कैलासाद्रिमिवापरम् ॥ २५ ॥

तौ दृष्ट्वा विकसद्वक्त्रसरोजः स महामतिः ।

पुलकाञ्चितसर्वाङ्गस्तदाक्रूरोऽभवन्मुने ॥ २६ ॥

एतत् तत् परमं धाम तदेतत् परमं पदम् ।

भगवद्वासुदेवांशो द्विधा योऽयमवस्थितः ॥ २७ ॥

साफल्यमक्ष्णोर्युगमेतदत्र

दृष्टे जगद्धातरि यातमुच्चैः ।

अप्यङ्गमेतद्भगवत्प्रसादात्

दत्तेऽङ्गसङ्गे फलवन्मम स्यात् ॥ २८ ॥

अप्येष पृष्ठे मम हस्तपद्मं

करिष्यति श्रीमदनन्तमूर्तिः ।

यस्याङ्गुलिस्पर्शहताखिलाघै-

रवाप्यते सिद्धिरमासदोषा ॥ २९ ॥

[illegible]

[illegible]

येनाग्निविद्युद्रविरश्मिमाला-
करालमत्युग्रमपास्य चक्रम् ।
चक्रं धृता दैत्यपतेर्हृतानि
दैत्याङ्गनानां नयनाञ्जनानि ॥ ३० ॥

यत्राम्बु विन्यस्य बलिर्मनोज्ञान्
अवाप भोगान् वसुधातलस्थः ।
तथामरत्वं त्रिदशाधिपत्यं
मन्वन्तरं पूर्णमपेतशत्रुः ॥ ३१ ॥

अप्येष मां कंसपरिग्रहेण
दोषास्पदीभूतमदोषदुष्टम् ।
कर्त्तावमानोपहतं धिगस्तु
तज्जन्म नः साधुबहिष्कृतं यत् ॥ ३२ ॥

ज्ञानात्मकस्यामलसत्त्वराशे-
रपेतदोषस्य सदा स्फुटस्य ।
किंवा जगत्यत्र समस्तपुंसाम्
अज्ञातमस्यास्ति हृदि स्थितस्य ॥ ३३ ॥

भूतले स्थितः ॥ ३० ॥ ३१ ॥ अदोषदुष्टमपि मां दोषास्पदीभूतं मत्वा अपि यदि अवमानोपहतं कर्त्ता करिष्यतीत्याशङ्क्य स्वयमेव तस्य दंभ-नीत्याह ज्ञानात्मकस्येति जीवस्य ज्ञानात्मकत्वेऽपि रजस्तमोमलावृतत्वात् संभूता ईश्वरस्य तु तदभावीत्याह अमलेति । शुद्धसत्त्वमयस्य न जीव-वद्रागादिभिस्तापिताप्रमोद इत्याह । अपेतदोषस्येति न च चक्षुरादपेक्षया जीवस्येव बाह्याविवृतं ज्ञानमीश्वरस्येत्याह सदा स्फुटस्येति । न च जीवस्येवोपाधिपरिच्छेदादल्पार्थज्ञत्वमित्याह सर्वपुंसां हृदि स्थितस्येति अतोऽस्य किं नाम तदज्ञातमस्ति तथापि यदुक्तमहं तज्जानीत्याह अस्मादिति ॥ ३३ ॥

तस्मादहं भक्तिविनम्रचेता
व्रजामि सर्वेश्वरमीश्वराणाम्।
अंशावतारं पुरुषोत्तमस्य
ह्यनादिमध्यान्तमजस्य विष्णोः॥२४॥

अष्टादशोऽध्यायः।

पराशर उवाच।

चिन्तयन्निति गोविन्दमुपागम्य स यादवः।
अक्रूरोऽस्मीति चरणौ ननाम शिरसा हरेः॥१॥
सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना।
संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे॥२॥
कृतसंवादनौ तेन यथावद् बलकेशवौ।
ततः प्रविष्टौ संहृष्टौ तमादायात्ममन्दिरम्॥३॥
सह ताभ्यां तदाक्रूरः कृतसंवादनादिकः।
भुक्तभोज्यो यथान्यायमाचचक्षे ततस्तयोः॥४॥
यथा निर्भर्त्सितस्तेन कंसेनानकदुन्दुभिः।
यथा च देवकी देवी दानवेन दुरात्मना॥५॥

अक्रूरोऽस्मीति नामोच्चार्य तत्र अनुचर्य्यमाणां चापलम्
प्रकाश्य॥१॥ परिषस्वजे आलिलिङ्गसन्ताप्॥२॥ रामव नमाचैत
कुशलप्रश्नादि संवादनौ येषां तौ॥३॥ सह संवादनादिकं संवाहादि
कं यः। यथान्यायं यथायथपूर्व्वं भुक्तं भोज्यं भोजनार्थं भुक्तं येन

उग्रसेने यथा कंसः स दुरात्मा च वर्त्तते ।
यं चैवार्थं समुद्दिश्य स कंसेन विसर्जितः ॥ ६ ॥
तत् सर्वं विस्तरात् श्रुत्वा भगवान् केशिसूदनः ।
उवाचाखिलमप्येतत् ज्ञातं दानपते ! मया ॥ ७ ॥
करिष्ये च महाभाग ! यदत्रौपयिकं मतम् ।
विचिन्त्यं नान्यथैतत् ते विद्धि कंसं हतं मया ॥ ८ ॥
अहं रामश्च मथुरां श्वो यास्यामः समं त्वया ।
गोपवृद्धाश्च यास्यन्ति आदायोपायनं बहु ॥ ९ ॥
निशेयं नीयतां वीर ! न चिन्तां कर्त्तुमर्हसि ।
त्रिरात्राभ्यन्तरे कंसं हनिष्यामि सहानुगम् ॥ १० ॥

पराशर उवाच ।

समादिश्य ततो गोपान् अक्रूरोऽपि सकेशवः ।
सुष्वाप बलभद्रश्च नन्दगोपगृहे सुखम् ॥ ११ ॥
ततः प्रभाते विमले कृष्णरामौ महामती ।
अक्रूरेण समं गन्तुमुद्यतौ मथुरां प्रति ॥ १२ ॥
दृष्ट्वा गोपीजनः सास्रः श्लथद्वलयबाहुकः ।
निश्वस्य चातिदुःखार्त्तः प्राह चेदं परस्परम् ॥ १३ ॥

अक्रादि येन सः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ औपयिकम् उपयोगियोग्यमित्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ राजार्हेषनिवेदनेन गोपान् समादिश्य नन्दगोपगृहे सुष्वापेति वदतः परं नन्दे पितृत्वव्यवहारमनुवर्त्तिं सूचयति ॥ ११ ॥ गन्तुमुद्यतौ दृष्ट्वा गोपीजनः प्राहेत्यन्वयः दह्वेत्यादिना सोऽपि दुःखं व्यनक्ति दृष्ट्वान्तेन गोपीविरहव्यापोक्तेः सास्रः साश्रुनेत्रः श्लथद्वलया बाहवो यस्येति विरहदुःखार्त्तः सन्नम् ॥ १२ ॥ अथमेभ्यर्थि । कथंचित् तत्र चेदमाह । नागरीति सार्द्धेन नागरस्त्रीणां कथं मधुराक्षरो व आलापः तदेव मधु तद्व यस्माद् पास्यति ॥ १४ ॥

मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति ।
नागरस्त्रीकलालापमधु श्रोत्रेण पास्यति ॥ १४ ॥
विलासिवाक्यपानेषु नागरीणां कृतास्पदम् ।
चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति ॥ १५ ॥
सारं समस्तगोष्ठस्य विधिना हरता हरिम् ।
प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना ॥ १६ ॥
भावगर्भस्मितं वाक्यं विलासललिता गतिः ।
नागरीणामतीवैतत् कटाक्षेक्षितमेव च ॥ १७ ॥
ग्राम्यो हरिरयं तासां विलासनिगडैर्युतः ।
भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति ॥ १८ ॥
एष रथमारुह्य मथुरां याति केशवः ।
क्रूरेणाक्रूरकेणात्र निराशेन प्रतारितः ॥ १९ ॥

[illegible] ॥ १६ ॥ [illegible] ॥ १७ ॥ विलासनिगडैर्युतो [illegible] ॥ १८ ॥ [illegible] ॥ १९ ॥ [illegible]

किं न वेत्ति नृशंसोऽय मनुरागपरं जनम् ।
येनैमक्ष्णोराह्लादं नयत्यन्यत्र नो हरिम् ॥ २० ॥
एष रामेण सहितः प्रयात्यत्यन्तनिर्घृणः ।
रथमारुह्य गोविन्दस्त्वर्य्यतामस्य वारणे ॥ २१ ॥
गुरूणामग्रतो वक्तुं किं ब्रवीषि न नः क्षमम्
गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना ॥ २२ ॥
नन्दगोपमुखा गोपा गन्तुमेते समुद्यताः ।
नोद्यमं कुरुते कश्चिद् गोविन्दविनिवर्त्तने ॥ २३ ॥
सुप्रभाताद्य रजनी मथुरावासियोषिताम् ।
पास्यन्त्यच्युतवक्त्राब्जं यासां नेत्रालिपङ्क्तयः ॥ २४ ॥
धन्यास्ते पथि ये कृष्णमितो यान्त्यनिवारिताः ।
उद्वहिष्यन्ति पश्यन्तः स्वदेहं पुलकाञ्चितम् ॥ २५ ॥
मथुरानगरीपौरनयनानां महोत्सवः ।
गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति ॥ २६ ॥
को नु स्वप्नः सुभाग्याभिर्दृष्टस्ताभिरधोक्षजम् ।
विस्तारिकान्तिनयना या द्रक्ष्यन्त्यनिवारितम् ॥ २७ ॥

न वेत्तीति येन हेतुना । नो अस्माकम् अक्ष्णोः आह्लादं हरिमन्यत्र नयतीति तत् किमनुरागपरं जनं न वेत्तीति । यदासौ काप्यनुरागरक्षाभिज्ञो भवेत् तर्हि तद्वियोगजदुःखं आवयोर्न कुर्य्यादिति भावः ॥ २० ॥ ये जना इतः कृष्णमप्यनिवारिताः सन्तो यान्ति ते धन्याः यस्मात् पथि यान्तं कृष्णं पश्यन्तः स्वदेहं पुलकव्याप्तमुद्वहिष्यन्ति धारयिष्यन्तीत्यर्थः ॥ २५ ॥

मथुरानगर्य्याः पौरस्त्रीनयनानाम् ॥ २६ ॥ विस्तारीणि कान्तिमन्ति नयनानि यासां ताः ॥ २७ ॥ अत्र प्रयाणे महानिमित्तत्वं

अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम्।
उत्कृत्तान्यद्य नेत्राणि विधात्रा करुणात्मना ॥ २८ ॥
अनुरागेण शैथिल्यमस्मासु व्रजतो हरेः।
शैथिल्यमुपयान्त्याशु करेषु वलयान्यपि ॥ २९ ॥
अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान्।
एवमार्तासु योषित्सु कृपा कस्य न जायते ॥ ३० ॥
एष हा कृष्णरथस्योच्चैश्चक्ररेणुर्निरीक्ष्यताम्।
दूरीकृतो हरिर्येन सोऽपि रेणुर्न लक्ष्यते ॥ ३१ ॥
इत्येवमतिहार्देन गोपीजननिरीक्षितः।
तत्याज व्रजभूभागं सह रामेण केशवः ॥ ३२ ॥
गच्छन्तो जवनाश्वेन रथेन यमुनातटम्।
प्राप्ता मध्याह्नसमये रामाक्रूरजनार्दनाः ॥ ३३ ॥
अथाह कृष्णमक्रूरो भवद्भ्यां तावदास्यताम्।
यावत् करोमि कालिन्द्यामाह्निकार्हणमम्भसि ॥ ३४ ॥
तथेत्युक्ते ततः स्नातः स्वाचान्तः स महामतिः।
दध्यौ ब्रह्म परं विप्र ! प्रविश्य यमुनाजले ॥ ३५ ॥

[illegible] ॥ २८ ॥ [illegible] ॥ २९ ॥ [illegible] ॥ ३० ॥ ॥ ३१ ॥ [illegible]

फणासहस्रमालाढ्यं बलभद्रं ददर्श सः।
कुन्दमालाङ्गमुन्निद्रपद्मपत्रारुणेक्षणम् ॥ ३६ ॥
वृतं वासुकिरम्भाद्यैर्महद्भिः पवनाशिभिः।
संस्तूयमानं गन्धर्वैर्वनमालाविभूषितम् ॥ ३७ ॥
दधानमसिते वस्त्रे चारुपद्मावतंसकम्।
चारुकुण्डलिनं मत्तमन्तर्जलतले स्थितम् ॥ ३८ ॥
तस्योत्सङ्गे घनश्याममाताम्रायतलोचनम्।
चतुर्बाहुमुदाराङ्गं चक्राद्यायुधभूषणम् ॥ ३९ ॥
पीते वसानं वसने चित्रमाल्यविभूषणम्।
शक्रचापतडिन्मालाविचित्रमिव तोयदम् ॥ ४० ॥
श्रीवत्सवक्षसं चारुकेयूरमुकुटोज्ज्वलम्।
ददर्श कृष्णमक्लिष्टपुण्डरीकावतंसकम् ॥ ४१ ॥
सनन्दनाद्यैर्मुनिभिः सिद्धयोगैरकल्मषैः।
विचिन्त्यमानं तत्रस्थैर्नासाग्रन्यस्तलोचनैः ॥ ४२ ॥
बलकृष्णौ तथाक्रूरः प्रत्यभिज्ञाय विस्मितः।
सोऽचिन्तयद्रथात् शीघ्रं कथमत्रागताविति ॥ ४३ ॥
विवक्षोः स्तम्भयामास वाचं तस्य जनार्दनः।
ततो निष्क्रम्य सलिलाद् रथमभ्यागतः पुनः ॥ ४४ ॥
ददर्श तत्र चैवोभौ रथस्योपर्यधिष्ठितौ।
रामकृष्णौ यथापूर्वं मनुष्यवपुषान्वितौ ॥ ४५ ॥

चाचिस्त्वाद्यैश्च ध्यान्याश्चिन्त्यमानं देवपूज्यादि च ॥ ३४ ॥ ३५ ॥
पुरं तावद्गत्वैवाश्चर्यान्तर्जलं दृष्टवान् तत्र तथापि चायातौ कुष्ण-
रथस्थौ तथा दृष्टवानीताविति वयसुनिमात्त्वा अथ सोऽवमेन्द्रं

निमग्नश्च ततस्तोये स ददर्श तथैव तौ ।
संस्तूयमानौ गन्धर्वमुनिसिद्धमहोरगैः ॥ ४६ ॥
ततो विज्ञातसद्भावः स तु दानपतिस्तदा ।
तुष्टाव सर्वविज्ञानमयमच्युतमीश्वरम् ॥ ४७ ॥

अक्रूर उवाच ।

सन्मात्ररूपिणेऽचिन्त्यमहिम्ने परमात्मने ।
व्यापिने नैकरूपैकस्वरूपाय नमो नमः ॥ ४८ ॥
शब्दरूपाय तेऽचिन्त्य हविर्भूताय ते नमः ।
नमोऽविज्ञेयरूपाय पराय प्रकृतेः प्रभो ॥ ४९ ॥
भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् ।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः ॥ ५० ॥

रूपं तावत् दर्शितवतो रथे तद्वन्तश्च । तथाविधयोरेवादिदृशा चाक्रू-
रस्याप्तु । तथान्तर्जले दृष्टवा चाक्रूरः पुनः कृष्णयोः साक्षात्त्व-
मेवमाह ॥ ४६ ॥ ... ॥ ४७ ॥ ४८ ॥
[illegible] विज्ञातः सद्भावः यस्य परमार्थ-
रूप एवं सर्वं यत् विज्ञानं तन्मयम् ॥ ४७ ॥ नैकरूपो बहुरूपः च
एकः स्वरूपं सर्वत्र यस्य तस्मै नमः ॥ ४८ ॥
हे अचिन्त्य ! हविर्भूताय यज्ञरूपाय च प्रविशन्ति श्रुतेः । अविज्ञान
... नमः । प्रकृतेः । पराय ... ... च-
... ... ॥ ४९ ॥ भूतात्मा भूतस्वरूपः ।
इन्द्रियात्मा इन्द्रियस्वरूपः । प्रधानात्मा प्रकृतिरूपः । आत्मा भूतादि-
... परमात्मा निरुपाधिः ॥ ५० ॥ हे प्रभो ! ...

प्रसीद सर्व ! सर्वात्मन् ! क्षराक्षरमयेश्वर ! ।
ब्रह्मविष्णुशिवाख्याभिः कल्पनाभिरुदीरितः ॥ ५१ ॥
अनाख्येयस्वरूपात्मन् ! अनाख्येयप्रयोजन ! ।
अनाख्येयाभिधानं त्वां नतोऽस्मि परमेश्वर ! ॥ ५२ ॥
न यत्र नाथ ! विद्यन्ते नामजात्यादिकल्पनाः ।
तद् ब्रह्म परमं नित्यमविकारि भवानज ! ॥ ५३ ॥
न कल्पनामृतेऽर्थस्य सर्वस्याधिगमो यतः ।
ततः कृष्णाच्युतानन्तविष्णुसंज्ञाभिरीड्यसे ॥ ५४ ॥

सर्वार्थास्त्वमज ! विकल्पनाभिरेतैर्
देवाद्यं जगदखिलं त्वमेव विश्वम् ।
विश्वात्मंस्त्वमिति विकारभावहीनः
सर्वस्मिन् न हि भवतोऽस्ति किञ्चिदन्यत् ॥ ५५ ॥
त्वं ब्रह्मा पशुपतिरर्यमा विधाता
धाता त्वं त्रिदशपतिः समीरणोऽग्निः ।

सर्वात्मन् ! अत एव क्षराक्षरमय ईश्वरः क्षराक्षरनियामकः तदुक्तं गीतासु। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इति। कल्पनाभिर्गुणोपाधिभिन्नं ब्रह्मादिसंज्ञाभिरुदीरितस्ततः ॥ ५१ ॥

अनाख्येयस्वरूपः अनिर्देश्यस्वरूप आत्मा स्वभावो यस्य। अनाख्येयं स्वरूपम् आत्मा मूर्तिर्वा यस्येति वा। अनाख्येयं प्रयोजनं यस्य आप्तकामत्वेन लीलाव्यतिरेकेण सृष्ट्यादिप्रयोजनस्यानाख्येयत्वात्। यद्वा अनाख्येयप्रयोजन ! निर्गुणानन्दस्वरूप ! अनाख्येयानि अभिधानानि यस्य तम् अनामत्वादनन्तनामत्वाद्वा ॥ ५२ ॥
[illegible] भेदमाह न यत्रेति ॥ ५३ ॥ मायया अनन्तनामत्वमाह न कल्पनामिति ॥ ५४ ॥ रूपानन्त्येन नामानन्त्यं प्रपञ्चयन्नाह सर्वार्था-

तोयेशो धनपतिरन्तकस्त्वमेको
भिन्नार्थैर्जगदपि पासि शक्तिभेदैः ॥ ५६ ॥
विश्वं भवान् सृजति सूर्यगभस्तिरूपो
विश्वश्च ते गुणमयोऽयमज प्रपञ्चः ।
रूपं परं सदिति वाचकमक्षरं यत्
ज्ञानात्मने सदसते प्रणतोऽस्मि तस्मै ॥ ५७ ॥
ओं नमो वासुदेवाय नमः सङ्कर्षणाय ते ।
प्रद्युम्नाय नमस्तुभ्यमनिरुद्धाय ते नमः ॥ ५८ ॥

ऊनविंशोऽध्यायः ।

पराशर उवाच ।

एवमन्तर्जले विष्णुमभिष्टूय स यादवः ।
अर्चयामास सर्वेशं पुष्पधूपैर्मनोमयैः ॥ १ ॥
परित्यक्तान्यविषयं मनस्तत्र निवेश्य सः ।
ब्रह्मभूतश्चिरं स्थित्वा विरराम समाधितः ॥ २ ॥

[illegible] ॥ ५५ ॥ ५६ ॥ सूर्यगभस्तिरूप इति [illegible]
[illegible] भवान् चराचरं विश्वं सृजति । गुणमयः प्रपञ्चः । [illegible]
[illegible] वाचकं ब्रह्म अक्षरं [illegible]
[illegible] ॥ ५७ ॥ चतुर्व्यूहरूपं प्रणमति ओं नम इति ॥ ५८ ॥

[illegible] ॥ ॥ १ ॥
[illegible] ॥ १ ॥ [illegible]

कृतकृत्यमिवात्मानं मन्यमानो महामतिः ।
आजगाम रथं भूयो निर्गम्य यमुनाम्भसः ॥ ३ ॥
रामकृष्णौ च ददृशे यथापूर्वं रथे स्थितौ ।
विस्मिताक्षस्तदाक्रूरस्तञ्च कृष्णोऽभ्यभाषत ॥ ४ ॥
नूनं ते दृष्टमाश्चर्य्यमक्रूर ! यमुनाजले ।
विस्मयोत्फुल्लनयनो भवान् संलक्ष्यते यतः ॥ ५ ॥

अक्रूर उवाच ।

अन्तर्जले यदाश्चर्य्यं दृष्टं तत्र मयाच्युत ! ।
तदत्रापि हि पश्यामि मूर्त्तिमत् पुरतः स्थितम् ॥ ६ ॥
जगदेतन्महाश्चर्य्यं रूपं यस्य महात्मनः ।
तेनाश्चर्य्यवरेणाहं भवता कृष्ण ! सङ्गतः ॥ ७ ॥
तत् किमेतेन मथुरां व्रजामो मधुसूदन ! ।
बिभेमि कंसाद्धिग् जन्म परपिण्डोपजीविनाम् ॥ ८ ॥
इत्युक्त्वा नोदयामास तान् हयान् वातरंहसः ।
संप्राप्तश्चातिसायाह्ने सोऽक्रूरो मथुरां पुरीम् ॥ ९ ॥
विलोक्य मथुरां कृष्णं रामञ्चाह स यादवः ।
पद्भ्यां यातं महावीर्य्यौ रथेनैको विशाम्यहम् ॥ १० ॥

जले त्वं दृष्टवानिति मोहयन्निवाह तदिति किमेतेनेति परमेश्वरे साक्षाद् दृष्टेऽपि बिभ्यते यति कंसः कृष्णेऽदिति कंसाद् बिभेमि अतः परपिण्डम् अन्नादिकं ये उपजीवन्ति तेषां जन्म धिक् ॥ ८ ॥ वातस्येव रंहो वेगो येषां तान् ॥ ९ ॥ कृष्णमायामोहितः सन् कंसभयादिव तौ विसृज्याह पद्भ्यां युवां यातं गच्छतम् ॥ १० ॥

गन्तव्यं वसुदेवस्य भवद्भ्यां न तथा गृहम् ।
युवयोर्हि कृते वृद्धः स कंसेन निरस्यते ॥ ११ ॥

पराशर उवाच ।

इत्युक्त्वा प्रविवेशाथ सोऽक्रूरो मथुरां पुरीम् ।
प्रविष्टौ रामकृष्णौ च राजमार्गमुपागतौ ॥ १२ ॥
स्त्रीभिर्नरैश्च सानन्दं लोचनैरभिवीक्षितौ
जग्मतुर्लीलया वीरौ दृप्तौ बालगजाविव ॥ १३ ॥
भ्रममाणौ तु तौ दृष्ट्वा रजकं रङ्गकारकम् ।
प्रयाचितौ सुरूपाणि वासांसि रुचिराननौ ॥ १४ ॥
कंसस्य रजकः सोऽथ प्रसादारूढविस्मयः ।
बहून्याक्षेपवाक्यानि प्राहोच्चै रामकेशवौ ॥ १५ ॥
ततस्तलप्रहारेण कृष्णस्तस्य दुरात्मनः ।
पातयामास कोपेन रजकस्य शिरो भुवि ॥ १६ ॥
हत्वादाय च वस्त्राणि पीतनीलाम्बरौ ततः ।
कृष्णरामौ मुदा युक्तौ मालाकारगृहं गतौ ॥ १७ ॥
विकासिनेत्रयुगलो मालाकारोऽतिविस्मितः ।
एतौ कस्य कुतो यातौ मैत्रेयाचिन्तयत् तदा ॥ १८ ॥
पीतनीलाम्बरधरौ तौ दृष्ट्वातिमनोहरौ ।
स तर्कयामास तदा भुवं देवावुपागतौ ॥ १९ ॥

ततो युवयोः कृते युवयोर्निमित्तं निरस्यते [illegible] ॥ ११ ॥
॥ १२ ॥ ॥ १३ ॥ [illegible] [illegible] निर्वर्तकः । [illegible] एव [illegible] [illegible]
[illegible] [illegible] तम् ॥ १४ ॥ प्रसादः [illegible] [illegible] [illegible]

विज्ञाप्य मुखपद्माभ्यां ताभ्यां पुष्पाणि याचितः ।
भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीम् ॥ २० ॥
प्रसादपरमौ नाथौ मम गेहमुपागतौ ।
धन्योऽहमर्चयिष्यामीत्याह तौ माल्यजीवकः ॥ २१ ॥
ततः प्रहृष्टवदनः तयोः पुष्पाणि कामतः ।
चारूण्येतान्यथैतानि प्रददौ स विलोभयन् ॥ २२ ॥
पुनः पुनः प्रणम्यासौ मालाकारौ नरोत्तमौ ।
ददौ पुष्पाणि चारूणि गन्धवन्त्यमलानि च ॥ २३ ॥
मालाकाराय कृष्णोऽपि प्रसन्नः प्रददौ वरान् ।
श्रीस्त्वां मत्संश्रया भद्र ! न कदाचित् प्रहास्यति ॥ २४ ॥
बलहानिर्न ते सौम्य ! धनहानिस्तथैव च ।
यावद्दिनानि तावच्च न नशिष्यति सन्ततिः ॥ २५ ॥
भुक्त्वा च विपुलान् भोगांस्त्वमन्ते मत्प्रसादजम् ।
ममानुस्मरणं प्राप्य दिव्यं लोकमवाप्स्यसि ॥ २६ ॥
धर्मे मनश्च ते भद्र ! सर्वकालं भविष्यति ।
युष्मत्सन्ततिजातानां दीर्घमायुर्भविष्यति ॥ २७ ॥
नोपसर्गादिकं दोषं युष्मत्सन्ततिसम्भवः ।
संप्राप्स्यति महाभाग ! यावत् सूर्यो धरिष्यति ॥ २८ ॥

कंसमाहतुः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ प्रसादपरमौ अनुग्रहपरौ ॥ २१ ॥ कामतश्छन्दतः पुष्पाणि दत्त्वा पुनरेतानि चारूणि अन्यानि ततोऽपि चारूणीति प्रलोभयन् अनुरागं जनयन् ददौ ॥ २२ ॥ २३ ॥ मत्संश्रया मम वक्षसि स्थिता श्रीस्त्वां न त्यक्ष्यति [illegible] ॥ २४ ॥ ॥ २५ ॥ २६ ॥ २७ ॥ यावत् सूर्यो धरिष्यति स्थास्यति ॥ २८ ॥

पराशर उवाच ।

इत्युक्त्वा तद्गृहात् कृष्णो बलदेवसहायवान् ।
निर्जगाम मुनिश्रेष्ठ ! मालाकारेण पूजितः ॥ २८ ॥

विंशोऽध्यायः ।

पराशर उवाच

राजमार्गे ततः कृष्णः सानुलेपनभाजनाम् ।
ददर्श कुब्जामायान्तीं नवयौवनगोचराम् ॥ १ ॥

तामाह ललितं कृष्णः कस्येदमनुलेपनम् ।
भवत्या नीयते सत्यं वदेन्दीवरलोचने ! ॥ २ ॥

सकाममिव सा प्रोक्ता सानुरागा हरिं प्रति ।
प्राह सा ललितं कुब्जा तद्दर्शनबलात्कृता ॥ ३ ॥

कान्त ! कस्मान्न जानासि कंसेनाभिनियोजिताम् ।
नैकवक्रेति विख्यातामनुलेपनकर्मणि ॥ ४ ॥

नान्यपिष्टं हि कंसस्य प्रीतये ह्यनुलेपनम् ।
भवत्यहमतीवास्य प्रसादधनभाजनम् ॥ ५ ॥

अनुलेपनस्य भाजनं यस्याः ताम् ॥ १ ॥ तद्दर्शनेन बलात्कृता आकर्षिता सती प्राह ॥ ३ ॥ अनुलेपनकर्मणि नैकवक्रेति विख्याता वैकवक्रा त्रिवक्रा सर्वैः ॥ ४ ॥ अन्येन पिष्टं अन्यपिष्टं तेनैव अनुलेपनं कंसस्य प्रीतये न भवति अतोऽहमतीवास्य कंसस्य प्रसादधनभाजनं प्रीतिदानस्य पात्रभूता ॥ ५ ॥ सानुरागं

श्रीकृष्ण उवाच ।

सुगन्धमेतद्राजार्हं रुचिरं रुचिरानने ।
आवयोर्गात्रसदृशं दीयतामनुलेपनम् ॥ ६ ॥

पराशर उवाच ।

श्रुत्वैतदाह सा कुब्जा गृह्यतामिति सादरम् ।
अनुलेपनञ्च प्रददौ गात्रयोग्यमथोभयोः ॥ ७ ॥
भक्तिच्छेदानुलिप्ताङ्गौ ततस्तौ पुरुषर्षभौ ।
सेन्द्रचापौ विराजेतां सितकृष्णाविवाम्बुदौ ॥ ८ ॥
ततस्तां चिबुके शौरिरुल्लापनविधानवित् ।
उत्पाट्य तोलयामास द्व्यङ्गुलेनाग्रपाणिना ॥ ९ ॥
चकर्ष पद्भ्याञ्च तथा ऋजुत्वं केशवोऽनयत् ।
ततः सा ऋजुतां प्राप्ता योषितामभवद्वरा ॥ १० ॥
विलासललितं प्राह प्रेमगर्भभरालसम् ।
वस्त्रे प्रगृह्य गोविन्दं व्रज गेहं ममेति वै ॥ ११ ॥

यथानुरूपम् ॥ ६ ॥ ७ ॥ कुङ्कुमादिवर्णकैः कपोलवक्षःस्थलभुजादिषु पत्रभङ्गरचना भक्तिच्छेदः भक्तिच्छेदेनानुलिप्ताङ्गौ अत एव चित्रवर्णानुलेपनेन स्वाङ्गकान्त्या च तयोरिन्द्रचापसहितसितकृष्णाम्बुदसादृश्यम् ॥ ८ ॥

अनुग्रहपरिपाकफलं सद्य एव दर्शयितुमित्याह । तत इति सार्द्धेन उल्लापनलक्षणकरणपाठान्तरे उल्लापनमरोगीकरणं तत्प्रकारज्ञः शौरिः मध्यमातर्जनीरूपद्व्यङ्गुलोपलक्षितेनाग्रपाणिना पाणिपद्मेन चिबुके सम्यग्लाघवात् उत्पाट्य उद्धृत्य तोलयामास उन्नमितवान् ॥ ९ ॥ स्वपद्भ्यां च पादयोस्तां चकर्ष आक्रान्तवान् एवं तामृजुत्वमनयत् ॥ १० ॥

आयास्ये भवतो गेहमिति तां प्रहसन् हरिः ।
विससर्ज जहासोच्चै रामस्यालोक्य चाननम् ॥ १२ ॥
भक्तिच्छेदानुलिप्ताङ्गौ नीलपीताम्बरौ च तौ ।
धनुःशालां ततो यातौ चित्रमाल्योपशोभितौ ॥ १३ ॥
आयोगवं धनूरत्नं ताभ्यां पृष्टैस्तु रक्षिभिः ।
आख्याते सहसा कृष्णो गृहीत्वापूरयद् धनुः ॥ १४ ॥
ततः पूरयता तेन भज्यमानं बलाद् धनुः ।
चकार सुमहच्छब्दं मथुरा येन पूरिता ॥ १५ ॥
अनुयुक्तौ ततस्तौ तु भग्ने धनुषि रक्षिभिः ।
रक्षिसैन्यं निकृत्योभौ निष्क्रान्तौ कार्मुकालयात् ॥ १६ ॥
अक्रूरागमवृत्तान्तमुपलभ्य तथा धनुः ।
भग्नं श्रुत्वाथ कंसोऽपि प्राह चाणूरमुष्टिकौ ॥ १७ ॥

कंस उवाच ।

गोपालदारकौ प्राप्तौ भवद्भ्यां तौ ममाग्रतः ।
मल्लयुद्धेन हन्तव्यौ मम प्राणहरौ हि तौ ॥ १८ ॥
नियुद्धे तद्विनाशेन भवद्भ्यां तोषितो ह्यहम् ।
दास्याम्यभिमतान् कामान् नान्यथैतन्महाबलौ ॥ १९ ॥

[illegible] ॥ ११ ॥ [illegible] ॥ १२ ॥ ॥ १३ ॥ [illegible] ॥ १४ ॥ ॥ १५ ॥ [illegible]
चाणूरमुष्टिकौ [illegible] ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

न्यायतोऽन्यायतो वापि भवद्भ्यां तौ ममाहितौ ।
हन्तव्यौ तद्वधाद्राज्यं सामान्यं नो भविष्यति ॥२०॥
इत्यादिश्य स तौ मल्लौ तत आहूय हस्तिपम् ।
प्रोवाचोच्चैस्त्वया मध्ये समाजद्वारि कुञ्जरः ॥ २१ ॥
स्थाप्यः कुवलयापीडस्तेन तौ गोपदारकौ ।
घातनीयौ नियुद्धाय रङ्गद्वारमुपागतौ ॥ २२ ॥
तमप्याज्ञाप्य दृष्ट्वा च मञ्चान् सर्वानुपाकृतान् ।
आसन्नमरणः कंसः सूर्य्योदयमुदैक्षत ॥ २३ ॥
ततः समस्तमञ्चेषु नागरः स तदा जनः ।
राजमञ्चेषु चारूढाः सहामात्यैर्महीभृतः ॥ २४ ॥
मल्लप्राश्निकवर्गश्च रङ्गमध्यसमीपतः ।
कृतः कंसेन कंसोऽपि तुङ्गमञ्चे व्यवस्थितः ॥ २५ ॥
अन्तःपुराणां मञ्चाश्च तथान्ये परिकल्पिताः ।
अन्ये च वारमुख्यानामन्ये नागरयोषिताम् ॥ २६ ॥
नन्दगोपादयो गोपा मञ्चेष्वन्येष्ववस्थिताः ।
अक्रूरवसुदेवौ च मञ्चप्रान्ते व्यवस्थितौ ॥ २७ ॥
नागरीयोषितां मध्ये देवकी पुत्रगर्द्धिनी ।
अन्तकालेऽपि पुत्रस्य द्रक्ष्यामि रुचिरं मुखम् ॥ २८ ॥
वाद्यमानेषु तूर्य्येषु चाणूरे चापि वल्गति ।

न्यायतः मल्लयुद्धोक्तमार्गेण अन्यायतः तदतिक्रमेण वा सामान्यं समानम् ॥ २० ॥ २१ ॥ २२ ॥ उपाकृतान् उपकल्पितान् ॥ २३ ॥ ॥ २४ ॥ मल्लप्राश्निकाः मल्लयुद्धेषु युक्तायुक्तपरीक्षकास्तेषां वर्गः समूहः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ पुत्रगर्द्धिनी पुत्रक्षेमाभिकाङ्क्षिणी

हाहाकारपरे लोके आस्फोटयति मुष्टिके ॥ २८ ॥
हत्वा कुवलयापीडं हस्त्यारोहप्रचोदितम् ।
मदासृगनुलिप्ताङ्गौ गजदन्तवरायुधौ ॥ ३० ॥
मृगमध्ये यथा सिंहौ गर्वलीलावलोकितौ ।
प्रविष्टौ सुमहारङ्गं बलभद्रजनार्दनौ ॥ ३१ ॥
हाहाकारो महान् जज्ञे सर्वरङ्गेष्वनन्तरम् ।
कृष्णोऽयं बलभद्रोऽयमिति लोकस्य विस्मयः ॥ ३२ ॥
सोऽयं येन हता घोरा पूतना सा निशाचरी ।
क्षिप्तञ्च शकटं येन भग्नौ च यमलार्जुनौ ॥ ३३ ॥
सोऽयं यः कालियं नागं ननर्त्तारुह्य बालकः ।
धृतो गोवर्द्धनो येन सप्तरात्रं महागिरिः ॥ ३४ ॥
अरिष्टो धेनुकः केशी लीलयैव महात्मना ।
निहता येन दुर्वृत्ता दृश्यते सोऽयमच्युतः ॥ ३५ ॥
अयञ्चास्य महाबाहुर्बलभद्रोऽयमग्रतः ।
प्रयाति लीलया योषिन्मनोनयननन्दनः ॥ ३६ ॥
अयं स कथ्यते प्राज्ञैः पुराणार्थावलोकिभिः ।
गोपालो यादवं वंशं मग्नमभ्युद्धरिष्यति ॥ ३७ ॥
अयं स सर्वभूतस्य विष्णोरखिलजन्मनः ।

[illegible] ॥ २९ ॥ मदासृगनुलिप्ताङ्गौ [illegible] गजदन्तावेव वरायुधौ ययोस्तौ ॥ ३० ॥
॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ सर्वभूतस्य [illegible]
[illegible]

अवतीर्णो महीमंशो नूनं भारहरो भुवः ॥ ३८ ॥

इत्येवं वर्णिते पौरै रामे कृष्णे च तत्क्षणात् ।
उरस्तताप देवक्याः स्नेहस्नुतपयोधरम् ॥ ३९ ॥

महोत्सवमिवासाद्य पुत्राननविलोकनम् ।
युवेव वसुदेवोऽभूद् विहायाभ्यागतां जराम् ॥ ४० ॥

विस्तारिताक्षियुगलो राजान्तःपुरयोषिताम् ।
नागरस्त्रीसमूहश्च द्रष्टुं न विरराम तम् ॥ ४१ ॥

सख्यः पश्यत कृष्णस्य मुखमत्यरुणेक्षणम् ।
गजयुद्धकृतायासस्वेदाम्बुकणिकाचितम् ॥ ४२ ॥

विकासिशरदम्भोजमवश्यायजलोक्षितम् ।
परिभूय स्थितं जन्म सफलं क्रियतां दृशोः ॥ ४३ ॥

श्रीवत्साङ्कं महद्धाम बालस्यैतद् विलोक्यताम् ।
विपक्षक्षपणं वक्षो भुजयुग्मञ्च भामिनि ॥ ४४ ॥

किं न पश्यसि कुन्देन्दुमृणालधवलाननम् ।
बलभद्रमिमं नीलपरिधानमुपागतम् ॥ ४५ ॥

वर्णीयं इति सम्बन्धः ॥ ३८ ॥ ४० ॥ राजान्तःपुरयोषितां समूह इति शेषः ॥ ४१ ॥

स्त्रीणां विजयोक्तिमाह सख्य इत्यादि सप्तभिः । गजयुद्धकृतेनायासेन स्वेदाम्बुकणिकाभिराचितं व्याप्तम् ॥ ४२ ॥ अवश्यायजलोक्षितं हिमवारिणा सिक्तं शरत्कालीनमम्भोजं परिभूय स्वशोभाधिक्येन तिरस्कृत्य स्थितं मुखं पश्यत तेन च दृशोर्जन्म सफलं क्रियताम् ॥ ४३ ॥ महद्धाम महत्या लक्ष्म्या देव्या धाम आश्रयभूतं वक्षः । विपक्षक्षपणं भुजयुग्मं विलोक्यताम् ॥ ४४ ॥ ४५ ॥ उपागता प्राप्तवता

बलवता मुष्टिकेनैवं चाणूरेण तथा सखि ।
क्रियते बलभद्रस्य हास्यमीषद् विलोक्यताम् ॥ ४६ ॥
सख्यः ! पश्यत चाणूरं नियुद्धार्थमयं हरिम्
समुपैति न सन्त्यत्र किं वृद्धा युक्तकारिणः ॥ ४७ ॥
क्व यौवनोन्मुखीभूतसुकुमारतनुर्हरिः ।
क्व वज्रकठिनाभोगशरीरोऽयं महासुरः ॥ ४८ ॥
इमौ सुललितौ रङ्गे वर्त्तेते नवयौवनौ ।
दैतेयमल्लाश्चाणूरप्रमुखास्त्वतिदारुणाः ॥ ४९ ॥
नियुद्धप्राश्निकानान्तु महानेष व्यतिक्रमः ।
यद् बालबलिनोर्युद्धं मध्यस्थैः समुपेक्ष्यते ॥ ५० ॥

पराशर उवाच ।

इत्थं पुरस्त्रीलोकस्य वदतश्चालयन् भुवम् ।
ववल्ग बद्धकक्षोऽन्तर्जनस्य भगवान् हरिः ॥ ५१ ॥
बलभद्रोऽपि चास्फोट्य ववल्ग ललितं यदा ।
पदे पदे तदा भूमिर्यन्न शीर्णा तदद्भुतम् ॥ ५२ ॥
चाणूरेण ततः कृष्णो युयुधेऽमितविक्रमः ।
नियुद्धकुशलो दैत्यो बलभद्रेण मुष्टिकः ॥ ५३ ॥
सन्निपातावधूतैस्तु चाणूरेण समं हरिः ।
प्रक्षेपणैर्मुष्टिभिश्च कीलवज्रनिपातनैः ।
जानुभिश्चाश्मनिर्घातैस्तथा बाहुविघट्टितैः ।
पादोद्धूतैः प्रमृष्टैश्च तयोर्युद्धमभून्महत् ॥ ५४ ॥

॥ ४६ ॥ ४७ ॥ [illegible] ॥ ४८ ॥
॥ ४९ ॥ [illegible] ॥ ५० ॥ [illegible]
[illegible] ॥ ५१ ॥ ५२ ॥ ५३ ॥

अन्योन्यमतिघोरं तत् तयोर्युद्धं सुदारुणम् ।
बलप्राणविनिष्पाद्यं समाजोत्सवसन्निधौ ॥ ५५ ॥
यावद् यावच्च चाणूरो युयुधे हरिणा सह ।
प्राणहानिमवापाग्र्यां तावत्तावल्लवाल्लवम् ॥ ५६ ॥
कृष्णोऽपि युयुधे तेन लीलयैव जगन्मयः ।
खेदाच्चालयता कोपात् निजशेखरकेसरम् ॥ ५७ ॥
बलक्षयं विवृद्धिञ्च दृष्ट्वा चाणूरकृष्णयोः ।
वारयामास तूर्याणि कंसः कोपपरायणः ॥ ५८ ॥
मृदङ्गादिषु तूर्येषु प्रतिषिद्धेषु तत्क्षणात् ।
खे सङ्गतान्यवाद्यन्त देवतूर्याण्यनेकशः ॥ ५९ ॥
जय गोविन्द ! चाणूरं जहि केशव ! दानवम् ।
इत्यन्तर्धानगा देवास्तमूचुरतिहर्षिताः ॥ ६० ॥
चाणूरेण चिरं कालं क्रीडित्वा मधुसूदनः ।
उत्पाट्य भ्रामयामास तद्वधाय कृतोद्यमः ॥ ६१ ॥

संनिपातैः परस्परसंश्लेषैः अवधूतैर्दूरोत्क्षेपणैः क्षेपणैः दृढम् आक्रम्य निरसनैः । मुष्टिभिर्मुष्टिनिपातैः कीलनिपातनैः । कूर्परेण घातैः वज्रनिपातनैः अरत्निद्वयेन घातैः कीलवज्रनिपातैरिति पाठे कीलवत् वज्रवत् निपातो येषामिति मुष्टिविशेषणं पादोद्धूतैः पद्भ्यामुत्क्षेपणैः प्रमृष्टैः अन्योऽन्यसंश्लेषेण पिष्टीकरणैः ॥ ५४ ॥ ५५ ॥ ॥ ५६ ॥ बलेन वीर्येण प्राणेन च देहशक्त्या विनिष्पाद्यम् ॥ ५७ ॥
प्राणहानिं बलक्षयम् अग्र्याम् आद्याम् प्रागल्भ्यात् लवाल्लवं किञ्चित् किञ्चित् ॥५८॥ खेदात् कोपाच्च निजशेखरे शिरोभूषणे स्थितं केसरपुष्पवृन्तं वारं वारं चालयता तेन चाणूरेण ॥ ५९ ॥ ६० ॥ ६१ ॥

भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित् ।
भूमावास्फोटयामास गगने गतजीवितम् ॥ ६२ ॥
भूमावास्फोटितस्तेन चाणूरः शतधा व्रजन् ।
रक्तस्रावमहापङ्कां चकार स तदा भुवम् ॥ ६३ ॥
बलदेवोऽपि तत्कालं मुष्टिकेन महाबलः ।
युयुधे दैत्यमल्लेन चाणूरेण यथा हरिः ॥ ६४ ॥
सोऽप्येनं मुष्टिना मूर्ध्नि वक्षस्याहत्य जानुना ।
पातयित्वा धरापृष्ठे निष्पिपेष गतायुषम् ॥ ६५ ॥
कृष्णस्तोशलकं भूयो मल्लराजं महाबलम् ।
वाममुष्टिप्रहारेण पातयामास भूतले ॥ ६६ ॥
चाणूरे निहते मल्ले मुष्टिके विनिपातिते ।
नीते क्षयं तोशलके सर्वे मल्लाः प्रदुद्रुवुः ॥ ६७ ॥
ववल्गतुस्तदा रङ्गे कृष्णसङ्कर्षणावुभौ ।
समानवयसो गोपान् बलादाकृष्य हर्षितौ ॥ ६८ ॥
कंसोऽपि कोपरक्ताक्षः प्राहोच्चैर्व्यापृतान् नरान् ।
गोपावेतौ समाजौघान्निष्काम्यतां बलादितः ॥ ६९ ॥
नन्दोऽपि गृह्यतां पापो निगडैरायसैरिह ।
अवृद्धार्हेण दण्डेन वसुदेवोऽपि बध्यताम् ॥ ७० ॥
वल्गन्ति गोपाः कृष्णेन ये चेमे सहिताः पुरः ।
गावो ह्रियन्तामेषां यच्चास्ति वसु किञ्चन ॥ ७१ ॥

शतगुणं शतवारम् ॥ ६२ ॥ ६३ ॥ [illegible] [illegible] [illegible] ॥ ६४ ॥ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ववल्गतुः [illegible] ॥ ६८ ॥ व्यापृतान् [illegible] [illegible] समाजौघात् जनसमूहात् [illegible] [illegible] ॥ ६९ ॥

एवमाज्ञापयानस्य प्रहस्य मधुसूदनः ।
उत्पत्यारुह्य तं मञ्चं कंसं जग्राह वेगतः ॥ ७२ ॥
केशेष्वाकृष्य विगलत्किरीटमवनीतले ।
कंसं स पातयामास तस्योपरि पपात च ॥ ७३ ॥
निःशेषजगदाधारगुरुणा पततोपरि ।
कृष्णेन त्याजितः प्राणानुग्रसेनात्मजो नृपः ॥ ७४ ॥
मृतस्य केशेषु तदा गृहीत्वा मधुसूदनः ।
चकर्ष देहं कंसस्य रङ्गमध्ये महाबलः ॥ ७५ ॥
गौरवेणातिमहता परिखा तेन कृष्यता ।
कृता कंसस्य देहेन वेगेनेव महाम्भसः ॥ ७६ ॥
कंसे गृहीते कृष्णेन तद्भ्राताभ्यागतो रुषा ।
सुमाली बलभद्रेण लीलयैव निपातितः ॥ ७७ ॥
ततो हाहाकृतं सर्वमासीत् तद्रङ्गमण्डलम् ।
अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वरम् ॥ ७८ ॥
कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरः ।
देवक्याश्च महाबाहुर्बलभद्रसहायवान् ॥ ७९ ॥
उत्थाप्य वसुदेवस्तं देवकी च जनार्दनम् ।
स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थितौ ॥ ८० ॥

॥ ७० ॥ वञ्च पदम् ॥ ७१ ॥ ७२ ॥ निःशेषस्य जगतो य आधारेण अभिव्याप्य धारणेन गुरुणा ॥ ७४ ॥ मृतस्य देहस्याकर्षणं पित्रोः परितोषार्थम् ॥ ७५ ॥

कृष्यता आकृष्यमाणेन तेन देहेन परिखा कृता ॥ ७६ ॥ ७७ ॥ ७८॥७९॥ स्मृतजन्मोक्तवचनादिति स्तुतोऽहं यत् त्वया पूर्वं पुत्रार्थिन्या तदद्य ते सफलं देवि ! संजातं जातोऽहम् । यत्तवोदरादिति भगवता

वसुदेव उवाच ।

प्रसीद सीदतां नाथ ! देवानां वरद ! प्रभो ! ।
तथावयोः प्रसादेन कृतोद्धारश्च केशव ! ॥ ८१ ॥
आराधितो यद्भगवानवतीर्णो गृहे मम ।
दुर्वृत्तनिधनार्थाय तेन नः पावितं कुलम् ॥ ८२ ॥
त्वमन्तः सर्वभूतानां सर्वभूतेष्ववस्थितः ।
प्रवर्त्तते समस्तात्मन् ! त्वत्तो भूतभविष्यती ॥ ८३ ॥
यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत ! ।
त्वमेव यज्ञो यष्टा च यज्वानां परमेश्वर ! ॥ ८४ ॥
सापह्नवं मम मनो यदेतत् त्वयि जायते ।
देवक्याश्चात्मजप्रीत्या तदत्यन्तविडम्बना ॥ ८५ ॥
त्वं कर्त्ता सर्वभूतानामनादिनिधनो भवान् ।
क्व मे मनुष्यस्यैषा जिह्वा पुत्रेति वक्ष्यति ॥ ८६ ॥

अस्मत्पदे यदुक्तं वचनं तत् स्मृतं याभ्यां तौ ॥ ८० ॥ हे प्रभो ! सीदतां प्रार्थयतां प्रसीद । यतः देवानाञ्च वरो भूभारहरणलक्षणो दत्तः । तथावयोश्च प्रसादेन पुत्रत्वेनोत्पत्त्या कृतोद्धारोऽसि अत [illegible] [illegible] वसुदेव तव तथाभूतोऽसि पादाभ्यां आवयोः प्रसादः कृतः पूर्वं [illegible] परिक्लिष्टावयवयोः न च कृतोद्धारः कृताभिप्रायः एव देवान् इति यावत् [illegible] सीदतां वरदो भवेत्यर्थः ॥ ८१ ॥ किञ्च यद्भगवानभूत् आत्मपुत्रत्वं परिग्रहीतवानसि । आराधित इति तपसाराधितः सन् अवतीर्णः परमेश्वरस्य [illegible] पावनमिति पुत्रत्वात् । किञ्च यदाराधनं विनियोजितं दुर्वृत्तानां निधनाय तं यदृच्छेऽवतीर्णोऽसि ॥ ८२ ॥ ८३ ॥ ८४ ॥ सापह्नवं च देवक्याश्च आत्मजप्रीत्या इति प्रीत्या आत्मजमात्रं भावितवान् न तथैव तदव-भासते ॥ ८५ ॥

जगदेतज्जगन्नाथ ! सम्भूतमखिलं यतः ।
कया युक्त्या विना मायां सोऽस्मत्तः संभविष्यति ॥ ८७ ॥
यस्मिन् प्रतिष्ठितं सर्वं जगत् स्थावरजङ्गमम् ।
स कोष्ठोत्सङ्गशयनो मानुषाज्जायते कथम् ॥ ८८ ॥

स त्वं प्रसीद परमेश्वर ! पाहि विश्वम्
अंशावतारकरणैर्न ममासि पुत्रः ।
आब्रह्मपादपमयं जगदेतदीश !
त्वं नो विमोहयसि किं परमेश्वरात्मन् ! ॥ ८९ ॥
माया विमोहितदृशा तनयो ममेति
कंसात् भयं कृतमपास्तभयातितीव्रम् ।
नीतोऽसि गोकुलमितोऽतिभयाकुलस्य
वृद्धिं गतोऽसि मम नास्ति ममत्वमीश ! ॥ ९० ॥
कर्माणि रुद्रमरुदश्विशतक्रतूनां
साध्यानि यानि न भवन्ति निरीक्षितानि ।

एतदेव स्पष्टयति कथमिति त्रिभिः ॥ ८६ ॥ ८७ ॥ कोष्ठोत्सङ्गशयनः जठरान्तर्वर्ती सन् ॥ ८८ ॥ तदेवं परमेश्वर इति ज्ञात्वा प्रार्थयते स त्वमिति । अंशावतारकरणैर्विश्वं पाहि । जगदेतत् त्वत्तो भवति ॥ ८९ ॥ त्वन्मायामोहितेन मया त्वय्येतावन्तं कालं या पुत्रबुद्धिः कृता अधुना तु सा बुद्धिर्निवृत्तेत्याह मायाविमोहितेति । हे अपास्तभय ॥ ९० ॥ ममत्वाभावे हेतुमाह कर्माणीति । यानि तव कर्माणि रुद्रादीनामपि साध्यानि न भवन्ति निरीक्षितानि च प्रत्यक्षतः सर्वैर्मनोरथैरपि प्रकाश्यन्ते च त्वं साक्षात् विष्णुरेव जगतामुपकाराय

त्वं विष्णुरीश ! जगतामुपकारहेतोः
प्राप्तोऽसि नः परिगतो विगतो हि मोहः ॥ ८१ ॥

एकविंशोऽध्यायः ।

पराशर उवाच ।

तौ समुत्पन्नविज्ञानौ भगवत्कर्मदर्शनात् ।
देवकीवसुदेवौ तु दृष्ट्वा मायां पुनर्हरिः ॥
मोहाय यदुचक्रस्य विततान स वैष्णवीम् ॥ १ ॥
उवाच चाम्ब ! भोस्तात ! चिरादुत्कण्ठितेन मे ।
भवन्तौ कंसभीतेन दृष्टौ सङ्कर्षणेन च ॥ २ ॥
कुर्वतां याति यः कालो मातापित्रोरपूजनम् ।
तत्खण्डमायुषो व्यर्थं असाधूनामुपजायते ॥ ३ ॥
गुरुदेवद्विजातीनां मातापित्रोश्च पूजनम् ।
कुर्वतां सफलं जन्म देहिनां तात ! जायते ॥ ४ ॥
तत् क्षन्तव्यमिदं सर्वमतिक्रमकृतं पितः ! ।
कंसप्रतापवीर्याभ्यामात्मयोः परवश्ययोः ॥ ५ ॥

मोऽध्याय स प्रोक्तोऽसि परिगतः प्रपन्नस्त्रातोऽसि अति विमोहो विगतः विनष्टः ॥ ८१ ॥

मोहाय यदुचक्रस्य च मोहाय मायां वितानविस्तारितवान् ॥ १ ॥
॥ २ ॥ अपूजनं पूजाविरहमयम् कुर्वतामित्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥

पराशर उवाच ।

इत्युक्त्वाथ प्रणम्याभौ यदुवृद्धाननुक्रमात् ।
यथावदभिपूज्याथ चक्रतुः पौरमाननम् ॥ ६ ॥
कंसपत्न्यस्ततः कंसं परिवार्य्य हतं भुवि ।
विलेपुर्मातरश्चास्य दुःखशोकपरिप्लुताः ॥ ७ ॥
बहुप्रकारमत्यर्थं पश्चात्तापातुरो हरिः ।
ताः समाश्वासयामास स्वयमस्राविलेक्षणः ॥ ८ ॥
उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः ।
अभ्यषिञ्चत् तथैवैनं निजराज्ये हतात्मजम् ॥ ९ ॥
राज्याभिषिक्तः कृष्णेन यदुसिंहः सुतस्य सः ।
चकार प्रेतकार्य्याणि ये चान्ये तत्र घातिताः ॥ १० ॥
कृतौर्ध्वदैहिकं चैनं सिंहासनगतं हरिः ।
उवाचाज्ञापय विभो ! यत् कार्य्यमविशङ्कितः ॥ ११ ॥
ययातिशापाद् वंशोऽयमराज्यार्होऽपि साम्प्रतम् ।
मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः ॥ १२ ॥

पराशर उवाच ।

इत्युक्त्वा सोऽस्मरद् वायुमाजगाम स तत्क्षणात् ।
उवाच चैनं भगवान् केशवः कार्य्यमानुषः ॥ १३ ॥
गच्छेन्द्रं ब्रूहि वायो ! त्वमलं गर्वेण वासव ! ।
दीयतामुग्रसेनाय सुधर्म्मा भवता सभा ॥ १४ ॥

पौरमाननं पौराणां सम्माननम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ हतानां कृतमौर्ध्वदैहिकं श्राद्धादि येन तम् ॥ ११ ॥ १२ ॥ कार्य्येण निमित्तेन मानुषः ॥ १३ ॥ वक्ष्यमाणमाह अलं गर्वेणेत्यादि पादोनद्वाभ्याम् ॥ १४ ॥

कृष्णो ब्रवीति राजार्हमेतद्रत्नमनुत्तमम् ।
सुधर्माख्या सभायुक्तमस्यां यदुभिरासितुम् ॥ १५ ॥

पराशर उवाच ।

इत्युक्तः पवनो गत्वा सर्वमाह शचीपतिम् ।
ददौ सोऽपि सुधर्माख्यां सभां वायोः पुरन्दरः ॥ १६ ॥
वायुनापहृतां दिव्यां सभां ते यदुपुङ्गवाः ।
बुभुजुः सर्वरत्नाढ्यां गोविन्दभुजसंश्रयात् ॥ १७ ॥
विदिताखिलविज्ञानौ सर्वज्ञानमयावपि ।
शिष्याचार्यक्रमं वीरौ ख्यापयन्तौ यदूत्तमौ ॥ १८ ॥
ततः सान्दीपनिं काश्यमवन्तीपुरवासिनम् ।
अस्त्रार्थं जग्मतुर्वीरौ बलदेवजनार्दनौ ॥ १९ ॥
तस्य शिष्यत्वमभ्येत्य गुरुवृत्तिपरौ हि तौ ।
दर्शयाञ्चक्रतुर्वीरावाचारमखिले जने ॥ २० ॥
सरहस्यं धनुर्वेदं ससंग्रहमधीयताम् ।
अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज ॥ २१ ॥
सान्दीपनिरसम्भाव्यं तयोः कर्मातिमानुषम् ।
विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ ॥ २२ ॥
अस्त्रग्राममशेषञ्च प्रोक्तमात्रमवाप्य तौ ।
ऊचतुर्व्रियतां या ते दातव्या गुरुदक्षिणा ॥ २३ ॥
सोऽप्यतीन्द्रियमालोक्य तयोः कर्म महामतिः ।
अयाचत मृतं पुत्रं प्रभासे लवणार्णवे ॥ २४ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ [illegible] ॥ १९ ॥ २० ॥
[illegible] । [illegible]

गृहीतास्त्रौ ततस्तौ तु सार्घ्यपात्रो महोदधिः ।
उवाच न मया पुत्रो हृतः सान्दीपनेरिति ॥ २५ ॥
दैत्यः पञ्चजनो नाम शङ्खरूपः स बालकम् ।
जग्राह सोऽस्ति सलिले ममैवासुरसूदन ॥ २६ ॥
इत्युक्तोऽन्तर्जलं गत्वा हत्वा पञ्चजनं खलम् ।
कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम् ॥ २७ ॥
यस्य नादेन दैत्यानां बलहानिरजायत ।
देवानां ववृधे तेजो यात्यधर्मश्च संक्षयम् ॥ २८ ॥
तं पाञ्चजन्यमापूर्य गत्वा यमपुरीं हरिः ।
बलदेवश्च बलवान् जित्वा वैवस्वतं यमम् ॥ २९ ॥
तं बालं यातनासंस्थं यथापूर्वशरीरिणम् ।
पित्रे प्रदत्तवान् कृष्णो बलश्च बलिनां वरः ॥ ३० ॥
मथुरां च पुनः प्राप्तावुग्रसेनेन पालिताम् ।
प्रहृष्टपुरुषस्त्रीकावुभौ रामजनार्दनौ ॥ ३१ ॥

गृहीतवन्तौ ॥ २१ ॥ २२ ॥ अतीन्द्रियं अन्यत्राऽदृष्टचरम् ॥ २४ ॥ यथापूर्वशरीरिणं पूर्वं तस्य यादृशं शरीरमासीत्तादृशशरीरयुक्तं स्वमायया निर्माय ददौ ॥ ३० ॥ ३१ ॥

द्वाविंशोऽध्यायः ।

पराशर उवाच ।

जरासन्धसुते कंस उपयेमे महाबलः ।
अस्तिं प्राप्तिं च मैत्रेय तयोर्भर्तृहणं हरिम् ॥ १ ॥
महाबलपरीवारो मगधाधिपतिर्बली ।
हन्तुमभ्याययौ कोपाज्जरासन्धः स यादवम् ॥ २ ॥
उपेत्य मथुरां सोऽथ रुरोध मगधेश्वरः ।
अक्षौहिणीभिः सैन्यस्य त्रयोविंशतिभिर्वृतः ॥ ३ ॥
निष्क्रम्याल्पपरीवारावुभौ रामजनार्दनौ ।
युयुधाते समं तस्य बलिनौ बलिसैनिकैः ॥ ४ ॥
ततो रामश्च कृष्णश्च चक्राते मतिमुत्तमाम् ।
आयुधानां पुराणानामादाने मुनिसत्तम ॥ ५ ॥
अनन्तरं हरेः शार्ङ्गं तूणौ चाक्षयसायकौ ।
आकाशादागतौ वीर तथा कौमोदकी गदा ॥ ६ ॥
हलञ्च बलभद्रस्य गगनादागतं करे ।
मनसोऽभिमतं विप्र सौनन्दं मुसलं तथा ॥ ७ ॥
ततो युद्धे पराजित्य ससैन्यं मगधाधिपम् ।
पुरीं विविशतुर्वीरावुभौ रामजनार्दनौ ॥ ८ ॥

अस्तिप्राप्ती जरासन्धस्य सुते । तयोर्भर्तृहणं [illegible] ॥ १ ॥ [illegible]
मगधाधिपतिर्जरासन्धः [illegible] यादवैः सह हरिम् ॥ २ ॥ [illegible]
[illegible] अक्षौहिणीभिर्वृतः ॥ ३ ॥ [illegible]
॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ [illegible]

जिते तस्मिन् सुदुर्वृत्ते जरासन्धे महामुने ! ।
जीवमाने गते कृष्णस्तं नामन्यत निर्जितम् ॥ ९ ॥
पुनरप्याजगामाथ जरासन्धो बलान्वितः ।
जितश्च रामकृष्णाभ्यामपक्रान्तो द्विजोत्तम ! ॥ १० ॥
दश चाष्टौ च संग्रामानेवमत्यन्तदुर्मदः ।
यदुभिर्मागधो राजा चक्रे कृष्णपुरोगमैः ॥ ११ ॥
सर्वेष्वेतेषु युद्धेषु यादवैः स पराजितः ।
अपक्रान्तो जरासन्धः स्वल्पसैन्यैर्बलाधिकः ॥ १२ ॥
तद् बलं यादवानां तैरजितं यदनेकशः ।
तत्त्तु सन्निधिमाहात्म्यं विष्णोरंशस्य चक्रिणः ॥१३॥
मनुष्यधर्मशीलस्य लीला सा जगतः पतेः ।
अस्त्राण्यनेकरूपाणि यदरातिषु मुञ्चति ॥ १४ ॥
मनसैव जगत्सृष्टिं संहारञ्च करोति यः ।
तस्यारिपक्षक्षपणे कोऽयमुद्यमविस्तरः ॥ १५ ॥
तथापि यो मनुष्याणां धर्मस्तमनुवर्त्तते ।
कुर्वन् बलवता सन्धिं हीनैर्युद्धं करोत्यसौ ॥ १६ ॥
साम चोपप्रदानञ्च तथा भेदं प्रदर्शयन् ।
करोति दण्डपातञ्च क्वचिदेव पलायनम् ॥ १७ ॥

वध्यत्वाभिमानात् । पाठान्तरे तैनैव निर्जितमात्मानममन्यत इत्यर्थः ॥ ९ ॥
॥ ११ ॥ ननु चक्रिणः सन्निधिमात्रमाहात्म्यं तत्र भवति कथमे-
वामेकविधास्त्रप्रयोगमात्रमाह । मनुष्यधर्मशीलस्येति ॥ १४ ॥ लीलात्व-

मनुष्यदेहिनां चेष्टामित्येवमनुवर्त्ततः ।
लीला जगत्पतेस्तस्य छन्दतः संप्रवर्त्तते ॥ १८ ॥

त्रयोविंशोऽध्यायः ।

पराशर उवाच ।

गार्ग्यं गोष्ठे स्थितं श्यालः षण्ढ इत्युक्तवान् द्विज ।
यदूनां सन्निधौ सर्वे जहसुर्यादवास्तदा ॥ १ ॥
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः ।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् ॥ २ ॥
आराधयन् महादेवं सोऽयश्चूर्णमभक्षयत् ।
ददौ वरञ्च तुष्टोऽस्मै वर्षे तु द्वादशे हरः ॥ ३ ॥
सभाजयामास च तं यवनेशो ह्यनात्मजः ।
तद्योषित्सङ्गमाच्चास्य पुत्रोऽभूदलिसन्निभः ॥ ४ ॥

[illegible] ॥ १५ ॥ १६ ॥ १७ ॥
[illegible] ॥ १८ ॥

[illegible] ॥ १ ॥ २ ॥ [illegible] ॥ ३ ॥ [illegible]

तं कालयवनं नाम राज्ये स्वे यवनेश्वरः ।
अभिषिच्य वनं यातो वज्राग्रकठिनोरसम् ॥ ५ ॥
स तु वीर्य्यमदोन्मत्तः पृथिव्यां बलिनो नृपान् ।
पप्रच्छ नारदस्तस्मै कथयामास यादवान् ॥ ६ ॥
म्लेच्छकोटिसहस्राणां सहस्रैर्बहुभिर्वृतः ।
गजाश्वरथपत्त्याढ्यैश्चकार परमोद्यमम् ॥ ७ ॥
प्रययौ चाव्यवच्छिन्नं छिन्नयानो दिने दिने ।
यादवान् प्रति सामर्षो मैत्रेय ! मथुरापुरीम् ॥ ८ ॥
कृष्णोऽपि चिन्तयामास क्षपितं यादवं बलम् ।
यवनेन रणे गम्यं मागधस्य भविष्यति ॥ ९ ॥
मागधस्य बलं क्षीणं स कालयवनो बली ।
हन्ता तदिदमायातं यदूनां व्यसनं द्विधा ॥ १० ॥
तस्मात् दुर्गं करिष्यामि यदूनामतिदुर्जयम् ।
स्त्रियोऽपि यत्र युद्धेयुः किं पुनर्वृष्णिपुङ्गवाः ॥ ११ ॥
मयि मत्ते प्रमत्ते वा सुप्ते प्रवसिते तथा ।
यादवाभिभवं दुष्टा मा कुर्वन् परयोधिकाः ॥ १२ ॥

यवनेशः अभार्य्यायां पुत्रोत्पादनाय पार्श्वस्थान् हृञ्जयामास अवि-वाहितः भक्तवत् अद्भुतः ॥ ४ ॥ वज्रायतत् कठिनोरसम् ॥ ५ । ६ । ७ ॥ छिन्नयान इति अनन्तरान्तरा यानं गजाश्वादि वाहनं त्यक्त्वा याहनान्तरेण पूर्वमेव तत्र तत्र स्थापितेनाव्यवच्छिन्न यथा भवत्येवं त्वरया मथुरां प्रययावित्यर्थः ॥ ८ ॥

कृष्णोऽपीति । एकतः कालयवने अन्यतश्च मागधे प्राप्नुवति श्रीकृष्णश्चिन्तयामास कथं यवनेन रणे युद्धे तेन क्षपितं क्षीणप्रायं यादवं बलं मागधस्य गम्यं साध्यम् ॥ ९ ॥ तेन च क्षपितं स काल-

इति सञ्चिन्त्य गोविन्दो योजनानि महोदधिम् ।
ययाचे द्वादश पुरीं द्वारकां तत्र निर्ममे ॥ १३ ॥
महोद्यानां महावप्रां तडागशतशोभिताम् ।
प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीम् ॥ १४ ॥
मथुरावासिनो लोकांस्तत्रानीय जनार्दनः ।
आसन्ने कालयवने मथुरां च स्वयं ययौ ॥ १५ ॥
बहिरावासिते सैन्ये मथुराया निरायुधः ।
निर्जगाम स गोविन्दो ददर्श यवनेश्वरम् ॥ १६ ॥
स ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः ।
अनुयातो महायोगिचेतोभिः प्राप्यते न यः ॥ १७ ॥
तेनानुयातः कृष्णोऽपि प्रविवेश महागुहाम् ।
यत्र शेते महावीर्यो मुचुकुन्दो नरेश्वरः ॥ १८ ॥
सोऽपि प्रविश्य यवनो दृष्ट्वा शय्यागतं नरम् ।
पादेन ताडयामास मत्वा कृष्णं सुदुर्मतिः ॥ १९ ॥
दृष्टमात्रश्च तेनासौ जज्वाल यवनोऽग्निना ।
तत्क्रोधजेन मैत्रेय भस्मीभूतश्च तत्क्षणात् ॥ २० ॥

[illegible] ॥ १२ ॥ तस्माद् दुर्गं [illegible] ॥ १३ ॥ [illegible] ॥ १४ ॥ [illegible] ॥ १५ ॥ बहिरावासिते [illegible] निर्गमित ॥ १६ ॥

स यवनः वासुदेवं [illegible] अनुयातः [illegible] महायोगिनामपि चेतोभिरपि यो न प्राप्यते तम् ॥ १७ ॥

स हि देवासुरे युद्धे गतो जित्वा महासुरान् ।
निद्रार्त्तः सुमहाकालं निद्रां वव्रे वरं सुरान् ॥ २१ ॥
प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति ।
देहजेनाग्निना सद्यः स तु भस्मीभविष्यति ॥ २२ ॥
एवं दग्ध्वा स तं पापं दृष्ट्वा च मधुसूदनम् ।
कस्त्वमित्याह सोऽप्याह जातोऽहं शशिनः कुले ।
वसुदेवस्य तनयो यदुवंशसमुद्भवः ॥ २३ ॥
मुचुकुन्दोऽपि तत्रासौ वृद्धगर्गवचोऽस्मरत् ।
संस्मृत्य प्रणिपत्यैनं सर्वभूतेश्वरं हरिम् ।
प्राह ज्ञातो भवान् विष्णोरंशस्त्वं परमेश्वरः ॥ २४ ॥
पुरा गर्गेण कथितमष्टाविंशतिमे युगे ।
द्वापरान्ते हरेर्जन्म यदोर्वंशे भविष्यति ॥ २५ ॥
स त्वं प्राप्तो न सन्देहो मर्त्यानामुपकारकृत् ।
तथाहि सुमहत्तेजो नालं सोढुमहं तव ॥ २६ ॥
तथाहि सजलाम्भोदनादधीरतरं तव ।
वाक्यं नमति चैवोर्वी यस्य पादप्रपीडिता ॥ २७ ॥
देवासुरे महायुद्धे दैत्यसैन्ये महाभटाः ।
न शेकुर्मम तत्तेजस्त्वत्तेजो न सहाम्यहम् ॥ २८ ॥

॥ १८ ॥ १९ ॥ तत्क्रोधजेनेति तत्क्रोधोद्दीपितेन स्वदेहजेनेत्यर्थः ॥ २० ॥ निद्रा भयाभावे कार्य्याभिनिवेशाभावाच्च भवतीति द्वाभ्याम् ॥ २१ ॥ हरेर्जन्म भविष्यतीति मे गर्गेण कथितम् ॥ २५ ॥ गर्गेण कथितो हरिर्जन्मनेत्यन्म विष्णुरित्याह तथाहीति सार्द्धाभ्याम् ॥ २८ ॥ त्वं हि मधुसू-

संसारपतितस्यैको जन्तोस्त्वं शरणं परम्।
स प्रसीद प्रपन्नार्त्तिहर्त्ता हर ममाशुभम्॥ २८॥
त्वं पयोनिधयः शैलाः सरितस्त्वं वनानि च।
मेदिनी गगनं वायुरापोऽग्निस्त्वं तथा मनः॥ ३०॥
बुद्धिरव्याकृतं प्राणाः प्राणेशस्त्वं तथा पुमान्।
पुंसः परतरं यच्च व्याप्यजन्मविकारि यत्॥ ३१॥
शब्दादिहीनमजरममेयं क्षयवर्जितम्।
अवृद्धिनाशं तद्ब्रह्म त्वमाद्यन्तविवर्जितम्॥ ३२॥
त्वत्तोऽमराः सपितरो यक्षगन्धर्वकिन्नराः।
सिद्धाश्चाप्सरसस्त्वत्तो मनुष्याः पशवः खगाः॥ ३३॥
सरीसृपा मृगाः सर्वे त्वत्तः सर्वे महीरुहाः।
यच्च भूतं भविष्यच्च किञ्चिदत्र चराचरम्॥ ३४॥
अमूर्त्तं मूर्त्तमथवा स्थूलं सूक्ष्मतरं स्थितम्।
तत्सर्वं त्वं जगत्कर्त्ता नास्ति किञ्चित् त्वया विना॥ ३५॥
मया संसारचक्रेऽस्मिन् भ्रमता भगवन्! सदा।
तापत्रयाभिभूतेन न प्राप्ता निर्वृतिः क्वचित्॥ ३६॥
दुःखान्येव सुखानीति मृगतृष्णाजलाशयाः।
मया नाथ! गृहीतानि तानि तापाय चाभवन्॥ ३७
राज्यमुर्वी बलं कोशो मित्रपक्षस्तथात्मजाः।

ऽभिभूतो जनो ममाशुभं हर॥ २८॥ ३०॥ [illegible]
[illegible] ॥ ३१॥ [illegible]
[illegible] ॥ ३२॥ [illegible]

भार्य्या भृत्यजना ये च शब्दाद्या विषयाः प्रभो ।। ३८ ।
सुखबुद्ध्या मया सर्वं गृहीतमिदमव्यय ! ।
परिणामे तदेवेश ! तापात्मकमभून्मम ॥ ३९ ॥
देवलोकमिमं प्राप्ता नाथ ! देवगणोऽप्ययम ।
मत्तः साहाय्यकामोऽभूच्छाश्वती कुत्र निर्वृतिः ॥ ४० ॥
त्वामनाराध्य जगतां सर्वेषां प्रभवास्पदम ।
शाश्वती प्राप्यते केन परमेश्वर ! निर्वृतिः ॥ ४१ ॥
त्वन्मायामूढमनसो जन्ममृत्युजरादिकान् ।
अवाप्य तापान् पश्यन्ति प्रेतराजाननं नराः ॥ ४२ ॥
ततो निजक्रियासूतिं नरकेष्वतिदारुणम ।
प्राप्नुवन्ति नरा दुःखमस्वरूपमिदन्तव ॥ ४३ ॥
अहमत्यन्तविषयी मोहितस्तव मायया ।
ममत्वगर्वगर्त्तान्तर्भ्रमामि परमेश्वर ! ॥ ४४ ॥

सोऽहं त्वां शरणमपारमीशमीड्यं
संप्राप्तः परमपदं यतो न किञ्चित् ।
संसारश्रमपरितापतप्तचेता
निर्वाणे परिणतधाम्नि साभिलाषः ॥ ४५ ॥

यथा दुःखान्येव सुखबुद्ध्या गृहीतानि ॥ ३९ ॥ ४१ ॥ ततो नरकेषु निजक्रियासूतिं इव कर्मजं दुःखं प्राप्नुवन्ति तव स्वरूपमजानन्तः ॥४३॥ ममत्वञ्च तन्निमित्तो गर्वश्च एव गर्त्तं तन्मध्ये भ्रमामि ॥ ४४ ॥ परमपदरूपत्वं यतस्त्वत्तो न किञ्चिद् अतिरिक्तमस्ति तं त्वां परिणतधाम्नि परिपक्वयोगिनामाश्रये निर्वाणे ॥ ४५ ॥

चतुर्विंशोऽध्यायः ।

पराशर उवाच ।

इत्थं स्तुतस्तदा तेन मुचुकुन्देन धीमता ।
प्राहेशः सर्वभूतानामनादिनिधनो हरिः ॥ १ ॥
यथाभिवाञ्छितान् दिव्यान् गच्छ लोकान् नरेश्वर ।
अव्याहतपरैश्वर्यो मत्प्रसादोपबृंहितः ॥ २ ॥
भुक्त्वा भोगान् महादिव्यान् भविष्यसि महाकुले ।
जातिस्मरो मत्प्रसादात् ततः मोक्षमवाप्स्यसि ॥ ३ ॥

पराशर उवाच ।

इत्युक्तः प्रणिपत्येशं जगतामच्युतं नृपः ।
गुहामुखाद् विनिष्क्रान्तो ददृशे सोऽल्पकान् नरान् ॥ ४ ॥
ततः कलियुगं ज्ञात्वा प्राप्तं तप्तुं नृपस्ततः ।
नरनारायणस्थानं प्रययौ गन्धमादनम् ॥ ५ ॥
कृष्णोऽपि घातयित्वारिमुपायेन हि तद्बलम् ।
जग्राह मथुरामेत्य हस्त्यश्वस्यन्दनोज्ज्वलम् ॥ ६ ॥
आनीय चोग्रसेनाय द्वारवत्यां न्यवेदयत् ।
पराभिभवनिःशङ्कं बभूव च यदोः कुलम् ॥ ७ ॥

[illegible] । [illegible] । यथाभिवाञ्छितानिति द्वाभ्याम् ॥ १ ॥ २ ॥ [illegible] इति द्वाभ्याम् ॥ ४ ॥ ५ ॥ उपायेन [illegible] ॥ ६ ॥ ७ ॥ [illegible]

बलदेवोऽपि मैत्रेय ! प्रशान्ताखिलविग्रहः ।
ज्ञातिसंदर्शनोत्कण्ठः प्रययौ नन्दगोकुलम् ॥ ८ ॥
ततो गोपीश्च गोपांश्च यथापूर्वममित्रजित् ।
तथैवाभ्यवदत् प्रेम्णा बहुमानपुरःसरम् ॥ ९ ॥
कैश्चापि संपरिष्वक्तः कांश्चित् स परिषस्वजे ।
हास्यं चक्रे समं कैश्चिद् गोपैर्गोपीजनैस्तथा ॥ १० ॥
प्रियाण्यनेकान्यवदन् गोपास्तत्र हलायुधम् ।
गोप्यश्च प्रेमकुपिताः प्रोचुः सेर्ष्यमथापराः ॥ ११ ॥
गोप्यः पप्रच्छुरपरा नागरीजनवल्लभः ।
कच्चिदास्ते सुखं कृष्णश्चलत्प्रेमलवात्मकः ॥ १२ ॥
अस्मच्चेष्टामुपहसन् कच्चिन्न पुरयोषिताम् ।
सौभाग्यमानमधिकं करोति क्षणसौहृदः ॥ १३ ॥

एवमाशङ्क्यैव गिरिगुहां गत्वा यवनं घातयित्वा द्वारकामागतः । तथा रामोऽप्येकाकी गोवर्धनं गत्वा कालिन्द्याकर्षणादिकं कृत्वागत इति वक्ष्यन्नाह बलदेवोऽपीत्यादिना यावदुत्तराध्यायसमाप्ति ज्ञातीनां दर्शने उत्कण्ठः सोत्कण्ठः औत्सुक्यवान् ॥ ८ ॥ ९ ॥ ज्येष्ठैः संपरिष्वक्तः कनिष्ठांस्तु परिषस्वजे समैर्हास्यं चक्रे ॥ १० ॥

हलायुधं प्रति काश्चिद् गोप्यः कृष्णवल्लभाः प्रेमकुपिताः प्रोचुः ता एवापराः सेर्ष्यं प्रोचुः ॥ ११ ॥ तत्र कृष्णवल्लभानां प्रश्नमाह गोप्य इत्यादि सप्तभिः । चलत्प्रेमलव आत्मा स्वभावो यस्य सः ॥ १२ ॥ तदेवाह । अस्मदिति अस्माकं ग्राम्याणां चेष्टामुपहसन् सौभाग्यमानं सौभाग्यगर्वमधिकं कच्चिन्न करोति प्रायशः करोतीति सेर्ष्यः प्रश्नः ॥ १३ ॥ विदग्धमन्या आहुः काश्चिदिति गीतेनानुगममनुहसितं स्वगीता-

कच्चित् स्मरति नः कृष्णो गीतानुगमनं कलम् ।
अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति ॥ १४ ॥
अथवा किं तदालापैरन्याः क्रियन्तां कथाः ।
तस्यास्माभिर्विना तेन विनास्माकं भविष्यति ॥ १५ ॥
पिता माता तथा भ्राता भर्त्ता बन्धुजनश्च किम् ।
न त्यक्तस्तत्कृतेऽस्माभिरकृतज्ञध्वजो हि सः ॥ १६ ॥
तथापि कच्चिदालापमिहागमनसंश्रयम् ।
करोति कृष्णो वक्तव्यं भवता कृष्ण ! नानृतम् ॥ १७ ॥
दामोदरोऽसौ गोविन्दः पुरस्त्रीन्यस्तमानसः ।
अपेतप्रीतिरस्मासु दुर्दर्शः प्रतिभाति नः ॥ १८ ॥

पराशर उवाच ।

आमन्त्रितः स कृष्णेति पुनर्दामोदरेति च ।
जहसुः सुस्वरं गोप्यो हरिणा हृतचेतसः ॥ १९ ॥

गुरुवचनविदूगानं कलं मधुरं कच्चित् स्मरति न [illegible] [illegible] ॥ अथवा मातरं [illegible] ॥ १४ ॥

[illegible] अथवेति । [illegible] विना [illegible] विना [illegible] ॥ १५ ॥ [illegible] पिता मातेति । [illegible] ॥ १६ ॥ [illegible] तथापीति । [illegible] ॥ १७ ॥ [illegible] दामोदर इति [illegible] दामोदर गोविन्द इति [illegible] दुर्दर्शः प्रतिभातीति [illegible] ॥ १८ ॥ [illegible] हे कृष्ण ! हे दामोदरेति च [illegible]

सन्देशैः साममधुरैः प्रेमगर्भैरगर्वितैः ।
रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः ॥ २० ॥
गोपैश्च पूर्ववद्रामः परिहासमनोरमाः ।
कथाश्चकार रेमे च सह तैर्व्रजभूमिषु ॥ २१ ॥

पञ्चविंशोऽध्यायः ।

पराशर उवाच ।

वने विचरतस्तस्य सह गोपैर्महात्मनः ।
मानुषच्छद्मरूपस्य शेषस्य धरणीभृतः ॥ १ ॥
निष्पादितोरुकार्यस्य कार्येणोर्वीविचारिणः ।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् ॥ २ ॥
अभीष्टा सर्वदा यस्य मदिरे ! त्वं महौजसः ।
अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ! ॥ ३ ॥
इत्युक्ता वारुणी तेन सन्निधानमथाकरोत् ।
वृन्दावनवनोत्पन्नकदम्बतरुकोटरे ॥ ४ ॥

एवाभिमन्त्रितवत्याभि यतो हरिणा हृतचेतसः ततः सहसा स्वीयं कृष्णनाम्ना रामसम्बोधनरूपं मोहं प्राप्ता इत्यर्थः ॥ १९ ॥ रामेण प्रियोक्त्या मधुरैः कृष्णस्य सन्देशैराश्वासिताः ॥ २१ ॥

विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम् ।
आघ्राय मदिरातर्षमवापाग्र्यं पुरातनम् ॥ ५ ॥
ततः कदम्बात् सहसा मद्यधारां स लाङ्गली ।
पतन्तीं वीक्ष्य मैत्रेय प्रययौ परमां मुदम् ॥ ६ ॥
पपौ च गोपगोपीभिः समवेतो मुदान्वितः ।
उपगीयमानो ललितं गीतवाद्यविशारदैः ॥ ७ ॥
समन्तात्प्रवघर्माम्भःकणिकामौक्तिकोज्ज्वलः ।
आगच्छ यमुने स्नातुमिच्छामीत्याह विह्वलः ॥ ८ ॥
तस्य वाचं नदी सा च मत्तोक्तामवमन्य वै ।
नाजगाम ततः क्रुद्धो हलं जग्राह लाङ्गली ॥ ९ ॥
गृहीत्वा तां तटे तेन चकर्ष मदविह्वलः ।
पापे नायासि नायासि गम्यतामिच्छयान्यतः ॥ १० ॥
साकृष्टा तेन सहसा मार्गं सन्त्यज्य निम्नगा ।
यत्रास्ते बलभद्रोऽसौ प्लावयामास तद्वनम् ॥ ११ ॥
शरीरिणी तदाभ्येत्य त्रासविह्वललोचना ।
प्रसीदेत्यब्रवीद्राम मुञ्च मां मुषलायुध ॥ १२ ॥
सोऽब्रवीदवजानासि मम शौर्यबले नदि ।
सोऽहं त्वां हलपातेन विनेष्यामि सहस्रधा ॥ १३ ॥

मदिरागन्धं पानेच्छाम् ॥ ५ ॥ ६ ॥ ७ ॥ घर्माम्भः स्वेदाम्भः कणिका एव मौक्तिकानि तैरुज्ज्वलः । [illegible] ॥ ८ ॥ ९ ॥ [illegible] नायासि नायासीति वीप्सा यदि [illegible] ॥ १० ॥ ११ ॥ शौर्यबले शौर्य [illegible]

पराशर उवाच।

इत्युक्तः सातिसंत्रासात् तया नद्या प्रसादितः।
भूभागे प्लाविते तस्मिन् मुमोच यमुनां बलः ॥ १४ ॥
ततः स्नातस्य वै कान्तिराजगाम महात्मनः।
अवतंसोत्पलं चारु गृहीत्वैकञ्च कुण्डलम् ॥ १५ ॥
वरुणप्रहितां चास्मै मालामम्लानपङ्कजाम्।
समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत ॥ १६ ॥
कृतावतंसः स तदा चारुकुण्डलभूषितः।
नीलाम्बरधरः स्रग्वी शुशुभे कान्तिसंयुतः ॥ १७ ॥
इत्थं विभूषितो रेमे तत्र रामस्तथा व्रजे
मासद्वयेन यातश्च पुनः स द्वारकां पुरीम् ॥ १८ ॥
रेवतीं नाम तनयां रैवतस्य महीपतेः।
उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ ॥ १९ ॥

मत्स्नावज्जामापि ॥ १२ ॥ १४ ॥ कान्तिर्लक्ष्मीः अवतंसोत्पलम् एकञ्च वर्णस्वाभरणांशुतपनम् अन्यस्य चैकं कुण्डलं गृहीत्वा तथा हरिणे लक्ष्मीराक्यम। सातकुम्भमयमेकं कुण्डलं रत्नभूषणम्। आदित्यस्य यथादि दिव्यं अवश्यभूषणम्। देवमां पतिगृहीत्वा पौराणी भूषणक्रियामिति ॥ १५ ॥ १८ ॥ अथ श्रीकृष्णस्य विवाहान् वक्तुं व्यवहादौ तावत् ज्येष्ठस्य श्रीरामस्य पूर्वोक्तं विवाहादिकमनुवादयति रेवतीमिति ॥ १९ ॥

षड्विंशोऽध्यायः ।

पराशर उवाच ।

भीष्मकः कुण्डिने राजा विदर्भविषयेऽभवत् ।
रुक्मी तस्याभवत् पुत्रो रुक्मिणी च वराङ्गना ॥ १ ॥
रुक्मिणीं चकमे कृष्णः सा च तं चारुहासिनी ।
न ददौ याचते चैनां रुक्मी द्वेषेण चक्रिणे ॥ २ ॥
ददौ च शिशुपालाय जरासन्धप्रचोदितः ।
भीष्मको रुक्मिणा सार्द्धं रुक्मिणीमुरुविक्रमः ॥ ३ ॥
विवाहार्थं ततः सर्वे जरासन्धमुखा नृपाः ।
भीष्मकस्य पुरं जग्मुः शिशुपालप्रियैषिणः ॥ ४ ॥
कृष्णोऽपि बलभद्राद्यैर्यादवैर्बहुभिर्वृतः ।
प्रययौ कुण्डिनं द्रष्टुं विवाहञ्चैव भूभृतः ॥ ५ ॥
श्वोभाविनि विवाहे तु तां कन्यां हृतवान् हरिः ।
विपक्षभारमासज्य रामाद्येष्वथ बन्धुषु ॥ ६ ॥
ततश्च पौण्ड्रकः श्रीमान् दन्तवक्त्रो विदूरथः ।
शिशुपालजरासन्धशाल्वाद्याश्च महीभृतः ॥ ७ ॥
कुपितास्ते हरिं हन्तुं चक्रुरुद्योगमुत्तमम् ।

॥ १ ॥ २ ॥ रुक्मिणीं कन्यां ददौ चेति याचा दत्तवानित्यर्थः ॥३॥
॥ ४ ॥ ५ ॥ पुराद्बहिरिन्द्राण्याराधनार्थं विनिर्गतां हृतवान् हरिः ।
विपक्षभारं विपक्षैः सह कार्यं युद्धादिकं तस्य रामादिष्वासज्य आरोप्य

निर्जिताश्च समागम्य रामाद्यैर्यदुपुङ्गवैः ॥ ८ ॥
कुण्डिनं न प्रवेक्ष्यामि अहत्वा युधि केशवम् ।
कृत्वा प्रतिज्ञां रुक्मी च हन्तुं कृष्णमभिद्रुतः ॥ ९ ॥
हत्वा बलं सनागाश्वपत्तिस्यन्दनसंकुलम् ।
निर्जितः पातितश्चोर्व्यां लीलयैव स चक्रिणा ॥ १० ॥
हन्तुं कृतमतिः कृष्णो रुक्मिणं युद्धदुर्मदम् ।
प्रणम्य याचितो ब्रह्मन् ! रुक्मिण्या भगवान् हरिः ॥ ११ ॥
एक एव मम भ्राता न हन्तव्यस्त्वयाधुना ।
कोपं नियम्य देवेश ! भ्रातृभिक्षा प्रदीयताम् ॥ १२ ॥
इत्युक्तेन परित्यक्तः कृष्णेनाक्लिष्टकर्मणा ।
रुक्मी भोजकटं नाम पुरं कृत्वावसत् तदा ॥ १३ ॥
निर्जित्य रुक्मिणं सम्यगुपयेमे स रुक्मिणीम् ।
राक्षसेन विवाहेन सम्प्राप्तां मधुसूदनः ॥ १४ ॥
तस्यां जज्ञेऽथ प्रद्युम्नो मदनांशः स वीर्य्यवान् ।
जहार शम्बरो यं वै यो जघान च शंबरम् ॥ १५ ॥



॥ ६ ॥ ७ ॥ ८ । कुण्डिनं न प्रवेक्ष्यामीति प्रतिज्ञां कृत्वा रुक्मी अन्वधावत् ॥ ९ ॥ पातित एव केशवं न तु हतः रुक्मिणीभ्रातृत्वात् ॥ १० ॥ ११ ॥ ११ ॥ १२ ॥ राक्षसेन राक्षसो युद्धहरणादितिस्मृति-प्रसिद्धेन ॥ १४ ॥ मदनांशः कामस्यांशभूतः । अत एव पूर्ववैरमनुस्मरन् शंबरोऽयं जहार यश्च तं हतवान् ॥ १५ ॥

सप्तविंशोऽध्यायः।

मैत्रेय उवाच।

शंवरेण हृतो वीरः प्रद्युम्नः स कथं मुने!।
शम्बरश्च महावीर्य्यः प्रद्युम्नेन कथं हतः॥ १॥

पराशर उवाच।

षष्ठेऽह्नि जातमात्रन्तु प्रद्युम्नं सूतिकागृहात्।
ममैष हन्तेति मुने! हृतवान् कालशंवरः॥ २॥
हृत्वा चिक्षेप चैवैनं ग्राहाग्रे लवणार्णवे।
कल्लोलजनितावर्त्ते सुघोरे मकरालये॥ ३॥
पतितं तत्र चैवैका मत्स्या जग्राह बालकम्।
न ममार च तस्यापि जठरानलदीपितः॥ ४॥
मत्स्यबन्धैश्च मत्स्योऽसौ मत्स्यैरन्यैः सह द्विज!।
घातितोऽसुरवर्य्याय शंवराय निवेदितः॥ ५॥
तस्य मायावती नाम पत्नी सर्वगृहेश्वरी।
कारयामास सूदानामाधिपत्यमनिन्दिता॥ ६॥

कालशंवरः मृत्युतुल्यः शंवरः॥ २॥ ग्राहैरुग्रे भयङ्करे॥ ३॥ न ममार भगवद्वीर्य्यजत्वात्। कामावतारस्य न हि कामो जठराग्निभिः दह्यते॥ ४॥ मत्स्यबन्धैर्धीवरैः॥ ५॥ तस्य मायावती नाम पत्न्यासीत् मायारूपेण तस्य पत्नीत्वं मायाप्रदर्शनात् तत्पत्नीति व्यवहारः। यद्वा नाम पत्नी पत्नी नाममात्रेणेत्यर्थः। वस्तुतस्तु रतिः स्त्रिया पतिव्रता कामस्य भार्य्या तस्याः एतस्यापि स्पर्शदोषविरहात्ति॥ ६॥

दारिते मत्स्यजठरे सा ददर्शातिशोभनम् ।
कुमारं मन्मथतरोर्दग्धस्य प्रथमाङ्कुरम् ॥ ७ ॥
कोऽयं कथमयं मत्स्यजठरं समुपागतः ।
इत्येवं कौतुकाविष्टां तां तन्वीं प्राह नारदः ॥ ८ ॥
अयं समस्तजगतः सृतिसंहारकारिणः ।
शम्बरेण हृतः कृष्णतनयः सूतिकागृहात् ॥ ९ ॥
क्षिप्तः समुद्रे मत्स्येन निगीर्णस्ते वशं गतः ।
नररत्नमिदं सुभ्रु ! विस्रब्धा परिपालय ॥ १० ॥

पराशर उवाच ।

नारदेनैवमुक्ता सा पालयामास तं शिशुम् ।
बाल्यादेवातिरागेण रूपातिशयमोहिता ॥ ११ ॥
स यदा यौवनाभोगभूषितोऽभून्महामुने ! ।
साभिलाषा तदा सापि बभूव गजगामिनी ॥ १२ ॥
मायावती ददौ चास्मै मायाः सर्वा महात्मने ।
प्रद्युम्नायातिरागान्धा तन्न्यस्तहृदयेक्षणा ॥ १३ ॥
प्रसज्जन्तीन्तु तामाह स कार्ष्णिः कमलेक्षणाम् ।
मातृभावमपाहाय किमेवं वर्त्तसेऽन्यथा ॥ १४ ॥
सा चास्मै कथयामास न पुत्रस्त्वं ममेति वै ।
तनयं त्वामयं विष्णोर्हृतवान् कालशम्बरः ॥ १५ ॥

दग्धस्य हरनेत्राग्निनेति ॥ ७ ॥ विस्रब्धा प्रत्यययुक्ता सती परिपालये-त्यनेन तद्भर्त्ता कामोऽयमिति सूचितम् ॥ १० ॥ ११ ॥ यौवनाभोगेन तारुण्यविस्तारेण भूषितो यदाभूत् ॥ १२ ॥ १३ ॥ प्रसज्जन्तीं कामतः

क्षिप्तः समुद्रे मत्स्यस्य संप्राप्तो जठरान्मया ।
सा तु रागिति ते माता कान्तायाप्यतिवत्सला ॥१६॥

पराशर उवाच ।

इत्युक्तः शंबरं युद्धे प्रद्युम्नः स समाह्वयत् ।
क्रोधाकुलीकृतमना युयुधे च महाबलः ॥ १७ ॥
हत्वा सैन्यमशेषन्तु तस्य दैत्यस्य माधविः ।
सप्त माया व्यतिक्रम्य मायां संयुयुजेऽष्टमीम् ॥ १८ ॥
तया जघान तं दैत्यं मायया कालशंबरम् ।
उत्पत्य च तया सार्द्धमाजगाम पितुर्गृहम् ॥ १८ ॥
अन्तःपुरे निपतितं मायावत्या समन्वितम् ।
तं दृष्ट्वा कृष्णसंकल्पा बभूवुः कृष्णयोषितः ॥ २० ॥
रुक्मिणी चावदत् प्रेम्णा सास्रुदृष्टिरनिन्दिता ।
धन्यायाः खल्वयं पुत्रो वर्त्तते नवयौवने ॥ २१ ॥
अस्मिन् वयसि पुत्रो मे प्रद्युम्नो यदि जीवति ।
सभाग्या जननी वत्स ! त्वया कापि विभूषिता ॥२२॥
अथवा यादृशः स्नेहो मम यादृग्वपुस्तव ।
हरेरपत्यं सुव्यक्तं भवान् वत्स ! भविष्यति ॥ २३ ॥

पराशर उवाच ।

एतस्मिन्नन्तरे प्राप्तः सह कृष्णेन नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन् ॥ २४ ॥

[illegible] छित्वा ॥१४॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥
[illegible] संकल्पो [illegible] ताः ॥ २० ॥ २१ ॥

एष ते तनयः सुभ्रु ! हत्वा शंबरमागतः।
हृतो येनाभवद्बालो भवत्याः सूतिकागृहात्॥ २५॥
इयं मायावती भार्य्या तनयस्यास्य ते सती।
शंबरस्य न भार्य्येयं श्रूयतामत्र कारणम्॥ २६॥
मन्मथे तु गते नाशं तदुद्भवपरायणा।
शंबरं मोहयामास मायारूपेण रूपिणी॥ २७॥
व्यावायाद्युपभोगेषु रूपं मायामयं शुभम्।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा॥ २८॥
कामोऽवतीर्णः पुत्रस्ते तस्येयं दयिता रतिः।
विशङ्का नात्र कर्त्तव्या स्नुषेयं तव शोभना॥ २९॥
ततो हर्षसमाविष्टा रुक्मिणी केशवस्तथा।
नगरी च समस्ता सा साधु साध्वित्यभाषत॥ ३०॥
चिरनष्टेन पुत्रेण संयुक्तां प्रेक्ष्य रुक्मिणीम्।
अवाप विस्मयं सर्वो द्वारवत्यां जनस्तदा॥ ३१॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ मदिरेक्षणा मदिरे मादकलोचने यस्याः सा॥ २८॥ २९॥



अष्टाविंशोऽध्यायः ।

पराशर उवाच ।

चारुदेष्णं सुदेष्णञ्च चारुदेहञ्च वीर्य्यवान् ।
सुषेणं चारुगुप्तञ्च भद्रचारुं तथापरम् ॥ १ ॥
चारुविन्दं सुचारुञ्च चारुञ्च बलिनां वरम् ।
रुक्मिण्यजनयत् पुत्रान् कन्यां चारुमतीं तथा ॥ २ ॥
अन्याश्च भार्य्याः कृष्णस्य बभूवुः सप्त शोभनाः ।
कालिन्दी मित्रविन्दा च सत्या नाग्नजिती तथा ॥ ३ ॥
देवी जाम्बवती चापि रोहिणी कामरूपिणी ।
मद्रराजसुता चान्या सुशीला शीलमण्डना ॥ ४ ॥
सात्राजिती सत्यभामा लक्ष्मणा चारुहासिनी ।
षोडशासन् सहस्राणि स्त्रीणामन्यानि चक्रिणः ॥ ५ ॥
प्रद्युम्नोऽपि महावीर्य्यो रुक्मिणस्तनयां शुभाम् ।
स्वयंवरस्थां जग्राह सा च तं तनयं हरेः ॥ ६ ॥
तस्यामस्याभवत् पुत्रो महाबलपराक्रमः ।
अनिरुद्धो रणे रुद्धो वीर्य्योदधिररिन्दमः ॥ ७ ॥

वीर्य्यवानिति, वीर्य्यवत्त्वविशेषणं । प्रद्युम्नस्तु प्रागेवोक्तः ॥ १ ॥ ॥ ३ ॥ जाम्बवत्येव रोहिणीवर्णा । अतो न संख्याविरोधः अत एव तस्याः कामरूपिणीति विशेषणम् । केचित्तु रोहिणी नाम चतुर्थीत्यष्टौ भार्य्या इति प्राहुः । यथोक्तपरिग्रहात् तु मेदोऽस्त्विवपदहुक्तं ॥ ७ ॥ रणे शत्रुभिरवरुद्धे इति शेषः । वीर्य्योदधिः

तस्यापि रुक्मिणः पौत्रीं वरयामास केशवः ।
दौहित्राय ददौ रुक्मी तां स्पर्द्धन्नपि शौरिणा ॥ ८ ॥
तस्या विवाहे रामाद्या यादवा हरिणा सह ।
रुक्मिणो नगरं जग्मुर्नाम्ना भोजकटं द्विज ! ॥ ९ ॥
विवाहे तत्र निर्वृत्ते प्राद्युम्नेः सुमहात्मनः ।
कलिङ्गराजप्रमुखा रुक्मिणं वाक्यमब्रुवन् ॥ १० ॥
अनक्षज्ञो हली द्यूते तथास्य व्यसनं महत् ।
न जयामो बलं कस्माद् द्यूतेनैनं महाद्युते ! ॥ ११ ॥

पराशर उवाच ।

तथेति तानाह नृपान् रुक्मी बलसमन्वितः ।
सभायां सह रामेण चक्रे द्यूतञ्च वै तदा ॥ १२ ॥
सहस्रमेकं निष्काणां रुक्मिणा विजितो बलः ।
द्वितीयेऽपि पणे चान्यत् सहस्रं रुक्मिणा जितम् ॥ १३ ॥
ततो दशसहस्राणि निष्काणां पणमाददे ।
बलभद्रोऽजयत्तानि रुक्मी द्यूतविदां वरः ॥ १४ ॥
ततो जहास स्वनवत् कलिङ्गाधिपतिर्द्विज ! ।
दन्तानि दर्शयन् मूढो रुक्मी चाह मदोद्धतः ॥ १५ ॥

स्पर्द्धमानोऽपि रुक्मी ददौ ॥ ८ ॥ अनर्थफलं वक्तुमाह, तस्या विवाहे इत्यादिना यावत्समाप्ति ॥ ९ ॥ १० ॥ ११ ॥

तथाप्यस्य द्यूते महद्व्यसनमस्ति ॥ १२ ॥ १३ ॥ बलभद्रो निष्काणां सुवर्णपलद्वयात्मनां दशसहस्राणि पणमाददे । तानि च रुक्मी अजयत् ॥ १४ ॥ अनवद्यं सम्यक् यथा भवत्येवं जहास ॥ १५ ॥

अविद्वोऽयं मया द्यूते बलदेवः पराजितः ।
मुधैवाक्षावलेपान्धो यः स्वं मेनेऽक्षकोविदम् ॥ १६ ॥
दृष्ट्वा कलिङ्गराजं तं प्रकाशदशनाननम् ।
रुक्मिणश्चापि दुर्वाक्यं कोपं चक्रे हलायुधः ॥ १७ ॥
ततः कोपपरीतात्मा निष्ककोटिं हलायुधः ।
ग्लहं जग्राह रुक्मी च तदर्थेऽक्षानपातयत् ॥ १८ ॥
अजयद् बलदेवस्तं प्राहोच्चैस्तं जितं मया ।
ममेति रुक्मी प्राहाथ अलीकोक्तैरलं बल ! ॥ १९ ॥
त्वयोक्तोऽयं ग्लहः सत्यं न ममैषोऽनुमोदितः ।
एवं त्वया चेद् विजितं मया न विजितं कथम् ॥२०॥
अथान्तरिक्षे वागुच्चैः प्राह गम्भीरनादिनी ।
बलदेवस्य तत्कोपं वर्धयन्ती महात्मनः ॥ २१ ॥
जितं बलेन धर्मेण रुक्मिणा भाषितं मृषा ।
अनुक्त्वापि वचः किञ्चित् कृतं भवति कर्मणा ॥ २२ ॥
ततो बलः समुत्थाय कोपसंरक्तलोचनः ।
जघानाष्टापदेनैव रुक्मिणं सुमहाबलः ॥ २३ ॥

द्यूते अक्षविद्यायां ज्ञानशून्यः मुधा वृथैव अक्षावलेपान्धः अक्षज्ञानगर्वमूढः स्वम् आत्मानम् ॥ १६ ॥ प्रकाशदशनाननं विवृतदन्तमाननं यस्य तं दृष्ट्वा वाक्यानि वदन्तम् ॥ १७ ॥ ग्लहं पणम् ॥ १८ ॥ तं ग्लहं तं रुक्मिप्रमुखैः भाषणम् अलीकोक्तैर्मिथ्याभाषणैः ॥ १९ ॥

मया जितमित्यत्र रुक्मिणो हेतुमाह त्वयोक्तोऽयमिति ॥ २० ॥

यदुक्तं रुक्मिणा ममैषोऽनुमोदित इति तत्राह अशरीरवाक् ॥ २१ ॥

अनुक्त्वापीति, अनुमोदनवचनमनुक्त्वापि कर्मणैव द्यूतासनादिरूपेणानुमोदनं कृतं भवति । अथवा अनुमोदनोत्तरकालीनद्यूतप्रवर्तनादिः कर्मणोः

कलिङ्गराजमादाय विस्फुरन्तं बलाद् बलः ।
बभञ्ज दन्तान् कुपितो यैः प्रकाशं जहास सः ॥ २३ ॥
आकृष्य च महास्तम्भं जातरूपमयं बलः ।
जघान येऽन्ये तत्पक्षा भूभृतः कुपितो बलात् ॥ २५ ॥
ततो हाहाकृतं सर्वं पलायनपरं द्विज ! ।
तद्राजमण्डलं सर्वं बभूव कुपिते बले ॥ २६ ॥
बलेन निहतं श्रुत्वा रुक्मिणं मधुसूदनः ।
नोवाच किञ्चिन्मैत्रेय ! रुक्मिणीबलयोर्भयात् ॥ २७ ॥
ततोऽनिरुद्धमादाय कृतदारं द्विजोत्तम ! ।
द्वारकामाजगामाथ यदुचक्रं सकेशवम् ॥ २८ ॥

ऊनत्रिंशोऽध्यायः ।

पराशर उवाच ।

द्वारवत्यां ततः शौरिं शक्रस्त्रिभुवनेश्वरः ।
आजगामाथ मैत्रेय ! मत्तैरावतपृष्ठगः ॥ १ ॥
प्रविश्य द्वारकां सोऽथ समेत्य हरिणा ततः ।
कथयामास दैत्यस्य नरकस्य विचेष्टितम् ॥ २ ॥

सम्भ्रमात् ॥ २२ ॥ अष्टापदेन अक्षद्यूतफलकेन ॥ २३ ॥ २४ ॥ जात-रूपमयं स्वर्णमयं महान्तं स्तम्भं सभामण्डपस्तम्भमाकृष्य तेनैव जघान ॥ २५ ॥

त्वया नाथेन देवानां मनुष्यत्वेऽपि तिष्ठता ।
प्रशमं सर्वदुःखानि नीतानि मधुसूदन ! ॥ ३ ॥
तपस्विजननाशाय सोऽरिष्टो धेनुकस्तथा ।
चाणूरो मुष्टिकः केशी ते सर्वे निहतास्त्वया ॥ ४ ॥
कंसः कुवलयापीडः पूतना बालघातिनी ।
नाशं नीतास्त्वया सर्वे येऽन्ये जगदुपद्रवाः ॥ ५ ॥
युष्मद्दोर्दण्डसद्बुद्धिपरित्राते जगत्त्रये ।
यज्ञियज्ञांशसंप्राप्त्या तृप्तिं यान्ति दिवौकसः ॥ ६ ॥
सोऽहं साम्प्रतमायातो यन्निमित्तं जनार्दन ! ।
तच्छ्रुत्वा तत्प्रतीकारप्रयत्नं कर्त्तुमर्हसि ॥ ७ ॥
भौमोऽयं नरको नाम्ना प्राग्ज्योतिषपुरेश्वरः ।
करोति सर्वभूतानामुपघातमरिन्दम ॥ ८ ॥
देवसिद्धासुरादीनां नृपाणाञ्च जनार्दन ! ।
हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे ॥ ९ ॥
छत्रं यत् सलिलस्रावि तज्जहार प्रचेतसः ।
मन्दरस्य तथा शृङ्गं हृतवान् मणिपर्वतम् ॥ १० ॥
अमृतस्राविणी दिव्ये मन्मातुः कृष्ण ! कुण्डले ।
जहार सोऽसुरो दिव्ये त्वैरावतं गजम् ॥ ११ ॥
दुर्नीतमेतद्गोविन्द ! मया तस्य तवोदितम् ।
यदत्र प्रतिपत्तव्यं तत् स्वयं परिमृश्यताम् ॥ १२ ॥

इदानीं भौमवधप्रसङ्गेन हरेः षड्गुणो भाव्यं वक्तुं देवेन्द्रागमनादिप्रपञ्चः, दारवत्यामित्यादिना सर्वेषामनिष्टनाशेन ॥ १ ॥ २ ॥ यज्ञिनां यज्ञांशाः यज्ञभागा ये तेषां संप्राप्त्या ॥ ६ ॥ १० ॥

पराशर उवाच ।

इति श्रुत्वा स्मितं कृत्वा भगवान् देवकीसुतः ।
गृहीत्वा वासवं हस्ते समुत्तस्थौ वरासनात् ॥ १३ ॥
चिन्तयामास च विभुर्मनसा पन्नगाशनम् ।
संचिन्तितमुपारुह्य गरुडं गगनेचरम् ।
सत्यभामां समारोप्य ययौ प्राग्ज्योतिषं पुरम् ॥ १४ ॥
आरुह्यैरावतं नागं शक्रोऽपि त्रिदिवालयम् ।
ततो जगाम मैत्रेय ! पश्यतां द्वारकौकसाम् ॥ १५ ॥
प्राग्ज्योतिषपुरस्यासीत् समन्ताच्छतयोजनम् ।
आचिता मौरवैः पाशैः सुरान्तैर्भूर्द्विजोत्तम ॥ १६ ॥
तांश्चिच्छेद हरिः पाशान् क्षिप्त्वा चक्रं सुदर्शनम् ।
ततो मुरः समुत्तस्थौ तं जघान च केशवः ॥ १७ ॥
मुरोश्च तनयान् सप्त सहस्रांस्तांस्ततो हरिः ।
चक्रधाराग्निनिर्दग्धांश्चकार शलभानिव ॥ १८ ॥

कुण्डले जहार ॥ ११ ॥ दुर्नीतमन्यायः ॥ १२ ॥ संप्रति कार्यार्थं मामुपसर्पति अनकार्यस्तु पारिजातार्थं मया विरोधस्तत इति स्मितं कृत्वा ॥ १३ ॥ सञ्चिन्तितं स्मृतिमात्रेणोपगतम् । सत्यभामां समारोप्येत्यत्र हरिर्मोक्षं कारणं द्रष्टव्यम् । तद्यथा नारदानीते पारिजातकुसुमे रुक्मिण्यै दत्ते तदीयस्त्रीप्रकुपितां सत्यभामां सान्त्वयता भगवतोक्तं तत्त्वं पारिजाततरुमेवाहरिष्यामीति तदर्थं तां निन्य इति ॥ १४ ॥ १५ ॥

सुरान्तैः सुरघातावसानैः मौरवैः मुरसंज्ञेन राक्षसेन निर्मितैराचिता व्याप्ता भूरासीत् ॥ १६ ॥ १७ ॥ षट्सहस्राणि परिमाणं

हत्वा मुरं हयग्रीवं तथा पञ्चजनं द्विज ! ।
प्राग्ज्योतिषपुरं धीमांस्त्वरावान् समुपागतः ॥ १९ ॥
नरकेणास्य तत्राभून्महासैन्येन संयुगम् ।
कृष्णस्य यत्र गोविन्दो जघ्ने दैत्यान् सहस्रशः ॥ २० ॥
शस्त्रास्त्रवर्षं मुञ्चन्तं भौमं तं नरकं बली ।
क्षिप्त्वा चक्रं द्विधा चक्रे चक्री दैतेयचक्रहा ॥ २१ ॥
हते तु नरके भूमिर्गृहीत्वादितिकुण्डले ।
उपतस्थे जगन्नाथं वाक्यं चेदमथाब्रवीत् ॥ २२ ॥
यदाहमुद्धृता नाथ ! त्वया शूकरमूर्त्तिना ।
त्वत्स्पर्शसम्भवः पुत्रस्तदायं मय्यजायत ॥ २३ ॥
सोऽयं त्वयैव दत्तो मे त्वयैव विनिपातितः ।
गृहाण कुण्डले चेमे पालयास्य च सन्ततिम् ॥ २४ ॥
भारावतरणार्थाय ममैव भगवानिमम् ।
अंशेन लोकमायातः प्रसादसुमुखः प्रभो ! ॥ २५ ॥
त्वं कर्त्ता त्वं विकर्त्ता च संहर्त्ता प्रभवोऽप्ययः ।
जगतां त्वं जगद्रूपः स्तूयतेऽच्युत ! किं तव ॥ २६ ॥

[illegible] नाम् ॥ १८ ॥ २३ ॥ अयम् भौमं मम [illegible] ॥ २५ ॥ जगतां त्वं कर्त्ता उत्पादकः । विकर्त्ता विशेषेण रक्षादिना कर्त्ता पोषकः । प्रभवत्यस्मादिति प्रभवः उपादानकारणम् । [illegible] [illegible] । [illegible] जगद्रूपश्च त्वम् [illegible] किं तव [illegible] स्तूयते [illegible] ॥ २६ ॥ [illegible]

व्यापी व्याप्यः क्रिया कर्त्ता कार्य्यञ्च भगवान् यदा।
सर्व्वभूतात्मभूतस्य स्तूयते तव किं तदा॥ २७॥
परमात्मा च भूतात्मा महात्मा चाव्ययो भवान्।
यदा तदा स्तुतिर्नास्ति किमर्थो ते प्रवर्त्तते॥ २८॥
प्रसीद सर्व्वभूतात्मन्! नरकेण कृतं हि यत्।
तत् क्षम्यतामदोषाय त्वत्सुतः स निपातितः॥ २९॥

पराशर उवाच।

तथेति चोक्त्वा धरणीं भगवान् भूतभावनः।
रत्नानि नरकावासाज्जग्राह मुनिसत्तम!॥ ३०॥
कन्यापुरे स कन्यानां षोड़शातुलविक्रमः।
शताधिकानि ददृशे सहस्राणि महामते!॥ ३१॥
चतुर्द्दन्तान् गजान् चोग्रान् षट्सहस्रान् स दृष्टवान्।
काम्बोजानां तथाश्वानां नियुतान्येकविंशतिम्॥ ३२॥
कन्यास्ताश्च तथा नागांस्तानश्वान् द्वारकां पुरीम्।
प्रेषयामास गोविन्दः सद्यो नरककिङ्करैः॥ ३३॥
ददृशे वारुणं छत्रं तथैव मणिपर्व्वतम्।
आरोपयामास हरिर्गरुड़े पतगाशने॥ ३४॥
आरुह्य च स्वयं कृष्णः सत्यभामासहायवान्।
आदित्याः कुण्डले दातुं जगाम त्रिदिवालयम्॥ ३५॥

व्यापीति द्वाभ्याम्॥ २७॥ २८॥ किन्तु अदोषाय दोषनिवृत्त्यर्थं अपुत्त्रोऽपि त्वयैव निपातितः। बधदण्डेन निष्पापः कृतः किमत्र मया प्रार्थ्यमिति भावः॥ २९॥ ३१॥ षट्सहस्रान् षट्सहस्राणि संख्या येषां तान्। नियुतानि लक्षाणि॥ ३२॥ ३५॥

त्रिंशोऽध्यायः ।

पराशर उवाच ।

गरुडो वारुणं छत्रं तथैव मणिपर्वतम् ।
सभार्य्यञ्च हृषीकेशं लीलयैव वहन् ययौ ॥ १ ॥
ततः शङ्खमुपाध्मासीत् स्वर्गद्वारं गतो हरिः ।
उपतस्थुस्ततो देवाः सार्घ्यपात्रा जनार्दनम् ॥ २ ॥
स देवैरर्चितः कृष्णो देवमातुर्निवेशनम् ।
सिताभ्रशिखराकारं प्रविश्य ददृशेऽदितिम् ॥ ३ ॥
स तां प्रणम्य शक्रेण सह ते कुण्डलोत्तमे ।
ददौ नरकनाशञ्च शशंसास्यै जनार्दनः ॥ ४ ॥
ततः प्रीता जगन्माता धातारं जगतां हरिम् ।
तुष्टावादितिरव्यग्रा कृत्वा तत्प्रवणं मनः ॥ ५ ॥

अदितिरुवाच ।

नमस्ते पुण्डरीकाक्ष ! भक्तानामभयङ्कर ! ।
सनातनात्मन् ! सर्वात्मन् ! भूतात्मन् ! भूतभावन ! ॥ ६ ॥
प्रणेता मनसो बुद्धेरिन्द्रियाणां गुणात्मक ! ।
त्रिगुणातीत ! निर्द्वन्द्व ! शुद्धसत्त्व ! हृदि स्थित ! ॥ ७ ॥

उपाध्मासीत् वादितवान् ॥ २ ॥ ३ ॥ ४ ॥ तत्प्रवणं तदेकाग्रम् ॥ ५ ॥ सनातनात्मन् ! नित्यमूर्त्ते ! सर्वात्मन् ! सर्वात्मवर्तिन् ! भूतात्मन् ! भूतरूप ! भूतभावन ! भूतोद्भावक ! ॥ ६ ॥ प्रणेता सर्वो गुणात्मके-नैव तमसा भूतभावनत्वं गुणेन मनसः प्रणेतृत्वं रजसा च बुद्धेरिन्द्रि-याणाञ्च प्रणेतृत्वं सर्वदा तत् । अतएव त्रिगुणातीत ! अतो निर्द्वन्द्व ! एवंभूततया शुद्धसत्त्वात्मा ज्ञानिनां हृदि स्थित ! ॥७॥ त्रिगदीर्घत्वा-

सितदीर्घादिनिःशेषकल्पनापरिवर्जित ।
जन्मादिभिरसंस्पृष्ट स्वप्नादिपरिवर्जित ॥ ८ ॥
सन्ध्या रात्रिरहो भूमिर्गगनं वायुरम्बु च ।
हुताशनो मनो बुद्धिर्भूतादिस्त्वं तथाच्युत ॥ ९ ॥
सृष्टिस्थितिविनाशानां कर्त्ता कर्त्तृपतिर्भवान् ।
ब्रह्मविष्णुशिवाख्याभिरात्ममूर्त्तिभिरीश्वर ॥ १० ॥
देवा यक्षास्तथा दैत्या राक्षसाः सिद्धपन्नगाः ।
कुष्माण्डाश्च पिशाचाश्च गन्धर्वा मनुजास्तथा ॥ ११ ॥
पशवो मृगमातङ्गाः तथैव च सरीसृपाः
वृक्षगुल्मलतावल्लीसमस्तास्तृणजातयः ॥ १२ ॥
स्थूला मध्यास्तथा सूक्ष्माः स्थूलसूक्ष्मतराश्च ये ।
देहभेदा भवान् सर्वे ये केचित् पुद्गलाश्रयाः ॥ १३ ॥
माया तवेयमज्ञातपरमार्थातिमोहिनी ।
अनात्मन्यात्मविज्ञानं यया मूढोऽनुरुध्यते ॥ १४ ॥

सितदीर्घादिपरिमाणाद्याभिर्निःशेषाभिः कल्पनाभिः परिवर्जित । जन्मादिभिर्विकारैरसंस्पृष्ट । स्वप्नाद्यवस्थाभिः परिवर्जित ॥ ८ ॥ ९ ॥ ब्रह्मादिसंज्ञाभिः स्वमूर्त्तिभिः स्वयमेव सृष्ट्यादीनां कर्त्ता । कर्त्तृपतिः अवान्तरसृष्ट्यादिकर्त्तॄणां दक्षादीनां पतिः ॥ १० ॥ ११ ॥ पूर्यन्ते गलन्ति चेति पुद्गलाः वृद्ध्यपचयभाजो येऽवयवास्तदाश्रयाः देहभेदाः । यथाहुः । पूरणाद्गलनाद्धेते पुद्गलाः परमाणव इति ॥ १२ ॥ अथ मायास्वरूपानुवादपूर्वकं तन्निवृत्तिं प्रार्थयते माया तवेत्यादिना सार्द्धं श्लोकत्रयेण । अज्ञातपरमार्थानां जीवानामतिमोहिनी । मोहनमेवाह

अहं ममेति भावोऽत्र यत् पुंसामभिजायते ।
संसारमातुर्मायायास्तवैतन्नाथ चेष्टितम् ॥ १५ ॥
यैः स्वधर्मपरैर्नाथ ! नरैराराधितो भवान् ।
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये ॥ १६ ॥
ब्रह्माद्याः सकला देवाः मनुष्याः पशवस्तथा ।
विष्णुमायामहावर्त्ते मोहान्धतमसावृताः ॥ १७ ॥
आराध्य त्वामभीप्सन्ते कामानात्मभवक्षयम् ।
यदेते पुरुषा माया सैवेयं भगवंस्तव ॥ १८ ॥
मया त्वं पुत्रकामिन्या वैरिपक्षजयाय च ।
आराधितो न मोक्षाय मायाविलसितं हि तत् ॥ १९ ॥
कौपीनाच्छादनप्राया वाञ्छा कल्पद्रुमादपि ।
जायते यदपुण्यानां सोऽपराधः स्वदोषजः ॥ २० ॥
तत् प्रसीदाखिलजगन्मायामोहकराव्यय ! ।
अज्ञानं ज्ञानसद्भावभूत भूतेश ! नाशय ॥ २१ ॥
नमस्ते चक्रहस्ताय शार्ङ्गहस्ताय ते नमः ।
गदाहस्ताय ते विष्णो ! शङ्खहस्ताय ते नमः ॥ २२ ॥
एतत् पश्यामि ते रूपं स्थूलचिह्नोपलक्षितम् ।
न जानामि परं यत् ते प्रसीद परमेश्वर ! ॥ २३ ॥

अन्तर्जगतीति ॥ १४ ॥ एतत् अहंममेति, संसारस्य मातुर्जनन्या मायाया विलसितम् ॥ १५ ॥ विष्णुमायाया ये महान्तः आवर्ताः अहंकारममकाराभिमानाः तेषु मोहान्धतमसा [illegible] स्वभावाः ॥ १७ ॥ १८ ॥ १९ ॥

स्वदोषजः स्वकर्मजः ॥ २० ॥ ज्ञानसद्भावभूत विद्यास्वरूपविद्या-नाशकम् ॥ २१ ॥ मदुक्तं रूपं [illegible] स्थूलचिह्नं

पराशर उवाच।

अदित्यैवं स्तुतो विष्णुः प्रहस्याह सुरारणिम।
माता देवि! त्वमस्माकं प्रसीद वरदा भव॥ २४॥

अदितिरुवाच।

एवमस्तु यथेच्छा ते, त्वमशेषैः सुरासुरैः।
अजेयः पुरुषव्याघ्र! मर्त्यलोके भविष्यसि॥ २५॥

ततोऽनन्तरमेवास्य शक्राणीसहिता दितिम्।
सत्यभामा प्रणम्याह प्रसीदेति पुनः पुनः॥ २६॥

अदितिरुवाच।

मत्प्रसादान्न ते सुभ्रु! जरा वैरूप्यमेव च।
भविष्यत्यनवद्याङ्गि! सर्वधामा भविष्यसि॥ २७॥

पराशर उवाच।

अदित्या तु कृतानुज्ञो देवराजो जनार्दनम्।
यथावत् पूजयामास बहुमानपुरःसरम्॥ २८॥

ततो ददर्श कृष्णोऽपि सत्यभामासहायवान्।
देवोद्यानानि हृद्यानि नन्दनादीनि सत्तम!॥ २९॥

ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम्।
नित्याह्लादकरं ताम्रबालपल्लवशोभितम्॥ ३०॥

मथ्यमानेऽमृते जातं जातरूपसमत्वचम्।
पारिजातं जगन्नाथः केशवः केशिसूदनः॥ ३१॥

तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम!।
कस्मान्न द्वारकामेव नीयते देवपादपः॥ ३२॥

जन्मभूमिं मातरम्॥ २४॥ मोहिता वसुधाच एवमित्यादि॥ २५॥

यदि ते तद् वचः सत्यं सत्यात्यर्थं प्रियेति मे ।
मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः ॥ ३३ ॥
न मे जाम्बवती तादृगभीष्टा न च रुक्मिणी ।
सत्ये यथा त्वमित्युक्तं त्वया कृष्णासकृत् प्रियम् ॥ ३४ ॥
सत्यं तद् यदि गोविन्द ! नोपचारकृतं तव ।
तदस्तु पारिजातोऽयं मम गेहविभूषणम् ॥ ३५ ॥
बिभ्रती पारिजातस्य केशपक्षेण मञ्जरीम् ।
सपत्नीनामहं मध्ये शोभेयमिति कामये ॥ ३६ ॥

पराशर उवाच ।

इत्युक्तः संप्रहस्यैनं पारिजातं गरुत्मति ।
आरोपयामास हरिस्तमूचुर्वनरक्षिणः ॥ ३७ ॥
भोः शची देवराजस्य महिषी, तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम् ॥ ३८ ॥
शचीविभूषणार्थाय देवैरमृतमन्थने ।
उत्पादितोऽयं न क्षेमी गृहीत्वैनं गमिष्यसि ॥ ३९ ॥
देवराजो मुखप्रेक्षी यस्यास्तस्याः परिग्रहम् ।
मौढ्यात् प्रार्थयसे क्षेमी गृहीत्वैनं हि को व्रजेत् ॥ ४० ॥
अवश्यमस्य देवेन्द्रो निष्कृतिं कृष्ण ! यास्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः ॥ ४१ ॥
तदलं सकलैर्देवैर्विग्रहेण तवाच्युत ! ।
विपाककटु यत् कर्म तन्न शंसन्ति पण्डिताः ॥ ४२ ॥

॥ ३२ ॥ निःष्कुटार्थाय क्रीडोद्यानार्थम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ केश-पक्षेण [illegible] ॥ ३६ ॥ मौढ्यात् क्षेमोऽनष्टं न प्राप्नोति

इत्युक्ते तैर्वचैतान् सत्यभामातिकोपिनी।
का शची पारिजातस्य को वा शक्रः सुराधिपः॥ ४३॥
सामान्यः सर्वलोकानां यद्येषोऽमृतमन्थने।
समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः॥ ४४॥
यथा सुधा यथैवेन्दुर्यथा श्रीर्वनरक्षिणः।
सामान्याः सर्वलोकस्य पारिजातस्तथा द्रुमः॥ ४५॥
भर्तृबाहुमहागर्वाद् रुणद्ध्येनं यथा शची।
तत् कथ्यतामलं चान्त्या सत्या हारयति द्रुमम्॥ ४६॥
कथ्यताञ्च द्रुतं गत्वा पौलोम्या वचनं मम।
सत्यभामा वदत्येतदतिगर्वोद्धताक्षरम्॥ ४७॥
यदि त्वं दयिता भर्त्तुर्यदि वश्यः पतिस्तव।
मद्भर्त्तुर्हरतो वृक्षं तत् कारय निवारणम्॥ ४८॥
जानामि ते पतिं शक्रं जानामि त्रिदिवेश्वरम्।
पारिजातं तथाप्येनं मानुषी हारयामि ते॥ ४९॥

पराशर उवाच।

इत्युक्ता रक्षिणो गत्वा शच्या ऊचुर्यथोदितम्।
शची चोत्साहयामास त्रिदशाधिपतिं पतिम्॥ ५०॥
ततः समस्तदेवानां सैन्यैः परिवृतो हरिम्।
प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विज॥ ५१॥
ततः परिघनिस्त्रिंशगदाशूलवरायुधाः।
बभूवुस्त्रिदशाः सज्जाः शक्रे वज्रकरे स्थिते॥ ५२॥

प्रकृत ॥ ३६ ॥ ४० ॥ निष्कृतिं वाक्यात प्रतीकारं कारयति ॥ ४१ ॥
विधायकटु परिष्कुमेऽमर्षकरम् ॥ ४२ ॥ ४७ ॥
आभर्तु निवारणं वारण ॥ ४८ ॥ ५१ ॥ सज्जाः सन्नद्धाः ॥ ५२ ॥

स्त्रीत्वाद्गुरुचित्ताहं स्वभर्त्तृश्लाघनापरा ।
ततः कृतवती शक्र ! भवता सह विग्रहम् ॥ ७३ ॥
तदलं पारिजातेन परस्वेन हृतेन नः ।
रूपेण गर्विता सा तु भर्त्रा स्त्री का न गर्विता ॥ ७४ ॥
पराशर उवाच ।
इत्युक्तो विनिवृत्तोऽसौ देवराजस्तया द्विज ! ।
प्राह चैनामलं चण्डि ! सख्युः खेदातिविस्तरैः ॥ ७५ ॥
न चापि सर्गसंहारस्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीडा जायते विश्वरूपिणा ॥ ७६ ॥
यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्माद् यतश्च न भविष्यति सर्वभूतात् ।
तेनोद्भवप्रलयपालनकारणेन
व्रीडा कथं भवति देवि ! निराकृतस्य ॥ ७७ ॥
सकलभुवनमूर्त्तिर्मूर्त्तिरल्पातिसूक्ष्मा
विदितसकलवेदैर्ज्ञायते यस्य नान्यैः ।
तमजमकृतमीशं शाश्वतं स्वेच्छयैनं
जगदुपकृतिमर्त्त्यं को विजेतुं समर्थः ॥ ७८ ॥

[illegible] नवकस्य भर्त्तृश्लाघयावशेषेण मदेन ॥ ७३ ॥ पतिगर्वितेव
मया दौवदुत्त्वा [illegible] भर्त्तृश्लाघनपरा कृर्मीति यदुक्तात्मकता रूप तया
[illegible] परिहरति रूपेण गर्वितेति ॥ ७४ ॥ चण्डि !
रुष्टे ! सख्युर्मित्रभूतस्य मम खेदहेतुर्भिर्विस्तरैरलम् ॥ ७५ ॥ न व्रीडां
मम [illegible] वदुक्तं तस्माद् न चाप्नोति त्रिभिः ॥ ७६ ॥ यस्मादुपादान
कारणभूतात् यतश्च निमित्तकारणभूतात् जगदभूत् भविष्यति चेत्यर्थः
॥ ७७ ॥ अल्पतरोऽपि अतःसूक्ष्मोऽपर न तु सर्वनिमित्तभेदव्यं [illegible]
अर्थः । जगदुपकृतये मर्त्त्यं [illegible] मर्त्त्यलोकावतारम् ॥ ७८ ॥

एकत्रिंशोऽध्यायः ।

पराशर उवाच ।

संस्तुतो भगवानित्थं देवराजेन केशवः ।
प्रहस्य भावगम्भीरमुवाचेदं द्विजोत्तम ! ॥ १ ॥
देवराजो भवानिन्द्रो वयं मर्त्त्या जगत्पते ! ।
क्षन्तव्यं भवता चेदमपराधकृतं मम ॥ २ ॥
पारिजाततरुश्चायं नीयतामुचितास्पदम् ।
गृहीतोऽयं मया शक्र ! सत्या वचनकारणात् ॥ ३ ॥
वज्रञ्चेदं गृहाण त्वं यत्त्वया प्रहितं मयि ।
तवैवैतत् प्रहरणं शक्र ! वैरिविदारणम् ॥ ४ ॥

शक्र उवाच ।

विमोहयसि मामीश ! मर्त्त्योऽहमिति किं वदन् ।
जानीमस्त्वद्भगवतो न तु सूक्ष्मविदो वयम् ॥ ५ ॥
योऽसि सोऽसि जगत्त्राणप्रवृत्तौ नाथ ! संस्थितः ।
जगतः शल्यनिष्कर्षं करोष्यसुरसूदन ! ॥ ६ ॥
नीयतां पारिजातोऽयं कृष्ण ! द्वारवतीं पुरीम् ।
मर्त्त्यलोके त्वया त्यक्ते नायं संस्थास्यते भुवि ॥ ७ ॥

पराशर उवाच ।

तथेत्युक्त्वा च देवेन्द्रमाजगाम भुवं हरिः ।
प्रसक्तैः सिद्धगन्धर्वैः स्तूयमानस्तथर्षिभिः ॥ ८ ॥

उचितास्पदं यथोचितं स्थानम् ॥ ३ ॥ ४ ॥ तव तव यथादृष्टानां रूपं जानीमः न तु तव सूक्ष्मरूपविदः ॥ ५ ॥ शल्यनिष्कर्षं

ततः शङ्खमुपाध्माय द्वारकापरिसंस्थितः ।
हर्षमुत्पादयामास द्वारकावासिनां द्विज ॥ ८ ॥
अवतीर्याथ गरुडात् सत्यभामासहायवान् ।
निष्कुटे स्थापयामास पारिजातं महातरुम् ॥ १० ॥
यमभ्येत्य जनः सर्वो जातिं स्मरति पौर्विकीम् ।
वास्यते यस्य पुष्पाणां गन्धेनोर्वी त्रियोजनम् ॥ ११ ॥
ततस्ते यादवाः सर्वे देहबन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कुर्वन्तो मुखदर्शनम् ॥ १२ ॥
किङ्करैः समुपानीतं हस्त्यश्वादि ततो धनम् ।
स्त्रियश्च कृष्णो जग्राह नरकस्य परिग्रहान् ॥ १३ ॥
ततः काले शुभे प्राप्ते उपयेमे जनार्दनः ।
ताः कन्या नरकेणासन् सर्वतो याः समाहृताः ॥ १४ ॥
एकस्मिन्नेव गोविन्दः काले तासां महामते ।
जग्राह विधिवत् पाणीन् पृथग्गेहेषु धर्मतः ॥ १५ ॥
षोडश स्त्रीसहस्राणि शतमेकं तथाधिकम् ।
तावन्ति चक्रे रूपाणि भगवान् मधुसूदनः ॥ १६ ॥
एकैकशश्च ताः कन्या मेनिरे मधुसूदनम् ।
ममैव पाणिग्रहणं भगवान् कृतवानिति ॥ १७ ॥

शङ्खं तोयहारम् ॥ ६ ॥ न च समाख्यातः सम्भवः पारिजातविरोध इत्याह
वाक्यं बोध इति । ७ । यदत्र देवत्र देवमध्वजिः विद्याविधिः कुल-
वानः । ८ । १० । पौर्विकी पूर्वजन्मसम्बन्धिनीम् ॥ ११ । ययाह-

निशासु च जगत्स्रष्टा तासां गेहेषु केशवः।
उवास विप्र! सर्वासां विश्वरूपधरो हरिः॥ १८॥

द्वात्रिंशोऽध्यायः।

पराशर उवाच।

प्रद्युम्नाद्या हरेः पुत्रा रुक्मिण्याः कथितास्तव।
भानुं भैमरिकञ्चैव सत्यभामा व्यजायत॥ १॥
दीप्तिमान् ताम्रपक्षाद्या रोहिण्यां तनया हरेः।
बभूवुर्जाम्बवत्याञ्च शाम्बाद्या बाहुशालिनः॥ २॥
तनया भद्रविन्दाद्या नाग्नजित्यां महाबलाः।
संग्रामजित्प्रधानास्तु शैव्यायाञ्चभवन् सुताः॥ ३॥
वृकाद्यास्तु सुता माद्र्यां गात्रवत्प्रमुखान् सुतान्।
अवाप लक्ष्मणा पुत्राः कालिन्द्याञ्च श्रुतादयः॥ ४॥
अन्यासाञ्चैव भार्य्याणां समुत्पन्नानि चक्रिणः।
अष्टायुतानि पुत्राणां सहस्राणां शतं तथा॥ ५॥
प्रद्युम्नः प्रथमस्तेषां सर्वेषां रुक्मिणीसुतः।
प्रद्युम्नादनिरुद्धोऽभूद् वज्रस्तस्मादजायत॥ ६॥

तान् देहवध्यान् अदेहान् देशाकारान् ददृशुः तस्य जातिस्मारकत्वात्॥ १२॥ परित्यक्ष्याम् विवाहार्थमवरुद्धाः कन्याः॥ ११॥ १८॥

पूर्वोक्तपुत्रानुवादपूर्वकं हरेः सर्वान् पुत्रानाह, प्रद्युम्नाद्या इत्यादि पञ्चभिः॥ १॥ २॥ शैव्यायां मित्रविन्दायाम्॥ ३॥ ५॥ अनिरुद्धस्य विवाहान्तरं वक्तुं प्रद्युम्नाद्यनुवादः प्रद्युम्न इति॥ ६॥

अनिरुद्धो रणे बद्धो बलेः पौत्रो महाबलः ।
बाणस्य तनयामूषामुपयेमे द्विजोत्तम ! ॥ ७ ॥
यत्र युद्धमभूद् घोरं हरिशङ्करयोर्महान् ।
छिन्नं सहस्रं बाहूनां यत्र बाणस्य चक्रिणा ॥ ८ ॥
मैत्रेय उवाच ।
कथं युद्धमभूद् ब्रह्मन् पार्थे हरकृष्णयोः ।
कथं क्षयञ्च बाणस्य बाहूनां कृतवान् हरिः ॥ ९ ॥
एतत् सर्वं महाभाग ! समाख्यातुं त्वमर्हसि ।
महत् कौतूहलं जातं कथां श्रोतुमिमां हरेः ॥ १० ॥
पराशर उवाच ।
उषा बाणसुता विप्र ! पार्वतीं सह शम्भुना ।
क्रीडन्तीमुपलक्ष्योच्चैः स्पृहाञ्चक्रे तदाश्रयाम् ॥ ११ ॥
ततः सकलचित्तज्ञा गौरी तामाह भाविनीम् ।
अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ॥ १२ ॥
इत्युक्ता सा तदा चक्रे कदेति मतिमात्मनः ।
को वा भर्ता ममेत्येतां पुनरप्याह पार्वती ॥ १३ ॥
वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव ।
करिष्यति स ते भर्ता राजपुत्रि ! भविष्यति ॥ १४ ॥
पराशर उवाच ।
तस्यां तिथौ पुमान् स्वप्ने यथा देव्या उदीरितम् ।

॥ ७ ॥ यत्र शोणितपुरे युद्धमभूत् । यत्र युद्धे बाणस्य बाहूनां सहस्रं चक्रिणा छिन्नम् ॥ ८ ॥ १० ॥ तदाश्रयां [illegible] स्पृहां चक्रे ॥ ११ ॥ [illegible] [illegible] ॥ १२ ॥ [illegible]

तथैवाभिभवं चक्रे रागश्चक्रे तथैव सा ॥ १५ ॥
ततः प्रबुद्धा पुरुषमपश्यन्ती तमुत्सुका।
क्व गतोऽसीति निर्लज्जा मैत्रेयोक्तवती सखीम् ॥ १६ ॥
बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा तु तत्सुता।
तस्याः सख्यभवत् सा च प्राह कोऽयं त्वयोच्यते ॥ १७ ॥
यदा लज्जाकुला नास्यै कथयामास सा सती।
तदा विश्वासमानीय सर्व्वमेवाभ्यवादयत् ॥ १८ ॥
विदितार्थान्तु तामाह पुनरूषा यथोदितम्।
देव्या तथैव तत्प्राप्तौ योऽभ्युपायः कुरुष्व तम् ॥ १९ ॥

पराशर उवाच।

ततः पटे सुरान् दैत्यान् गन्धर्व्वांश्च प्रधानतः।
मनुष्यांश्चाभिलिख्यास्यै चित्रलेखा व्यदर्शयत् ॥ २० ॥
अपास्य सा तु गन्धर्व्वांस्तथोरगसुरासुरान्।
मनुष्येषु ददौ दृष्टिं तेष्वप्यन्धकवृष्णिषु ॥ २१ ॥
कृष्णरामौ विलोक्यासीत् सुभ्रूर्लज्जाजडेव सा।
प्रद्युम्नदर्शने व्रीडादृष्टिं निन्येऽन्यतो द्विज ॥ २२ ॥

संभोगम् ॥ १४ ॥ १५ ॥ औत्सुक्यात् कान्तभ्रान्त्या क्व गतोऽसीति सखीमिवोक्तवती ॥ १६ ॥ १७ ॥ अभ्यवादयत् आभिमुख्येन यथावृत्त-मुषामवादयत् कथनमकारयत् ॥ १८ ॥ देव्या यथोदितं स ते भर्त्ता भविष्यतीति तथैव तस्य भर्त्तुः प्राप्त्यावुपायश्च यथोदितः ॥ १९ ॥ २० ॥ मनुष्येषु कान्तसाजात्यात् दृष्टिं ददौ तत्राप्यन्धकवृष्णिषु कान्तसमान-वंशत्वात् ॥ २१ ॥ कृष्णरामौ तु श्वशुरमातुलस्थानीयौ विलोक्य लज्जया

दृष्टमात्रे ततः कान्ते प्रद्युम्नतनये द्विज ।
दृष्ट्वात्यर्थविकाशिन्या लज्जा क्वापि निराकृता ॥ २३ ॥
सोऽयं सोऽयमितीत्युक्ते तया सा योगगामिनी ।
ययौ द्वारवतीमूषां समाश्वास्य ततः सखीम् ॥ २४ ॥

त्रयस्त्रिंशोऽध्यायः ।

पराशर उवाच ।

बाणोऽपि प्रणिपत्याग्रे मैत्रेयाह त्रिलोचनम् ।
देव बाहुसहस्रेण निर्विण्णोऽहं विनाहवम् ॥ १ ॥
कच्चिन्ममैषां बाहूनां साफल्यजनको रणः
भविष्यति विना युद्धं भाराय मम किं भुजैः ॥ २ ॥

शङ्कर उवाच ।

मयूरध्वजभङ्गस्ते यदा बाण भविष्यति ।
पिशिताशिजनानन्दं प्राप्स्यसे त्वं तदा रणम् ॥ ३ ॥

[illegible] । प्रद्युम्नदर्शने तस्य कान्तस्यादर्शनेन [illegible] योषा-
[illegible] ॥ २२ ॥ २३ ॥ योगगामिनी योगबलादा-
काशगामिनी ॥ २४ ॥

अथ युद्धे [illegible] यस्योरपि [illegible] दर्प-
[illegible] बाणोऽपीति चतुर्भिः । [illegible] ॥ १ ॥
॥ २ ॥ पिशिताशिनो मांसभुजो जनान् पिशाचादीन् [illegible]

ततः प्रणम्य मुदितः शम्भुमभ्यागतो गृहम्।
भग्नञ्च ध्वजमालोक्य हृष्टो हर्षान्तरं ययौ॥ ४॥
एतस्मिन्नेव काले तु योगविद्याबलेन तम्।
अनिरुद्धमथानिन्ये चित्रलेखा वराप्सराः॥ ५॥
कन्यान्तःपुरमध्ये तं रममाणं सहोषया।
विज्ञाय रक्षिणो गत्वा शशंसुर्दैत्यभूपतेः॥ ६॥
आदिष्टं किङ्कराणान्तु सैन्यं तेन दुरात्मना।
जघान परिघं लौहमादाय परवीरहा॥ ७॥
हतेषु तेषु बाणोऽपि रथस्थस्तद्वधोद्यतः।
युध्यमानो यथाशक्ति यदा वीर्य्येण निर्जितः॥ ८॥
मायया युयुधे तेन स तदा मन्त्रिचोदितः।
ततस्तं पन्नगास्त्रेण बबन्ध यदुनन्दनम्॥ ९॥
द्वारवत्यां क्व यातोऽसावनिरुद्धेति जल्पताम्।
यदूनामाचचक्षे तं बद्धं बाणेन नारदः॥ १०॥
तं शोणितपुरे श्रुत्वा नीतं विद्याविदग्धया।
योषिता प्रत्ययं जग्मुर्यादवा नामरैरिति॥ ११॥

शम्भोर्वाक्यं श्रुत्वा हृष्टो गृहमागम्य तं मयूरपिच्छध्वजं भग्नमालोक्य पुनर्हर्षान्तरं ययाविति द्वयोरन्वयः॥ ४। ६॥ तेन बाणेन आदिष्टं सैन्यं परवीरहा अनिरुद्धो जघान॥ ७। ८॥ अनिरुद्धेत्यत्रार्षः सन्धिः। अनिरुद्धः क्व यात इति जल्पतामित्यर्थः॥ १०॥ नारदवाक्यादेव योगविद्यानिपुणया चित्रलेखया नीतं शोणितपुरे वर्त्तमानं तं श्रुत्वा अमरैर्न नीत इति प्रत्ययं निश्चयं जग्मुः। पारिजातहरणे पराभूतैरमरैः प्रणीतः स्यादिति शङ्कां चक्रुरित्यर्थः॥ ११॥ समरे-

ततो गरुडमारुह्य स्मृतमात्रागतं हरिः ।
बलप्रद्युम्नसहितो बाणस्य प्रययौ पुरम् ॥ १२ ॥
पुरीप्रवेशे प्रमथैर्युद्धमासीन्महात्मनः ।
ययौ बाणपुराभ्याशं नीत्वा तान् संक्षयं हरिः ॥ १३ ॥
ततस्त्रिपादस्त्रिशिरा ज्वरो माहेश्वरो महान् ।
बाणरक्षार्थमत्यर्थं युयुधे शार्ङ्गधन्वना ॥ १४ ॥
तद्भस्मस्पर्शसम्भूततापः कृष्णाङ्गसङ्गमात् ।
अवाप बलदेवोऽपि श्रममामीलितेक्षणः ॥ १५ ॥
ततः स युध्यमानस्तु सह देवेन शार्ङ्गिणा ।
वैष्णवेन ज्वरेणाशु कृष्णदेहान्निराकृतः ॥ १६ ॥
नारायणभुजाघातपरिपीडनविह्वलम् ।
तं वीक्ष्य क्षम्यतामस्येत्याह देवः पितामहः ॥ १७ ॥
ततश्च क्षान्तमेवेति प्रोक्त्वा तं वैष्णवं ज्वरम् ।
आत्मन्येव लयं निन्ये भगवान् मधुसूदनः ॥ १८ ॥
मम त्वया समं युद्धं ये स्मरिष्यन्ति मानवाः ।
विज्वरास्ते भविष्यन्तीत्युक्त्वा चैनं ययौ ज्वरः ॥ १९ ॥

[illegible] ॥ १२ । १४ ॥ 'तद्भस्म' [illegible] इति
भस्मस्पर्शात् [illegible] यद् भस्म तस्य स्पर्शात् सम्भूततापो
यस्य बलदेवस्य स तथा तथोऽपि तेन तापेन आमीलितेक्षणोऽपि
कृष्णाङ्गसङ्गमात् श्रमं [illegible] । पाठान्तरे तद्भस्म-
स्पर्शात् सम्भूततापः यत् कृष्णाङ्गं तस्य सङ्गमात् बलदेवोऽपि
श्रमं तापमवापेत्यर्थः ॥ १५ ॥ ततः स माहेश्वरो ज्वरो विष्णोर्देहं
प्रविश्य तेन सह युध्यमानस्तद्देहोत्थेन वैष्णवेन ज्वरेण
तद्देहाद् बहिर्निःसारितः ॥ १६ । १७ ॥ [illegible]

ततोऽग्नीन् भगवान् पञ्च जित्वा नीत्वा तथा क्षयम् ।
दानवानां बलं विष्णुश्चूर्णयामास लीलया ॥ २० ॥
ततः समस्तसैन्येन दैतेयानां बलेः सुतः ।
युयुधे शङ्करश्चैव कार्त्तिकेयश्च शौरिणा ॥ २१ ॥
हरिशङ्करयोर्युद्धमतीवासीत् सुदारुणम् ।
चुक्षुभुः सकला लोकाः शस्त्रास्त्रांशुप्रतापिताः ॥ २२ ॥
प्रलयोऽयमशेषस्य जगतो नूनमागतः ।
मेनिरे त्रिदशा यत्र वर्त्तमाने महाहवे ॥ २३ ॥
जृम्भणास्त्रेण गोविन्दो जृम्भयामास शङ्करम् ।
ततः प्रणेशुर्दैतेयाः प्रमथाश्च समन्ततः ॥ २४ ॥
जृम्भाभिभूतश्च हरो रथोपस्थ उपाविशत् ।
न शशाक तथा योद्धुं कृष्णेनाक्लिष्टकर्मणा ॥ २५ ॥
गरुडक्षतवाहश्च प्रद्युम्नास्त्रप्रपीडितः ।
कृष्णहुङ्कारनिर्धूतशक्तिश्चापि ययौ गुहः ॥ २६ ॥
जृम्भिते शङ्करे नष्टे दैत्यसैन्ये गुहे जिते ।
नीते प्रमथसैन्ये च संक्षयं शार्ङ्गधन्वना ॥ २७ ॥

तु नाशं भगवतैव ज्वरद्वयकार्य्यव्यवस्थापनात् । तदुक्तं हरिवंशे "युवां ज्वरौ ज्वरयतां पीडायां मरणे प्रभू । पीडने तु भवानस्तु मरणे मामको ज्वरः" इति ॥ १८ ॥ १९ ॥ अग्नीन् पञ्च आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यान् ॥ २० ॥ २१ ॥ शस्त्राणामंशुभिः प्रकर्षेण तापिताः सन्तः ॥ २२ ॥

प्रलयो नूनमागत इति मेनिरे ॥ २३ ॥ प्रणेशुः पलायिताः ॥२४॥ जृम्भाभिभूतः आक्रान्तः रथोपस्थे रथपृष्ठे ॥ २५ ॥ कृष्णस्य हुङ्कारेण निर्धूता निरस्ता शक्तिरायुधं यस्य स गुहश्चापक्रान्तः ॥२६॥

मन्दोगसंस्थ्योताम्रमधिकटां महारथम् ।
बाणस्तत्राययौ योद्धुं कृष्णकार्ष्णिबलैः सह ॥ २८ ॥
बलभद्रो महावीर्यो बाणसैन्यमनेकधा ।
विव्याध बाणैः प्रभ्रश्य धर्मतस्तत् पलायत ॥ २९ ॥
आकृष्य लाङ्गलाग्रेण मुसलेनावघातितम् ।
बलं बलेन ददृशे बाणो बाणेन चक्रिणा ॥ ३० ॥
ततः कृष्णस्य बाणेन युद्धमासीत् समन्ततः ।
परस्परमथुन् दीप्तान् कायत्राणविभेदकान् ॥ ३१ ॥
कृष्णश्चिच्छेद बाणैस्तान् बाणेन प्रहितान् शरान् ।
बिभेद केशवं बाणो बाणं विव्याध चक्रभृत् ॥ ३२ ॥
मुमुचाते तथास्त्राणि बाणकृष्णौ जिगीषया ।
परस्परं क्षतिपरौ परमामर्षिणौ द्विज ! ॥ ३३ ॥
छिद्यमानेष्वशेषेषु शस्त्रेष्वस्त्रे च सीदति ।
प्राचुर्य्येण हरिर्बाणं हन्तुं चक्रे ततो मनः ॥ ३४ ॥
ततोऽर्कशतसङ्घाततेजसः सदृशद्युति ।
जग्राह दैत्यचक्रारिर्हरिश्चक्रं सुदर्शनम् ॥ ३५ ॥

॥ २८ ॥ वन्हेः पृथग्भवात् प्रद्युम्न बाणवैन्ध्यं पलायत पलायनमकरोत् ॥ २९ ॥ कर्तारम् बलं मुसलं चक्रिणा च बाणेनाक्षत बलं बाणो ददृशे ॥ ३० ॥ दैत्यचक्रारिरित्यादि वाक्यारम्भः । कायत्राणं कवचं तद्भेदकान् परस्परं क्षतिपरौ क्षिपतोः नष्टानाशनायमयं ज्ञानाय बाणेन प्रयुक्तान् शरांश्चिच्छेद ॥ ३१ ॥ ३२ ॥ बाणो च प्रभूते च सीदति क्षति ॥ ३३ ॥ अर्कशतसंघातस्य तेजःसमूहस्य सदृशी द्युतिर्यस्य तत् सुदर्शनं चक्रं जग्राह ॥ ३५ ॥ दैत्यारी शत्रु

मुञ्चतो बाणनाशाय तत्र चक्रं मधुद्विषः।
नग्ना दैतेयविद्याभूत् कोटवी पुरतो हरेः॥ ३६॥
तामग्रतो हरिर्दृष्ट्वा मीलिताक्षः सुदर्शनम्।
मुमोच बाणमुद्दिश्य छेत्तुं बाहुवनं रिपोः॥ ३७॥
क्रमेण तत् तु बाहूनां बाणस्याच्युतनोदितम्।
छेदं चक्रेऽसुरापास्तशस्त्रौघक्षपणादृतम्॥ ३८॥
छिन्ने बाहुवने तत् तु करस्थं मधुसूदनः।
मुमुक्षुर्बाणनाशाय विज्ञातस्त्रिपुरद्विषा॥ ३९॥
स उपेत्याह गोविन्दं सामपूर्वमुमापतिः।
विलोक्य बाणं दोर्दण्डच्छेदासृक्स्राववर्षिणम्॥ ४०॥

रुद्र उवाच।

कृष्ण! कृष्ण! जगन्नाथ, जाने त्वां पुरुषोत्तमम्।
परेशं परमानन्दमनादिनिधनं परम्॥ ४१॥
देवतिर्यङ्मनुष्येषु शरीरग्रहणात्मिका।
लीलेयं सर्वभूतस्य तव चेष्टोपलक्षणा॥ ४२॥
तत् प्रसीदाभयं दत्तं बाणस्यास्य मया प्रभो!।
तत् त्वया नानृतं कार्यं यन्मया व्याहृतं वचः॥ ४३॥
अस्मत्संश्रयदृप्तोऽयं नापराधस्तवाव्यय!।
मया दत्तवरो दैत्यस्ततस्त्वां क्षामयाम्यहम्॥ ४४॥

पराशर उवाच।

इत्युक्तः प्राह गोविन्दः शूलपाणिमुमापतिम्।
प्रसन्नवदनो भूत्वा गतामर्षोऽसुरं प्रति॥ ४५॥

दैतेयानां विद्या मन्त्रमयी कुलदेवता लम्बाख्या अष्टमोऽंशः।२६।२७।

श्रीभगवानुवाच ।

युष्मद्दत्तवरो बाण्णो जीवतामेष शङ्कर ।

त्वद्वाक्यगौरवादेतन्मया चक्रं निवर्त्तितम् ॥ ४६ ॥

त्वया यदभयं दत्तं तद्दत्तमखिलं मया ।

मत्तोऽविभिन्नमात्मानं द्रष्टुमर्हसि शङ्कर ॥ ४७ ॥

योऽहं स त्वं जगच्चेदं सदेवासुरमानुषम् ।

अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः ॥ ४८ ॥

इत्युक्त्वा प्रययौ कृष्णः प्राद्युम्निर्यत्र तिष्ठति ।

तद्बन्धफणिनो नेशुर्गरुडानिलशोषिताः ॥ ४९ ॥

ततोऽनिरुद्धमारोप्य सपत्नीकं गरुत्मति ।

आजग्मुर्द्वारकां रामकार्ष्णिदामोदराः पुरीम् ॥ ५० ॥

चतुस्त्रिंशोऽध्यायः ।

मैत्रेय उवाच ।

चक्रे कर्म महच्छौरिर्बिभ्राणो मानुषीं तनुम् ।

जिगाय शक्रं शर्व्वञ्च सर्व्वदेवांश्च लीलया ॥ १ ॥

यश्चान्यदकरोत् कर्म दिव्यचेष्टाविघातकृत् ।

तत् कथ्यतां महाभाग परं कौतूहलं हि मे ॥ २ ॥

कपुरिशालक मक्षोभक अवस नारत वादरम् ॥ ७६ ॥ मनोऽवि-

-भ मान भवः ॥ ८७ ॥ ६० ॥

पराशर उवाच।

गदतो मम विप्रर्षे! श्रूयतामिदमादरात्।
नरावतारे कृष्णेन दग्धा वाराणसी यथा ॥ ३ ॥
पौण्ड्रको वासुदेवस्तु वासुदेवोऽभवद् भुवि।
अवतीर्णस्त्वमित्युक्तो जनैरज्ञानमोहितैः ॥ ४ ॥
स मेने वासुदेवोऽहमवतीर्णो महीतले।
नष्टस्मृतिस्ततः सर्वं विष्णुचिह्नमचीकरत् ॥ ५ ॥
दूतञ्च प्रेषयामास कृष्णाय सुमहात्मने।
त्यक्त्वा चक्रादिकं चिह्नं मदीयं नाम चात्मनः ॥ ६ ॥
वासुदेवात्मकं मूढ़! मुक्त्वा सर्वं विशेषतः।
आत्मनो जीवितार्थाय ततो मे प्रणतिं व्रज ॥ ७ ॥
इत्युक्तः संप्रहस्यैनं दूतं प्राह जनार्दनः।
निजचिह्नमहञ्चक्रं समुत्स्रक्ष्ये त्वयीति वै ॥ ८ ॥
वाच्यः स पौण्ड्रको गत्वा त्वया दूत! वचो मम।
ज्ञातस्त्वद्वाक्यसद्भावो यत् कार्य्यं तद् विधीयताम् ॥ ९ ॥
गृहीतचिह्न एवाहमागमिष्यामि ते पुरम्।
समुत्स्रक्ष्यामि ते चक्रं निजचिह्नमसंशयम् ॥ १० ॥

दिव्यानां दिवि भवानां चेष्टा पराक्रमस्तद्विघातकृत्तिरस्कर्त्ता ॥ २ ॥ ३ ॥
पौण्ड्रकः पौण्ड्रदेशजः प्राकृतैर्जनैः संस्तुतस्त्वं वासुदेवोऽवतीर्णस्त्वमित्युक्तः सन् ॥ ४ ॥ सत्यमेवाहं वासुदेवोऽवतीर्ण इति स मेने ॥ ५ ॥ ७ ॥
समुत्स्रक्ष्ये त्वयीति बुद्धिसंनिहितं पौण्ड्रकमभिसन्धायोक्तम्। (चक्रं) चक्रं क्षिप्त्वा तं हनिष्यामीति भावः ॥ ८ ॥

आज्ञापूर्वञ्च यदिदमागच्छेति त्वयोदितम् ।
सम्पादयिष्ये स्वल्पं तदप्येषोऽविलम्बितम् ॥ ११ ॥
दत्वाहं ते समभ्येत्य कर्त्तास्मि नृपते तथा ।
यथा त्वत्तो भयं भूयो न मे किञ्चिद् भविष्यति ॥ १२ ॥
इत्युक्तेऽपगते दूते संस्मृत्याभ्यागतं हरिः ।
गरुत्मन्तमथारुह्य त्वरितस्तत्पुरं ययौ ॥ १३ ॥
स चापि केशवोद्योगं श्रुत्वा काशिपतिस्तदा ।
सर्वसैन्यपरीवारः पार्ष्णिग्राह उपाययौ ॥ १४ ॥
ततो बलेन महता काशिराजबलेन च ।
पौण्ड्रको वासुदेवोऽसौ केशवाभिमुखो ययौ ॥ १५ ॥
तं ददर्श हरिर्दूरादुदारस्यन्दने स्थितम् ।
चक्रहस्तं गदाखड्गबाहुं पाणिगताम्बुजम् ॥ १६ ॥
स्रग्धरं धृतशार्ङ्गञ्च सुपर्णरचितध्वजम् ।
वक्षस्यस्य कृतञ्चास्य श्रीवत्सं ददृशे हरिः ॥ १७ ॥
किरीटकुण्डलधरं पीतवासःसमन्वितम् ।
दृष्ट्वा तं भावगम्भीरं जहास गरुडध्वजः ॥ १८ ॥
युयुधे च बलेनास्य हस्त्यश्वबलिना द्विज ।
निस्त्रिंशर्ष्टिगदाशूलशक्तिकार्मुकशालिना ॥ १९ ॥
क्षणेन शार्ङ्गनिर्मुक्तैः शरैररिविदारणैः ।
गदाचक्रनिपातैश्च सूदयामास तद्बलम् ॥ २० ॥

[illegible] ॥ १० ॥ ११ ॥ [illegible] ॥ १२ ॥ [illegible]

काशिराजबलञ्चैव क्षयं नीत्वा जनार्द्दनः ।
उवाच पौण्ड्रकं मूढमात्मचिह्नोपलक्षणम् ॥ २१ ॥

श्रीभगवानुवाच ।

पौण्ड्रकोक्तं त्वया यत्तु दूतवक्त्रेण मां प्रति ।
समुत्सृजेति चिह्नानि तत्ते सम्पादयाम्यहम् ॥ २२ ॥
चक्रमेतत् समुत्सृष्टं गदेयं ते विसर्जिता ।
गरुत्मानेष निर्द्दिष्टः समारोहतु ते ध्वजम् ॥ २३ ॥

पराशर उवाच ।

इत्युच्चार्य्य विमुक्तेन चक्रेणासौ विदारितः ।
प्रोथिता गदया भग्ना गरुत्मांश्च गरुत्मता ॥ २४ ॥
ततो हाहाकृते लोके काशीनामधिपो बली ।
युयुधे वासुदेवेन मित्रस्यापचितौ स्थितः ॥ २५ ॥
ततः शार्ङ्गधनुर्मुक्तैश्छित्त्वा तस्य शरैः शिरः ।
काशिपूर्य्यां स चिक्षेप कुर्वन् लोकस्य विस्मयम् ॥ २६ ॥
हत्वा च पौण्ड्रकं शौरिः काशिराजञ्च सानुगम् ।
पुनर्द्वारवतीं प्राप्तो रेमे स्वर्गगतो यथा ॥ २७ ॥
तच्छिरः पतितं दृष्ट्वा तत्र काशिपतेः पुरे ।
जनः किमेतदित्याह केनेत्यत्यन्तविस्मितः ॥ २८ ॥
ज्ञात्वा तं वासुदेवेन हतं तस्य सुतस्ततः ।
पुरोहितेन सहितस्तोषयामास शङ्करम् ॥ २९ ॥

खगेश वाहिना निक्षिप्तायुधैः शार्ङ्गिणा साम्येन ॥ २४ ॥
अपचितौ तापापनये स्थितः सन् युयुधे ॥ २५ ॥ २७ ॥ प्रथमं

अविमुक्ते महाक्षेत्रे तोषितस्तेन शङ्करः।
वरं वृणीष्वेति तदा स प्रोवाच नृपात्मजम्॥ ३० ॥
स वव्रे भगवन्! कृत्या पितृहन्तुर्वधाय मे।
समुत्तिष्ठतु कृष्णस्य त्वत्प्रसादान्महेश्वर!॥ ३१ ॥

पराशर उवाच।

एवं भविष्यतीत्युक्ते दक्षिणाग्नेरनन्तरम्।
महाकृत्या समुत्तस्थौ तस्यैवाग्नेर्विनाशिनी॥ ३२ ॥
ततो ज्वालाकरालास्या ज्वलत्केशकलापिका।
कृष्ण कृष्णेति कुपिता कृत्वा द्वारवतीं ययौ॥ ३३ ॥
तामवेक्ष्य जनस्त्रासाद्विचलल्लोचनो मुने।
ययौ शरण्यं जगतां शरणं मधुसूदनम्॥ ३४ ॥
काशिराजसुतेनेयमाराध्य वृषभध्वजम्।
उत्पादिता महाकृत्येत्यवगम्याथ चक्रिणा॥ ३५ ॥
जहि कृत्यामिमामुग्रां वह्निज्वालाजटालकाम्।
चक्रमुत्सृष्टमक्षेषु क्रीडासक्तेन लीलया॥ ३६ ॥

[illegible] ॥ ३० ॥ [illegible] ॥ ३१ ॥ [illegible] ॥ ३२ ॥ [illegible] ॥ ३३ ॥ [illegible] ॥ ३५ ॥ [illegible] ॥ ३६ ॥

तदग्निमालाजटिलज्वालोद्गारातिभीषणाम् ।
कृत्यामनुजगामाशु विष्णुचक्रं सुदर्शनम् ॥ ३७ ॥
चक्रप्रतापविध्वस्ता कृत्या माहेश्वरी तथा ।
ननाश वेगिनी वेगात् तदप्यनुजगाम ताम् ॥ ३८ ॥
कृत्या वाराणसीमेव प्रविवेश त्वरान्विता ।
विष्णुचक्रप्रतिहतप्रभावा मुनिसत्तम ॥ ३९ ॥
ततः काशिबलं भूरिप्रमथानां तथा बलम् ।
समस्तशस्त्रास्त्रयुतं चक्रस्याभिमुखं ययौ ॥ ४० ॥
शस्त्रास्त्रमोक्षचतुरं दग्ध्वा तद् बलमोजसा ।
कृत्यागर्भामशेषां तां दग्ध्वा वाराणसीं पुरीम् ॥ ४१ ॥
सभूभृद्भृत्यपौरान्तु साश्वमातङ्गमानवाम् ।
अशेषकोषकोष्ठां तां दुर्निरीक्ष्यां सुरैरपि ॥ ४२ ॥
ज्वालापरिष्कृताशेषगृहप्राकारचत्वराम् ।
ददाह तद्धरेश्चक्रं सकलामेव तां पुरीम् ॥ ४३ ॥
अक्षीणामर्षमत्युग्रसाध्यसाधनसस्पृहम् ।
तच्चक्रं प्रस्फुरद्दीप्ति विष्णोरभ्याययौ करम् ॥ ४४ ॥

अग्निमालाभिर्जटिला व्याप्ता ज्वालाया उद्गारैश्चातिभीषणा च ताम् । पाठान्तरे चक्रविशेषणम् ॥ ३७ ॥ ननाश पलायत ॥ ३८ ॥ ॥ ४१ ॥ भूभृतां राज्ञां भृत्यैः पौरैश्च अन्विताम् ॥ ४२ ॥ ४३ ॥ अक्षीणामर्षम् अमन्दक्रोधं अत एवात्युग्रं कृत्यावाराणसीदाहादिः साध्यस्य साधनेन सस्पृहं पुनः कार्यान्तरसाधनाय साकाङ्क्षं सत्वरं ।

पञ्चत्रिंशोऽध्यायः ।

मैत्रेय उवाच ।

भूय एवाहमिच्छामि बलभद्रस्य धीमतः ।
श्रोतुं पराक्रमं ब्रह्मन् ! तन्ममाख्यातुमर्हसि ॥ १ ॥
यमुनाकर्षणादीनि श्रुतानि भगवन्मया ।
तत् कथ्यतां महाभाग ! यदन्यत् कृतवान् बलः ॥ २ ॥

पराशर उवाच ।

मैत्रेय ! श्रूयतां कर्म यद्रामेणाभवत् कृतम् ।
अनन्तेनाप्रमेयेन शेषेण धरणीभृता ॥ ३ ॥
दुर्योधनस्य तनयां स्वयंवरकृतेक्षणाम् ।
बलादादत्तवान् वीरः साम्बो जाम्बवतीसुतः ॥ ४ ॥
ततः क्रुद्धा महावीर्याः कर्णदुर्योधनादयः ।
भीष्मद्रोणादयश्चैनं बबन्धुर्युधि निर्जितम् ॥ ५ ॥
तत् श्रुत्वा यादवाः सर्वे क्रोधं दुर्योधनादिषु ।
मैत्रेय ! चक्रुश्च ततो निहन्तुं तं महोद्यमम् ॥ ६ ॥
तान् निवार्य बलः प्राह मदलोलाकुलाक्षरम् ।
मोक्ष्यन्ति ते मद्वचनात् यास्याम्येको हि कौरवान् ॥ ७ ॥

[illegible]

बलदेवस्ततो गत्वा नगरं नागसाह्वयम् ।
बाह्योपवनमध्येऽभूत् न विवेश च तत् पुरम् ॥ ८ ॥
बलमागतमाज्ञाय भूपा दुर्योधनादयः ।
गामर्घमुदकञ्चैव रामाय प्रत्यवेदयन् ॥ ९ ॥
गृहीत्वा विधिवत् सर्वं ततस्तानाह कौरवान् ।
आज्ञापयत्युग्रसेनः साम्बमाशु विमुञ्चत ॥ १० ॥
ततस्ते तद् वचः श्रुत्वा भीष्मद्रोणादयो द्विज ! ।
कर्णदुर्योधनाद्याश्च चुक्रुधुर्द्विजसत्तम ! ॥ ११ ॥
ऊचुश्च कुपिताः सर्वे बाह्लीकाद्याश्च कौरवाः ।
अराज्यार्हं यदोर्वंशमवेक्ष्य मुषलायुधम् ॥ १२ ॥
भो ! भोः ! किमेतद् भवता बलभद्रेरितं वचः ।
आज्ञां कुरुकुलोत्थानां यादवः कः प्रदास्यति ॥ १३ ॥
उग्रसेनोऽपि यद्याज्ञां कौरवाणां प्रदास्यति ।
तदलं पाण्डुरैश्छत्रैर्नृपयोग्यैर्विडम्बितैः ॥ १४ ॥
तद् गच्छ बल ! पापाढ्यं साम्बमन्यायचेष्टितम् ।
विमोक्ष्यामो न भवतो नोग्रसेनस्य शासनात् ॥ १५ ॥
प्रणतिर्या कृतास्माकं मान्यानां कुकुरान्धकैः ।
न नाम सा कृता केयमाज्ञा स्वामिनि भृत्यतः ॥ १६ ॥

तथा भवतेत्थं प्राह । ७ । तत् पुरं विवेशेति श्लोकाकरणे योज्यं
तत् पुरस्य मध्यभागे प्रवेष्टुमिच्छन् । उदकमप्यर्घ्यं रामाय दत्तवन्तः । ९ ।
विभुत्वमतेरथ्यादनुसरणेन छत्रैर्बहुना चामरैश्चाक्षुर्नैरलम् । नान्यप्र-
तिपत्त्याऽत इति भावः ॥ १४ ॥ १५ । अस्माभिर्मानितत्वात् या प्रणतिरस्य
न कृता चेत् तथा नाम नास्तु केयमाज्ञा स्वामिनीति । वयं स्वामिनो
यादवास्तद्भृत्याः । अत आज्ञा न युक्ता किन्तु विज्ञापयतीति वक्तव्य-

गर्वमारोपिता यूयं समानासनभोजनैः ।
को दोषो भवतां नीतिर्यत् प्रीत्या नावलोकिता ॥१७॥
अस्माभिरर्घ्यो भवतां योऽयं बल । निवेदितः ।
प्रेम्णैतन्नैतदस्माकं कुलं युष्मत्कुलोचितम् ॥ १८ ॥

पराशर उवाच ।

इत्युक्ता कुरवः सर्वे न मुञ्चामो हरेः सुतम् ।
कृतैकनिश्चयास्तूर्णं विविशुर्गजसाह्वयम् ॥ १९ ॥
मत्तः कोपेन चाघूर्णंस्तदधिक्षेपजन्मना ॥ २० ॥
उत्थाय पार्ष्ण्या वसुधां जघान स हलायुधः ॥ २१ ॥
ततो विदारिता पृथ्वी पार्ष्णिघातान्महात्मनः ।
आस्फोटयामास तदा दिशः शब्देन पूरयन् ॥ २२ ॥
स उवाचातिताम्राक्षो भ्रुकुटीकुटिलाननः ।
अहो ! मदावलेपोऽयमसाराणां दुरात्मनाम् ॥ २३ ॥
कौरवाणां महीपत्वमस्माकं किल कालजम् ।
उग्रसेनस्य ये नाज्ञां मन्यन्तेऽद्यापि लङ्घनम् ॥ २४ ॥

विति भावः ॥ १६ ॥ नीतिर्यत् प्रीत्या नावलोकितेति स्वीयाभावनि-
युक्तानां न कार्य्यं दण्डं च भूता राजनीतिमुल्लङ्घ्य प्रीत्यास्माभिर्न
विचारिता भवतोऽस्माकमेवायं दोष इति भावः ॥ १७ ॥ १८ ॥ न
मुमुचुः इति कृतैकनिश्चयाः कृतनिश्चयाः ॥ १९ ॥ अधिक्षेपजन्मना तिर-
स्कारजेन ॥ २० ॥ २१ ॥ असाराणां बलहीनानाम् ॥ २३ ॥

कौरवाणां महीपत्वमिति छेदः । कालजम् कालवशात् कालमनुप-
तितम् महदाश्चर्य्यम् । अद्यापि उग्रसेनस्याज्ञापालने लङ्घनं ये
कुरव आज्ञां न लङ्घनं मन्यन्ते किन्तु लङ्घनमेव मन्यन्ते ॥ २४ ॥

आज्ञां प्रतीच्छेद्धर्मेण सह देवैः शचीपतिः ।
सदाध्यास्ते सुधर्मां तामुग्रसेनः शचीपतेः ॥ २५ ॥
धिङ्मनुष्यशतोच्छिष्टे तुष्टिरेषां नृपासने ।
पारिजाततरोः पुष्पमञ्जरीर्वनिताजनः ॥ २६ ॥
बिभर्त्ति यस्य भृत्यानां सोऽप्येषां न महीपतिः ।
समस्तभूभुजां नाथ उग्रसेनः स तिष्ठतु ॥ २७ ॥
अद्य निष्कौरवामुर्वीं कृत्वा यास्यामि तत्पुरीम् ।
कर्णं दुर्योधनं द्रोणमद्य भीष्मं सबाह्लिकम् ॥ २८ ॥
दुष्टान् दुःशासनादींश्च भूरिश्रवसमेव च ।
सोमदत्तं शलं भीममर्जुनं सयुधिष्ठिरम् ॥ २९ ॥
यमजौ कौरवांश्चान्यान् हत्वा साश्वरथद्विपान् ।
वीरमादाय शाम्बञ्च सपत्नीकं ततः पुरीम् ॥ ३० ॥
द्वारकामुग्रसेनादीन् गत्वा द्रक्ष्यामि बान्धवान् ।
अथवा कौरवाधीन समस्तैः कुरुभिः सह ॥ ३१ ॥
भारावतरणे शीघ्रं देवराजेन चोदितः ।
भागीरथ्यां क्षिपाम्याशु नगरं नागसाह्वयम् ॥ ३२ ॥

पराशर उवाच ।

इत्युक्त्वा मदरक्ताक्षः कर्षणाधोमुखं हलम् ।
प्राकारवप्रे विन्यस्य चकर्ष मुषलायुधः ॥ ३३ ॥

अत्रापीश्वराभिप्रायं विवृणोति, आज्ञां प्रतीच्छेदिति ॥ २४ ॥ २७ ॥ यमजौ नकुलसहदेवौ ॥ २८ ॥ कर्षणार्थमधोमुखं प्राकारवप्रे दुर्गस्य मूलदेशे ॥ ३३ ॥ आघूर्णितं विचलितम् ॥ ३४ ॥

आघूर्णितं तत् सहसा ततो वै हस्तिनापुरम् ।
दृष्ट्वा संक्षुब्धहृदयाश्चुक्रुशुः सर्वकौरवाः ॥ ३४ ॥
राम ! राम ! महाबाहो ! क्षम्यतां क्षम्यतां त्वया ।
उपसंह्रियतां कोपः प्रसीद मुषलायुध ! ॥ ३५ ॥
एष साम्बः सपत्नीकस्तव निर्यातितो बल ! ।
अविज्ञातप्रभावाणां क्षम्यतामपराधिनाम् ॥ ३६ ॥

पराशर उवाच ।

ततो निर्यातयामासुः साम्बं पत्न्या समन्वितम् ।
निष्क्रम्य नगरात् तूर्णं कौरवा मुनिपुङ्गव ! ॥ ३७ ॥
भीष्मद्रोणकृपादीनां प्रणम्य वदतां प्रियम् ।
क्षान्तमेतन्मयेत्याह बलो बलवतां वरः ॥ ३८ ॥
अद्याप्याघूर्णिताकारं लक्ष्यते तत् पुरं द्विज ! ।
एष प्रभावो रामस्य बलशौर्योपलक्षणः ॥ ३९ ॥
ततस्तु कौरवाः साम्बं सम्पूज्य हलिना सह ।
प्रेषयामासुरुद्वाहधनभार्यासमन्वितम् ॥ ४० ॥

निर्यातितः समर्पितः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ उद्वाहपूर्वकेण परिबर्हेण भार्यया च समन्वितम् ॥ ३८ ॥

षट्त्रिंशोऽध्यायः ।

पराशर उवाच ।

मैत्रेय ! श्रूयतां तस्य बलस्य बलशालिनः ।
कृतं यदन्यत् तेनाभूत् तदपि श्रूयतां द्विज ! ॥१॥
नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सखाभवन्महावीर्यो द्विविदो नाम वानरः ॥ २ ॥
वैरानुबन्धं बलवान् स चकार सुरान् प्रति ।
नरकं हतवान् कृष्णो बलदर्पसमन्वितम् ॥ ३ ॥
करिष्ये सर्वदेवानां तस्मादेष प्रतिक्रियाम् ॥ ४ ॥
यज्ञविध्वंसनं मेने सर्वलोकक्षयं हितम् ।
ततो विध्वंसयामास यज्ञानज्ञानमोहितः ॥ ५ ॥
बिभेद साधुमर्य्यादां क्षयं चक्रे च देहिनाम् ।
ददाह च वनोद्देशान् पुरग्रामान्तराणि च ॥ ६ ॥
क्वचिच्च पर्वताक्षेपैर्ग्रामादीन् समचूर्णयत् ।
शैलानुत्पाट्य तोयेषु मुमोचाम्बुनिधौ तथा ॥ ७ ॥
पुनश्चार्णवमध्यस्थः क्षोभयामास सागरम् ।
तेन विक्षोभितश्चाब्धिरुद्वेलोऽजायत द्विज ! ॥ ८ ॥
प्लावयंस्तीरजान् ग्रामान् पुरादीनतिवेगवान् ।
कामरूपी महारूपं कृत्वा संस्थानशेषतः ॥ ८ ॥

मैत्रेय ! श्रूयतामिति यदुक्तं तदेव विवृणोति, कृतं यदन्यदिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ रैवतो द्वारकायाः

सुपठन् भ्रमणसंमर्दैः सञ्चूर्णयति वानरः ।
तेन विप्रकृतं सर्वं जगदेतद् दुरात्मना ॥ १० ॥
निःस्वाध्यायवषट्कारं मैत्रेयासीत् सुदुःखितम् ॥ ११ ॥
एकदा रैवतोद्याने पपौ पानं हलायुधः ।
रेवती च महाभागा तथैवान्या वरस्त्रियः ॥ १२ ॥
उपगीयमानो विलसल्ललनामौलिमध्यगः ।
रेमे यदुवरश्रेष्ठः कुबेर इव मन्दरे ॥ १३ ॥
ततः स वानरोऽभ्येत्य गृहीत्वा सीरिणो हलम् ।
मुषलञ्च चकाराथ सम्मुखञ्च विडम्बनम् ॥ १४ ॥
तथैव योषितां तासां जहासाभिमुखं कपिः ।
पानपूर्णांश्च करकांश्चिक्षेपाहत्य वै तदा ॥ १५ ॥
ततः कोपपरीतात्मा भर्त्सयामास तं बलः ।
तथापि तमवज्ञाय चक्रे किलकिलाध्वनिम् ॥ १६ ॥
ततः समुत्थाय बलो जग्राह मुषलं रुषा ।
सोऽपि शैलशिलां भीमां जग्राह प्लवगोत्तमः ॥ १७ ॥
चिक्षेप च स तां क्षिप्तां मुषलेन सहस्रधा ।
बिभेद यादवश्रेष्ठः सा पपात महीतले ॥ १८ ॥
आपतन्मुषलञ्चासौ समुल्लङ्घ्य प्लवङ्गमः ।
वेगेनागम्य रोषेण तलेनोरस्यताडयत् ॥ १९ ॥
ततो बलेन कोपेन मुष्टिना मूर्ध्नि ताडितः ।
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः ॥ २० ॥

[illegible] ॥ १० ॥ [illegible]
[illegible] ॥ ११ ॥ विडम्बनं [illegible]

पतता तच्छरीरेण गिरेः शृङ्गमदीर्य्यत।
मैत्रेय! शतधा वज्रिवज्रेणेव हि ताड़ितम्॥ ॥ २१॥
पुष्पवृष्टिं ततो देवा रामस्योपरि चिक्षिपुः।
प्रशशंसुस्तथाभ्येत्य साध्वेतत्ते महत् कृतम॥ २२॥
अनेन दुष्टकपिना दैत्यपक्षोपकारिणा।
जगन्निराकृतं वीर। दिष्ट्यासौ क्षयमागतः।
इत्युक्त्वा दिवमाजग्मुर्देवा हृष्टाः सगुह्यकाः॥ २३॥

पराशर उवाच।

एवंविधान्यनेकानि बलदेवस्य धीमतः।
कर्म्माण्यपरिमेयाणि शेषस्य धरणीभृतः॥ २४॥

सप्तत्रिंशोऽध्यायः।

एवं दैत्यबधं कृष्णो बलदेवसहायवान्।
चक्रे दुष्टक्षितीशानां तथैव जगतः कृते॥ १॥
क्षितेश्च भारं भगवान् फाल्गुनेन समं विभुः।
अवतारयामास हरिः समस्ताक्षौहिणीबधात्॥ २॥

हलदर्शनादिविक्रियाम्॥ १२॥ पीयते इति पानं मदिरा तत्पूर्णाम् करकाम् कलशाम्॥ १२॥ १८॥ अदीर्य्यत विदीर्णमभूत्॥ १८॥ २०॥

दुष्टक्षितीशानाच बधं चक्रे॥ १॥ फाल्गुनेन समं तद्द्वारकेण

कृतं भारावतरणं भुवो हत्वाखिलान् नृपान्।
शापव्याजेन विप्राणामुपसंहृतवान् कुलम्॥ ३॥
उत्सृज्य द्वारकां कृष्णस्त्यक्त्वा मानुष्यमात्मभूः।
सांशो विष्णुमयं स्थानं प्रविवेश पुनर्निजम्॥ ४॥

मैत्रेय उवाच।

स विप्रशापव्याजेन संजह्रे स्वकुलं कथम्।
कथञ्च मानुषं देहमुत्ससर्ज जनार्दनः॥ ५॥

पराशर उवाच।

विश्वामित्रस्तथा कण्वो नारदश्च महामुनिः।
पिण्डारके महातीर्थे दृष्टा यदुकुमारकैः॥ ६॥
ततस्ते यौवनोन्मत्ता भाविकार्यप्रचोदिताः।
साम्बं जाम्बवतीपुत्रं भूषयित्वा स्त्रियं यथा॥ ७॥
प्रसृतास्तान् मुनीनूचुः प्रणिपातपुरःसरम्।
इयं स्त्री पुत्रकामस्य बभ्रोः किं जनयिष्यति॥ ८॥
दिव्यज्ञानोपपन्नास्ते विप्रलब्धाः कुमारकैः।
मुनयः कुपिताः प्रोचुर्मुषलं जनयिष्यति।
येनाखिलकुलोत्सादो यादवानां भविष्यति॥ ९॥
इत्युक्तास्तैः कुमारास्ते आचचक्षुर्यथातथम्।
उग्रसेनाय मुषलं जज्ञे साम्बस्य चोदरात्॥ १०॥

च स्थितेर्भारावतारणाय ॥ १ ॥ २ ॥ मानुष्यं मनुष्यभावं, आत्मभूः स्वयम्भूरादिदेवस्वरूपः ॥ ५ ॥ ६ ॥ भाविकार्यं यादवकुलक्षयस्तेन प्रचुदिताः ॥ ७ ॥ ८ ॥ दिव्यज्ञानोपेतैरपि अज्ञत्वं तज्ज्ञानलब्धत्वा विप्रलब्धा वञ्चिताः ॥ ९ ॥ यथावृत्तमाचचक्षुः न तु गोपयामासुः ॥ १० ॥ उग-

तदुग्रसेनो मुसलमयश्चूर्णमकारयत्।
जज्ञे स चैरकाचूर्णः प्रक्षिप्तस्तैर्महोदधौ। ॥ ११ ॥
मुसलस्याथ लोहस्य चूर्णितस्यान्धकैर्द्विज।
खण्डं चूर्णयितुं शेकुर्नैकं ते तोमराकृति ॥ १२ ॥
तदप्यम्बुनिधौ क्षिप्तं मत्स्यो जग्राह घातिभिः।
घातितस्योदरात् तस्य लुब्धो जग्राह तं जरा ॥ १३ ॥
विज्ञातपरमार्थोऽपि भगवान् मधुसूदनः।
नैच्छत् तदन्यथाकर्त्तुं विधिना यत् समीहितम् ॥ १४ ॥
देवैश्च प्रहितो दूतः प्रणिपत्याह केशवम्।
रहस्येवमहं दूतः प्रहितो भगवन्! सुरैः ॥ १५ ॥
विश्वाश्विमरुदादित्यरुद्रसाध्यादिभिः सह।
विज्ञापयति शक्रस्तदिदं श्रूयतां प्रभो! ॥ १६ ॥
भारावतारणार्थाय वर्षाणामधिकं शतम्।
भगवानवतीर्णोऽत्र त्रिदशैः संप्रसादितः ॥ १७ ॥
दुर्वृत्ता निहता दैत्या भुवो भारोऽवतारितः।
त्वया सनाथास्त्रिदशा भवन्तु त्रिदिवे पुनः ॥ १८ ॥

सेनोऽपि श्रीकृष्णनियोगादेव स्वयं तदायसं मुसलं चूर्णमकारयत्। अनेन च विनाशकाले तेषां कण्ठवैरस्य सूचितम्। स च चूर्णः। तच्चूर्णं महोदधौ प्रक्षिप्तं स तद्वेलायां रूढम्। एरका धारामयोपेताश्चूर्णभेदा भूत्वा जाता। एकेन मुसलेन बहूनां परस्परम् प्रहरणोपयोगात् चूर्णद्वारा तदेव बहुधा परिणतमिति भावः। तोमराकृति तद्वदवयवम् ॥ १२ ॥ घातिभिर्मत्स्यघातिभिर्घातितस्य तस्योदरात् जरासंज्ञो लुब्धो व्याधो जग्राह। स च जराधिष्ठातृदेवतांशो यदुवंश एव व्याधत्वं प्राप्त इति हरिवंशे प्रसिद्धम् ॥ १२ ॥ १६ ॥ पञ्चविंशत्यधिकं

तदतीतं भगवतः वर्षाणामधिकं शतम् ।
इदानीं गम्यतां स्वर्गो भवता यदि रोचते ॥ १९ ॥
देवैर्विज्ञाप्यते चेदमथात्रैव रतिस्तव ।
तत् स्थीयतां यथाकाममाख्येयमनुजीविभिः ॥ २० ॥

श्रीभगवानुवाच ।

यत्त्वमात्थाखिलं दूत ! वेद्म्येतदहमप्युत ।
प्रारब्ध एव हि मया यादवानामपि क्षयः ॥ २१ ॥
भुवः नाद्यापि भारोऽयं यादवैरनिबर्हितैः ।
अवतार्य करोम्येतत् सप्तरात्रेण सत्वरः ॥ २२ ॥
यथा गृहीतमम्भोधेर्दत्त्वाहं द्वारकाभुवम् ।
यादवानुपसंहृत्य यास्यामि त्रिदशालयम् ॥ २३ ॥
मनुष्यदेहमुत्सृज्य सङ्कर्षणसहायवान्
प्राप्त एवास्मि मन्तव्यो देवेन्द्रेण तथा सुरैः ॥ २४ ॥
जरासन्धादयो येऽन्ये निहता भारहेतवः
क्षितेस्तेभ्यः कुमारोऽपि यदूनां नापचीयते ॥ २५ ॥
तदेतं सुमहाभारमवतार्य क्षितेरहम्
यास्याम्यमरलोकस्य पालनाय ब्रवीहि तान् ॥ २६ ॥

शतं वर्षाणां अतीतम्, पञ्चविंशाधिकमिति पुराणान्तरे ॥ १७ ॥ १८ ॥ [illegible] [illegible] द्वारकायाम् ॥ २० ॥ अनुजीविभिः [illegible] [illegible] ॥ २१ ॥ तत् [illegible] यादवानाम्, प्रारब्धः समाप्तः, [illegible] इति । [illegible] [illegible] ॥ २२ ॥ २३ ॥ [illegible] [illegible] ॥ २४ ॥ यदूनां कुमारोऽपि [illegible] नापचीयते [illegible] [illegible] ॥ २५ ॥

परासर उवाच ।

इत्युक्तो वासुदेवेन देवदूतः प्रणम्य तम्
मैत्रेय ! दिव्यया गत्या देवराजान्तिकं ययौ ॥ २७ ॥
भगवानप्यथोत्पातान् दिव्यभौमान्तरीक्षगान् ।
ददर्श द्वारकापुर्यां विनाशाय दिवानिशम् ॥ २८ ॥
तान् दृष्ट्वा यादवानाह पश्यध्वमतिदारुणान् ।
महोत्पातान् शमायैषां प्रभासं याम मा चिरम् ॥ २९ ॥

परासर उवाच ।

एवमुक्ते तु कृष्णेन यादवप्रवरस्ततः ।
महाभागवतः प्राह प्रणिपत्योद्धवो हरिम् ॥ ३० ॥
भगवन् ! यन्मया कार्य्यं तदाज्ञापय साम्प्रतम् ।
मन्ये कुलमिदं सर्वं भगवान् संहरिष्यति ।
नाशायास्य निमित्तानि कुलस्याच्युत ! लक्षये ॥ ३१ ॥

भगवानुवाच ।

गच्छ त्वं दिव्यया गत्या मत्प्रसादसमुत्थया ।
बदरीमाश्रमं पुण्यं गन्धमादनपर्वते ॥ ३२ ॥
नरनारायणस्थाने तत्पावितमहीतले ।
मन्मना मत्प्रसादेन तत्र सिद्धिमवाप्स्यसि ॥ ३३ ॥

भगवानपि प्रथमेन श्लोकेन उत्पातान् ददर्श । तत्र दिव्या धूमकेत्वादयः, भौमा भूकम्पादयः, अन्तरीक्षगाः दिग्दाहोल्कापातादयः ॥ २८ ॥

द्वारकायां मरणे आधिकारिकदेवांशानां यादवानां मुक्तिः स्यात् । तस्मान्मुक्तिनिवारणाभिप्रायेण प्रभासं गन्तुं महोत्पातव्याजेन, यथा उत्पातानामुपशमार्थं प्रभासं गच्छामेति ॥ २९ ॥ ३१ ॥ अन्तर्हितः

अहं स्वर्गं गमिष्यामि उपसंहृत्य वै कुलम् ।
द्वारकाञ्च मया त्यक्तां समुद्रः प्लावयिष्यति ॥ १४ ॥

पराशर उवाच ।

इत्युक्तः प्रणिपत्यैनं जगामाथ तदोद्धवः ।
नरनारायणस्थानं केशवेनानुमोदितः ॥ १५ ॥
ततस्ते यादवाः सर्वे रथानारुह्य शीघ्रगान् ।
प्रभासं प्रययुः सार्द्धं कृष्णरामादिभिर्द्विज ॥ १६ ॥
प्राप्य प्रभासं प्रयताः प्रीतास्ते कुक्कुरान्धकाः ।
चक्रुस्तत्र सुरापानं वासुदेवानुमोदिताः ॥ १७ ॥
पिबतां तत्र वै तेषां सङ्घर्षेण परस्परम् ।
अतिवादेन्धनो जज्ञे कलहाग्निः क्षयावहः ॥ १८ ॥
जघ्नुः परस्परं ते तु शस्त्रैर्दैवबलात् कृताः ।
क्षीणशस्त्राश्च जगृहुः प्रत्यासन्नामथैरकाम् ॥ १९ ॥
एरका तु गृहीता तैर्वज्रभूतेव लक्ष्यते ।
तया परस्परं जघ्नुः सम्प्रहारे सुदारुणे ॥ २० ॥
प्रद्युम्नसाम्बप्रमुखाः कृतवर्माथ सात्यकिः ।
अनिरुद्धादयश्चान्ये पृथुर्विपृथुरेव च ॥ २१ ॥

[illegible] ॥ १५ । १६ ॥ १७ ॥ [illegible] । [illegible] । १८ । [illegible] ॥ १९ ॥ [illegible]

चारुवर्मा चारुकश्च तथाक्रूरादयो द्विज ।
एरकारूपिभिर्वज्रैस्ते निजघ्नुः परस्परम् ॥ ४२ ॥
निवारयामास हरिर्यादवांस्ते च केशवम् ।
सहायं मेनिरे प्राप्तं ते निजघ्नुः परस्परम् ॥ ४३ ॥
कृष्णोऽपि कुपितस्तेषामेरकामुष्टिमाददे ।
वधाय सोऽपि मुषलं मुष्टिर्लोहमभूत् तदा ॥ ४४ ॥
जघान तेन निःशेषान् यादवानाततायिनः ।
जघ्नुश्च सहसाभ्येत्य तथान्ये च परस्परम् ॥ ४५ ॥
ततश्चार्णवमध्येन जैत्रोऽसौ चक्रिणो रथः ।
पश्यतो दारुकस्याशु हृतोऽश्वैर्द्विजसत्तम ॥ ४६ ॥
चक्रं तथा गदा शार्ङ्गं तूणौ शङ्खोऽसिरेव च ।
प्रदक्षिणं हरिं कृत्वा जग्मुरादित्यवर्त्मना ॥ ४७ ॥
क्षणेन नाभवत् कश्चिद् यादवानामघातितः ।
ऋते कृष्णं महाबाहुं दारुकञ्च महामुने ॥ ४८ ॥
चंक्रम्यमाणौ तौ रामं वृक्षमूलकृतासनम् ।
ददृशाते मुखाच्चास्य निष्क्रामन्तं महोरगम् ॥ ४९ ॥
निष्क्रम्य स मुखात् तस्य महाभोगो भुजङ्गमः ।
प्रययावर्णवं सिद्धैः स्तूयमानस्तथोरगैः ॥ ५० ॥

युद्धे ॥ ४१ ॥ निवार्यमाणास्ते यादवाः केशवं तेषां स्वपक्षपातिनां वधाय प्राप्तं मेनिरे । अतस्तत्सहायमनादृत्य परस्परं ते च जघ्नुः ॥ ४२ ॥ ४३ ॥ सोऽप्येरकामुष्टिस्तदा पुनर्लौहमयं मुषलमेवासीत् ॥ ४४ ॥ आततायिनः स्ववधे प्रवृत्तान् ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ चंक्रम्यमाणौ तत्र तत्र भ्रमन्तौ ॥ ४९ ॥ आत्मनि परं ब्रह्म समारोप्य ब्रह्मै-वाहमिति ध्यात्वा तथात्मानं सर्वभूतेष्वधारयत् । सर्वभूतान्यप्यात्मन्येवेति

ततोऽर्घमादाय तदा जलधिः संमुखं ययौ ।
प्रविवेश च तत्तोयं पूजितः पन्नगोत्तमैः ॥ ५१ ॥
दृष्ट्वा बलस्य निर्याणं दारुकं प्राह केशवः ।
इदं सर्वं त्वमाचक्ष्व वसुदेवोग्रसेनयोः ॥ ५२ ॥
निर्याणं बलभद्रस्य यादवानां तथा क्षयम् ।
योगे स्थित्वाहमप्येतत् परित्यक्ष्ये कलेवरम् ॥ ५३ ॥
वाच्यश्च द्वारकावासिजनः सर्वस्तथाहुकः ।
यथेमां नगरीं सर्वां समुद्रः प्लावयिष्यति ॥ ५४ ॥
तस्माद् भवद्भिः सर्वैस्तु प्रतीक्ष्यो ह्यर्जुनागमः ।
न स्थेयं द्वारकामध्ये निष्क्रान्ते तत्र पाण्डवे ॥ ५५ ॥
तेनैव सह गन्तव्यं यत्र याति स कौरवः ।
गत्वा च ब्रूहि कौन्तेयमर्जुनं वचनान्मम ॥ ५६ ॥
पालनीयस्त्वया शक्त्या जनोऽयं मत्परिग्रहः ।
इत्यर्जुनेन सहितो द्वारवत्या भवान् जनम् ।
गृहीत्वा यातु वज्रश्च यदुराज्येऽभिषिच्यताम् ॥ ५७ ॥

पराशर उवाच ।

इत्युक्तो दारुकः कृष्णं प्रणिपत्य पुनः पुनः ।
प्रदक्षिणञ्च बहुशः कृत्वा प्रायाद् यथोदितम् ॥ ५८ ॥
स गत्वा च तदा चक्रे द्वारकायां तथार्जुनम् ।
आनिनाय महाबुद्धिर्वज्रं चक्रे तथा नृपम् ॥ ५९ ॥

[illegible] ॥ ४८ ॥ ५० ॥ [illegible] भवति लोकपाल-
नाय [illegible] ॥ ५८ ॥ [illegible]
[illegible]

भगवानपि गोविन्दो वासुदेवात्मकं परम् ।
ब्रह्मात्मनि समारोप्य सर्वभूतेष्वधारयत् ॥ ६० ॥
सम्मानयन् द्विजवचो दुर्वासा यदुवाच ह ।
योगयुक्तोऽभवत् पादं कृत्वा जानुनि सत्तम ॥ ६१ ॥
आययौ च जरा नाम स तदा तत्र लुब्धकः ।
मुसलावशेषलोहैकसायकन्यस्ततोमरः ॥ ६२ ॥
स तत्पादं मृगाकारमवेक्ष्यारादवस्थितः ।
तले विव्याध तेनैव तोमरेण द्विजोत्तम ! ॥ ६३ ॥
गतश्च ददृशे तत्र चतुर्बाहुधरं नरम् ।
प्रणिपत्याह चैवैनं प्रसीदेति पुनःपुनः ॥ ६४ ॥
अजानता कृतमिदं मया हरिणशङ्कया ।
क्षम्यतामात्मपापेन दग्धं मां दग्धुमर्हसि ॥ ६५ ॥

श्रीपराशर उवाच ।

ततस्तं भगवानाह न तेऽस्ति भयमण्वपि ।
गच्छ त्वं मत्प्रसादेन लुब्ध ! स्वर्गं सुरालयम् ॥ ६६ ॥
विमानमागतं सद्यस्तद्वाक्यसमनन्तरम् ।
आरुह्य प्रययौ स्वर्गं लुब्धकस्तत्प्रसादतः ॥ ६७ ॥

कथा । कदाचिद्दुग्धान्नेन दुर्वाससमतिथिं भगवान् भोजयामास । तदा च स्वाङ्गं तदुच्छिष्टेन लिम्पन् पादौ नालिम्पत् । तदा च कुपितः स प्राह, तव पादतलं मरणस्थानं भविष्यतीति । तदेतद् वाक्यं समान-यितुं तथोपविश्य इति ॥ ६१ ॥ मुसलावशेषलोहमेव एकस्मिन्नस्त्रे

गते तस्मिन् स भगवान् संयोज्यात्मानमात्मनि ।
ब्रह्मभूतेऽव्ययेऽचिन्त्ये वासुदेवमयेऽमले ॥ ६८ ॥
अजन्मन्यजरेऽनाम्न्यप्रमेयेऽखिलात्मनि ।
तत्याज मानुषं देहमतीत्य त्रिविधां गतिम् ॥ ६९ ॥

अष्टत्रिंशोऽध्यायः ।

श्रीपराशर उवाच ।

अर्जुनोऽपि तदान्विष्य कृष्णरामकलेवरे ।
संस्कारं लम्भयामास तथान्येषामनुक्रमात् ॥ १ ॥
अष्टौ महिष्यः कथिता रुक्मिणीप्रमुखास्तु याः ।
उपगुह्य हरेर्देहं विविशुस्ता हुताशनम् ॥ २ ॥
रेवती चैव रामस्य देहमाश्लिष्य सत्तम ।
विवेश ज्वलितं वह्निं तत्सङ्गाह्लादशीतलम् ॥ ३ ॥
उग्रसेनस्तु तत् श्रुत्वा तथैवानकदुन्दुभिः ।
देवकी रोहिणी चैव विविशुर्जातवेदसम् ॥ ४ ॥
ततोऽर्जुनः प्रेतकार्यं कृत्वा तेषां यथाविधि ।
निश्चक्राम जनं सर्वं गृहीत्वा वज्रमेव च ॥ ५ ॥
द्वारवत्या विनिष्क्रान्ताः कृष्णपत्न्यः सहस्रशः ।
वज्रं जनं च कौन्तेयः पालयन् शनकैर्ययौ ॥ ६ ॥

[illegible] ॥ ६८ ॥ [illegible]
[illegible] ॥ ६९ ॥

[illegible] ॥ १ ॥ [illegible]

सभा सुधर्मा कृष्णेन मर्त्यलोके समुज्झिते ।
स्वर्गं जगाम मैत्रेय ! पारिजातश्च पादपः ॥ ७ ॥
यस्मिन् दिने हरिर्यातो दिवं सन्त्यज्य मेदिनीम् ।
तस्मिन्नेवावतीर्णोऽयं कालकायो बली कलिः ॥ ८ ॥
प्लावयामास तां शून्यां द्वारकां च महोदधिः ।
यदुदेवगृहं त्वेकं नाप्लावयत सागरः ॥ ९ ॥
नातिक्रान्तुमलं ब्रह्मन् ! तदद्यापि महोदधिः ।
नित्यं सन्निहितस्तत्र भगवान् केशवो यतः ॥ १० ॥
तदतीव महत् पुण्यं सर्वपातकनाशनम् ।
विष्णुक्रीडान्वितस्थानं दृष्ट्वा पापात् प्रमुच्यते ॥ ११ ॥
पार्थः पञ्चनदे देशे धनधान्यसमन्विते ।
चकार वासं सर्वस्य जनस्य मुनिसत्तम ! ॥ १२ ॥
ततो लोभः समभवद् दस्यूनां निहतेश्वराः ।
दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन धन्विना ॥ १३ ॥
ततस्ते पापकर्माणो लोभोपहतचेतसः ।
आभीरा मन्त्रयामासुः समेत्यात्यन्तदुर्मदाः ॥ १४ ॥
अयमेकोऽर्जुनो धन्वी स्त्रीजनं निहतेश्वरम् ।
नयत्यस्मानतिक्रम्य धिगेतद् भवतां बलम् ॥ १५ ॥
हत्वा गर्वं समारूढो भीष्मद्रोणजयद्रथान् ।
कर्णादींश्च न जानाति बलं ग्रामनिवासिनाम् ॥ १६ ॥
हे हे यष्टीमहायामा गृह्णीतायं सुदुर्मतिः ।
सर्वानेवावजानाति किं वो बाहुभिरुन्नतैः ॥ १७ ॥

आविर्भूतः कालकायः वर्णनाधुः ॥ ७ ॥ ८ ॥ १० ॥ पञ्चनदाख्यःये ॥ १२ ॥ १२ ॥ १३ ॥ १५ ॥ १६ ॥ १७ ॥ सहिमकृत्या: दस्युपुत्राः

ततो यष्टिप्रहरणा दस्यवो लोप्त्रहारिणः ।
सहस्रशोऽभ्यधावन्त तं जनं निहतेश्वरम् ॥ १८ ॥
ततो निवृत्य कौन्तेयः प्राहाभीरान् हसन्निव ।
निवर्त्तध्वमधर्मज्ञा यदि न स्थ मुमूर्षवः ॥ १९ ॥
अवज्ञाय वचस्तस्य जगृहुस्ते तदा धनम् ।
स्त्रीजनं चैव मैत्रेय ! विष्वक्सेनपरिग्रहम् ॥ २० ॥
ततोऽर्जुनो धनुर्दिव्यं गाण्डीवमजरं युधि ।
आरोपितुं समारेभे न शशाक स वीर्यवान् ॥ २१ ॥
चकार सज्यं कृच्छ्राच्च तदाभूच्छिथिलं पुनः ।
न सस्मार तथास्त्राणि चिन्तयन्नपि पाण्डवः ॥ २२ ॥
शरान् मुमोच वै तेषु पार्थो वैरिष्वमर्षितः ।
त्वग्भेदं ते परं चक्रुरस्ता गाण्डीवधन्वना ॥ २३ ॥
वह्निनापिचया दत्ताः शरास्तेऽपि क्षयं ययुः ।
युध्यतः सह गोपालैरर्जुनस्य भवक्षये ॥ २४ ॥
अचिन्तं यच्च कौन्तेयः कृष्णस्यैव हि तद्बलम् ।
यन्मया शरसङ्घातैः सकला भूभुजो जिताः ॥ २५ ॥
मिषतः पाण्डुपुत्रस्य ततस्ताः प्रमदोत्तमाः ।
आभीरैरपकृष्यन्त कामाच्चान्याः प्रवव्रजुः ॥ २६ ॥
ततः शरेषु क्षीणेषु धनुष्कोट्या धनञ्जयः ।

लोप्त्रहारिणः परस्वापहारिणः ॥ १८ ॥ यदि मुमूर्षवो न स्थ न भवथ ॥ १९ ॥ २० ॥ २१ ॥ अस्त्राणि तन्मन्त्रान् ॥ २२ ॥ वाह्न्यादत्ते वह्निना दत्ताः भवक्षये जन्मनाशे ॥ २४ ॥ २६ ॥ धनुष्कोट्या चापा-

जघान दस्यूंस्ते चास्य प्रहारान् जहसुर्मुने ! ॥ २७ ॥
प्रेक्षतश्चैव पार्थस्य वृष्ण्यन्धकवरस्त्रियः ।
जग्मुरादाय ते म्लेच्छाः समस्तान्मुनिसत्तम ! ॥ २८ ॥
ततः सुदुःखितो जिष्णुः कष्टं कष्टमिति ब्रुवन् ।
अहो ! भगवता तेन मुषितोऽस्मि रुरोद ह ॥ २९ ॥
तद्धनुस्तानि चास्त्राणि स रथस्ते च वाजिनः ।
सर्वमेकपदे नष्टं दानमश्रोत्रिये यथा ॥ ३० ॥
अहोऽतिबलवद् दैवं विना तेन महात्मना ।
यदसामर्थ्ययुक्तेऽपि नीचवर्गे जयप्रदम् ॥ ३१ ॥
तौ बाहू स च मे मुष्टिः स्थानं तत् सोऽस्मि चार्जुनः ।
पुण्येनेव विना तेन गतं सर्वमसारताम् ॥ ३२ ॥
ममार्जुनत्वं भीमस्य भीमत्वं तत्कृतं ध्रुवम् ।
विना तेन यदाभीरैर्जितोऽहं कथमन्यथा ॥ ३३ ॥
इत्थं वदन् ययौ जिष्णुर्मथुराख्यं पुरोत्तमम् ।
चकार तत्र राजानं वज्रं यादवनन्दनम् ॥ ३४ ॥
स ददर्श ततो व्यासं फाल्गुनः काननाश्रयम् ।
तमुपेत्य महाभागं विनयेनाभ्यवादयत् ॥ ३५ ॥
तं वन्दमानं चरणाववलोक्य मुनिश्चिरम् ।
उवाच पार्थं विच्छायः कथमत्यन्तमीदृशः ॥ ३६ ॥

यैश्च दण्डेनैव जघान । अहृदयंगमप्रहारेऽर्जुनादपि तेषामेव दैव-ग्यत्राव ॥ २७ ॥ मुषितो वञ्चितोऽस्मि ॥ २९ ॥ एकपदे एकस्मिन्नेव क्षणे । अश्रोत्रिये वेदवर्जिते ॥ ३० ॥ ३४ ॥ इन्द्रप्रस्थात्प्रस्थितं मथुरागतमर्जुनः कश्चित् काननाश्रयं व्यासं ददर्श ॥ ३५ ॥ कथमीदृशोऽत्यन्तं

अवीरजोऽनुगमनं ब्रह्महत्याथवा कृता ।
दृढाशाभङ्गदुःखी वा भ्रष्टच्छायोऽसि साम्प्रतम् ॥ ३७ ॥
सान्तानिकादयो वा ते याचमाना निराकृताः ।
अगम्यास्त्रीरतिर्वा त्वं तेनासि विगतप्रभः ॥ ३८ ॥
भुक्तोऽप्रदाय विप्रेभ्य एको मिष्टमथो भवान् ।
किं वा कृपणवित्तानि हृतानि भवतार्जुन ॥ ३९ ॥
कच्चिन्न त्वं शूर्पवातस्य गोचरत्वं गतोऽर्जुन ।
दुष्टचक्षुर्हतो वापि निःश्रीकः कथमन्यथा ॥ ४० ॥
स्पृष्टो नखाम्भसा वाथ घटाम्भःप्रोक्षितोऽपि वा ।
तेनातीवासि विच्छायो न्यूनैर्वा युधि निर्जितः ॥ ४१ ॥

श्रीपराशर उवाच ।

ततः पार्थो विनिःश्वस्य श्रूयतां भगवन्निति ।
प्रोक्त्वा यथावदाचष्ट व्यात्मानमात्मपराभवम् ॥ ४२ ॥

विच्छायो निःश्रीकोऽसीति विस्मयात् । पृच्छ्यमानो दुःखपर्याकुलि- [illegible] किं पुनः पुनः [illegible] ॥ ३६ ॥ [illegible] स्वाकार्यं हेतुं बहुधा विकल्पयन्नाह, अवीरजा इति षड्भिः । अवीरजानां रजोऽनु तत्पूर्वकः किं गमनं कृतम् ? [illegible] अनुगमनस्य । अवीरजोऽनुगमनं [illegible] वा कृतम् [illegible] । अथ मां [illegible] वा दृढा आशा तस्या भङ्गेन वा दुःखी ॥ ३७ ॥ सान्तानिकम् [illegible] कामो [illegible] सान्तानिकाः । [illegible] । तद्यथा सान्तानिकं [illegible] । पूर्व- [illegible] इति ॥ ३८ ॥ ३९ ॥ [illegible] ॥ ४१ ॥ ४२ ॥

अर्जुन उवाच।

यद् बलं यच्च नस्तेजो यद् वीर्य्यं यत्पराक्रमः।
या श्रीश्छाया च नः सोऽस्मान् परित्यज्य गतो हरिः ॥४३॥
इतरेणेव महता स्मितपूर्व्वाभिभाषिणा।
हीना वयं मुने! तेन जातास्तृणमया इव ॥ ४४ ॥
अस्त्राणां सायकानां च गाण्डीवस्य तथा मम।
सारतायाभवन् मूर्त्तं स गतः पुरुषोत्तमः ॥ ४५ ॥
यस्यावलोकनादस्मान् श्रीर्जयः सम्पदुन्नतिः।
न तत्याज स गोविन्दस्त्यक्त्वास्मान् भगवान् गतः ॥ ४६॥
भीष्मद्रोणाङ्गराजाद्यास्तथा दुर्योधनादयः।
यत्प्रभावेण निर्दग्धाः स कृष्णस्त्यक्तवान् भुवम् । ४७ ॥
निर्य्यौवनहतश्रीका भ्रष्टच्छायेव मेदिनी।
विभाति तात! नैकोऽहं विरहे तस्य चक्रिणः। ४८ ॥
यस्यानुभावाद् भीष्माद्यैर्मय्यग्नौ शलभायितम्।
विना तेनाद्य कृष्णेन गोपालैरस्मि निर्जितः ॥ ४९ ॥
गाण्डीवं त्रिषु लोकेषु ख्यातिं यदनुभावतः।
गतं तेन विनाभीरलगुडैस्तत्तिरस्कृतम् । ५० ॥

वर्ज्जस्तेजः सामर्थ्यं वीर्य्यं प्रभावः पराक्रमो विक्रान्तिः श्रीः सम्पत् छाया कान्तिः ॥ ४३ ॥ इतरेण प्राकृतेन मितेनेव। अनुगादिविभीषिकायं खलेषु निर्मिताः तृणमया पश्चिम इव वयं जाताः ॥ ४४ ॥ अङ्गराजाद्याः कर्णाद्याः ॥ ४७ ॥ निर्गतं यौवनं यस्मादिमववामर्य्यं यस्याः सा निर्य्यौवना ॥ ४८ ॥

अग्निवत्त्वं मयि शलभायितं शलभवदाचरितम् ॥ ४९ ॥ ५० ॥

स्त्रीसहस्राण्यनेकानि मन्नाथानि महामुने ! ।
यततो मम नीतानि दस्युभिर्लगुडायुधैः ॥ ५१ ॥
आनीयमानमाभीरैः कृष्ण ! कृष्णावरोधनम् ।
हृतं यष्टिप्रहरणैः परिभूय बलं मम । ५२ ॥
निःश्रीकता न मे चित्रं यज्जीवामि तदद्भुतम् ।
न चापमानपङ्काङ्की निर्लज्जोऽस्मि पितामह ! ॥ ५३ ॥

व्यास उवाच ।

अलं ते व्रीडया पार्थ ! न त्वं शोचितुमर्हसि ।
अवेहि सर्वभूतेषु कालस्य गतिमीदृशीम् ॥ ५४ ॥
कालो भवाय भूतानामभवाय च पाण्डव ! ।
कालमूलमिदं ज्ञात्वा भव स्थैर्यधनोऽर्जुन ! ॥ ५५ ॥
नद्यः समुद्रा गिरयः सकला च वसुन्धरा ।
देवा मनुष्याः पशवस्तरवः ससरीसृपाः ॥ ५६ ॥
सृष्टाः कालेन कालेन पुनर्यास्यन्ति सङ्क्षयम् ।
कालात्मकमिदं सर्वं ज्ञात्वा शममवाप्नुहि ॥ ५७ ॥
यथाह कृष्णमाहात्म्यं तत्तथैव धनञ्जय ! ।
भारावतारकार्य्यार्थमवतीर्णः स मेदिनीम् । ५८ ॥
भाराक्रान्ता धरा याता देवानां समितिं पुरा ।
तदर्थमवतीर्णोऽसौ कालरूपी जनार्दनः । ५८ ॥

मत् नाथः पालको येषां तानि यततो यत्नमाचरतः ॥ ५१ ॥ कृष्ण ! हे व्यास ! ॥ ५२ ॥ भवाय उद्भावाय कालमूलं कालाधीनम् ॥ ५३ । ५६ ॥ ५७ । ५८ ॥ यदैव त्वत् कृष्णात् त्वत्तो भीष्मादीनां पराभवः श्रावितः । तदैव कृष्णैस्त्वः आभीरैस्त्वः कालोद्भवः पराभव

तच्च निष्पादितं कार्य्यमशेषा भूभृतो हताः ।
वृष्ण्यन्धककुलं सर्वं तथा पार्थोपसंहृतम् ॥ ६० ॥
न किञ्चिदन्यत् कर्त्तव्यमस्य भूमितले प्रभोः ।
अतो गतः स भगवान् कृतकृत्यो यथेच्छया ॥ ६१ ॥
सृष्टिं सर्गे करोत्येष देवदेवः स्थितौ स्थितिम् ।
अन्तेऽन्ताय समर्थोऽयं साम्प्रतं हि यथाकृतम् ॥ ६२ ॥
तस्मात् पार्थ ! न संतापस्त्वया कार्य्यः पराभवात् ।
भवन्ति भवकालेषु पुरुषाणां पराक्रमाः ॥ ६३ ॥
त्वयैकेन हता भीष्मद्रोणकर्णादयो नृपाः ।
तेषामर्ज्जुन ! कालोत्थः किं न्यूनाभिभवो न नः ॥ ६४ ॥
विष्णोस्तस्यानुभावेन यथा तेषां पराभवः ।
ततस्तथैव भवतो दस्युभ्योऽन्ते तदुद्भवः ॥ ६५ ॥
स देवोऽन्यशरीराणि समाविश्य जगत्स्थितिम् ।
करोति सर्वभूतानां नाशं चान्ते जगत्पतिः ॥ ६६ ॥
भवोद्भवे च कौन्तेय ! सहायोऽभूज्जनार्द्दनः ।
भवान्ते त्वद्विपक्षास्ते केशवेनावलोकिताः ॥ ६७ ॥
कः श्रद्दध्यात् स गाङ्गेयान् हन्यास्त्वं सर्वकौरवान् ।
आभीरेभ्यश्च भवतः कः श्रद्दध्यात् पराभवम् ॥ ६८ ॥
पार्थैतत् सर्वभूतस्य हरेर्लीलाविचेष्टितम् ।

इत्युपपादयति त्वय्यैकेनेति षड्भिः ॥ ६४ ॥ ६५ ॥ सर्वभूतानां शरीराणि समाविश्य जगतः स्थितिं नाशञ्च स एव करोति ॥ ६६ ॥ भवोद्भवं भाग्यस्योदये भवान्ते भाग्यनाशे ॥ ६७ ॥ ६८ ॥ ६९ लीलाया स्त्रीणां दस्युभिर्हरणम् अष्टावक्रशापात् प्राप्तं येन वारयितुं

त्वया यत् कौरवा ध्वस्ता यदाभीरैर्भवान् जितः ॥ ६९ ॥
गृहीता दस्युभिर्यच्च भवतः शार्ङ्गिणः स्त्रियः ।
तदप्यहं यथावृत्तं कथयामि तवार्जुन ! ॥ ७० ॥
अष्टावक्रः पुरा विप्रो जलवासरतोऽभवत् ।
बहून् वर्षगणान् पार्थ ! गृणन् ब्रह्म सनातनम् ॥ ७१ ॥
जितेष्वसुरसङ्घेषु मेरुपृष्ठे महोत्सवः
बभूव तत्र गच्छन्त्यो ददृशुस्तं वरास्त्रियः ॥ ७२ ॥
रम्भातिलोत्तमाद्याश्च शतशोऽथ सहस्रशः ।
तुष्टुवुस्तं महात्मानं प्रशशंसुश्च पाण्डव ! ॥ ७३ ॥
आकण्ठमग्नं सलिले जटाभारधरं मुनिम् ।
विनयावनताश्चैनं प्रणेमुः स्तोत्रतत्पराः ॥ ७४ ॥
यथा यथा प्रसन्नोऽसौ तुष्टुवुस्तं तथा तथा ।
सर्वास्ताः कौरवश्रेष्ठ ! वरिष्ठं तं द्विजन्मनाम् ॥ ७५ ॥

अष्टावक्र उवाच ।

प्रसन्नोऽहं महाभागा ! भवतीनां यदिष्यते ।
मत्तस्तद् व्रियतां सर्वं प्रदास्याम्यतिदुर्लभम् ॥ ७६ ॥
रम्भातिलोत्तमाद्यास्तं वैदिक्योऽप्सरसोऽब्रुवन् ।
प्रसन्ने त्वय्यपर्य्याप्तं किमस्माकमिति द्विज ! ॥ ७७ ॥
इतरास्त्वब्रुवन् विप्र ! प्रसन्नो भगवान् यदि ।
तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र ! पुरुषोत्तमम् ॥ ७८ ॥

[illegible] गृहीता [illegible] दस्युभिः [illegible]
[illegible] ॥ ७० ॥ [illegible] प्रशंसन्ति [illegible] । [illegible]
[illegible] ॥ ७१ ॥ वैदिक्यः [illegible] ॥ ७७ ॥ ७८ ॥ [illegible]

व्यास उवाच ।

एवं भविष्यतीत्युक्त्वा उत्ततार जलान्मुनिः ।
ददृशुस्तास्समुत्तीर्णं विरूपं वक्रमष्टधा ॥ ७९ ॥
तं दृष्ट्वा गूहमानानां यासां हासः स्फुटोऽभवत् ।
ताः शशाप मुनिः कोपमवाप्य कुरुनन्दन ! ॥ ८० ॥
यस्माद् विरूपरूपं मां मत्वा हासावमानना ।
भवतीभिः कृता तस्मादेष शापं ददामि वः ॥ ८१ ॥
मत्प्रसादेन भर्त्तारं लब्ध्वा तं पुरुषोत्तमम् ।
मच्छापोपहताः सर्वा दस्युहस्तं गमिष्यथ ॥ ८२ ॥

व्यास उवाच ।

इत्युदीरितमाकर्ण्य मुनिस्ताभिः प्रसादितः ।
पुनः सुरेन्द्रलोकं वै प्राह भूयो गमिष्यथ ॥ ८३ ॥
एवं तस्य मुनेः शापादष्टावक्रस्य केशवम् ।
भर्त्तारं प्राप्य ता दस्युहस्तं याता वराङ्गनाः ॥ ८४ ॥
तत् त्वया नात्र कर्तव्यः शोकोऽल्पोऽपि हि पाण्डव ! ।
तेनैवाखिलनाथेन सर्वं तदुपसंहृतम् ॥ ८५ ॥
भवतां चोपसंहारमासन्नं तेन कुर्वता ।
बलं तेजस्तथा वीर्यं माहात्म्यं चोपसंहृतम् ॥ ८६ ॥
जातस्य नियतो मृत्युः पतनञ्च तथोन्नतेः ।
विप्रयोगावसानश्च संयोगः सञ्चयात् क्षयः ॥ ८७ ॥

निर्गतः ॥ ७९ ॥ गूहमानानां हासमप्रकटयन्तीनाम् ॥ ८० ॥ ८१ ॥ पुनः सुरेन्द्रलोकं गमिष्यथेति प्राह ॥ ८३ ॥ ८५ ॥ माहात्म्यं गौरवम् ॥ ८६ ॥ उन्नतेः समाश्रयात् पतनञ्च सञ्चयादनन्तरं क्षयश्च ॥ ८७ ॥

विज्ञाय न बुधाः शोकं न हर्षमुपयान्ति ये ।
तेषामेवेतरे चेष्टां शिक्षन्तः सन्ति तादृशाः ॥ ८८ ॥
तस्मात् त्वया नरश्रेष्ठ ! ज्ञात्वैतद् भ्रातृभिः सह ।
परित्यज्याखिलं तन्त्र गन्तव्यं तपसे वनम् ॥ ८९ ॥
तद् गच्छ धर्मराजाय निवेद्यैतद् वचो मम ।
परश्वो भ्रातृभिः सार्द्धं यथा यासि तथा कुरु ॥ ९० ॥

पराशर उवाच ।

इत्युक्तोऽभ्येत्य पार्थाभ्यां यमाभ्यां च तथार्जुनः ।
दृष्टं चैवानुभूतञ्च कथितं तेष्वशेषतः ॥ ९१ ॥
व्यासवाक्यं च ते सर्वे श्रुत्वार्जुनसमीरितम् ।
राज्ये परिक्षितं कृत्वा ययुः पाण्डुसुता वनम् ॥ ९२ ॥
इत्येतत् तव मैत्रेय ! विस्तरेण मयोदितम् ।
जातस्य यद् यदोर्वंशे वासुदेवस्य चेष्टितम् ॥ ९३ ॥

तादृशा हर्षशोकविहीनाः सन्ति ॥ ८८ ॥ ८९ ॥ तस्मात् तन्त्रं परि-
वारं त्यक्त्वा ॥ ८८ ॥ ९० ॥ दृष्टं यदुकुलक्षयादि । अनुभूतम् आभीरेभ्यः
पराभवादि ॥ ९१ ॥ ९२ ॥ अध्यायार्थं निगमयति इत्येतदिति ॥ ९३ ॥

श्रीपरानन्दपादाब्जरजः श्रीधरो यतिः ।
पञ्चमांशमिति व्याख्यात् आत्मप्रकाशाख्यटीकया ॥

षष्ठोऽंशः ।

प्रथमोऽध्यायः ।

मैत्रेय उवाच ।

व्याख्याता भवता सर्गवंशमन्वन्तरस्थितिः ।
वंशानुचरितञ्चैव विस्तरेण महामुने ! ॥ १ ॥
श्रोतुमिच्छाम्यहं त्वत्तो यथावदुपसंहृतिम् ।
महाप्रलयसंस्थानं कल्पान्ते च महामुने ! ॥ २ ॥

पराशर उवाच ।

मैत्रेय ! श्रूयतां मत्तो यथावदुपसंहृतिः ।
कल्पान्ते प्राकृते चैव प्रलयो जायते यथा ॥ ३ ॥
अहोरात्रः पितॄणान्तु मासोऽब्दस्त्रिदिवौकसाम् ।

श्रीगणेशाय नमः । सर्गादिकथमाख्याय तत्क्रमात्यन्तिकं लयम् । षष्ठेऽंशे सविरागाय लयान्तरनिरूपणम् । प्रथमांशमारभ्योक्तमर्थमनुवदन् बुभुत्सितमर्थं पृच्छति । व्याख्यातेति द्वाभ्याम् ॥ १ ॥ यथावत् सर्वथा उपसंहृतिम् आत्यन्तिकं प्रलयमित्यर्थः । कल्पान्ते ब्रह्मणो दिनान्ते ॥ २ ॥ प्राकृते महाप्रलये ॥ ३ ॥ कालप्रमाणं दर्शयन्नाह ।

चतुर्युगसहस्रे तु ब्रह्मणो द्वे द्विजोत्तम ! ॥ ४ ॥
कृतं त्रेता द्वापरश्च कलिश्चैव चतुर्युगम् ।
दिव्यैर्वर्षसहस्रैस्तु तत् द्वादशभिरुच्यते ॥ ५ ॥
चतुर्युगाण्यशेषाणि सदृशानि स्वरूपतः ।
आद्यं कृतयुगं मुक्त्वा मैत्रेयान्त्ये तथा कलिम् ॥ ६ ॥
आद्ये कृतयुगे सर्गो ब्रह्मणा क्रियते यतः ।
क्रियते चोपसंहारस्तथान्ते च कलौ युगे ॥ ७ ॥

मैत्रेय उवाच ।

कलेः स्वरूपं भगवन् ! विस्तराद् वक्तुमर्हसि ।
धर्मश्चतुष्पाद् भगवन् ! यस्मिन् विप्लवमृच्छति ॥ ८ ॥

पराशर उवाच ।

कलेः स्वरूपं मैत्रेय ! यद् भवान् प्रष्टुमिच्छति ।
तन्निबोध समासेन वर्त्तते यन्महामुने ! ॥ ९ ॥
वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम् ।
न सामऋग्यजुर्वेदविनिष्पादनहेतुका ॥ १० ॥

अहोरात्र इति । मनुष्याणां मासः पितृणामहोरात्रः, मनुष्याणा-मब्दो देवानामहोरात्रः । द्वे चतुर्युगसहस्रे ब्रह्मणोऽहो-रात्रः ॥ ४ ॥ चतुर्युगान्याह कृतमिति ॥ ५ ॥ चतुर्युगस्वरूपमाह चतुर्युगाणीति ॥ ६ ॥ आद्यं सर्गविधायकत्वेनेत्याह आद्य इति । अन्त्यं संहारकत्वेन च ॥ ७ ॥ धर्मश्चतुष्पाद्यस्मिन् विप्लवमृच्छति तत् पृच्छति । कलेरिति विस्तरं माधव ॥ ८ ॥

उत्तरमाह कलेरित्यादिना यावदुपसंहारात् ॥ ९ ॥ वर्णाश्रमाचारवती वर्णाश्रमाचारानुवर्तिनी । यथा मर्यादं भवति तथा-

विवाहा न कलौ धर्म्या न शिष्यगुरुसंस्थितिः ।
न दाम्पत्यक्रमो नैव वह्निदेवात्मकः क्रमः ॥ ११ ॥
यत्र तत्र कुले जातो बली सर्वेश्वरः कलौ ।
सर्वेभ्य एव वर्णेभ्यो योग्यः कन्यावरोधने ॥ १२ ॥
येन केनैव योगेन द्विजातिर्दीक्षितः कलौ ।
यैव सैव च मैत्रेय ! प्रायश्चित्तक्रिया कलौ ॥ १३ ॥
सर्वमेव कलौ शास्त्रं यस्य यद्वचनं द्विज ! ।
देवताश्च कलौ सर्वाः सर्वः सर्वस्य चाश्रमः ॥ १४ ॥
उपवासस्तथायासो वित्तोत्सर्गस्तथा कलौ ।
धर्मो यथाभिरुचितैरनुष्ठानैरनुष्ठितः ॥ १५ ॥
वित्तेन भविता पुंसां स्वल्पेनाढ्यमदः कलौ ।
स्त्रीणां रूपमदश्चैव केशैरेव भविष्यति ॥ १६ ॥

दिवेदोक्तकर्मविनिष्पादनं हेतुर्यस्याः सा । तथाभूता च न भवति किन्त्वर्थकामप्रधानैवेत्यर्थः ॥ १० ॥ धर्म्या इति ब्राह्मादिषु विवाहेषु या विहितः स एव तद्धेति व्यवस्था नास्तीत्यर्थः । शिष्यस्य गुरोश्च सम्यक् स्थितिः शुश्रूषानुग्रहरूपा नास्ति । दाम्पत्ये यः क्रमः परस्परं वृत्तिनियमः स नास्ति । वह्नौ होमादिप्रकारनियमः देवेषु पूजादिक्रमश्च नास्ति ॥ ११ ॥ सर्वेश्वरो नियन्ता दण्डधर इति यावत् । स एव सर्ववर्णेभ्यः कन्याया अवरोधने परिग्रहे योग्यो भविष्यति । कन्यावरोधनीति पाठे सवर्णत्वादिनियमं विना सर्वेभ्योऽपि वर्णेभ्यो धनी धनवान् कन्याया वरो योग्यो भविष्यतीत्यर्थः ॥ १२ ॥ येन केनाप्युपायेन निषिद्धद्रव्यादिनापि दीक्षितः स्यात् । यैव सैवेति प्रायश्चित्तक्रिया लोकरञ्जनमात्रार्था, न तु पापक्षयार्था ॥ १३ ॥ सर्वाः स्वमतिविकल्पिता देवताः ॥ १४ ॥ विधिक्रमं विना यथाभिरुचितैरनुष्ठानैः

सुवर्णमणिरत्नादौ वस्त्रे चापि क्षयं गते ।
कलौ स्त्रियो भविष्यन्ति तदा केशैरलङ्कृताः ॥ १७ ॥
परित्यक्ष्यन्ति भर्त्तारं वित्तहीनं तथा स्त्रियः ।
भर्त्ता भविष्यति कलौ वित्तवानेव योषिताम् ॥ १८ ॥
यो यो ददाति बहुलं स स स्वामी तदा नृणाम् ।
स्वामित्वहेतुः सम्बन्धो भावी नाभिजनस्तदा ॥ १९ ॥
गृहान्ता द्रव्यसंघाता द्रव्यान्ता च तथा मतिः ।
अर्थाश्चात्मोपभोगान्ता भविष्यन्ति कलौ युगे ॥ २० ॥
स्त्रियः कलौ भविष्यन्ति स्वैरिण्यो ललितस्पृहाः ।
अन्यायावाप्तवित्तेषु पुरुषाश्च स्पृहालवः ॥ २१ ॥

[illegible] धर्मः स्यात् आचारः [illegible] ॥ १५ ॥ १६ ॥ ॥ १७ ॥ १८ ॥

यो यो हीनोऽपि बहुलं धनं ददाति स स स्वामी [illegible] । तत्र हेतुः बहुद्रव्यदानादिना यः सम्बन्धः स एव स्वामित्वे हेतुर्भावी । नाभिजनः सत्कुलीनत्वम् । स्वामित्वहेतुसम्बन्धो भावी नाभिजन इति पाठे स्वामित्वहेतुना बहुद्रव्यदानादिना सम्बन्ध एव [illegible] कुलीनत्वं भविष्यतीत्यर्थः ॥ १९ ॥ द्रव्याणां संघातः [illegible] अपि [illegible] । [illegible] न तथा बहुधनादि-[illegible] भविष्यन्ति । [illegible] मतिः । [illegible] द्रव्यान्ता [illegible] । [illegible] आत्मोपभोगान्ताः [illegible] भविष्यन्ति ॥ २० ॥ [illegible] पुरुषाः । तत्र हेतुः [illegible] ॥ २१ ॥ [illegible]

अभ्यर्थितोऽपि सुहृदा स्वार्थहानिं न मानवः ।
पणार्धार्धार्धमात्रेऽपि करिष्यति तदा द्विज ! ॥ २२ ॥

समानपौरुषं चेतो भावि विप्रेषु वै कलौ ।
क्षीरप्रदानसंबन्धि भावि गोषु च गौरवम् ॥ २३ ॥

अनावृष्टिभयप्राया: प्रजा: क्षुद्भयकातरा: ।
भविष्यन्ति तदा सर्वा गगनासक्तदृष्टय: ॥ २४ ॥

कन्दपर्णफलाहारास्तापसा इव मानवा: ।
आत्मानं पातयिष्यन्ति तदावृष्ट्यादिदु:खिता: ॥ २५ ॥

दुर्भिक्षमेव सततं तदा क्लेशमनीश्वरा: ।
प्राप्स्यन्ति व्याहतसुखप्रमोदा मानवा: कलौ ॥ २६ ॥

अस्नानभोजिनो नाग्निदेवतातिथिपूजनम् ।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम् ॥ २७ ॥

लोलुपा ह्रस्वदेहाश्च बह्वन्नादनतत्परा: ।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रिय: ॥ २८ ॥

विषये स्वार्थस्य हानिं न करिष्यति । अपार्द्धिकादयकमपि न त्यक्ष्यती-त्यर्थः । पण्ठ गुञ्जा तुलितं स्वर्णं वा पणः तस्याप्यर्द्धार्द्धमपि द्रव्यम् ॥ २२ ॥ समानपौरुषम् अस्मासु विप्रेषु च पुरुषत्वं समानं तस्मादस्मो विप्रेषु को विशेष इत्यनादरयुक्तं चित्तं शूद्रादेर्भविष्य-तीत्यर्थः । समानपौरुषमिति पाठे सगर्वं निष्ठुरमित्यर्थः । क्षीरेति मङ्गिष्यादिरिव क्षीरप्रदानतो गोषु सत्कारो भविष्यति न तु जात्येत्यर्थः ॥२३॥ क्षुद्भयेन कातराः व्याकुलाः प्रजाः मेघप्रतीक्षया गगने आसक्तदृष्टयो भविष्यन्ति ॥ २४ ॥ पातयिष्यन्ति क्लेशयिष्यन्ति ॥ २५ ॥ अनीश्वरा निर्धनाः । व्याहतं सुखं प्रमोदश्च हर्षो येषां ते ॥ २६ ॥ ॥ २७ ॥ बह्वन्नभोजनस्य भक्षणार्थं ॥ २८ ॥ अनादृताः आदरशून्याः

उभाभ्यामेव पाणिभ्यां शिरःकण्डूयनं स्त्रियः ।
कुर्वन्त्यो गुरुभर्त्तॄणामाज्ञां भेत्स्यन्त्यनादृताः ॥ २९ ॥
स्वपोषणपराः क्षुद्रा देहसंस्कारवर्जिताः ।
परुषानृतभाषिण्यो भविष्यन्ति कलौ स्त्रियः ॥ ३० ॥
दुःशीला दुष्टशीलेषु कुर्वन्त्यः सततं स्पृहाम् ।
असद्वृत्ता भविष्यन्ति पुरुषेषु कुलाङ्गनाः ॥ ३१ ॥
वेदादानं करिष्यन्ति वटवश्च तथाव्रताः ।
गृहस्थाश्च न होष्यन्ति न दास्यन्त्युचितान्यपि ॥ ३२ ॥
वनवासा भविष्यन्ति ग्राम्याहारपरिग्रहाः ।
भिक्षवश्चापि मित्रादिस्नेहसम्बन्धयन्त्रिताः ॥ ३३ ॥
अरक्षितारो हर्तारः शुल्कव्याजेन पार्थिवाः ।
हारिणो जनवित्तानां संप्राप्ते तु कलौ युगे ॥ ३४ ॥
यो योऽश्वरथनागाढ्यः स स राजा भविष्यति ।
यश्च यश्चाबलः सर्वः स स भृत्यः कलौ युगे ॥ ३५ ॥

॥ २९ ॥ परुषमनृतञ्च भाषितुं शीलं यासां ताः ॥ ३० ॥ दुःशीलेषु असद्वृत्तेषु पुरुषेषु स्पृहां कुर्वन्त्यो व्यभिचारिण्यो भविष्यन्ति ॥ ३१ ॥ वाचनार्थं शिष्येभ्यश्च वेदादानं करिष्यन्ति । अव्रता वेदव्रतादिहीना वटवो ब्रह्मचारिणो वेदाध्ययनं करिष्यन्ति ॥ ३२ ॥ वनवासाः वानप्रस्थाः भिक्षवः सन्न्यासिनोऽपि मित्रादीनां स्नेहेन सम्बन्धात् मित्रादीन् सम्बन्धात् तेषु स्नेहबन्धेनैव बद्धा यथार्थं गृहस्थवत् इतो स्थानात् देशं न गच्छन्तः भविष्यन्ति ॥ ३३ ॥ पार्थिवा अरक्षितारः प्रजापालनमकुर्वन्त एव हर्तारः करग्राहिणः यथा शुल्कव्याजेन वणिग्जनवित्तापहारिणो भविष्यन्ति ॥ ३४ ॥ ३५ ॥ स्पृहणीया वेश्या

वैश्याः कृषिवाणिज्यादि सन्त्यज्य निजकर्म यत् ।
शूद्रवृत्त्या प्रवर्त्स्यन्ति कारुकर्मोपजीविनः ॥ ३६ ॥
भैक्ष्यव्रतास्तथा शूद्राः प्रव्रज्यालिङ्गिनोऽधमाः ।
पाषण्डसंश्रयां वृत्तिमाश्रयिष्यन्त्यसंस्कृताः ॥ ३७ ॥
दुर्भिक्षकरपीडाभिरतीवोपद्रुता जनाः ।
गवेधुककदन्नाढ्यान् देशान् यास्यन्ति दुःखिताः ॥ ३८ ॥
वेदमार्गे प्रलीने च पाषण्डाढ्ये ततो जने ।
अधर्मवृद्ध्या लोकानां स्वल्पमायुर्भविष्यति ॥ ३९ ॥
अशास्त्रविहितं घोरं तप्यमानेषु वै तपः ।
नरेषु नृपदोषेण बालमृत्युर्भविष्यति ॥ ४० ॥
भविता योषितां सूतिः पञ्चषट्सप्तवार्षिकी ।
नवाष्टदशवर्षाणां मनुष्याणां तथा कलौ ॥ ४१ ॥
पलितोद्भवश्च भविता तदा द्वादशवार्षिकः ।
नातिजीवति वै कश्चित् कलौ वर्षाणि विंशति ॥ ४२ ॥
अल्पप्रज्ञा वृथालिङ्गा दुष्टान्तःकरणाः कलौ ।
यतस्ततो विनङ्क्ष्यन्ति कालेनाल्पेन मानवाः ॥ ४३ ॥
यदा यदा हि पाषण्डवृद्धिर्मैत्रेय लक्ष्यते ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥ ४४ ॥

प्रवर्त्स्यन्ति वर्तयिष्यन्ति वर्तिष्यन्त इत्यर्थः । प्रवत्स्यन्तीति पाठः सुगमः । कारूणां कुलालादीनां कर्म घटक्रियादि उपजीवितुं शीलं येषां ते ॥ ३६ ॥ ३७ ॥

गवेधुकादिकदन्नाढ्यान् देशान् यास्यन्ति ॥ ३८ ॥ ३९ ॥ ४० ॥ तथा मनुष्याणां पुंसां सूतिः ॥ ४१ ॥ विंशतिवर्षाण्यतिक्रम्य न जीवति ॥ ४२ ॥

यदा यदा सतां हानिर्वेदमार्गानुसारिणाम्।
प्रारम्भाश्चावसीदन्ति यदा धर्मभृतां नृणाम्।
तदानुमेयं प्राधान्यं कलेर्मैत्रेय! पण्डितैः ॥ ४५ ॥
यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः।
इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलम् ॥ ४६ ॥
न प्रीतिर्वेदवादेषु पाषण्डेषु यदा रतिः।
कलिवृद्धिस्तदा प्राज्ञैरनुमेया द्विजोत्तम! ॥ ४७ ॥
कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम्।
नार्चयिष्यन्ति मैत्रेय! पाषण्डोपहता नराः ॥ ४८ ॥
किं वेदैः किं द्विजैर्देवैः किं शौचेनाम्बुजन्मना।
इत्येवं विप्र! वक्ष्यन्ति पाषण्डोपहता नराः ॥ ४९ ॥
स्वल्पाम्बुवृष्टिः पर्जन्यः सस्यं स्वल्पफलं तथा।
फलं तथाल्पसारञ्च विप्र! प्राप्ते कलौ युगे ॥ ५० ॥
शाणप्रायाणि वस्त्राणि शमीप्राया महीरुहाः।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥ ५१ ॥
अणुप्रायाणि धान्यानि आजप्रायं तथा पयः।
भविष्यति कलौ प्राप्ते उशीरस्यानुलेपनम् ॥ ५२ ॥
श्वश्रूश्वशुरभूयिष्ठा गुरवश्च नृणां कलौ।

॥ ४४ ॥ वेदैः पावनैः [illegible] यदा यदेति चतुर्भिः ॥ ४४ ॥ ४५ ॥
॥ ४६ ॥ ४७ ॥ ४८ ॥ अम्बुजन्मना वारिणा जातेन शौचेन किम् ॥४९॥
अल्पसारं निर्वीर्यम् ॥ ५० ॥ शाणी [illegible] पट्टिका [illegible]
[illegible] ॥ ५१ ॥ उशीरं सुरभिमूलविशेषः ॥ ५२ ॥ श्वश्रवः श्वश्रू-
श्वशुराः. [illegible]

आलापा हारिभार्याश्च सुहृदो मुनिसत्तम! ॥ ५३ ॥
कस्य माता पिता कस्य यदा कर्मात्मकः पुमान्।
इति चोदाहरिष्यन्ति श्वशुरानुगता नराः ॥ ५४ ॥
वाङ्मनःकायिकैर्दोषैरभिभूताः पुनः पुनः।
नराः पापान्यनुदिनं करिष्यन्त्यल्पमेधसः ॥ ५५ ॥
निःसत्वानामशौचानां निःश्रीकाणां तथा नृणाम्।
यद् यद् दुःखाय तत् सर्वं कलिकाले भविष्यति ॥ ५६ ॥
निःस्वाध्यायवषट्कारे स्वधास्वाहाविवर्जिते।
तदा प्रविरलो विप्र! क्वचिल्लोको निवत्स्यति ॥ ५७ ॥
तत्राल्पेनैव यत्नेन पुण्यस्कन्धमनुत्तमम्।
करोति यं कृतयुगे क्रियते तपसा हि सः ॥ ५८ ॥

तथाविधेषु स्वषु नराणां सख्यं भवति इत्यर्थः ॥ ५२ ॥ कर्मात्मकः स्वकर्माधीनजन्मा ॥ ५४ ॥ ५५ ॥ यद्यद्वस्तु तत् सर्वं दुःखार्थमेव भविष्यति ॥ ५६ ॥ क्वचित् कीकटादौ ॥ ५७ ॥ कलेरेव महान्तं गुणमाह, तत्रेति अल्पेनैव यत्नेन हरिकीर्त्तनादिना यत् पुण्यस्कन्धं पुण्यराशिं नरः करोति स हि कृतयुगे तपसा महता क्रियते स इति पाठे सः सोऽपि अतिमहानेऽपीत्यर्थः। अतो अनेनैकेन गुणेन कलिः सर्वश्रेष्ठ इत्यर्थः ॥ ५८ ॥

द्वितीयोऽध्यायः।

पराशर उवाच।

व्यासश्चाह महाबुद्धिर्यदत्रैव हि वस्तुनि।
तत् श्रूयतां महाभाग! गदतो मम तत्त्वतः॥ १॥
कस्मिन् कालेऽल्पको धर्मो ददाति सुमहत् फलम्।
मुनीनामित्यभूद् वादः कैश्चासौ क्रियते सुखम्॥ २॥
सन्देहनिर्णयार्थाय वेदव्यासं महामुनिम्।
ययुस्ते संशयं प्रष्टुं मैत्रेय! मुनिपुङ्गवाः॥ ३॥
ददृशुस्ते मुनिं तत्र जाह्नवीसलिले द्विज!।
वेदव्यासं महाभागमर्द्धस्नातं महामतिम्॥ ४॥
स्नानावसानं तत् तस्य प्रतीक्षन्तो महर्षयः।
तस्थुस्तटे महानद्यास्तरुषण्डमुपाश्रिताः॥ ५॥
मग्नोऽथ जाह्नवीतोयादुत्थायाह सुतो मम।
व्यासः साधुः कलिः साधुरित्येवं शृण्वतां ततः॥ ६॥

[illegible] कलिरल्पायासेन महाफलप्रदायीत्युपपादयन् [illegible] गुणाधिक्यं वक्तुमितिहासं प्रस्तौति। [illegible] वस्तुनि अर्थे ॥ १ ॥ वादो विचारः कैश्चाधिकारिभिरसौ धर्मः सुखसाध्येन क्रियते ॥ २ ॥ संशयविषयभूतमर्थं प्रष्टुं ययुः ॥ ३ ॥ ॥ ४ ॥ स्नानावसानं प्रतीक्षमाणास्तरुषण्डं [illegible]: ॥ ५ ॥ [illegible] तेषां मुनीनां शृण्वतां कलिः साधुः साधुरित्येवं वाचा मम सुतो व्यास आह [illegible] ॥ ६ ॥ तदेव सुविस्[illegible]

तेषां मुनीनां भूयश्च ममज्ज स नदीजले।
उत्थाय साधु साध्विति शूद्र! धन्योऽसि चाब्रवीत् ॥७॥
स निमग्नः समुत्थाय पुनः प्राह महामुनिः।
योषितः साधु धन्यास्तास्ताभ्यो धन्यतरोऽस्ति कः ॥८॥
ततः स्नात्वा यथान्यायमायान्तं कृतसत्क्रियम्।
उपतस्थुर्महाभागं मुनयस्ते सुत मम ॥ ९ ॥
कृतसंवन्दनांश्चाह कृतासनपरिग्रहान्।
मर्थमागता यूयमिति सत्यवतीसुतः ॥ १० ॥
तमूचुः संशयं प्रष्टुं भवन्तं वयमागताः।
अलं तेनास्तु तावन्नः कथ्यतामपरं त्वया ॥ ११ ॥
कलिः साध्विति यत् प्रोक्तं शूद्रः साध्विति योषितः।
यदाह भगवान् साधु धन्याश्चेति पुनः पुनः ॥ १२ ॥
तत् सर्वं श्रोतुमिच्छामो न चेद् गुह्यं महामुने!।
तत् कथ्यतां ततो हृत्स्थं प्रक्ष्यामस्त्वां प्रयोजनम् ॥१३॥
इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत्।
श्रूयतां भो मुनिश्रेष्ठा! यदुक्तं साधु साध्विति ॥ १४ ॥

स्वल्पेनैव प्रयासेन कस्मिन् कालेऽल्पको धर्मो ददाति सुमहत् फलमिति तत् प्रश्नान्तरतया कलेः साधुत्वमुक्तम्। केषामसौ क्रियते सुखमिति तद्विवरणार्थं शूद्रस्य स्त्रीणाञ्च धन्यत्वमाह शूद्र! धन्योऽसीति। बुद्धिसन्निधानात् प्रत्यक्षाभिनयोक्तम्। अत्र कलेः साधुत्वं शूद्रस्य धन्यत्वञ्च योषितां साधुत्वञ्च धन्यतरत्वञ्चेति यथोत्तरं गुणाधिक्यं गङ्गावगाहनस्मरणेन भगवद्ध्यानपूते चित्ते प्रतीतमित्यवगन्तव्यं वारत्रयोक्त्या दर्शितम् ॥ ७ ॥ ८ ॥ ९ ॥ कृतं संवन्दनमभिवादनं येषाम् ॥ १० ॥

यत् कृते दशभिर्वर्षैस्त्रेतायां हायनेन यत्।
द्वापरे यच्च मासेन ह्यहोरात्रेण तत् कलौ ॥ १५ ॥
तपसो ब्रह्मचर्य्यस्य जपादेश्च फलं द्विजाः!।
प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम् ॥ १६ ॥
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥ १७ ॥
धर्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ।
अल्पायासेन धर्मज्ञास्तेन तुष्टोऽस्म्यहं कलेः ॥ १८ ॥
व्रतचर्य्यापरैर्ग्राह्या वेदाः पूर्वं द्विजातिभिः।
ततः स्वधर्मसम्प्राप्तैर्यष्टव्यं विधिनाध्वरैः ॥ १९ ॥
वृथा कथा वृथा भोज्यं वृथेज्या च द्विजन्मनाम्।
पतनाय तथा भाव्यं तैस्तु संयमिभिः सदा ॥ २० ॥
असम्यक्करणे दोषस्तेषां सर्वेषु कर्मसु।
भोज्यपेयादिकञ्चैषां नेच्छाप्राप्तिकरं द्विजाः ॥ २१ ॥
पारतन्त्र्यं समस्तेषु तेषां कार्य्येषु वै ततः।

तेन तावद्धनमस्तु तथापदाप्तः विवक्षितः ॥ ११ ॥ १२ ॥ १३ ॥ पुष्टिम- प्रश्नोऽर्थोऽयं कथमर्थितयाय पृच्छतीति प्रत्यवेदयन्येन ॥ १४ ॥

यत् कृते दशभिरिति दशवर्षसाध्येन यावता कलौ धर्मोत्कर्षः। ध्यायन् कृत इति दुःखाद्यपायाविर्भावेति कलौ यावदुक्तं ध्यायेन सर्वेषु ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ पूर्वसूत्रपाठादिन पुरुषार्थविशिष्टं श्रेयस्विनां ममाप्तिकी यथाह व्रतचर्यापरैरिति चतुर्भिः। व्रतचर्यापरैरिति पाठे उपकुर्वाणब्रह्मचारिः पूर्वं वर्णाश्रमपरैरित्यर्थः ॥ १९ ॥ वृथा कथा अश्ववीर्यकथिता वृथा भोज्यं पूर्वोक्तविधिना वृथेज्या इत्यवोचः द्विपूर्विका ॥ २० ॥ दक्षिणा मात्रितव्यं यावच्च न

जयन्ति ते निजान् लोकान् क्लेशेन महता द्विजाः ॥ २२ ॥
द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान् ।
निजान् जयति वै लोकान् शूद्रो धन्यतरस्ततः ॥ २३ ॥
भक्ष्याभक्ष्येषु नास्यास्ति पेयापेयेषु वै यतः ।
नियमो मुनिशार्दूलास्तेनासौ साध्वितीरितम् ॥ २४ ॥
स्वधर्मस्याविरोधेन नरैर्लब्धं धनं सदा ।
प्रतिपादनीयं पात्रेषु यष्टव्यञ्च यथाविधि ॥ २५ ॥
तस्यार्जने महाक्लेशः पालने च द्विजोत्तमाः ! ।
तथा सद्विनियोगाय विज्ञेयं गहनं नृणाम् ॥ २६ ॥
एभिरन्यैस्तथाक्लेशैः पुरुषा द्विजसत्तमाः ! ।
निजान् जयन्ति वै लोकान् प्राजापत्यादिकान् क्रमात् २७
योषित् शुश्रूषणं भर्त्तुः कर्मणा मनसा गिरा ।
कुर्वती समवाप्नोति तत्सालोक्यं यतो द्विजाः ! ॥२८॥
नातिक्लेशेन महता तानेव पुरुषो यथा ।
तृतीयं व्याहृतं तेन मया साध्विति योषितः ॥ २९ ॥
एतद् वः कथितं विप्रा ! यन्निमित्तमिहागताः ।
तत् पृच्छध्वं यथाकामं सर्वं वक्ष्यामि वः स्फुटम् ॥३० ॥

भवति किन्तु चोदनया ॥ २१ ॥ २२ ॥ शूद्रस्य तादृक् क्लेशाभावेन धन्यत्वमुक्तमित्याह द्विजशुश्रूषयेति द्वाभ्याम् ॥ २३ ॥ स्त्रीणामनायासेन श्रेयःप्राप्त्या धन्यत्वं वक्तुं पुरुषाणां तत्तत्प्राप्तौ क्लेशमाह स्वधर्मस्येति त्रिभिः ॥ २५ ॥ एवं स्वर्गो गहनं क्लेश ॥ २६ ॥ २७ ॥ योषितः तादृक् क्लेशो नास्तीत्याह योषिदिति द्वाभ्याम् । पुरुषो यथा महता क्लेशेन प्राजापत्यादीन् लोकान् प्राप्नोति तथा नातिक्लेशेन तांस्तांल्लोकान्

पराशर उवाच ।

ततस्ते मुनयः प्रोचुर्यत् प्रष्टव्यं महामुने ! ।
अन्यस्मिन्नेव तत् प्रश्ने यथावत् कथितं त्वया ॥ ३१ ॥
ततः प्रहस्य तान् प्राह कृष्णद्वैपायनो मुनिः ।
विस्मयोत्फुल्लनयनांस्तापसांस्तानुपागतान् ॥ ३२ ॥
मयैष भवतां प्रश्नो ज्ञातो दिव्येन चक्षुषा ।
ततो हि वः प्रसङ्गेन साधु साध्विति भाषितम् ॥ ३३ ॥
स्वल्पेनैव प्रयत्नेन धर्मः सिध्यति वै कलौ ।
नरैरात्मगुणाम्भोभिः क्षालिताखिलकिल्बिषैः ॥ ३४ ॥
शूद्रैश्च द्विजशुश्रूषातत्परैर्मुनिसत्तमाः ! ।
तथा स्त्रीभिरनायासात् पतिशुश्रूषयैव हि ॥ ३५ ॥
ततस्त्रितयमप्येतन्मम धन्यतमं मतम् ।
धर्मसंसाधने क्लेशो द्विजातीनां कृतादिषु ॥ ३६ ॥
भवद्भिर्यदभिप्रेतं तदेतत् कथितं मया
अपृष्टेनापि धर्मज्ञाः ! किमन्यत् कथ्यतां द्विजाः ! ॥ ३७ ॥

पराशर उवाच ।

ततः संपूज्य ते व्यासं प्रणम्य च पुनः पुनः ।
यथागतं द्विजा जग्मुर्व्यासोक्तिकृतनिश्चयाः ॥ ३८ ॥

प्रश्नोऽस्माकं ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ इदानीन्तु यदस्माभिरेतैः पृष्ट-मिति पुनः प्रष्टव्यम्, अपृष्टेनैव व्यासेन कथमेवं निर्णयः कृत इति विस्मयोत्फुल्लनयनान् ॥ ३२ ॥ ३३ ॥ स्वल्पत्वं निरूपयति स्वल्पेनैवेति चतुर्भिः । आत्मनो गुणैरेव यदम्भांसि तैः क्षालितमखिलं किल्बिषं येषां तैर्नरैः कर्मभिर्धर्मः सिध्यति ॥ ३४ ॥ यद्यप्येवं चातुर्विध्यम्

भवतोऽपि महाभाग! रहस्यं कथितं मया।
अत्यन्तदुष्टस्य कलेरयमेको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत॥ ३८॥
यच्चाहं भवता पृष्टो जगतामुपसंहृतिम्।
प्राकृतामान्तरालाञ्च तामप्येष वदामि ते॥ ४०॥

तृतीयोऽध्यायः।

पराशर उवाच।

सर्व्वेषामेव भूतानां त्रिविधः प्रतिसञ्चरः।
नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको मतः॥ १॥
ब्राह्मो नैमित्तिकस्तेषां कल्पान्ते प्रतिसञ्चरः।
आत्यन्तिकश्च मोक्षाख्यः प्राकृतो द्विपरार्द्धिकः॥ २॥

॥ ३७॥ ३८॥ प्रासङ्गिकं परिसमाप्य प्रस्तुतमनुसंधत्ते। यच्चाहमिति अन्तरालां ब्रह्मणो दिने दिने भवाम्॥ ४०॥

प्रतिसञ्चरप्रलयः। प्राकृतो द्विपरार्द्धिक इति द्विगुणे परार्द्धे ब्रह्मायुः समाप्तौ भवतः। प्रकृतौ तत्कार्य्यं लयः प्राकृतः॥ २॥ प्रथमांशे परार्द्धं मानमुक्तमेव। तथापि तदेव मानं परार्द्धस्य वत प्रका-

मैत्रेय उवाच ।

परार्द्धसंख्यां भगवन् ! ममाचक्ष्व यया तु सः ।
द्विगुणीकृतया ज्ञेयः प्राकृतः प्रतिसञ्चरः ॥ ३ ॥

पराशर उवाच ।

स्थानात् स्थानं दशगुणमेकस्माद् गण्यते द्विज ! ।
ततोऽष्टादशमे स्थाने परार्द्धमभिधीयते ॥ ४ ॥
परार्द्धं द्विगुणं यत् तु प्राकृतः प्रलयो द्विज ! ।
तदाव्यक्तेऽखिलं व्यक्तं स्वहेतौ लयमेति वै ॥ ५ ॥

[illegible] पृच्छति परार्द्धमिति ॥ ३ ॥ प्रकारान्तरमप्या- ह स्थानात् स्थानं दशगुणमिति । तथा च वायुः । कोटि- [illegible] परार्द्धमिति कीर्त्यते । परार्द्धं द्विगुणञ्चापि [illegible] र्मनीषिणः ॥ स्थानं दशगुणं विद्यात् [illegible] ततः । [illegible] ततः ॥ [illegible] ततः परम् । [illegible] तथैव च ॥ [illegible] परार्द्धं परमेव च । [illegible] ॥ [illegible] परार्द्धं [illegible] । [illegible] इति । एवं दशगुणं दश दश दशगुणाः स्मृताः । एवं दशगुणं [illegible] स्थाने परार्द्धं भवति । [illegible] परार्द्धं [illegible] इति [illegible] । [illegible] परार्द्धं [illegible] भवति । [illegible] परार्द्धमभिधीयते । [illegible] । [illegible]

निमेषो मानुषो योऽयं मात्रामात्रप्रमाणतः ।
तैः पञ्चदशभिः काष्ठा त्रिंशत् काष्ठास्तथा कला ॥ ६ ॥
नाडिका तु प्रमाणेन कला दश च पञ्च च ।
उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश ॥ ७ ॥
हेममाषैः कृतच्छिद्रश्चतुर्भिश्चतुरङ्गुलैः ।
मागधेन प्रमाणेन जलप्रस्थस्तु स स्मृतः ॥ ८ ॥

भेदात्कल्पभेदेन व्यवस्था । यद्वा वायूक्तकल्पगणनेन कल्पनया तदंशभूतदिव्य-मानुषवर्षादिभेदोक्तसंख्यासाम्य इदेनाविरोधः समर्थनीयः ॥४।५॥

नैमित्तिकं लयं वक्तुं तदुपयोगि निमेषादिक्रमेण ब्रह्मणोऽप्यायुः कल्पप्रमाणमनुक्रामति । निमेष इति त्रिभिः । मात्रैव मात्रा प्रमाणं यस्य सः । एकमात्राक्षरोच्चारणकालपरिमितो हि निमेषः निमेषचतुष्टयं हि मात्रा लघ्वक्षरं हि यदिति तत्त्वं पश्यन्ति ॥ ६ ॥ नाडिकाप्रमाणमेवाह उन्मानेनेति सार्द्धेन । अम्भस उन्मानेन उन्मीयते अनेनेत्युन्मानं पात्रं तदर्द्धेन येन सार्द्धत्रयोदशपलात्मकं । अम्भःस्वरूपेण पठितानि सार्द्धत्रयोदशपलानि सा नाडिका । सार्द्धत्रयोदश-पलतोयपरिमितपात्रेण सा नाडिका ज्ञातव्येत्यर्थः ॥ ७ ॥ किंप्रमाणं तत् पात्रं कार्यं तदाह । मागधेन प्रमाणेन जलप्रस्थस्तु स स्मृत इति सार्द्धत्रयोदशपलत्वेन हि मगधदेशप्रस्थः पठ्यते [षोडशपलत्वेन हि मागधदेशीयः प्रस्थः पठ्यते । यदाहु र्ज्ञानिनः । पलञ्च कुडवः प्रस्थ आढको द्रोण एव च । धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः ॥] तत्प्रमाणं पात्रं कार्यमित्यर्थसिद्धम् । ननु तथापि पात्रस्य स्थूल-नाडिकात्वान् क्रियापरिच्छेद्यत्वात् कालस्य क्रियाविशेषे प्रमाणं विशिनष्टि हेमेति । माषः पञ्चगुञ्जः । हेम्नो माषैश्चतुर्भिश्च-तुरङ्गुलदीर्घाकृतिभिः परिवर्तितैः कृतच्छिद्रः । एतदुक्तं भवति सार्द्धत्रयोदश-पलतोयमयं भाजनमन्तर्जलस्थितमधोभागस्थसूक्ष्मच्छिद्रेण-

नाडिकाभ्यामथ द्वाभ्यां मुहूर्त्तो द्विजसत्तम।
अहोरात्रं मुहूर्त्तास्तु त्रिंशन्मासो दिनैस्तथा॥ ९॥
मासैर्द्वादशभिर्वर्षमहोरात्रन्तु तद्दिवि।
त्रिभिर्वर्षशतैर्वर्षं षष्ट्या चैवासुरद्विषाम्॥ १०॥
तैस्तु द्वादशसाहस्रं चतुर्युगमुदाहृतम्।
चतुर्युगसहस्रन्तु कथ्यते ब्रह्मणो दिनम्॥ ११॥
स कल्पोऽत्र मनवश्चतुर्दश महामुने।
तदन्ते चैव मैत्रेय ब्राह्मो नैमित्तिको लयः॥ १२॥
तस्य स्वरूपमत्युग्रं मैत्रेय गदतो मम।
शृणुष्व प्राकृतं भूयस्तव वक्ष्याम्यहं लयम्॥ १३॥
चतुर्युगसहस्रान्ते क्षीणप्राये महीतले।
अनावृष्टिरतीवोग्रा जायते शतवार्षिकी॥ १४॥
ततो यान्यल्पसाराणि तानि सत्त्वान्यशेषतः।
क्षयं यान्ति मुनिश्रेष्ठ पार्थिवान्यत्र पीडनात्॥ १५॥
ततः स भगवान् विष्णू रुद्ररूपधरोऽव्ययः।
क्षयाय यतते कर्त्तुमात्मस्थाः सकलाः प्रजाः॥ १६॥

यथाक्रमं ... स्याद्यते तेन छिद्रेण यावता कालेन पूर्यते, तावान् कालो नाड़िकेति। तथाच "षट्पलं द्वादशार्द्धं प्रस्थोन्मानं चतुर्भिश्चतुरङ्गुलैः। स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतं तद्दिना॥ ८॥

तथा त्रिंशता दिनैः मास इत्यर्थः॥ ९॥ १०॥ ११॥ १२॥ नैमित्तिकलयप्रकारमाह, तस्य स्वरूपमिति वक्ष्याम्यहमित्यादि॥ १३॥ क्षीणप्राये दुर्भिक्षादिभिः॥ १४॥ १५॥ क्षयाय रुद्ररूपधरः सन् आत्मस्थाः आत्मनि लीनाः प्रजाः कर्त्तुं प्रयतते॥ १६॥ सप्तरश्मि-

ततः स भगवान् विष्णुर्भानोः सप्तसु रश्मिषु ।
स्थितः पिबत्यशेषाणि जलानि मुनिसत्तम ॥ १७ ॥
पीत्वाम्भांसि समस्तानि प्राणिभूमिगतानि वै ।
शोषं नयति मैत्रेय समस्तं पृथिवीतलम् ॥ १८ ॥
सरित्समुद्रशैलेषु शैलप्रस्रवणेषु च ।
पातालेषु च यत् तोयं तत् सर्वं नयति क्षयम् ॥ १९ ॥
ततस्तस्यानुभावेन तोयाहारोपबृंहिताः ।
त एव रश्मयः सप्त जायन्ते सप्त भास्कराः ॥ २० ॥
अधश्चोर्ध्वं च ते दीप्तास्ततः सप्त दिवाकराः ।
दहन्त्यशेषं त्रैलोक्यं सपातालतलं द्विज ॥ २१ ॥
दह्यमानस्तु तैर्दीप्तैस्त्रैलोक्यं द्विज भास्करैः ।
साद्रिनद्यर्णवाभोगं निःस्नेहमभिजायते ॥ २२ ॥
ततो निर्दग्धवृक्षाम्बु त्रैलोक्यमखिलं द्विज ।
भवत्येषा च वसुधा कूर्मपृष्ठोपमाकृतिः ॥ २३ ॥
ततः कालाग्निरुद्रोऽसौ भूत्वा सर्वहरो हरिः ।
शेषनिश्वाससंभूतः पातालानि दहत्यधः ॥ २४ ॥
पातालानि समस्तानि स दग्ध्वा ज्वलनो महान् ।
भूमिमभ्येत्य सकलं बभस्ति वसुधातलम् ॥ २५ ॥

सूर्नोक्ताः । सुषुम्णो हरिकेशश्च विश्वकर्मा तथैव च । विश्वव्यचास्तथाऽर्वा वसुः संयद्वसुश्चेति ॥ १७ ॥ प्राणिगतानि रक्तवसादीनि भूमिगतानि तडागादिस्थितानि ॥ १८ ॥ १९ ॥ सप्तरश्मयः भास्कराः सप्त आरोग्यो भ्राजः पटरः पतङ्गः स्वर्णरोमा ज्योतिष्मान् विभावसुः सप्त सूर्या इति श्रुत्युक्ताः ॥ २० ॥ २१ ॥ आभोगो विस्तारः निःस्नेहम् अति-

भुवर्लोकं ततः सर्वं स्वर्लोकञ्च सुदारुणः ।
ज्वालामालामहावर्त्तस्तत्रैव परिवर्त्तते ॥ २६ ॥
अम्बरीषमिवाभाति त्रैलोक्यमखिलं तदा ।
ज्वालावर्त्तपरीवारमुपक्षीणचराचरम् ॥ २७ ॥
ततस्तापपरीतास्तु लोकद्वयनिवासिनः ।
कृताधिकारा गच्छन्ति महर्लोकं महामुने ! ॥ २८ ॥
तस्मादपि महातापतप्ता लोकास्ततः परम् ।
गच्छन्ति जनलोकं ते दशावृत्त्या परैषिणः ॥ २९ ॥

छेदन । २२ । २३ ॥ रसभित्त भवोदरोति ॥ २४ ॥ २५ ॥ ज्वालानां मालाभिर्महान्त आवर्त्ता यस्मिन् सः । तत्रैव त्रैलोक्यमध्य एव ॥ २६ ॥ अम्बरीषं भर्जनपात्रम् ॥ २७ ॥ लोकद्वयनिवासिनः इति भुविस्थाः कृताधिकाराः अनुष्ठितस्वाधिकारयोगाः ॥ २८ ॥ दशाया तत्तत्फल-भोगावस्थया आवृत्त्या परिवृत्त्या परैषिणः ऊर्ध्वलोकैषिणः । अन्ये त्वाहुः । त्रैलोक्येऽपि ये अधिकारिणो मन्वाद्यास्ते कृताधिकारा भोगक्षीणकर्माणः सन्तो महर्लोकं प्राप्य तत्र इति तथा महर्षिभिः सह भगवता सह यान्ति तेषां मन्वादीनां मध्ये ये परैषिणः पर-मुक्तिप्राप्त्यर्थ ते देवतारमाहुत्या कृतानपःस्थानदेहाः ततः परमां यान्ति । अन्ये तु त्रैलोक्यस्था जीवाः आवर्त्तन्ते संस्तूयन्ते । तथा च वायु । विनिर्मितैर्नु मिश्रैश्च वाहैं बुद्धिर्भगवता । यथा तत्र तदाप्यन्ये तद्भावात्तेन तैः सह ॥ महर्लोकं गमिष्यन्ति यत्रा त्रैलोक्यवासिनः । महर्लोकं परित्यज्य मन्वाद्ये वै ह्युदये ॥ शरीराः जनलोकं वै जनलोके महात्मना । एवं देवाः सपितरः आपन्नो मन-न्तरे । पूर्वैः सहोर्ध्वं गच्छन्ति आवर्त्तन्ते च तैः सह । जन-लोकात् सुराः सर्वे दश कल्पान् पुनः पुनः ॥ पञ्चाशत्कोटि ब्रह्मणि

ततो दग्ध्वा जगत् सर्वं रुद्ररूपी जनार्दनः ।
मुखनिःश्वासजान् मेघान् करोति मुनिसत्तम ॥ ३० ॥
ततो गजकुलप्रख्यास्तडित्वन्तो निनादिनः ।
उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः ॥ ३१ ॥
केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः ।
धूम्रवर्णा घनाः केचित् केचित् पीताः पयोधराः ॥ ३२ ॥
केचिद्रासभवर्णाभा लाक्षारसनिभास्तथा ।
केचिद् वैदूर्य्यसङ्काशा इन्द्रनीलनिभाः परे ॥ ३३ ॥
शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभास्तथा ।
इन्द्रगोपनिभाः केचित् मनःशिलनिभास्तथा ॥ ३४ ॥
चाषपत्रनिभाः केचिदुत्तिष्ठन्ति घना घनाः ।
केचित् पुरवराकाराः केचित् पर्वतसन्निभाः ॥ ३५ ॥
कूटागारनिभाश्चान्ये केचित् स्थलनिभा घनाः ।
महारावा महाकायाः पूरयन्ति नभस्तलम् ॥ ३६ ॥
वर्षन्तस्ते महासारैस्तमग्निमतिभैरवम् ।
शमयन्त्यखिलं विप्र ! त्रैलोक्यान्तरविस्तृतम् ॥ ३७ ॥

समभूता नैधनेन च । अवश्यं भाविनार्थेन सम्बध्यन्ते तदा तु ते ॥ निवर्त्तन्ते यथाहन्तौ तेषां शक्यो न विस्तरः । महाजनस्त्वेव जनाश्रयश्च तपात् ततस्तानि भवन्ति सत्ये । मन्वन्तराणां परिवर्त्तनानि स्वपन्ति मन्ये न ततोऽन्तराणि । तपोऽभियोगाद्विषयप्रमाणाद्विशन्ति ते ब्रह्मतमेव देवम् । अध्यात्मनि महातेजाः सर्वमाख्याय सर्वशः । ततः स्वरान्नि स्वपिति तमस्येकार्णवे जले इति ॥ २८ ॥ ३० ॥ ३१ ॥ ३२ ॥

नष्टे चाग्नौ शतं तेऽपि वर्षाणामनिवारिताः ।
प्लावयन्तो जगत् सर्वं वर्षन्ति मुनिसत्तम ! । ३८ ।
धाराभिरक्षमात्राभिः प्लावयित्वाखिलं भुवम् ।
भुवर्लोकं तथैवोर्ध्वं प्लावयन्ति दिवं द्विज ! ॥ ३९ ।
अन्धकारीकृते लोके नष्टे स्थावरजङ्गमे ।
वर्षन्ति ते महामेघा वर्षाणामधिकं शतम् । ४० ।

चतुर्थोऽध्यायः ।

पराशर उवाच ।

सप्तर्षिस्थानमाक्रम्य स्थितेऽम्भसि महामुने ! ।
एकार्णवं भवत्येतत् त्रैलोक्यमखिलं ततः ॥ १ ॥
मुखनिःश्वासजो विष्णोर्वायुस्तान् जलदांस्ततः ।
नाशयित्वा तु मैत्रेय वर्षाणामधिकं शतम् ॥ २ ।

[illegible] ॥ ३४ ॥ [illegible] ॥ ३५ ॥ [illegible]
[illegible] ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

[illegible]
[illegible]

सर्वभूतमयोऽचिन्त्यो भगवान् भूतभावनः ।
अनादिरादिर्विश्वस्य पीत्वा वायुमशेषतः ॥ ३ ॥
एकार्णवे ततस्तस्मिन् शेषशय्यास्थितः प्रभुः ।
ब्रह्मरूपधरः शेते भगवानादिकृद्धरिः ॥ ४ ॥
जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः ।
ब्रह्मलोकगतैश्चैव चिन्त्यमानो मुमुक्षुभिः ॥ ५ ॥
आत्ममायामयीं दिव्यां योगनिद्रां समास्थितः ।
आत्मानं वासुदेवाख्यं चिन्तयन् परमेश्वरः ॥ ६ ॥
एष नैमित्तिको नाम मैत्रेय ! प्रतिसञ्चरः ।
निमित्तं तत्र यच्छेते ब्रह्मरूपधरो हरिः ॥ ७ ॥
यदा जागर्त्ति विश्वात्मा स तदा चेष्टते जगत् ।
निमीलत्येतदखिलं योगशय्यागतेऽच्युते ॥ ८ ॥
पद्मयोनेर्दिनं यत् तु चतुर्युगसहस्रवत् ।
एकार्णवे कृते लोके तावती रात्रिरिष्यते ॥ ९ ॥
ततः प्रबुद्धो रात्र्यन्ते पुनः सृष्टिं करोत्यजः ।
ब्रह्मस्वरूपधृक् विष्णुर्यथा ते कथितं पुरा ॥ १० ॥
इत्येष कल्पसंहारोऽवान्तरः प्रलयो द्विज ! ।
नैमित्तिकस्ते कथितः प्राकृतः शृणुतः परम् ॥ ११ ॥

॥ १ ॥ २ ॥ ३ ॥ शेष एव शय्या तामाश्रितः शेते ॥ ४ ॥ ५ ॥ ६ ॥ ॥ ७ ॥ स यदा जागर्त्ति तदा जगच्चेष्टते उद्युक्तं भवति, निमीलति क्षयं याति ॥ ८ ॥ 'क्षयन्तं' ब्राह्मं शेते यदा वा प्रबुद्धः सन् जगत् सृजतीत्यत्राह पद्मयोनिरिति द्वाभ्याम् ॥ ९ ॥ १० ॥ ११ ॥

जनाद्यम्ब्वग्निसम्पर्कात् कृते संक्षालने मुने ।
समस्तेष्वेव लोकेषु पातालेष्वखिलेषु च ॥ १२ ॥
महदादेर्विकारस्य विशेषान्तस्य संक्षये ।
कृष्णेच्छाकारिते तस्मिन् प्रवृत्ते प्रतिसञ्चरे ॥ १३ ॥
आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम् ।
आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते ॥ १४ ॥
प्रनष्टे गन्धतन्मात्रे ऽभवत् पृथ्वी जलात्मिका ।
रसाज्जलं समुद्भूतं तस्माज्जातं रसात्मकम् ॥ १५ ॥
आपस्तदा प्रवृद्धास्तु वेगवत्यो महास्वनाः ।
सर्वमापूरयन्तीदं तिष्ठन्ति विचरन्ति च ।
सलिलेनोर्मिमता लोका व्याप्ताः समन्ततः ॥ १६ ॥
अपामपि गुणो यस्तु ज्योतिषा पीयते तु सः ।
नश्यन्त्यापस्ततस्ताश्च रसतन्मात्रसंक्षयात् ॥ १७ ॥
ततश्चापो हृतरसा ज्योतिष्ट्वं प्राप्नुवन्ति वै ।
अग्न्यवस्थे तु सलिले तेजसा सर्वतो वृते ॥ १८ ॥
स चाग्निः सर्वतो व्याप्य चादत्ते तज्जलं तदा ।
सर्वमापूर्यतेऽर्चिर्भिस्तदा जगदिदं शनैः ॥ १९ ॥
अर्चिर्भिः संवृते तस्मिन् तिर्यगूर्ध्वमधस्तथा ।
ज्योतिषोऽपि परं रूपं वायुरत्ति प्रभाकरम् ॥ २० ॥

। १३ ॥ महदादेर्विशेषान्तस्य पृथिव्यन्तस्य विकारस्य संक्षये निमित्ते प्रतिसञ्चरे प्रलये प्रवृत्ते ॥ १४ ॥ आत्तो ऽपहृतो गन्धो यस्याः सा प्रलयत्वाय प्रलीनत्वाय ॥ १५ ॥ १६ ॥ ...

प्रलीने च ततस्तस्मिन् वायुभूतेऽखिलात्मनि ।
प्रनष्टे रूपतन्मात्रे कृतरूपो विभावसुः ॥ २१ ॥
प्रशाम्यति तदा ज्योतिर्वायुर्दोधूयते महान् ।
निरालोके तदा लोके वाय्ववस्थे च तेजसि ॥ २२ ॥
ततस्तु मूलमासाद्य वायुः सम्भवमात्मनः ।
ऊर्द्ध्वं चाधश्च तिर्य्यक् च दोधवीति दिशो दश ॥ २३ ॥
वायोरपि गुणं स्पर्शमाकाशो ग्रसते पुनः ।
प्रशाम्यति ततो वायुः खं तु तिष्ठत्यनावृतम् ॥ २४ ॥
अरूपमरसस्पर्शमगन्धं न च मूर्त्तिमत् ।
सर्वमापूरयच्चैतत् सुमहत् संप्रकाशते ॥ २५ ॥
परिमण्डलं तच्छुषिरमाकाशं शब्दलक्षणम् ।
शब्दमात्रं तदाकाशं सर्वमावृत्य तिष्ठति ॥ २६ ॥
ततः शब्दं गुणं तस्य भूतादिर्ग्रसते पुनः ।
भूतेन्द्रियेषु युगपद्भूतादौ संस्थितेषु वै ॥ २७ ॥

क्रमादित्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ प्रभाकरं प्रकाशकं वायुरपि पिबति ॥ २० ॥ २१ ॥

निरालोके वायुर्दोधूयते प्रचलति ॥ २२ ॥ ततस्तु मूलम् आत्मनः सम्भवं कारणम् आकाशम् आसाद्य ऊर्ध्वमधश्च दश दिशो दोधवीति प्रकम्पयति ॥ २३ ॥ अनावृतं विकारैरपरिच्छिन्नम् ॥ २४ ॥ २५ ॥ परिमण्डलं सर्वतो वर्त्तुलं तच्च ब्रह्माण्डकटाहावृतत्वात् शब्दलक्षणं स्फुटेन शब्देन लक्ष्यम् ॥ २६ ॥ भूतादिरित्यनेनात्र न तामसमात्रमहङ्कारं किन्तु तमःप्राधान्येन सामान्यतोऽहङ्कारमात्रम्, अत एव भूतानामिन्द्रियाणाञ्च युगपत् प्रलयोक्तिः देवानामप्युपलक्षणमेतत् ॥ २७ ॥ अभि-

अभिमानात्मको ह्येष भूतादिस्तामसः स्मृतः ।
भूतादिं ग्रसते चापि महान् वै बुद्धिलक्षणः ॥ २८ ॥
उर्वी महांश्च जगतः प्रान्तेऽन्तर्बाह्यतस्तथा ।
एवं सप्त महाबुद्धेः क्रमात् प्रकृतयस्तु वै ॥ २९ ॥
प्रत्याहारे तु ताः सर्वाः प्रविशन्ति परस्परम् ।
येनेदमावृतं सर्वमण्डमप्सु प्रलीयते ॥ ३० ॥
सप्तद्वीपसमुद्रान्तं सप्तलोकं सपर्वतम् ।
उदकावरणं यत्तु ज्योतिषा पीयते तु तत् ॥ ३१ ॥
ज्योतिर्वायौ लयं याति यात्याकाशे समीरणः ।
आकाशश्चैव भूतादिर्ग्रसते तं तथा महान् ॥ ३२ ॥

[illegible]विषयाणां भूतादीनां लीनत्वम् [illegible]भिमानात्मकत्वं [illegible] स्वभावत्वात् । एव भूतादिरूपः तामसाहङ्कारः स्मृत इत्यर्थः । बुद्धिलक्षण ज्ञानप्रधानत्वात् ॥ २८ ॥ यथा [illegible]निर्मोक्षेण पृथि- व्यादेः [illegible] लय उक्तः । आवरणे अप्येवं क्रमेण इत्य [illegible] [illegible] [illegible] [illegible] जगतः [illegible] प्रान्ते [illegible] । तथा [illegible] ततः [illegible] प्रविशन्ति । यथा [illegible] [illegible] [illegible] [illegible] । [illegible] पृथिव्याद्याः सप्त प्रकृतय ॥ २९ ॥

[illegible] प्रत्याहारे [illegible] परं परं [illegible] कारणं प्रवि- शन्ति । तदाह येनेति त्रिभिः । येनेदं [illegible] [illegible] [illegible] [illegible] [illegible] ॥ ३० ॥ ३१ ॥ [illegible] [illegible] [illegible] [illegible]

महदाद्यैर्विशेषान्तैः सहितं प्रकृतिर्यसमं द्विज ।
गुणसाम्यमनुद्रिक्तमन्यूनञ्च महामुने ॥ ३३ ॥
प्रोच्यते प्रकृतिर्हेतुः प्रधानं कारणं परम् ।
इत्येषा प्रकृतिः सर्वा व्यक्ताव्यक्तस्वरूपिणी ॥ ३४ ॥
व्यक्तस्वरूपमव्यक्ते तस्मिन् मैत्रेय लीयते ।
एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् ।
सोऽप्यंशः सर्वभूतस्य मैत्रेय परमात्मनः ॥ ३५ ॥
न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ।
सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥ ३६ ॥
स ब्रह्म तत् परं धाम परमात्मा स चेश्वरः ।
स विष्णुः सर्वमेवेदं यतो नावर्त्तते यतिः ॥ ३७ ॥
प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥ ३८ ॥
परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुर्नाम्ना स वेदेषु वेदान्तेषु च गीयते ॥ ३९ ॥

संहरति गुणसाम्यमिति द्वाभ्याम् ॥ ३३ ॥ व्यक्ताव्यक्तस्वरूपिणी कार्यकारणरूपा ॥ ३४ ॥ प्रकृतिपुरुषयोरपि सर्वं ब्रह्म तयोरसदृशत्वभाव एव इति । सर्वव्यापी प्रकृतेस्तत्कार्यस्य व्यापितया सोऽप्यंशोऽपि प्रकृतिरपि सर्वभूतस्य प्रकृत्यादिसर्वात्मकस्य परमात्मनोऽंशः ॥ ३५ ॥ यः पुनः परमात्मेत्याह न सन्तीति द्वाभ्याम् आत्मनः पुरुषात् परे ॥ ३६ ॥ ३७ ॥ पुरुषोत्तमे लीयेते लीनाविव तिष्ठते ॥ ३८ ॥ तस्य तु नास्ति लय इत्याह परमात्मेति तस्मात् स एव परमपुरुषार्थः ॥ ३९ ॥ तत्प्राप्त्यर्थमेव सर्वसाधनसम्पत्तिरित्याह प्रकृत-

प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम्।
ताभ्यामुभाभ्यां पुरुषैः सर्वमूर्तिः स इज्यते॥ ४०॥
ऋग्यजुःसामभिर्मार्गैः प्रवृत्तैरिज्यते ह्यसौ।
यज्ञेश्वरो यज्ञपुमान् पुरुषैः पुरुषोत्तमः॥ ४१॥
ज्ञानात्मा ज्ञानयोगेन ज्ञानमूर्तिः स चेज्यते।
निवृत्ते योगिभिर्मार्गे विष्णुर्मुक्तिफलप्रदः॥ ४२॥
ह्रस्वदीर्घप्लुतैर्यत्तु किञ्चिद्वस्त्वभिधीयते।
यच्च वाचामविषयं तत् सर्वं विष्णुरव्ययः।
परमात्मा स विश्वात्मा विश्वरूपधरो हरिः॥ ४४॥
व्यक्ताव्यक्तात्मिका तस्मिन् प्रकृतिः संप्रलीयते।
पुरुषश्चापि मैत्रेय व्यापिन्यव्याहतात्मनि॥ ४५॥
द्विपरार्धात्मकः कालः कथितो यो मया तव।
तदहस्तस्य मैत्रेय विष्णोरीशस्य कथ्यते॥ ४६॥
व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा।
तत्र स्थिते निशा चास्य तत्प्रमाणा महामुने॥ ४७॥

चेति ॥ ४० ॥ [illegible] इत्याह [illegible] प्रवृत्ते-
[illegible] मार्गमूर्तिरिज्यते ॥ ४१ ॥
[illegible] मार्गे [illegible]
[illegible] ॥ ४२ ॥ [illegible] ह्रस्वदीर्घेति द्वाभ्याम् ॥ ४३ ॥
॥ ४४ ॥ सर्वं विष्णुरेव न तु ततो [illegible]
[illegible] ॥ ४५ ॥ विष्णोः [illegible]
[illegible] द्विपरार्धेति द्वाभ्याम् ॥ ४६ ॥ तथा [illegible]
[illegible] ॥ ४७ ॥

नैवाहस्तस्य न निशा नित्यस्य परमात्मनः ।
उपचारस्तथाप्येष तस्येशस्य द्विजोच्यते ॥ ४८ ॥
इत्येष तव मैत्रेय ! कथितः प्राकृतो लयः ।
आत्यन्तिकमितो ब्रह्मन् निबोध प्रतिसञ्चरम् ॥ ४९ ॥

पञ्चमोऽध्यायः ।

पराशर उवाच ।

आध्यात्मिकादि मैत्रेय ! ज्ञात्वा तापत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥ १ ॥
आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ॥ २ ॥

तदहश्च न वास्तवमित्याह नैवेति । उपचारः सृष्टौ कर्त्तृत्वाभावे क्रियते इत्यर्थः ॥ ४८ ॥ प्राकृतं लयमुपसंहरन् आत्यन्तिकलयमुपक्षिपति निबोधेति ॥ ४९ ॥

आत्यन्तिको लयो नाम सर्वात्मना अविद्यातत्कार्याभावात्मको मोक्षः । तं आध्यात्मिकादितापत्रयं दुःखरूपमिति ज्ञात्वा बुद्धा विवेकी उत्पन्नवैराग्यः सन् गुरूपदेशादिनोत्पन्नज्ञानः प्राप्नोति ॥ १ ॥ आत्मानं कार्य्यकारणसंघातं निमित्तमधिकृत्य भवतीत्याध्यात्मिकः तं प्रपञ्चयति आध्यात्मिक इति पञ्चभिः ॥ २ ॥ प्रतिश्यायः पीनसः । श्वयथुः शोथः ।

शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ।
गुल्मार्शःश्वासश्वयथुच्छर्द्यादिभिरनेकधा ॥ ३ ॥
तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥ ४ ॥
कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्यामात्सर्यादिभवस्तथा ॥ ५ ॥
मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥ ६ ॥
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः ॥ ७ ॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ कथ्यते चाधिदैविकः ॥ ८ ॥
गर्भजन्मजराज्ञानमृत्युनारकजं तथा ।
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ॥ ९ ॥
सुकुमारतनुर्गर्भे जन्तुर्बहुमलावृते ।

अङ्गामयो वातरक्तोदरादिः ॥ ३ । ४ ॥ द्वेषोऽप्रीतिः लोभो [illegible] [illegible] [illegible] दोषोऽनुशोचनम् । असूया गुणेषु दोषारोपः ईर्ष्या [illegible] [illegible] [illegible] ॥ ५ । ६ ॥ भूतानि [illegible] [illegible] भवतीत्याधिभौतिकः । तथा च सरीसृपादिभ्यो जन्यते स आधिभौतिकः ॥ ७ ॥ देवं [illegible] [illegible] भवतीत्याधिदैविकः । तथा च शीतोष्णेति ॥ ८ ॥ एतद्वैव तापत्रयं गर्भजन्मादिभेदेन प्रपञ्चयति गर्भजन्मादिना इति । संसारतापात्मकं [illegible] [illegible] ॥ ९ ॥ तत्र गर्भदुःखमाह सुकुमारेति चतुर्भिः ।

उल्बसंवेष्टितो भुग्नपृष्ठग्रीवास्थिसंहतिः ॥ १० ॥
अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः ।
अतितापिभिरत्यर्थं वर्धमानातिवेदनः ॥ ११ ॥
प्रसारणाकुञ्चनादौ नाङ्गानां प्रभुरात्मनः ।
शकृन्मूत्रमहापङ्कशायी सर्वत्र पीडितः ॥ १२ ॥
निरुच्छ्वासः सचैतन्यः स्मरन् जन्मशतान्यथ ।
आस्ते गर्भेऽतिदुःखेन निजकर्मनिबन्धनः ॥ १३ ॥
जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः ।
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ॥ १४ ॥
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ।
क्लेशान्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ॥ १५ ॥
मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना ।
विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम ॥ १६ ॥
कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः ।
पूतिव्रणान्निपतितो धरण्यां क्रिमिको यथा ॥ १७ ॥

उल्बं गर्भवेष्टनचर्म । भुग्नं वक्रीभूतं पृष्ठादि यस्य सः ॥ १० ॥

मात्रा भुक्तैरतिविदाहिभिः अत्यम्लकट्वादिभिर्वर्धमानातिवेदना यस्य सः ॥ ११ ॥ आत्मनो गात्राणां प्रसारणादावसमर्थः ॥ १२ ॥ १३ ॥ जन्मदुःखमाह जायमान इति द्वाभ्यां पुरीषादिभिराविलं कलुषमाननं यस्य सः । प्राजापत्येन प्रजापतिनियुक्तेन गर्भबहिर्नोदकेन । तथाऽनुपाधात् स गर्भः कणीयांसं तं योनिं न छिनत्ति प्रजापत्या छिद्रम् इति श्रुतेः ॥१४॥ सूतिमारुतैः प्रसूतिकाले गर्भप्रेरकैर्वायुभिः ॥१५॥

जन्मानन्तरं दुःखान्याह, मूर्च्छामिति पञ्चभिः ॥ १६ ॥ तुन्नाङ्ग

कण्डूयनेऽप्यशक्तः परिवर्त्तेऽप्यनीश्वरः ।
स्तन्यपानादिकाहारमवाप्नोति परेच्छया ॥ १८ ॥
अशुचिः प्रस्तरे सुप्तः कीटदंशादिभिस्तथा ।
भक्ष्यमाणोऽपि नैवेषां समर्थो विनिवारणे ॥ १९ ॥
जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि वै ।
बालभावे यदाप्नोति आधिभौतादिकानि च ॥ २० ॥
अज्ञानतमसाच्छन्नो मूढान्तःकरणो नरः ।
न जानाति कुतः कोऽहं क्वाहं गन्ता किमात्मकः ॥ २१ ॥
केन बन्धेन बद्धोऽहं कारणं किमकारणम् ।
किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च वाच्यते ॥ २२ ॥
कोऽधर्मः कश्च वै धर्मः कस्मिन् वर्त्तेत वा कथम् ।
किं कर्त्तव्यमकर्त्तव्यं किंवा किं गुणदोषवत् ॥ २३ ॥
एवं पशुसमैर्मूढैरज्ञानप्रभवं महत् ।
अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः ॥ २४ ॥
अज्ञानं तामसो भावः कार्य्यारम्भप्रवृत्तयः ।
अज्ञानिनां प्रवर्त्तन्ते कर्म्मलोपास्ततो द्विज ॥ २५ ॥

[illegible] परिवर्त्तः [illegible] दुर्निवारत्वाद् दुःख [illegible] ॥ १७ ॥ [illegible] कण्डूयने [illegible] ॥ १८ ॥ ॥ १९ ॥ २० ॥ [illegible] मूढान्तःकरण [illegible] तमसाच्छन्न [illegible] ॥ २१ ॥ वाच्यं [illegible] ॥ २२ ॥ [illegible] ॥ २३ ॥ २४ ॥ किञ्च अज्ञानं तामसो भावः अतोऽज्ञानिनां विहितस्यापि कार्य्यारम्भस्य [illegible] ततः कर्म्मलोपाः प्रवर्त्तन्ते ॥ २५ ॥ ततो नरकप्राप्तिरिति [illegible]

नरकं कर्मणां लोपात् फलमाहुर्महर्षयः ।
तस्मादज्ञानिनां दुःखमिह चामुत्र चोत्तमम् ॥ २६ ॥
जराजर्जरदेहश्च शिथिलावयवः क्रमात् ।
विगलच्छीर्णदशनो वली स्नायुशिरावृतः ॥ २७ ॥
दूरप्रनष्टनयनो व्योमान्तर्गततारकः ।
नासाविवरनिर्यातलोमपुञ्जश्चलद्वपुः ॥ २८ ॥
प्रकटीभूतसर्वास्थिर्नतपृष्ठास्थिसंहतिः ।
उत्सन्नजठराग्नित्वादल्पाहारोऽल्पचेष्टितः ॥ २९ ॥
कृच्छ्राच्चंक्रमणोत्थानशयनासनचेष्टितः ।
मन्दीभवच्छ्रोत्रनेत्रः स्रवल्लालाविलाननः ॥ ३० ॥
अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः ।
तत्क्षणेऽप्यनुभूतानामस्मर्त्ताखिलवस्तुनाम् ॥ ३१ ॥
सकृदुच्चरिते वाक्ये समुद्भूतमहाश्रमः ।
श्वासकासमहायाससमुद्भूतप्रजागरः ॥ ३२ ॥
अन्येनोत्थाप्यतेऽन्येन तथा संवेश्यते जरी ।
भृत्यात्मपुत्रदाराणामवमानास्पदीकृतः ॥ ३३ ॥
प्रक्षीणाखिलशौचश्च विहाराहारसस्पृहः ।
हास्यः परिजनस्यापि निर्विण्णाशेषबान्धवः ॥ ३४ ॥

अत्यधिकं दुःखम् ॥ २६ ॥ व्याधिदुःखान्याह जराजर्जरेति द्वयेन । वली चर्मनाम्ना त्वक् शिरा रक्तवहा नाड़ी तैराच्छादितत्वात् स्नायुः ॥ दूरं दूरस्थेऽर्थे नष्टं नयनं चक्षुर्व्यापकत्वं चक्षुर्बलं वा । व्योम्नि चक्षुर्गोलकाकाशेऽन्तर्गते निमग्ने तारके कनीनिके यस्य वा ॥ २८ ॥ २९ ॥ ३० ॥ अनायत्तैरस्वाधीनैः करणैरिन्द्रियैः ॥ ३१ ॥ ३२ ॥

अनुभूतमिवाद्यस्मिन् जन्मन्यात्मविचेष्टितम् ।
संस्मरन् यौवनं दीर्घं निःश्वसित्यतितापितः ॥ ३५ ॥
एवमादीनि दुःखानि जरायामनुभूय वै ।
मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि ॥ ३६ ॥
श्लथग्रीवाङ्घ्रिहस्तोऽथ व्याप्तो वेपथुना भृशम् ।
मुहुर्ग्लानिपरवशो मुहुर्ज्ञानलवान्वितः ॥ ३७ ॥
हिरण्यधान्यतनयभार्याभृत्यगृहादिषु ।
एते कथं भविष्यन्ति ममेति ममताकुलः ॥ ३८ ॥
मर्मभिद्भिर्महारोगैः क्रकचैरिव दारुणैः ।
शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ॥ ३९ ॥
विवर्त्तमानताराक्षिहस्तपादं मुहुः क्षिपन् ।
संशुष्यमाणताल्वोष्ठकण्ठो घुरघुरायते ॥ ४० ॥
निरुद्धकण्ठो दोषौघैरुदानश्वासपीडितः ।
तापेन महता व्याप्तस्तृषा चार्त्तस्तथा क्षुधा ॥ ४१ ॥
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिङ्करपीडितः ।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते ॥ ४२ ॥
एतान्यन्यानि चाग्राणि दुःखानि मरणे नृणाम् ।
शृणुष्व नरके यानि प्राप्यन्ते पुरुषैर्मृतैः ॥ ४३ ॥

॥ ३३ ॥ ३४ ॥ यौवने यदात्मनो विविधं चेष्टितं तदन्यजन्मानुभूतमिव संस्मरन् दीर्घं श्वासं मुञ्चति ॥ ३५ ॥ ३६ ॥ मरणदुःखान्याह श्लथग्रीवेति ग्लानिः [illegible] । वेपथुना कम्पेन ॥ ३७ ॥ ३८ ॥ ३९ ॥ [illegible] घुर घुर इत्येवं शब्दं करोति ॥ ४० ॥ ४१ ॥ यातनार्थमन्यं देहम् ॥ ४२ ॥ नरकदुःखान्याह शृणुष्वेति

याम्यकिङ्करपाशादिग्रहणं दण्डताडनम्।
यमस्य दर्शनञ्चोग्रमुग्रमार्गविलोकनम्॥ ४४ ॥
करम्भवालुकावह्नियन्त्रशस्त्रादिभीषणे।
प्रत्येकं नरके याश्च यातना द्विज! दुःसहाः॥ ४५ ॥
क्रकचैः पीड्यमानानाम् ऊषायाञ्चापि ध्मायताम्।
कुठारैः कृत्यमानानां भूमौ चापि निखन्यताम्॥ ४६ ॥
शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रविश्यताम्।
गृध्रैः संभक्ष्यमाणानां द्वीपिभिश्चोपभुज्यताम्॥ ४७ ॥
क्वाथ्यतां तैलमध्ये च क्लिद्यतां क्षारकर्दमैः।
उच्चान्निपात्यमानानां क्षिप्यतां क्षेपयन्त्रकैः॥ ४८ ॥
नरके यानि दुःखानि पापहेतूद्भवानि वै।
प्राप्यन्ते नारकैर्विप्र! तेषां संख्या न विद्यते॥ ४९ ॥
न केवलं द्विजश्रेष्ठ! नरके दुःखपद्धतिः।
स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः॥ ५० ॥
पुनश्च गर्भे भवति जायते च पुनर्नरः।
गर्भे विलीयते भूयो जायमानोऽस्तमेति च॥ ५१ ॥
म्रियते जातमात्रश्च बालभावेऽथ यौवने।
मध्यमं वा वयः प्राप्य वार्धके वा ध्रुवा मृतिः॥ ५२ ॥

चार्वैः ... ॥ ४३ ॥ याम्यकिङ्करैः पाशादिग्रहणम् ॥ ४४ ॥ करम्भवालुकाः तप्तवालुकाः ॥ ४५ ॥ ध्मायतां [illegible] परस्वेदमार्दवम्। [illegible] ॥ ४६ ॥ द्वीपिभिर्व्याघ्रैः ॥ ४७ ॥ ४८ ॥ पापमेव हेतुः कारणं तदुद्भवानि ॥ ४९ ॥ स्वर्गेऽपि दुःखमेवेत्याह न केवलमिति स्वर्गेऽपि निर्वृतिर्नास्ति दुःख

यावज्जीवति तावच्च दुःखैर्नानाविधैः प्लुतः ।
तन्तुकारणपक्ष्मौघैरास्ते कार्पासबीजवत् ॥ ५३ ॥
द्रव्यनाशे तथोत्पत्तौ पालने च तथा नृणाम् ।
भवन्त्यनेकदुःखानि तथैवेष्टविपत्तिषु ॥ ५४ ॥
यद् यत् प्रीतिकरं पुंसां वस्तु मैत्रेय जायते ।
तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति ॥ ५५ ॥
कलत्रपुत्रभृत्यादिगृहक्षेत्रधनादिकैः ।
क्रियते न तथा भूरि सुखं पुंसां यथासुखम् ॥ ५६ ॥
इति संसारदुःखार्कतापतापितचेतसाम् ।
विमुक्तिपादपच्छायामृते कुत्र सुखं नृणाम् ॥ ५७ ॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः ॥ ५८ ॥
निरस्तातिशयाह्लादसुखभावैकलक्षणा ।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥ ५९ ॥

पङ्क्तिरवाकीर्णं । ५० ॥ जन्ममरणभोगानन्तरं पुनर्गर्भादिदुःखमाह पुनश्चेति चतुर्भिः ॥ ५१ ॥ ५२ ॥

दुःखैः प्लुतो व्याप्त आस्ते तन्तूनां कारणं पक्ष्माणि कार्पासांशवस्तेषामोघैः समूहैः । कार्पासबीजं यथा व्याप्तं तद्वत् ॥ ५३ ॥ अनुक्तो दुःखवृक्षाङ्कुरे ॥ ५४ ॥ ५५ ॥ कलत्रादिभिर्यथा असुखं भूरि क्रियते न तथा सुखं क्रियते ॥ ५६ ॥ एवं दुःखानुबन्धादेव सर्वविषयवैराग्यं पुंसो सम्भवेत् सुखं मोक्षमेवेत्याह इतीति त्रिभिः ॥ ५७ ॥ गर्भादिस्थानेषु प्रवर्तमानस्य भविष्यतो दुःखजातस्य भगवत्प्राप्तिरेव भेषजं मता सम्मतिश्चायं ॥ ५८ ॥ तत्स्वरूपं तु भगवत्प्राप्तिलक्षणं निरस्तातिशय आह्लादो निरतिशयमिति सुखं तद्भावस्तद्रूपतामात्रमेवैकलक्षणं यस्याः

तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने ॥ ६० ॥
आगमोत्थं विवेकोत्थं द्विधा ज्ञानं तथोच्यते ।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ॥ ६१ ॥
अन्धन्तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम् ॥ ६२ ॥
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम ।
तदेतत् श्रूयतामत्र सम्बन्धे गदतो मम ॥ ६३ ॥

सा तदा । किन्तु एकान्ता भगवद्भक्तामात्रैकावलम्बिनी न तु अभिलषितदिव्येन्द्रियगुणत्वेन कर्मफलवदनैकान्तिकी चान्तरा ॥ ५९ ॥ तस्य भावनिश्चयत्वात् भगवन्ताक्तु तत्प्राप्तौ कर्म सत्त्वशुद्धिद्वारा ज्ञानं साक्षात् ॥ ६० ॥

तच्च ज्ञानं द्विविधमित्याह आगमेति । तद्द्वयोरपि फलमाह शब्देति । आगममयम् आगमोत्थं ज्ञानं शब्दब्रह्मरूपत्वात् शब्दं ज्ञानमनन्तं तत्त्वमस्यादिवाक्यात् जायमानं ब्रह्मविषयकं ज्ञानमागमोत्थमित्यर्थः । देहादिविविक्ताकारविषयकस्तो निदिध्यासनाख्यायां प्रकाशमानं परं ब्रह्म विवेकजं ज्ञानमित्यर्थः । इतिव्युत्पत्त्या ब्रह्मण एव ज्ञानाभिधेयत्वात् ब्रह्मैव ज्ञानमित्युक्तम् ॥ ६१ ॥ ननु शब्दश्रवणादपि ब्रह्मज्ञानमेवोत्पद्यते तेनैवाज्ञानं निरस्य भगवत्प्राप्तिसिद्धेः किं विवेकजज्ञानेनेत्याशङ्क्याह अन्धमिति निविडतम इवाज्ञानम् । आवरणात्मकम् । इन्द्रियैः शब्दादिद्वारा जातं ज्ञानं दीपवत् न सर्वात्मना अज्ञाननिवर्तकं विवेकजन्तु ज्ञानं सूर्यवत् सर्वाज्ञाननिवर्तकमित्यर्थः ॥ ६२ ॥ उक्तमर्थे ज्ञानद्वैधे मनुसम्मतिमाह । मनु मन्त्रे । अभिनु

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ ६४ ॥
द्वे विद्ये वेदितव्ये वै इति चाथर्वणी श्रुतिः।
परया त्वक्षरप्राप्तिर्ऋग्वेदादिमयापरा ॥ ६५ ॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।
अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥ ६६ ॥
विभुं सर्वगतं नित्यं भूतयोनिमकारणम्।
व्याप्यव्याप्तं यतः सर्वं तद्वै पश्यन्ति सूरयः ॥ ६७ ॥
तद्ब्रह्म परमं धाम तद्ध्येयं मोक्षकाङ्क्षिणा।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ॥ ६८ ॥
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः ॥ ६९ ॥

ग्रहणम् ॥ ६३ ॥ शब्दब्रह्मणि वेदादौ निष्णातो विवेकेन परं ब्रह्म प्राप्नोति ॥ ६४ ॥ तदुक्तं विवेकसाधनेषु एव वाक्यमुखेनाह परत्वे- वच्छिनत्ति । द्वे विद्ये इति विद्याद्वयेन तद्विषयब्रह्मद्वयमपि द्वे- भावो ग्रहीतव्य इत्याह परयेति । अक्षरप्राप्तिरक्षरप्राप्तिहेतुः ऋग्वेदादिमयी अपरा कर्ममात्र कर्मादिः दिवस्वेनोक्तं । अक्षरप्राप्तिः अक्षरादिरूपा सा परा ब्रह्मज्ञानोपायत्वात् ॥ ६५ ॥

अथ परया यदक्षरमधिगम्यते तदव्यक्तमपाणिपादादिलक्षणं तद्- ब्रह्मविद्याविषयम् अक्षरं ब्रह्म तस्मात् पश्यन्तीति त्रिभिः ॥ ६६ ॥ विभुं प्रभुं सर्वगतमपरिच्छिन्नं व्यापि सर्वव्यापि भूतमयम् । व्याप्यव्या- प्तं यतः सर्वं भवति ॥ ६७ ॥ ६८ ॥ तत् परं ब्रह्मैव वाच्यम् तस्य सूक्ष्मम् । परमेश्वरस्य भगवच्छब्दवाच्यं स्वरूपमाह परमात्मनः स्वरूपं भगवदर्थनिर्णयाय ॥ ६९ ॥ तदित्यादि

एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम् ॥ ७० ॥
अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज ।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः ॥ ७१ ॥
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते ।
मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥ ७२ ॥
सम्भर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥ ७३ ॥
ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ ७४ ॥

ज्ञानं परिच्छेत्याह एवमिति । निगदितार्थस्य इदमाद्यदिर्देश्यस्य स तत्त्वं तस्य तत्त्वतः ज्ञायते अव्यक्तत्वरूपेण येन इदमाद्यात्मना ज्ञायते तत् परं ज्ञानं परविद्या त्रयीमयन्तु यत् अपरविद्या कथिता ॥ ७० ॥ ननु यदीश्वरो ब्रह्मैव कथं तर्हि तस्य निर्गुणस्य भगवच्छब्दवाच्यत्वमित्याशङ्क्याह । अशब्देति यद्यपि निर्गुणत्वात् अविद्यमानगुणत्वेन भगवच्छब्दः प्रयुज्यते तथापि गुणानां तदुपाधिकत्वात् उपचारात् मत्वर्थीयः प्रयुज्यते तद्धि द्विजसूयाम् ॥ ७१ ॥

इत्यत्र तु मुख्य एव भगवच्छब्दो वर्त्तते इत्याह शुद्धे इति । शुद्धे अचले महाविभूत्याख्ये अचिन्त्यैश्वर्ये ॥ ७२ ॥ भकारार्थनिरुक्त्या भगवच्छब्दस्य परमेश्वरवाचकत्वमाह संभर्त्तेत्यादिना संभर्त्ता पोषकः भर्त्ता आधार इत्यर्थद्वयेनान्वितः । नेता कर्मज्ञानफलप्रापकः । गमयिता प्रलये कार्याणां कारणम् । प्रतिसर्गे पुनरपि तेषाम् उद्गमयिता सर्गकर्त्ता इति गकारार्थः ॥ ७३ ॥ भगशब्दार्थनिरुक्त्या इदानीम् अक्षर-द्वयात्मकस्य पदस्यार्थमाह । ऐश्वर्यस्येति इरणा संज्ञा इत्यर्थः ॥ ७४ ॥

वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि ।
सर्वभूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥ ७५ ॥
एवमेष महाशब्दो भगवानिति सत्तम ! ।
परमब्रह्मभूतस्य वासुदेवस्य नान्यतः ॥ ७६ ॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः ॥ ७७ ॥
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥ ७८ ॥
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ ७९ ॥
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः ॥ ८० ॥

वकारार्थमाह वसन्तीति यस्मिन्नधिष्ठानभूते भूतानि वसन्ति स च भूतेषु वसतीति वकारार्थः ॥ ७५ ॥ एवमेष शब्दो वासुदेवस्य वाचकः नान्यस्यार्थः । यद्वा नग नग भगवानित्यक्षरद्वयात् निरुक्तिः । षाड्गुण्यं भग इति वक्ष्ये तद्वान् भगवानित्युक्तम् एव ॥ ७६ ॥ तदेवं परमेश्वरे निरतिशयैश्वर्यादियुक्ते मुख्योऽयं शब्दः । अन्यत्र तु गौण इत्याह तत्रेति पूज्यस्य यः कश्चन पदार्थस्तस्योक्तिर्या परिभाषा तदुक्तलक्षणरूपस्तदन्वितोऽयं शब्दः । अतो नोपचारेण प्रवर्त्तते । अन्यत्र देवादावुपचारेण प्रवर्त्तते ॥ ७७ ॥ उपचारे बीजमाह उत्पत्तिमिति ॥ ७८ ॥ भगवच्छब्दवाच्यं षाड्गुण्यं प्रकारान्तरेणाह ज्ञानेति । हेयैः प्राकृतगुणैः तद्धर्मैः सर्वभिन्नतत्त्वेन विना ॥ ७९ ॥ [illegible] वासुदेवशब्दस्यार्थमाह सर्वाणीति वसनात् वपनात् वासः वापनात् वासुर्दीव्यत्वं द्योतनात् देवः ।

खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः ॥ ८१ ॥
भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥ ८२ ॥

स सर्वभूतप्रकृतिं विकारान्
गुणांश्च दोषांश्च मुने! व्यतीतः।
अतीतसर्वावरणोऽखिलात्मा
तेनास्तृतं यद्भुवनान्तराले ॥ ८३ ॥
समस्तकल्याणगुणात्मको हि
स्वशक्तिलेशावृतभूतवर्गः।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ ॥ ८४ ॥
तेजोबलैश्वर्यमहावबोध-
स्ववीर्यशक्त्यादिगुणैकराशिः।
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परावरेशे ॥ ८५ ॥

वासयत्यसौ देवश्चेति वासुदेवः तदुक्तं मोक्षधर्मे। वसनात् देवनाच्चैव वासुदेवस्ततो विदुरिति ॥ ८० ॥ अनयाद्वयोऽपि भगवज्ज्ञानात्मोपनिषद्यैव ब्रह्मज्ञानं प्राप्ता इति दर्शयन्नाह खाण्डिक्येति षड्भिः ॥ ८१ ॥ भूतेषु वोऽस्मादिति वासुशब्दो व्याख्यातः। धाता विधातेत्यादिना देवशब्दो दिवेर्धातोः अनेकार्थत्वेन व्याख्यात इति ज्ञेयम् ॥ ८२ ॥

गुणदोषान्तराले वर्त्तन्ते तद् सर्वं तेनात्मन्यं सर्वमात्मनीति यावत् ॥ ८३ ॥ ८४ ॥ ज्ञानादयश्चाशेषाश्च तेजोबलेति ॥ ८५ ॥ ऋद्धिः संक-

स ईश्वरो व्यष्टिसमष्टिरूपो
व्यक्तस्वरूपोऽप्रकटस्वरूपः ।
सर्वेश्वरः सर्वगसर्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः ॥ ८६ ॥
संज्ञायते येन तदस्तदोषं
शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाप्यधिगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ ८७ ॥

षष्ठोऽध्यायः ।

पराशर उवाच ।

स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः ।
तत्प्राप्तिकारणं ब्रह्म तदेतदिति चोच्यते ॥ १ ॥

व्यष्टिरूपः सर्वक्षेत्रेशात्मा ॥ ८६ ॥ एतत्स्वरूपं संज्ञायते व इति येन ज्ञायते परोक्षतया । संदृश्यते साक्षात् क्रियते । अधिगम्यते निःशेषविद्यानिवृत्त्या प्राप्यते तत् ज्ञानं परा विद्या, अन्यदज्ञानम् अपि ह्यानर्थनिवर्तनी अपरा विद्येत्यर्थः ॥ ८७ ॥

पूर्वाध्यायान्ते च ज्ञायते येनेत्यत्र परमात्मनो ज्ञानदर्शनप्राप्तयो येन भवन्ति तत्परं ज्ञानमित्युक्तं तत्र ज्ञानस्य समनन्तरं वेद्यत्वादुपायत्वेन भवतीति प्रतिपादितम् । अतस्तद्वदुभयं दर्शनप्राप्ति-कारणमाह स्वाध्यायेति स्वाध्यायः प्रणवजपः । संयमो योगः ताभ्यां स दृश्यते । तत्प्राप्तावपि तदेतत् द्वयं कारणम् । अत एव तदेतद्द्वयं दर्शनद्वारा ब्रह्मणः प्राप्तिहेतुत्वात् ब्रह्माभिधीयते ॥ १ ॥ तदङ्गान-

स्वाध्यायाद्योगमासीत योगात् स्वाध्यायमेव च ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥ २ ॥

तदीक्षणाय स्वाध्यायश्चक्षुर्योगस्तथापरम् ।
न मांसचक्षुषा द्रष्टुं ब्रह्मभूतः स शक्यते ॥ ३ ॥

मैत्रेय उवाच ।

भगवन् ! तमहं योगं ज्ञातुमिच्छामि तं वद ।
ज्ञाते यत्राखिलाधारं पश्येयं परमेश्वरम् ॥ ४ ॥

पराशर उवाच ।

यथा केशिध्वजः प्राह खाण्डिक्याय महात्मने ।
जनकाय पुरा योगं तथाहं कथयामि ते ॥ ५ ॥

मैत्रेय उवाच ।

खाण्डिक्यः कोऽभवद् ब्रह्मन् को वा केशिध्वजोऽभवत् ।
कथं तयोश्च संवादो योगसम्बन्धवानभूत् ॥ ६ ॥

पराशर उवाच ।

धर्मध्वजो वै जनकस्तस्य पुत्रोऽमितध्वजः ।
कृतध्वजश्च नाम्ना स सदाध्यात्मरतिर्नृपः ॥ ७ ॥

प्रकारमाह स्वाध्यायादिति संपत्त्या समृद्ध्या तथा च योगशास्त्रम् । जपाच्छ्रान्तः पुनर्ध्यायेत् ध्यानाच्छ्रान्तः पुनर्जपेत् । जपध्यानाभियोगेन पश्येदात्मानमात्मनि इति ॥ २ ॥

ननु चक्षुरादिभिरप्यात्मन एव स्फुरणात् कथमिदमेव दर्शनमित्युच्यते तत्राह तदीक्षणायेति [illegible] विना परिपूर्णब्रह्मभूतो मांसमयैश्चक्षुरादिभिर्द्रष्टुं न शक्यते इत्यर्थः ॥ ३ ॥ यत्र यस्मिन् ज्ञाते सत्या अनुवर्तते इतीत्यर्थः ॥ ४ ॥ पूर्वाध्यायोपक्षिप्तमितिहासं

कृतध्वजस्य पुत्रोऽभूत् ख्यातः केशिध्वजो द्विज ।
पुत्रो मितध्वजस्यापि खाण्डिक्यो जनकोऽभवत् ॥ ८ ॥
कर्ममार्गेऽतिखाण्डिक्यः पृथिव्यामभवत् कृती ।
केशिध्वजोऽप्यतीवासीदात्मविद्याविशारदः ॥ ९ ॥
तावुभावपि चैवास्तां विजिगीषू परस्परम् ।
केशिध्वजेन खाण्डिक्यः स्वराज्यादवरोपितः ॥ १० ॥
पुरोधसा मन्त्रिभिश्च समवेतोऽल्पसाधनः ।
राज्यान्निराकृतः सोऽथ दुर्गारण्यचरोऽभवत् ॥ ११ ॥
इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।
ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया ॥ १२ ॥
एकदा वर्त्तमानस्य यागे योगविदां वर ।
धर्म्मधेनुं जघानोग्रः शार्दूलो विजने वने ॥ १३ ॥
ततो राजा हतां ज्ञात्वा धेनुं व्याघ्रेण ऋत्विजः ।
प्रायश्चित्तं स पप्रच्छ किमत्रेति विधीयते ॥ १४ ॥

[illegible] अनुवर्त्तयति यथा केशिध्वज इत्यादिना [illegible] ॥ ८ ॥ अति अतिशयेन कर्ममार्गे ॥ ९ ॥ [illegible] अल्पसाधनः अल्पपरीवारः ॥ ११ ॥ स केशिध्वजः ज्ञानव्यपाश्रयः [illegible] ब्रह्मविद्यामधिष्ठाय [illegible] बहून् यज्ञान् इयाज [illegible] तर्त्तुं [illegible] ॥ १२ ॥

[illegible] ॥ १३ ॥ [illegible] प्रायश्चित्तं विधीयत इति पप्रच्छ ॥ १४ ॥ [illegible]

ते चोचुर्न वयं विद्मः कशेरुः पृच्छ्यतामिति।
कशेरुरपि तेनोक्तस्तथैव प्राह भार्गवम्॥१५॥
शुनकं पृच्छ राजेन्द्र! नाहं वेद्मि स वेत्स्यति।
स गत्वा तमपृच्छच्च सोऽप्याह शृणु यन्मुने!॥१६॥
न कशेरुर्न चैवाहं न चान्यः साम्प्रतं भुवि।
वेत्त्येक एव त्वच्छत्रुः खाण्डिक्यो यो जितस्त्वया॥१७॥
स चाह तं प्रयास्येष प्रष्टुमात्मरिपुं मुने!।
प्राप्त एव मया यज्ञो यदि मां स हनिष्यति॥१८॥
प्रायश्चित्तमशेषेण यदि पृष्टो वदिष्यति।
ततश्चाविकलो यागो मुनिश्रेष्ठ! भविष्यति॥१९॥

पराशर उवाच।

इत्युक्त्वा रथमारुह्य कृष्णाजिनधरो नृपः।
वनं जगाम यत्रास्ते खाण्डिक्यः स महामतिः॥२०॥
तमायान्तं समालोक्य खाण्डिक्यो रिपुमात्मनः।
प्रोवाच क्रोधताम्राक्षः समारोपितकार्मुकः॥२१॥

खाण्डिक्य उवाच।

कृष्णाजिनं त्वं कवचमाबध्यास्मान्निहंस्यसि।
कृष्णाजिनधरे वेत्सि न मयि प्रहरिष्यति॥२२॥

पृच्छ्येत्यात्मन्यय॥१५॥१६॥१७॥ प्राप्त एवेति। धर्मार्थं यतमानस्तु अन्तरा चेद्विपद्यते। स धर्मफलमाप्नोतीत्यादिवचनात्॥१८॥ अविकलो योगो भविष्यतीति च चाद्येति पूर्वेणान्वयः॥१९॥२०॥२१॥ कृष्णाजिनकवचबद्धे तत्राभिमायस्तु नेष्यते। कृष्णाजिनधरे मयि खाण्डिक्यो न प्रहरिष्यतीति वेत्सि मन्यसे॥२२॥

मृगाणां वत पृष्ठेषु मृतः कृष्णाजिनं न किम्।
येषां त्वया मया चोच्चैः प्रक्षिप्ताः शितसायकाः ॥ २३ ॥
स त्वामहं हनिष्यामि न मे जीवन् विमोक्ष्यसे।
आततायासि दुर्बुद्धे! मम राज्यहरो रिपुः ॥ २४ ॥

केशिध्वज उवाच।

खाण्डिक्य! संशयं प्रष्टुं भवन्तमहमागतः।
न त्वां हन्तुं विचार्यैतत् कोपं बाणञ्च मुञ्च वा ॥ २५ ॥

पराशर उवाच।

ततः स मन्त्रिभिः सार्द्धमेकान्ते सपुरोहितः।
मन्त्रयामास खाण्डिक्यः सर्वैरेव महामतिः ॥ २६ ॥
तमूचुर्मन्त्रिणो वध्यो रिपुरेष वशं गतः।
हते तु पृथिवी सर्वा तव वश्या भविष्यति ॥ २७ ॥
खाण्डिक्यश्चाह तान् सर्वानेवमेतन्न संशयः।
हते तु पृथिवी सर्वा मम वश्या भविष्यति ॥ २८ ॥
परलोकजयस्तस्य पृथिवी सकला मम।
न हन्मि चेल्लोकजयो मम तस्य वसुन्धरा।
नाहं मन्ये लोकजयादधिका स्याद् वसुन्धरा ॥ २९ ॥
परलोकजयोऽनन्तः स्वल्पकालो महीजयः।
तस्मान्नैनं हनिष्यामि यत् पृच्छति वदामि तत् ॥ ३० ॥

[illegible] ॥ २२ ॥ [illegible] ॥ २३ ॥ [illegible] ॥ २४ ॥ [illegible] ॥ २५ ॥ २६ ॥ २७ ॥

पराशर उवाच ।

ततस्तमभ्युपेत्याह खाण्डिक्यजनको रिपुम् ।
प्रष्टव्यं यत्त्वया सर्वं तत् पृच्छस्व वदाम्यहम् ॥ ३१ ॥

पराशर उवाच ।

ततः सर्वं यथावृत्तं धर्मधेनुवधं द्विज ।
कथयित्वा स पप्रच्छ प्रायश्चित्तं हि तद्गतम् ॥ ३२ ॥
स चाचष्ट यथान्यायं द्विज । केशिध्वजाय तत् ।
प्रायश्चित्तमशेषेण यद् वै तत्र विधीयते ॥ ३३ ॥
विदितार्थः स तेनैव सोऽनुज्ञातो महात्मना ।
यागभूमिमुपागत्य चक्रे सर्वाः क्रियाः क्रमात् ॥ ३४ ॥
क्रमेण विधिवत् यागं नीत्वा सोऽवभृथाप्लुतः ।
कृतकृत्यस्ततो भूत्वा चिन्तयामास पार्थिवः ॥ ३५ ॥
पूजिता ऋत्विजः सर्वे सदस्या मानिता मया ।
तथैवार्थिजनोऽप्यर्थैर्योजितोऽभिमतैर्मया ॥ ३६ ॥
यथार्हमस्य लोकस्य मया सर्वं विचेष्टितम् ।
अनिष्पन्नक्रियं चेतस्तथापि मम किं यथा ॥ ३७ ॥

॥ २८ ॥ परलोकजयस्यैव तत्त्व धर्मेण प्रवृत्तस्यान्तरायरूपेऽपि तत्फलसिद्धेः न कृत्स्नस्यैहलौकिकस्य इति । ... ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ स चाचष्टेति इममेव विषयं प्रस्तुत्य वाजसनेयके श्रुतिश्रोताख्यं प्रायश्चित्तमुक्तम् । चन्द्राते पयस्य पोषि भाषेत्यादि स्मृतौ च प्रायश्चित्तस्य स्फुटत्वेऽपि यथा देशकालावस्थादिविशेषं कल्पनीयम् । खाण्डिक्यादपरो न वेत्तीति पूर्वोक्तस्याभिप्रायः । यद्वै तत्र प्रायश्चित्तं विधीयते तदशेषं यथान्यायं केशिध्वजायाचष्टेति ॥ ३३ ॥ ३४ ॥ नीत्वा समाप्य ॥ ३५ ॥ ३६ ॥

इति सञ्चिन्त्य यज्ञं स समाप्य स महीपतिः ।
खाण्डिक्याय स दत्तेति मया वै गुरुदक्षिणा ॥ ३८ ॥
स जगाम ततो भूयो रथमारुह्य पार्थिव
मैत्रेय । दुर्गगहनं खाण्डिक्यो यत्र संस्थितः ॥ ३९ ॥
खाण्डिक्योऽपि तथायान्तं पुनर्दृष्ट्वा धृतायुधः
तस्थौ हन्तुं कृतमतिस्तमाह स पुनर्नृप ॥ ४० ॥
भो नाहं तेऽपकाराय प्राप्तः खाण्डिक्य मा क्रुधः ।
गुरोर्निष्क्रयदानाय मामवेहि त्वमागतम् ॥ ४१ ॥
निष्पादितो मया यागः सम्यक् त्वदुपदेशतः ।
सोऽहं ते दातुमिच्छामि वृणुष्व गुरुदक्षिणाम् ॥ ४२ ॥

पराशर उवाच ।

भूयः स मन्त्रिभिः सार्द्धं मन्त्रयामास पार्थिवः ।
गुरुनिष्क्रयकामोऽयं किमयं प्रार्थ्यतामिति ॥ ४३ ॥
तमूचुर्मन्त्रिणो राज्यमशेषं प्रार्थ्यतामिति
कृतिभिः प्रार्थ्यते राज्यमनायासितसैनिकैः ॥ ४४ ॥
प्रहस्य तानाह नृपः स खाण्डिक्यो महामतिः
स्वल्पकालं महीराज्यं मादृशैः प्रार्थ्यते कथम् ॥ ४५ ॥
एवमेतद्भवन्तोऽत्र सर्वसाधनमन्त्रिणः ।
परमार्थः कथं कोऽत्र यूयं नात्र विचक्षणाः ॥ ४६ ॥

सखापि [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] ॥ ३८ ॥ ४० ॥ भोः खाण्डिक्य ।
मा क्रुधः क्रोधं मा कार्षीः ॥ ४१ ॥ ४२ ॥ ४३ ॥ अनायासिताः
[illegible] [illegible] सैनिकाः [illegible] ॥ ४४ ॥ ४५ ॥ [illegible]

पराशर उवाच ।

इत्युक्त्वा समनुप्राप्तं स तं केशिध्वजं नृपम् ।
उवाच किमवश्यमिदं ददासि गुरुदक्षिणाम् ॥ ४७ ॥

पराशर उवाच ।

बाढमित्येव तेनोक्तः खाण्डिक्यस्तमथाब्रवीत् ।
भवानध्यात्मविज्ञानपरमार्थविचक्षणः ॥ ४८ ॥
यदि चेद्दीयते मह्यं भवता गुरुनिष्क्रयः ।
तत् क्लेशप्रशमायालं यत् कर्म तदुदीरय ॥ ४९ ॥

सप्तमोऽध्यायः ।

केशिध्वज उवाच

न प्रार्थितं त्वया कस्मात् मम राज्यमकण्टकम् ।
राज्यलाभाद्विना नान्यत् क्षत्रियाणामतिप्रियम् ॥ १ ॥

अर्थश्च पने संन्यस्य । अत्र संसारे क [illegible] रमाद्यैः स प कष्ट भवतीति च [illegible] सूय न प्रार्थितवाः ॥ ४६ ॥ ४७ ॥ ४८ ॥ तत् त [illegible] ॥ ४९ ॥

खाण्डिक्याय ददौ विद्यामध्यात्मगुरवे वरम् ।
केशिध्वजो न तच्चित्रं न चादेयं महीयसाम् ॥

तत्त्वं जिज्ञासवे खाण्डिक्याय तत्त्वज्ञानमुपदेश्य केशिध्वजस्तस्य विवेकवैराग्यपरीक्षार्थमाह न प्रार्थितमिति । अकण्टकं निष्प्रतिपक्षं राज्यं विना प्रजापालनादेः स्वधर्मस्यासिद्धेः तत्सिद्धये राज्यलाभेनैव युक्तः । अन्यथा स्वधर्मत्यागनिमित्तः स्यादिति भावः ॥ १ ॥ अतो-

खाण्डिक्य उवाच ।

केशिध्वज ! निबोध त्वं मया न प्रार्थितं यतः ।
राज्यमेतदशेषं ते यत्र गृध्यन्त्यपण्डिताः ॥ २ ॥
क्षत्रियाणामयं धर्मो यत् प्रजापरिपालनम् ।
वधश्च धर्मयुद्धेन स्वराज्यपरिपन्थिनाम् ॥ ३ ॥
तत्राशक्तस्य मे दोषो नैवास्त्यपहृते त्वया ।
बन्धायैव भवत्येषा ह्यविद्याप्यक्रमोज्झिता ॥ ४ ॥
जन्मोपभोगलिप्सार्थमियं राज्यस्पृहा मम ।
अन्येषां दोषजा नैषा धर्ममेवानुरुध्यते ॥ ५ ॥

[illegible] ॥ २ ॥

[illegible] ॥ ३ ॥

न याचञा क्षत्रबन्धूनां धर्मो यत्तत् सतां मतम्।
अतो न याचितं राज्यमविद्यान्तर्गतं तव ॥ ६ ॥
राज्ये गृध्नन्त्यविद्वांसो ममत्वाहृतचेतसः।
अहंमानमहापानमदमत्ता न मादृशाः ॥ ७ ॥

पराशर उवाच।

ततः प्रहृष्टः साध्विति प्राह केशिध्वजो नृपः।
खाण्डिक्यजनकं प्रीत्या श्रूयतां वचनं मम ॥ ८ ॥
अहं त्वविद्यया मृत्युं तर्तुकामः करोमि वै।
राज्यं यागांश्च विविधान् भोगैः पुण्यक्षयं तथा ॥ ९ ॥
तदिदं ते मनो दिष्ट्या विवेकैश्वर्यतां गतम्।
श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ॥ १० ॥
अनात्मन्यात्मबुद्धिर्या चास्वे स्वमिति या मतिः।
अविद्यातरुसम्भूतिबीजमेतद् द्विधा स्थितम् ॥ ११ ॥

ननु तथापि याचञा मा भूत् राज्यं नयतः मत्तात् धर्मं किमिति नानुष्ठीयते तत्राह याचञेति क्षत्रधर्मत्वात् अविद्यान्तर्गतत्वाच्च त्वदीयं राज्यं मया न प्रार्थितम् ॥ ६ ॥ ममतो यत्र स्वबन्धुपरियुता इति ह्युक्तं तदेव विवृणोत्याह राज्य इति । अहंमान एव महापानं तेन यो मदः तेन मत्ता ॥ ७ ॥ खाण्डिक्येनोक्तं श्रुत्वा केशिध्वजः किं कृतवानित्यपेक्षायामाह तत प्रहृष्ट साध्विति । तत प्रहृष्ट इति ते तव बुद्धिरिति शेषः ॥ ८ ॥ अविद्यामयेऽपि राज्ये स्वप्रवृत्तौ कारणमाह अहमिति । त्वया तथोक्तम् अविद्यान्तर्गतत्वात् राज्यमनुपादेयमिति । तच्च ममापि तुल्यम् । तथाप्यविद्यया प्रजापालनादि-लक्षणया कर्मरूपया कामक्रोधादिलक्षणं मृत्युं संसारमेव तर्तु-मिच्छन् अहं राज्यादि करोमि अविद्यया मृत्युं तीर्त्वा विद्ययामृत-मश्नुत इति श्रुतेः ॥ ९ ॥

पञ्चभूतात्मके देहे देही मोहतमोवृतः।
अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिम्॥ १२॥
आकाशवाय्वग्निजलपृथिवीभ्यः पृथक् स्थिते।
आत्मन्यात्ममयं भावं कः करोति कलेवरे॥ १३॥
कलेवरोपभोग्यं हि गृहक्षेत्रादिकञ्च कः।
अदेहे ह्यात्मनि प्राज्ञो ममेदमिति मन्यते॥ १४॥

[illegible] ॥ १२ ॥

कुतस्तत्रापि [illegible] आकाशेति। आकाशादिभ्यः [illegible] पृथक् स्थिते [illegible] कः कुर्यात्॥ १३॥ [illegible] अदेहे [illegible]

इत्थञ्च पुत्रपौत्रेषु तद्देहोत्पादितेषु कः ।
करोति पण्डितः स्वाम्यमनात्मनि कलेवरे ॥ १५ ॥
सर्वं देहोपभोगाय कुरुते कर्म मानवः ।
देहश्चान्यो यदा पुंसस्तदा बन्धाय तत परम् ॥ १६ ॥
मृण्मयं च यथा गेहं लिप्यते च मृदम्भसा ।
पार्थिवोऽयं तथा देहो मृदम्ब्वालेपनस्थितः ॥ १७ ॥
पञ्चभूतात्मकैर्भोगैः पञ्चभूतात्मकं वपुः ।
आप्यायते यदि ततः पुंसो गर्व्वोऽत्र किं ततः ॥ १८ ॥
अनेकजन्मसाहस्रीं संसारपदवीं व्रजन् ।
मोहश्रमं प्रयातोऽसौ वासनारेणुगुण्ठितः ॥ १९ ॥

सम्बन्धेन ॥ १४ ॥ एवं कलेवरे अनात्मनि सति तदुत्पादितेषु पुत्रादिषु कः स्वाम्यं कुर्यात् ॥ १५ ॥ तदेवं देहगेहादिष्वहंममाभिमानयोरविद्यात्वं समर्थितम् । इदानीं तत्पूर्वक कर्तृत्वभोक्तृत्वाद्यपि अविद्यामयमेवेत्याह सर्वमित्यादिना । देहश्च यदा पुंसः सकाशादन्यस्तदा पुंसो भोगसम्बन्धो नास्त्येव परं केवलं तत् कर्म तस्य बन्धायैव स्यात् ॥ १६ ॥

देहोपभोगायेति यदुक्तं तदेव दृष्टान्तेन समर्थयते मृण्मयेति द्वाभ्याम् । मृदम्बुभ्यामन्नपानरूपाभ्यामालेपनेन स्थितिर्यस्य स तथा ॥ १७ ॥ भोगैर्भुज्यमानैरन्नादिभिः ॥ १८ ॥ देहधर्मं पुंसो बन्धायेत्युक्तम् । तत्र हेतुमाह अनेकेति सहस्रमेव साहस्रम् अनेकानि जन्मसाहस्राणि यस्यां तां संसाररूपां पदवीं मार्गं गच्छन् असौ पुमान् मोहश्रमं मोहः कर्तृत्वभोक्तृत्वाद्यभिनिवेशः तत्कृतश्रमं प्राप्तः । यतः वासना अहंममेत्यादिमिथ्याज्ञानसंस्काराः सैव रेणुस्तेन गुण्ठितः ॥ १९ ॥

प्रक्षाल्यते यदा सोऽस्य रेणुर्ज्ञानोष्णवारिणा ।
तदा संसारपान्थस्य याति मोहश्रमः शमम् ॥ २० ॥
मोहश्रमे शमं याते स्वच्छान्तःकरणः पुमान् ।
अनन्यातिशयाबाधं परं निर्वाणमृच्छति ॥ २१ ॥
निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमला धर्माः प्रकृतेस्ते तु नात्मनः ॥ २२ ॥
जलस्य नाग्निना संगः स्थालीसङ्गात्तथापि हि ।
शब्दोद्रेकादिकान् धर्मांस्तत् करोति यथा मुने ॥ २३ ॥
तथात्मा प्रकृतेः सङ्गादहंमानादिदूषितः ।
भजते प्राकृतान् धर्मानन्यस्तेभ्यो हि सोऽव्ययः ॥ २४ ॥
तदेतत् कथितं बीजमविद्यायास्तव प्रभो ।
क्लेशानां च क्षयकरं योगादन्यन्न विद्यते ॥ २५ ॥

यदा तस्य [illegible] प्रक्षाल्यत इति । [illegible] [illegible] सुखैकतानतोऽपि [illegible] [illegible] ॥ २० ॥

ततः किमत आह मोहश्रम इति । न विद्यते [illegible] तदनन्यातिशयं तच्च तदबाधं च [illegible] निर्वाणं सुखं [illegible] प्राप्नोतीति ॥ २१ ॥ ननु [illegible] निर्वाणमात्मनः [illegible] एव आह निर्वाणमय इति ॥ २२ ॥ ननु तर्हि [illegible] दुःखादिधर्मानिवाप्नोति [illegible] [illegible] तथापि [illegible] जलस्य तु तदग्निना संगं [illegible] शब्दोद्रेकादीन् यथा करोति भजते ॥ २३ ॥ तथा प्राकृते देहे [illegible] प्राकृतान् धर्मान् भजते ॥ २४ ॥ [illegible] योग

खाण्डिक्य उवाच ।

तन्तु ब्रूहि महाभाग ! योगं योगविदुत्तम ! ।
विज्ञातयोगशास्त्रार्थस्त्वमस्यां निमिसन्ततौ ॥ २६ ॥

केशिध्वज उवाच ।

योगस्वरूपं खाण्डिक्य ! श्रूयतां गदतो मम ।
यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः ॥ २७ ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं तथा ॥ २८ ॥
विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुनिः ।
चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥ २९ ॥
आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने ! ।
विकार्य्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥ ३० ॥
आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥ ३१ ॥

रुपसंहरति तदेतदिति । अविद्यायाः पञ्चपर्वविपर्ययरूपायाः बीजं मोहतमःसंज्ञम् आत्मानात्मज्ञानम् ॥ २५ ॥ २६ ॥

यत्र योगे स्थितः सन् मुनिः ब्रह्मलयं प्राप्य न च्यवते पुनर्न संसरति ॥ २७ ॥ योगेऽपेक्षितं मनसो निर्विषयत्वं विना न सिध्यतीत्याशयेनाह मन इति ॥ २८ ॥ अतो मुमुक्षुणा कुर्य्यादित्याह विषयेभ्य इति । विज्ञानात्मा विवेकज्ञानयुक्तः पुमान् शब्दादिभ्यो मनः प्रत्याहृत्य तेन मनसा परम् ईश्वरं चिन्तयेत् ॥ २९ ॥ ततः किमत आह आत्मभावमिति । चिन्तितं तद् ब्रह्मरूपं ध्यायिनं पुरुषम् आत्मभावं आत्मैक्यं नयति विकार्य्यं विकारोन्मुखं लोहं चुम्बकः आकर्षः अयस्कान्तो यथा । अयन्तु दृष्टान्तः संयोगमात्रे न तु तदैक्ये ॥ ३० ॥ इदानीं योगस्वरूपं

एवमत्यन्तवैशिष्ट्ययुक्तधर्मोपलक्षणः ।
यस्य योगः स वै योगी मुमुक्षुरभिधीयते ॥ ३२ ॥
योगयुक् प्रथमं योगी युञ्जमानो विधीयते ।
विनिष्पन्नसमाधिस्तु परं ब्रह्मोपलब्धिमान् ॥ ३३ ॥
यद्यन्तरायदोषेण दूष्यते नास्य मानसम् ।
जन्मान्तरैरभ्यसतो मुक्तिः पूर्वस्य जायते ॥ ३४ ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात् ॥ ३५ ॥
ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वमनो नयन् ॥ ३६ ॥

[illegible] ॥ ३२ ॥

[illegible] ॥ ३३ ॥ [illegible] ॥ ३४ ॥ [illegible] ॥ ३५ ॥ [illegible] ॥ ३६ ॥

स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ॥ ३७ ॥
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः ॥३८॥
एकं भद्रासनादीनां समास्थाय गुणैर्युतः ।
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥ ३९ ॥
प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥ ४० ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात् तयोः ॥ ४१ ॥

स्वीयं मनो ब्रह्मविषये योग्यतां प्रापयन् । परस्मिन् ब्रह्मणि च मनः प्रवणं कुर्वीतेत्यनेन ईश्वरप्रणिधानाख्यं पञ्चमं नियमं दर्शयति ॥३७॥३८॥

आसनमाह एकमिति । यमाख्यैर्नियमाख्यैश्च गुणैर्युतः सन् । भद्रासनादीनां मध्ये एकं योगिनः समाश्रयीत । गुल्फौ तु वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् । पार्श्वे पादौ च हस्ताभ्यां दृढं बद्ध्वा सुनिश्चलम् । भद्रासनं भवेदेतत् सर्वव्याधिविनाशनमित्यादि ॥ ३९ ॥

प्राणायाममाह प्राणाख्यमित्यादि । सबीजः सालम्बनो भगवन्मूर्त्तिध्यानतज्जपसंयुतः ॥ ४० ॥ द्विविधस्यापि तस्य पुनस्त्रैविध्यमाह परस्परेणेति । निःश्वासेन मुखनासिकाभ्यां निर्गच्छति यो वायुः स प्राणः । उच्छ्वासेनान्तः प्रविशति यः सोऽपानः । तत्र प्राणवृत्त्या अपानवृत्तेरभिभवो निरोधो रेचकाख्यः प्राणायामः । एवमपानवृत्त्या प्राणवृत्तेरभिभवः पूरकाख्यः । एवमनेन परस्पराभिभवप्रकारद्वयेन च स प्राणायामो द्विधा । अनयोर्युगपत् संयमात् कुम्भकाख्यस्तृतीयः प्राणायामः । यद्वा बहिर्यानेनैकमेव पदं तत्र चावयवः । बहिर्यानेन सद्गुरूपदिष्टमार्गेण रेचकपूरकाभ्यां यत् परस्पराभिभूतं द्वयम् । अथ कुम्भकेनोभयोः सहाभिभवः । एवमभिभवत्रयेण प्राणायाम इति ॥४१॥

तस्य चालम्बनवतः स्थूलं रूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥ ४२ ॥
शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्यात् चित्तानुकारीणि प्रत्याहारपरायणः ॥ ४३ ॥
वश्यता परमा तेन जायतेऽतिचलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥ ४४ ॥
प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतैस्ततः कुर्य्यात् स्थिरं चेतः शुभाश्रये ॥ ४५ ॥

खाण्डिक्य उवाच ।

कथ्यतां मे महाभाग ! चेतसो यः शुभाश्रयः ।
यदाधारमशेषन्तत् हन्ति दोषमनुद्भवम् ॥ ४६ ॥

केशिध्वज उवाच ।

आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ।
भूप ! मूर्त्तममूर्त्तञ्च परञ्चापरमेव च ॥ ४७ ॥

[illegible] तस्य [illegible] स्थूलं [illegible] ॥ ४२ ॥ [illegible] चित्तानुकारीणि [illegible] ॥ ४३ ॥ ४४ ॥ तस्मात् प्राणायाम- [illegible] प्राणायामेनेति ॥ ४५ ॥ यदाधारमिति [illegible] हन्ति [illegible] ॥ ४६ ॥ [illegible] आश्रय इति । चेतस आश्रयो ब्रह्म [illegible] मूर्त्तामूर्त्तपरापरभेदेन [illegible] विषय इति [illegible] । तच्च ब्रह्म मूर्त्तममूर्त्तं चेति द्विधा स्वभावतः [illegible] मूर्त्तं मूर्त्तिमत् । अमूर्त्तं तद्रहितं तत् पुनः प्रत्येकं परञ्चापरञ्चेति द्विधा । तत्र पर- मूर्त्तं [illegible] । परं मूर्त्तं [illegible]

त्रिविधा भावना भूप । विश्वमेतन्निबोध मे ।
ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका ॥ ४८ ॥
ब्रह्मभावात्मिका ह्येका कर्मभावात्मिका परा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥ ४९ ॥
सनन्दनादयो ब्रह्मन् । ब्रह्मभावनया युताः ।
कर्मभावनया चान्ये देवाद्याः स्थावराश्चराः ॥ ५० ॥
हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका द्विधा ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥ ५१ ॥
अक्षीणेषु समस्तेषु विशेषज्ञानकर्मसु ।
विश्वमेतत् परं चान्यद्भेदभिन्नदृशां नृप ॥ ५२ ॥

द्वितीयादिविधरूपम् अपरमूर्तं हिरण्यगर्भादिविश्वरूपम् ॥ ४७ ॥ तदेवं परब्रह्मणः परापरमूर्तिरूपतया चतुर्द्धोक्तं तत्र चतुर्थं विश्वरूपं प्राह त्रिविधेत्यादिना त्रिविधभावनाश्रयजीवात्मकत्वात् । तदुपचारेण त्रिविधा भावनेत्युच्यते । तद्धि हरेः स्थूलं रूपम् अतः पररूपप्राप्त्युपायत्वात् तत्र प्रथमं मनः संधार्यमिति भावः । भावना नाम ज्ञानविशेषजा वासना तां त्रिविधामपि संक्षेपतो द्रष्टुं बुध्यस्वेति ॥ ४८ ॥ तामेव विषयत्रैविध्येन विविनक्ति ब्रह्मभावात्मिकेति । भावभावना भावो वस्तु तद्विषया भावना त्रिविधा ॥ ४९ ॥

तत्र परं ब्रह्मैव भावनाः, परं कर्मैव कर्मः, परं पुनरुभयमिदम् अनुसंदध्युः इत्येवं त्रिविधभावनायुक्तान् जीवानुदाहरति सनन्दनादय इति द्वाभ्याम् ॥ ५० ॥ बोधः स्वरूपविषयः अधिकारश्च कर्मादिविषयः तद्युक्तेषु तदुभयानुसंधानात्मिका द्विधा भावना विद्यते ॥ ५१ ॥ ब्रह्मभावनावन्तोऽपि सनन्दनादयो जीवा एव देहानुसंधानाविच्छेदेऽपि सम्यक्-पदेनाह अक्षीणेष्विति । विशेषज्ञानहेतुषु कर्मसु निःशेषमक्षीणेषु सत्सु

प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ ५३ ॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ॥ ५४ ॥
न तद्योगयुजा शक्यं नृप ! चिन्तयितुं यतः ।
ततः स्थूलं हरेरूपं चिन्तयेद् विश्वगोचरम् ॥ ५५ ॥
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ।
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ॥ ५६ ॥
गन्धर्वयक्षा दैत्याद्याः सकला देवयोनयः ।
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः ॥ ५७ ॥
भूप ! भूतान्यशेषाणि भूतानां ये च हेतवः ।
प्रधानादिविशेषान्तं चेतनाचेतनात्मकम् ॥ ५८ ॥
एकपादं द्विपादञ्च बहुपादमपादकम् ।
मूर्त्तमेतत् हरेरूपं भावनात्रितयात्मकम् ॥ ५९ ॥

विश्वमेतदन्यत् परं ब्रह्म चान्यद्धि [illegible] भेदेन भेदवांश्च अचिन्त्यश्च [illegible]-द्वयात् [illegible] ध्यातृध्येयभेदशून्यत्वात् [illegible] पर-मार्थः ॥ ५२ ॥

प्रत्यस्तमितभेदं प्रत्यस्तमितमिति द्वाभ्याम् । प्रत्यस्तमितः परि-क्षीणो भेदो यस्मिन् तत् वचसामगोचरम् आत्मसंवेद्यं आत्मानुभवगम्यम् ॥ ५३ ॥ विश्वस्वरूपवैरूप्यं वैलक्षण्यमेव लक्षणं यस्य तत् पर-मात्मनो विष्णोः परं रूपमित्यन्वयः ॥ ५४ ॥ ननु तर्हि [illegible] तेन चिन्तयितुं शक्यं नेति । योगयुजा प्रथमः आरम्भिणा ॥ ५५ ॥ स्थूलरूपं प्रपञ्चयति हिरण्यगर्भ इत्यादिचतुर्भिः ॥ ५६ ॥ ५७ ॥ [illegible]विशेषान्तं [illegible] ॥ ५८ ॥ एतानि सर्वाणि चराचराणि [illegible] भावनात्रितयात्मकं मूर्त्तं हरे रूपमित्यन्वयः ॥ ५९ ॥

एतत् सर्वमिदं विश्वं जगदेतच्चराचरम् ।
परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥ ६० ॥
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥ ६१ ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्वगा ।
संसारतापानखिलानवाप्नोत्यतिसन्ततान् ॥ ६२ ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्वभूतेषु भूपाल ! तारतम्येन लक्ष्यते ॥ ६३ ॥
अप्राणवत्सु स्वल्पाल्पा स्थावरेषु ततोऽधिका ।
सरीसृपेषु तेभ्योऽप्यतिशक्त्या पतत्रिषु ॥ ६४ ॥
पतत्रिभ्यो मृगास्तेभ्यः स्वशक्त्या पशवोऽधिकाः ।
पशुभ्यो मनुजाश्चातिशक्त्या पुंसः प्रभाविताः ॥ ६५ ॥
तेभ्योऽपि नागगन्धर्वयक्षाद्या देवता नृप ! ।

एतच्च न तत्त्वतो विष्णोः स्वरूपमिति चिन्तनीयं किन्तु तच्छक्ति-व्याप्तमित्याह सर्वमिति ॥६०॥ कास्तौ शक्तयः यया व्याप्तमित्यत आह विष्णुशक्तिः विष्णोः स्वरूपभूता परा चिद्रूपा शक्तिः । परम-परब्रह्मपरतत्त्वाद्याख्या प्रोक्ता एतत्सर्वमिदं यद् सत्तामात्रमित्यत्र प्रागुक्तं स्वरूपमेव कार्योन्मुखं शक्तिशब्देनोक्तम् । इदानीं परमात्म-व्याप्त भावेन तथात्मनो जगत्स्वरूपं निरूपयितुमाह क्षेत्रज्ञाख्येति । व्याप्यव्यापकभेदहेतुभूतं विष्णोः शक्त्यन्तरमाह अविद्येति । कर्मेति च संज्ञा यस्याः सा तथा च मायोपलक्षितं देवदेवमनोरविद्याकर्मणोरे-कीकृत्योक्तिः । संसारकारणसामर्थ्यात् ॥ ६१ ॥ तदेवाह ययेति । वस्तुतः सर्वगता अपि सा क्षेत्रज्ञशक्तिः यया अविद्यया वेष्टिता आच्छादिता सती भेदं प्राप्य कर्मभिः संसारतापान् प्राप्नोतीत्यर्थः ॥ ६२ ॥

शक्रः समस्तदेवेभ्यस्ततश्चाथ प्रजापतिः ॥ ६६ ॥
हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः ।
एतान्यशेषरूपस्य तस्य रूपाणि पार्थिव ! ॥ ६७ ॥
यतस्तच्छक्तियोगेन व्याप्तानि नभसा यथा ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ! ॥ ६८ ॥
अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः ।
समस्ताः शक्तयश्चैता नृप ! यत्र प्रतिष्ठिताः ॥ ६९ ॥
तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्महत् ।
समस्तशक्तिरूपाणि तत् करोति जनेश्वर ! ॥ ७० ॥
देवतिर्य्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया ।

जीवानां [illegible] एव [illegible] ॥ ६४ ॥ तारतम्यमेवाह [illegible] ॥ ६५ ॥ ६६ ॥ ततः शक्रादित्यादिना प्रजापति [illegible] ॥ ६६ ॥ ६७ ॥

[illegible] नभसा [illegible] । तदेव [illegible] रूपं परिकीर्त्तितम् । [illegible] प्रथमं रूपं [illegible] द्वितीयम् [illegible] रूपमाह द्वितीयमिति । योगिध्येयम् [illegible] ॥ ६८ ॥ तदेव विशिनष्टि [illegible] इति । एताः [illegible] समस्ताः शक्तयो यत्र [illegible] प्रतिष्ठिताः ॥ ६९ ॥ [illegible] रूपं [illegible] तत् । [illegible] रूपाणि ॥ ७० ॥ [illegible]

जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥ ७१ ॥
तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप ।
चिन्त्यमात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशनम् ॥ ७२ ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥ ७३ ॥
तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥ ७४ ॥
शुभाश्रयः स्वचित्तस्य सर्वगस्य तथात्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥ ७५ ॥
अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः ॥ ७६ ॥

दशरूपचेष्टायुक्तानि । देव उपेन्द्रादिः । तिर्यग्वराहमत्स्यादिः । मनुष्यो रामादिः । व्यामिश्रो नृसिंहादिः । लीलया कृतिः समर्थयते जगतामिति । कर्मनिमित्तजाता हि चेष्टा परिच्छिन्ना सप्रतिघाता च भवति । इयन्तु व्यापिनी सर्वगतविषया । अव्याहतात्मिका च । अतः सा चेष्टा भगवत्स्वरूपस्य लीलैवेत्यर्थः ॥ ७१ ॥

भवत्येवं प्रस्तुते त्रिधा भावितं तत्र च तद्रूपमिति चतुर्भिः । पूर्वोक्तेषु तद्रूपं तृतीयं लीलाविग्रहरूपम् ॥ ७२ ॥ कक्षं शुष्कतृणम् ॥ ७३ ॥ समस्तशक्तीनामाश्रये तत्र अवतारस्वरूपे चेतसः स्थितिं कुर्वीत ॥ ७४ ॥ सर्वगस्यात्मनः परब्रह्मणोऽप्याश्रयः प्रतिष्ठा तदुक्तं भगवता । ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य चेति । त्रिभावभावनातीतः अवतारत्वात् ॥ ७५ ॥ अर्वाग्देवतानिन्दया भगवन्मूर्तिधारणामेव दृढीकरोति अन्ये

मूर्त्तं भगवतो रूपं सर्वापाश्रयनिःस्पृहम् ।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते ॥ ७७ ॥
तच्च मूर्त्तं हरे रूपं यादृक् चिन्त्यं नराधिप ।
तत् श्रूयतामनाधारे धारणा नोपपद्यते ॥ ७८ ॥
प्रसन्नचारुवदनं पद्मपत्रोपमेक्षणम् ।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥ ७९ ॥
समकर्णान्तविन्यस्तचारुकर्णविभूषणम् ।
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ॥ ८० ॥
वलित्रिभङ्गिना मग्ननाभिना चोदरेण वै ।
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भुजम् ॥ ८१ ॥
समस्थितोरुजङ्घं च सुस्थिताङ्घ्रिवराम्बुजम् ।
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्मलवाससम् ॥ ८२ ॥
किरीटचारुकेयूरकटकादिविभूषितम् ।
शार्ङ्गशङ्खगदाखड्गचक्राक्षवलयान्वितम् ॥ ८३ ॥
चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् ।
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ॥ ८४ ॥

[illegible] ॥ ७६ ॥ [illegible] ॥ ७७ ॥ [illegible] ॥ ७८ ॥ ७९ ॥ [illegible] ॥ ८० ॥ [illegible] ॥ ८१ ॥ [illegible] ॥ ८२ ॥ [illegible] ॥ ८३ ॥ ८४ ॥ [illegible]

व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः।
नापयाति यदा चित्तात् सिद्धां मन्येत तां तदा ॥ ८५ ॥
ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः।
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ॥ ८६ ॥
सा यदा धारणा तद्वदवस्थानवती ततः।
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत् ॥ ८७ ॥
तदेकावयवं देवं चेतसा हि पुनर्बुधः।
कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ॥ ८८ ॥
तद्रूपप्रत्यया चैका सन्ततिश्चान्यनिःस्पृहा।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ॥ ८९ ॥

व्रजत इति। चित्ताद्यदा मूर्तिर्नापयाति तदा तां धारणां सिद्धां मन्येत ॥ ८५ ॥ मूर्तिधारणायामेव आयुधभूषणावयवपरित्यागेन आलम्बनसौक्ष्म्यमारभ्यमाह तत इति ॥ ८६ ॥

अवस्थानवती दृढा ॥ ८७ ॥ तत् ततः एकावयवं पादाङ्गुष्ठादि-मात्रावयवान्तं चित्तं ततो विलम्ब्य एकावयवयुक्तं देवं चेतसा कुर्यात् भावयेत्। तदुक्तं भागवते। तत् सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्। नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखमिति। तदेवं लीलामूर्ति-धारणैव व्याख्याता सा च क्रमेण चतुर्द्धा। इदानीं तत्कारणेश्वर-धारणामाह ततोऽवयविनीति समस्तावयवदर्शिन्यादिमोक्ता अवयवा येन लीलामूर्तिर्मा आविष्कृता तस्मिन्। यद्वा अवयवा लीलावतारा येन सङ्गृहीतास्तस्मिन् प्रणिधानं चित्तस्थैर्यं तत्परो भवेत् ॥ ८८ ॥ इदानीं ध्यानमाह तद्रूपेति। तद्रूपस्य धारणाविषयस्य वस्तुनः प्रत्यया यस्यां सन्ततौ वा एका अविच्छिन्ना सन्ततिः। अन्यनिःस्पृहा विषयान्तरेष्वपेक्षणीयनामः विजातीयप्रत्ययानन्तरितः। सजातीयप्रत्ययप्रवाहो ध्यानमित्यर्थः। तच्च प्रथमैर्यमादिभिर्धारणान्तैः षड्भिरङ्गैर्निष्पाद्यते

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्।
मनसा ध्याननिष्पाद्यः समाधिः सोऽभिधीयते ॥ ९० ॥
विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव।
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥ ९१ ॥
क्षेत्रज्ञः कारण ज्ञानं करणं तेन तस्य तत्।
निष्पाद्य मुक्तिकार्यं वै कृतकृत्यो निवर्तते ॥ ९२ ॥
तद्भावभावनापन्नस्ततोऽसौ परमात्मना।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥ ९३ ॥
विभेदजनके ज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥ ९४ ॥
इत्युक्तस्ते मया योगः खाण्डिक्य परिपृच्छतः।
संक्षेपविस्तराभ्यां तु किमन्यत् क्रियतां तव ॥ ९५ ॥

॥ ८९ ॥ तस्यैव ध्येयस्य कल्पनाहीनं ध्यातृध्यानध्येयभेदहीनं यद्- भवति, यत् [illegible] तदेवाकारतया [illegible] ध्यानं ध्यानमध्य- [illegible] परब्रह्मणि [illegible] ध्यानम्। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति ॥ ९० ॥

विज्ञानं मुक्तिप्रापकं [illegible] विज्ञानमिति। समाधिजन्यस्वरूप- साक्षात्कारो विज्ञानम्। प्रक्षीणा अशेषाः [illegible] भावना यस्य स ॥ ९१ ॥ ननु [illegible] विज्ञानेनैव [illegible] [illegible] इति ॥ ९२ ॥ ननु ज्ञानिनोऽपि भेदप्रतीतिरस्ति [illegible] [illegible] ॥ ९३ ॥ [illegible] [illegible] विनष्टे सति न पुनः [illegible] विभेदेति ॥ ९४ ॥ ९५ ॥

खाण्डिक्य उवाच ।

कथितं योगसद्भावे सर्वमेव कृतं मम ।
तवोपदेशेनाशेषो नष्टश्चित्तमलो यतः ॥ ९६ ॥
ममेति यन्मया प्रोक्तमसदेतन्न चान्यथा ।
नरेन्द्र गदितुं शक्यमपि विज्ञेयवेदिभिः ॥ ९७ ॥
अहं ममेत्यविद्येयं व्यवहारस्तथानयोः ।
परमार्थस्त्वसंलाप्यो गोचरो वचसां न सः ॥ ९८ ॥
तद्गच्छ श्रेयसे सर्वं ममैतद्भवता कृतम् ।
यद्विमुक्तिप्रदो योगः प्रोक्तः केशिध्वजाव्ययः ॥ ९९ ॥

पराशर उवाच ।

यथार्हपूजया तेन खाण्डिक्येन स पूजितः ।
आजगाम पुरं ब्रह्मंस्ततः केशिध्वजो नृपः ॥ १०० ॥
खाण्डिक्योऽपि सुतं कृत्वा राजानं योगसिद्धये ।
वनं जगाम गोविन्दे विनिवेशितमानसः ॥ १०१ ॥
तत्रैकान्तमतिर्भूत्वा यमादिगुणशोभितः ।
विष्ण्वाख्ये निर्मले ब्रह्मण्यवाप नृपतिर्लयम् ॥ १०२ ॥

योगस्य सद्भावे याथार्थ्ये कथिते सति ॥ ९६ ॥ ननु चित्तमले अहंममतादौ नष्टे मम तवोपदेशेनेति तदु वचनं न विरुध्येतेत्यत आह ममेति । यन्मया प्रोक्तम् एतदसदेव बाधितानुवृत्त्या प्रोक्तम् । अन्यथा तु विज्ञेयवेदिभिः अवगततत्त्वार्थैः गदितुमपि न शक्यं कुतः पुनः प्रारब्धकर्मभोगस्तेषामित्यर्थः ॥ ९७ ॥

एतत् प्रपञ्चयति अहंममेति ॥ ९८ ॥ ९९ ॥ १०० ॥ राजानं स्वधर्मपरिपालनादिशासिनं सुतं कृत्वा ॥ १०१ ॥ १०२ ॥ [illegible]

केशिध्वजोऽपि मुक्त्यर्थं स्वकर्मक्षपणोन्मुखः।
बुभुजे विषयान् कर्म चक्रे चानभिसन्धितम्॥१०३॥
स कल्याणोपभोगैश्च क्षीणपापोऽमलस्ततः।
अवाप सिद्धिमत्यन्तं तापक्षयफलां द्विज!॥१०४॥

अष्टमोऽध्यायः।

पराशर उवाच।

इत्येष कथितः सम्यक् तृतीयः प्रतिसञ्चरः।
आत्यन्तिका विमुक्तिर्या लयो ब्रह्मणि शाश्वते॥१॥
सर्गश्च प्रतिसर्गश्च वंशा मन्वन्तराणि च।
वंशानुचरितं चैव भवतो गदितं मया॥२॥
पुराणं वैष्णवञ्चैतत् सर्वकिल्बिषनाशनम्।
विशिष्टं सर्वशास्त्रेभ्यः पुरुषार्थोपपादकम्॥३॥

[illegible]

[illegible]

तुभ्यं यथावन्मैत्रेय ! प्रोक्तं शुश्रूषवेऽव्ययम् ।
यदन्यदपि वक्तव्यं तत् पृच्छाद्य वदामि ते ॥ ४ ॥

मैत्रेय उवाच ।

भगवन् ! कथितं सर्वं यत् पृष्टोऽसि मया मुने ! ।
श्रुतञ्चैतन्मया भक्त्या नान्यत् प्रष्टव्यमस्ति ते ॥ ५ ॥
विच्छिन्नाः सर्वसन्देहा वैमल्यं मनसः कृतम् ।
त्वत्प्रसादात् मया ज्ञाता उत्पत्तिस्थितिसंयमाः ॥ ६ ॥
ज्ञातश्चतुर्विधो राशिः शक्तिश्च त्रिविधा गुरो ! ।
विज्ञाता चापि कार्त्स्न्येन त्रिविधा भावभावना ॥ ७ ॥
त्वत्प्रसादान्मया ज्ञातं ज्ञेयैरन्यैरलं द्विज ! ।
यथैतदखिलं विष्णोर्जगन्न व्यतिरिच्यते ॥ ८ ॥
कृतार्थोऽस्म्यपसन्देहस्त्वत्प्रसादान्महामुने ! ।
वर्णधर्मादयो धर्मा विदिता यदशेषतः ॥ ९ ॥
प्रवृत्तञ्च निवृत्तञ्च ज्ञातं कर्म मयाखिलम् ।
प्रसीद विप्रप्रवर ! नान्यत् प्रष्टव्यमस्ति मे ॥ १० ॥
यदस्य कथनायासैर्योजितोऽसि मया गुरो ! ।
तत् क्षम्यतां विशेषोऽस्ति न सतां पुत्त्रशिष्ययोः ॥ ११ ॥

चतुर्विधो राशिः । चतुर्विभागः स च सृष्टौ चतुर्धा संस्थितः स्थितौ । प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्द्दन इति प्रथमांशोक्तः पूर्वाध्यायोक्तो वा । परतत्त्वे तदवतारजगद्रूपः त्रिविधा शक्तिः विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा । अविद्या कर्मसंज्ञाख्या तृतीया शक्तिरिष्यत इत्युक्ता । त्रिविधा भावभावना ब्रह्मभावना कर्मभावना उभयभावना चेति ॥ ७ ॥ यथा जगद् विष्णोर्न व्यतिरिच्यते तथा ज्ञातमित्यन्वयः ॥ ८ ॥

पराशर उवाच ।

एतत् ते यन्मयाख्यातं पुराणं वेदसम्मितम् ।
श्रुतेऽस्मिन् सर्वदोषोत्थपापराशिः प्रणश्यति ॥ १२ ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं कृत्स्नं मयात्र तव कीर्त्तितम् ॥ १३ ॥
अत्र देवास्तथा दैत्या गन्धर्वोरगराक्षसाः ।
यक्षा विद्याधराः सिद्धाः कथ्यन्तेऽप्सरसस्तथा ॥ १४ ॥
मुनयो भावितात्मानः कथ्यन्ते तपसान्विताः ।
चातुर्वर्ण्यं तथा पुंसां विशिष्टचरिता नराः ॥ १५ ॥
पुण्याः प्रदेशा मेदिन्याः पुण्या नद्योऽथ सागराः ।
पर्वताश्च महापुण्याश्चरितानि च धीमताम् ॥ १६ ॥
वर्णधर्मादयो धर्मा वेदशास्त्राणि कृत्स्नशः ।
येषां संश्रवणात् सद्यः सर्वपापैः प्रमुच्यते ॥ १७ ॥
उत्पत्तिस्थितिनाशानां हेतुर्यो जगतोऽव्ययः ।
स सर्वभूतः सर्वात्मा कथ्यते भगवान् हरिः ॥ १८ ॥
अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्वृकैरिव ॥ १९ ॥

वेदैः सम्मितं तुल्यम् । [illegible] ॥ १२ ॥ [illegible] ॥ १३ ॥ १४ ॥ १५ ॥ धीमतां ज्ञानिनां चरितानि च ॥ १६ ॥ १७ ॥ १८ ॥ अवशेनापि [illegible] यस्य नाम्नि कीर्त्तिते सति । [illegible] ॥ १९ ॥ [illegible]

यन्नाम कीर्त्तितं भक्त्या विलापनमनुत्तमम् ।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥ २० ॥
कलिकल्मषमत्युग्रनरकार्त्तिप्रदं नृणाम् ।
प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते ॥ २१ ॥
हिरण्यगर्भदेवेन्द्ररुद्रादित्याश्विवायुभिः ।
किन्नरैर्वसुभिः साध्यैर्विश्वेदेवादिभिः सुरैः ॥ २२ ॥
यक्षरक्षोगणैः सिद्धैर्दैत्यगन्धर्वदानवैः ।
अप्सरोभिस्तथा तारानक्षत्रैः सकलैर्ग्रहैः ॥ २३ ॥
सप्तर्षिभिस्तथा धिष्ण्यैर्धिष्ण्याधिपतिभिस्तथा ।
ब्राह्मणाद्यैर्मनुष्यैश्च तथैव पशुभिर्मृगैः ॥ २४ ॥
सरीसृपैर्विहङ्गैश्च प्रेताद्यैः समहीरुहैः ।
वनाद्रिसागरसरित्पातालैः सधरादिभिः ॥ २५ ॥
शब्दादिभिश्च सहितं ब्रह्माण्डमखिलं द्विज ।
मेरोरिवाणुर्यस्यैतद् यन्मयश्च द्विजोत्तम ॥ २६ ॥

यन्नामेति । नामकीर्त्तनविशेषः पापमेव विनाशयति तत्संस्कारमपि विलाप्यते । इदमशेषाणां सर्वसंस्काराणां पापानां विलापनं विनाशकं न चान्येन निःशेषपापक्षयः प्रायश्चित्तादिना यथा धातूनां सुवर्णादीनाम् बहुतरसंसर्गजमलप्रक्षालनादि पाषाणसंयोगजं मलं न नाशयति किन्तु पावक एव अतः सर्वोत्तममिदमेवेत्यर्थः ॥ २० ॥

हरिस्मृतेः फलमाह कलिकल्मषमिति । यत्र यस्मिन् ॥ २१ ॥ हिरण्यगर्भादिभिः सहितं ब्रह्माण्डं मेरोः परमाणुरिवाल्पमल्पं यस्य स विष्णुरस्य कीर्त्तित इति षष्ठेनान्वयः ॥२२॥२३॥ धिष्ण्यैः स्थानैः ॥ २४ ॥२५॥ तन्मयमिति पाठे स च विष्णुः कीर्त्तित इति शेषः ॥२६॥

स सर्वः सर्ववित् सर्वस्वरूपो रूपवर्जितः।
कीर्त्त्यते भगवान् विष्णुरत्र पापप्रणाशनः॥ २७॥
यदश्वमेधावभृथे स्नातः प्राप्नोति वै फलम्।
सकलं तदवाप्नोति श्रुत्वैतन्मुनिसत्तम॥ २८॥
प्रयागे पुष्करे चैव कुरुक्षेत्रे तथार्णवे।
कृतोपवासः प्राप्नोति तदस्य श्रवणान्नरः॥ २९॥
यदग्निहोत्रे सुहुते वर्षेणाप्नोति वै फलम्।
सकलं समवाप्नोति तदस्य श्रवणात् सकृत्॥ ३०॥
यज्ज्यैष्ठशुक्लद्वादश्यां स्नात्वा वै नियतेन्द्रियः।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम्॥ ३१॥
तदाप्नोति फलं सम्यक् समाधानेन कीर्त्तनात्।
पुराणस्यास्य विप्रर्षे केशवार्पितमानसः॥ ३२॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम।
ज्येष्ठामूलेऽमले पक्षे द्वादश्यामुपवासकृत्॥ ३३॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम्॥ ३४॥

॥ २७ ॥ अश्वमेधावभृथे स्नातो यत् फलं प्राप्नोति तत् सकलं [illegible] एतत् पुराणं [illegible] श्रुत्वा प्राप्नोति [illegible] ॥ २८ ॥ प्रयागादौ कृतोपवासः [illegible] फलं प्राप्नोति तदस्य [illegible] प्राप्नोतीत्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

मथुरायां हरिं दृष्ट्वा यत् फलं परमां गतिं प्राप्नोतीत्यर्थः। तत् किं फलं प्राप्नोतीत्यपेक्षायामाह [illegible] इति द्वाभ्याम्। ज्येष्ठामूले [illegible] ज्येष्ठामूलो [illegible] ॥ ३३ ॥ ३४ ॥ अस्यार्थं विवृणोति।

पालनाक्यहि यथान्येषां मुनीनां स्ववंशजैः ।
एतत् किलोच्चरन्त्येषां पितरः सपितामहाः ॥ ३५ ॥
कश्चिदस्मत्कुले जातः कालिन्दीसलिलाप्लुतः ।
अर्चयिष्यति गोविन्दं मधुरायामुपोषितः ॥ ३६ ॥
ज्येष्ठामूले सिते पक्षे येनैवं वयमप्युत ।
परामृद्धिमवाप्स्यामस्तारिताः स्वकुलोद्भवैः ॥ ३७ ॥
ज्यैष्ठे मूले सिते पक्षे समभ्यर्च्य जनार्दनम् ।
धन्यानां कुलजः पिण्डान् यमुनायां प्रदास्यति ॥ ३८ ॥
तस्मिन् काले समभ्यर्च्य तत्र सम्यक् समाहितः ।
दत्त्वा पिण्डान् पितृभ्यश्च यमुनासलिलाप्लुतः ॥ ३९ ॥
यदाप्नोति नरः पुण्यं तारयन् सपितामहान् ।
श्रुत्वाध्यायं तदाप्नोति पुराणस्यास्य भक्तिमान् ॥ ४० ॥
एतत् संसारभीरूणां परित्राणमनुत्तमम् ।
दुःस्वप्ननाशनं नृणां सर्वदुष्टनिबर्हणम् ॥ ४१ ॥
इदमार्षं पुरा प्राह ऋभवे कमलोद्भवः ।
ऋभुः प्रियव्रतायाह स च भागुरयेऽब्रवीत् ॥ ४२ ॥
भागुरिः स्तम्भमित्राय दधीचाय स चोक्तवान् ।
स वै सारस्वते प्रादाद् भृगुः सारस्वतादपि ॥ ४३ ॥

यथाध्ययनात् आप्नोति चतुर्भिः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ यथा-भावेन कीर्तनात् यत् फलं तत्र तदेव समाहितः सन् श्रुत्वापि प्राप्नोती-त्याह तस्मिन् काल इति त्रिभिः ॥ ३९ ॥ ४० ॥ ४१ ॥

एतत्पुराणसंप्रदायं दर्शयन्नाह । इदमार्षमित्यादिना । ऋषि-प्रोक्तमार्षं तेन प्रोक्तमार्षम् ॥ ४२ ॥ ऋभुः प्राप्तवानिति शेषः ॥ ४३ ॥

भृगुणा पुरुकुत्साय नर्मदायै स चोक्तवान् ।
नर्मदा धृतराष्ट्राय नागायापूरणाय च ॥ ४४ ॥
ताभ्यां च नागराजाय प्रोक्तं वासुकये द्विज ।
वासुकिः प्राह वत्साय वत्सश्चाश्वतराय वै ॥ ४५ ॥
कम्बलाय च तेनोक्तमेलापुत्राय तेन च ।
पातालं समनुप्राप्तस्ततो वेदशिरा मुनिः ॥ ४६ ॥
प्राप्यैतदखिलं स वै प्रमतये ददौ ।
दत्तं प्रमतिना चैव जातुकर्णाय धीमते ॥ ४७ ॥
जातुकर्णेन चैवोक्तमन्येषां पुण्यशालिनाम् ।
पुलस्त्यवरदानेन ममाप्येतत् स्मृतिं गतम् ॥ ४८ ॥
मयापि तुभ्यं मैत्रेय यथावत् कथितन्त्विदम् ।
त्वमप्येतत् शमीकाय कलेरन्ते गदिष्यसि ॥ ४९ ॥
इत्येतत् परमं गुह्यं कलिकल्मषनाशनम् ।
यः शृणोति नरः पापैः स सर्वैर्द्विज मुच्यते ॥ ५० ॥
पितृपक्षमनुष्येभ्यः समस्तामरसंस्तुतिः ।
कृता तेन भवेदेतद् यः शृणोति दिने दिने ॥ ५१ ॥
कपिलादानजनितं पुण्यमत्यन्तदुर्लभम् ।
श्रुत्वैतस्य दशाध्यायानवाप्नोति न संशयः ॥ ५२ ॥
यस्त्वेतत् सकलं शृणोति पुरुषः कृत्वा मनस्यच्युतं
सर्वं सर्वमयं समस्तजगतामाधारमात्माश्रयम् ।

॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ [illegible]
[illegible]
[illegible]

ज्ञानं चैयमनन्तमादिरहितं सर्वामराणां हितं
स प्राप्नोति न संशयोऽस्त्यविकलं यद्वाजिमेधे फलम् ॥ ५३
यत्रादौ भगवांश्चराचरगुरुर्मध्ये तथान्ते च स
ब्रह्मज्ञानमयोऽच्युतोऽखिलजगन्मध्यान्तसर्गप्रभुः ।
तच्छृण्वन् पुरुषः पवित्रपरमं भक्त्या पठन् धारयन्
प्राप्नोत्यस्ति न तत् समस्तभुवनेष्वेकान्तसिद्धिर्हरिः ॥ ५४
यस्मिन् न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसां ब्राह्मोऽपि लोकोऽल्पकः ।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥ ५५ ॥
यज्ञैर्यज्ञविदो यजन्ति सततं यज्ञेश्वरं कर्मिणो
यं यं ब्रह्ममयं परापरमयं ध्यायन्ति च ज्ञानिनः ।

[illegible] तत्र [illegible] समस्त[illegible] फल[illegible]युक्तं भवति ॥ ५३ ॥ पवित्रपरमं पवित्रेषु श्रेष्ठं शृण्वन् पठन् यत् यत् फलं प्राप्नोति न तत् क्वाप्यस्ति । यस्मादेकान्तनियता सर्वपापक्षयादिद्वारा सिद्धिर्विष्णुरूपत्वात् तत् प्राप्यफलम् । न च स्वर्गादिवदल्पफलं [illegible] इत्यर्थः ॥ ५४ ॥ हरिकीर्तनमात्रेण सर्वपापक्षयो भवतीति यदुक्तं तत् कैमुत्यन्यायेनोपपादयति यस्मिन्निति । न्यस्ता निक्षिप्ता मतिर्येन अच्युतैकचित्त इति यावत् सः । प्रमादादिकृतैरपि नरकं न याति तस्मिन् सर्वपापक्षयात् । यस्य चिन्तने ध्याने क्रियमाणे स्वर्गोऽपि विघ्नप्रायः यस्मिन्निवेशित आत्मा मनश्च समाधिना येन तस्य ब्राह्मो लोकोऽप्यल्पः तुच्छः यस्मात् यथाकथञ्चिदपि चेतसि स्थितो मुक्तिमेव ददाति । यदेवं स्वार्थमेव केवलं मनोमात्रेणाच्युतचिन्तनाम् ईदृशं फलगौरवं तदा तन्नामकीर्तनेन परेषाम् अप्यघं क्षपयतां स्वकीयाघनाशः किञ्चित्रमित्यर्थः ॥ ५५ ॥

यत्र प्राप्य न जायते न म्रियते नो वर्द्धते क्षीयते
नैवासन्न च सद्भवत्यति ततः किंवा हरेः श्रूयताम् ॥ ५६ ॥
कव्यं यः पितृरूपधृग् विधिहुतं हव्यञ्च भुङ्क्ते प्रभुः
देवत्वे भगवाननादिनिधनः स्वाहास्वधासंज्ञितम् ।
यस्मिन् ब्रह्मणि सर्वशक्तिनिलये मानानि नो मानिनाम्
निष्ठायै प्रभवन्ति हन्ति कलुषं श्रोत्रं स यातो हरिः ॥ ५७ ॥
नान्तोऽस्ति यस्य न च यस्य समुद्भवोऽस्ति
वृद्धिर्न यस्य परिणामविवर्जितस्य ।
नापक्षयञ्च समुपैत्यविकल्पवस्तु
यस्तं नतोऽस्मि पुरुषोत्तममाद्यमीशम् ॥ ५८ ॥
तस्यैव योऽनुगुणभुग् बहुधैक एव
शुद्धोऽप्यशुद्ध इव भाति हि मूर्त्तिभेदैः ।
ज्ञानान्वितः सकलसत्त्वविभूतिकर्त्ता
तस्मै नतोऽस्मि पुरुषाय सदाव्ययाय ॥ ५९ ॥

[illegible] ॥ ५६ ॥ [illegible]

[illegible] ॥ ५७ ॥ [illegible]

[illegible] ॥ ५८ ॥

[illegible]

ज्ञानप्रवृत्तिनियमैक्यमयाय पुंसो
भोगप्रदानपटवे त्रिगुणात्मकाय ।
अव्याकृताय भवभावनकारणाय
वन्दे स्वरूपभवनाय सदाजराय ॥ ६० ॥
व्योमानिलाग्निजलभूरचनामयाय
शब्दादिभोग्यविषयोपनयक्षमाय ।
पुंसः समस्तकरणैरुपकारकाय
व्यक्ताय सूक्ष्मबृहदात्मवते नतोऽस्मि ॥ ६१ ॥
इति विविधमजस्य यस्य रूपं
प्रकृतिपरात्ममयं सनातनस्य ।
प्रदिशतु भगवानशेषपुंसां
हरिरपजन्मजरादिकां स सिद्धिम् ॥ ६२ ॥

इति श्रीविष्णुपुराणे [illegible] पराशरसंहितायां
षष्ठांशे अष्टमोऽध्यायः ।

[illegible] ॥ ५८ ॥ [illegible] । [illegible] ॥ ६० ॥ [illegible] । इदानीमध्यायः [illegible] एतत्पुराणश्रवणादिद्वारेण मोक्षसाधनं पुराणं [illegible] इतीति । प्रकृतिपरात्ममयं प्रकृतिः अव्याकृतरूपा परः पर आत्मा पुरुषः तन्मयम् । अपजन्मजरादिकां सिद्धिं [illegible] ।

सम्पूर्णं विष्णुपुराणम् ।


LIBRARY